This is a reproduction of a library book that was digitized by Google as part of an ongoing effort to preserve the information in books and make it universally accessible.

Google books

https://books.google.com

Digitized by Google

IndL 350.2

Bound

JAN 9 1909

Harvard College Library

FROM THE

PRICE GREENLEAF FUND

Residuary legacy of $711,563 from E. Price Greenleaf, of Boston, nearly one half of the income from which is applied to the expenses of the College Library.

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES

VOL. XXIX.

BENARES:

PRINTED AND PUBLISHED BY BHAGAVATI PRASAD B. A.
AT THE MEDICAL HALL PRESS.

1907.

Digitized by Google

Digitized by Google

INDEX TO VOLUME XXIX. NEW SERIES.

SHRÍBHÁSHYA OF RÁMÁNUJA	...	1, 49, 657, 673.
VÁLMIKÍYA RÁMÁYAṆA	...	17, 289, 689.
SANKALPASÚRYODAYA	...	33, 321.
KHANDANODDHÁRA	...	65, 145, 425, 433, 481.
PADÁRTHA-DHARMA-SANGRAHA		81, 417, 441, 549, 557.
VYÁKARAṆADÍPIKÁ	...	97, 161, 193, 225, 257, 369, 385, 393, 501, 509, 533, 541, 565, 573, 633, 737.
BRAHMÁMRITAVARSHIṆÍ	...	113, 401, 721.
NYÁYASIDDHÁNTAMANJARÍ	...	129, 209, 273, 449, 457, 705.
PARÁSHARASMRITI	...	177, 241, 353, 485, 493.
YÁJUSHAJYOUTISHA	...	305, 337, 465, 473, 517, 525, 581, 589, 597, 605, 609, 617.
SHIVAJNÁNABODHA	...	649.

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

Ind L 350.2

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

Nos. 1, 2 and 3.] Jan., Feb. and March 1907. [Vol. XXIX.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1907.

Copyright on each article reserved.

Price Rs. 9 per annum.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
चित्रमीमांसा, अप्पयदीक्षितकृता तै· श्रीरामशास्त्रिणा संशोधिता	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधित	।=)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतडाक्तरबालणटेनाचार्य्येणाङ्ग्लदेशीयभाषायामनूदिता ..	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	=)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणाङ्ग्लदेशीयभाषायामनूदितम्	४)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	२॥=)
श्रौतपदार्थनिर्वचनम्	३)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या। श्रीकामकोल्लूकशास्त्रि-संशोधिता	४)
काव्यप्रदीपः, पं· रामशास्त्रिभागवताचार्येण परिशोधितः	२॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१
खण्डनखण्डखाद्यं सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	५)

Digitized by Google

इत्येवं प्राप्ते प्रचक्ष्महे—

अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ ८ ॥

'तु'-शब्दात्पक्षो व्यावृत्तः। विद्यात एव पुरुषार्थः। कुतः। 'अधिकोपदेशात्,' कर्मसु कर्त्तुर्जीवात्तु यप्रत्यनीकानवधिकातिशयासङ्ख्येयकल्याणगुणाकरत्वेनाधिकस्यार्थान्तरभूतस्य परस्य ब्रह्मणो वेद्यतयोपदेशात्, भगवतो बादरायणस्य विद्यातः फलमित्येवमेव मतम्। लिङ्गानि तिष्ठन्तु, वेद्यतयोपदेशस्तु तावत्[1] कर्त्तुः प्रत्यगात्मनोऽधिकस्यैव। कथम्। 'तद्दर्शनात्,' प्रत्यगात्मन्यशुद्धे शुद्धेऽप्यसम्भावनीयानन्तगुणाकारस्य वेद्यस्य निरस्तनिखिलहेय[2]गन्धस्य स्वसङ्कल्पकृतजगदुदयविभवलयलीलस्य सर्वज्ञस्य सर्वशक्तेर्वाङ्मनसापरिच्छेद्यानन्दस्य जीवाधिपस्य कृत्स्नस्य[3] प्रशासितुः परस्य ब्रह्मणो वेदनोपदेशवाक्येषु दर्शनात्—"अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः" "तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत" "यः सर्वज्ञः सर्ववित्"

"पराऽस्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च" ॥
"स एको ब्रह्मण आनन्दः......
यतो वाचो निवर्तन्ते अप्राप्य मनसा सह।
आनन्दं ब्रह्मणो विद्वान् बिभेति कुतश्चने"ति,

"एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरणः"

"स कारणं करणाधिपाधिपो
न चास्य कश्चिज्जनिता न चाधिपः"

"एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः"

---

१ तद्विति लि० पु०।

२ हेयेति नास्ति लि० पु०। ३ कृतस्येति लि० पु०।

Digitized by Google

भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः ।
भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः"–

इत्यादिषु । तस्माद्वेदनोपदेशशब्देषु कर्तुः प्रत्यगात्मनः खद्योतकल्पस्याविद्यादिहेयसम्बन्धयोग्यस्य गन्धोऽपि नास्तीति परमपुरुषविषयाया विद्यायास्तत्प्राप्तिरूपममृतत्वं तत्रतत्र श्रूयमाणं फलमिति विद्यातः पुरुषार्थ इति सुष्ठूक्तम् ।

लिङ्गान्यपि निरस्यन्ते-

तुल्यं तु दर्शनम् ॥ ९ ॥

यदुक्तम्, ब्रह्मविदां कर्मानुष्ठानदर्शनाद्विद्या कर्माङ्गमिति, तत्र,[1] विद्याया अनङ्गत्वेऽपि 'तुल्यं दर्शनम्', ब्रह्मविदां कर्मानुष्ठानदर्शनमनैकान्तिकमित्यर्थः । अननुष्ठानस्यापि दर्शनात् । दृश्यते हि ब्रह्मविदां कर्मत्यागः "ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे" इत्यादौ । अतो ब्रह्मविदां कर्मत्यागदर्शनाच्च विद्या कर्माङ्गम् । कथमिदमुपपद्यते–ब्रह्मविदां कर्मानुष्ठानमननुष्ठानं च । फलाभिसन्धिरहितस्य यज्ञादिकर्मणो ब्रह्मविद्याङ्गत्वात् तथाविधस्य कर्मणोऽनुष्ठानदर्शनमुपपद्यते । वक्ष्यति च "सर्वापेक्षा च[2] यज्ञादिश्रुतेरश्ववत्" इति । फलार्थस्य तस्यैव यज्ञादेः कर्मणो मोक्षैकफलब्रह्मविद्याविरोधित्वात्, तस्यैवाननुष्ठानदर्शनमुपपन्नतरम् । विद्यायाः कर्माङ्गत्वे कर्मत्याग- कथमपि नोपपद्यते ।

यदुक्तं श्रुत्यैव विद्यायाः कर्माङ्गत्वमवगम्यत इति, तत्राह–

असार्वत्रिकी ॥ १० ॥

न सर्वविद्याविषयेयं श्रुतिः, अपि तूद्गीथविद्याविषयैव, 'यदेव विद्यया करोती'ति यच्छब्दस्यानिर्धारितविशेषस्य 'उद्गीथमुपासीते'ति प्रस्तुतोद्गीथविशेषनिष्ठत्वात् । न हि, यत्करोति तद्विद्यये'ति सम्बध्यते, यदेव विद्यया करोति तदेव वीर्यवत्तरमिति विद्यया क्रियमाणं यच्छब्देन निर्दिश्य तस्य हि वीर्य्यवत्तरत्वमुच्यते ।

१ तत्रेति मु० पु० ।   २ चकारो नास्ति लि० पु० ।

यच्चेदमुक्तम्–'तं विद्याकर्मणी समन्वारभेते' इति विद्याकर्मणोः साहित्यदर्शनाद्विद्या कर्माङ्गमिति, तत्राह–

विभागः शतवत् ॥ ११ ॥

"तं विद्याकर्मणी समन्वारभेते" इत्यत्रोक्तेन न्यायेन विद्याकर्मणोर्भिन्नफलत्वाद्विद्या स्वस्मै फलाय तं[1] समन्वारभते, कर्म च स्वस्मै फलायेति 'विभागो' द्रष्टव्यः। 'शतवत्,' यथा क्षेत्ररत्नविक्रयिणं शतद्वयमन्वेतीत्युक्ते क्षेत्रार्थं शतं, रत्नार्थं शतमिति विभागः प्रतीयते, तद्वदत्रापि।

अध्ययनमात्रवतः ॥ १२ ॥

यदुक्तम्–विद्यावतः कर्मविधानाद्विद्या कर्माङ्गमिति, नैतद्युक्तम्, 'वेदमधीत्ये'त्यध्ययनमात्रवतो विधानात्। न चाध्ययनविधिरेवार्थावबोधे प्रवर्त्तयति,[2] आधानवदध्ययनस्याक्षरराशिग्रहणमात्रे पर्य्यवसानात्। गृहीतस्य च स्वाध्यायस्य फलवत्कर्मावबोधित्वदर्शनात्तद्विषयफले तदर्थविचारे पुरुषः स्वयमेव प्रवर्त्तते। ततः कर्मार्थी कर्मज्ञाने प्रवर्त्तते, मोक्षार्थी च ब्रह्मज्ञान इति न विद्या कर्माङ्गम्। यद्यप्यध्ययनविधिरेवार्थावबोधे प्रवर्त्तयति, तथाऽपि न विद्या कर्माङ्गम्, अर्थज्ञानादर्थान्तरत्वाद्विद्यायाः। यथा ज्योतिष्टोमादिकर्मस्वरूपविज्ञानात्फलसाधनभूतं कर्मा[3]नुष्ठानमर्थान्तरम्, तथाऽर्थ[4]ज्ञानस्वरूपाद्ब्रह्मस्वरूपविज्ञानादर्थान्तरमेव ध्यानोपासनादिशब्दवाच्या पुरुषार्थसाधनभूता विद्येति, न तस्याः कर्मसम्बन्धगन्धोऽपि विद्यते।

नाविशेषात् ॥ १३ ॥

यच्चोक्तम्–'कुर्वन्नेवेह कर्माणी'त्या[5]त्मविदं ज्ञानाद्व्यावर्त्य[6] यावज्जीवं कर्मानुष्ठाने नियमतीति, तन्नोपपद्यते। कुतः। 'अविशेषात्'। न ह्ययं नियमः फलसाधनभूतस्वतन्त्रकर्मविषय इति विशेषहेतुरस्ति, विद्या-

१ तमिति मु० पु० नास्ति। २ प्रवर्त्ततेऽपीति लि० पु०। ३ तत्कर्मेति मु० पु०। ४ तदर्थेति लि० पु०। ५ इत्यादि-इति लि० पु०। ६ व्यावृत्त्येति मु० पु०।

ङ्गभूतकर्मविषयतयाऽप्युपपत्तेः । "कर्मणैव हि संसिद्धिमास्थिता जनकादय" इति च[1] विदुषस्त्वाऽऽप्रायणादुपासनस्यानुवर्तमानत्वात् ।

एवमर्थस्वाभाव्येन चोद्यं परिहृत्य[2] 'कुर्वन्नेवेह कर्माणी'त्यस्या-[3]र्थमाह—

स्तुतयेऽनुमतिर्वा ॥ १४ ॥

'वा'—शब्दोऽवधारणार्थः । "ईशा वास्यमिदं सर्व"मिति विद्याप्रकरणाद्विद्यास्तुतये सर्वदा कर्मानुष्ठानानुमतिरियम्,[4] विद्यामाहात्म्यात् सर्वदा कर्म कुर्वन्[5]नपि न लिप्यते कर्मभिरिति हि विद्या स्तुता भवति । वाक्यशेषश्चैतदेव[6] दर्शयति—"एवं त्वयि नान्यथेतोऽस्ति न कर्म[7] लिप्यते नर" इति । अतो न कर्माङ्गं विद्या ।

कामकारेण चैके ॥ १५ ॥

अपि चैवमेके शाखिनः कामकारेण[8] ब्रह्मविद्यानिष्ठस्य गार्हस्थ्यत्यागमधीयते "किं प्रजया करिष्यामो येषां नोऽयमाऽऽत्माऽयं[9] लोक" इति । विदुषो विरक्तस्य कामकारेण गार्हस्थ्यत्यागं ब्रुवदिदं वचनं ब्रह्मविद्यायाः कर्मानङ्गत्वं[10] दर्शयति । यज्ञादिकर्माङ्गत्वे हि विद्याया,[11] विद्यानिष्ठस्य कामकारेण गार्हस्थ्यत्यागो न सम्भवति । अतो न विद्या कर्माङ्गम् ।

उपमर्दं च ॥ १६ ॥

पुण्यापुण्यरूपस्य[12] समस्तसांसारिकदुःखमूलस्य कर्मणो ब्रह्मविद्ययोपमर्दं च प्रति[13]वेदान्तमधीयते—

---

१ चकारो नास्ति लि० पु० ।
२ परिहृत्येति मु० पु०, ०मर्थः स्वाभाव्येन चोद्यं परिहरत्य-इति लि० पु० ।
३ ०ऽस्य वाक्यस्येति लि० पु० ।
४ ०मतिरेवेति लि० पु० ।
५ कर्माकुर्वंश्चेति लि० पु० ।
६ श्चैवमेवेति लि० पु० ।
७ कर्मणेति लि० पु० ।
८ कामचारेणेति लि० पु० ।
९ ०मात्मा नायमिति लि० पु० ।
१० न कर्माङ्गत्वमिति लि० पु० ।
११ विद्याया इति नास्ति लि० पु० ।
१२ स्वरूपस्येति लि० पु० ।
१३ ०पमर्दं प्रतीति मु० पु० ।

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"–

इत्यादिकम्, तद्विद्यायाः कर्माङ्गत्वे न सङ्गच्छते ।

ऊर्ध्वरेतस्सु च शब्दे हि ॥ १७ ॥

ऊर्ध्वरेतस्त्वाश्रमेषु ब्रह्मविद्यादर्शनात्तेष्वग्निहोत्रदर्शपूर्णमासादिकर्माभावाच्च न विद्या कर्माङ्गम् । नन्वूर्ध्वरेतस आश्रमा न सन्त्येव "यावज्जीवमग्निहोत्रं जुहोती"त्यादिनाग्निहोत्रदर्शपूर्णमासादीनां यावज्जीवाधिकारश्रुतेः । श्रुतिविरुद्धानां स्मृतीनां चाप्रामाण्यात् । अत आह–'शब्दे ही'ति । वैदिक एव हि शब्दे ते दृश्यन्ते "त्रयो धर्मस्कन्धाः" "ये चेमेऽरण्ये श्रद्धा तप इत्युपासते" "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ती"त्यादौ । यावज्जीवश्रुतिस्त्वविरक्तविषया ।

परामर्शं जैमिनिरचोदना चापवदति हि ॥ १८ ॥

यदिदम्–'त्रयो धर्मस्कन्धा' इत्यादौ वैदिके शब्द ऊर्ध्वरेतस आश्रमा दृश्यन्ते, अतस्ते सन्त्येवेति, नैतदुपपद्यते, यत,'त्रयो धर्मस्कन्धा' इत्येवमादिषु वाक्येषु तेषामाश्रमाणां परामर्शमात्रं क्रियते, अनुवादमात्रमित्यर्थः । कुत एतत् । 'अचोदनात्,'[1] अविधानादित्यर्थः । न ह्यत्र विधिशब्दः श्रूयते । 'त्रयो धर्मस्कन्धा' इत्यादिना हि प्रकृतं प्रबन्धेन ब्रह्मोपासनं स्तूयते, ब्रह्मसंस्थो ऽमृतत्वमेतीत्युपसंहारात् । अतोऽन्यार्थमनुवादमात्रमत्र[2] क्रियते तेषामाश्रमाणाम् । 'ये चेमे ऽरण्ये श्रद्धा तप इत्युपासत' इति च देवयानविधिपरत्वा,त्तत्रापि नाश्रमान्तरविधिसम्भवः । अपि च, 'अपवदति हि' श्रुतिराश्रमान्तरम्,–"वीरहा वा एष देवानां योऽग्निमुद्वासयत" इत्यादिका । अत ऊर्ध्वरेतस आश्रमा न सन्तीति जैमिनिराचार्यो मन्यते ।

अनुष्ठेयं बादरायणस्साम्यश्रुतेः ॥ १९ ॥

१ कुतः एतदचोदनादिति लि० पु० । २ अत्रेति लि० पु० नास्ति ।

गृहस्थाश्रमवदाश्रमान्तरमप्यनुष्ठेयं भगवान् बादरायणो मन्यते । कुतः । 'साम्यश्रुतेः' । उपादेयतयाऽभिमतगृहस्थाश्रमसाम्यं हि तेषामप्याश्रमाणां श्रूयते, 'त्रयो धर्मस्कन्धा' इत्यारभ्य ब्रह्मसंस्थस्तुत्यर्थतया संकीर्त्तनं गृहस्थाश्रमस्येतरेषां च समानम् । अथ, गृहस्थाश्रमस्यानुवादः प्राप्तौ सत्यामेव सम्भवतीति तस्य प्राप्तिरवश्याभ्युपेत्येति मतम्, तदितरेषामपि समानम ऽन्यत्रा ऽभिनिवेशात्[1] । न च, गार्हस्थ्यधर्म एव 'यज्ञो,ऽध्ययनं, दानं, तपो, ब्रह्मचर्य'मिति सर्वैः शब्दैरभिधीयते, ब्रह्मचर्यतपसोर्गृहस्थस्यैव सम्भवादिति युक्तम्, 'त्रयो धर्मस्कन्धा'इति त्रित्वेन संगृह्य 'प्रथमो द्वितीयस्तृतीय' इति विभागवचनानुपपत्तेः । अतो यज्ञोऽध्ययनं दानमिति गृहस्थाश्रम उच्यते । 'अध्ययन'-शब्दो वेदाभ्यासपरः । 'तपः'-शब्देन वैखानस[2]पारिव्राज्ययोर्ग्रहणम्, उभयोस्तपःप्रधानत्वात् । तपःशब्दो हि कायक्लेशे रूढः, स च द्वयोरपि समानः । ब्रह्मचारिधर्म एव 'ब्रह्मचर्य'-शब्देनाभिधीयते । "ब्रह्मसंस्थोऽमृतत्वमेती"ति परत्र श्रूयमाणो 'ब्रह्मसंस्थ'-शब्दो यौगिकः सर्वाश्रमसाधारणः, सर्वेषामाश्रमिणां ब्रह्मसंस्थासम्भवात् । ब्रह्मणि संस्था संस्थितिर्ब्रह्मसंस्थत्वम्, तच्च सर्वेषां सम्भवत्येव । ब्रह्मनिष्ठाविकलाः केवलाश्रमिणः पुण्यलोकभाजः, तेष्वेव ब्रह्मनिष्ठोऽमृतत्वभाग्भवति । तदेतद्विस्पष्टमुक्तं भगवता पराशरेण—"प्राजापत्यं ब्राह्मणाना"मित्यारभ्य "ब्राह्मं सन्यासिनां स्मृत"मित्यन्तेन वर्णानामाश्रमाणां च केवलानां ब्रह्मलोकप्राप्त्यन्तं फलमभिधाय

"एकान्तिनः सदा ब्रह्मध्यायिनो योगिनो हि ये ।
तेषां तत्परमं स्थानं यद्वै पश्यन्ति सूरय" इति—

तेष्वेव ब्रह्मनिष्ठानां ब्रह्मप्राप्तिमभिदधता । अतो गृहस्थाश्रमतुल्या ऊर्द्ध्वरेतस आश्रमा अपि दृश्यन्त इति तेऽप्यनुष्ठेयाः । "ये चेमेऽरण्ये

१ समानं भिन्नत्राभिनिवेशात् इति मु० पु०, समानमन्यत्रापि निवेशादिति लि० पु० ।

२ वैखानसेति लि० पु० प्रमादः ।

श्रद्धा तप इत्युपासत" इति वाक्यं इति तपःप्रधानाश्रमाद्यपेक्षत्वाद् देवयानविधानस्य, तत्रापि तत्प्राप्तिरङ्गीकरणीया ।

परामर्शपक्षे विधानपक्षे च गृहस्थाश्रमतुल्यमेषामप्यनुष्ठेयत्वमित्युपपाद्य विधिरेवायमाश्रमाणां सर्वेषां नानुवाद इत्युपपादयितुमाह—

विधिर्वा धारणवत् ॥ २० ॥

'वा'-शब्दोऽवधारणार्थः । विधिरेवायमाश्रमाणाम्, 'धारणवत्,' यथा दिष्टाग्निहोत्रे "अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयती"त्यत्रानुवादसरूपादपि वाक्यादुपरिधारणस्याप्राप्तत्वाद्विधिराश्रीयते । तदुक्तं शेषलक्षणे "विधिस्तु धारणेऽपूर्वत्वा"दिति । तथाऽत्राप्यप्राप्तत्वाद्विधिरेवाश्रयणीयः । "ब्रह्मचर्यं समाप्य गृही भवेद् गृहाद् वनी भूत्वा प्रव्रजेत् यदि वे[1]तरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा यदहरेव विरजेत्तदहरेव प्रव्रजे"दिति जाबालानामाश्रमविधिमसन्तमिव कृत्वा एतेष्वन्यपरेष्वपि वाक्येष्वाश्रमप्राप्तिरवश्याश्रयणीयेत्युपपादितम् । एवमाश्रमान्तरविधानाद्या श्रुतिर्यावज्जीवश्रुतिरपवादश्रुतिश्चाविरक्तविषया एवेति वेदितव्याः । अन्याश्च ब्रह्मविदः कर्मणामाऽऽप्रायणा[2]दवश्यकर्तव्यताविधायिन्यः श्रुतयः स्मृतयश्च स्वस्वा[3]श्रमधर्मविषयाः ।

अत ऊर्ध्वरेतस्सु च ब्रह्मविद्याविधानाद्विद्यातः पुरुषार्थ इति सिद्धम् ॥

पुरुषार्थाधिकरणं समाप्तम् ॥ १ ॥

अथ स्तुतिमात्राधिकरणम् २ । स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥

इदमिदानीं चिन्त्यते, "स एष रसानां रसतमः परमः परार्ध्योऽष्टमो य उद्गीथ" इत्येवंजातीयकानि वाक्यानि क्रत्ववयवभूतोद्गी-

१ वे-इति लि० पु० ।
२ आप्रयाणादिति पु० द्वयेऽपि ।
३ स्वेति सकृत् लि० पु० ।

यादिस्तुतिमात्रपराण्युत,होस्विदुद्गीथादिषु रसतमादिदृष्टिविधानार्थानीति । अत्र प्रतिपादितमुपासनपरत्वमङ्गीकृत्योपासनस्य पुरुषार्थत्वेन क्रत्वनुपादानानियम उक्तः । किं युक्तम् । स्तुतिमात्रपराणीति । कुतः । उद्गीथाद्यनुपादानात् । क्रत्वङ्गभूतानि ह्युद्गीथादीन्युपादाय तेषां रसतमादित्वं प्रतिपादितम् । यथा जुह्वादीनां पृथिव्यादित्वं प्रतिपादयतो वचनस्य 'इयमेव जुहूः स्वर्गो लोक आहवनीय' इत्यादिकस्य तत्स्तुतिमात्रपरत्वम्, तथेहापि । तदिदमाशङ्कते—'स्तुतिमात्रमुपादानादिति चे'दिति, उद्गीथाद्युपादानात्तत्स्तुतिमात्रमेवैषां वाक्यानां विवक्षितमिति चेत्, अत्रोत्तरम्—

'नापूर्वत्वा'दिति । न स्तुतिमात्रत्वमुपपद्यते । कुतः । 'अपूर्वत्वात्'—अप्राप्तत्वात् । न ह्युद्गीथादयो रसतमादितया प्रमाणान्तरेण प्रतिपन्नाः, येन तत्प्रशस्त्यबुद्ध्युत्पत्त्यर्थं रसतमादित्वेनानूद्येरन् । न चोद्गीथादिविधिरत्र सन्निहितः, येने'यमेव जुहूः स्वर्गो लोक आहवनीय' इत्यादिवत्तदेकवाक्यत्वेन यया कयाचिद्विधया तत्स्तुतिपरत्वमाश्रीयेत । अतः क्रतुवीर्यवत्त्वादिफलसिद्ध्यर्थमुद्गीथादिषु रसतमादिदृष्टिविधानमेव न्याय्यम् ।

भावशब्दाच्च ॥ २२ ॥

उपासीतेत्यादिभावशब्दाच्च विधिपरत्वमेव न्याय्यम्, विधिप्रत्यययुक्तो हि क्रियाशब्दो विधेयमेव स्वार्थमवगमयति । तस्मादुपासनविधानार्था एताः श्रुतयः ॥

स्तुतिमात्राधिकरणं समाप्तम् ॥ २ ॥

अथ पारिप्लवाधिकरणम् ३ ।

पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २३ ॥

"प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम" "श्वेतकेतुर्हारुणेय आस"इत्येवमादीनि वेदान्तेष्वाख्यानानि किं पारिप्लवप्रयोगा-

र्था,न्युत विद्याविशेष[1]प्रतिपादनार्थानीति चिन्तायाम् "आख्यानानि शंसन्ती"त्याख्यानानां पारिप्लवे विनियोगाच्च विद्याप्रधानत्वं न्याय्यमिति चेत्,

न सर्वाण्याख्यानानि पारिप्लवप्रयोगे[2] विनियोगमर्हन्ति । कुतः । 'विशेषितत्वात्' विनियोगस्य । 'आख्यानानि शंसन्ती'त्युक्त्वा तत्रैव "मनुर्वैवस्वतो[3] राजे"त्यादिना मन्वादीनामाख्यानानि विशेष्यन्ते । अतस्तेषामेव तत्र[4] विनियोग इति गम्यते । तस्माच्च सर्ववेदान्तेष्वाख्यानश्रुतयः पारिप्लवप्रयोगार्थाः, अपि तु विद्याविध्यर्थाः ।

तथा चैकवाक्योपबन्धात्* ॥ २४ ॥

"आत्मा वा अरे द्रष्टव्य"इत्यादिविधिनैकवाक्यतयोपबन्धादाख्यानानां, विद्याविध्यर्थान्येव तानीति गम्यते, यथा "सोऽरोदी"दित्येवमादेः कर्मविध्यर्थत्वम्, न पारिप्लवार्थत्वम् ॥

पारिप्लवाधिकरणं समाप्तम् ॥ ३ ॥

अग्नीन्धनाद्यनपेक्षाधिकरणम् ४ । **अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २५ ॥**

स्तुतिप्रसङ्गादवान्तरसङ्गतिविशेषणार्थद्वयं चिन्तितम्, विद्यावन्त ऊर्द्ध्वरेतस आश्रमिणः सन्तीत्युक्तम्—'ऊर्द्ध्वरेतस्सु च शब्दे ही'त्यादिभिः सूत्रैः । इदानीमूर्द्ध्वरेतसो यज्ञाद्यभावात्तदङ्गिका विद्या न सम्भवतीत्याशङ्क्याह—

'अत एव चाग्नीन्धनाद्यनपेक्षे'ति ।

यत, ऊर्द्ध्वरेतस आश्रमिणो विद्यासम्बन्धित्वेन श्रुत्या परिगृह्यन्ते "ब्रह्मसंस्थोऽमृतत्वमेति[5] "ये चेमेऽरण्ये श्रद्धा तप इत्युपासते" "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" "यदिच्छन्तो[6] ब्रह्मचर्यं चरन्ती[7]"-त्यादिकया, अत एवोर्द्ध्वरेतस्सु विद्या ऽग्नीन्धनाद्यनपेक्षा । अग्नीन्धन-

---

१ ०विशेषणेति लि० पु० ।
२ ०प्रयोगेनेति मु० पु० ।
३ मनुर्वैवस्वत इति लि० पु० ।
४ तत्रेति लि० पु० ।
* एवमेव सर्वत्र पुस्तकेषु सूत्रपाठः ।
५ ०मेतीति-इति पु० द्वयेपि ।
६ यदिच्छन्त इति लि० पु० ।
७ चरतीति मु० पु० ।

मग्न्याधानम् । आधानपूर्वका[1]ग्निहोत्रदर्शपूर्णमासादिकर्मानपेक्षा तेषु विद्या, केवलस्वाश्रमविहितकर्मापेक्षेत्यर्थः ॥

अग्नीन्धनाद्यधिकरणं समाप्तम् ॥ ४ ॥

अथ सर्वापेक्षाऽधिकरणम् ५ । **सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥**

यदि विद्या यज्ञाद्यनपेक्षैवामृतत्वं साधयति, तर्हि गृहस्थेष्वपि तदनपेक्षैव साधयितुमर्हति, यज्ञादिश्रुतिरपि विविदिषन्तीति शब्दात् कर्मणो वेदनाऽङ्गतां न प्रतिपादयति, अत आह–'सर्वापेक्षे'ति । अग्निहोत्रादिसर्वकर्मापेक्षैव विद्या कर्मवत्सु गृहस्थेषु । कुतः । 'यज्ञादिश्रुतेः', "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन"-इत्यादिना यज्ञादयो हि विद्याङ्गत्वेन श्रूयन्ते । यज्ञादिना विविदिषन्ति वेदितुमिच्छन्ति, यज्ञादिभिर्वेदनं प्राप्तुमिच्छन्तीत्यर्थः । यज्ञादीनां ज्ञानसाधनत्वे सत्येव यज्ञादिभिर्ज्ञानं प्राप्तुमिच्छन्तीति व्यपदेश उपपद्यते, यथाऽसेर्हननसाधनत्वे सत्यऽसिना जिघांसतीति व्यपदेशः । अतो यज्ञादीनां ज्ञानसाधनत्वमवगम्यते । ज्ञानं च वाक्यार्थज्ञानादर्थान्तरभूतं ध्यानोपासनादिशब्दवाच्यं विशद[2]तमप्रत्यक्षताऽऽपन्नं स्मृतिरूपं निरतिशयप्रियमऽहरहरभ्यासाधेयातिशयमाऽऽप्रायणा[3]दनुवर्तमानं मोक्षसाधनमित्युक्तमस्माभिः पूर्वमेव । वक्ष्यति च "आवृत्तिरसकृदुपदेशा"दित्यादिना । एवंरूपं च[4] ध्यानमऽहरहरनुष्ठीयमानैर्नित्यैर्नैमित्तिकैः कर्मभिः परमपुरुषाराधनरूपैः परमपुरुषप्रसादद्वारेण जायत इति 'यज्ञादिना विविदिषन्ती'ति शास्त्रेण प्रतिपाद्यते । अतः कर्मवत्सु गृहस्थेषु यज्ञादिनित्यनैमित्तिकसर्वकर्मापेक्षा विद्या । 'अश्ववत्'–यथा, पुरुषगमनसाधन-

---

१ ०पूर्विका-इति मु॰ पु॰ । २ विपदेति लि॰ पु॰ ।

३ प्रयाणादिति पु॰ द्वयेपि पुनःपुनर्भवति । ४ चेति मु॰ पु॰ नास्ति ।

Digitized by Google

भूतोऽश्वः स्व[1]परिकरकक्ष्यापरिकर्मापेक्षः, एवं मोक्षसाधनभूताऽपि विद्या नित्यनैमित्तिककर्मपरिकरापेक्षा । तदिदमाह स्वयमेव भगवान्—

"यज्ञदान[2]तपः कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्" ॥

"यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः" इति ॥

सर्वापेक्षाऽधिकरणं समाप्तम् ॥ ५ ॥

अथ शमदमाद्यधिकरणम् ६ । शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामप्यवश्यानुष्ठेयत्वात् ॥ २७ ॥

गृहस्थस्य शमदमादीन्यप्यनुष्ठेयानि, उत नेति चिन्तायाम्, बाह्यान्तराकरणव्यापाररूपत्वात्कर्मानुष्ठानस्य शमदमादीनां तद्विपरीतरूपत्वाच्चाऽननुष्ठेयानीति प्राप्त उच्यते—

यद्यपि गृहस्थः करणव्यापाररूपकर्मसु प्रवृत्तस्तथाऽपि स विद्वान् शमदमाद्युपेतः स्यात् । कुतः । 'तदङ्गतया' 'तद्विधेः'—विद्याङ्गतया तेषां विधेः—"तस्मादेवं विच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्ये"दिति । विद्योत्पत्तेश्चित्तसमाधानरूपत्वेन दृष्टोपकारित्वाच्छमादीनां, विद्यानिर्वृत्तये तेषां शमादीनामवश्यानुष्ठेयत्वाच्च, तान्यप्यनुष्ठेयानि[3] । न च करणव्यापारतद्विपर्ययरूपत्वेन कर्मणां शमदमादीनां च परस्परविरोधः, भिन्नविषयत्वात्, विहितेषु करणव्यापारः, अविहितेषु प्रयोजनशून्येषु च तदुपशम इति । न च करणव्यापाररूपकर्मसु वर्तमानस्य वासनावशाच्छमादीनामुपादेयत्वासम्भवः, विहितानां कर्मणां

---

†† एतच्चिह्नान्तर्गतः पाठो लि॰ पु॰ त्रुटितः । [1] स्वसेति मु॰ पु॰ ।
[2] यज्ञो दानमिति । मु॰ पु॰, यज्ञदान—इति लि॰ पु॰ ।
[3] शमादीनामवश्यानुष्ठेयानीति लि॰ पु॰ ।

परमपुरुषाराधनतया तत्प्रसादद्वारेण निखिलविपरीतवासनोच्छेदहेतुत्वात्। अतो गृहस्थस्य शमदमा[1]द्ययोऽप्यनुष्ठेयाः॥

शमदमाद्यधिकरणं समाप्तम् ॥ ६ ॥

अथ सर्वान्नानुमत्यधिकरणम् ७ ।

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्॥२८॥

वाजिनां छन्दोगानां च प्राणविद्यायाम्-"न ह वा अस्यानन्नं जग्धं भवति नानन्नं परिगृहीतं भवति न ह वा एवंविदि किञ्चनानन्नं भवती"ति प्राणविदः सर्वान्नानुमतिः संकीर्त्यते। किमियं सर्वान्नानुमतिः प्राणविद्यानिष्ठस्य सर्वदोत प्राणात्ययापत्तावेवेति विशये विशेषानुपादानात्सर्वदेति प्राप्त उच्यते—

'प्राणात्यय' इति। 'च'-शब्दोऽवधारणे, प्राणात्ययापत्तावेवेत्यर्थः। कुतः। 'तद्दर्शनात्'। दृश्यते ह्यन्यत्र ब्रह्मविदामपि प्राणात्ययापत्तावेव सर्वान्नाभ्यनुज्ञा, किं पुनः प्राणविदः। उषस्तिः[2] किल चाक्रायणो ब्रह्मविदग्रेसरो मटचीहतेषु कुरुषु दुर्भिक्षदूषितेषु[3] इभ्यग्रामे वसन्नशनेन प्राणसंशयमापन्नो ब्रह्मविद्यानिष्पत्तये प्राणानामनवसादमाकाङ्क्षन्[4] इभ्यं कुल्माषान् खादन्तं भिक्षमाणस्तेन चोच्छिष्टेभ्योऽन्ये न विद्यन्त इति प्रत्युक्तः पुनरप्येतेषां मे देहीत्युक्त्वा तेन चेभ्येनोच्छिष्टेभ्य आदाय दत्तान्कुल्माषान्परिगृह्यानुपानप्रतिबद्धमिभ्येनार्पितं उच्छिष्टं मे पीतं[5] स्यादिति वदंश्चाक्रायणः किमेते कुल्माषा अनुच्छिष्टा इतीभ्येन पर्यनुयुक्तो न वा अजीविष्यमिमानऽखादन् कामो म उदकपान[6]मिति कुल्माषखादने स्वस्य प्राणसंशयापत्तेस्तावन्मात्रखादनेन धृतप्राणस्य स्वस्योच्छिष्टोदकपानं कामकारितं निषिद्धं स्यादित्युक्त्वा स्वखादितशेषं

---

१ दमेति लि० पु० नास्ति।

२ उषस्तीति लि० पु०। ३ कुरुष्विति पुनर्लि० पु०।

४ आकाङ्क्षमाण इति प्रायिकः पाठ,स्तत्र ताच्छील्येत्यादिना चानश् द्रष्टव्यः।

५ ०मेव मे पीतमिति मु० पु०, ०मेवमिति लि० पु०।

६ उदपानमिति मु० पु०।

जायायै दत्त्वा तया च रक्षितान्यपरेद्युर्याचनेनार्जिजिषया[2] निर्गमिषुः पुनरपि प्राणसंशयमापन्नस्तानेवेभ्योच्छिष्टान् स्वोच्छिष्टभूतान् पर्युषितांश्चखाद । अतो ब्रह्मविदामपि प्राणसंशय एव सर्वान्नानुमतिदर्शनादन्याविशेषेण कीर्त्तितमपि प्राणविदः सर्वान्नीनत्वं प्राणात्ययापत्तावेवेति निश्चीयते ।

अबाधाच्च ॥ २९ ॥

“आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृति”रिति ब्रह्मविद्योत्पत्तावाहारशुद्धिविधानाबाधादपि ब्रह्मविदां सर्वान्नीनत्वमापद्विषयमेवगम्यते । एवं ब्रह्मविदामतिशयितशक्तीनामपि सर्वान्नीनत्वस्यापद्विषयत्वात् प्राणविदोऽल्पशक्तेः सर्वान्नानुमतिरापद्विषयैव ।

अपि स्मर्यते ॥ ३० ॥

अपि चापद्विषयमेव सर्वान्नीनत्वं ब्रह्मविदामन्येषां च स्मर्यते—

“प्राणसंशयमापन्नो योऽन्नमत्ति यतस्ततः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसे”ति ।

शब्द[3]श्चातोऽकामकारे ॥ ३१ ॥

यतो ब्रह्मविदामन्येषां च सर्वान्नीनत्वमापद्विषयमेव, अत एव सर्वथा‘ऽकामकारे’ ‘शब्दः’ कामकारस्य प्रतिषेधकः शब्दो वर्त्तते । अस्ति हि कठानां संहितायां कामकारस्य प्रतिषेधकः शब्दः—“तस्माद्ब्राह्मणाः सुरां न पिबन्ति[4] पाप्मना नोत्संसृजा इती”ति[5] । पाप्मना संसृष्टो[6] न भवानी[7]ति मत्वा ब्राह्मणः सुरां न पिबेदित्यर्थः ॥

सर्वान्नानुमत्यधिकरणं समाप्तम् ॥ ७ ॥

---

१ रक्षितान्यपरेद्युरिति लि॰ पु॰ । २ अर्जिजीषयेति पु॰ द्वयेऽपि ।
३ शब्दा इति लि॰ पु॰ । ४ पिबेदिति लि॰ पु॰ ।
५ “नोत्संसृजा” इतीति—इति मु॰ पु॰, नोत्संसृष्टेऽवितीति—इति लि॰ पु॰ ।
६ सृमिति मु॰ पु॰ नास्ति, संसृष्ट इति क्वचित् ।
७ भवतीति लि॰ पु॰ ।

अथ विहितत्वाधिकरणम् ८। **विहितत्वाच्चाश्रमकर्मापि ॥ ३२ ॥**

यज्ञादिकर्माङ्गिका ब्रह्मविद्येत्युक्तम्। तानि च यज्ञादीनि कर्माण्यऽमुमुक्षुणा केवलाश्रमिणाऽप्यनुष्ठेयानि, उत नेति चिन्तायां विद्याङ्गानां सतां केवलाश्रमिधर्मत्वे[1] नित्यानित्य[2]संयोगविरोधः प्रसज्यत इति यज्ञादीनां केवलाश्रमधर्मत्वं न सम्भवतीति प्राप्त उच्यते—

'आश्रमकर्मापी'ति। आश्रमस्य कर्मापि भवति, केवलाश्रमिणाप्यनुष्ठेयानीत्यर्थः। कुतः। "यावज्जीवमग्निहोत्रं जुहोती"त्यादिना 'विहितत्वात्,' जीवननिमित्ततया नित्यवद्विहितत्वादित्यर्थः।

तथा, विद्याङ्गतया च 'तमेतं वेदानुवचनेने'त्यादिना विहितत्वाद्विद्याशेषतयाऽप्यनुष्ठेयानीत्याह—

सहकारित्वेन च ॥ ३३ ॥

विद्योत्पत्तिद्वारेण विद्यासहकारितयाऽप्यनुष्ठेयानि। अग्निहोत्रादीनामेव[3] जीवनाधिकारस्वर्गाधिकारवद्विनियोगपृथक्त्वेनोभयार्थत्वं न विरुद्ध्यत इत्यर्थः।

तद्वदेव कर्मान्तरत्वमपि नास्तीत्याह—

सर्वथाऽपि त एवोभयलिङ्गात् ॥ ३४ ॥

सर्वथा—विद्यार्थत्व आश्रमार्थत्वेऽपि त एव यज्ञादय इति प्रतिपत्तव्यम्, न कर्मस्वरूपभेद इत्यर्थः। कुतः। 'उभयलिङ्गात्'—उभयत्र श्रुतौ यज्ञादिशब्दैः प्रत्यभिज्ञाप्य विनियोगात्, कर्मस्वरूपभेदे प्रमाणाभावाच्च।

अनभिभवं च दर्शयति ॥ ३५ ॥

"धर्मेण पापमपनुदती"त्यादिभिश्च तानेव यज्ञादिधर्मानुद्दिश्य तैर्विद्याया 'अनभिभवं' पापकर्मभिरुत्पत्तिप्रतिबन्धाभावं 'दर्शयति'। अहरहरनुष्ठीयमानैर्हि यज्ञादिभिर्विशुद्धे ऽन्तःकरणे प्रत्यहं प्रकृष्यमाणा विद्योत्पद्यते। 'अतस्त एवोभयत्र यज्ञादयः ॥

विहितत्वाधिकरणं समाप्तम् ॥ ८ ॥

---

१ केवलाश्रमधर्मत्वे इति क्वचित्। २ ०ऽनित्येति नास्ति लि० पु०।
३ ०मिवेति मु० पु०।

Digitized by Google

अथ विधुराधिकरणम् ९। **अन्तरा चापि तु तद्दृष्टेः ॥ ३६ ॥**

चतुर्णामाश्रमिणां ब्रह्मविद्यायामधिकारोऽस्ति, विद्यासहकारिण आश्रमधर्मा इति चोक्तम् । ये पुनराश्रमानन्तरा वर्तन्ते विधुरादयः, तेषां ब्रह्मविद्याऽधिकारोऽस्ति नेति विषये आश्रमधर्मैतिकर्तव्यताकत्वा द्विद्याया, अनाश्रमिणां चाश्रमधर्माभावान्नास्त्यधिकार इति प्राप्त उच्यते–

'अन्तरा चापि त्वि'ति । 'तु'–शब्दः पक्षव्यावृत्त्यर्थः, 'च'–शब्दोऽवधारणार्थः । अन्तरा वर्तमानानामनाश्रमिणामपि विद्यायामधिकारोऽस्त्येव । कुतः । 'तद्दृष्टेः,' दृश्यते हि रैक्वभीष्मसंवर्तादीनामानाश्रमिणामपि ब्रह्मविद्यानिष्ठत्वम् । न चाश्रमधर्मैरेव विद्याऽनुग्रह इति शक्यं वक्तुम्, "यज्ञेन दानेन तपसाऽनाशकेने"ति दानादीनामाश्रमेष्वनैकान्तिकानां[1]मप्यनुग्राहकत्वश्रवणात् । यथै र्ध्वरेतस्सु विद्यानिष्ठत्वदर्शनादग्निहोत्रादिव्यतिरिक्तैरेव विद्यानुग्रहः क्रियते, तथाऽनाश्रमिष्वपि विद्यादर्शनादाश्रमानियतैर्जपोपवासदानदेवताऽऽराधनादिभिर्विद्याऽनुग्रहः शक्यते कर्तुम् ।

अपि स्मर्यते ॥ ३७ ॥

अपि चानाश्रमिणामपि जपादिभिरेव विद्यानुग्रहः स्मर्यते–

"जप्येनापि च संसिद्ध्येद्ब्राह्मणो नात्र संशयः ।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यत" इति ।

संसिद्ध्येज्जपाद्यनुगृहीतया विद्यया सिद्धो भवतीत्यर्थः ।

विशेषानुग्रहश्च ॥ ३७ ॥

न केवलं न्यायस्मृतिभ्यामयमर्थः साधनीयः, श्रूयते चानाश्रमनियतै[2]र्धर्मविशेषैर्विद्यानुग्रहः–"तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मानमन्विष्ये"ति[3] ।

अतस्त्वितरज् ज्यायो लिङ्गाच्च ॥ ३९ ॥

---

१ ०ष्वनैकान्तानामिति मु० पु० ।
२ ०र्विहितैरिति लि० पु० ।
३ ०मन्विष्येति–इति लि० पु० ।

'तु'-शब्दोऽवधारणे। 'अतो'ऽनाश्रमित्वा'दितर'दाश्रमित्वमेव 'ज्यायः', अनाश्रमित्वमापद्विषयम्,[1] अशक्तस्य चाश्रमित्वमेवो[2]पादेयमित्यर्थः। भूयोधर्मकाऽल्पधर्मकयोरतुल्यकार्य्यत्वात्। 'लिङ्गाच्च', स्मृतेरित्यर्थः। स्मर्य्यते च शक्तं प्रत्याश्रमस्योपादेयत्वम्—"अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विज" इत्यादिना। निवृत्तब्रह्मचर्यस्य मृतभार्य्यस्य चावैराग्ये सति दारालाभ आपत् ॥

विधुराधिकरणं समाप्तम् ॥ ९ ॥

अथ तद्भूताधिकरणम् १०।

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः ॥ ४० ॥

नैष्ठिकवैखानसपरिव्राजकाश्रमेभ्यः प्रच्युतानामपि ब्रह्मविद्यायामधिकारोऽस्ति नेति चिन्तायां विधुरादिवदनाश्रमैकान्तैर्दानादिभिर्विद्यानुग्रहसम्भवादस्त्यधिकार इति प्राप्त उच्यते।

'तद्भूतस्य तु नातद्भाव' इति। 'तु'-शब्दः पक्षव्यावृत्त्यर्थः। 'तद्भूतस्य' नैष्ठिकाद्याश्रमनिष्ठस्य 'नातद्भावः'—अतथाभावोऽनाश्रमित्वेनावस्थानं न सम्भवति। कुतः। 'तद्रूपाभा†वेभ्यो नियमात्,' तद्रूपाणि[3] तेषां नैष्ठिकादीनां रूपाणि येषां धर्मा इत्यर्थः। तेषामभावास्तद्रूपाभावाः, तेभ्यः शास्त्रैर्नियमात्। नैष्ठिकाद्याश्रमं प्रविष्टानस्वाश्रमधर्मनिवृत्तिभ्यो नियच्छन्ति हि शास्त्राणि—"ब्रह्मचार्याऽऽचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादय"न्निति, "अरण्यमियात्ततो न पुनरेया"दिति च, "संन्यस्याग्निं न पुनरावर्त्तये"दिति च[4]। अतो विधुरादिवन्नैष्ठिकादीनामनाश्रमित्वेनावस्थानासम्भवान्नानधिकरोति ब्रह्मविद्या। जैमिनेरपीत्यविगानं दर्शयन्नुक्तं स्वाभिमतं द्रढयति।

---

१ ०द्विषये—इति लि० पु०। २ चाश्रमि स्वयमेवो—इति लि० पु०।

†† एतच्चिह्नान्तर्गतः पाठो लि० पु० त्रुटितः।

३ तद्रूपाणीति लि० पु० नास्ति। ४ चकारो नास्ति लि० पु०।

[1]विहीयतेऽसौ कलुषेण मानवः
सुखेन गच्छेत्स मृतोऽपि सद्गतिम् ॥ १५० ॥

आदिकाण्डे अनुक्रमणिका
समाप्ता ॥

V.

[2]श्रुत्वा पूर्वं काव्यबीजं देवर्षेर्नारदादृषिः ।
लोकादन्विष्य भूयश्च चरितं चरितव्रतः ॥ १ ॥
[3]उपस्पृश्योदकं सम्यङ् मुनिः स्थित्वा कृताञ्जलिः ।
तपोबलेन चान्विष्य चरितं भूरितेजसः ॥ २ ॥
[4]जन्म रामस्य सुमहद्वीर्यं सर्वानुकूलताम् ।

---

1. 9. विमुच्यते &c. 2. B. Chap. III. Sl. 1. श्रुत्वा वस्तु समग्रं तद्धर्मार्थसहितं हितं । व्यक्तमन्वेषते भूयो यद्वृत्तं तस्य धीमतः ॥ 3. After this line. G. 2. प्राची. नाग्रेषु दर्भेषु काव्यस्यान्वेषते गतिं ॥ B. 2. प्राचीनाग्रेषु दर्भेषु धर्मेणान्वेषते गतिं ॥ V.—धर्मेणान्वेषते गतिं ॥ The second line of this Sloka is the first line of the next Sl. in G.; B. has nothing corresponding to the 2nd line 4. Before the 3rd Sloka here, B. has the following:—रामलक्ष्मणसीताभी राज्ञा दशरथेन च । सभार्येण सराष्ट्रेण यत्प्राप्तं तत्र तत्त्वतः ॥ हसितं भाषितञ्चैव [a]गतिर्यावच्च चेष्टितं । तत्सर्वं धर्मवीर्येण यथावत्संप्रपश्यति । स्त्रीतृतीयेन च तथा यत्प्राप्तं चरता वने । सत्यसन्धेन रामेण तत्सर्वं [b]चान्ववेक्षत ॥ ततः पश्यति धर्मात्मा तत्सर्वं योगमास्थितः । पुरा यत्तत्र निर्वृत्तं पाणावामलकं यथा ॥ तत्सर्वं तत्त्वतो दृष्ट्वा धर्मेण स[c] महामतिः । अभिरामस्य रामस्य तत्सर्वं कर्तुमुद्यतः ॥ कामार्थगुणसंयुक्तं धर्मार्थगुणविस्तरं । समुद्रमिव रत्नाढ्यं सर्वश्रुतिमनोहरं ॥ स यथा कथितं पूर्वं नारदेन महात्मना ॥ रघुवंशस्य चरितं चकार भगवान्[d] मुनिः ॥ For (a), (b), (c), & (d), V. has गतिं, चान्ववेक्षितं, महाद्युतिः, and ऋषिः respectively.

लोकस्य प्रियतां [1]क्षान्तिं सौम्यतां [2]सत्यवाक्यताम् ॥३॥
[3]मिथिलागमनञ्चैव धनुषश्चैव भेदनम् ।
रामरामविवादश्च [4]गुणान्दशरथस्य च ॥ ४ ॥
[5]नाना चित्राः कथाश्चान्या विश्वामित्र[6]महामुनेः ।
तथाभिषेकं रामस्य कैकेय्या दुष्टभावताम् ॥ ५ ॥
[7]व्याघातञ्चाभिषेकस्य [8]रामस्य च विवासनम् ।
राज्ञः शोकं विलापञ्च [9]मोहं मरणमेव च ॥ ६ ॥
प्रकृतीनां विषादञ्च [10]तथैव च विसर्ज्जनम् ।
निषादाधिपसंवादं [11]सूतस्य च विसर्जनम् ॥ ७ ॥
गङ्गाया[12]श्चैव सन्तारं भरद्वाजस्य दर्शनम् ।
भरद्वाजाभ्यनुज्ञानाच्चित्रकूटस्य दर्शनम् ॥ ८ ॥
वास्तुकर्म्मनिवेशञ्च भरतागमनन्तथा ।
प्रसादनञ्च रामस्य पितुश्च सलिलक्रियाम् ॥ ९ ॥
[13]पादुकाभ्यभिषेकञ्च नन्दिग्राम[14]निवेशनम् ।
दण्डकारण्यगमनं [15]सुतीक्ष्णेन समागमम् ॥ १० ॥

---

1. P. कान्तिं &c. 2. B. 10. सत्यशीलतां. 3. B. 11b, & 12 a. जानक्याश्च विवाहञ्च धनुषश्च विभेदनं ॥ रामरामविवादञ्च गुणान्दाशरथेस्तथा ॥ 4. G. 5. भयं &c. 5. B. 11 a &. 12b. make up this Sloka. 6. B. महायने ॥ 7. B. 13. विघातं &c. 8. P. राघवस्य &c. 9. B. परलोकस्य चाश्रयं ॥ 10. B. 14. प्रकृतीनां विसर्ज्जनं ॥ 11. B. सूतोपावर्त्तनं तथा । G. 8. सूतस्य च निवर्त्तनं. P. सूतस्य विनिवर्त्तनं ॥ 12 B. 15 चापि. &c. 13. B. 17. पादुकाप्याभिषेकं च &c; G. 10. पादुकाद्यभिषेकं च &c; P. पादुकाभ्यभिषेकञ्च &c. 14. B. निवासनम्, G. निवासनं, P. निवेशनम्. 15. B. विराधस्य

[1]अनसूयासमस्याञ्च अङ्गरागस्य चार्पणम् ।
[2]शरभङ्गाश्रमे वासं वासवस्य च दर्शनम् ॥ ११ ॥
[3]आगस्त्याश्रमवासञ्च [4]अगस्त्याच्च विसर्जनम् ।
समागमं विराधेन वासं पञ्चवटे तथा ॥ १२ ॥
हासं सूर्पनखायाश्च विरूपकरणन्तथा ।
वधं खरत्रिशिरसोः [5]कथनं रावणस्य च ॥ १३ ॥
मारीचस्य विनाशञ्च वैदेह्या हरणन्तथा ।
[6]जटायोर्निधनञ्चैव विलापं राघवस्य च ॥ १४ ॥
[7]कबन्धग्रहणञ्चैव कबन्धस्य वधन्तथा ।
विलापञ्चैव पम्पायां राघवस्य महात्मनः ॥ १५ ॥
[8]ऋष्यमूकाभिगमनं सुग्रीवेण समागमम् ।
प्रत्ययोत्पादनं सख्यं वालिसुग्रीवविग्रहम् ॥ १६ ॥
वालिप्रमथनं [9]राज्ये सुग्रीवप्रतिपादनम् ।
तारा[10]विलापं समयं [11]वर्षारात्रिविवासनम् ॥ १७ ॥

कथनन्तथा. 1. B. 18 समास्याञ्च &c. 2. B. दर्शनं शरभङ्गस्य सुतीक्ष्णेन समागमं ॥ This is the first line of the Sloka in B. 3. B. 19. दर्शनञ्चाप्यगस्त्यस्य धनुषो ग्रहणन्तथा । शूर्पणख्याश्च संवादं विरूपकरणं तथा । The second line is nearly the same as the first line. Sl. 13 of our text. 4. G. 12. अगस्त्यादस्त्रलंभनम् । 5. B. 20. उत्थानं रावणस्य च. 6. B. 21. राघवस्य विलापञ्च गृध्रराजनिबर्हणं । 7. B. 21-22. कबंधदर्शनं चैव पम्पायाश्चापि दर्शनम् ॥ (a)शबरीदर्शनञ्चैव फलमूलाशनं तथा । प्रलापं चैव पंपायां हनूमद्दर्शनं तथा ॥ V. for (a) has शबरीदर्शनञ्चैव हनूमद्दर्शनं तथा । विलापं चैव पंपायां राघवस्य महात्मनः ॥ Between l. 1 & 2 of Sl. 15 of our text G. 16 l. 1 reads शबर्या दर्शनञ्चैव पम्पाया दर्शनं तथा । 8. B. 23. ऋष्यमूकस्य गमनं &c. 9. B. 24. चैव &c. 10. P. विलापसमनं &c. 11 B.

कोपं राघवसिंहस्य बलानामुपसंग्रहम् ।
[1]दिशः प्रस्थापनञ्चैव पृथिव्याश्च निवेदनम् ॥ १८ ॥
[2]अङ्गुरीयकदानञ्च [3]तथैव बिलदर्शनम् ।
प्रायोपवेशनञ्चैव सम्पाते[4]श्चैव दर्शनम् ॥ १९ ॥
पर्वतारोहणञ्चैव [5]सागरस्य च लङ्घनम् ।
[6]सिंहिकादर्शनञ्चैव [7]लङ्कालयनिदर्शनम् ॥ २० ॥
[8]रात्रिप्रवेशं लङ्कायां चिन्ता हनुमतस्तथा ।
आपानभूमिगमनमवरोधस्य दर्शनम् ॥ २१ ॥
[9]अशोकवनिकायानं सीतायाश्चापि दर्शनम् ।
राक्षसीदर्शनञ्चैव रावणस्य च दर्शनम् ॥ २२ ॥
[10]संभाषणञ्च [11]वैदेह्या अभिज्ञानस्य चार्पणम् ।
मणिप्रदानं सीताया [12]वृक्षभङ्गन्तथैव च ॥ २३ ॥
राक्षसीविद्रवञ्चैव किङ्कराणां निबर्हणम् ।

वर्षरात्रनिवासनम्; G. 18. वर्षारात्रिनिवासनम्. 1. P. देश &c. 2. B 26. अंगुलीयकदानं च &c; P. अङ्गुरीयप्रदानञ्च &c. 3. B. ऋक्षस्य &c. 4. B. चापि &c. 5 B. 27. सागरस्यापि &c. 6. B. has here three lines instead of this one, before the next Sloka of our text:— समुद्रवचनाच्चैव मैनाकस्य च दर्शनम् ॥ राक्षसीतर्जनञ्चैव छायाग्राहस्य दर्शनम् । सिंहिकायाश्च निधनं लंकामलयदर्शनम् ॥ 7. G. 21. लंकानिलयदर्शनम्; P. लंकालयनिदर्शनम्. 8. B. 29. रात्रौ लंकाप्रवेशं च एकस्यापि विचिन्तनम् । &c. 9. This is the 2nd line of B. 30., the 1st line is—दर्शनं रावणस्यापि पुष्पकस्य च दर्शनम् । 10. B. 31—32. अभिज्ञानप्रदानं च सीतायाश्चापि भाषणम् । राक्षसीतर्जनं चैव त्रिजटास्वप्नदर्शनम् ॥ मणिप्रदानं &c. 11 G. 24. मैथिल्या &c. 12. P. वनभङ्गं &c.

[1]अमात्यपुत्रनिधनं सेनापतिवधन्तथा ॥ २४ ॥
अक्षस्य निधनञ्चापि [2]यानमिन्द्रजितस्तथा ।
ग्रहणं [3]वानरेन्द्रस्य लङ्का[4]दाहाभिगर्जनम् ॥ २५ ॥
[5]प्रतिप्रयाणमेवापि मधूनां भक्षणन्तथा ।
राघवाश्वासनञ्चैव [6]मणिनिर्यातनन्तथा ॥ २६ ॥
*सङ्गमञ्च [7]समुद्रस्य नलसेतोश्च बन्धनम् ।
[8]प्रतारञ्च समुद्रस्य [9]रात्रौ लङ्कोपरोधनम् ॥ २७ ॥
विभीषणेन संसर्गं वधोपायनिवेदनम् ।
कुम्भकर्णस्य [10]च वधं मेघनाद[11]वधन्तथा ॥ २८ ॥
रावणस्य विनाशञ्च †सीतावाप्तिन्त[12]थैव च ।
विभीषणाभिषेकञ्च [13]पुष्पकारोहणन्तथा ॥ २९ ॥

---

1. This, and the following line are wanting in B. 2. G. 26. निर्याणे-न्द्रजिता तथा; P. यानमिन्द्रजितस्तथा. 3. B. 33.—वायुसूनोश्च &c. 4. G.—दाहाभिमर्दनम् । 5. G. 27. प्रतिप्लवनमेवापि &c; P. प्रतिप्रयाण-मेवापि &c. B. 33. प्रतिप्लवनमेवाथ मधूनां हरणं तथा ॥ &c. 6. P. वापि &c.

* The following Sloka in the margin of our ms. is intended to be read between Slokas 26. & 27.——

ततः सङ्गमनं समुद्रस्य च दर्शनम् ।
विभीषणागमश्चैव अभिषेकस्तथैव च ॥

7. B. 34. समुद्रेण &c. 8. G. 28. प्रतारणं &c; P. प्रतरणं &c. 9. B. 35. रात्रौ लङ्कावरोधनं । 10. B. 36. निधनं &c. 11. B. निब-र्हणं &c. † The following reading in the margin of our ms. is intended to be read between the two halves of this line :——सीतात्यागस्तथैव च । ब्रह्मादिदेवतानाञ्च दर्शनं वचनन्तथा ॥ सीतायाः प्रत्ययश्चैव——। 12. B. 36. भरतः पुरे । 13. B. 37. पुष्पकस्य च दर्शनम् ।

Digitized by Google

[1]अयोध्यायाश्च गमनं भरतेन समागमम् ।
रामाभिषेकाभ्युदयं हरिरक्षोविसर्जनम् ॥ ३० ॥
*[2]सीतायाश्च परित्यागं प्रकृतीनाञ्च रञ्जनम् ।
अनागतञ्च यत्किञ्चिद्रामस्य वसुधातले ॥ ३१ ॥
[3]प्राप्तराज्यस्य रामस्य चरितं यच्च धीमतः ।
अभ्यागममृषीणाञ्च शत्रुघ्नस्य विसर्जनम् ॥ ३२ ॥
[4]वने प्रसूतिं सीताया लवणस्य रणे वधम् ।
कालदुर्वाससोः प्राप्तिं लक्ष्मणस्य विसर्जनम् ॥ ३३ ॥
[5]स्थापयित्वा सुतान् राज्ये यथा रामो दिवंगतः ।

---

1. B. 37—38. अयोध्यायाश्च गमनं भरद्वाजसमागमं । प्रेषणं वायुपुत्रस्य भरतेन समागमं ॥ रामाभिषेकाभ्युदयं सर्वसैन्यविसर्जनं । V. अयोध्यायाश्चगमनं भरतेन समागमं ॥ रामाभिषेकाभ्युदयं सर्वसैन्य विसर्जनं ॥ * The following Sloka in the margin of our ms. is intended to be read between Sl. 30. & 31——आगस्त्यप्रभृतीनाञ्च महर्षीणां समागमम् । राक्षसानां समुत्पत्तिं रावणस्य जयन्तथा ॥ 2. There is a marginal reading both in our ms. and P. for this line:—प्रकृतीनाञ्च रञ्जनं सीतात्यागन्तथैव च । B. 38. स्वराष्ट्ररञ्जनञ्चैव वैदेह्याश्च विसर्जनम् । B. 39, having the last line of this Sloka of our text, for its first line, and the line तच्चकारोत्तरे काव्ये वाल्मीकिर्भगवानृषिः, for the second line, finishes the chapter. 3. This and the following 4 lines are wanting in B. 4. The following 3 lines in the margin of our ms. and of P. are intended to be read between the 2 lines of this Sloka:—मथुरायां निवासञ्च मैथिल्यानयनन्तथा । यज्ञस्यान्ते च सीतायाः प्रत्ययस्य निदर्शनम् ॥ भूमौ प्रवेशं सीतायाः सन्तापं राघवस्य च ॥ 5. G. 36. स्थापयित्वा यथा पुत्रान् राज्ये रामो दिवं गतः ॥ P. is wormeaten here.

Digitized by Google

[1]त्रैकाल्यदर्शी तत्पूर्वं तपोयोगबलेन च ॥ ३४ ॥
ददर्श [2]चैतत् प्रत्यक्षम्पाणावामलकं यथा ।
[3]दृष्ट्वा चानन्तरञ्चक्रे रामस्य चरितं महत् ॥ ३५ ॥
धर्म्मकामार्थसंयुक्तं पुण्यश्रवणकीर्त्तनम् ।
श्रुतिरत्नचयाकीर्णं काव्यसागरमद्भुतम् ॥ ३६ ॥
[4]कृत्वा चेदमशेषेण काव्यं रामायणाह्वयम् ।
चिन्तयामास क इदं लोकेऽस्मिन् [5]प्रथयिष्यति ॥३७॥
[6]अथ चिन्तयतस्तस्य महर्षेर्भावितात्मनः ।
तदा जगृहतुः पादौ मुनिवेशधरौ [7]वने ॥ ३८ ॥
[8]वाल्मीकिशिष्यौ तरुणौ रूपौदार्य्यगुणान्वितौ ।
कुशीलवाविति ख्यातौ सीतारामाङ्गसम्भवौ ॥ ३९ ॥

---

1. G. 36. त्रैलोक्यदर्शी तत्सर्वं &c; This and the foll: line correspond to B. 6. (chap III)—ततः पश्यति धर्म्मात्मा तत्सर्वं योगमास्थितः । पुरा यत्तत्र निर्वृत्तं पाणावामलकं यथा ॥ 2. G. 37.—तच्च &c. 3. This line, and the following Sloka correspond to B. 7. & 8. (chap. III),—तत्सर्वं तत्त्वतो दृष्ट्वा धर्म्मेण स महामतिः । अभिरामस्य रामस्य तत्सर्वं कर्त्तुमुद्यतः ॥ कामार्थगुणसंयुक्तं धर्म्मार्थगुणविस्तरं । समुद्रमिव रत्नाढ्यं सर्वश्रुतिमनोहरं ॥ 4. The following Sloka in the margin of our ms. and P., is intended to be read before this Sloka:—चतुर्विंशसहस्राणि श्लोकानामुक्तवान् मुनिः । तथा सर्गशतञ्चैव षट्-सर्गञ्च तथोत्तरम् ॥ This corresponds to B. 2. (chap. IV.) चतुर्विंशसहस्राणि श्लोकानामुक्तवानृषिः । तथा सर्गशतान्पञ्च षट्काण्डानि तथोत्तरं ॥ From Sloka 37 to the end of this chapter our text materially agrees with B. chap IV. The readings quoted below. for comparison and contrast, are therefore from B. Chap. IV. For Sl. 37 -B. 3. has कृत्वा तु तन्महाप्राज्ञः स भविष्यदुत्तरं । चिंतयामास कोन्वेतत्प्रयुंजीयादिति प्रभुः ॥ 5. G. 39. प्रथयेदिति । 6. B 4. तस्य चिन्तयमानस्य....। अगृह्णीतां ततः पादौ मुनिवेषौ कुशीलवौ ॥ 7. G. 40., and Marginal reading in P., मुनेः. 8. G. 41. वाल्मीकि-शिष्यौ &c.; B. 5. कुशीलवौ तु धर्म्मज्ञौ राजपुत्रौ यशस्विनौ । भ्रातरौ स्वरसम्पन्नौ ददर्शाश्रमवासिनौ ॥

Digitized by Google

[1]स तौ मूर्द्धन्युपाघ्राय वाल्मीकिर्भगवानृषिः ।
उवाचेदं तथा वाक्यं प्रणतावग्रतस्थितौ ॥ ४० ॥
आर्षं रामायणं काव्यमिदं तावन्मया कृतम् ।
गृह्णीतं मन्नियोगेन पुण्यश्रवणकीर्त्तनम् ॥ ४१ ॥
पौलस्त्यवधसंयुक्तं धर्म्मकामार्थसंहितम् ।
[2]पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभिरन्वितम् ॥ ४२ ॥
[3]तन्त्रीगीतैश्च मधुरैरन्वितं सप्तभिः स्वरैः ।
जातिभिः सप्तभिर्युक्तं [4]श्रोतृश्रुतिमनोहरम् ॥ ४३ ॥
[5]शृङ्गारवीरबीभत्सरौद्रैश्च सभयानकैः ।
करुणाद्भुतहास्यैश्च युक्तं काव्यरसैरपि ॥ ४४ ॥
[6]एवमुक्त्वा च तौ बालौ भगवानृषिसत्तमः ।
सम्यगध्यापयामास काव्यं रामकथाश्रयम् ॥ ४५ ॥

---

1. For this, and the following four lines-B. 6 & 7.—स तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ । वेदोपबृंहणार्थाय तावग्राहयत प्रभुः ॥ काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत् । पौलस्त्यवधमित्येवं चकार चरितव्रतः ॥
2. G. 44. पाठे &c. 3. For this Sloka, B. 8. जातिभिः सप्तभिर्युक्तं तन्त्रीलयसमन्वितं ॥ 4. P. श्रोतुः &c. 5. B. 9. रसैः शृंगारकरुणहास्यरौद्रभयानकैः । वीरादिभीरसैर्युक्तं काव्यमेतदगायतां ॥ G. 46. शृंगारवीरबीभत्सरौद्रहास्यभयानकैः । करुणाद्भुतशान्तैश्च &c. ॥ P. has a Marginal-reading for the first line, agreeing with our text. 6 B. has nothing corresponding to this Sloka here; the meaning of अध्यापयामास has beeu expressed by अग्राहयत in B. 6. already quoted.

Digitized by Google

[1]वाग्विधेयं यदा ताभ्यां कृतं तच्च विशेषतः ।
पुण्यं रामायणं काव्यं तदा तौ मुनिरब्रवीत् ॥ ४६ ॥
गीयतामिदमाख्यानं भवद्भ्यामृषिसंसदि ।
राजर्षीणां पुण्यकृतां साधूनाञ्च समागमे ॥ ४७ ॥
गुरुणैवमनुज्ञातौ ततस्तौ देवरूपिणौ ।
[2]कुशीलवौ राजपुत्रौ बिम्बाद्बिम्बमिवोद्धृतौ ॥ ४८ ॥
वेदवेदाङ्गेतिहास[3]शास्त्रेषु परिनिष्ठितौ ।
जगतुस्तौ तदा काव्यं मधुरं मधुरस्वरौ ॥ ४९ ॥
यथोपदिष्टमृषिणा सन्निधौ ब्रह्मवादिनाम् ।
[4]तयोर्ब्रह्माभवत् प्रीतः सेन्द्राश्च सुरसत्तमाः ॥ ५० ॥
गन्धर्वाः पतगाश्चैव पन्नगाश्च महर्षिभिः ।
[5]तौ कदाचित्समेतानामृषीणां देवरूपिणौ ॥ ५१ ॥
[6]काव्यं रामायणं मध्ये सहितावभ्यगायताम् ।
[7]तच्छृण्वतां तदा श्राव्यमृषीणां [8]देवसन्निधौ ॥ ५२ ॥

1. For this and the following four Slokas—B. 10-13. तौ तु गान्धर्वतत्त्वज्ञौ स्थानमूर्च्छनकोविदौ । भ्रातरौ स्वरसम्पन्नौ गन्धर्वाविव रूपिणौ ॥ रूपलक्षणसम्पन्नौ मधुरस्वरभाषिणौ । बिम्बादिवोत्थितौ बिम्बौ रामदेहात्तथापरौ ॥ तौ राजपुत्रौ कार्त्स्न्येन धर्म्यमाख्यानमुत्तमम । वाचोविधेयं तत्सर्वं कृत्वा काव्यमनिन्दितौ ॥ ऋषीणाञ्च द्विजातीनां साधूनां च समागमे । यथोपदेशं तत्त्वज्ञौ जगतुस्तौ समाहितौ ॥ 2. For this line G. 50-51 कुशीलवौ राजपुत्रौ प्रकृत्या मधुरस्वरौ ॥ रूपानुरूपौ रामस्य बिम्बाद्बिम्बमिवोद्धृतौ । 3. G. 51. पुराण परि &c; P. however has शास्त्रेषु परि. &c. 4. B. has nothing corresponding to this & the following line. 5. For this line, and the following two Slokas B. 14-16 महात्मानौ महाभागौ सर्वलक्षणलक्षितौ । तौ कदाचित्समेतानामृषीणां भावितात्मनां ॥ मध्येसभं समीपस्थाविदं काव्यमगायतां । तच्छ्रुत्वा मुनयः सर्वे बाष्पपर्याकुलेक्षणाः ॥ साधु साध्विति तावूचुः परं विस्मयमागताः । ते प्रीतमनसः सर्वे मुनयो धर्मवत्सलाः ॥ 6. P. marginal reading for this line:—राजधानीषु राज्ञाञ्च समीपेष्वभ्यगायतां । 7. P. शृण्वतां तु &c. 8. G. 55. सर्वसंभवः ।

Digitized by Google

[1] सहर्षोऽभून्महानादः साधुसाध्विति शंसताम् ।
[2] सुप्रीतमनसश्चैव मुनयो धर्म्मवत्सलाः ॥ ५३ ॥
[3] प्रशशंसुर्भ्रातरौ तत्र गायन्तौ तौ कुशीलवौ ।
[4] अहो भावार्थसङ्गीतमहो गीतमविस्वरम् ॥ ५४ ॥
अहो[5] भगवता सम्यग्रामस्य चरितं[6] महत् ।
चिरवृत्तमपि ह्येतत्प्रत्यक्षमिव दृश्यते ॥ ५५ ॥
संस्कृतं मधुरञ्चैव समाक्षरपदक्रमम् ।
प्रयोक्ताराविमौ चापि सम्यगस्य कुशीलवौ ॥ ५६ ॥
कुमारौ देवगर्भाभौ तरुणौ मधुरस्वरौ ।
[7] अहोश्राव्यमहोस्वाद्यमहोगीतमविस्वरम् ॥ ५७ ॥
[8] व्यक्तञ्च मधुरञ्चैव परया स्वरसम्पदा ।
पदसन्धिसमायुक्तं [9] तालमानसमन्वितम् ॥ ५८ ॥
[10] संयुक्तञ्चापि रक्तञ्च परया स्वरसम्पदा ।

---

1. G. 55. संचक्रे &c; P. सहसा &c. 2. G. 56. सुप्रीतमानसाः &c; P. सुप्रीतमनसः &c. 3. For this, and the following Slokas down to the first line of Sl. 60 B. 17-20. प्रशशंसुः प्रशस्तौ गायमानौ कुशीलवौ । अहोगीतस्य माधुर्यं श्लोकानां च विशेषतः ॥ चिरनिर्वृत्तमप्येतत्प्रत्यक्षमिव दर्शितं । प्रविश्यतावुभौ सुष्ठु तथाभावमगायतां ॥ सहितौ मधुरं रक्तं सम्पन्नं स्वरसम्पदा । एवं प्रशस्यमानौ तौ तपःश्लाघ्यैर्महर्षिभिः ॥ संरक्ततरमत्यर्थं मधुरं तावगायतां । 4. G. 57. अहो भावानुगं काव्यमहो गीतमहोस्वरम् । P. has अहो भावानुगं गीतमहो गीतमहो स्वरं for this line, and the line-व्यक्तञ्च मधुरञ्चैव नानाख्यानयुतन्तथा after it. 5. G. 57. भगवतः &c.; P. भगवता &c. 6. P. कृतं. 7. G. 60 अहो श्राव्यमहो वाच्यम् &c.; P. अहो श्राव्यमहो वाच्यमहो गीतमहो स्वरम् । 8. This line is wanting in G., but P. has it word for word. 9. P. तालतार &c. 10. G. 61. संरक्तं चाभिरक्तं च &c; P. संयुक्तं चाभिरक्तं च &c.

Digitized by Google

एवं प्रशस्यमानौ तौ श्लाघ्यमानौ [1]महर्षिभिः ॥ ५९ ॥
भूयो[2]रक्ततरं साधु मधुरञ्चाप्यगायताम् ।
[3]ताभ्यां प्रीतो मुनिः कश्चित् पानीयकलसन्ददौ ॥६०॥
कश्चि[4]द्द्रुमफलं स्वादु वल्कलं कश्चिदीप्सितम् ।
[5]एवं पूर्व्वमिदं [6]वाक्यं मुनिभिः प्रतिपूजितम् ॥ ६१ ॥
[7]बीजभूतं मनुष्याणां कवीनामार्षमद्भुतम् ।
प्रशस्यमानौ [8]तावेवं कदाचिद्देवरूपिणौ ॥ ६२ ॥
राजधानीषु राज्ञाञ्च समीपेष्वभ्यगायताम् ।
अश्वमेधे रामोऽपि तावुपश्रुत्य गायनौ ॥ ६३ ॥
[9]सत्कृत्यानाययामास पुरुषैराप्तकारिभिः ।

---

1. G. 61 कुशीलवौ, but P. has महर्षिभिः. 2. G. 61. बहुतरं &c, but P. has रक्ततरं &c. 3. For this, and the next line—B. 20-26 प्रीतः कश्चिन्मुनिस्ताभ्यां संस्थितः कलशं ददौ ॥ प्रसन्नो वल्कलं कश्चिद्ददौ ताभ्यां महायशाः । अन्यः कृष्णाजिनम· दाद्यज्ञसूत्रं तथापरः ॥ कश्चित्कमण्डलुं प्रादान्मौञ्जीमन्यो महामुनिः । वृसीमन्यस्तदा प्रादात्कौपीनमपरो मुनिः ॥ ताभ्यां ददौ तदा हृष्टः कुठारमपरो मुनिः । काषायमपरो वस्त्रं चीरमन्यो ददौ मुनिः ॥ जटाबन्धनमन्यस्तु काष्ठरज्जुं मुदान्वितः । यज्ञभाण्डमृषिः कश्चित् काष्ठभारं तथापरः ॥ औदुम्बरीं वृसीमन्यः स्वस्ति केचित्तदावदन् । आयुष्यमपरे प्राहुर्मुदा तत्र महर्षयः ॥ ददुश्चैवं वरान् सर्वे मुनयः सत्यवादिनः । 4. G. 63. वल्कलं &c. 5. For this, line B. 26. आश्चर्यमिदमाख्यानं मुनिना संप्रकीर्त्तितम्. 6. G. 63. काव्यं &c. 7. For this and the following Sloka B. 27-29. परं कवीनामाधारं समाप्तं च यथाक्रमं । अभिगीतमिदं गीतं सर्व्वगीतिषु कोविदौ ॥ आयुष्यं पुष्टिजननं सर्व्वश्रुतिमनोहरं । प्रशस्यमानौ सर्व्वत्र कदाचित्तत्र गायकौ ॥ रथ्यासु राजमार्गेषु ददर्श भरताग्रजः । 8. P. तावेव &c. 9. For this, and the following four Slokas, B. 29—31. स्ववेश्म चानीय ततो भ्रातरौ स कुशीलवौ ॥ पूजयामास पूजार्हौ रामः शत्रुनिबर्हणः । आसीनः काञ्चने दिव्ये स च सिंहासने प्रभुः ॥ उपोपविष्टैः सचिवैर्भ्रातृभिश्च समन्वितः । दृष्ट्वा तु रूपसम्पन्नौ विनीतौ भ्रातरावुभौ ॥

Digitized by Google

ताविदं जगतुस्तत्र काव्यं रामप्रचोदितौ ॥ ६४ ॥
कर्म्मान्तरेषु विप्राणां रामलक्ष्मणसन्निधौ ।
शत्रुघ्नभरतादीनामन्येषाञ्च महीक्षिताम् ॥ ६५ ॥
वशिष्ठाग्निपुरोगाणां सन्निधौ ब्रह्मवादिनाम् ।
रामस्तत्रासने शुभ्रे स्पर्द्धास्तरणसंवृते ॥ ६६ ॥
उपविश्य[1] च शुश्राव तदात्मचरितं महत् ।
आर्षं रामायणं सार्द्धं भ्रातृभिर्भरतादिभिः ॥ ६७ ॥
[2]पौरजानपदैश्चैव वृतः शतसहस्रशः ।
दृष्ट्वाथ रूपसम्पन्नौ तावुभौ [3]बालिनौ ततः ॥ ६८ ॥
उवाच लक्ष्मणं रामः [4]सर्वांश्चैव समासदः ।
श्रूयता[5]मिदमाख्यानमनयोर्देववर्च्चसोः ॥
विचित्रार्थपदं सम्यग्[6]गायतोर्मधुरस्वरम् ॥ ६९ ॥
[7]इमौ हि बालौ नृपलक्षणान्वितौ

---

1. G. 69. तु &c 2. Between this line & the next G. has the line—आ. न्वागतौ यसदृशौ कुमारौ देवरूपिणौ । P., like our text, is wanting in this line. 3. G. 71. विनीतौ &c.; P. चोरितौ &c. 4. B. 32. शत्रुघ्नं भरतं तथा । 5. B. एतदाख्यानं &c. 6. B. 33. गायकौ समचोदयत् (With this alteration and the insertion of the following lines, B. unfortunately cuts off all connection between उवाच in this Sloka—and the last two Slokas of this chapter which are also Rama's saying; the lines inserted in B. are—तौ चापि मधुरं रक्तं स्वचित्तायतनिःस्वनं ॥ तन्त्रीलयवदत्यर्थं विश्रुतार्थमगायतां । ह्लादयत्सर्वगात्राणि मनांसि हृदयानि च ॥ श्रोत्राश्रयसुखं गेयं तदुभौ जनसंसदि ॥
7. For this and the following Sloka B. 35. & 36—

इमौ मुनी पार्थिवलक्षणान्वितौ
कुशीलवौ चैव महातपस्विनौ ।

[1]कुशीलवावेव तयोश्च नाम्नी ।
ममेतिवृत्तं किल येयमद्भुतम्
महर्षिवाल्मीकिकृतं प्रगास्यतः ॥ ७० ॥
ततस्तु तौ राघवसंप्रचोदिता-
वगायतां काव्यमिदं यथाक्रमम् ।
तथापि रामः सहितः समागतै-
र्बभूव [2]चित्रार्पितचेतनस्तदा ॥ ७१ ॥
इत्यादिकाण्डे रामायणे काव्योपचयः ॥

V.

[3]सागरान्ता मही येषामासीद्वीर्यार्ज्जिता किल ।
[4]आमनोः पुण्यकीर्त्तीनां राज्ञाममिततेजसाम् ॥ १ ॥
[5]सगरः पूर्वजो येषां सागरो येन खानितः ।
षष्टिपुत्रसहस्राणि यं यान्तं पृष्ठतोऽन्वयुः ॥ २ ॥

ममापि तद्भूतिकरं प्रचक्षते
महानुभावं चरितं निबोधत ॥
ततस्तु तौ रामवचःप्रचोदिता-
वगायतां मार्गविधानसम्पदा ।
सचापि रामः परिषद्गतः शनै-
र्बुभूषयासक्तमना बभूव ॥

1. G. 73. कुशीलवौ चापि &c. P. has a Marginal reading agreeing with our text. 2. G. 74. तत्रार्पित &c., but P. has चित्रार्पित &c. 3. For this Sloka—B. V. I. सर्वा पूर्वमियं येषामासीत्कृत्स्ना वसुंधरा । प्रजापतिमुपादाय नृपाणां जयशालिनां ॥ 4. P. प्राङ्मनोः &c. 5. P. reads

[1]इक्ष्वाकूणामिदं [2]तेषां वंशे कीर्त्तिविवर्द्धनम् ।
निबद्धं [3]पुण्यकीर्त्तीनां रामायणमिति श्रुतम् ॥ ३ ॥
[4]तदिदं श्रयतामार्षं [5]पुण्यं पापभयापहम् ।
[6]धर्म्मकामार्थसंयुक्तं श्रुतिस्मृत्युपबृंहितम् ॥ ४ ॥
कोशलो नाम मुदितः स्फीतो जनपदो महान् ।
निविष्टः सरयूतीरे [7]पशुधान्यधनर्द्धिमान् ॥ ५ ॥
अयोध्यानाम[8]नगरी तत्रासील्लोकविश्रुता ।
मनुना मानवेन्द्रेण [9]पुरैव परिनिर्म्मिता ॥ ६ ॥
आयता दश च द्वे च योजनानि महापुरी ।
श्रीमती त्रीणि विस्तीर्णा [10]नवसंस्थानशोभिता ॥ ७ ॥
[11]सुविभक्तान्तरद्वारा सुविस्तीर्णमहापथा ।
शोभिता राजमार्गेण जलसंशान्तरेणुना ॥ ८ ॥

---

the Sloka quoted above from B. before this Sloka. B. 2. for this Sloka——येषां स सगरो नाम सागरो येन खानितः । षष्टिपुत्रसहस्राणि यं यान्तं पर्यवारयन् ॥ 1. For this Sloka B. 3. इक्ष्वाकूणामिदं तेषां वंशे राज्ञां महात्मनां । महदुत्पन्नमाख्यानं रामायणमिति श्रुतम् ॥ 2. P. येषां &c. 3. G. 3. पुण्यमाख्यानं &c, but P. agrees with our text. 4. For this Sloka B. 4. तदिदं वर्तयिष्यावः सर्वं निखिलमादितः । धर्म्मकामार्थसहितं श्रोतव्यमनसूयता ॥ 5. G. 4. सर्वपाप &c. P. agrees with our text, but has सर्वं &c. in the Margin. 6. P. धर्म्मार्थकाम &c. 7. B. 5. प्रभूतधनधान्यवान् । 8. P. तत्रासीन्नगरी &c. 9. P. has the alternative readings पुरैव &c. and यत्नेन &c.; B. 6. या पुरी निर्म्मिता स्वयं । 10. B. 7. सुविभक्तमहापथा । 11. For this Sloka, B. 8. राजमार्गेण महता सुविभक्तेन शोभिता मुक्तपुष्पावकीर्णेन जलसिक्तेन नित्यशः ॥ P. has सुविभक्तान्तरापणा सुविभक्तमहापथा । शोभिताराजमार्गेण जलसंसिक्त रेणुना ॥

1नानावणिग्गणोपेता नानारत्नविभूषिता ।
महाशालावृता दुर्गा 2उद्यानाम्रवनायुता ॥ ९ ॥
3दुर्गगम्भीरपरिखा नानायुधसमन्विता ।
कपाटतोरणयुता उपेता धन्विभिः सदा ॥ १० ॥
4राजा दशरथो नाम महात्मा राष्ट्रवर्द्धनः ।
तां पुरीं पालयामास 5स्वपुरीं मघवानिव ॥ ११ ॥
6दृढद्वारप्रतोलीकां 7सुविभक्तान्तरायणाम् ।
नानायन्त्रायुधवतीं नानाशिल्पगुणान्विताम् ॥ १२ ॥
8शतघ्नीपरिघोपेतामुच्छ्रितध्वजतोरणाम् ।
9नानारत्नचयाकीर्णां धनधान्यसमन्विताम् ॥ १३ ॥
10हस्त्यश्वरथसम्पूर्णां 11नानायोधसमाकुलाम् ।

---

1. The 2nd lines of B. 14. & 12, put together, may make up a Sloka some thing like this one in our text:—नानादेशनिवासैश्च वणिग्भिरुपशोभिताम् ॥ उद्यानाम्रवणोपेतां महतीं सालमेखलां ॥ 2. G. 5. उद्यानवनशोभिता ; P. has a marginal reading agreeing with our text. 3. The first lines of B. 13. & 10 will make up some thing like this Sloka:—दुर्गगम्भीरपरिखां दुर्गामन्यैर्दुरासदां । कपाटतोरणवतीं सुविभक्तान्तरापणां । 4. For this Sloka–B. 9. तां तु राजा दशरथो महाराष्ट्रविवर्द्धनः । पुरीमावासयामास *दिवि देवपतिर्यथा ॥ *S. and V. have दिवं for दिवि. 5. G. 7. स्वपुरीं &c. 6. For this Sloka–B. 10. कपाटतोरणवतीं सुविभक्तान्तरापणां । सर्वयन्त्रायुधवतीमुषितां सर्वशिल्पिभिः ॥ 7. G. 8. सुविभक्तान्तरापणां P. has सुविभक्तान्तरालयां, & सुविभक्तान्तरापणां on the Margin. 8. For this Sloka–B. 11. सूतमागधसंबाधां श्रीमतीमतुलप्रभां । उच्चाट्टालध्वजवतीं शतघ्नीशतसंकुलां ॥ 9. This line is wanting in G. 10. For this Sl–B. 13–14. वाजिवारणसम्पूर्णां गोभिरुष्ट्रैः खरैस्तथा ॥ सामन्तराजसंघैश्च बलिकर्मभिरावृतां । 11. G. 9. नानायानसमाकुलां.

Digitized by Google

[1]नानापार्थिवदूतैश्च वन्दिभिश्चोपशोभिताम् ॥ १४ ॥
[2]विमानशतसंबाधां सर्वैश्च विबुधैर्युताम् ।
महाशालान्वितां दुर्गामुद्यानाम्रयुतैर्युताम् ॥ १५ ॥
[3]देवतायतनैश्चैव विमानैरिवशोभिताम् ।
[4]महोद्यानप्रपाभिश्च रुचिराभिरलङ्कृताम् ॥ १६ ॥
[5]प्रविभक्तमहाहर्म्यां [6]वरनारीगणान्विताम् ।
विद्वद्भिरार्यपुरुषैराकीर्णाममरोपमैः ॥ १७ ॥
आरोहमिव रत्नानां प्रतिष्ठानमिव श्रियः ।
[7]महाप्रासादशिखरैः शैलाग्रैरिव [8]शोभिताम् ॥ १८ ॥
[9]विमान[10]चयसम्बाधामिन्द्रस्येवामरावतीम् ।
अष्टापदपदालेख्ये रम्यामालिखितामिव ॥ १९ ॥

---

1. For This line G. 10. नानापार्थिवकदूतैश्च वन्दिभिश्चोपशोभिताम् । P. has नानापार्थिवदूतैश्च &c. 2. B. has no parallel or substitute for this Sloka; it is also wanting in G., but P. has the marginal reading—विमानशतसंबाधां पक्षैश्च विविधैर्युतां । महाशालान्वितां दुर्गामुद्यानाम्रवनैर्युतां ॥ 3. There is no parallel to this in B. but the foll. Sloka, viz. B. 19. may be taken as a substitute for it—विमानमिव सिद्धानां तपसाधिगतं दिवि । सुनिवेशितवेश्मान्तां नरोत्तमसमावृतां ॥ 4. G. 11. सभोद्यान &c. P. has महोद्यान &c. on the margin. 5. This Sl. has no parallel or substitute in B. 6. G. 11. &c. वरनारी &c. 7. For this line B. 15—प्रासादैरत्नविकृतैः पर्वतैरिव शोभिताम् । 8. G. 13. भूषितां, but P. has शोभितां. 9. For this & the foll. Sl. B.15-17 कूटागारैश्च सम्पूर्णामिन्द्रस्येवामरावतीं ॥ चित्रामष्टापदाकारां वरनारीगणायुतां । सर्वरत्नसमाकीर्णां विमानगृहशोभितां ॥ गृहगाढामविच्छिद्रां समभूमौ निवेशितां, (शालितण्डुलसंपूर्णामिक्षुकाण्डरसोदकां) ॥ 10. G. 13. शतसंबाधां &c.

अयं हि

अपवर्गविरुद्धेषु त्रिषु वर्गेषु तिष्ठताम् ।
प्रधानपुरुषार्थस्य पश्चिमस्याधिदैवतम् ॥ ३० ॥

किंच

अर्द्धावशेषितमहेश्वरपौरुषोयं
वर्गन्तृतीयमवधीरयतां विनेता ।
रत्या सलीलपरिरंभचलोलगत्या
पुष्पायुधः पुलकितैकभुजोऽभ्युपैति ॥ ३१ ॥

तदिह वयं त्वरितमपसृत्य कालोपपन्नकामोत्सवविहारसंकुले जीवलोके संवलितगुप्तवृत्तयस्समनन्तरकरणीयमाचरामः ।

(इतिनिष्क्रान्तौ)

-प्रस्तावना-

अथमेव इति निश्चितं तदेवाह ।

अपवर्गेति—॥ त्रिषु वर्गेषु धर्मार्थकामेषु तिष्ठतां पुरुषाणां प्रधानपुरुषार्थस्य पश्चिमस्य कामपुरुषार्थस्याधिदैवतं अभिमानिदेवता कामइत्यर्थः ॥ ३० ॥

पुनश्च तदेवाह ।

अर्धेति ॥ अर्धमवशेषितमवशिष्टं कृतं महेश्वरपौरुषं रुद्रपराक्रमो येन तथोक्तः । महेश्वरशब्दः त्रिपुरदहनहालाहलभक्षणादिक्रूरकर्मेति द्योत्यते । तृतीयं वर्गं काममवधीरयतां तिरस्कुर्वतां विनेता शिक्षकः । सलीलं सविभ्रमं यत्परिरम्भणमालिङ्गनं तेन लोला स्खलन्ती गतिर्यस्यास्तया रत्यासह पुलकितः संजातपुलकः एको भुजो यस्य स तथा अभ्युपैति अभिमुखमायाति ॥ ३१ ॥

संवलिताः संयुक्ताः अत एव गुप्ताः वृत्तयः व्यापाराः येषां ते तथोक्ताः अनन्तरकरणीयं अनंन्तरकर्तव्यं ।

प्रस्तावनेति—॥ आमुखस्य नामान्तरं एतावदामुखमिति कवेरिदं वाक्यं ।

प्रस्तावनामुखयोपन्यासत्वं ।

सूत्रधारो नटीं ब्रूते मार्षं वाथ विदूषकं ॥
स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्यायत्तदामुखं ।

Digitized by Google

(ततः प्रविशति वसन्तदत्तहस्तः कान्तासमेतः कामः)

कामः-(कः खल्वित्यादि पुनः पठित्वा) ।

प्रस्तावनाचेत्युक्तं ।

अत्र कथोद्घातेन पात्रप्रवेशः ।

प्रस्तावना वा तत्रस्युः कथोद्घातः प्रवृत्तकम् ॥

प्रयोगातिशयश्चाथ वीथ्यंगानि त्रयोदश ।

स्वेति वृत्तसमं वाक्यमर्थं वा यत्र सूत्रिणः ॥

गृहीत्वा प्रविशेत्पात्रं कथोद्घातोऽद्विधैव सः ।

कालसाम्यसमाक्षिप्तः प्रवेशस्यात्प्रवृत्तकम् ॥

एषोयमित्युपक्षेपात् सूत्रधारप्रयोगतः ।

पात्रप्रवेशो यत्रैष प्रयोगातिशयो मतः ॥

इति कथोद्घातादीनां त्रयाणां लक्षणमुक्त्वा ।

एषामन्यतमेनार्थं पात्रं वाक्षिप्यसूत्रभृत् ।

प्रस्तावनान्ते निर्गच्छेत्ततो वस्तुप्रपञ्चयेत् ॥

इति प्रतिपादितः । प्रस्तावनायां वीथ्यंगान्यामुखांगत्वादित्युक्तेरुद्धात्यकादीनि त्रयोदशवीथ्यंगानि च प्रयोक्तव्यानि ।

॥ प्रस्तावना ॥

अथ सूच्यदृश्यभेदाद्वस्तुनो द्वैविध्यं । तयोस्सूच्यार्थोपक्षेपकत्वाच्च विष्कंभादीना-मिदानीं सूच्यार्थोपक्षेपकं विष्कम्भं निबध्नाति । तत इति ।

तदुक्तं ।

सर्वं च द्विविधं वस्तु सूच्यं दृश्यमथापरं ।

अर्थोपक्षेपकैस्सूच्यं पंचभिः प्रतिपादयेत् ।

विष्कम्भचूलिकांकास्यमङ्कावतारप्रवेशकैः ॥

तेषु च ।

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।

संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः ॥

इत्युक्तलक्षणो विष्कम्भः । कान्ता रतिः ।

रे रे भरतकुलपांसन ।

दूरनमितमनोज्ञभ्रूलताचापभाजां
तरलहृदयलक्ष्ये तादृशस्नेहदिग्धे ।
कुवलयनयनानां कूणिते लोचनास्त्रे
शरणयतु विवेकः कान्दिशः कान्दिशीकः ॥ ३२ ॥

वसन्तः–

(स्वगतम्) उत्पथमनोरथोऽयमुपचितमदोऽतिशयमधातः अहं पुनर
पुनरावृत्तिवर्त्मनीपथिकानामातिवाहिकगणे परिगणितोऽपि न सहसा परि
त्यक्तुं शक्नोमि चिरन्तनं चित्तजन्मसौहार्दम् ।

[प्रकाशम्] सखे मकरध्वज एवमेतत् अहं पुनर्महाराजस्य महा
मोहस्य माङ्गलिकं विवेकविनाशनं भावत्कं महोत्सवं प्रक्रमयामि ।
पश्यतु भवान् ।

दूरेति–॥ दूरमत्यर्थं नमिता मनोज्ञा च या लतेव भ्रूः सैव चापः तं भजन्तीति तद्भाजः तासां कुवलयानि नीलोत्पलानीव नयनानि यासां तासां स्त्रीणां तरलानां चपलानां हृदयमेव लक्ष्यं शरव्यं यस्य तस्मिन् तादृशः पतिकृते स्नेहमनुरागस्तेन दग्धे रुचिरे लोचनमेवास्त्रं तस्मिन् कूणिते सति कान्दिशीकः भयद्रुतः विवेकः कान्दिशमाशां शरणयतु । रक्षकतया प्राप्नोतु । नक्वापितिष्ठतीति भावः ॥ ३२ ॥

स्वगतं मनोगतं स्वमनसि यच्चिन्तितवान् तत् कविर्वक्ति । उत्पथः उन्मार्गः मनोरथो यस्य स तथा । दुष्प्रापे वस्तुन्यभिलाषवानित्यर्थः । न विद्यते पुनरावृत्तिर्यस्यास्सा अपुनरावृत्तिस्तथाचासौ वर्त्तनी च तथा वर्त्तनी मार्गः तस्यां ये पथिकाः गन्तारः मुक्ताः तेषामातिवाहिकाः अतिवहने नियुक्ताः तेषां गणे परिगणितः उक्तोऽपि अस्यातिवाहिकगणे परिगणितत्वं । वसन्तस्योत्तरायणान्तर्गतत्वादिति मन्तव्यं । प्रकाशमिति । मनोगतं विहाय व्यक्तमाहेत्यर्थः । भावत्कं तावकं महोत्सवं वसन्तोत्सवमित्यर्थः ।

चूडावेल्लितचारुहल्लकभरव्यालम्बिलोलम्बकाः
क्रीडन्त्यत्र हिरण्मयानि दधतश्शृङ्गाणि शृङ्गारिणः ।
तन्वङ्गीकरयन्त्रयन्त्रणकलातन्त्रस्रवत्र्यम्भिका
कस्तूरीपरिवाहमेदुरमिलज्झम्पालबालकाः ॥ ३३ ॥

कामः—साधु वसन्त साधु । विशेषतश्चैतत् । सर्वदा त्रिजित एवासौ विवेकहतकः । यदिदमवधीरितत्रिविष्टपविहारकान्तारेषु मरुद्वृधोपान्तभागेषु महोत्सवारंभः । इह च ।

उन्निद्राम्बुजवाटिकामुभयतो रोधोनिरोधोल्लल
त्स्रोतस्सम्भृतसारणीशतकृतस्वच्छन्दकच्छाप्लवाम् ।
खेलद्बोलवधूविधूतकबरीशैवालितामन्वहं
पश्येम प्लवमानहंसमिथुनस्मेरां कुबेरात्मजाम् ॥ ३४ ॥

चूडेति—॥ चूडासु केशबन्धेषु आपीडेषु वा वेल्लितः आबद्धः यश्चारुर्हल्लकभरः कल्हारचयः तत्र व्यालम्बिनस्सक्ताः लोलम्बकाः मधुकराः येषां ते तथोक्ता हिरण्मयानि हेमपट्टबन्धानि शृंगाणि गोशृंगकृतपात्रविशेषाणि दधतः वहन्तः तन्वङ्गीनां करा एव यन्त्राणि तेषां यन्त्रणं नियमनं तदेव कला विद्या तया तन्त्रेण सहस्रवन्ती स्रवन्ती भस्त्रिका दृतिः तस्यां यः कस्तूरी परिवाहः कस्तूरीकर्दमः तेन मेदुरास्संमिश्राः अत एव मिलज्झंपालाः पंकिलाः लंबायबालका येषां ते तथोक्ताः शृंगारिणः रसिकाः अत्र क्रीडन्ति ॥ ३३ ॥

अवधीरितं निरस्तं त्रिविष्टपे स्वर्गे स्थितं विहारकान्तारं क्रीडोद्यानं नन्दनवनं यैस्तेषु ।

उन्निद्रेति—॥ उन्निद्राः (उत्फुल्ला इति पाठान्तरं) अंबुजवाटिकाः पद्मवनानि यस्यां तां उभयतः पार्श्वयोः रोधसा तीरेण यो निरोधः वारणं तेनोल्ललता वर्धमानेन स्रोतसा प्रवाहेण संभृतानां पूर्णानां सारणीनां कुल्यानां शतेन कृतः स्वच्छन्दं अप्रतिहतः कच्छाप्लवः पर्यन्तदेशमज्जनं यस्यास्तां । खेलन्तीनां विहरन्तीनां बोलवधूनां कबरीभिः शैवालितां संजातशैवालामिव स्थितां प्लवमानैः (स्नायमान इति पाठान्तरं) विलसद्भिः हंसमिथुनैः स्मेरां विहसन्तीमिव स्थितां हंसानां हासस्य धावल्यसाम्यादेवमुक्तं । कुबेरस्य सखेकदेशभूतगिरिविशेषस्यात्मजां तज्जन्यामित्यर्थः पश्यामि ॥ ३४ ॥

Digitized by Google

रतिः—*अज्जउत्त आपादमहुरो एसो महूसवो एहिं किल अम्हकुल सामिणो महामोहस्स अणिवारणिज्जेण केण विविहिणा समोहारंभो विवेओ दुज्जओ पडिवक्खो त्ति दूमिअं मम्मे हिअअं।

कामः—बाले विषमशरजीवितेश्वरि विलासिनीदेवते किमिति नाम समयबलजेतव्यलब्ध्यासन्तोष्टव्येऽपि भावितस्त्रीचापला विवेकवैभवं वर्णयसि । पश्यतु भवती ।

करधृतललितेक्षुधन्वनो मे
भ्रमरगुणार्पितपुष्पमार्गणस्य ।
मरुदनलशरोऽपि मेरुधन्वा
क्षणमतिलंघितशासनः कथं स्यात् ॥ ३५ ॥

वसन्तः—सखि सत्यमेवैतत् । माखल्विदं विकत्थनं मंस्थाः । नहि वर्गति भवति मशको मातङ्गस्य प्रतिस्पर्द्धी । अथवा न खलु भवतीविश्ववृत्तान्तवैदेशिकी दृष्टचर एव हि त्वत्प्रियस्यासौ वीरायित वृत्तान्तः । तथा हि ।

---

* आर्यपुत्र आपातमधुर एष महोत्सवः इदानीं किल अस्मत्कुलस्वामिनो महामोहस्यानिवारणीयेन केनापि विधिना समोहारंभो विवेको दुर्जयः प्रतिपक्ष इति धूपितं मे हृदयम्

एवमुक्तवन्तं कामं रतिराह—आर्येति । आपाततः दर्शनमात्रे मधुरः प्रियः नतु मनसि विचारणे अनिवारणीयेन वैभवमाह ।

करधृतेति—॥ करधृतं ललितं यत् इक्षुधनुः यस्य तस्य । भ्रमरगुणे भ्रमरपंक्ति-रूपे गुणे मौर्व्यां अर्पितस्संहितः पुष्पमेव मार्गणश्शरो यस्य तस्य मे मरुदनलो वाय्वग्नी शरो यस्य स तथा मेरुर्हेमाद्रिः धनुर्यस्य स रुद्रोऽपि अतिलंघितमपास्तं शासनं यस्य स तथा क्षणमपि कथं स्यात् । न स्यादेवेति भावः ॥ ३५ ॥

इदं कामवचनं विकत्थनं व्यर्थालापं मा मंस्थाः मा मन्वीथाः ।

नहीति—। मशकमातंगयोर्यदन्तरं तदन्तरं विवेकमदनयोरप्यस्तीति भावः ।

अन्यदप्याह ।

अथवेति—। विश्वेषां वृत्तान्तानां वैदेशिकी विदेशभवा अनभिज्ञेति यावत् वीरायितं वीर्यं तस्य ।

Digitized by Google

वहति महिलामाद्यो वेधास्त्रयीमुखरैर्मुखै-
र्वरतनुतया वामो भागश्शिवस्य विवर्तते ।
तदपि परमं तत्वं गोपीजनस्य वशंवदं
मदनकदनैर्न क्लिश्यन्ते कथन्न्वितरे जनाः ॥ ३६ ॥

कामः—साधु वसन्त साधु । कालानुरूपवादी खल्वसि ।

विश्वं युवतिसात्कर्तुं भवता दत्तसायके ।
विवेकः किन्नु वर्तेत विपक्षे मयि संस्थिते ॥ ३७ ॥

रतिः—*अय्य उत्त एव्वंएदं तहवि विसमत्थिरसंठाणवेरग्ग दुग्गपडिट्ठिओ अप्पमत्तेहिं समदमप्पमुहेहिं अमच्चेहिं अभिरक्खिओ सअं असहाअसूरो अणवाअ साहसोअ विपक्खो किण्णाम करआ(?)करिस्सदित्ति कलुसि अहि यअम्हि ।

---

* आर्यपुत्र एवमेतत् तथापि विषमस्थिरसंस्थानवैराग्यदुर्गप्रतिष्ठितोऽप्रमत्तैश्शमदमप्रमुखैरमात्यैरभिरक्षितः स्वयमसहायशूरोऽनपायसाहसश्च विपक्षः किन्नाम कदा करिष्यतीति कलुषितहृदयास्मि

वहतीति—॥ आद्यो वेधा इति दक्षादिव्यावृत्तिः महिलां स्त्रियं सरस्वतीमित्यर्थः । त्रय्या वेदत्रयेण मुखरैः शब्दायमानैः मुखैस्सर्ववेदाध्ययनपरैर्वदनैर्वहति धत्ते वेदानामपि सरस्वतीत्वात् शिवस्य परिशुद्धतया प्रसिद्धस्य वामो भागः वरतनुतया स्त्रीत्वेन विवर्तते परिणमते । अर्धनारीनरवपुरिति स प्रसिद्धः । तत् वेदान्तप्रसिद्धं परमं तत्वं । भगवान्नारायणः तत्वं नारायणः परः । इति हि श्रूयते । गोपीजनस्य वशंवदं अधीनं । ननु गोपीजनवशंवदत्वं कृष्णस्य किल । तत्कथं नारायणस्येत्युच्यते नारायणस्यैव कृष्णत्वेनावतारात् । एवं हि स्मर्यते ।

एष नारायणश्श्रीमान् क्षीरार्णवनिकेतनः ।
नागपर्यङ्कमुत्सृज्य ह्यागतो मधुरां पुरीं ॥ ३८ ॥

कालस्य समयस्य अनुरूपं अनुगुणं वक्तुं शीलमस्यास्तीति अनुरूपवादी ।

विश्वमिति—॥ युवतिसात्कर्तुं युवत्यधीनं कर्तुं मयि संस्थिते सम्यक् स्थिते विवेकः किन्नु वर्तेत न वर्तेतेत्यर्थः ॥ ३७ ॥

पुनरपि स्वहृदयकालुष्यं तद्धेतुं चाह—आर्येत्यादि । विषमं दुराक्रमं स्थिरसंस्थानं दृढसंस्थानं च यद्वैराग्यमेव दुर्गं तस्मिन्प्रतिष्ठितमनपायमपायरहितं साहसं यस्य स तथा किं नाम कृत्यं कदाकस्मिंश्चित्समये ।

कामः—अयि भीरु अलमतिशङ्कया। नूनं विपक्षपक्षपातिबालिशजनविप्रलब्धा स्वयूथ्यवैभवं न निर्धारयसि। पश्यतावत् विश्वविजयिनस्त्वत्सखस्य मे जगत्त्रयप्रसिद्धं जैत्रमुपकरणम्।

वपुरप्रतिमं नितंबिनीनां
दृढसौन्दर्यगुणं दरावनम्रम्।
श्रवणावधि नेत्रचित्रपुंखं
धनुराढ्यं मम मुष्टिमेयमध्यम्॥ ३८॥

अपि च।

शैलीं विलोपयति शान्तिमधः करोति
व्रीडां व्युदस्यति विरक्तिमपह्नुते च
कर्णामृतं किमपि तत्कलभाषिणीनां
नामापि किं न विकरोति निशम्यमानम्॥ ३९॥

वसन्तः—ननु कैमुतिकमेतत्, यदिदं योषितां यदृच्छाकीर्तनश्रवणादिकमपि चित्तसंक्षोभहेतुरिति।

तिष्ठतु गुणावमर्शः
स्त्रीणामालोकनादिभिस्सार्धम्।
दोषानुचिन्तनार्था
स्मृतिरपि दूरीकरोति वैराग्यम्॥ ४०॥

विपक्षे पक्षपाती सादरः यो बालिशजनः मूर्खजनः तेन विप्रलब्धा वञ्चिता तदुपकरणं किमित्यत आह।

वपुरिति—॥ अप्रतिमं सदृशवस्त्वन्तररहितं दृढं स्थिरं यत्सौन्दर्यं तदेव गुणः ज्या यस्य तत्तथोक्तं दरमल्पमवनम्रमवनतं श्रवणं श्रोत्रमवधिस्सीमा यस्य तत्तथा दीर्घमित्यर्थः नेत्रं तदेव चित्रः अद्भुतः पुंखः काण्डो यस्य तत्तथोक्तं मुष्टिनामेयं मध्यं यस्य तत्तथा। नितंबिनीनां वपुः मम आढ्यं आयुधेषु प्रधानं धनुः वपुस्तिष्ठति॥ ३८॥

नामापि विकारहेतुरित्याह।

शैलीमिति—॥ शैलीं स्वभावं विलोपयति नाशयति व्युदस्यति उन्मूलयति अपह्नुते तिरस्करोति। कर्णयोरमृतं अमृतवदानन्दावहं किमपि अनिर्वचनीयं तत्प्रसिद्धं कलभाषिणीनां निशम्यमानं श्रूयमाणं नामापि न विकरोति किं विकरोत्येवेत्यर्थः॥ ३९॥

कैमुतिकं किमुतेति न्यायसिद्धं।

तिष्ठत्विति—॥ गुणानां सौन्दर्यसौभाग्यादीनां अवमर्शः विचिन्तनं आलोकनादिभिस्सार्धं तिष्ठतु। दोषाणां दौर्जन्यादीनां अनुचिन्तनं अर्थःप्रयोजनं यस्यास्सा तथा स्मृतिस्स्मरणमपि वैराग्यं दूरीकरोति दूरेवर्तमानं करोति॥ ४०॥

अपि च प्रभूतमदमेदुरात्मनो
विषयाटवीषु विविधासु धावतः ।
स्वबलेन हन्त मनसो निवर्तनं
बिसतन्तुनेव सुरदन्तियन्त्रणम् ॥ ४१ ॥

रतिः— *अय्यउत्त दिढभूमिविब्भमसमुम्मूलणक्खमाणं जोईसराणं दिट्ठिं परिहरंतेण तुए परक्कमणिज्जं

कामः— [विहस्य] प्रिये पश्यामि चक्षुषीवते चेतस्यविकातरे योजयामि खल्वहं योगीश्वरानपि युवतियोगीश्वरपादे ।

सुभगपरुषैर्मदस्त्रैः
कीलितमन्योन्यकवचितैकार्धं ।
किन्न विदितं भवत्या
किमपि मिथस्स्यूतजीवितं मिथुनम् ॥ ४२ ॥

* आर्यपुत्र दृढभूमिविभ्रमसमुन्मूलनक्षमाणां योगीश्वराणां दृष्टिं परिहरता त्वया पराक्रमणीयम् ।

चञ्चलं हि मनःकृष्ण प्रमाथि बलवद्दृढं ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करं ॥

इत्युक्तरीत्या चित्तनियमनमशक्यमित्याह ।

अपि चेति—॥ प्रभूतः अधिकः स चासौ मदश्च तेन मेदुरः स्निग्धः आत्मा स्वरूपं यस्य । विविधासु विषयाश्शब्दादयः ते एवाटव्यः तासु धावतः मनसः स्वबलेन निवर्तनं बिसतन्तुना बिसान्तर्वर्तितन्तुना सुरदन्तिनः ऐरावतस्य यन्त्रणं बन्धनमिव । हन्तेत्यसंभावितत्वं द्योतयति । जितचित्तानां समीपेन प्रभवति ते पराक्रम इति निश्चिनोमि ॥ ४१ ॥

दृढभूमयः स्थिरतरस्थानाः विभ्रमाः तेषां समुन्मूलने क्षमाणां । युवतय एव योगिनः तेषामीश्वरः प्रधानभूतः तस्य पादे योजयामि तत्त्वं जानास्येवेत्याह ।

सुभगेति—॥ सुभगत्वे भोग्यत्वेऽपि परुषैः पुष्पतया सुभगत्वं बाधकत्वात्परुषत्वं च मदस्त्रैः मत्सायकैः कीलितं निखातकीलं अत एवान्योन्यं कवचितं सञ्जातकवचं एकैकार्धं मिथः परस्परं स्यूतं संबद्धं जीवितं यस्य तत्तथा किमपि मिथुनं ॥ ४२ ॥

रतिः— *अय्यउत्त, अवहारिअं मए तुह माहप्पं दाणिं उण दीह बुद्धि-बलेण देव्वादिण्णहत्थेण जमणिअमप्पमुहबहुसहाअसंपण्णेण अहं दुव्वा-हप्पहुत्तणमंतसत्तिणा सत्तुणा काहे किं होज्जत्ति पबलपवणाहदा कअलिपव्वतरलम्हि पसिद्धं खु पण्णाबलं मोक्खपेरं ताणं अदिदुक्क-राणं सिद्धीणं साहणंति ।

कामः—[सरोषहासं] अयि मुग्धे मञ्जुभाषिणि गुञ्जन्मधुकरशि-ञ्जिनी संहितविश्वलक्ष्यविषमविशिखस्य नित्यविजयजागरूकस्य त्वत्प्रि-यस्यमे सन्निधौ का पुनः प्रज्ञा । केन वा कस्य मुक्तिर्भविता किमितिनाम मध्य इव भवत्या मानसेऽपि सौल्यमालक्ष्यते । [विहस्य] प्रिये हन्त विदितमेतत् नूनमिदानीं स्तनगतं स्थौल्यमेतदन्तरापि संक्रान्तमिति । अथवा । अविचारितरमणीयमबलाजनस्वाभाव्यं भवत्यामपि वर्तते संपश्यतां भवती ।

मयादिष्टः क्रोधः प्रथयति किमप्यान्ध्यमथच
स्मृतिभ्रंशस्सेद्धा विघटयति बुद्धिं सपदिसः ।
तया मुक्तः क्षेत्री तमसि गहने विन्दतिलयं
तथाभूते किं वा जनयति विवेकोजडमतिः ॥ ४३ ॥

* आर्यपुत्र अवधारितं मया तव माहात्म्यं इदानीं पुनः दीर्घबुद्धिबलेन दैव-दत्तहस्तेन यमनियमप्रमुखबहुसहायसंपन्नेन अखण्डोत्साहप्रभुत्वमन्त्रशक्तिना शत्रुणा कदा किं भवेदिति प्रबलपवनाहताकदलिकेव तरलतरास्मि । प्रसिद्धं खलु प्रज्ञाबलं मोक्षपर्यन्तानामतिदुष्कराणां सिद्धीनां साधनमिति ।

रोषश्च हासश्च रोषहासौ ताभ्यां सहितं यथा भवति तथा मधुकरमय्यां शिञ्जिन्यां संहिताः विश्वं लक्ष्यं येषां ते तथा विषमाश्च विशिखाश्शरा यस्य तस्य मानसे बुद्धावित्यर्थः । स्थौल्यस्य हेतुमाह प्रियेति । अविचारितरमणीयं अविचा-रितत्वे रमणीयं अबलास्वाभाव्यं स्त्रीस्वभाव इत्यर्थः । संपश्यतां विवेकपराभवप्रकार-मिति शेषः ।

मयेति—॥ मया आदिष्टः प्रेरितो क्रोधः किमप्यान्ध्यं कृत्याकृत्यविवेक-शून्यतां प्रथयति अथ च स्मृतिभ्रंशस्सेद्धा सेत्स्यन्त सः बुद्धिं विघटयति शिथिल-यति । तया बुद्ध्या मुक्तः क्षेत्री जीवः गहने तमसि लयं विन्दति । तस्मिन्नर्जीव तथाभूते मोहे गते सति विवेकः किं जनयति न किंचिदपि कर्तुं शक्नुयादित्यर्थः गीतं हि भगवता ।

Digitized by Google

तदेवमसह्यवेगमस्मद्गुरुं विवेकामात्याश्शमदमादयो न प्रसहिष्यन्ते : स्वयस्त्वदुर्जयो निखिलसुरासुरकोटीरविन्यस्तवामपादो महामोहः । नहितरतुमृगराजस्य परिपन्थी ।

परस्य पुरुषस्येव पञ्चभिश्च ममायुधैः ।
समयेषु विमथ्यन्ते सत्ववन्तोपि शत्रवः ॥ ४४ ॥

अपि च ।

अलमिह विबुधाद्यैरागमग्राह्यवाचो
मुनिपरिषदि धर्मान् गायतो मुक्तिहेतून् ।
तपसि नियतवृत्तेस्तस्य देवस्य शान्तिं
जनितयुवतिरत्नं दर्शयत्यूरुकाण्डम् ॥ ४५ ॥

रतिः—*अय्यउत्त संभावेमि सच्चं तु हभासिअं । अब्बह्मकीडं अप्पडिहअं खु तुह माहप्पं । एदं उण अणाअपुव्वं आणावेदु अय्यउत्तो ।

कामः—कि न्तत्

रतिः—† विवेअप्पहुदीणं महामोहप्पहुदीणं अमिअन्दमाअंदाणं विअ किणिमित्तं वेरन्ति ।

* आर्यपुत्र संभावयामि सत्यं तव भाषितं । आब्रह्मकीटमप्रतिहतं खलु तव माहात्म्यं । एतत्पुनरज्ञातपूर्वमाज्ञापयत्वार्यपुत्रः ।

† विवेकप्रभृतीनां महामोहप्रभृतीनां च मृगेन्द्रमातङ्गानामिव किंनिमित्तं वैरमिति

संगात्संजायते कामः कामात्क्रोधोभिजायते ।
क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ॥
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति । इति ॥ ४३ ॥

अस्मद्गुरुं अस्माकं सेनानिवेशविशेषं । तरक्षुः व्याघ्रः ।

परस्येति—॥ सत्ववन्तः बलवन्तः सत्वगुणनिष्ठा अपि ॥ ४४ ॥

तिष्ठन्तु ।

साक्षान्नारायणोपि शान्तिविधुरस्स्यात् ।

अलमिति—॥ इह लोके विबुधाद्यैः विबुधाश्चतुर्मुखप्रभृतयः आद्यशब्देन सनकादयो गृह्यन्ते तैरलं तिष्ठन्तु आगमैः वेदैः ग्राह्याः ग्रहीतुं योग्याः वाचो यस्य तस्य । मुनीनां परिषदि मुक्तिहेतून् धर्मान् गायतः । तस्येति प्रसिद्धिद्योतिका देवस्य नारायणस्य जनितं युवतिरत्नं येन तत् ऊरुकाण्डं ऊरुदण्डः । काण्डोस्त्रीदण्डबाणार्ववर्गावसरवारिष्विति निघण्टोः काण्डशब्दस्य नपुंसकत्वमप्यस्ति शान्तिं दर्शयति । ऊर्वशीजनको नारायणस्योरुरेव तस्य शान्त्यभावं प्रकटयतीतिभावः ॥ ४५ ॥

कामः—प्रिये आकर्णयैतामिदमादितः प्रभृति ।

त्रिगुणघटितात्पुंसो भोक्तुर्बुद्धिस्सती तदनुव्रता
समयनियतोच्छ्रायं त्रेधाकुलं समजीजनत् ।
प्रथममिह तद्भोगद्वैध्यं विवेकपुरस्सरं
द्वितयमितरज्जुष्टं रागप्रमोहमुखं मिथः ॥ ४६ ॥

अत्र विवेकश्च महामोहश्च समानशीलाभिः प्रकृतिभिरभिषिक्तौ राजन्यौ । तयोरपि ।

मोहस्य धर्मपत्नी दुर्मतिरपवर्गदोषदृष्टिमयी ।
विषयरसदोषदृष्टिस्सुमतिरनन्या विवेकस्य ॥ ४७ ॥

एवं कामवाक्यमशेषं सत्यं मन्यमाना रतिः सा उभयोर्विवेकमोहयोः वैरकारणं पृच्छति । मध्ये कामः प्रश्नमुपक्षिपति किं तदिति किंनिमित्तं वैरमिति पृच्छन्त्या देव्यास्तयोर्वैरनिमित्तं सम्यक् ज्ञापयितुं जन्मप्रभृति सर्वं ज्ञापयितुकामस्तां संबोधयति प्रियेति ।

त्रिगुणेति—॥ त्रिगुणघटितात् सत्त्वरजस्तमोरूपगुणत्रययुक्तात् । सर्वस्यापि गुणत्रययुक्तमस्ति । गीयते हि भगवता ।

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिस्स्यात्त्रिभिर्गुणैः । इति ॥

भोक्तुः जीवात्पुरुषस्सुखदुःखानां भोक्तृत्वे हेतुरुच्यते । इति हि स्मर्यते तदनुव्रता तं पुरुषं अनुगता सती साध्वी बुद्धिः समयेषु स्वावसरेषु नियतः व्यवस्थित उच्छ्रायः उन्नमो यस्य तत् कुलं त्रेधा त्रिप्रकारेण समजीजनत् सम्यक् जनयामास त्रेधेत्युक्तं तत्र क्रिमाद्यं के वापरे इत्याकांक्षायामाह प्रथमेति । भोगद्वैध्यं यत्नभूतं विवेकः पुरस्सरः अग्रयायी यस्य तत् । विवेकपुरस्सरं तत्प्रसिद्धं । इह कुलत्रये प्रथममाद्यं । रागः कामः प्रमोहः महामोहः तौ प्रमुखे निर्वाहकौ ययोस्तत् रागप्रमोहमुखं मिथः परस्परं जुष्टं संयुक्तं द्वितयं कुलद्वयं । इतरत्रागप्रमोहमुखमित्यनेनास्य कुलस्य रजस्तमः प्रचुरत्वं सूच्यते । भोगद्वैध्यमित्यनेन तस्य सत्त्वनिष्ठत्वं च ॥ ४६ ॥

समानं शीलं स्वभावो यासां ताभिः राजन्यौ राजानौ । अथैतयोः पत्न्यावाह

मोहस्येति—॥ अपवर्गे मोक्षे दोषतया दृष्टिर्दर्शनं तन्मयी तत्स्वरूपा वर्णामयी गुरुरितिवत् । विषयाश्शब्दस्पर्शादयः तदनुभवेन योरसः तस्मिन् दोषाया दृष्टिर्यस्यास्सा तथोक्ता सुमतिः विवेकस्यानन्याऽपृथक्सिद्धापत्नीत्यर्थः ॥ ४७ ॥

Digitized by Google

रतिः– *तदोतदो ।

कामः–ततश्च रजःप्रधाना रागादयः तमःप्रसूते स्संसारचक्रव- र्तिनो महामोहस्य दैन्यानुकूलरङ्कःकुलन्यायेन साचिव्यमाचरन्ति । सत्वसंभवन्तु विवेककुलमसाहयमल्पसारञ्च जगति वर्तते । जनकश्चा- स्माकं क्षेत्रज्ञः स्वयं मध्यस्थस्वभावोपि सहधर्मचारिण्या देव्या बुद्ध्यास- हाद्य यावदस्मासु बहुलं दत्तदृष्टिः । तदिदमसहमानानित्यनृशंसाविवे- कादयः जातिवादिन इव स्वभङ्गमप्यनुमन्यमानाः पुरुषस्य भोगं तत्सं- वर्धकानस्मांश्च उत्सादयितुमीहन्ते । अस्मत्तातेन चानादिभुक्तायां प्रकृतौ विविधान् दोषानुद्घाट्य तातं च तस्यामुपजनितवैराग्यं केनचिदुपायेन विरचय्य महाप्रस्थानेनापुनरावर्तिनं कर्तुमारभन्ते । तथा मर्कटरक्षः पती महापातकिनौ सुग्रीवविभीषणौ स्वकुलोत्सादने प्रमाणयन्ति । न च तदारंभसमये तातस्य दुर्दशाशङ्कया वर्णयतुं । अयं खलु ।

* ततस्ततः

रतिः कथाश्रवणे प्रीतिं द्योतयति ततस्तत इति । विवेकमोहौ द्वावपि राजानावभिषिक्तौ अन्यद्रागाद्यं कुलं कथमासीदित्यत आह ।

रजःप्रधाना इति–॥ रागमोहकुलयोस्तुल्यत्वेन कथमनयोरेकस्य प्राधान्यं इत्यस्य गुणभाव इत्यत्राह दैत्येति–॥ द्वयोरनयोः कुलयोरन्योन्यसौहार्दात् बल- वत्वं अन्यस्य स्वल्पबलत्वमेवेत्याह सत्वसंभवमिति ॥ तु शब्देन व्यावृत्तिर्द्योत्यते । एवं जनकः पुरुषः किं करोतीत्यत्राह जनक इति । मध्यस्थस्साधारणस्वभावो यस्य स तथा । अद्य यावत् एतत्क्षणावधि । जातिवादिनः व्यक्तिषु जातिर्नाम काचिद- स्तीति वदन्तः त इव स्वभंगं स्वनाशमप्यनुमन्यमाना अभ्युपयन्तः ईहन्ते इच्छन्ति । इच्छामात्रमेव न तत्फलसिद्धिरित्यभिप्रायः । महाप्रस्थानं महाप्रयासं देहत्याग इत्यर्थः तेन आवर्तः आवृत्तिः आवर्तो अस्यास्तीत्यावर्ती पुनरावर्ती न भवतीत्यपुनरा- वर्ती तं कर्तुं आरभन्ते । एवं स्वकुलध्वंसं केवा कुर्वन्तीत्यत आह ॥

तथेति–॥ प्रकृतिस्स्वभावः । मर्कट प्रकृतिः रक्षःप्रकृतिश्च सुग्रीव विभीषणा- वित्यर्थः । स्वकुलोत्सादनात् महापातकिनावित्युच्यते प्रमाणयन्ति प्रमाणीकुर्वन्ति कावादुर्दशेत्यत आहायं खल्विति ॥

Digitized by Google

जात्यन्धः परदोषदृष्टिषु परीवादेषु मूकाग्रणीः
बाधर्यप्रथमावतारसरणिर्निन्दासमाकर्णने ।
स्त्रीप्रायः परदारसङ्गमविधौ तद्वत्परावर्जने
संपद्येत समीक्षणेऽपि विकलः पापैर्विवेकादिभिः ॥४८॥

अत एवास्माभिरपि परित्यक्तसौभ्रात्रैः तेऽपि दुरात्मानो जिघांसन्ते । ततः प्रवृत्तिनिवृत्तिपद्धती समाश्रित्य वयं च ते च संयतिष्यामहे । तदा तु सत्त्वप्रधानं कुलं ज्योतिरिङ्गणज्योतिरिव द्युमणिकिरणैरस्माभिरभिभूयते ।

सौहार्दमित्थमनवाप्य सहोदराणा-
मासीत् स्वमूलगुणभेदवशाद्विरोधः ।
एकप्रजापतिभुवामपि वैरबन्धः
स्वात्मावधिः स्वयमुदेति सुरासुराणाम् ॥ ४९ ॥

रतिः– *संतं पावं संतं पावं पुत्ता एव्व पिदुणो भोअं विणासंति तह कहं सो अरा एव्व इअरे अरविंधं सघालं पडहि अधा होंति णाह किं अहोंज ताणं तुम्हाणंपि समरदुंदसा णिवरणा साहणं संधि ।

---

* शान्तं पापं शान्तं पापं पुत्रा एव पितुर्भोगं विनाशयन्ति तथा कथं सोदरा एव इतरेतरविध्वंसनलंपटहृदया भवन्ति नाथ किं न भवेत्तेषां युष्माकमपि समरदुर्दशानिवारणसाधनं सन्धिः

जातीति–॥ परेषां ये दोषाः तेषां दृष्टिषु दर्शनेषु जात्यन्धः जातिर्जन्म तस्मिन्नन्धः जायमानदशायामेवान्धः । अनेन परदोषदर्शनमस्य न कदाचित्संभवतीति द्योत्यते । परिवादाः परदोषकथनानि तेषु मूकानामग्रणीः श्रेष्ठः । निन्दानां परदूषणानां समाकर्णने बाधर्यं बधिरत्वं तस्य प्रथमावतारः प्रथमप्रवेशः तस्य सरणिर्मार्गः । परेषां दाराः परदाराः तेषां संगमविधौ संभोगक्रियायां स्त्रीप्रायः स्त्रीतुल्यः परेषामावर्जने वशीकारे तद्वत् स्त्रीवत् असमर्थः इत्यर्थः । समीक्षणे समीचीने सम्यग्विचारे विकलः विवेचनोपयोगिज्ञानशून्यः संपद्येत स्यात् ॥ ४८ ॥

अत एव पितृद्रोहादेव जिघांसन्तो हन्तुमिष्टा भवन्ति प्रवृत्तिनिवृत्तिपद्धती प्रवृत्तिनिवृत्तिरूपमार्गौ प्रवृत्तिनिवृत्तिधर्मावित्यर्थः । ज्योतिरिङ्गणस्य खद्योतस्य ज्योतिः तेज इव द्युमणिः सूर्यस्तस्य किरणैः ।

अहो कथं भ्रातर एव परस्परं जिघांसन्तीत्यत्राह ।

सौहार्दमिति–॥ स्वमूलभूतानां गुणानां सत्त्वादीनां भेदवशादित्थं विरोध आसीत् । एवं कुत्र दृष्टमित्यत्राह एकेति–॥ एक प्रजापतिः काश्यपः स्वात्मावधिः यावदात्मभावीत्यर्थः ॥ ४९ ॥

कामः—मुग्धे कथञ्चिदपि नात्र सन्धिस्संभाव्यते ।

स्वतस्सत्त्वविहीनानां सततैवापराध्यतः ।
कथङ्कारं प्रतीकारः कल्पकोटिशतैरपि ॥ ५० ॥

प्रतिपुरुषविभक्तमूर्तिभेदा
 वयमितरे च मिथः प्रतीपवृत्ताः ।
क्वचिदधिकरणे समापतन्तः
 सुतनु दधीमहि वध्यघातकत्वम् ॥ ५१ ॥

न खल्वर्थकामपराणामस्माकं नारायणपरायणैः कथायामपि सङ्गतिरुपपद्यते । किञ्च यथा कथञ्चिदुपपद्यमानमपि अखण्ड वैरिखण्डन पण्डितो महामोहः कथञ्चिदपि सन्धिमनुमन्यते । अहं वा कथमसहायवीरस्तमनुमन्ये न खलु क्षुधितोऽपि शार्दूलः कदाचिदपि शाद्वलमत्ति-

---

एतदाकर्ण्यनेन सञ्जातखेदा रतिरेषां सन्धिर्भवेदिति पृच्छति । शान्तं पापं एवंविधाविरोधहेतुभूतं पापं शान्तं भवत्विति शेषः । आदराद्वीप्सा ।

स्वत इति—॥ स्वतः स्वभावात् सत्त्वविहीनानां सततैवापराध्यतः स्वभावेनैवापराधं कुर्वतां वर्त्तमानस्य कल्पानां ब्रह्मदिनानां कोटिशतैरपि प्रतीकारः प्रतिक्रिया कथंकारं कथं वा कर्तुं शक्यः ।

स्वतो दुर्बलाविवेकादयः स्वतन्त्रतयैव पीडाकरस्यास्मत्प्रभोस्य कथमपि न प्रतीकारं कर्तुं शक्नुयुरितिभावः ॥ ५० ॥

विरुद्धानामस्माकमेकाधिकरणं हन्तृहन्तव्यताहेतुरित्याह ॥

प्रतिपुरुषेति—॥ प्रतिपुरुषं तत्तत्पुरुषेषु विभक्ता नियता मूर्त्तिभेदाश्शरीरविशेषा येषां ते तथोक्ताः वयं मोहप्रभृतयः इतरे विवेकादयश्च क्वचिदधिकरणे एकस्मिन्पुरुषरूपे स्थाने समापतन्तः सम्मिलिताः मिथः प्रतीपं विरुद्धं वृत्तं व्यापारो येषां ते तथा तादृशास्सन्तः वध्यघातकत्वं वध्यत्वं घातकत्वं च दधीमहि दध्महे ॥ ५१ ।

अद्यप्रभृति ये लोका यूयं यूयं वयं वयं ।
अर्थकामपरा यूयं नारायणपरा वयं ॥
नास्ति संगतिरस्माकं युष्माकं च परस्परं ।
वयन्तु किंकरा विष्णोर्यूयमिन्द्रियकिंकराः ॥

इत्युक्तरीत्या च तेषामस्माकं च संगतिर्न सम्भवतीत्याह । न खल्विति—कथायामपि स्वैरप्रसङ्गेऽपीत्यर्थः ।

रतिः-*कोउण तेहिं कुलं घेहिं महाबलाणं तुम्हाणं वि उंमूलणे उवाओ संमंतिओ

कामः-अयि भीरु अनुद्घाटनीयमिदं राजरहस्यं विशेषतः स्त्रीषु

रतिः-†[हस्तं संगृह्य] अय्यउत्त साविओसि मए पिअसहेण वसं तेण अ सच्चं विअरिजउ राअरहस्सं

वसन्तः-[स्वगतं] किमत्र विवरणीयं दुष्परिहारः खलु अनिर्धारितकालो नियतिविपर्यासः [प्रकाशं] सखे मकरध्वज ।

मनोरथसमर्थानां महामोहविरोधिनाम् ।
मर्मभेदनमस्माभिः कार्यं तत्परिपन्थिभिः ॥ ५२ ॥

कामः-प्रिये कथयामि तर्हि । अस्ति खलु अनभिज्ञकुलसार्वभौमविवेकमूलाकर्तृत्वाभिमानादिनानाविधविषमदृष्टिसहकृतः कश्चिदस्मत्कुलाभिचारकांक्षिभिः उपनिषद्दुर्वर्णनिष्ठैः कैश्चिद्विष्टुरैः अनुष्ठीयमानो निवृत्तिसंज्ञको धर्मः । यश्चिष्ठस्य पुरुषस्य परदोषदर्शनादिष्वन्धबधिराद्युपसर्गकारिवदत्यन्तमवसवावस्थानमाकर्ण्यते । तेन च निष्पतिक्रियेण केनचिद्दशवहेणेव पुरुषमाविशता बुद्धिस्सङ्कुस्यते । तस्मात् किल तत्सङ्गमादस्मत्कुलप्रद्वेषदूषितहृदया प्रशान्तमधुरवेषप्रच्छन्नाभवरसभोगभैमरथी परमन्दपरपर्याया ब्रह्मराक्षसी प्रादुर्भविष्यति । तथा हि

* कः पुनस्तैः कुलघैः महाबलानां युष्माकमप्युन्मूलने उपायस्संमन्त्रितः ।
† आर्यपुत्र श्रावितोऽसि मया प्रियसखेन वसन्तेन च सत्यं विव्रियतां राजरहस्यम्

महामोहस्वभावादपि सन्धिर्न भवेदित्याह । यथा कथञ्चिदपीति । यथा कथञ्चिदपीत्यनेन विवेकादीनां शरणागतत्वेऽपि महामोहस्सन्धिं नानुमन्येतेति सूच्यते ममापि अनभिमत इत्याह अहं वेति । कुतस्तवानुमतिरित्यत्राह न खल्विति ॥

युष्मज्जये क उपायस्तैस्संमन्त्रित इति पृच्छति । राजकुलं राजपदं ।

नियतेः दैवस्य विपर्यासः अन्यथाभावः अनिर्धारितः अनिश्चितः कालो यस्य तथा

मनोरथेति-॥ मनोरथमात्रे समर्थानां न तु कृत्ये महामोहविरोधिनां विवेकादीनाम् ॥ २५ ॥

अनभिज्ञानां सार्वभौमो यो विवेकः तन्मूलाकर्तृत्वाभिमानादिशब्देन कला सहस्य पर्यैव । नानाविधा च या विषमदृष्टिस्तया सहकृतः । उपनिषदोऽमृतत्वं

गुणत्रेतोन्मेषक्रमपरिणतानन्तविकृतिः
  क्वचित्काले बुद्धिः कुलयुगलकूटस्थगृहिणी ।
अतिक्रूरात्यन्तप्रलयविधिदुर्मन्त्रपरुषां
  पुरा भीमाकारां सृजति परभक्तिं परवती ॥ ५३ ॥

ततश्च ।

प्रव्रज्यादियुता परत्रपुरुषे पातिव्रतीं बिभ्रती
  भक्तिस्सा प्रतिरुद्धसर्वकरणा घोरन्तपस्तप्यते ।
तुष्टा तेन जनार्दनस्य करुणा कुर्वीत तत्किङ्करं
  कञ्चित्कैटभकोटिकल्पमसुरं……………………

(इत्यर्धोक्ते लज्जया विरमति)

स्वमनीषया कल्पितत्वं । निष्ठुरैरिति तेषामकामहतत्वं व्यज्यते संगंस्यते संगता भविष्यति । भीमरथीत्वं भयहेतुत्वात् तदुक्तं । सप्तत्यासप्तमे वर्षे सप्तमे मासि सप्तमे । रात्रौ भीमरथीनाम सर्वप्राणिभयंकरीति ।

गुणेति—॥ गुणानां सत्वादीनां त्रैतात्रिकं तस्य उन्मेषस्य आविर्भावस्य क्रमेण परिणता जाता अनन्ता च विकृतिर्यस्यास्सा तथोक्ता सत्वादीनां क्रमेणोन्मेषः एकैकस्योन्मेषे इतरयोरभिभवश्च नियतः यथोक्तं ।

रजस्तमश्चाभिभूयसत्वं भवति भारत ।
रजस्सत्वं तमश्चैव तमस्सत्वं रजस्तथा ॥ इति ।

परवती परतन्त्रा कुलयोः विवेकमहामोहकुलयोः युगलं युग्मं तस्य कूटस्थस्य कारणाभूतस्य जीवस्य गृहिणी बुद्धिः अतिशयेन क्रूरः अतिक्रूरः अन्तमतिक्रान्तोऽत्यन्तश्च यः प्रलयः तस्य विधिः विधानं तस्मिन् दुर्मन्त्रेण दुष्टमन्त्रेण दुरालोचनया परुषां घोरां भीमः भयंकरः आकारो यस्यास्तां परभक्तिं पुरा सृजति स्रक्ष्यति । यावत्पुरा निपातयोर्लडिति विधानात् ॥ ५३ ॥

ततश्च अथ चेत्यर्थः ।

प्रव्रज्येति—॥ प्रव्रज्या वैराग्यं आदिशब्देन शान्त्यादयो गृह्यन्ते परत्र परस्मिन् पुरुषे । भगवति पातिव्रतीं पातिव्रत्यं बिभ्रती दधाना सा भक्तिः प्रतिरुद्धानि स्वस्वविषयेभ्यो निवर्तितानि सर्वाणि करणानि इन्द्रियाणि यस्यास्सा तथोक्ता सती घोरं तीव्रं तपः नियमं तप्स्यते चरिष्यति । तेन तपसा तुष्टा जनार्दनस्य करुणा कैटभानां कोटिः कैटभकोटिः तत्कल्पं कञ्चिदसुरं तत् किंकरं तस्याः भक्तेः किंकरं दासं कुर्वीत कुर्यात् । असुरं इत्यन्तं कामं उक्त्वा विरराम । उक्तं उक्तिः । अर्धोक्ते अर्धोक्ता-वित्यर्थः

सो असुर क इति अपेक्षायां वसन्तस्तावत् सङ्कल्पसूर्योदय इति मनसि विचार्य कामाभिप्रायेण निर्मूलनस्त्वेव न इति निश्चयस्य प्रकाशमन्यथा पूरयति-शेषमिति ॥

Digitized by Google

अथ स्यात्, नैष्ठिकादीनां ब्रह्मचर्य्यात् प्रच्युतानां प्रायश्चित्ताद्धिकारः सम्भवति, अस्ति च प्रायश्चित्तमधिकारलक्षणे निरूपितम्—"अवकीर्णिपशुश्च[1] तद्व"दिति । अतः प्रच्युतब्रह्मचर्य्यस्य प्रायश्चित्तसम्भवात् कृतप्रायश्चित्तो ब्रह्मविद्यायामधिकरिष्यतीति, तत्राह—

न चाधिकारिकमपि पतनानुमानात्तदयोगात् ॥ ४१ ॥

अधिकारलक्षणोक्तमपि प्रायश्चित्तं नैष्ठिकादीनां ततो भ्रष्टानां न सम्भवति । कुतः । 'पतनानुमानात् तदयोगात्,' नैष्ठिकादीनां प्रच्युतानां पतनस्मृतेस्तस्य प्रायश्चित्तस्यासम्भवात्,

"आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते द्विजः[2] ।
प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महे"ति ।

अतोऽधिकारलक्षणोक्तं प्रायश्चित्तमितरब्रह्मचारिविषयम् ।

उपपूर्वमपीत्येके[3] भावमशनवत्तदुक्तम् ॥ ४२ ॥

नैष्ठिकादीनां ब्रह्मचर्य्यप्रच्यवन'मुपपूर्व'मुपपातकम्, महापातकेष्वपरिगणितत्वा[4]दिति तत्र प्रायश्चित्तस्य 'भावं' विद्यमानतामप्येक आचार्या मन्यन्ते । 'अशनवत्,' यथा मध्वशनादिनिषेधस्तत्प्रायश्चित्तं चोपकुर्वाणस्य नैष्ठिकादीनां च समानम् । 'तदुक्तं' स्मृतिकारैः—"उत्तरेषां चैतदविरोधी"ति, गुरुकुलवासिनो यदुक्तम् तत्स्वाश्रमाविरोध्युत्तरेषामप्याश्रमिणां सम्भवतीत्यर्थः । तद्वदिहापीति ब्रह्मचर्य्यप्रच्यवने प्रायश्चित्तसम्भवाद्ब्रह्मविद्यायोग्यताऽप्यस्ति ।

बहिस्तूभयथाऽपि स्मृतेराचाराच्च ॥ ४३ ॥

'तु'—शब्दो मतान्तरव्यावृत्त्यर्थः । उपपातकत्वे महापातकत्वेऽप्येते बहिर्भूता एव ब्रह्मविद्याऽधिकारिभ्यः, ब्रह्मविद्यायामनधिकृता[5] इत्यर्थः । कुतः । 'स्मृतेः,' पूर्वोक्तात् पतनस्मरणात् । यद्यपि कलुष[6]नि-

१ कीर्णी प्रच्युतश्चेति लि० पु० । २ पुनरिति द्विज इति च क्वचित् ।
३ ०मपि त्वेक इति क्वचित्पठ्यते न तु तथा शोभाव्याद्विसंमतम् ।
४ ०गणितत्वात्वादिति मु० पु० । ५ ०कृत्याइति लि० लि० पु० ।
६ कल्मषेति लि० पु० ।

र्हत्वाय कैश्चिद्वचनैः प्रायश्चित्ताधिकारो[1] विद्यते, तथाऽपि कर्माधिकारानुगुणशुद्धिहेतुप्रायश्चित्तं न सम्भवति, "प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महे"ति स्मृतेरित्यर्थः । 'आचाराच्च'-विशिष्टा हि नैष्ठिकादीन्भ्रष्टान् कृतप्रायश्चित्तानपि वर्जयन्ति, तेभ्यो ब्रह्मविद्यादिकं नोपदिशन्ति । अतस्तेषां नास्ति ब्रह्मविद्यायामधिकारः ॥

तद्भूताधिकरणं समाप्तम् ॥ १० ॥

अथ स्वाम्यधिकरणम् ११ । **स्वामिनः फलश्रुतेरित्यात्रेयः ॥४४॥**

कर्माङ्गाश्रयाण्युद्गीथाद्युपासनानि किं यजमानकर्तृकाणि, उत र्त्विक्कर्तृकाणीति चिन्तायां यजमानकर्तृकाणीत्यात्रेयो मन्यते । कुतः । 'फलश्रुतेः,' वेदान्तविहितेषु दहराद्युपासनेषु फलोपासनयोरेकाश्रयत्वदर्शना, दिह च क्रतुफलाप्रतिबन्धरूपस्योद्गीथोपासनफलस्य यजमानाश्रयत्वश्रवणादित्यर्थः । न च गोदोहनादिवदङ्गाश्रयत्वेन यजमानकर्तृकत्वा[2]सम्भवः, गोदोहनादिषु ह्यध्वर्युकर्तृकप्रणयनाश्रयगोदोहनोपादान*मन्येनाशक्यम्, इह तूद्गातृकर्तृकेऽप्युद्गीथे तस्योद्गीथादेः रसतमत्वानुसन्धानं यजमानेनैव[3] कर्तुं शक्यत इति प्राप्तेऽभिधीयते-

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते[4] ॥ ४५ ॥

'आर्त्विज्य'मृत्विजः कर्मोद्गीथाद्युपासनमित्यौडुलोमिराचार्यो मन्यते । कुतः । 'तस्मै हि' प्रयोजनायर्त्विक् 'परिक्रीयते,' फलसाधनभूतस्य साङ्गस्य क्रतोरुपादानायेत्यर्थः । कर्मविधिषु "ऋत्विजो वृणीते" "ऋत्विग्भ्यो दक्षिणां ददाती"ति ऋत्विक्कर्तृकत्व[5]शास्त्रेण फलसाधनभूतं साङ्गं कर्म ऋत्विग्भिरनुष्ठेयमित्यवगम्यते । तदन्तर्गतानि कायिकानि मानसानि च कर्माणि ऋत्विक्कर्तृकाण्येव । न च शक्यशक्ती तस्य निबन्धनम् ।

---

१ वचनैरधिकार इति लि० पु० । २ ०कर्तृत्वेति लि० पु० ।
* ०दोहनोपादानेत्येव सर्वपु० पाठः ।
३ ०तमादित्वानुसंधाय्य न (संधानं) यजमानेन-इति लि० पु० ।
४ परिक्रियत इति भूयोभूयो मु० पु० । ५ ०त्वमिति लि० पु० ।

यद्यप्युद्गीथाद्युपासनं पुरुषार्थं, तथाऽपि क्रत्वधिकृताधिकारित्वात्[1] क्रतोश्च साङ्गस्य चार्त्विक्कर्तृकत्वात् “यदेव विद्यया करोति तदेव वीर्यवत्तर”मित्यृत्विक्कर्तृकक्रियोपयोगित्वेन विद्यायास्तदेककर्तृकत्वश्रवणादृत्विक्कर्तृकाण्येतानि । दहरादिषूपासनेषु चार्त्विक्कर्तृकत्वाश्रवणात्, “शास्त्रफलं प्रयोक्तरी”ति न्यायाच्च फलिकर्तृकत्वमेव ॥*

स्वाम्यधिकरणं समाप्तम् ॥ ११ ॥

अथ सहकार्यन्तरविध्यधिकरणम् १२ ।

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४७ ॥

“तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद् बाल्यं च पाण्डित्यं च[2] निर्विद्याथ मुनि”रित्यत्र बाल्यपाण्डित्यवन्मौनमपि विधीयत, उतानूद्यत इति विषये, मौनपाण्डित्यशब्दयोर्ज्ञानार्थत्वात्पाण्डित्यं निर्विद्येति विहितमेव ज्ञान‘मथ मुनि’रित्यनूद्यते । विधिशब्दो न ह्यत्र श्रूयते ।·इत्येवं प्राप्ते ब्रूमः—

‘सहकार्यन्तरविधि’रिति । ‘तद्वतो’—विद्यावतः ‘विध्यादिवत्’, विधीयत इति विधिर्यज्ञादिः सर्वाश्रमधर्मः, शमदमादयश्च ‘विधि’—शब्देनोच्यन्ते, आदिशब्देन श्रवणमनने गृह्येते । ‘सहकार्यन्तरविधि’रित्यत्रापि विधीयत इति विधिः, सहकार्यन्तरं विधिश्चेति सहकार्यन्तरविधिः । एतदुक्तं[3] भवति—यथा[4] “तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेने”त्यादिना “शान्तो दान्त” इत्यादिना च सहकारी यज्ञादिः शमदमादिश्च विधीयते, यथा च “श्रोतव्यो मन्तव्य” इति[5] श्रवणमनने चार्थप्राप्ते विद्यासहकारित्वेन गृह्येते, तथा “तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्ये”त्यादिना पाण्डित्यं बाल्यं मौनमिति त्रितयं विद्यायाः सहकार्यन्तरं

---

१ क्रत्व· · · धिकारित्वादिति पु· द्वयेपि ।

* श्रुतेश्चेति सूत्रं तु न श्रीभाष्यादिपरिगृहीतम् ।

२ ०ष्ठेत बाल्यं चेति लि० पु० । ३ तदुक्तमिति लि० पु० ।

४ यथा भवतीति मु० पु० । ५ इत्यादीति लि० पु० ।

Digitized by Google

विधीयत इति । मौनं च पाण्डित्यादर्थान्तरमित्याह–'पदेशे'ति । 'मुनि'–शब्दस्य पदेशा प्रकृष्टमननशीले व्यासादौ प्रयोगदर्शनान्मौनं[1] पाण्डित्य-बाल्ययोर्द्वयोस्तृतीयम् । यद्यप्य'थ मुनि'रित्यत्र विधिप्रत्ययो न श्रूयते, तथाऽपि मौनस्या[2]प्राप्तत्वाद् विधेयत्वमङ्गीकारणीयम्–'अथ मुनिः 'स्या'-दिति । इदं च मौनं श्रवणप्रतिष्ठार्थान्मननादर्थान्तरभूतमुपासनालम्ब-नस्य पुनःपुनःसंशीलनं तद्भावनारूपम् । तदेवं वाक्यार्थः–'ब्राह्मणो' विद्यावान् 'पाण्डित्यं निर्विद्य' उपास्यं ब्रह्मतत्त्वं परिशुद्धं परिपूर्णं च विदित्वा,[3] श्रवणमननाभ्यां प्राप्तं[4] वेदनं प्रतिलभ्येत्यर्थः । तच्च भगवद्भ-क्तिकृतसत्त्वविवृद्धिकृतम्, यथोक्तम्–"नाहं वेदै"रित्यारभ्य "भक्त्या त्वनन्यया शक्यो···ज्ञातु''मिति । श्रुतिश्च "यस्य देवे परा भक्तिः" "नायमात्मा प्रवचनेन लभ्य" इत्यादिका । 'बाल्येन तिष्ठासेत्,' बाल्य-स्वरूपं चानन्तरमेव वक्ष्यते । 'बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः स्यात्, बाल्यपाण्डित्ये यथावदुपादाय परिशुद्धे परे[5] ब्रह्मणि मननशीलो भवेन्निदिध्यासनरूपविद्याऽऽवाप्तये । एवं त्रितयोपादानेन लब्धविद्यो भवतीत्याह 'अमौनं मौनं[6] च निर्विद्याथ ब्राह्मणा'इति । अमौनं मौनेतर-सहकारिकलापः, तं च मौनं च यथावदुपाददानो विद्याकाष्ठां तदेकनि-ष्ठाख्यां लभेतेत्यर्थः । 'स ब्राह्मणः केन स्या'दिति, उक्तादुपायात्किम-न्योऽप्युपायोऽस्तीति पृष्टे 'येन स्यात्तेनेदृश एवे'ति, येन मौनपर्यन्तेन[7] ब्राह्मणः स्यादित्युक्तम्, तेनैवेदृशः स्यात्, न केनाप्यन्येनोपायेनेति परि-हृतम् । अतः सर्वेष्वाश्रमेषु स्थितस्य विदुषो यज्ञादिस्वाश्रमधर्मवत् पाण्डित्यादिकं मौनतृतीयं विद्यायाः सहकार्यन्तरं विधीयते ।

अथ स्यात्–यदि सर्वेष्वाश्रमेषु स्थितानां विदुषां तत्तदाश्रमधर्म्म-सहकारिणी मौनतृतीयसचिवा विद्या ब्रह्मप्राप्तिसाधनमुच्यते, कथं

१ मानमिति मु० पु० । २ प्रकृष्टमननस्येति लि० पु० ।

† एतच्चिह्नितस्थानं यावत् काशिकराजकीयसंस्कृतपाठशालीयं लिखितपुस्तकं 'लि० पु०' संकेतितं समाप्तम् । अथेतः परं लिखितपुस्तकान्तराणि त्रीणि क्रमेण 'प्र० द्वि० तृ०' संकेतेन यथोपयोगं व्यवहृतानीति द्रष्टव्यम् ।

३ विदुषेति प्र० पु० । ४ प्राप्यमिति प्र० ।

५ परिपूर्णे–इति मु० पु० । ६ मौनमिति नास्ति प्र० । ७ पर्यन्ते चेति प्र० ।

Digitized by Google

तर्हि छान्दोग्ये "ऽभिसमावृत्य कुटुम्बे शुचौ देश" इत्यारभ्य "स खल्वेवं वर्त्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्त्तत" इति यावदायुषं गार्हस्थ्यधर्मेण स्थितिदर्शनमुपपद्यते—इत्यत्राह—

कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४७ ॥

'तु'-शब्दश्चोद्यं व्यावर्त्तयति । 'कृत्स्नभावात्'—कृत्स्नेषु भावात् कृत्स्नेष्वाश्रमिषु विद्यायाः सद्भावात् गृहिणोऽप्यस्तीति तेनोपसंहारः, तस्मात्सर्वाश्रमधर्म्मप्रदर्शनार्थो गृहिणोपसंहार इत्यभिप्रायः ।

तथैतस्मिन्नपि वाक्ये "ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणाया[1]श्च व्युत्थायाथ भिक्षाचर्य्यं चरन्ती"ति पारिव्राज्यैकान्तधर्म्मं प्रतिपाद्य "तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्ये"त्यादिना पारिव्राज्यधर्म्मस्थितिहेतुकमौनतृतीयसहकारिविधानं प्रदर्शनार्थमित्याह—

मौनवदितरेषामप्युपदेशात् ॥ ४८ ॥

सर्वैषणाविनिर्मुक्तस्य भिक्षाचरणपूर्वकमौनोपदेशः सर्वेषामाश्रमधर्म्माणां प्रदर्शनार्थः । कुतः । एवंविधमौनोपदेशवदितरेषामाश्रमि[2]धर्म्माणामपि "त्रयो धर्मस्कन्धा" इत्यारभ्य "ब्रह्मसंस्थोऽमृतत्वमेती"ति ब्रह्मप्राप्त्युपदेशात् । उपपादितश्च पूर्वमेव 'ब्रह्मसंस्थ'-शब्दः सर्वाश्रमिसाधारण इति । अतः सूक्तम्—यज्ञादिसर्वाश्रमधर्मवन्मौनतृतीयः पाण्डित्यादिर्विद्यासहकारित्वेन विधीयत इति ॥

सहकार्यन्तरविध्यधिकरणं समाप्तम् ॥ १२ ॥

—o—

अथाऽनाविष्काराधिकरणम् १३ ।

अनाविष्कुर्वन्नन्वयात् ॥ ४९ ॥

"तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासे" दित्यत्र विदुषो बाल्यमुपादेयतया श्रुतम् । बालस्य भावः कर्म्म वा बाल्यम्,

---

१ षणाशब्दे परतस्सवर्णेन्नैव मु० पु० प्र० च परूपमेव भवति, न तु तथोपनिषदि न वाऽनुषासनिकम् ।

२ ०माश्रमेति प्र० ।

बालभावस्य यथोऽवस्थादिविशेषस्यानुपादेयत्वात् कर्म्मैवेह गृह्यते । तत्र किं बालस्य कर्म्म कामचारादि सर्व्वं विदुषोपादेयमुत दम्भादिरहितत्वमेवेति विषये विशेषाभावात्सर्व्वमुपादेयम् । नियमशास्त्राणि च विशेषविधिनाऽनेन बाध्यन्त इत्येवं प्राप्तेऽभिधीयते—

“अनाविष्कुर्व्व”न्निति । बालस्य यत्स्वभावाऽनाविष्करण[1]रूपं कर्म्म, तदुपादानो वर्त्तेत विद्वान् । कुतः । ‘अन्वयात्’—तस्यैवान्वयात् । ‘बाल्येन तिष्ठासे’दित्यस्मिन् विधौ तस्यैव ह्यन्वयसम्भवः,[2] इतरेषां विद्याविरोधित्वश्रवणात्—

“नाविरतो दुश्चरितान्नाशान्तो नासमाहितः ।
नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्” ॥

“आहारशुद्धौ सत्त्वशुद्धि”रित्यादिषु ॥

अनाविष्काराधिकरणं समाप्तम् ॥ १३ ॥

अथैहिकाधिकरणम् १४ । ऐहिकमप्रस्तुतप्रतिबन्धे[3] तद्दर्शनात् ॥ ५० ॥

द्विविधा विद्याऽभ्युदयफला मुक्तिफला च । तत्राभ्युदयफला स्वसाधनभूतैः पुण्यकर्म्मभिः पुण्यकर्म्मानन्तरमेवोत्पद्यत, उतानन्तरं कालान्तरे वेत्यनियम इति संशयः । पूर्व्वकृतैः पुण्यकर्म्मभिर्हि[4] विद्वान् जायते, यथोक्तं भगवता—“चतुर्व्विधा भजन्ते मां जनाः सुकृतिनोऽर्ज्जुने”ति । साधने निर्वृत्ते[5] विलम्बहेत्वभावादनन्तरमेवेति प्राप्त उच्यते—

ऐहिकमप्रस्तुतप्रतिबन्ध इति । ऐहिकमभ्युदयफलमुपासनमऽप्रस्तुतप्रतिबन्धे अप्रस्तुते प्रबलकर्म्मान्तरप्रतिबन्धे सत्यनन्तरम्, प्रतिबन्धे सति तदुत्तरकालमित्यनियमः । कुतः । ‘तद्दर्शनात्,’ दृश्यते हि प्रबलेन कर्म्मान्तरेण कर्म्मफलप्रतिबन्धाभ्युपगमः श्रुतौ—“यदेव विद्यया करोति

---

१ ०विष्कारेति मु० पु० ।
२ ०सम्भवादिति प्र० ।
३ ह्रीत्यधिकं प्र० ।
४ ०कर्म्मभिर्विद्वेति प्र० ।
५ निवृत्त इति प्र० ।

श्रद्धयोपनिषदा तदेव वीर्य्यवत्तर”मित्युद्गीथविद्यायुक्तस्य कर्मणः फलाप्रतिबन्धश्रवणात् ॥

ऐहिकाधिकरणं समाप्तम् ॥ १४ ॥

अथ मुक्तिफलाधिकरणम् १५ ।

एवं मुक्तिफलानियमस्तदवस्थाऽवधृतेस्तदवस्थाऽवधृतेः ॥ ५१ ॥

मुक्तिफलस्याप्युपासनस्य स्वसाधनभूतैरतिशयितकर्म्मभिरुत्पत्तावेवमेव कालानियमः, तस्याऽपि पूर्ववत्प्रतिबन्धाभावप्रतिबन्ध[1] रूपावस्थावधृतेः[2] । अत्रापि तस्य हेतोः समानत्वादित्यर्थः । सर्वेभ्यः कर्म्मभ्यो मुक्तिफलविद्यासाधनस्य कर्म्मणः प्रबलत्वात्प्रतिबन्धासम्भव इत्यधिकाऽऽशङ्का, तत्रापि ब्रह्मविदपचाराणां पूर्वकृतानां प्रबलानां सम्भवात् प्रतिबन्धसम्भव इति परिहारः । द्विरुक्ति[2]रध्यायपरिसमाप्तिं द्योतयति ॥

मुक्तिफलाधिकरणं समाप्तम् ॥ १५ ॥

इति श्रीमद्भगवद्रामानुजाचार्य्यचरणकृतौ शारीरकमीमांसाभाष्ये तृतीयाध्यायस्य चतुर्थः पादः समाप्तः ॥

समाप्तश्चायं साधनाध्यायस्तृतीयः ॥

१ समाप्तीत्यधिकमत्र मु॰ पु॰, हि॰ च । २ पुनरुक्तिरिति प्र॰ ।

Digitized by Google

नमो मीमांसाद्वयगुरवे भगवते श्रीमते रामानुजाचार्याय ॥

अथ

चतुर्थोऽध्यायः ॥

आवृत्त्यधिकरणम् १। **आवृत्तिरसकृदुपदेशात् ॥ १ ॥**

तृतीयेऽध्याये साधनैः सह विद्या चिन्तिता। अथेदानीं विद्यास्वरूपविशोधनपूर्वकं विद्याफलं चिन्त्यते।

तत्र "ब्रह्मविदाप्नोति परम्" "तमेव[1] विदित्वाऽति मृत्युमेति" 'ब्रह्म वेद ब्रह्मैव भवति" "यदा पश्यः पश्यते रुक्मवर्णं"मित्यादिवेदान्तवाक्येषु ब्रह्मप्राप्तिसाधनतया विहितं वेदनं किं सकृत्कृतमेव शास्त्रार्थं, उताऽसकृदावृत्त[2]मिति संशयः। किं युक्तम्। सकृत्कृतमिति। कुतः। 'ब्रह्म वेद ब्रह्मैव भवती'ति वेदनमात्रस्यैव विधानादसकृदावृत्तौ प्रमाणाभावात्। न चावघातादिवद्वेदनस्य ब्रह्मापरोक्ष्यं[3] प्रति दृष्टोपायत्वाद् यावत्कार्य्यमावृत्तिरिति शक्यं वक्तुम्, वेदनस्य दृष्टोपायत्वाभावात्। ज्योतिष्टोमादिकर्माणि वेदान्तविहितं च वेदनं परमपुरुषाराधनरूपम्, आराधिताच्च परमपुरुषाद् धर्मार्थकाममोक्षाख्यपुरुषार्थावाप्तिरिति हि "फलमत उपपत्ते"रित्यत्र प्रतिपादितम्। अतो ज्योतिष्टोमादिवद्यथाशब्दं सकृत्कृतमेव शास्त्रार्थं इति प्राप्ते प्रचक्ष्महे—

'आवृत्तिरसकृ'दिति। असकृदावृत्तमेव वेदनं शास्त्रार्थः। कुतः। 'उपदेशात्,' ध्यानोपासनपर्यायेण वेदनशब्देनोपदेशात्[4]। तत्पर्य्यायत्वं च विद्युपास्तिध्यायतीनामेकस्मिन् विषये वेदनोप[5]देशपरवाक्येषु प्रयोगादवगम्यते। तथा हि, "मनो ब्रह्मेत्युपासीते"त्युपासिनोपक्रान्तोऽर्थो

१ ०मेवमिति मु० पु०। २ ०दावर्तनमिति प्र०।
३ ब्रह्मापरोक्ष्यमिति मु० पु०। ४ वेदनोपदेशादिति क्वचित्।
५ वेदनोप–इत्येतत् प्र० नास्ति।

"भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेदे"ति विदिनोपसंह्रियते । तथा, "यस्तद्वेद यत्स वेद स मयैतदुक्त" इत्युपक्रमे विदिनोक्तं रैक्वस्य ज्ञानम् "अनु म एताम्भगवो देवतां शाधि यां देवतामुपास्स" इत्युपासिनोपसंह्रियते । तथा, "ब्रह्मविदाप्नोति पर"मित्यादिवाक्यसमानार्थेषु वाक्येषु "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" "ततस्तु तं पश्यते निष्कलं ध्यायमान" इत्यादिषु ध्यायतिना वेदनमभिधीयते । ध्यानं च चिन्तनम्, तच्च[1] स्मृतिसन्ततिरूपम्, न स्मृतिमात्रम् । उपास्तेरपि तदेकार्थः, एकाग्रचित्तवृत्तिनैरन्तर्ये प्रयोगदर्शनात् । तदुभयैकार्थ्यादसकृदावृत्तसन्ततस्मृतिरिह "ब्रह्म वेद ब्रह्मैव भवति" "ज्ञात्वा देवं मुच्यते सर्वपाशै[2]"रित्यादिषु वेदनादिशब्दैरभिधीयत इति निश्चीयते ।

लिङ्गाच्च ॥ २ ॥

लिङ्गं-स्मृतिः । स्मृतेश्चायमर्थोऽवगम्यते । स्मर्य्यते हि मोक्षसाधनभूतं वेदनं स्मृतिसन्ततिरूपम्-

"तद्रूपप्रत्यये चैका सन्ततिश्चान्यनिःस्पृहा ।
तद्ध्यानं प्रथमैः षड्भिरङ्गैर्निष्पाद्यते तथे"[3]ति ।

तस्मादसकृदावृत्तमेव वेदनं शास्त्रार्थः ॥

आवृत्त्यधिकरणं समाप्तम् ॥ १ ॥

ब्रह्माऽऽत्मत्वोपासनाधिकरणम् २ ।

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥३॥

इदमिदानीं चिन्त्यते-किमुपास्यं ब्रह्मोपासितुरन्यत्वेनोपास्य,-मुतोपासितुरात्मत्वेनेति । किं युक्तम् । अन्यत्वेनेति । कुतः । उपासितुः प्रत्यगात्मनोऽर्थान्तरत्वाद् ब्रह्मणः । अर्थान्तरत्वं चा"धिकन्तु भेदनिर्दे-

---

१ तच्चेत्यत्र चिन्तनमित्येव प्र· ।
२ ॰पाशैरिति प्र· ।
३ तदेति प्र· ।

Digitized by Google

शात्" "अधिकोपदेशात्" "नेतरोऽनुपपत्ते"रित्यादिषूपपादितम् । यथावस्थितञ्च ब्रह्मोपास्यम् । अयथावस्थितोपासने हि ब्रह्मप्राप्तिरप्यऽयथाभूता स्यात्, "यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवती"ति न्यायात् । अतोऽन्यत्वेनोपास्यमित्येवं प्राप्तेऽभिधीयते–

'आत्मेति त्वि'ति । 'तु'–शब्दोऽवधारणे । उपासितुरात्मेत्येवोपास्यम् । उपासिता प्रत्यगात्मा स्वशरीरस्य स्वयं यथाऽऽत्मा, तथा स्वात्मनोऽपि परं ब्रह्मात्मेत्येवोपासीतेत्यर्थः । कुतः । एवमभ्यु[1]पगच्छन्ति पूर्वे उपासितारः, "त्वं वा अहमस्मि भगवो देवतेऽहं वै त्वमसी"ति । उपासितुरर्थान्तरभूतं ब्रह्मोपासितारो'ऽह'मिति कथमभ्युपगच्छन्तीत्यत्राह 'ग्राहयन्ति चे'ति । इममर्थमविदुषमुपासितॄन् ग्राहयन्ति शास्त्राणि, तान् प्रत्युपपादयन्तीत्यर्थः, "य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृत"इति, तथा "सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः···ऐतदात्म्यमिदं सर्व"मिति, "सर्वं खल्विदं ब्रह्म तज्जला"निति च सर्वस्य चिदचिद्वस्तुनः तज्जत्वात्तल्लत्वात्तदनत्वात्तन्नियाम्यत्वात्तच्छरीरत्वाच्च सर्वस्यायमात्मा, अतः स त आत्मा । अतो यथा प्रत्यगात्मनः स्वशरीरं प्रत्यात्मत्वाद्देवोऽहं मनुष्योऽहमित्यनुसन्धानम्, तथा प्रत्यगात्मनोऽप्यात्मत्वात्परमात्मन,स्तस्याप्यहमित्येवानुसन्धानं युक्तमिति । एवं शास्त्रैरुपपादितं सर्वबुद्धीनां ब्रह्मैकनिष्ठत्वेन* सर्वशब्दानां ब्रह्मैकनिष्ठत्वमभ्युपगच्छन्त'स्त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते"–इति व्यतिहारेणो[2]क्तवन्तः । एवं च"अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुः" "आत्मेत्येवोपासीत" "सर्वं तम्परादाद्योऽन्यत्रात्मनः सर्वं वेदे"त्यन्यत्वानुसन्धाननिषेधः,[3] "पृथगात्मानं प्रेरितारं च मत्वे"ति पृथक्त्वानुसन्धानविधानं

---

१ एवं तु–इति प्र० । * ०निष्ठत्वे–इति त्रि० ।

२ व्यतिकरेणेति पुस्तकान्तरे, व्यतिरेकेणेति तु प्र० ।

३ सर्वं वेदेत्यात्मत्वाननुसंधाननिषेध इति क्वचित् ।

चालितुम् । अहमिति स्वात्मतयाऽनुसन्धानाद्न्यत्वानुसन्धाननिषेधो दर्शितः, स्वशरीरात् स्वात्मनोऽधिकत्वानुसन्धानवत्स्वात्मनोऽपि परमात्मनोऽधिकत्वानुसन्धानात्पृथक्त्वानुसन्धानविधानं च दर्शितम् । अधिकस्य ब्रह्मणः प्रत्यगात्मन आत्मत्वात्तस्य च ब्रह्मशरीरत्वाविरोधवाक्ये'ऽन्तरो ह्येष' इत्युक्तम् । अत उपासितुरात्मत्वेन ब्रह्मोपास्यमिति स्थितम् ।

आत्मत्वोपासनाधिकरणं समाप्तम् ॥ २ ॥

अथ प्रतीकाधिकरणम् ३ । **न प्रतीके न हि सः ॥ ४ ॥**

"मनो ब्रह्मेत्युपासीत स यो नाम ब्रह्मेत्युपास्ते" इत्यादिप्रतीकोपासनेष्वप्यात्मत्वानुसन्धानं कार्य्यं,मुत नेति चिन्तायाम् "मनो ब्रह्मेत्युपासीते"ति ब्रह्मोपासनत्वसाम्याद् ब्रह्मणश्चोपासितुरात्मत्वादात्मेत्येवोपासीतेत्येवं प्राप्तेऽभिधीयते—

'न प्रतीक'इति । 'प्रतीके ना'त्मत्वानुसन्धानं कार्य्यम् । 'न हि सः, न ह्युपासितुरात्मा प्रतीकः । प्रतीकोपासनेषु प्रतीक एवोपास्यो, न ब्रह्म- ब्रह्म तु तत्र दृष्टिविशेषणमात्रम् । प्रतीकोपासनं हि नामाऽब्रह्मणि ब्रह्मदृष्ट्याऽनुसन्धानम् । तत्रोपास्यस्य प्रतीकस्योपासितुरात्मत्वाभावान्न तथाऽनुसन्धेयम् ।

नन्वत्रापि ब्रह्मैवोपास्यम्, ब्रह्मण उपास्यत्वसम्भवे मनआदीनामचेतनानामल्पशक्तीनां चोपास्यत्वाश्रयणस्यान्याय्यत्वात् । अतो मनआदिदृष्ट्या ब्रह्मैवोपास्यमिति, तत्राह[1]—

ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥

मनआदिषु 'ब्रह्मदृष्टि'रेव युक्ता, न ब्रह्मणि मनआदिदृष्टिः, ब्रह्मणो मनआदिभ्य उत्कर्षात्, तेषाञ्च विपर्य्ययात् । उत्कृष्टे हि राजनि भृत्यदृष्टिः प्रत्यवायकरी, भृत्ये तु राजदृष्टिरभ्युदयाय ॥

प्रतीकाधिकरणं समाप्तम् ॥ ३ ॥

---

[1] अभिमतम् आक्षेपेण अ० ।

अथाऽऽदित्यादिमत्यधिकरणम् ४। **आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥**

"य एवासौ तपति तमुद्गीथमुपासीत" इत्यादिषु कर्माङ्गाश्रयेषूपासनेषु संशयः—किमुद्गीथादौ कर्माङ्ग आदित्यादिदृष्टिः कर्तव्या, उतादित्यादिषूद्गीथादिदृष्टिरिति। उत्कृष्टदृष्टिर्निकृष्टे कर्तव्येति न्यायादुद्गीथादीनां च फलसाधनभूतकर्माङ्गत्वेनाफलेभ्य आदित्यादिभ्य उत्कृष्टत्वादादित्यादिषूद्गीथादिदृष्टिरिति प्राप्तेऽभिधीयते—

'आदित्यादिमतयश्चाङ्ग' इति। 'च'—शब्दोऽवधारणे, कर्माङ्ग उद्गीथादावादित्यादिदृष्टय एव कार्याः। कुतः। 'उपपत्तेः'—आदित्यादीनामेवोत्कृष्टत्वोपपत्तेः। आदित्यादिदेवताराधनद्वारेण हि कर्मणामपि फलसाधनत्वम्। अतस्तद्दृष्टिरुद्गीथाद्यङ्गे ॥

आदित्यादिमत्यधिकरणं समाप्तम् ॥ ४ ॥

अथाऽऽसीनाधिकरणम् ५। **आसीनः सम्भवात् ॥ ७ ॥**

मोक्षसाधनतया वेदान्तशास्त्रैर्विहितं ज्ञानं ध्यानोपासनादिशब्दवाच्यमसकृदावृत्तं सन्ततस्मृतिरूपमित्युक्तम्। तदनुतिष्ठन्नासीनः शयानस्तिष्ठन् गच्छंश्च विशेषाभावादनियमेनानुतिष्ठेदिति प्राप्त उच्यते—

'आसीन' इति। 'आसीन' उपासनमनुतिष्ठेत्। कुतः। 'सम्भवात्'। आसीनस्यैव ह्येकाग्रचित्तता सम्भवः। स्थितिगत्योः प्रयत्नसापेक्षत्वात्, शयने[1] च निद्रासम्भवात्। पश्चाद्धारण[2]प्रयत्ननिवृत्तये सापाश्रय[3] आसीनः कुर्यात्।

ध्यानाच्च ॥ ८ ॥

'निदिध्यासितव्य' इति ध्यानरूपत्वादुपासनस्यैकाग्रचित्तताऽवश्यम्भाविनी। ध्यानं हि विजातीयप्रत्ययान्तराव्यवहितमेकचिन्तनमित्युक्तम्।

---

१ शयान इति मु॰ पु॰। २ पश्चाद्धारणेति प॰। ३ साश्रय इति मु॰ पु॰।

Digitized by Google

अचलत्वं चापेक्ष्य ॥ ९ ॥

निश्चलत्वं चापेक्ष्य[1] पृथिव्यन्तरिक्षादिषु ध्यानवाचोयुक्तिर्दृश्यते "ध्यायतीव पृथिवी ध्यायतीवान्तरिक्षं ध्यायतीव द्यौः ध्यायन्तीवाऽऽपो ध्यायन्तीव पर्वता" इति । अतः पृथिवीपर्वतादिवदेकाग्रचित्ततया निश्चलत्वमुपासकस्यासीनस्यैव सम्भवेत् ।

स्मरन्ति च ॥ १० ॥

स्मरन्ति चासीनस्यैव ध्यानम्—

"शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥
तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धय" इति ।

यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥

एकाग्रतातिरिक्तदेशकालविशेषाश्रवणादेकाग्रतानुकूलो यो देशः कालश्च, स एवोपासनस्य देशः कालश्च । "समे शुचौ शर्करावह्निवालुका[2]विवर्जित" इति वचनमेकाग्रतैकान्तदेशमाह, न तु देशं नियच्छति, "मनोऽनुकूल"इति वाक्यशेषात् ॥

आसीनाधिकरणं समाप्तम् ॥ ५ ॥

—⋄—

आऽऽप्रायणाधिकरणम् ६ । आ प्रायणा[3]त्तत्रापि हि दृष्टम् ॥१२॥

तदिदमपवर्गसाधनमुक्तलक्षणोपासनमेकाह एव सम्पाद्यमुताऽऽप्रायणात्प्रत्यहमनुवर्तनीयमिति विषये एकस्मिन्नेवाहनि शास्त्रार्थस्य कृतत्वात्तावतैव परिसमापनीयमिति प्राप्त उच्यते—

'आ प्रायणा'दिति, आ मरणादनुवर्तनीयम् । कुतः । 'तत्रापि हि दृष्टम्'—उपासनोद्योगप्रभृत्याऽऽप्रायणान्मध्ये यः कालस्तत्र सर्वत्रापि

१ चापेक्ष्येति प्र० ।
२ शुचौ देशे....वालुकादि—इति मु० पु० । ३ प्रयाणेतिप्रायः पुस्तकेषु ।

दृष्टमुपासनम् "स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते' इति ॥

आप्रायणाधिकरणं समाप्तम् ॥ ६ ॥

अथ तदधिगमाधिकरणम् ७ ।

तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥

एवं विद्यास्वरूपं विशोध्य विद्याफलं चिन्तयितुमारभते । ब्रह्मविद्याप्राप्तौ पुरुषस्योत्तरपूर्वाघयोरश्लेषविनाशौ श्रूयेते—"तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते" "तस्यैवात्मा पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेने"त्युत्तराघाश्लेषः, "तद्यथेषीकातूल[1]मग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते" "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इति पूर्वाघविनाशः । एतावश्लेषविनाशौ विद्याफलभूतावुपपद्येते नेति[2] संशयः । किं युक्तम् । नोपपद्येते इति । कुतः । "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपी"त्यादिशास्त्रविरोधात् । अश्लेषविनाशव्यपदेशस्तु मोक्षसाधनभूतविद्याविधायिवाक्यशेषगतः कथंचिद्विद्यास्तुतिप्रतिपादनेनाप्युपपद्यते । न च विद्या पूर्वोत्तराघयोः प्रायश्चित्ततया विधीयते, येन प्रायश्चित्तेनाघविनाश उच्येत । विद्या हि "ब्रह्मविदाप्नोति परम्" "ब्रह्म वेद ब्रह्मैव भवती"ति ब्रह्मप्राप्त्युपायतया विधीयते । अतो विद्यार्थवादोऽयमघविनाशाश्लेषव्यपदेश इत्येवं प्राप्तेऽभिधीयते—

'तदधिगम' इति । विद्याप्राप्तौ पुरुषस्य विद्यामाहात्म्या'दुत्तरपूर्वाघयोरश्लेषविनाशा'वुपपद्येते । कुतः । एवंविधं हि विद्यामाहात्म्यमवगम्यते, 'एवंविदि पापं कर्म न श्लिष्यते' 'एवं हास्य सर्वे पाप्मानः प्रदूयन्त' इत्यादिव्यपदेशात् । न च 'नाभुक्तं क्षीयते कर्म'[3]त्यनेन शास्त्रे-

---

१ ०षीकतूलमिति मु॰ पु॰, न तु तथोपनिषदः पाठः ।
२ न वेति—इति प्र॰ ।   ३ कचनकर्म क्षीयते—इति प्र॰ ।

Digitized by Google

चास्य विरोधः, भिन्नविषयत्वात् । तद्धि कर्मणां फलजननसामर्थ्यदृढिमविषयम्, एतत्तूत्पन्नाया विद्यायाः प्राक्कृतानां पाप्मनां फलजननशक्तिविनाशसामर्थ्यम् उत्पत्स्यमानानां च फलजननशक्त्युत्पत्तिप्रतिबन्धकरणसामर्थ्यं च प्रतिपादयतीति द्वयोर्विषयो भिद्यते । यथाऽग्निजलयोरौष्ण्यतच्निवारणसामर्थ्यविषययोर्द्वयोः प्रमाणयोरपि विषयभेदात्प्रामाण्यम्, एवमत्रापीति न कश्चिद्विरोधः ।

अघस्याश्लेषकरणं, वैदिककर्मायोग्यतावासनाप्रत्यवायहेतुशक्त्युत्पत्तिप्रतिबन्धकरणम् । अघानि हि कृतानि पुरुषस्य वैदिककर्मायोग्यतां सजातीयकर्मान्तरारम्भरुचिं प्रत्यवायं च कुर्वन्ति । अघस्य विनाशकरण,-मुत्पन्नायास्तच्छक्तेर्विनाशकरणम् । शक्तिरपि परमपुरुषाप्रीतिरेव । तदेवं विद्या वेदितुर्वैयात्यर्थप्रियत्वेन स्वयमपि निरतिशयप्रिया सती वेद्यभूतपरमपुरुषाराधनस्वरूपा पूर्वकृताघसञ्चयजनितपरमपुरुषाप्रीतिं विनाशयति, सैव विद्या स्वोत्पत्त्युत्तरकालभाव्यऽघनिमित्तपरमपुरुषाप्रीत्युत्पत्तिं च प्रतिबध्नाति । तदिदमश्लेषवचनं प्रामादिकविषयं मन्तव्यम्, "नाविरतो दुश्चरिता"दित्यादिभिः शास्त्रैरा प्रायणादहरहरुत्पद्यमानाया उत्तरोत्तरातिशयभागिन्या विद्याया दुश्चरितविरतिनिष्पाद्यत्वावगमात् ॥

तदधिगमाधिकरणं समाप्तम् ॥ ७ ॥

अथेतराधिकरणम् ८ ।

इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥

उत्तरपूर्वाघयोर्विद्ययाऽश्लेषविनाशावुक्तौ । 'इतरस्य' पुण्यस्या'प्येव'मुक्तेन न्यायेनाश्लेषविनाशौ विद्यया स्याताम्, विद्याफलविरोधित्वसामान्यात् व्यपदेशाच्च । भवति च व्यपदेशः—उभे सुकृतदुष्कृते निर्दिश्य "सर्वे पाप्मानोऽतो निवर्तन्ते" इति, "तत्सुकृतदुष्कृते धूनुत[1]" इति च । मुमुक्षोरनिष्टफलत्वात्सुकृतस्यापि 'पाप्म'–शब्देन व्यपदेशः । सुकृतस्य[2] शास्त्रीयत्वात्तत्फलस्य केषांचिदिष्टत्वदर्शनाच्च विद्यया चाविरोधशङ्कां

---

१ विधूनुत इति मु॰ पु॰ । १ अपिशब्दोऽधिको मु॰ पु॰ ।

निवर्त्तयितुमतिदेशः । ननु विदुषोऽपि सेतिकर्त्तव्यताकोपासननिर्वृत्तये वृष्ट्यादिफलानीष्टान्येव, कथं तेषां विरोधाद्विनाश उच्यते, तत्राह–'पाते त्वि'ति । शरीरपाते तु तेषां विनाशः, शरीरपातादूर्ध्वं तु विद्याऽननुगुणवृष्टफलानि सुकृतानि नश्यन्तीत्यर्थः ॥

इतराधिकरणं समाप्तम् ॥ ८ ॥

अथाऽनारब्धकार्याधिकरणम् ९ । **अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १५ ॥**

ब्रह्मविद्योत्पत्तेः पूर्वोत्तरभाविनोः सुकृतदुष्कृतयोरश्लेषविनाशावुक्तौ । ततः पूर्वभाविनोः सुकृतदुष्कृतयोः किमविशेषेण विनाश, उतानारब्धकार्य्ययोरेवेति विशये "सर्वे पाप्मानः प्रदूयन्त" इति विद्याफलस्याविशेषश्रवणाद्विद्योत्पत्त्युत्तरकालभाविन्याश्च शरीरस्थितेः कुलालचक्रभ्रमणादिवत्संस्कारवशादप्युपपत्तेरविशेषेणेति प्राप्त उच्यते–

'अनारब्धकार्य्ये एव तु पूर्वे' इति । विद्योत्पत्तेः 'पूर्वे' सुकृतदुष्कृते 'अनारब्धकार्य्ये' अप्रवृत्तफले 'एव' विद्यया विनश्यतः । कुतः । 'तदवधेः' 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये ऽथ सम्पत्स्य" इति शरीरपातविलम्बावधिश्रुतेः । न च पुण्यापुण्यकर्मजन्यभगवत्प्रीत्यप्रीतिव्यतिरेकेण शरीरस्थितिहेतुभूतसंस्कारसद्भावे प्रमाणमस्ति ॥

अनारब्धकार्याधिकरणं समाप्तम् ॥ ९ ॥

अथाऽग्निहोत्राधिकरणम् १० । **अग्निहोत्रादि तु तत्कार्य्यायैव तद्दर्शनात् ॥ १६ ॥**

इतरस्याऽप्येवमसंश्लेष इति विद्याबलात्सुकृतस्याप्यसंश्लेष उक्तः । अग्निहोत्रादीनां नित्यनैमित्तिकानां स्वाश्रमधर्माणामपि सुकृतत्वसामान्येन तत्फलस्याश्लेषादनिष्टतोऽननुष्ठाने प्राप्त उच्यते–

'अग्निहोत्रादि त्वि'ति । 'तु'–शब्दः सुकृतान्तरेभ्यो विशेषणार्थः । अग्निहोत्राद्याश्रमधर्माः फलाश्लेषासम्भवादनुष्ठेया एव । तदसम्भवश्च

तस्य बाधकत्वायोग्यता च तेन गन्धप्रागभावावच्छिन्ने घटे न सम्भवतीति तत्र तदुभयमविकलम् अयन्तु विशेषोयः प्रागभावस्तल्लक्षणमात्रम् अत्यन्ताभावस्थले यावत्सत्त्वम् अत्र द्वितीयस्य स्फुटावभासत्वात्तत्रैव तदुभयमुदाहृतं प्राचीनैर्न तु प्रागभावस्थले दुर्बोधत्वादिति योग्यतालक्षणे यदत्यन्ताभावग्रहणं तत्सम्पातायातमन्यमतावलम्बेन वेति । न च जात्या व्यक्त्याक्षेपे प्रलये व्यभिचार इति यन्नैयायिकैरुक्तं तदेवं सति विरुध्येत न हि व्यक्तिध्वंसवद्गामितया जातेर्व्यक्तिव्यभिचारिता सम्भवतीति । नैवम् । तत्रत्यव्यभिचारिपदेनाव्यभिचारविरोधिनः कार्त्स्न्येन सम्बन्धाभावस्य विवक्षितत्वात् । अन्यथा तादृशं पृथिवीत्वं मध्येपि गन्धं न गमयेदित्यस्योक्तप्रायत्वादिति साध्याभाववधियो गृहीतप्रामाण्यायाः साध्यधीप्रतिबन्धकतया तदभावस्तृतीयलिङ्गपरामर्शेनापेक्ष्यते तस्या अभ्युत्थानात्तु सह नास्तीति ॥

इति श्रीवाचस्पतिमिश्रकृते खण्डनोद्धारे प्रमाणतत्त्वाभासोद्धारो नाम प्रथमः परिच्छेदः ॥

हेत्वाभासखण्डनानन्तरं निग्रहस्थानत्वेन स्मृतान् प्रतिज्ञाहान्यादीन् खण्डयति स्वीकृतोक्तपरित्यागः प्रतिज्ञाहानिरित्यलक्षणं झटिति संवरणेतिव्याप्तेः। न हि झटिति संवृतं पतितमपि निग्रहस्थानं निगृह्णाति किञ्च स्वीकृतेति व्यर्थं स्वीकृत्यास्वीकारो हि त्याग इति स्वीकारस्य त्यागपदार्थान्तर्गतत्वेन तत एव प्राप्त्या पौनरुक्त्यात्। निग्रहस्थानसामान्यलक्षणानुवृत्त्या झटिति संवरणातिव्याप्तिनिरासात् न हि झटिति संवृतं कथाकारणीभूतसम्यग्ज्ञानविरहनिग्रहस्य स्थानमुन्नायकं भवति नापि स्वीकृतपदं पुनरुक्तं परिहारमात्रस्यैव त्यागपदार्थत्वात् परोक्तं दूषणं परिहरतीत्यादेर्दर्शनात् नापि रूपान्तरेण स्वीकृत्य रूपान्तरेण त्यागेतिव्याप्तिस्त्यागस्य प्रकाराकाङ्क्षायां स्वीकारप्रकारस्यैवोपस्थितत्वेनान्वयात् उपस्थितपरित्यागे गौरवात् आग्नेयीन्यायात्। न चापसिद्धान्तेतिव्याप्तिः तत्रापि नैयायिकोहमित्यादिना सङ्क्षिप्ताक्षरेण सर्वस्यैव न्यायसिद्धान्तस्योक्तौ पश्चात्तदेकदेशत्यागे उक्तलक्षणसत्त्वादिति वाच्यं स्वीकृतस्य विशिष्योक्तस्य संवरणावसरात्यये परित्यागः प्रतिज्ञाहानिरिति लक्षणात्। हन्तैवं संवरणावसरात्यये स्वीकृतपरित्याग इत्येवास्तु तावन्मात्रस्यैव निग्राहकत्वात् शेषं व्यर्थमिति चेत्। मैवं वोचः। विचित्राभिसन्धाना हि प्राञ्चः तथाहि विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानमिति सङ्क्षेपे पारमर्षसूत्रं विस्तरे तु प्रतिज्ञाहानिरित्यादि एवमसाधनाङ्गवचनमदोषोद्भावनमिति प्रसज्यपर्युदासाभ्यां सङ्क्षेपे चतुर्धेति बौद्धाः विस्तरे तु चतुर्दशेति त एवाहुः। तथा चामीषां यावन्ति रूपाणि निग्रहे सम्भवन्ति तेषां मध्ये केनचित्कानिचित्परिगृहीतानि केनचित्कानिचिदभिप्रायस्वातन्त्र्यात् सम्भवन्ति तु सर्वाण्येव

रूपाणीति । अयन्तु विशेषो यत्स्वाश्रितशाखानुक्तं रूपं निग्रहरूपमपि पुरस्कृत्य निगृह्णन्नपसिद्धान्तमासादयतीति । हन्तैवं चौरापराधेन माण्डव्यनिग्रहः कुरुमेनाहिसंतृप्ततोर्मुनेर्मताश्रयणे(१)न सद्धर्मेणानिगृह्णतो वादिनोपसिद्धान्तः स्यादिति किमत्र क्रियतां दुर्लभा हि शाखपरिपाटी तथाहि सांन्दनिक त्वमेव वेदान्तमाश्रयमाणो वेदानामपि प्रामाण्यमपजानानो व्याघातादप्यबिभ्यत् प्रमाणपथमवतीर्णं सर्वं जहत् तदनवतीर्णं अद्वैतं दधत्स्वाश्रितशाखाश्रद्धालुतया परं जीवसीति । नन्वेकस्य परित्यागपरिग्रहौ विरुद्धाविति विरोध एवात्र दोषोऽस्त्विति चेत् । मैवम् । त्यागस्यानुद्भावने तद्धटितस्य विरोधस्योद्भावनाशक्यतया आवश्यकोद्भावनस्य त्यागस्यैवात्र दोषत्वात् सेयं प्रतिज्ञाहानिः पक्षहानिसाध्यहानिलिङ्गहानिदृष्टान्तहानितद्विशेषणहानिक्रमहानिभेदादनेकधा प्रतिज्ञापदं त्वत्र निर्वाह्यभागपरं तेन सर्वसङ्ग्रह इति स्थापकेनोक्तस्य दूषकेण दूषितस्य साध्यभागस्य पूर्वानुक्तविशेषणवतोऽभिधानं प्रतिज्ञान्तरं न च पूर्वपदार्थानिरुक्तिः यस्मिन् काले उक्तविशेष्यस्य समभिव्याहारः सम्भवति तत्कालस्य पूर्वपदार्थत्वात् तेन विशेष्यसमभिव्याहारौपयिककालेऽनुक्तस्य साध्यविशेषणस्य दूषणाभिधानानन्तरं यदभिधानं तत्प्रतिज्ञान्तरम् । नन्वीदृशः कालो विशेष्याभिधानादव्यवहितः पूर्वश्चोत्तरश्च भवति तथा चैतयोरेकस्मिन्नुक्तमपरस्मिन्ननुक्तत्वात्पूर्वमुक्तं भवत्येवेति चेन्न । सामान्याभावस्याश्रयणात् । न च प्रागुक्तस्य प्रकरणलभ्यस्य विशेषणस्यानुक्तभ्रान्त्या दूषितस्याभिधानेऽतिव्याप्तिरिति वाच्यम् अनुक्तपदेनाप्रतिपादितस्योक्तत्वात् तस्य तु प्रकरणेनैव प्रतिपा-

(१) काशीपुस्तकेऽप्येवमेव पाठो दृश्यते ।

दितत्वात्। ननु तथापि परस्मिन्ननुत्पन्नप्रतिपत्तौ प्रतिपादि-
तत्वस्याभावात्तत्रातिव्याप्तिरेवेति चेन्न। श्रोतृप्रतिपत्त्यनु-
कूलकारणाकार्त्स्न्यस्य प्रतिपादितपदार्थत्वात् तस्य चानु-
त्पन्नप्रतिपत्तिके सत्त्वात् न च प्रतिज्ञाहान्या हेतुहानेरिव
प्रतिज्ञान्तरेण हेत्वन्तरस्यापि सङ्ग्रहोऽस्त्विति मणिकण्ठम-
तमादेयं स्वतन्त्राभिप्रायस्य नियोगपर्यनुयोगानर्हत्वादित्यु-
क्तत्वात्। प्रतिज्ञाविरोध उक्तव्याघातः स च यस्य येन रूपेण
यदनन्वयो येनाभ्युपगतस्तस्य तेनैव रूपेण तेन पुंसान्वया-
भ्युपगमः स च पदादिभिरुन्नीयत इति पदादिव्याघात
उच्यते। ननु यावज्जीवमहं मौनी अवाचकः शब्द इदं न जा-
नामि ज्ञानमविषयमित्यादिषु विरोधप्रपञ्चेषु नाभ्युपगमा-
न्तरं पश्यामो येन विरोधः स्यादिति। मैवम्। मौनं हि वच-
नोच्चारणसमर्थस्य तदनुच्चारणं तत्राहं मौनीति शब्दोच्चार-
यितृत्वं आत्मनोऽभ्युपगच्छति कथमन्यथा वाचा प्रतिपाद-
यति एवं चाहं मौनीति व्यक्तमभ्युपगमान्तरं न चेत्प्रतिपा-
दयति न तर्हि प्रतिपादकः एवमवाचकः शब्द इत्यादावपि
शब्दस्य वाचकत्वमभ्युपैति कथमन्यथा तेन प्रतिपादयति
तथा चात्रावाचकः शब्द इति ब्रुवतो व्यक्तमभ्युपगमान्तरं
एवमिदमिति प्रत्यक्षविषयमिदमा निर्दिशति न जानामी-
ति तज्ज्ञानमपह्नुते एवं ज्ञानमविषयमित्यादि वदत एतद्वा-
क्यजमपि ज्ञानं ज्ञानाविषयत्वं न विषयीकरिष्यतीति गले-
पादिकयापि ज्ञानस्य विषयत्वमङ्गीकारयितव्य एवञ्च ज्ञान-
स्याविषयत्वाभ्युपगमो विरुद्धः। यत्तु घटो नास्तीत्यादौ घ-
टोस्तीत्यस्य घटसत्त्वविधायकतया नञश्च घटासत्त्वविधाय-
कतयात्रापि प्रतिज्ञाविरोधः स्यादिति खण्डनम्। तदव्युत्प-
न्नविजृम्भितम्। घटेन नञो नञा चास्त्यन्वयस्य सार्वलौकि-

कत्वात् । ननु घटनञोः कथमन्वयः उभयोरतादात्म्यात् नापि घटस्य नञर्थे प्रतियोगितयान्वयः घट इति प्रथमान्तात्सम्ब- न्धितया तस्योपस्थित्यसम्भवात् तत्सम्भवे वा घटस्य नेत्य- नेन घटसम्बन्धिकः कश्चिन्निषेद्धव्यो न घट एवेति । मैवम् । घटो नेति शब्दाद्घटनिषेधस्तावत्प्रतीयत इति सार्वलौकिकं ईदृशञ्च प्रत्ययमपह्नुवानो माध्यमिकवदुपेक्षणीयः स्यात् । ननु प्रतीम एवं किं ततः । शब्दादीदृशः प्रत्ययः कथं स्यादिति पृच्छाम इति चेदनुभवं पृच्छ । अनुभवः कूटसा- क्षीति चेत् । आत्मानमुपालभस्व येन तादृशमेव कूटमनुभवं पुष्यसि । अपसिद्धान्ते शास्त्राकाराभ्युपगमेनात्र तु स्वाभ्यु- पगमेन सह स्वाभ्युपगमान्तरस्य विरोध इत्यपसिद्धान्ता- दस्य भेदः । नित्यः शब्दः कृतकत्वादित्यादौ प्रतिज्ञाविरो- धवत् विरुद्धहेत्वाभासत्वेपि प्रतिज्ञाविरोध एव निग्रहा- य साध्याभावहेत्वोर्व्याप्त्युपजीवनेन प्रवर्तिष्णुं हेत्वाभा- समपेक्ष्याभ्युपगमविरोधमात्रोपजीवनमात्रप्रवृत्ततयास्य प्रागेव सम्भृतसामग्रीकत्वादिति सह प्रतीतावप्रतीतौ च न विरोध इति खण्डने तवापि विरोधमन्तः समानमिद- मिति नैयायिकवचसि प्रतिबन्दिखण्डनं तद्यथा प्रतिब- न्दी तावद्दूषणप्रतिबन्दी वा समाधिप्रतिबन्दी वा नाद्यः अप्रस्तुतत्वात् स्वपक्षे दोषे परेण दर्शिते तत्पक्षदोषो- दीरणं न क्वापि घटते किञ्च परदत्तस्य दोषस्यानुद्धरणात् एकनिग्रहान्तत्वात्तस्याः । नापरः यः प्रतिबन्द्या द्योत्यते स एव तर्हि समाधिरभिधीयतां किमनया कुसृष्ट्या कि- ञ्चावयोर्भिन्नमताश्रितयोः समानः समाधिरिति न नियमः एकस्मिन्मते यः समाधिस्तस्य परमते विमतेरपि सम्भवात् किञ्च परोद्भावितं दोषमज्ञानादपोह्यत इति । अविनिगमस्तु

गुरुपक्षोपस्थितयोः प्रमाणाभावादन्यतराभावः अत्र च प्र-
माणाभाव एव दोषो न स्वविनिगमः लाघवगौरवे तु प्रमा-
णस्य लघुगुरुविषयत्वसम्भवे लघुपरिच्छेदकत्वं गुरुपरिच्छे-
दकत्वञ्च स्वभावभेदो प्रमाणसहकारितामात्रेण तु तर्कव्य-
पदेशः प्रतिबन्दिस्त्वापाततोऽर्थान्तरं तथाहि यदि क्षितौ
कर्ता स्यात् शशे शृङ्गमपि स्यात् शशशृङ्गवदसावपि प्रमाण-
बाधित इति चेत् । तर्हि स एव दोषो न तु प्रतिबन्दिरिति ।
तदुक्तं प्रतिबन्दिरदूषणं तथा च यदुभयोः तदेवेह दूषणं स्फुट-
त्वादिति सम्प्रदायः । अनौचित्यन्त्वौचित्यस्य प्रामाणिक-
त्वविरहः स च प्रमाणाभावान्तर्गत एव न चार्थान्तरमर्था-
न्तरेण परिहरतः को दोषो वाच्यो यद्यनौचित्यं न दोषः
स्यात् तत्र प्रमाणाभावावधारणानन्तर्भावेण पृथगिति वा-
च्यं प्रथमार्थान्तरेणैव कथापर्यवसाने द्वितीयार्थान्तराभि-
धानस्यानवसरपराहतत्वादिति । यत्तु दोषसामान्योद्भा-
वनं सा मतानुज्ञा । अत एव प्रतिषेधेऽपि समानो दोषः तथा
प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोष इति सूत्रद्वयस्य तथै-
वार्थ आकरे स्फुटीकृतः तथा प्रतिवन्दी पृथग्दोष इति न्याय-
मार्ग इति विद्धि । प्रतिवन्ध्या दूषणत्वानभ्युपगमेऽपसिद्धा-
न्तः सा हि सर्वतन्त्रसिद्धदूषणभावेत्युपक्रमापसिद्धान्तो-
पि दुर्वचः तथाहि सिद्धान्तविपरीताभ्युपगमोऽपसि-
द्धान्त इत्यलक्षणं मत्सिद्धान्तविपरीताभ्युपगन्तुस्तवापसि-
द्धान्तापत्तेः । अभ्युपतमानभ्युपगमयोः कर्त्रभेदोभिमत इति
चेत् । अङ्कुरस्य जन्यत्वं व्योम्नश्चाजन्यत्वमभ्युपगच्छतोऽप-
सिद्धान्तापत्तेः । विषयाभेदोऽप्यभिमत इति चेत् । एकस्या-
मपायामचेतनस्यापि कर्तृत्वमपरस्यान्तु चेतनस्यैवमभ्यु-
पगच्छतोऽपसिद्धान्तापत्तेः । कथाया अभेदोऽप्यभिमत इति

चेत्तर्हि यस्यां कथायां येन वादिना यद्दर्शनमाश्रितं तस्यामेव कथायां तेनैव वादिना तद्विपरीताभ्युपगमोपसिद्धान्तः। यद्वा येन वादिना यस्यां कथायां योर्थः सामान्याकारेण यथाभ्युपगतः तेनैव वादिना तस्यामेव कथायां तद्वस्तुनस्तद्विपरीताभ्युपगमोपसिद्धान्तः तथा चानुगतलक्षणाश्रयणेऽतिव्याप्तिः अननुगततदाश्रयणे त्वव्याप्तिरिति खण्डनम्। तदयुक्तम्। उभयथाप्यदोषात् तथाहि निग्रहस्थानत्वे सति सिद्धान्तविपरीताभ्युपगमस्यापसिद्धान्तत्वात् तेन चोक्तसकलदोषपरिहारात् लक्ष्याननुगमे लक्षणाननुगमस्यादोषत्वाच्च न ह्यपसिद्धान्तत्वं घटत्वादिवत्साधारणं किन्तु कथायामाश्रिततच्छास्त्रप्रकाराभ्युपगमविरुद्धाभ्युपगमः स च कथारम्भे बौद्धोहमित्युक्त्वा परेण क्षणभङ्गादौ दोषदेशनायां मास्तु क्षणभङ्ग इत्यादिरभ्युपगमः। ननु न शास्त्राश्रय एव विवादः पर्वतस्य वह्निमत्त्वादावपि तत्सम्भवात् तदाह।

रिक्तस्य जन्तोर्जातस्य गुणदोषमपश्यतः।
विलब्धा बत केनामी सिद्धान्तविषयग्रहाः॥

न हि शास्त्राश्रया वादा भवन्तीति तस्मान्नापसिद्धान्तो निग्रहस्थानमिति। मैवम्। बौद्धस्य क्षणभङ्गादिकं स्वशास्त्रोक्तं त्यजतोपसिद्धान्तोक्तथोपजीव्यविरोध एवोच्यते मीमांसकस्य श्रुतिविरोधवत् तथा चोपजीव्यविरोधोद्भावने न तदैव कथाविच्छित्तिः। न चायमुपजीव्यविरोधः शास्त्रविरोधप्रतिज्ञाविरोधव्याघातेषु मन्मतेषु त्रिष्वपि साधारण इति एवं वह्न्यनुमानेपि स्वाभ्युपेतप्रमाणविरुद्धाङ्गीकारेपसिद्धान्तापरनामोपजीव्यविरोध एवेति तस्मादेवमादीन्यसम्यञ्चि खण्डनानि प्रपञ्चयन् भवान्

केवलमन्वीक्षायामनधीतीत्यवधार्यते किं तर्हि तन्मात्र एवेति एवं निग्रहस्थानान्तरखण्डनान्यपि निराकरणीयानि ॥

इति श्रीवाचस्पतिमिश्रकृते खण्डनोद्धारे निग्रहस्थानखण्डनोद्धारो नाम द्वितीयः परिच्छेदः ॥

Digitized by Google

सर्वनाम्नः खण्डयिष्यता ईश्वरसद्भावे किं प्रमाणमिति तावत्तदवतारितम् अत्र च विकल्पकल्पना न युक्ता प्रकरणेन प्रश्नार्थताया एवावधारणात् किञ्चेदृशः प्रश्न एव न सम्भवतीतीश्वरमन्तुस्तदभिज्ञतया प्रश्नायोगात् तदमन्तुश्चेश्वरासत्त्वाभ्युपगमेन तद्विषयकप्रमाणप्रश्नानुपपत्तेः तस्मात्सर्वभुवनादेरुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वे किं प्रमाणमिति प्रष्टुर्महतीति अयमेव प्रश्नस्तत्परः तथा च प्रमाणपदं यद्विशेषपरमुत्तरेपि तथैव तद्विशेषपरमस्तु तथा च प्रमाणमित्येवोत्तरं घटतामेवं सर्वत्र प्रश्ने खण्डनमूहनीयमिति चेत् । धिङ्मूर्ख उक्तरीत्यापि किं पचतीत्यादेः प्रश्नस्याखण्डनात् न हि किं प्रमाणमितिवत् किं पचतीत्यत्रापि किञ्चिदुत्तरं त्वादृशा घटते विना कर्त्रायमित्यादेः किमः प्रश्नमात्रपरत्वेन प्रवृत्त्यानभिधायकत्वात् । भावनानवरुद्धप्रश्न एवायं मया खण्ड्यत इति चेत् । अनेन खण्डनकृता सुरा पीता न वेत्यत्र भावनानवरुद्धेपि प्रश्ने त्वदुक्तखण्डनाप्रवृत्तेः तिङन्तानुपसन्धाने यः सुबन्तानुप्रश्नस्तमेव खण्डयामीति चेन्न । दक्षदीधितिमतानुसारेणासम्भवात् । यत्रान्यत्क्रियापदं नास्ति तत्रास्तिर्भवतीत्यपरः प्रयोक्तव्य इति तद्वचनात् न्यायतत्त्वानुसारेणैव सुबन्तानुप्रश्नखण्डने प्रवृत्ते अत्र च तत्त्वे वाक्ये न तिङन्तप्रयोगनियमः काञ्च्यामिदानीं त्रिभुवनतिलको राजेत्यादिवाक्यस्य न्यायप्रथमाध्याये दर्शनात् एवञ्च किं प्रमाणं केन प्रमाणेन कस्मै प्रमाणाय कस्मात्प्रमाणात् कस्य प्रमाणस्य कस्मिन्प्रमाणे इत्येवंरूपषड्विधविभक्त्यवरुद्धसुबन्तप्रश्नार्थ एव मया खण्ड्यते इति चेत् साधु वेदान्ताध्वा समन्वितः तथाहि किं स्विद्धिमस्य भेषजमिति प्रश्नोत्तरप्रश्ने अग्निर्हिमस्य भेषजमिति श्रौतमनुसरन्त्वन्मतेनालम्भ्क

स्यात् भेषजमेवोत्तरन्त्वद्दिशा घटेत श्रुतयो विशृङ्खला एवेति चेत्। त्यज तर्हि श्रुतितात्पर्यमात्रसाक्षिके ब्रह्मणि विश्वासम् अधोऽव मध्यमागमं सेवस्व सत्त्वशून्यतावादमिति। नन्वस्त्वेतद्यथा तथा उत्तरवत्प्रश्नखण्डने य उदारस्तं प्रब्रूहीति चेत्। ब्रूमः। किं प्रमाणमिति प्रष्टा वैजात्येन प्रमाणमित्युत्तरे कृतेपि तावन्न निर्वृणोति यावत्प्रत्यक्षमनुमानं वेति न शृणोति तत्कस्य हेतोः प्रमाणमित्युत्तरमाकर्ण्यापि स्वजिज्ञासितममुं प्रमाणविशेषरूपं न प्रापेति गम्यते प्रश्नस्थेन प्रमाणपदेन प्रमाणत्वेन रूपेण यथा प्रमाणविशेष उपस्थाप्यते अन्यथा किमालम्बनः प्रश्नः स्यात् तथा उत्तरस्थेन तु तेन पदेन प्रमाणत्वेन रूपेण प्रमाण उपस्थाप्यते। अत्रैव सङ्ग्रहश्लोकौ।

यथाविधं यं विषयं निजस्य प्रश्नस्य निर्वक्ति परो ययोक्त्या।
वाच्यस्तथैवोत्तरवादिनापि तयैव वाचा स तथाविधोऽर्थः॥
प्रश्नस्य यः स्याद्विषयः स वाच्यो वाचानया चैष भवेन्निरुक्तः। इदं त्वयाप्यास्थितमेतयैव वाचा स्वपृच्छाविषयस्य वक्त्रा॥ इति।

अत्र ब्रूमः। सामान्येन प्रकारेण विशेषमतिरस्कुर्वन् विवेक्तो तावद्विवेकिनं पृच्छति विवेक्तो तु स्वविवेचितविशेषं प्रष्टुं प्रतिबिम्बयिष्यन्ननपेक्षितविशेषं तिरस्कुर्वन्नपेक्षितं पुरस्कुर्वन् शृङ्गग्राहितया तं विशेषमाह प्रत्यक्षमित्यनुमानमित्यादि। एवञ्च प्रश्नविषये समदृशः सामान्यप्रकारकोऽतिरस्कृतकिञ्चिद्विशेषः किं प्रमाणमित्यादिः प्रश्नो युज्यते उत्तरयितुस्तद्विशेषेषु विषमदृशो विवेकिनोऽभिमतविशेषमात्रप्रत्यापिपयिषोः शृङ्गग्राहिकानिर्देशमन्तरेण न निस्तारः प्रष्टुर्जिज्ञासापनोदिका हि विशेषप्रकारिका धीः सा नान्यथा सम्भवतीति। एवञ्च गाथाद्वयं विशेषादर्शन-

घोनीति विग्रहः । अथ तनुभुवनादेरुपादानाभिज्ञजन्यत्वे किं प्रमाणमिति प्रमाणविशेषप्रश्नस्तज्जिज्ञासाविष्करण-रूपः तज्जिज्ञासा च तत्सामान्यज्ञानपूर्विका तच्च ज्ञानं यदि प्रमारूपं मन्यसे तदेश्वरप्रमा तद्विषयभूतश्चेश्वरस्त्वया प्रमित एव किं पृच्छसि अथाप्रमाभूतं ब्रूषे तदा किं पृच्छसि न ह्यप्रमालिङ्गितस्य स्वरूपं पृच्छ्यते तस्य निः-स्वरूपत्वात् अथ प्रमाप्रमौदास्येन तज्ज्ञात्वा तत्स्वरूपं पृच्छसि भवत्वेवं तदपि प्रत्येकं कोट्योर्दूषितत्वात् किम-धिकमस्ति अथ संशयानः पृच्छसि तदा शिष्योसि न तु वादी अथाचिक्षिप्सुः पृच्छसि तदा पूर्वोक्तं निश्चयपक्षं नातिवर्तसे इति । अत्रोच्यते । तनुभुवनादेः कर्तृजन्यत्व-विषयत्वे च प्रमात्वं तावन्मन्यसे इति न्यायमतमनूद्य स्वयं तत्प्रामाण्याप्रामाण्यौदास्यमालम्ब्य तत्र किं कार-णमित्याचिक्षिप्सोः प्रश्नस्तत्तद्दोषग्रासात् किमपि करणं न भविष्यतीति प्रष्टुर्भावः एवं सर्वत्र प्रश्ने नेयम् ॥

इति श्रीवाचस्पतिमिश्रकृते खण्डनोद्धारे सर्वनामखण्डनोद्धारो नाम तृतीयः परिच्छेदः ॥

तदयं संक्षेपः। किमस्तावज्जिज्ञासाविष्करणमर्थः किं स्विदेकाकी चरतीत्यादौ क्वचित्स एवाक्षेपगर्भः क्षित्यादेः कर्तृजन्यत्वे किं प्रमाणमित्यादौ क्वचिदाक्षेपो यथा मयि विरोधिनि सति कस्ते शरणमित्यादौ क्वचिन्निन्दा यथा किं तेनाङ्घ्रियुगेन येन नगरी न प्रापि वाराणसीत्यादौ क्वचित् विकल्पः यथा हृतात्मा किमयं दिवाकर इत्यादौ। यदादीनान्तु सप्तानां धर्मिण्येव शक्तिः प्रस्तुतत्वादिकन्तु पङ्कजसमुदाये पद्मत्वादिवत्प्रयोगोपाधिः धेनुपदे गोत्ववच्छत्त्युपाधिर्वेति तथाहि प्रस्तुतत्वं तटस्थीकृत्य यच्छब्दो धर्मिणि वर्तते एवं तच्छब्दोपीति। एवमिदमेतदादौ प्रत्यक्षज्ञानविषयत्वम् अदःशब्दे तु परोक्षज्ञानविषयत्वम् अत एवोभौ लोकौ सञ्चरसि इमञ्चामुञ्च देवलकेति शाब्दिकाः। एवं युष्मच्छब्दः सम्बोध्यात्मनि अस्मच्छब्दः स्वतन्त्रवक्त्रात्मनि स्वातन्त्र्यग्रहणात् वाच्यस्त्वया मद्वचनात्स राजेत्यादौ कविरेव नास्मच्छब्दवाच्योऽनुवादकत्वेन स्वातन्त्र्याभावादिति। ननु विरमतु प्रश्नखण्डनं सिध्यतु चात्र भवान् उपनिषत्तात्पर्यमर्यादानिविष्टो भवान् तथापि तं भावमूर्तं मन्यसे तत्र किमिदं भावत्वं नाम। न तावद्द्रव्यादिषट्कान्यतमत्वम् अनुगताननतिप्रसक्तैकरूपाभावे आदिपदाप्रवृत्तेः तद्भावे च तस्यैव भावस्य वचनौचित्यात् किञ्च यत्किञ्चिद्भावत्वं ब्रूषे तद्भावत्वेऽस्ति न वा आद्ये स्वात्मनि वृत्तिविरोधः अन्त्ये भावत्वस्य धर्मभूतस्यान्यनिषेधमुखेनाप्रतीयमानस्यापि भावत्वराहित्ये घटादेर्भावत्वे का प्रत्याशा। भगवतो भावत्वं माभूदिति चेत्तर्ह्यभावत्वं प्राप्तम्। अस्त्वेवमिति चेत्। किमिदमभावत्वं नाम भावनिषेधत्वं कश्चिद्धि निषेधो भावस्य यथा घटो नेति आद्योऽभावः भावप्र-

तिक्षेपणात् द्वितीयस्तु भावः अभावप्रतिक्षेपणात् । तदुक्तं अभावस्य तु योऽभावो भाव एवावशिष्यत इति चेत् । निषेध इति कोऽर्थः अभावो वा विरोधी वा । अत्राद्ये एवं हि भावस्य निषेध इत्यस्य भावस्याभाव इति स्यात् तत्रा-प्यभावो भावनिषेध इति स्यात् अत्रापि निषेधपदस्या-भाव इति विवृतौ पुनर्भावप्रवेशे अभावनिरुक्तौ भावा-नन्त्यमापतेदिति नायं पन्थाः । अन्त्ये गोत्वमप्येवमश्वत्व-स्याभाव इति स्यात् तत्राप्येकेनापरस्य विरोधात् । अन-योर्भावयोर्विरोधेपि भावत्वेनोपस्थितस्य भावस्य विरो-धिता नास्ति अभाव इत्यस्य तु सास्ति स्वभाव इति भावनिषेधनादिति चेत् । तर्हि भावविरोधी भावत्वेनोप-स्थितस्य निषेध इति निर्गलितम् अत्राद्यकल्पोर्थग्रास इति । अत्राहुः । त्रिविधा हि पदार्थास्तत्र द्रव्यगुणकर्मणां सत्ता च तद्धीश्च सामान्यविशेषसमवायानां तद्धीरेव अभावाना-न्तु चतुर्णामभावत्वेन सत्तासम्बन्धभानविरोधिना प्रकारे-णोपस्थितानां तद्धीरपि नास्ति विशेषदर्शने भ्रमानुदयात् । एवञ्च सत्तासम्बन्धभानविरोधिप्रकारवत्ता अभावानां तच्छून्यता तु भावानामिति । यद्वा सत्तावत्त्वप्रतीतिविष-यत्वं भावत्वम् एवं भावाभावाभावोभयेपि लक्षिताः । य-द्वानुपलब्धिकरणकप्रतीतिविषयत्वमभावत्वम् अतीन्द्रिय-स्याप्यभावस्य ज्ञातानुपलब्धिकरणकप्रतीतिविषयत्वात् । एवमनुपलब्धिकरणकप्रत्यक्षाविषयत्वं भावत्वं घटाभावा-भावत्वेनापि घटस्य या धीः सापि घटत्वेनैव घटाभावा-भावत्ववाक्येनापि घटत्वस्यैवोक्तेः वायुर्नीरूप इत्यत्र ज्ञातानुपलब्धिकरणिकायामनुमितौ यद्यपि वायुरपि प्रकास्ति तथाप्यनुमितिः सर्वैव पक्षेनुवादः साध्यमात्रे तु विधिरिति न वायोरप्यनुपलब्धत्वेनाभावत्वापत्तिः

भावत्वमुपदेशसहकृतेन्द्रियवेद्यत्वं रत्नेतरत्ववत् अभावत्वन्तु स्वरूपत एव योग्यं घटाभाव इत्यादिरूपेण चक्षुःपातेन प्रतीतेः ॥

ननु सर्वमिदं लक्षणजातं विशिष्टमिष्टं भवतः तत्र किं विशिष्टं नाम । न तावद्विशेषणविशेष्यतत्सम्बन्धेभ्यो भिन्नं तवापसिद्धान्तप्रसङ्गात् नापि तच्चितयात्मकं प्रत्येकं विशिष्टव्यवहारापत्तेः नापि समुदितं तत्त्रयं विशिष्टं तर्हि तेषु त्रिषु चतुर्थः समुदायः परं प्रवेशितो न तु विशिष्टोऽतिरेचितः तथा च प्रत्येकं प्रसङ्गस्तदवस्थ एव त्वया विशिष्टस्यानन्यत्वाभ्युपगमात् । चतुर्णामपि समुदायोपेक्षित इति चेत्तर्ह्यतिप्रसङ्गः पूर्ववदेव अनवस्था चाधिकेति । अत्राहुः । अनेन विशिष्टखण्डनेन स्वकर्तुर्ज्ञानाविशिष्टत्वमुदटङ्कीति स्तनन्धयैरपि निरटङ्कि । ननु विशिष्टं विशेषणविशेष्यसम्बन्ध इति सत्यं तच्च न विशिष्टव्यवहारहेतुकं व्यवहारस्य व्यवहर्तव्याजन्यत्वात् किन्तु तज्ज्ञानं तथा तदपि त्रितयग्राहितया समूहालम्बनाविशिष्टमिति समूहालम्बनादपि विशिष्टव्यवहार आपद्येतेति महेशानार्थ इति । चेत् । नूनं भ्रान्तोसि न त्रितयग्राहितामात्रेण समूहालम्बनमपि विशिष्टव्यवहारकमन्वये विशिष्टज्ञानं हि तथा तत्किं समूहालम्बनं विशिष्टस्य ज्ञानं न भवति भवति न तु विशिष्टं ज्ञानं तत्कस्य हेतोः सामग्रीभेदादिति ब्रूमः । समूहालम्बने हि दण्डपुरुषतत्सम्बन्धैः सममिन्द्रियसन्निकर्षस्तथा दण्डत्वपुरुषत्वतत्सम्बन्धानां ज्ञानसंसर्गाग्रहश्चेति सामग्री विशिष्टज्ञाने तु दण्डात्मकविशेषणज्ञानं पुरुषदण्डसन्निकर्षाभ्यां सहेन्द्रियसन्निकर्षः सामग्री तथा चार्थभेदेन सामग्रीवैलक्षण्यात् विशिष्टज्ञानं विलक्षणमुदेति तदेव विशिष्टव्यव-

हारकत्वं यथा भूतले घटाभावो घटाभाववद्भूतलमिति ईदृशञ्च विशिष्टतद्धीव्यवहारव्यवस्थितौ यद्विशिष्टलक्षणं सोयमवोधस्य विवर्तः परिणामो वेति ॥

इयता प्रबन्धेन कथाङ्गत्वाभिमतानि निग्रहस्थानानि नैयायिकानुमतानि तथा सर्वव्यवहाराङ्गीभूतानि सर्वानुमतानि सर्वप्रमाणानि तथा सर्वाणि विशेषणानि च स्वाभिमतानेन दूषयित्वा सम्प्रति वैशेषिकमतं खण्डयितुमवतारयति गुणवद्द्रव्यमिति गुणवत्त्वं द्रव्यलक्षणमुक्तम् । तथायुक्तम् । गुणादीनां षण्णामपि संख्यारूपगुणप्रतीत्या बाधकाभावाच्च प्रमाभूतया गुणवत्त्वसिद्धावतिव्यापकत्वादिति । तदसत् । सामान्यादीनां सम्प्रत्ययवद्गुणानां रूपादीनां संख्यादिप्रत्ययस्यौपचारिकत्वात् । उभावपि प्रत्ययौ प्रमे एव बाधकाभावादिति चेत् । गुणस्यापि गुणवत्त्वे सामान्यस्य सामान्यवत्त्वे अनवस्थाया एव बाधकत्वात् उत्तरधारायाश्चाप्रामाणिकत्वेनानवस्थाया दोषत्वात् । रूपादीनां गुणवत्त्वे प्रमाणं नास्तीति चेत्तर्हि संख्यादावप्येवमस्तु । अस्तु का नो हानिरिति चेद्गुणवत्त्वे द्रव्यलक्षणे गुणादावतिव्याप्तिहानिरेव त्वद्धानिस्त्वद्दिशा तदुक्तम् । मम तु द्रव्यगुणादि किञ्चिदपि नानुमतमिति चेत् । तर्हि तन्मतेऽवस्थादिग्राहि(१) दौ गुणवत्त्वं नास्तीति गृहाण । एवञ्च सत्तासंख्ययोः प्रत्यये समेपि सत्ता सिध्यत्यबाधात्संख्या तु नास्ति बाधादिति । वस्तुतस्तु नवापि द्रव्याणि स्वसमवेतं कार्यमारभन्ते न त्वन्यानि तथा चामीषां समवायिकारणतावच्छेदकमेकमनुगतमनतिप्रसक्तमेष्टव्यं तदेव च द्रव्यत्वमतस्तदेव नवानां लक्षणं जातित्वादख-

(१) मत्पार्श्वस्थपुस्तकद्वयेऽपि कश्चिदंशो निपतितः ।

ण्डत्वेन लाघवात् न तु गुणवत्त्वमुपाधित्वेन सखण्डतया गौरवात् किन्तु गुणवत्त्वं तस्य व्यञ्जकमात्रं गोत्वस्य सास्नावत्त्ववत् । ननु गुणवत्त्वं भवतु द्रव्यत्वव्यञ्जकं तथापि गुणत्वासिद्धौ तदप्यसिद्धमिति तदवश्यं वाच्यमिति चेत् । गुणत्वं जातिरेव । गुणत्वमसिद्धं गोत्वादिवदप्रतीतेरिति चेदत्राहुः । गुणकर्मणी तावद्द्रव्याश्रिते तत्र कर्मापि गुण एव वैलक्षण्याभावादिति भूषणः । तदयुक्तम् । कर्मणां हि परस्परविरुद्धसंयोगविभागलक्षणकार्यद्वयकारित्वं न गुणानान्तथेति पञ्चानामपि कर्मणामेकं कर्मत्वं तदभिव्यञ्ज्यं गुणानां चतुर्विंशतेरप्यविरुद्धकार्यकारितया चतुर्विंशतेरपि गुणत्वमेकं तदेवाखण्डत्वेन लाघवाल्लक्षणं तद्व्यञ्जकन्तु सामान्यवान् चलनात्मकः समवायिकारणताहीनो गुण इत्यादीति । द्रव्यकर्मणोस्तु विरुद्धकार्यकारित्वेऽप्यनपेक्षितत्कारिता कर्मणामिति तद्व्यवस्थापकं कर्मत्वमिति द्रष्टव्यम् ॥

सामान्यवानित्यत्र किं सामान्यम् । जातिरिति यदि केयं जातिः नित्यत्वे सत्यनेकसमवेतेति विद्धि अनेकसमवेतोऽप्यवयव्यादिर्न नित्यः नित्यश्च परमाणुस्नेहादिर्न त्वनेकसमवेतः । अथ महाप्रलये सर्वेषामनित्यानामभावात्तन्निष्ठा जातयो नित्यानेकसमवेतत्वं स्वलक्षणं त्यजन्तीति चेत् । किं नश्छिन्नं यावन्तं कालं लक्षणाधीनो व्यवहारस्तावन्तं कालं लक्ष्यात्यागादेव लक्षणं एवमनुगतधीकारणत्वम् । न च सामग्र्यामतिव्याप्तिः तस्या अकारणत्वात् नापि तदन्तर्गतेषु सा तेषां तत्राप्रधानत्वात् तेनानुगतमतिप्रधानकारणत्वं जातिलक्षणं न च महाप्रलये लक्षणासिद्धिर्दोषाय तदेतरव्यवच्छित्तेरसाधनेन लक्षणसिद्धेर्निर्बीजत्वात् अत

Digitized by Google

Text 84.—*The process whereby the colour &c. are produced in the atom of Earth by baking is as follows:—When the unbaked jar and such other things are put into contact with fire, the strokes of the fire, or the motion given rise to (by it) bring about certain actions among the atoms composing that jar.*

These actions bring about disjunctions. (VII—ii—10).

From these disjunctions proceed destructions of conjunctions (IX—i—2.)

These destructions of the conjunction of component atoms bring about the disruption of the composite substance (jar.) On the destruction of the composite substance, the dark colour of the atoms rent asunder becomes destroyed by the contact of fire by the aid of its heat.

[Page 107]. *Further contact of those same atoms with fire, aided by its heat, produces, in those atoms, the colour which is said to be produced by baking.* (VII—i—6.)

After this. the contact of the selves with these atoms, as aided by the adṛiṣṭa (destiny) of the selves destined to experience (the effects of the jar), produces action in the atoms in which the colour has been produced by baking. This action brings about the conjunction of the atoms; and from this conjunction proceed all the composite substances from the Diad downwards.

In these component substances, the qualities of Colour &c. are produced in accordance with like qualities in the cause (component atoms). (VII—i—6, 7).

The destruction of the Colour &c., or their production, cannot take place in the composite substance itself; as (without disruption) the fire cannot pervade over the whole of the substance, over all its component particles inside and out. Nor would pervasion by fire be possible by its entering into the atoms; as this would mean the disruption or destruction of the component substance. (IV—iii).

Digitized by Google

Commentary.

The author now proceeds to explain the process by which the Colour &c. of the Earth-atom are produced and destroyed. Though the 'Earth' itself is nothing apart from the atoms, yet the atoms are called 'pārthiva' (of the earth), as compared with the composite earthy substances (which alone are here intended to be called '*prithivī*', 'Earth'); the expression 'atom of Earth' would thus be explained as the '*atoms which are the cause of the Earth;*' and the author proceeds to explain the process whereby Colour &c. are produced in these atoms, by baking.

Objection:—"If such be the intention, then this would not "imply the presence of an intention to explain the process of the "destruction of certain colours—the dark colour of the unbaked jar for instance."

Reply: This is not right. This destruction also is implied in the 'process;' as what the author does is to explain the process which consists in the destruction of one set of qualities and the production of another set, by baking.

The jar and such other things—the 'other things' being Earthenware cups and saucers and so forth.

The fire-contact produces certain actions in the *component particles* of the jar,—and not in what is only in temporary contact with it, such for instance, as the water contained in the clay. As the 'component particles' of the jar are the atoms, it is these latter that are the cause (substrate) of the actions produced by the fire-contact.

By the strokes of fire or by the motion &c.—The Earth-atoms are struck by the fire, or are set in motion by it—as we shall explain under the section of 'Action' (Text, pp. 290-311.) *Thence follow disjunctions*; *from disjunction, the destruction of conjunctions or contacts*; *from whence proceeds the destruction of the composite substance.* That is to say, the actions set in among the atoms bring about disruption among them, which leads to the destruction of the *diad* and other composites. These

Digitized by Google

being destroyed, the atoms are rent asunder, the dark colour is destroyed, and the red colour produced by baking.—that this is so is proved by the fact that in all cases colour &c., are found to be produced in a substance only when it is not hampered by its effects,—*i.e.* when it exists in its own positive form. This argument may be thus formally expressed :—'The qualities of Colour &c. of the atoms are produced while they are in their non-composite state,—because they are such qualities as are *produced*,—like the colour of the yarns.' That the former colour is destroyed is proved by the appearance of another colour; it being a well-recognised fact that a substance that already has one colour, cannot have another colour produced in itself; the argument being formally stated thus :—'The red colour is not produced in substances which is already endowed with a colour, because it is a colour,—like the colour of the yarns.' The destruction of the former colour of the atoms being thus proved, the fire-contact, which was the cause of that destruction, still persists ; as it is only while this is present that the consequent destruction could take place ; none else being possible. But from this it should not be inferred that what was the cause of the destruction of one colour is also the cause of the production of another colour ; as in the case of the colour of the yarns, we find, as a matter of fact, that what produces the new colour is something entirely different from what destroyed the former colour. From this we conclude that the destruction of the colour of the atom is by something entirely different from what produces the other colour. The reasoning in support of this may be put in this form :—'The destruction and production of the colour in the atom cannot be due to the same cause,—because they are such destruction and production of colour,—like the destruction and production of the colour in yarns.'

After this &c. The persons to experience are those persons who would experience the pleasure and pain due to the production of the jar ; the '*adṛishṭa*' of those people are their merits and

demerits; these aid the action of the conjunction of the atoms with the selves of these persons, in bringing about certain actions among the atoms in whom the fresh colour &c. have been produced by fire-contact. These actions bring about the conjunction or aggregation of the atoms; and from the aggregation of atoms is formed the Diad; by the aggregation of three diads is formed the Triad; and so forth the composite substance, jar, is produced.

The colour &c. in this jar are produced in accordance with the colour &c. of the atoms composing it.—The colour of the two atoms producing the colour of the Diad; the colour of the two Diads the colour of the Triads and so on, is the colour &c. of the jar produced.

Number &c., are not produced by baking; as they are not of diverse character.

Objection: "We do not perceive any difference in the character of the various kinds of Touch either."

Reply: True; but still it is by Inference that we ascertain the fact of Touch being produced by baking;—as we have shown in the section on 'Earth;'

The conjunctive action in the atoms begins after the production of the qualities by baking, and not at the time of the destruction of the previous qualities; as it is only in a substance with colour that we find an action productive of another coloured substance; and hence the action of the atoms must be regarded as appearing only in coloured atoms,—because it is an action productive of a coloured thing,—like the action of the threads productive of such combinations as bring about the Cloth.

Question: "Why cannot you assume the fact of fire-contact bringing about the destruction and production of Colour &c., in the products themselves (and not in the constituent atoms)? For certainly in the case of the baking of the jar we distinctly see, when looking through a hole in the oven, that

Digitized by Google

the jar remains the same; and even after the baking, it is recognised to be the same jar that had been put into the fire."

[Page 109]. *Answer*: *Na ca &c.* The author proceeds to prove this: *Sarvāvayavēshu &c.* If the fire outside the object were to pervade over the object inhering as a whole in every one of its component parts,—then, in as much as there would be no contact pervading all over the object, there would be no certainty as to the production or destruction of the products; and hence there would be no baking of the inner particles; it is with this view that the author has added—*Sarvāvayavēshu* etc.

Objection: "All composite substances being porous, even if the fire could not enter inside the object, it could pervade over its atoms."

Reply: *Anupravesīdapi &c.* The atoms are not porous, (have no interstices), because they have no component parts; hence if the diad had interstices it would not be produced at all, as there could be no combination between the two atoms, if there were any interstice between them; and if the two atoms combine, then there could be no interstice between them. As it is only when two composite substances combine that there are interstices due to their combining in parts only; in the case of two non-composite substances, like two atoms, however, there could be no such thing. Then again, in a gross material substance we do not perceive any such interstices or pores; in the Triad alone there could then be such an interstice; and yet that too is not perceptible. Hence the assumption of the opponent proves to be much too complicated.

Thus then the jar having no interstice, the atoms of fire could not enter within these, until there were a disruption of the Earth-particles composing that jar.

In the case of a tangible object being struck by another tangible object, its component particles become disjoined, and in accordance with the process of disjunction &c., there appears

the destruction of that Conjunction which keeps the object in its composite state; and on this there inevitably follows the destruction of that object. And hence whence could there be any manifestation of it, by the entrance of the atoms? In all products, there is no other destruction of its properties of Colour &c., save in the destruction of the substances to which they belong; nor is there any production of these save out of like properties in the material causes of those products. For this same reason, we do not hold the destruction and production of Colour &c., to be due to the contact of the jar with fire. As the Colour &c., of the jar are destroyed by the destruction of the jar,—because they are such Colour &c., as belong to products,—like the Colour of the jar destroyed by a stroke of the stick; and similarly, the Colour &c., of the jar are produced from like qualities in the material cause of the jar,—because they are such Colour &c., as belong to products,—like the Colour &c., of the Cloth.

Then again, in the case of the jar we find that before baking its component particles are lose and disjointed,—and they become hardened after baking; nor is there coexistence possible, of *looseness* and *hardness*, like that of *pressure* and *urging*; as the two are mutual contradictions. Hence it must be admitted that the former composite object has been destroyed, and a new one produced in its place; and thus the previous substance having been destroyed, the new substance must be regarded as brought about by some cause. As for the baked jar being recognised to be the same as the unbaked one, this must be regarded as being due to their extreme similarity; just as in the case of the flame. Then as for the fact of the jar being always perceived as a complete whole, during the time that it is being baked,—this must be due to the fact of the jar being destroyed gradually; that is to say, the jar is not a mere aggregate of atoms; and as such it is not destroyed all at once, as soon as there is a disruption of the atoms; as a matter of fact it is

made up of atoms, through Triads and Diads &c.; and hence it is only after the numberless diads and triads have been destroyed, that the jar is destroyed; and hence so long as it has not been destroyed, there is a perception of it. Then again as the previous particles go on being destroyed, in their places there go on being produced other particles having the qualities produced by the baking; hence what we see during the time of baking, is the jar made up of baked and unbaked particles.

[**Page 110.**] At the same time that the previous composite object becomes destroyed by the destruction of the component particles,—there is a production of new component particles; and the former composite object having been destroyed, there is a production of a fresh composite object; and thus there would be a restriction of the substratum of the new object. That is to say, as many are the component particles of the previous object, so many are the particles entering into the constitution of the resultant object; and the magnitude and number of particles in the latter are the same as those of the former.

The process involved in this may be thus traced in its detail:— the (1) destruction of the Diad, (2) the destruction of the Triad; (3) the destruction of the Dark Colour (of the unbaked jar), (4) the production, in the active atom, of a disruption due to disjunction, (5) the production of the fire-contact productive of the red Colour,—all this forming one point of time;—then (6) the destruction of the Triad, (7) the destruction of the product of the Triad, (8) the production of the disruption due to disjunction, (9) the destruction of the conjunction, (10) the production of the fire-contact productive of the red Colour, (11) the production of the red Colour, and (12) the destruction of the fire-contact destructive of the Dark Colour,—these six forming another point of time;—then (13) there is the destruction of its product, (14) the destruction of the product of that product, (15) the production of the subsequent conjunction, (16) the pro-

duction of the red Colour &c., (17) the destruction of the fire-contact destructive of the Dark Colour, (18) the appearance in another atom, of the action productive of another object,—these six constituting another point of time; (19) then the destruction of its product, (20) the destruction of the product of this product, (21) the production of the subsequent conjunction, (22) the destruction of the action, the disjunction and the disruption produced by this disjunction, (23) the production, in the second atom, of the disjunction from *Âkâça*, (24) the destruction of the conjunction with that,—these six forming one point of time;—(25) then the destruction of its product, (26) the destruction of the product of this product, (27) the production of the subsequent conjunction of one atom with another, (28) the production of the Diad, (29) the destruction of the disjunction and the action, these five forming another point of time;—(30) then the destruction of its product, (31) the destruction of the product of that product, (32) the production of the Diad, (33) the production of the Colour &c., of the Diad, (34) the destruction of the disjunction and the action, (35) at the next moment, the production in the Diad of qualities in accordance with the qualities of its constituent atoms.

The same process may be applied to all the Diads composing an object. In the production of the Triad &c., we need not take into consideration any actions or operations ; as these are produced from combinations born of conjunctions, by the following process : many atoms combine with one another at one and the same time ; and thus the atom composing one Diad combines with that composing another Diad ; and one Diad comes into contact with the atom composing another Diad ; then there comes about the combination of two Diads, and so on.

All this we have explained as we have been taught, so far as we have been able to understand the process.

Digitized by Google

Page 111.] *Text* (85). *Number forms the basis of such usages as 'one' and the rest. It inheres in one and in many substances. The number inhering in one substance has its eternal and transient manifestations in the same manner as those of the colour &c. of the atom of water and the rest. The number inhering in many substances begins with 'Two' and ends with 'Parārdha'* (100,000,000,000,000,000). *This number proceeds from many unities as accompanied by the ideas of more than one object, and is destroyed by the disappearance of all distinctive notions (of one object as distinct from another). To explain: when the eye of the cognising person is in contact with two substances, be these either homogeneous or heterogeneous, then there arises a notion of unity subsisting in the quality of singleness which exists in each of the objects that are in contact with the Eye; and then there appears the single idea of the two singlenesses subsisting in the two objects,—this idea proceeding from the notions of the genus 'unity' and its relationships (to the objects in question). Then with regard to this idea, these two singlenesses bring about the Duality of their substrates; and with reference to this Duality, there appears the generic idea of 'Duality'. This generic idea of 'Duality' leads to the destruction of the distinctive notion (with regard to each of the two substances taken individually); and simultaneously with this destruction there appears the idea of the quality of Duality, proceeding from the generic 'duality', its relationship, and its cognition. Then the disappearance of the distinctive notions (of*

each of the substances) leads to the destruction of the quality of Duality; as the notion of the quality of Duality is the cause of the destruction of the generic idea of 'Duality'; and simultaneously with this destruction of the quality of Duality, there arises the idea of the substances, as 'two substances,' out of the quality of Duality, its cognition and its relationship. Then there arises the actual cognition of Substance, as 'two substances,' and the disappearance of Duality, which leads to the idea of Duality as a quality; and simultaneously with this there arises this impression out of the cognition of the Substance. Then from the cognition of the Substance there follows the destruction of the idea of Duality as quality; and that of the idea of Substance also, from the Impression (left by the previous conceptions).

Page 112] *The same process would also apply to the case of the notions of "three" and the rest. As these also proceed out of unities as accompanied by the idea of many substances; and disappear on the disappearance of the distinctive conception of each object.*

In certain cases these notions (of 'Duality' &c.) are destroyed by the destruction of the substrates themselves. To explain:—When a certain action has commenced in that particle which is the substratum of unity, and there arises a generic idea of 'unity', the said action serves to disjoin that particle from the other particle, whence there arises the distinctive idea (of each of the particles). Hence, at the very time that there is a destruction of Conjunction by the said Disjunction, there

appears Duality, and the destruction of Conjunction leads to the destruction of the object (as a whole), and the appearance of the generic idea. At the very time that the generic idea destroys the distinctive idea, it is only natural that there should be a destruction of Duality, on account of the destruction of its very substrate.

All this is quite compatible with the theory that whenever an idea appears it always destroys the idea that preceded it. In case however the incompatibility between two ideas consisted merely in the improbability of their coexistence, there would be no appearance of the cognition of the Substance. Because the distinctive idea having been destroyed simultaneously with the idea of quality, and leading to the destruction of Duality, there would be no possibility of any such cognition of Substance as 'two substances'.

Objection: "As in the case of inferential cognition, so here also (we would have the cognition of the substance) from mere cognition. That is to say, it has been explained under the Sūtra 'Abhūtam bhūtasya' (III-i-II) that in certain cases we have inferential knowledge, even in the absence of a definite Middle Term, from mere cognition; in the same manner, in the case in question, even though the quality (Duality) may have been destroyed, yet from the mere cognition of that quality there would proceed the cognition of the Substance (as 'two substances')."

Reply: Not so; because the cognition in question is of the Substance as qualified (by Duality); and in as much as the qualification enters into the very

essence of the qualified object, there could be no cognition of the latter without some connection with the qualification. This is what has been declared by the author of the sūtra, under VIII-i-9: 'The cognition of the white object proceeds from the cognition of the whiteness inhering in that object; and these same stand in the relation of cause and effect.' The case of inferential knowledge is different, as in that the knowledge produced is not such as makes the subject of the conclusion identical (with the mark or Middle Term). It cannot be argued that at the time of the cognition of the substance there is no actual destruction of the idea of the quality (of duality) because of extremely quick appearance. That is to say, just as in the case of the notion 'the Ākāça (1) is endowed (2) with sound (3)' we find three distinct cognitions appearing quickly one after the other, so could it as reasonably be in the case of the appearance of the cognition of Duality &c., (i. e., in the cognition 'two substances,' the idea of 'substance' appears after that of 'two' has disappeared; but it appears so quickly upon the wake of the other, that the sequence is scarcely perceptible, and gives rise to the idea that the two are simultaneous).

Objection: *"The objection that you bring forward would apply equally in the case of your own theory of one cognition destroying another. That is to say, in that case also, there would be no cognition of the Substance. Because simultaneously with the generic idea of 'duality,' there appears the Impression, which destroys all distinctive idea."*

Reply: *Not so; because what brings about the impression is the collective post-cognition (of all the factors concerned) and not the mere perceptive cognition (which alone is held to disappear as soon as it is produced). Consequently the said objection (of the impossibility of the cognition of Substance) cannot apply to our theory.*

Objection: *"In that case there would be a simultaneity of cognitions, if the incompatibility of cognitions consisted in the fact of one of them being the destoyer of another."*

Reply: *Not so; because what is denied by the Sūtra 'jñānāyaugapadyāt') is the possibility of the simultaneous existence of two such cognitions as donot destroy each other; that is to say, what is denied is the idea that two cognitions can appear simultaneously and that they can coexist, without the one destroying the other; and in the case of the theory of one cognition being the destroyer of another, there is no possibility either of the simultaneous appearance of two cognitions, or of the coexistenee of these, without the one destroying the other. (Hence this theory is quite in keeping with the declaration of the 'non-simultaneity of cognitions').*

Commentary.

Though the form and existence of Number are well-known, yet there are some people whose intellects are clouded by utterly mistaken views, and who deny its existence. And it is with a view to these that the author says *ékádi &c.*, '*Vyavahāra*' may be taken as equivalent to '*vyavahṛti*', 'Use' 'knowledge of what is to be known;' and it may also be taken as '*vyavahriyate anéna,*' 'that by means of which usage is carried on,' *i. e.*, the word expressing the idea. Hence

Digitized by Google

the word '*Ekīdivyavahāra*' would mean the idea or knowledge as well as the words, of '*éka*', 'one' and the rest; and the basis of this is what is called 'number.' The argument may be thus stated: The idea of 'one' &c, is due to a qualification, because it is a qualified idea, like the idea of 'the man with the stick.' In the same manner, we can substitute 'word' for 'idea' in this same argument; and the reason would be stated in the form 'because it is a qualified word.'

Objection:—"The ideas in question are only ideas of Colour and such other properties, (and not of any distinct quality in the shape of Number)."

Reply:—Not so; because the ideas of 'one' &c., are found to be totally different from those of Colour &c. That is to say; the ideas of Colour are in the forms of 'blue,' 'yellow' &c., and not in those of 'one,' 'two' &c.

Objection:—"Then we may regard these ideas to have no corresponding substratum; and we donot know of any objects apart from these, Colour &c.

Page 114.] *Reply*:—We ask—Whence then come the specific forms of 'one' 'two' &c., ?

Objection:—"They are due to the fruition of the *Vāsaanā* (Tendencies or Impressions) encased in the *Alayavijnāns*, or Receptive Consciousness of the person having those ideas."

Reply:—In that case we may attribute the ideas of 'Blue' &c., also to the same source; for we do not perceive any difference between the *blue, yellow* &c., on the one hand, and one,' two' &c., on the other,—as forming objects of cognition; and hence we can have no grounds for believing the one to be based upon a real substratum, and the other to have no such substratum.

Objection:—"There is this difference between the two: While the form of 'blue' is real, that of 'number' is unreal and mistaken."

Reply :—There is not much in this argument; as there are no grounds for believing the form of *blue* also to be real; as there can be no corroboration of any such idea; as that particular form belongs (according to you) to that idea alone, and lasts a single moment (and as such it does not stay long enough to be corroborated). For the same reason, no effective action could belong to such a form. Nor do we ever recognise any similarity between the form of one idea which is restricted to that idea alone, and those of other ideas; and hence it is not possible to have the necessary corroboration based upon such similarity; specially as in all cases we donot always perceive similar forms; there are many instances of our perceiving forms that are not similar at all.

Nor again, can the unmistaken character of 'form of blue' be said to be due to its being born of an 'object'; because so long as the object itself is not duly cognised, there can be no certainty of its being born of an 'object'; and if the object were to be cognised by other means of knowledge, then the assumption of a 'form' from another source would be absolutely useless; and if the object were held to be established from the cognition of the 'form' alone, then, in that case, the object could be accomplished on the strength of the cognition of the unmistaken form, and the fact of this cognition being born of or based upon the object would be dependent upon the accomplishment of the 'object,'—and this would involve a most undesirable interdependence.

As for *not being set aside*, this belongs to the *blue-form*, as well as to the *form of number, as imprinted upon the cognition.* Any *setting aside* would be impossible, as regards the object itself (this setting aside being of the cognition alone); and as such it could never be conceived of with regard to the *blue colour* itself, as all such Colours are very far removed from the cognition,—between which and the Colour there is the intervening *form* (of the Colour). Hence it is

that in all cases what is cognised is one *form* (or shape). And because any one cognition might be found to have originated from a *non-object* (*i. e.*, an object having no real existence) it does not necessarily follow that all other cognitions are the same. Thus then the real existence of the Blue &c., could not be proved.

Objection :—"There being no external object, the fruition, or development, of the tendencies (*bhāvanā*) would be dependent solely upon their own series (*santāna*) ; and as such there would be no restriction as to their appearence only at certain times, and not at all times ; and hence the *blue-form* itself which (according to the Idealist) depends upon these same developments (in the form of cognitions), would not have any such restriction ; and this would justify the assumption of the Blue &c."

Reply :—If the forms of *one, two* &c., did not depend upon external objects, there could be no restriction as to their being cognised only at certain times ; and hence it would be necessary to assume the existence of Number also ; as the reasons for such assumption in this case are exactly the same as those in the case of *Blue* &c.

Some people have held that Number has no existence apart from Substances. But this is not right. Because in the case of a number of trees close to one another, seen from a distance,—even though their *oneness* &c., are not perceived,—their shape is distinctly preceived (and Number is nothing different from these *shapes perceived as distinct*). It would also be perceived along with a real existence. This same argument would also prove the fact of Number being something distinct from the Substance ; even when we cannot see the *Colour*, we distinctly see the *object* as a *substance.*

The form of Number having thus been proved to have a real existence, the author proceeds to describe its various kinds *Sā punah &c.* '*Ekadravya*' is that number which in-

Digitized by Google

श्रीगणेशाय नमः ॥

व्याकरणदीपिका ।

श्रीरम्भट्टविरचिता ।

सर्वारम्भेषु यन्नित्यं श्रीशाद्यैरपि पूज्यते ।
गुरुरूपं गणेशाख्यं धाम तच्चिन्तयामहे ॥ १ ॥
भवानीशङ्करौ सर्वप्रपञ्चपितरौ नुमः ।
सदसद्रूपतातीतौ लीलाधृततनुविग्रहौ ॥ २ ॥
यत्कृपाङ्कुशघातेन निरस्ता वादिवारणाः ।
न शक्ताः पुरतः स्थातुं वाग्देवीं समुपास्महे ताम् ॥३॥
निर्मिता पाणिनीयव्याकरणस्य प्रदीपिका ।
श्रीरम्भट्टेन विदुषा सारेणाज्येन पूरिता ॥ ४ ॥
यस्या अध्यायरूपेषु कोष्ठेष्वष्टसु दीपिताः ।
चतस्रो वर्तयः पादाः प्रत्येकं सूत्रवर्तिताः ॥ ५ ॥
सुधीरत्नशलाकाभिर्यथेष्टं परिबृंहिताः ।
भक्त्यार्पिता सा शिवयोर्भूयाद्बुधमुदे चिरम् ॥ ६ ॥
सन्ति यद्यपि भूयांसो निबन्धाः प्राक्तना इह ।
तथाप्यस्य रहस्यन्तु सुधियो ज्ञातुमीशते ॥ ७ ॥

अथ शब्दानुशासनम् । केषां शब्दानाम् । लौकिकानां वैदिकानाञ्च । कथमनुशासनम् । प्रकृत्यादिविभागकल्पनया सामान्यविशेषवता लक्षणेन ॥

अइउण् । ऋलृक् । एओङ् । ऐऔच् । हयव-

रट्। लण्। ञमङणनम्। झभञ्। घढधष्। जब-
गडदश्। खफछठथचटतव्। कपय्। शषसर्। हल्।

इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि। संज्ञाश्च लाघ-
वेन शास्त्रप्रवृत्त्यर्थाः। एषामन्त्या इतः। लण्सूत्रेऽकारश्च। तेनो-
रण्रपर इत्यत्र तेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा। प्रत्याहारे-
ष्वितां न ग्रहणम्। अनुनासिक इत्यादिनिर्देशात्। न ह्यत्र ककारे
परेऽच् कार्यं दृश्यते। आदिरन्त्येनेत्येतत्सूत्रेण कृताः संज्ञाः प्रत्या-
हारशब्देन व्यवह्रियन्ते। हकारादिष्वकार उच्चारणार्थः। संवृताका-
रस्य यथा विवृताकारादिभिः सावर्ण्यं तथा तुल्यास्यसूत्रेऽभिधा-
स्यते। ऌकारोपदेशस्य प्रयोजनन्तु ऌतक इति प्रयोक्तव्ये शक्तिवैक-
ल्यात्कुमार्या ऌतक इत्यसाधुः प्रयुक्तस्तमन्योऽनुकरोति कुमार्य्ऌतक
इत्याहेति। न च प्रकृतिवदनुकरणमित्यसाधुतातिदेशः। अशा-
स्त्रीयस्यातिदेशायोगात्। कृपोरोलः प्रकॢप्त इत्यत्र प्लुतद्विर्वचनस्वरि-
तास्तु न प्रयोजनम्। ऋकारे रेफभागस्य लत्वे कृते स एव ऌकार
इति प्रत्यभिज्ञानादेकदेशविकृतन्यायेन सिद्धेः। अर्द्धविकारे न्याया-
प्रवृत्तिस्त्वप्रामाणिकी। अत्रेत्र भाष्ये सञ्चारितत्वात्। अथाप्यनृत इति
प्रतिषेधः कस्मान्न भवति। एवं तर्हि ऌकारोपदेश एव ऋकारऌ-
कारयोः सावर्ण्यस्यैकदेशविकृतन्यायस्य चानित्यतां ज्ञापयन् चरि-
तार्थो नान्यथा। ग्रहणकशास्त्रेणाकारादिभिराकारादीनामिव ऋका-
रेण प्राप्तत्वात्तद्ग्रहणस्य। ऋऌक्सूत्रशेषे भाष्ये “स एष सूत्रभेदेन
ऌकारोपदेशः प्लुत्याद्यर्थः सन् प्रत्याख्यायते” इत्यत्र प्लुत्याद्यर्थ
इत्यस्य ऋकारऌकारयोः सावर्ण्यस्यैकदेशविकृतन्यायस्य चानित्य-
ताज्ञापनेनानृत इति प्रतिषेधमप्रवर्तयन् प्लुतऋदित्ऌदित्प्रयुक्तकार्या-

Digitized by Google

सङ्कराार्थ इत्यर्थ इति न तद्विरोधः । अग्ने इन्द्रेत्यादौ एकारावयव-मिकारमादाय सवर्णदीर्घः प्राप्नुयादिति वर्णैकदेशा वर्णग्रहणेन न गृह्यन्ते अतो नुड्विधिलादेशविनामेषु ऋकारग्रहणं कर्तव्यम् । विनामो नतिः । सा च नस्य णत्वम् । आनृधतुः । क्लृप्तः । मातृणाम् । हयवरट्इत्यत्र हकारोपदेशः अट्, अश्, हश्, वश्, ग्रहणेषु हकार-ग्रहणार्थः । अर्हेण । अड्व्यवायेऽति णत्वम् । देवा हसन्ति । भोभगोऽति रोर्यत्वम् । देवो हसति । हशिचेत्युत्वम् । लिलिहिढ्वे । लिलिहिध्वे । विभाषेट इति वा ढः । यद्यपि यप्रत्याहारे रेफस्यान्तःपातात् स्वर्नयति कुण्डंरथेनेत्यादौ अनुनासिकपरसवर्णौ प्राप्नुतः । मद्ह्रद इत्यादौ द्विर्वचनञ्च । तथापि रेफोष्मणां सवर्णा न सन्तीति स्थानप्रयत्नाभ्यामन्तरतमे स्पर्शे चरितार्थौ अनुनासिकपरसवर्णौ रे विषये न प्रवर्तेते । अचोरहाभ्यामिति साक्षाच्छ्रुतेन निमित्तभावेन रेफस्य कार्यित्वबाधान्न द्विर्वचनमपि रेफस्य प्रवर्तते । तदुक्तं भाष्ये । “नेमौ रहौ कार्यिणौ किन्तर्हि निमित्तन्द्विर्वचनस्येति” । इको यणचीत्यादौ तु कार्यित्वेनेको निमित्तत्वं न बाध्यते तस्मादित्युत्तरस्येति निर्देशात् । तेन दध्युदकादौ न दोषः । अनुस्वारविसर्गजिह्वामूलीयोपध्मानीययमा अयोगवाहाः । तेषामकारोपरि शर्षु च पाठस्योपसंख्यानम् । उरःकेण । सर्पिःषु । अचाड्व्यवाये शर्व्यवाये च णत्वषत्वे भवतः । यदि तु इकारोपरि पठेरन् तर्हि पयःस्वित्यादौ इणः परस्येति षत्वं स्यात् । त्रिपादीस्थत्वेन विसर्गादीनामसिद्धत्वाद्धरिः कर्ता हरिं स्मरेदित्यादौ न यणादय इति दिक् । व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणमित्यण्ग्रहणेषु ग्रहणकशास्त्रे परेणैवाण्ग्रहणमन्यत्र पूर्वेणैव । इण्ग्रहणन्तु सर्वत्र परेणैवेति द्रष्टव्यम् । अमङणनमित्यत्र मकारानुबन्धः अम् यम् ङम् इति

प्रत्याहारद्वये उपयुज्यते। तच्च द्वयं अमङणनम्भञित्येकस्मिन्नपि सूत्रे कृते निर्वहति । तथाहि पुमःखय्यम्परे हलोयमांयमिलोप इत्ये-तद्विषये खयम्कारभकारायां मकारभकारपरायामसम्भवान्न दोषः । ङमो ह्रस्वादचि ङमुण्नित्यमित्येतद्विषयेऽपि मकारभकारयोः पदा-न्तेऽसम्भवान्न दोषः । उज्भेर्दोपधतया तस्मात्क्विपि संयोगान्तलोपे सति उदितिद्रूपाभ्युपगमात् । लभेश्च क्विपि नमत्वप्रसङ्गान्न तथापि तत्सम्भवः । न चैवमागमिनस्तेयो ङणनेभ्यः परे त्रय आगमास्तु पञ्चेति संख्यातानुदेशो न स्यादिति वाच्यम् । यथासंख्यमित्यत्र हि विध्यर्थप्रमितिवेलायां निर्दिश्यमानगतसंख्यासाम्यमाश्रीयते न तु लक्ष्यसंस्कारवेलायां प्रयोगगतम् । तदेवं मकारानुबन्धो भाष्ये प्रत्या-ख्यातः । अमन्ताड्डुइत्योणादिको डो मकारान्तेभ्यो माभूदिति मकारानुबन्धः कर्तव्य इति वृत्तिस्वरसः । हलित्येतत्सूत्रं वल्रल्म-ल्यल्षु हकारग्रहणार्थम् । रुदिहि । स्वपिहि । रुदादिभ्यः सार्व-धातुक इति वलादिलक्षणेट् । स्निहित्वा स्नेहित्वा । रलो व्युपधादिति वा कित्त्वम् । अदाग्धाम् । मलो मलीति सलोपः । अलिक्षत् । शल इगुपधेति क्सः । शषसर्हरिति तु नोक्तम् । हरिर्हसतीत्यादौ खरव-सानयोरिति विसर्गापत्तेः ॥

वृद्धिरादैच् । १ । १ । १ ॥

आत् ऐच्च वृद्धिसंज्ञः स्यात् ॥ अभेदका गुणा इति पक्षे तप-रकरणमेवार्थम् । तादपि परस्तपर इति खट्वैडकादिषु त्रिमात्रचतुर्मा-त्रप्रसङ्गनिवृत्तये। भेदका गुणाः तपरसूत्रञ्ज्ञानिव विध्यर्थमिति पक्षे तु तत्कालानां सवर्णानां ग्रहणार्थमाकारार्थमपि। दाक्षिः । पैलः । औप-गवः । शालीयः । वृद्धिप्रदेशा मृजेर्वृद्धिरित्यादयः ॥

अदेङ् गुणः । १ । १ । २ ॥

अदेङ् च गुणसंज्ञः स्यात् ॥ तपरकरणमिह सर्वार्थम् । खट्वर्द्धिः । रमेश इत्यादौ त्रिमात्रचतुर्मात्रनिवृत्तये । तरिता । चेता । स्तोता । पचन्ति । गुणप्रदेशा मिदेर्गुण इत्यादयः ॥

इको गुणवृद्धी । १ । १ । ३ ॥

गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्रेक इति षष्ठ्यन्तं पदमुपतिष्ठते ॥ तच्च सम्भवति सामानाधिकरण्ये सार्वधातुकार्धधातुकयोः सिचिवृद्धिरित्यादौ इगन्तस्याङ्गस्येत्यादिक्रमेण सम्बध्यते । मिदेर्गुणः मृजेर्वृद्धिरित्यादौ सामानाधिकरण्यासम्भवान्मिदिमृज्योरवयवस्येक इति सम्बध्यते । अन्यथा तत्तद्विधायकैर्विहितयोर्गुणवृद्ध्योरलोऽन्त्यस्येतिवदस्यापि स्थानिनियमार्थत्वे द्वयोर्नियमयोः सार्वधातुकेत्यादौ अविरोधेनेग्रूपस्यान्त्यस्येत्यर्थे अन्त्यस्येक इति वाऽर्थे तत्र निर्वाहेऽपि मिदेर्गुणो मृजेर्वृद्धिरित्यादौ परस्परविरोधादनयोस्त्यागे सर्वादेशगुणापत्तिः । तरति । नयति । भवति । अहार्षीत् । मार्ष्टि । पुनर्गुणवृद्धिग्रहणं संज्ञया विधाने नियमार्थमिति वृत्तिः । तेनेह न । दिवमौत् । द्यौः । पथिमथ्यृभुक्षामात् । पन्थाः । त्यदादीनामः । स इमम् । विधीयेते इत्युक्त्या वृद्धिर्यस्येत्यादावेतदनुपस्थित्या शालीयादिसिद्धिः । इयञ्च परिभाषा याता, ग्लायति, उम्भिता, मार्जन्ति, इत्यादौ आत्सन्ध्यक्षरव्यञ्जनानां गुणवृद्धिव्यावृत्त्यर्थम् । भिन्नम् । मृष्टमित्यादौ निषेधप्रवृत्तये इग्लक्षणत्वसम्पत्त्यर्थञ्चेति दिक् ॥

न धातुलोप आर्द्धधातुके । १ । १ । ४ ॥

धात्वंशलोपनिमित्ते आर्द्धधातुके तन्निमित्तके इको गुणवृद्धी न स्तः ॥ लोलुवः । पोपुवः । मरीमृजः । लोलुयादिभ्यो यङन्तेभ्यः

पश्चाद्यचि कृते यङोऽचि चेति यङो लुकि लुग्निमित्तभूतमचमेवाश्रित्य प्राप्ते गुणवृद्धी निषिध्येते । धात्विति किम् । लूञ्, लविता । तदभावे बहुव्रीह्यलाभेन लोपनिमित्त इत्यर्थालाभात् । आर्द्धधातुके किम् । तोतोर्ति । तन्निमित्तके किम् । भेद्यते । मार्ज्यते । अत्र क्विब्निमित्तके गुणवृद्धी भवत एव । इकः किम् । अभाजि । रागः । भञ्जेश्च चिणि घञि चभावकरणयोरित्युपधालोपे कृते वृद्धिर्यथा स्यात् ॥

क्ङिति च । १ । १ । ५ ॥

गित्किन्ङिन्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः ॥ जिष्णुः । चितम् । सुनुतः । मृष्टम् । मृष्टवान् । मृष्टः । मृजन्ति । न्यनुवीत् । न्यधुवीत् । अत्र चिणि वृद्धौ निषिद्धायामुवङादेशः । निमित्ते किम् । छिन्नम् । तुदति । इहापि यथा स्यात् । इग्लक्षणे किम् । लैगवायनः । कामयते । अत्रादिवृद्धोर्गुणोपधावृद्धयो न भवन्त्येव ॥ मृजेः क्ङित्यजादौ वृद्धिर्वेष्यते ॥ * ॥ ममृजतुः । ममार्जतुः । मृजन्ति । मार्जन्ति । क्ङिति किम् । मरीमृजः । अजादौ किम् । मृष्टः । एतच्चेको गुणवृद्धी इति सूत्रे भाष्ये पठितम् ॥

दीधीवेवीटाम् । १ । १ । ६ ॥

दीधीवेव्योरिटश्च गुणवृद्धी न स्तः ॥ आदीध्यनम् । आदीध्यकः । आवेव्यनम् । आवेव्यकः । भविता श्वः ॥

हलोऽनन्तराः संयोगः । १ । १ । ७ ॥

अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः ॥ हल इति जातौ बहुवचनम् । तेन द्वयोरपि भवति । मल्ला । तक्षस्तष्टः । तट् ।

ग्निता । मङ्क्त्यत्र मस्ज इत्यादावुपधालोपार्थं मस्जेरन्त्यात्पूर्वो नुमिति वार्तिकेनान्त्यात्पूर्वे नुमि कृते सनजानां संयोगः । समुदायस्यैषा संज्ञा न प्रत्येकम् । तेन सुदृषत्करोतीत्यत्र न संयोगान्तलोपः । मङ्क्ता तिष्ठ इत्यादौ तु त्रयाणां द्वयोश्च । बहूनां समवधानेऽपि झलादिप्रत्यये परे संयोगादिलोपविधानसामर्थ्यात्तद्विषये भवति । हलः किम् । तितउच्छत्रम् । संयोगान्तलोपः स्यादिति वृत्तिः । अनन्तराः किम् । पनसम् । सकारमकारयोः संयोगत्वे स्कोरिति सलोपः स्यात् । संयोगप्रदेशाः संयोगान्तस्य लोप इत्यादयः ॥

मुखनासिकावचनोऽनुनासिकः । १ । १ । ८ ॥

मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात् ॥ अभ्र आँ अपः । मुखेति किम् । यमानुस्वाराणामेव प्रसज्येत । तथा चाङोऽनुनासिक इत्यत्रानुस्वारः स्यात् । नासिकेति किम् । यत्तेत्यादावनुदात्तेत्यादिना कलोपो माभूत् । अनुनासिकप्रदेशा अनुनासिकस्य क्वीत्यादयः ॥

तुल्यास्यप्रयत्नं सवर्णम् । १ । १ । ९ ॥

ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णं स्यात् । अकुहविसर्जनीयानां कण्ठः । इचुयशानां तालु । ऋटुरषाणां मूर्द्धा । लृतुलसानां दन्ताः । उपूपध्मानीयानामोष्ठौ । ञमङणनानां नासिका च । एदैतोः कण्ठतालु । ओदौतोः कण्ठोष्ठम् । वकारस्य दन्तोष्ठम् । जिह्वामूलीयस्य जिह्वामूलम् । नासिकाऽनुस्वारस्य ॥ इति स्थानानि ॥ यत्नो द्विधा । आभ्यन्तरो बाह्यश्च । आद्यश्चतुर्धा । स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात् । तत्र स्पृष्टं प्रयतनं स्पर्शानाम् । ईषत्स्पृष्टमन्तस्थानाम् । विवृतमूष्मणां स्वरा-

णाञ्च। ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्। प्रक्रियादशायान्तु विवृतमेव। एतच्च सूत्रकारेण ज्ञापितम्। तथाहि। शास्त्रान्ते अ अ इति सूत्रेण विवृतमनूद्य संवृतो विधीयते। तस्य च पूर्वत्रासिद्धमिति सूत्रेणाष्टाध्यायीं सम्पूर्णां प्रत्यसिद्धत्वाच्छास्त्रदृष्ट्या विवृतत्वमस्त्येव। ह्रस्वो दीर्घः प्लुतश्चाकारः प्रत्येकमुदात्तोऽनुदात्तः स्वरितश्च। सोऽप्यनुनासिकोऽननुनासिकश्चेत्यकारस्याष्टादश भेदाः। एवमिकारोकारर्काराणामपि प्रत्येकम्। ऌवर्णस्य द्वादश। तस्य दीर्घाभावात्। एचामपि द्वादश। तेषां ह्रस्वाभावात्। अनुनासिकाननुनासिकभेदेन यवला द्विधेति तेषां प्रत्येकं द्वौ। रेफोष्मणां सवर्णा न सन्ति। वर्ग्या वर्ग्येण सवर्णा इति। आस्येति किम्। तप्रा। फरोफरीति पलोपो माभूत्। प्रयत्नेति किम्। वाक् श्चोतति। प्रेति किम्। शचयोः श्वासाघोषविवाराख्यबाह्यप्रयत्नसाम्येन तथैव दोषात्। तथाहि। बाह्यप्रयत्नस्त्वेकादशधा। विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति।

खयां यमाः खयः ᳵकᳶपौ विसर्गः शर एव च।
एते श्वासानुप्रदाना अघोषाश्च विवृण्वते॥
कण्ठमन्ये तु घोषाः स्युः संवृता नादभागिनः।
अयुग्मा वर्गयमगा यणश्चाल्पासवः स्मृताः॥

वर्गेष्वाद्यानाञ्चतुर्णाम्पञ्चमे परे मध्ये यमो नाम पूर्वसदृशो वर्णः प्रातिशाख्ये प्रसिद्धः। पलिक्क्नीः। चख्ख्नतुः। अग्ग्निः। घ्घ्नन्तीत्यत्र क्रमेण कखगघेभ्यः परे तत्सदृशा एव यमाः। तत्र वर्गाणां प्रथमद्वितीयाः खयस्तथा तेषामेव यमाः जिह्वामूलीयोपध्मानीयौ विसर्गः शषसाश्चेत्येतेषां विवारः श्वासोऽघोषश्च।

अन्येषान्तु संवारो नादो घोषश्च । वर्गाणां प्रथमतृतीयपञ्चमाः प्रथमतृतीययमौ यरलवाश्चाल्पप्राणाः । अन्ये महाप्राणा इत्यर्थः । बाह्यप्रयत्नाश्च यद्यपि सवर्णसंज्ञायामनुपयुक्तास्तथाप्यान्तरतम्यपरीक्षायामुपयोक्ष्यन्ते इतीहाभ्यन्तरत्वविशेषणव्यावर्त्यतया व्युत्पादिताः । कादयो मावसानाः स्पर्शाः । यरलवा अन्तस्थाः । शषसहा ऊष्माणः । अचः स्वराः । ᳲक ᳲप इति कपाभ्यां प्रागर्द्धविसर्गसदृशौ जिह्वामूलीयोपध्मानीयौ । अं अः इत्यचः परावनुस्वारविसर्गौ ॥ इतिस्थानप्रयत्नविवेकः ॥ ऋकारऌकारयोः सवर्णसंज्ञा वाच्या ॥ * ॥ होतृऌकारः । होतॄकारः । ऌवर्णस्योभयान्तरतमो दीर्घो न सम्भवतीति ऋकार एव भवति । सवर्णप्रदेशा अकः सवर्णे दीर्घ इत्यादयः ॥

नाज्झलौ । १ । १ । १० ॥

अकारहकारयोरिकारशकारयोर्ऋकारषकारयोर्ऌकारसकारयोश्च सावर्ण्ये प्राप्ते एतदारम्भः । आकारसहितोऽच् आच् स च हल् चेत्येतौ मिथः सवर्णौ न स्तः ॥ दधि हरति । दधि शीतलम् । दधि षष्ठम् । दधि सान्द्रम् । अत्र हरत्यादिषु परेषु दधीत्यस्य यणादि कार्यं न । अन्यथा दीर्घादीनामिव हकारादीनामपि ग्रहणकशास्त्रबलादच्त्वं स्यात् । नाज्झलाविति निषेधो यद्यप्याक्षरसमाम्नायिकानामेव तथापि हकारस्याऽऽकारो न सवर्णः । तत्राऽऽकारस्यापि प्रश्लिष्टत्वात् । तेन विश्वपाभिरित्यत्र होढ इति ढत्वं न भवति ॥

ईदूदेद्द्विवचनं प्रगृह्यम् । १ । १ । ११ ॥

ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात् ॥ हरी एतौ । विष्णू इमौ । गङ्गे अमू । पचेते इमौ । तपरकरणमसन्देहार्थमिति वृत्तिः ।

Digitized by Google

अन्यथा यथादेशे ह्रस्वस्यायं निर्देश इति सम्भावनायामकुर्वन्नचेत्या-
दावतिप्रसङ्गः स्यादिति भावः । असन्देहार्थमपि क्रियमाणं तपर-
त्वं घटायोन्मीलितं चक्षुः पटं नहि न पश्यतीति न्यायात् प्लुतं
व्यावर्तयेदिति अग्नी इतीत्यादावप्लुतवदिति प्लुताश्रये प्रकृतिभावे
निषिद्धे प्रगृह्याश्रयः प्रकृतिभावो न स्यात् । स्याच्चाग्नी इत्यादावनुना-
सिकः । नैष दोषः । द्विपक्षं हि संज्ञापरिभाषं प्रणीयते । यथोद्देशम् ।
कार्यकालम् । उद्देशमनतिक्रम्य यथोद्देशम् । उद्देश उपदेशदेशः । यत्र
देशे उपदिश्यते तद्देशे एव वाक्यार्थबोधेन गृहीतशक्त्या गृहीतपरि-
भाषार्थेन च सर्वत्र शास्त्रे व्यवहारः । कार्यकालमित्यस्य च कार्येण
काल्यते स्वसन्निधिमाप्यते इत्यर्थः । कार्येण स्वसंस्काराय स्ववृत्ति-
लिङ्गचिन्हितसंज्ञापरिभाषाणामाक्षेप इति यावत् । अत्र पक्षे तु तत्त-
त्प्रदेशस्थस्य संज्ञापरिभाषस्य तत्तत्प्रदेशे एवोपयोग इति प्रदेशान्तरे
पुनः पुनः संज्ञापरिभाषमन्वेषणीयम् । तत्र तावत्संज्ञापरिभाषे यथो-
द्देशे समाश्रीयमाणे प्लुतस्यासिद्धत्वात्पूर्वत्रासिद्धमिति सूत्रे शास्त्रासि-
द्धत्वपक्षस्यैव वक्ष्यमाणतया द्विमात्रत्वबुद्धेरप्रतिघातान्निर्विघ्नं प्रगृह्य-
संज्ञायाः सिद्धत्वात् । कथं पुनरयं पक्षो यावता कार्यार्थत्वात्संज्ञा-
परिभाषस्य कार्यकालतैव न्याय्या । नैष दोषः । यदानुद्दिश्य प्रयो-
जनविशेषं प्रयोजनमात्रमभिसन्धाय भविष्यति किञ्चिदनेन प्रयोजन-
मिति संज्ञापरिभाषं प्रणीयते तदा सम्भवत्येवायं पक्षो यथाश्रुत-
ग्राहिप्रतिपत्त्रपेक्षः । महावाक्यार्थपर्यालोचनप्रवृत्तप्रतिपत्त्रपेक्षस्तु कार्य-
कालपक्षः । ईदूदेत्किम् । वृक्षावत्र । द्विवचनं किम् । कुमार्यत्र ।
मणीवोष्ट्रस्येति तु इवार्थे वशब्दो वाशब्दो वा बोध्यः । प्रगृह्यप्रदे-
शाः प्लुतप्रगृह्या अचीत्येवमादयः ॥

अदसो मात् । १ । १ । १२ ॥

अदःशब्दसम्बन्धिमकारात्परावीदूतौ प्रगृह्यौ स्तः ॥ अमी ईशाः । रामकृष्णावमू आसाते । एतत्सूत्रं प्रति मीत्वमूत्वे नासिद्धे । आरम्भसामर्थ्यात् । कार्यकालपक्षे अनुनासिकप्रदेशैकवाक्यतापन्नमपि मीत्वमूत्वयोरसिद्धत्वाभावेनानुनासिकप्रतिबन्धकत्वेन चारितार्थ्यापादनेतु तावन्मात्रप्रयोजनकत्वेऽप्यप्रगृह्यस्यानुनासिकोऽदसोनेत्येव सिद्धौ नानेकमुदाहरणं सामान्यसूत्रारम्भं प्रयोजयतीति न्यायेन संज्ञासूत्रप्रणयनवैयर्थ्यस्य तदवस्थत्वेनायाद्यप्रवृत्त्यर्थं प्रकृतिभावोऽप्येतत्प्रयोजनमित्यध्यवसीयते । हे अमुकेति तु न प्रयोगः । त्यदादीनां सम्बोधनं नास्तीत्युत्सर्गादित्याहुः । अदसः किम् । शम्यत्र । मात्किम् । अमुकेऽत्र । असति मादग्रहणे एकारोऽप्यनुवर्तेत ॥

शे । १ । १ । १३ ॥

अयं प्रगृह्यः स्यात् ॥ अस्मे इन्द्राबृहस्पती ॥

निपात एकाजनाङ् । १ । १ । १४ ॥

एकोऽज्निपात आङ्वर्जः प्रगृह्यः स्यात् ॥ इ उ विस्मये । इ इन्द्रः । उ उमेशः । अनाङित्युक्तेर्ङिदाकारः प्रगृह्य एव । आ एवं नु मन्यसे । आ एवं किल तत् । ङित्तु न प्रगृह्यः । ईषदुष्णमोष्णम् ।

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् ॥

अत्र चाङिद्वचने एव तात्पर्यम् । अन्यस्य ङित्त्वन्त्वर्थसिद्धम् । ईषदर्थेत्यादिस्त्वव्युत्पत्त्यानुवादः । एव ह्याभ्र आं अप इत्यत्र सामान्यप्रवृत्तेराङ्कारस्य ङित्त्वादाङोऽनुनासिकश्छन्दसीति

प्रवर्तते । अनाङिति पर्युदासादेवाप्राप्ते निपाते लब्धे निपातेका-च्ग्रहणं स्पष्टार्थमुत्तरार्थं निपातग्रहणमिहैव कृतम् । एकेनाजित्येवे-कत्वविवक्षया अच्समुदायग्रहणाभावे सिद्धे एकग्रहणमन्यत्र पर्याय-ग्रहणे जातिग्रहणार्थम् । तेन धिप्सतीत्यादिसिद्धिः । तितउशब्दस्यै-कदेशस्याउ इत्यस्यानुकरणे अउ अकरोदित्यत्रानुकरणं चानितीति निपातत्वेऽपि प्रगृह्यत्वाभाव एकग्रहणफलमित्यपास्तम् । अच्समु-दायस्याच्ग्रहणेन ग्रहणेऽपि स्वाङ्गसमुदायस्य स्वाङ्गत्वाभाववच्छ-रीरावयवसमुदायस्य शरीरावयवत्वाभाववच्चाच्समुदायस्याच्रूपत्वा-भावात् । अतएव भाष्ये ज्ञापकमेवोक्तं न तु फलमित्यपूर्व एकेति सुवचत्वमेकग्रहणं ज्ञापकमिति तत्रैव सूत्रे भाष्ये स्पष्टम् ॥

ओत् । १ । १ । १५ ॥

ओदन्तो निपातः प्रगृह्यः स्यात् ॥ अहो ईशाः । निपातः किम् । देवोऽपि । वायवायाहि ॥

सम्बुद्धौ शाकल्यस्येतावनार्षे । १ । १ । १६ ॥

सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिके इतौ परे ॥ विष्णो इति । विष्ण इति । सम्बुद्धौ किम् । अहो इति । अत्र परत्वा-द्विकल्पो माभूत् । सम्बुद्धिनिमित्तक इति किम् । गवो इत्यादौ प्रगृ-ह्यत्वं यथा स्यात् । सम्बुद्धिपर इति व्याख्याने तु गोर्लुका लुप्तत्वेन तत्परत्वाभावान्न स्यात् । नलुमतेति निषेधानित्यत्वमस्यानित्यगतिः । इताविति किम् । वायोऽत्र । अनार्षे इति किम् । ब्रह्मबन्धवित्यब्रवीत् ॥

उञः । १ । १ । १७ ॥

उञ इतौ वा प्रागुक्तम् । उ इति । विति ।

ऊँ । १ । १ । १८ ॥

Digitized by Google

उञ इतौ दीर्घोऽनुनासिकः प्रगृह्यश्च ऊँ इत्ययमादेशो वा स्यात् ॥ ऊँ इति ॥

ईदूतौ च सप्तम्यर्थे । १ । १ । १९ ॥

सप्तम्यर्थे पर्यवसन्नमीदूदन्तं प्रगृह्यसंज्ञं स्यात् ॥ सोमो गौरी अधिश्रितः । मामकी तनू इति । सुपां सुलुगिति सप्तम्या लुक् । इदूतौ किम् । अग्ना भवाति । सप्तम्या डादेशः । तपरत्वमसन्देहाय । सप्तमीति किम् । धीती । मती । ह्रस्वान्ताभ्यां तृतीयैकवचनस्य पूर्वसवर्णे सवर्णदीर्घः । अर्थग्रहणं किम् । वृत्तावर्थान्तरोपसंक्रान्ते माभूत् । वाप्यामश्वो वाप्यश्वः ॥

दाधा घ्वदाप् । १ । १ । २० ॥

दारूपा धारूपाश्च धातवो घुसंज्ञाः स्युः दाप्दैपौ विना ॥ तत्र दारूपाश्चत्वारः । डुदाञ् । प्रणिददाति । दाण् । प्रणियच्छति । दो । प्रणिद्यति । देङ् । प्रणिदयते । धारूपौ द्वौ । डुधाञ् । प्रणिदधाति । धेट् । प्रणिधयति वत्सो मातरम् । अदाबिति किम् । दाप् लवने । दात्तं बर्हिः । लूनमित्यर्थः । घुत्वाभावाद्दोदद्घोरिति न प्रवर्तते । दैप् शोधने । अवदातं मुखम् । इह घुत्वाभावाच्च उपसर्गात्त इत्येतन्न । घ्वादेशा नेर्गदनदेत्यादयः । इह दोदेङ्धेटामनुकरणानि व्यवस्थाप्याथ प्रकृतिवदनुकरणमित्यतिदेशाद्दादेचउपदेशेऽशितीत्यात्वं क्रियते । ततश्चतुर्णां दारूपाणां द्वयोश्च धारूपयोरेकशेषं कृत्वा द्वन्द्वः कर्तव्यः । प्रणिदातेत्यादौ कृतात्वानां दोदेङ्धेटान्तु स्थानिवद्भावात्सिद्धं घुत्वम् । लक्षणप्रतिपदोक्तपरिभाषाया निरनुबन्धकग्रहणे न सानुबन्धकस्येत्यस्याश्च नेह प्रवृत्तिः । सर्वेषां स्वरूपेणैवानुकृतत्वात् । ननु कृतात्वस्य सूत्रे निर्देशात्प्रणिद्यति

प्रणिधयतीत्यादौ णात्वविरहात्कथं घुत्वमिति चेत् भ्रान्तोऽसि । न हि वयं कृतात्वमनुकुर्मः येनोक्तदोषः स्यात् । अपि तु दे दो धे इत्येकन्तेष्वेवानुक्रियमाणेषु लक्षणवशसंपन्नमात्वमित्युक्तम् । न च लक्षणेन रूपान्यत्वेऽप्यनुकरणता हीयते । दीङस्तु नेह ग्रहणम् । तदनुकरणे आत्वासम्भवात् । वार्तिकमते एजन्तानां दीङादीनामात्वविधानात् । भाष्यमते एज्निमित्ते परतस्तद्विधानात् । तेन दीङस्तृजादावात्वे कृतेऽपि घुसंज्ञाविरहात्प्रनिदातेत्यत्र नेर्गदेति नित्यं णत्वं न भवति इति सूत्रकारस्य मतम् । नन्वस्मिन्पक्षे दाप्दैपावनुकृतौ । न वा । आद्ये अनुकरणपर्युदासोभयसामर्थ्यात्तयोर्घुसंज्ञाविकल्पः स्यात् । अन्त्ये अदाबिति व्यर्थं स्यात् । अननुकृतत्वादेव दाप्दैपोर्घुसंज्ञाप्राप्तिविरहादिति चेन्न । अदाबित्यस्मिन्नसति तयोरप्यनुकरणं सम्भाव्येत । न हि लक्षणैकचक्षुषां दोदेङादीनां दाप्दैपोश्च वैलक्षण्यं किञ्चिदनुभूयते यद्बलाद्ग्रहणाग्रहणे व्यवस्थाप्येयाताम् । वार्तिककारमते तु प्रयोगस्थानामेव दाधारूपाणामिदमनुकरणम् । न चैवं प्रणिद्यति प्रणिद्यते इत्यादौ णिति न स्यात् । आत्वाभावात् । तथा देङ् रक्षणे, अदित, धेट्, व्यत्यधित, प्रणिदाता, प्रणिधातेत्यादावपि न स्यात् लाक्षणिकत्वादिति वाच्यम् । वचनबलेनैव तत्समाधानात् । तथा च कात्यायनवार्तिकम् । घुसंज्ञायां प्रकृतिग्रहणं शिदर्थमिति । भारद्वाजीयास्तु पठन्ति शिद्विकृतार्थमिति । तथा च दाधाप्रकृतयो घुरिति पठित्वा दाश्च धाश्च प्रकृतयश्चेति द्वन्द्वं कृत्वा सन्निधानाद्दाधामेव प्रकृतय इति व्याख्येयम् । भाष्यकारास्तु वार्तिकम्प्रत्याचख्युः । तथाहि । नेर्गदेतिसूत्रे तावदवश्यमप्रकृतिग्रहणं कर्तव्यम् । प्रणिमयते प्रण्यमयतेत्यत्रापि णत्वं यथा स्यात् । तदेव पुरस्तादपकृष्य

घुप्रकृतिमा इति पठिष्यामः । घुश्च प्रकृतिश्च माश्चेति द्वन्द्वः । सन्नि-
धानाच्च पूर्वोत्तरयोः प्रकृतिर्गृह्यते । न चैवं मीनातिमिनोत्योरपि
माप्रकृतित्वाद्ग्रहणापत्तिः । माङो ङकारानुबन्धस्यैव तथावश्यपठनी-
यत्वात् । अन्यथा मा माने, इत्यस्यातिप्रसङ्गात् । तस्माद्घुप्रकृतिमा-
ङिति पाठेन प्रणिद्यति, प्रणिदयते, इत्यादेः सिद्धत्वाच्छिदर्थं ताव-
द्घुसंज्ञायां प्रकृतिग्रहणं न कर्तव्यमिति स्थितम् । भारद्वाजीयोक्त-
रीत्या विकृतार्थं कर्तव्यमिति पुनरवशिष्यते । तदपि न । गामादा-
ग्रहणेष्वविशेष इति परिभाषयैव लाक्षणिकस्यापि दारूपस्य घुसंज्ञा-
सिद्धेः । अस्याञ्च परिभाषायां दैपः पित्वं लिङ्गम् । तद्धि अदाबिति
सामान्यग्रहणार्थं क्रियते लाक्षणिकत्वादेव घुसंज्ञायां दैप्ग्रहणाभावे
तु किं निषेधे सामान्यग्रहणार्थेन पित्वेन । न चैवमपि धेटो घुसंज्ञा
न स्यादेवेति वाच्यम् । दोदद्घोरित्यत्र धेविनवृत्त्यर्थं क्रियमाणेन
द इत्यनेन धेटोऽपि घुसंज्ञाज्ञापनात् । न च दधातिनिवृत्त्यर्थं द
इत्युक्तमिति वाच्यम् । तत्र दधातेर्हिरिति ह्यादेशविधानादेव दद्
भावाप्रसङ्गात् । न चैवमपि गामादाग्रहणेष्वविशेष इत्यनेन लक्षण-
प्रतिपदोक्तपरिभाषाया निरनुबन्धकग्रहण इति परिभाषायाश्च यथा
बाधस्तथार्थवद्ग्रहणपरिभाषाया अपि बाधः स्यात् तथा च प्रनिदार-
यति प्रनिधारयतीत्यत्राप्यतिप्रसङ्ग इति चेन्न । गदादीनां य उपसर्ग-
स्तत्स्थान्निमित्तादुत्तरस्य तानेव गदादीन्प्रत्युपसर्गस्य नेरिति व्या-
ख्यानात् । इदन्त्ववधेयम् । प्रणिद्रापयतीत्यत्रापि उपसर्गयोः प्रकृ-
त्यर्थविशेषकत्वे सत्येव नेर्गदेति नित्यत्वम् । ण्यर्थविशेषकत्वे
तु घुसंज्ञकं प्रत्यनुपसर्गत्वाच्छेषेविभाषेति विकल्प एव न तु नित्यं
णत्वमिति । स्यादेतत् । उपदिदीषत, इत्यत्र सनिमीमेति इस्भावः

स्यात् । वार्तिककृता घुसंज्ञायां प्रकृतिग्रहणात् । सूत्रभाष्यकारयोस्तु नाऽसौ दोषः । सूत्रकृता दीङोऽननुकृतत्वात् । भाष्यमते णत्वे प्रकृतिग्रहणेऽपि घुसंज्ञायां तद्विरहादिति चेत्सत्यम् । वार्तिकमतेऽपि नेयं दाप्रकृतिः एजन्तानामात्वविधानाभ्युपगमात् । नचैवमादन्तत्वनिबन्धनयुक्प्रत्ययाद्यसिद्धिः । तथाकारान्तलक्षणप्रत्ययविधिरितिवचनेनैव तत्सिद्धेः । भाष्ये त्वेतद्वचनप्रत्याख्यानाय एज्विषये आत्वं सिद्धान्तितमित्यन्यदेतत् । इदन्त्वत्रावशिष्यते । भाष्यवार्तिकोभयमतेऽपि उपादास्तास्य स्वरः शिक्षकस्येत्यत्र स्याघ्वोरितीत्वं प्राप्तम् । तच्च भाष्ये सन्निपातपरिभाषया परिहृतम् । उपदीष् त इति स्थिते एज्विषये प्रवर्तमानमात्वं सिचोऽकित्त्वमुपजीवति यदि चात्र घुसंज्ञा स्यात्तर्हि स्याघ्वोरिच्चेति सिचः कित्त्वं स्यादतोऽकित्त्वमुपजीव्य प्रवृत्त आकारः कित्त्वप्रवर्तिकां घुसंज्ञां न प्रवर्तयत्येवेति । वार्तिककृता तु दीङः प्रतिषेधः स्याघ्वोरित्त्वे इति वचनमेव कृतम् । उभयमतेऽपि दीङस्तृजादावात्वे कृते प्रणिदातेत्यादौ नेर्गदेति णत्वम्भवति । अतएव वार्तिककृता दीङः प्रतिषेध इत्येव नोक्तम् । किन्तु स्याघ्वोरित्त्वे इति विषयविशेषो निर्दिष्टः । सूत्रमते तु न भाव्यं णत्वेनेति स्पष्टमेव । किञ्च भाष्यवार्तिकयोर्न केवलं सूत्रकृता सह विरोधः किन्तु परस्परेणाऽपि । तथाहि । भाष्यमते प्रणिदीयते, प्रणिदीन इत्यादावपि नित्यं णत्वम् । णत्वविधौ प्रकृतिग्रहणात् । वार्तिकमते तु वैकल्पिकम् । एजन्तानामेव प्रकृतित्वाभ्युपगमेन ईदन्तस्याप्रकृतित्वात् । अन्यथा उपदिदीषत इत्यत्र इस्भावापत्तेः । तदेवं प्रणिदातेत्यादौ सूत्रकृता सह द्वयोर्विरोधः । प्रणिदीन इत्यादौ तु भाष्यकृता सह इतरयोर्विरोधो दुष्परिहर इति । अत्रेदं वक्तव्यम् । यद्यो-

यन्ते । तत्र संशयः, किं यत्र ये धर्माः श्रुतास्त एव तत्र ज्ञेया उत सर्वे धर्माः सर्वत्रोपसंहर्तव्या इति । अत्र पूर्वपक्षे केषांचिद्धर्माणामनुपसंहाराद्यावत्तत्त्वस्वरूपज्ञानासिद्धिः फलम्, सिद्धान्ते तत्सिद्धिरिति बोध्यम् । तत्रानन्दादीनां नोपसंहार इति प्राप्ते, ब्रूमः । प्रधानस्य ब्रह्मण आनन्दस्वरूपत्वादयो धर्माः सर्वत्रोपसंहर्तव्याः, वेद्यैक्येन विद्यैक्यादिति पूर्वसूत्रोक्तहेतोरित्यर्थः ॥

ननु तैत्तिरीयक आनन्दमयं परमात्मानं प्रस्तुत्य "तस्य प्रियमेव शिरो मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्ष आनन्द आत्मे"ति प्रियशिरस्त्वादयो धर्माः श्रूयन्ते । तेषामप्यानन्दस्वरूपत्वादीनामिव सर्वत्रोपसंहारः स्याद्ब्रह्मधर्मत्वाविशेषादित्यत आह ।

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ । ३ । ३ । १२ ॥

प्रियशिरस्त्वादिधर्माणां न सर्वत्र प्राप्तिः । हि यतः प्रियमोदप्रमोदानन्दाः परस्परापेक्षयोपचितापचितस्वरूपाः । उपचयापचयवन्तौ हि धर्मौ धर्मिणि भेदे सत्येव स्वाभाविकौ सम्भवतः । ब्रह्मणस्त्वद्वितीयत्वान्नोपचितापचितप्रियादिधर्मस्वभावत्वम् । अस्वभावधर्माणां ब्रह्मज्ञानार्थं नोपसंहार इत्यर्थः । चन्दनजं सुखं प्रियम्, पुत्रप्राप्तिजं मोदः, स एव प्रकृष्टः प्रमोदः, सुखसामान्यमानन्दः, इति तेषां तारतम्यं बोध्यम् । अत्र भगवद्भिः सूत्रकारैरानन्दमयस्य ब्रह्मत्वं प्रियादीनां तद्धर्मत्वं च कृत्वेयं चिन्ता कृता । तस्या अन्यत्फलं बोध्यम् । तथाहि । वेद्यैक्ये विद्यैक्यादानन्दादिधर्माणां सर्वत्रोपसंहारे सगुणब्रह्मोपासनेषु भिन्नेष्वपि वेद्यस्य सगुणस्य ब्रह्मण एक-

त्वेनोपासनैक्याय तावदन्योन्यं गुणोपसंहारः स्यादिति शङ्कानिरासः फलम् । उपासनानां विधिपारतन्त्र्याद्यत्र यावद्गुणविशिष्टमुपासनं विधीयते तत्र तावद्गुणविशिष्टमेव कर्तव्यम्, तत्तत्फलस्य तेनैव सिद्धेः । वस्तुपरतन्त्रनिर्गुण-विद्याफलस्याविद्यानिवृत्तेर्यावत्स्वरूपज्ञानमन्तरेणासम्भ-वात्सर्वत्रानन्दादिगुणानामुपसंहार इति शङ्कानिरास-प्रकारः ॥

उपास्यब्रह्मधर्माणां सर्वत्र न प्राप्तिरित्युक्तम् । तद-पेक्षया ज्ञेयधर्माणामानन्दादीनां सर्वत्र प्राप्तिरिति विशे-षमाह ।

इतरे त्वर्थसामान्यात् ॥ ३ । ३ । १३ ॥

उपास्यधर्मापेक्षयेतरे त्वानन्दादयो धर्मा ज्ञानैकफ-लकाः सर्वत्रोपसंह्रियन्ते । अर्थस्य प्रतिपाद्यस्य ब्रह्मणः सामान्यादेकत्वादित्यर्थः । उपसंहारं विना यथावत्स्वरू-पविषयकमहावाक्यार्थज्ञानसाध्याविद्यानिवृत्तेरसम्भवा-दिति भावः ॥

आध्यानाय प्रयोजनाभावात् ॥ ३ । ३ । १४ ॥

कठवल्लीषु पठ्यते "इन्द्रियेभ्यः परा ह्यर्थाः" इत्या-रभ्य "पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः" इति । तत्र संशयः, किमिमानि वाक्यानि भिन्नानि, उतात्मपरमेकमेव वाक्यमिति । पूर्वपक्ष इन्द्रियादिपरत्व-विशिष्टस्यार्थादेरुपास्यस्य प्रतिवाक्यं भेदाद्विद्याया भेदः फलम्, सिद्धान्ते निर्विशेषात्मप्रदर्शनपरमेकमेव वाक्य-मिति विद्यैक्यं फलम् । अत एव पूर्वोत्तरपक्षयोर्विद्याभे-दाभेदयोः पर्यवसानादस्याधिकरणस्य पादसङ्गतिः । पूर्व

ब्रह्मस्वरूपाणामानन्दादीनामुपसंहार्याणां ब्रह्मज्ञानोपायत्वं चिन्तितम् । इदानीमब्रह्मरूपस्यानुपसंहार्यस्यार्थादिपरत्वरूपधर्मस्य ब्रह्मज्ञानोपायत्वमुच्यते, इत्येकफलकत्वमवान्तरसङ्गतिः । तत्रेमानि वाक्यानि भिन्नानीति प्राप्ते ब्रूमः । आध्यानाय ध्यानसाध्यसाक्षात्काराय पुरुष एवार्थादिभ्यः सर्वेभ्यः परत्वेन प्रतिपाद्यते, इत्येकमेव वाक्यम् । न त्विन्द्रियादिपरत्वेनार्थादयः प्रतिपाद्याः, प्रयोजनाभावात् । न हीन्द्रियपरत्वेनार्थज्ञानं स्वतः किञ्चित्फलं साधयति । अतः प्रतिपाद्यभेदाभावान्न वाक्यभेदः । पुरुषज्ञानं फलहेतुरिति तत्रैवोक्तं "निचाय्य तं मृत्युमुखात्प्रमुच्यते" इति ॥

एवं वाक्यस्यात्ममात्रपरत्वे फलवत्त्वं लिङ्गमुक्त्वा, अपूर्वत्वमपि लिङ्गमाह ।

आत्मशब्दाच्च ॥ ३ । ३ । १५ ॥

"एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः" इति प्रकृतपुरुष आत्मशब्दश्रवणादात्मपरमेवेदं वाक्यम् । तस्यात्मनः श्रुत्या मानान्तरावेद्यत्वरूपापूर्वत्वप्रतिपादनादिति भावः ॥

आत्मगृहीतिरितरवदुत्तरात् ॥ ३ । ३ । १६ ॥

ऐतरेयके श्रूयते "आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत् स ईक्षत लोकान्नु सृजा इति स इमाँल्लोकानसृजताम्भो मरीचीर्मरमापोऽदोऽम्भः परेण दिवं द्यौः प्रतिष्ठाऽन्तरिक्षं मरीचयः पृथिवी मरो या अधस्तात्ता आपः" इति । लोकानेवाह "अम्भ" इति । तद्व्याचष्टे श्रुतिः "अदोऽम्भ" इति । तदम्भो यत्परेण

Digitized by Google

दिवं दिवः परस्ताद्वर्तते । तस्य च परस्ताद्वर्तमानस्य द्यौः प्रतिष्ठाऽऽश्रयः । साऽप्यम्भःशब्दवाच्या । दिवमारभ्योपरितनलोका अपान्नमसैरम्भोभिर्व्याप्तत्वादम्भ इत्युच्यन्त इत्यर्थः । अन्तरिक्षलोकः सवितृमरीचिव्याप्तत्वान्मरीचयः । स्थानभेदापेक्षया बहुवचनम् । म्रियन्ते ऽस्मिन्भूतानीति पृथिवीलोको मरः । यानि पृथिव्या अधस्तात्पातालान्यब्बहुलानि ता आप इत्यर्थः । तत्र संशयः, किमात्मपदेन हिरण्यगर्भ उच्यते, उत परमात्मेति । पूर्वपक्ष आत्मपदस्य परमात्मपरत्वाभावात्तत्प्रमित्यर्थं नानन्दादिधर्माणामत्रोपसंहार इति फलम्, सिद्धान्ते परमात्मन एवात्रोक्तत्वात्प्रमित्यर्थमस्त्यानन्दादिधर्माणामत्रोपसंहार इति मन्तव्यम् । तत्र पूर्वं वाक्यभेदभियाऽर्थादीनां पृथक्प्रतिपाद्यत्वं नास्तीत्युक्तम् । तर्हि प्रजापते रेतःकार्यं देवा इत्यादिपूर्ववाक्ये हिरण्यगर्भस्य प्रकृतत्वात्स एवात्मशब्देनोच्यत इति युक्तम्, अन्यथा वाक्यभेदप्रसङ्गात्, इति दृष्टान्तसङ्गत्या प्राप्ते ब्रूमः । अस्मिन्सृष्टिवाक्य आत्मशब्देन परमात्मन एव गृहीतिर्नान्यस्य । इतरवत् । यथेतरेषु सृष्टिवाक्येषु "आत्मन आकाशः सम्भूतः" इत्यादिष्वात्मशब्देन परमात्मन एव ग्रहणम्, तद्वदत्रापि । कुतः । उत्तरात् "स ईक्षत लोकान्नु सृजा इति स इमांल्लोकानसृजत" इतीक्षणपूर्वकस्रष्टृत्वरूपोत्तरविशेषणादित्यर्थः । तच्च विशेषणं परमात्मन्येव मुख्यत्वेन श्रुत्यन्तरेष्ववगतमिति भावः ॥

अन्वयादिति चेत्स्यादवधारणात् ॥ ३ । ३ । १७ ॥

पूर्ववाक्यादिपर्यालोचनया प्रजापतावेव वाक्यस्यान्वयदर्शनान्न परमात्मग्रहणं युक्तमिति चेत्, अत्रोच्यते "स्या-

त्”इति । अत्र परमात्मन एव ग्रहणं युक्तं स्यात्, “आत्मा वा इदमेक एवाग्र आसीत्”इति सृष्टेः प्रागेकत्वावधारणस्य परमात्मन्येवाञ्जसत्वादित्यर्थः । न च, अस्मिन्वाक्ये लोकस्रष्टृत्वं श्रूयमाणं हिरण्यगर्भमेव गमयति, अन्यथा परमात्मग्रहणे महाभूतसृष्टिः श्रूयेत, इति वाच्यम् । छान्दोग्ये तेजआदिसृष्टिश्रवणेऽपि यथाऽऽकाशवायुसृष्ट्युपसंहारस्तद्वदत्रापि महाभूतसृष्टेरुपसंहारात् । तस्मादस्मिन्वाक्य आत्मनः परस्यैव ग्रहणमिति सिद्धम् ॥

सूत्रद्वयस्यापरा व्याख्या । “आत्मगृहीतिरितरवदुत्तरात्” । बृहदारण्यके “कतम आत्मा”इति प्रश्ने, “योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः” इत्यात्मशब्देनोपक्रम्य, तस्यैवात्मनोऽसङ्गत्वादिकमुक्त्वा, “स वा एष महानज आत्मा” इति ब्रह्मात्मतामुपसंहरति । छान्दोग्ये तु “सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्” इति विनैवात्मशब्दं सन्मात्रमुपक्रम्य, अन्ते “स आत्मा तत्त्वमसि” इति ब्रह्मात्मत्वमुपसंहरति । अत्र संशयः, किमनयोर्वाक्ययोस्तुल्यार्थत्वमुत भिन्नार्थत्वमिति । पूर्वपक्षेऽनयोर्वाक्ययोरुपक्रमवैषम्यादर्थभेदेन विद्ययोर्भेदान्नान्योन्यं गुणोपसंहारः, किन्तु, बृहदारण्यके निर्गुणविद्या, छान्दोग्ये तूपक्रान्तसत्तासामान्ये ब्रह्मत्वोपासनेति फलम् । सिद्धान्ते छान्दोग्ये सत्पदेनात्मन एव गृहीतिः । इतरवत्, बृहदारण्यक आत्मपदेनात्मग्रहणवत् । उत्तरात्, “तत्त्वमसि”इत्युपसंहारबलात् । इत्युभयत्र विद्यैक्यादस्त्यन्योन्यं गुणोपसंहार इति ॥ पूर्वाधिकरणे वाक्यैक्यबलादर्थादिपरत्वं परित्यज्य विद्यैक्यमुक्तम् । तर्हि प्रकृत उपक्रमभेदेन वाक्यभेदाद्विद्यैक्यं न स्यादिति

प्रत्युदाहरणसङ्गतिरस्याधिकरणस्य बोध्या । "अन्वयादिति चेत्स्यादवधारणात्" । नन्पसंहारबलात्सत्पदेनैवात्मगृहीतिरित्यसङ्गतम्, उपसंहारस्योपक्रमान्वयादुपक्रमपरतन्त्रत्वादित्याक्षेपांशार्थः । परिहरति "स्यादवधारणात्" इति । सत्पदेनात्मन एव गृहीतिर्युक्ता स्यात्, "सदेव" इत्यद्वितीयत्वावधारणात् । सत्तासामान्यस्य च सद्वितीयत्वादवधारणानुपपत्तिरित्यर्थः । अयं भावः । आरम्भणाधिकरणे ब्रह्मातिरिक्तवस्तुजातस्य मिथ्यात्वसाधनादात्मनोऽन्यस्य सत्पदार्थत्वानुपपत्तेः सत्पदेनात्मन एवोपक्रमः । सदुपक्रमस्य ब्रह्मसत्तासामान्यपरत्वसन्देहेऽपि, "तत्त्वमसि" इति वाक्यशेषाद्ब्रह्मपरत्वनिर्णयः । न च शाखाद्वय आत्मसच्छब्दाभ्यां जीवब्रह्मणोरुपक्रमाद्वैषम्यम्, उभयोर्लक्ष्यैक्येनावैषम्यादिति । तस्मादनयोर्वाक्ययोरेकार्थत्वमिति सिद्धम् ॥

कार्याख्यानादपूर्वम् ॥ ३ । ३ । १८ ॥

वाजसनेयके प्राणसंवादे प्राणो वागादीन्पप्रच्छ "मम किमन्नं किं वासः" इति । ते प्रत्यूचुः "यदिदं किञ्चा श्वभ्य आ क्रिमिभ्य आ कीटपतङ्गेभ्योऽन्नं तत्तेऽन्नमापो वासः" इति । तदनन्तरं श्रूयते "तद्विद्वांसः श्रोत्रिया अशिष्यन्त आचामन्त्यशित्वा चाचामन्त्येतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेदेतमेव तदनमनग्नं कुर्वते" इति । यस्मात्प्राणस्यापो वासस्तस्मादित्यस्मिन्नर्थे तच्छब्दः । विद्वांसः प्राणविदः श्रोत्रिया यथेष्टभोजनशून्या भोजनात्पूर्वोत्तरकालयोराचमनं कुर्वन्ति । तेनाचमनसम्बन्धिनाऽद्भूपवाससैतमे-

चानं प्राणमनग्नमाच्छादितं कुर्वन्तो मन्यन्ते चिन्तयन्ति पूर्वे जनाः। तस्मादिदानींतनोऽपि प्राणविदेवं कुर्यादित्यर्थः। छान्दोग्येऽप्येवमेव श्रूयते "तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति" इति। तस्मात्, प्राणं प्रत्यपां वासस्त्वादित्यर्थः। अन्नमशिष्यन्तः प्राणविद आचमनं कुर्वन्त एतत्कुर्वन्ति। किमेतत्। यद्भोजनात्पूर्वमूर्ध्वं चाद्भिः प्राणं परिदधत्याच्छादयन्तीत्यर्थः। तत्राचमनीयास्वप्सु प्राणवासस्त्वध्यानमाचमनं च प्रतीयते। तत्रोभयविधाने वाक्यभेदभयादेकमेव विधेयम्। तदेकं किमाचमनं विधेयमुत वासस्त्वध्यानमिति संशयः। पूर्वपक्षे प्राणविद्याऽङ्गत्वेनापूर्वस्याचमनस्य विधेयत्वात्तस्याचमनस्यान्यत्र प्राणविद्यायामुपसंहारः फलम्, सिद्धान्ते त्वनुपसंहार इति मन्तव्यम्। तत्र सन्दिग्धसदुपक्रमस्य वाक्यशेषान्निर्णयवत् "आचामन्ति" इति वर्तमानोपदेशस्य विधित्वसन्देहे "आचामेत्" इति वाक्यशेषाद्विधित्वनिर्णय इति दृष्टान्तसङ्गत्या प्राप्ते ब्रूमः। वासस्त्वध्यानमेवापूर्वं प्राणविद्याऽङ्गत्वेन विधेयम्। यथा प्राणविद्याङ्गत्वेन श्वादिमर्यादस्यान्नस्य प्राणं प्रत्यन्नत्वेन ध्यानं विधीयते तद्वत्। न त्वाचमनमत्र विधेयम्। कुतः। कार्याख्यानात्, "द्विजो नित्यमुपस्पृशेत्" इत्यादिना स्मार्तविधिना सकलानुष्ठानाङ्गत्वेन शुद्ध्यर्थं कार्यस्याचमनस्य प्राणविद्यायामपि प्राप्तस्याख्यानात्। तदीयास्वप्सु वासस्त्वविधानार्थमनुवादादित्यर्थः॥

समान एवं चाभेदात्॥ ३। ३। १९॥

वाजसनेयिशाखायामग्निरहस्ये शाण्डिल्यविद्या श्रुता। तत्र गुणाः श्रूयन्ते "स आत्मानमुपासीत मनो-

Digitized by Google

मयं प्राणशरीरं भारूपम्" इत्यादिना । तस्यामेव शाखायां बृहदारण्यके पुनः श्रूयते शाण्डिल्येन दृष्टा विद्या "मनोमयोऽयं पुरुषो भाः सत्यस्तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किञ्च" इति । भाः प्रकाशात्मकः । सत्यः परमार्थः । तस्मिन्मनोमयपदप्रकृतिभूतमनःशब्देन प्रस्तुते हृदयेऽन्तर्यथा व्रीह्यादि तथा तावत्परिमाणः पुरुषोऽस्ति । स एष सर्वस्येशान इत्यादिगुणक इत्यर्थः । तत्र संशयः, किमग्निरहस्यबृहदारण्यकस्थयोरनयोर्विद्ययोर्भेद उतैक्यमिति । पूर्वपक्षे विद्ययोर्भेदाद्गुणानामनुपसंहारः फलम्, सिद्धान्ते विद्यैक्याद्गुणोपसंहार इति बोध्यम् । पूर्वं प्राणाद्यमनानुवादेन वासस्त्वध्यानं विधेयमित्युक्तम् । इह तूक्तवाक्ययोरेकस्यानुवादकत्वमेकस्य विधायकत्वमित्यत्र नियामकाभावादुभयोरपि स्वनिकटस्थगुणविशिष्टविद्याविधायकत्वमित्यनयोर्भेदः । इति प्रत्युदाहरणेन प्राप्ते, ब्रूमः । यथा भिन्नासु शाखासु विद्यैक्यं गुणोपसंहारश्च भवति, एवं समाने चैकस्यामपि शाखायां भवितुं युक्तम् । कुतः । अभेदात्, उपास्यस्य मनोमयत्वादिगुणकस्योभयत्राप्यभेदेन प्रत्यभिज्ञानादित्यर्थः । यत्त्वेकस्यानुवादकत्वमेकस्य विधायकत्वमित्यत्र नियामकाभाव इति, तन्न । अग्निरहस्ये बहूनां गुणानां श्रवणेन तत्रैव विद्योत्पत्तिविधिकल्पनात्, बृहदारण्यके तु विद्यैक्यप्रत्यभिज्ञानार्थं तत्रोक्तमनोमयत्वाद्यल्पगुणानुवादेन सर्वेशानत्वादयो गुणा विधीयन्ते, इति न किञ्चिद्बाधकम् । तस्मादुभयत्र शाण्डिल्यविद्यैक्यमिति सिद्धम् ॥

सम्बन्धादेवमन्यत्रापि ॥ ३ । ३ । २० ॥

बृहदारण्यके "सत्यं ब्रह्म" (हिरण्यगर्भाख्यं सत्यं मह-

त्) इत्युपक्रम्य "तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषः" इति। तत्रैवं सति यत्तत्सत्यं हिरण्यगर्भाख्यं सोऽसावादित्यः। किं मण्डलमेवादित्यः। नेत्याह "य एषः" इति। अक्षन्‌क्षिणि। तस्य सत्यस्य स्थानभेदेनादित्यचाक्षुषपुरुषात्मनाऽवस्थानमुक्त्वा ऽऽदित्यपुरुषस्य सत्यस्य "भूरिति शिरो भुवइति बाहू स्वरिति प्रतिष्ठा (पादौ)" इति व्याहृतिदेहत्वं सम्पाद्य "तस्योपनिषदह" रित्यहर्नामत्वमुक्तम्। तदनन्तरं चाक्षुषपुरुषस्य सत्यस्य पूर्ववद्व्याहृतिदेहत्वं सम्पाद्य "तस्योपनिषदह" मित्यहंनामत्वमुक्तम्। उपनषिच्छब्देन देवताप्रकाशकं रहस्यं नामोच्यते। अहःशब्दः प्रकाशवाची। अहंशब्दः प्रत्यगात्मवाची। तावहरहंशब्दौ क्रमेणादित्यचाक्षुषपुरुषयोर्नामनी इति स्थितिः। तत्र संशयः, किमस्यां सत्यविद्यायां नाम्नोर्व्यवस्थया ध्यानं कर्तव्यम्, उत नामद्वयस्य पुरुषद्वयेऽप्युपसंहार इति। पूर्वपक्ष उपसंहारः फलम्, सिद्धान्ते त्वनुपसंहार इति। तत्र दृष्टान्तसङ्गत्या पूर्वपक्षयति "सम्बन्धात्" इति। यथा शाण्डिल्यविद्यायामेकशाखायां विभागेनाधीतायामेकविद्यात्वसम्बन्धादन्योन्यं गुणोपसंहारः पूर्वमुक्तः, एवमन्यत्रापि सत्यविद्यायां भवितुं युक्तम्, एकविद्यात्वसम्बन्धात्, इत्यर्थः॥

समाधत्ते।

न वा विशेषात्॥ ३। ३। २१॥

नैव नामद्वयस्य पुरुषद्वय उपसंहारः, विद्यैक्येऽप्यध्यात्मादित्यरूपस्थानविशेषादित्यर्थः। तथाहि। "य एष एतस्मिन्मण्डले पुरुषस्तस्याहरिति नाम" इत्युक्ते तस्येति

तच्छब्देनादित्यमण्डलावच्छिन्नस्यैव परामर्शात्तस्यैवाह-र्नामत्वं युक्तम् । एवमहंनामत्वं चाक्षुषपुरुषस्यैव चक्षूरूप-स्थानविशेषावच्छिन्नस्यैव तच्छब्देन परामर्शादिति । त-स्मादनयोर्नाम्नोर्व्यवस्थितिः ॥

दर्शयति च ॥ ३ । ३ । २२ ॥

किञ्च विद्यान्तरे "हिरण्यश्मश्रुः" इत्यादिनाऽऽ-दित्यपुरुषस्य रूपमुक्त्वा तद्रूपमक्षिपुरुषेऽतिदिशति "तस्यै-तस्य तदेव रूपं यदमुष्य रूपम्" इति । अयमतिदेश इत-रत्र सत्यविद्यास्थले स्थानभेदान्नोपसंहार इति दर्शयति । अन्यथा स्थानभेदेऽपि गुणोपसंहाराङ्गीकारेऽयमतिदेशो निरर्थक एव स्यादिति । तस्मान्नाम्नोर्व्यवस्थेति सिद्धम् ॥

सम्भृतिद्युव्याप्त्यपि चातः ॥ ३ । ३ । २३ ॥

परिशिष्टोपदेशात्मकाखिलग्रन्थेषु श्रूयते "ब्रह्मज्ये-ष्ठा वीर्या सम्भृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान" इति । वीर्या वीर्याणि पराक्रमविशेषरूपाणि वियदादीनि ब्रह्मैव ज्येष्ठमनन्यापेक्षकारणं येषां तानि ब्रह्मज्येष्ठानि । लौकि-केश्वरवीर्याणां बलवद्भिर्मध्ये भङ्गः सम्भवति, ब्रह्मवीर्याणां तु नैवमित्याह "सम्भृतानि" इति । पूर्वाधिकेन ब्रह्मणा निर्विघ्नं सम्भृतानीत्यर्थः । तच्च ज्येष्ठं ब्रह्माग्र इन्द्रादिज-न्मतः प्रागेव दिवं स्वर्गमाततान व्याप्तवत् । नित्यमेव सर्वव्यापकमित्यर्थः । एवं सम्भृतिद्युव्याप्त्यादयो गुणा ब्रह्मणः श्रूयन्ते । तत्र संशयः, किं तेषां गुणानां तदीयो-पनिषद्विहितशाण्डिल्यादिब्रह्मविद्यासूपसंहारः, उत तद्गु-णविशिष्टोपासनं पृथगेवात्र विधीयत इति । तत्रोपसंहार इति प्राप्ते, पूर्वोक्तन्यायमतिदिशति "सम्भृती"ति ।

सम्भृतिश्च द्युव्याप्तिश्च सम्भृतिद्युव्याप्ति । यथा स्थानभेदा-न्नाम्नोर्व्यवस्था, एवं सम्भृत्यादयोऽपि शाण्डिल्यादिवि-द्यासु नोपसंह्रियन्ते । अत एव, स्थानभेदादेवेत्यर्थः । शाण्डिल्यादिविद्यासु हृदयायतनत्वं ब्रह्मणः श्रुतम् । नैव तत्र तस्मात्सम्भृत्यादिगुणविशिष्टमुपासनान्तरमिति सि-द्धम् । अस्यातिदेशत्वान्न पृथक्सङ्गत्याद्यपेक्षा ॥

पुरुषविद्यायामिव चेतरेषामनाम्ना-नात् ॥ ३ । ३ । २४ ॥

अस्ति ताण्डिनां पैङ्गिनां च रहस्यब्राह्मणे पुरुषवि-द्या । तत्र पुरुषो यज्ञत्वेन कल्पितः । तदीयमायुस्त्रेधा वि-भज्य सवनत्रयं कल्पितम् । तस्य यानि चतुर्विंशतिवर्षाणि तत्प्रातःसवनम् । ततः पराणि चतुश्चत्वारिंशद्वर्षाणि माध्यन्दिनं सवनम् । ततः पराण्यष्टाचत्वारिंशद्वर्षाणि तृतीयं सवनम् । पुरुषविद्याविदः षोडशोत्तरशतवर्षजी-वित्वादिति । पिपासादिकं दीक्षात्वेन कल्पितम् । तैत्ति-रीयकेऽपि "तस्यैवंविदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्म"मित्यादिना पुरुषयज्ञः श्रूयते । तत्र संशयः, किमनयोर्विद्ययोरन्योन्यं गुणोपसंहारोऽस्ति न वेति । तत्र पूर्वं यदुक्तं सम्भृत्यादिगुणाः शाण्डिल्यवि-द्यासु नोपसंह्रियन्त इति, युक्तं हि तत्, असाधारणगुण-प्रत्यभिज्ञानाभावात् । इह तु मरणस्यावभृथत्वेन कल्पि-तस्य गुणस्योभयत्र सत्त्वेन प्रत्यभिज्ञानाद्गुणोपसंहारो युक्तः । इति प्रत्युदाहरणेन प्राप्ते ब्रूमः । नान्योन्यं गुणो-पसंहारः, उपास्यरूपभेदात् । तदाहाचार्यः "पुरुषे"ति । ताण्ड्यादिशाखास्थपुरुषविद्यायां यथा गुणाम्नानं तथेतरेषां

तैत्तिरीयकाणां पुरुषविद्यायां गुणाज्ञानाभावादित्यर्थः । अन्यत्र पुरुष एव यज्ञत्वेनोपास्यः, तैत्तिरीयके तु विदुषः पुरुषस्य प्रसिद्धो यो यज्ञस्तस्य पुरुषात्मादिषु यजमानत्वादिकल्पनयोपास्यत्वात् । एवं बहुतर उपास्यभेदो दृश्यते । तद्भेदाच्च विद्याभेदान्नान्योन्यं गुणोपसंहार इति । यत्त्ववभृथगुणस्योभयत्र सत्त्वात्प्रत्यभिज्ञानमिति तन्न, बहुगुणभेद एकस्य प्रत्यभिज्ञापकत्वाभावादिति । किञ्च तैत्तिरीयके पूर्वमात्मविद्यामुपदिश्य तच्छेषत्वेन पुरुषयज्ञ उपदिश्यते, "तस्यैवंविदुष" इति तत्सन्निधौ श्रवणात् । अन्यत्र त्वायुर्वृद्धिफलकः पुरुषयज्ञः स्वतन्त्रः । इत्यनयोर्भेद एव न्याय्य इति ॥

वेधाद्यर्थभेदात् ॥ ३ । ३ । २५ ॥

अस्त्याथर्वणिकानामुपनिषदारम्भे मन्त्रपठनं "सर्वं प्रविध्य हृदयं प्रविध्य धमनीः प्रवृज्य शिरोऽभिप्रवृज्य त्रिधा विपृक्तः" इत्यादि । ताण्डिनां "देव सवितः प्रसुव" इत्यादि । शाट्यायनिनां "श्वेताश्वो हरितनीलोऽसि" इत्यादि । तैत्तिरीयकाणां "शं नो मित्रः" इत्यादि । वाजसनेयिनां तूपनिषदारम्भे प्रवर्ग्यब्राह्मणं पठ्यते "देवा ह वै सत्रं निषेदुः" इत्यादि । कौषीतकिनामग्निष्टोमब्राह्मणं "ब्रह्म वा अग्निष्टोमो ब्रह्मैव तदहर्ब्रह्मणैव ते ब्रह्मोपयन्ति तेऽमृतत्वमाप्नुवन्ति य एतदहरुपयन्ति" इत्यादि । अयमर्थः । आभिचारिककर्मदेवतामभिचारकर्ता प्रार्थयते । हे देवते मद्रिपोः सर्वमङ्गं प्रविध्य विदारय । हृदयं च विदारय । धमनीः शिराः प्रवृज्य भिन्धि । तस्य शिरश्चाभितो भिन्धि । एवं मद्रिपुस्त्रिधा विपृक्तो विश्लि-

Digitized by Google

ष्टो भवस्त्वित्यर्थः। हरित इन्द्रनीलः। तद्वन्नीलोऽसीतीन्द्रः सम्बोध्यते। मित्रः सूर्यः शं सुखकरो भूयादिति विद्याऽर्थ्याशास्ति। अग्निष्टोमो ब्रह्मसत्रम् । स यस्मिन्नहनि क्रियते तदहरपि ब्रह्म। ततो य एतदहरुपयन्त्यहर्निर्वर्त्यं कर्मानुतिष्ठन्ति ते ब्रह्मणैव साधनेन ब्रह्म परमुपयन्ति। ते क्रमेणामृतत्वं मुक्तिमाप्नुवन्तीत्यर्थः । तत्र संशयः, किमिमे "सर्वं प्रविध्य" इत्यादयो मन्त्राः प्रवर्ग्यादीनि च कर्माणि तत्तदुपनिषदुक्तविद्यासूपसंह्रियेरन्न वेति। तत्र पूर्वं यथा पुरुषयज्ञस्यात्मविद्यासन्निधानात्तच्छेषत्वं, तथा मन्त्राणां कर्मणां च तत्तद्विद्यासन्निधानात्तच्छेषत्वेनोपसंहारोऽस्तीति दृष्टान्तेन प्राप्ते, ब्रूमः।नैषामुपसंहारो विद्यासु। कुतः। वेधाद्यर्थभेदात्, सर्वं प्रविध्य" इत्यादिमन्त्रप्रकाशितानां वेधादीनामर्थानामभिचारकर्मादिसमवेतानां भेदात्, विद्यास्वसमवेतत्वादित्यर्थः। तथा चाभिचारकर्मादिसमवेतार्थप्रकाशनसामर्थ्यलक्षणलिङ्गं सन्निधिं दुर्बलं तिरस्कृत्य मन्त्राणामभिचारादिकर्माङ्गत्वं सम्पादयतीति न विद्याशेषत्वम् । प्रवर्ग्यादिकर्मणां सन्निधेर्बलीयसा श्रुत्यादिना ज्योतिष्टोमादौ विनियुक्तानां न विद्याशेषत्वमिति भावः॥

हानौ तूपायनशब्दशेषत्वात्कुशाछन्दःस्तुत्युपगानवत्तदुक्तम्॥ ३। ३। २६॥

ताण्डिनां रहस्ये श्रूयते "अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामि" इति। तथैवाथर्वणश्रुतिः "तथा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति"इति। यथाऽश्वो जीर्णानि रोमाणि रजोभिः

सह त्यक्त्वा स्वच्छो भवति, एवमहमपि पापं सर्वं विधूय निर्मलः सन्, यथा वा चन्द्रो राहोर्मुखात्प्रमुच्य भास्वरो भवति, एवमकृतं प्रवाहरूपेणानादिसिद्धं शरीरं धूत्वा त्यक्त्वाऽतिस्वच्छः सन्, कृतात्मा कृतकृत्यो ब्रह्मात्मकं लोकमभिसम्भवाम्यभिमुखेन प्रत्यक्त्वेन प्राप्नोमीत्यर्थः। तथा शाट्यायनिनः पठन्ति "तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यं द्विषन्तः पापकृत्यम्" इति। तस्य मृतस्य विदुष इत्यर्थः। तथैव कौषीतकिनः पठन्ति "तत्सुकृतदुष्कृते विधूनुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्त्यप्रिया दुष्कृतम्" इति। तत्तेन विद्याबलेन विद्वान्सुकृतदुष्कृते विधूनुते त्यजति। त्यक्तयोस्तयोर्विनियोगमाह "तस्ये" ति। तस्मादुपासको न द्वेष्य इति श्रुतितात्पर्यम्। तत्र शाट्यायनिश्रुतावुपादानमात्रं पुण्यपापयोः श्रुतम्। तच्च विदुषस्त्यागं विना न सम्भवतीति पुण्यपापत्याग आक्षिप्यते। यत्र तु ताण्ड्याथर्वणवाक्यद्वये पुण्यपापत्यागमात्रं श्रुतं, तत्र किं त्यक्तयोरुपादानमन्यत्र श्रुतमत्रोपसंह्रियते न वेति सन्दिह्यते। पूर्वपक्षे विद्यायाः स्तुतिप्रकर्षासिद्धिः फलम्, सिद्धान्ते तूपादानस्यात्रोपसंहाराद्विद्यास्तुतिप्रकर्षसिद्धिः। उपासककृतविद्यास्तुत्यर्थं हि श्रुतावुपासकः पुण्यपापे त्यजति ते चान्यैरुपादीयेते इत्युच्यते। सा च स्तुतिः सत्तागुणेन। तथा चोपास्यगुणोपसंहारप्रसङ्गेन विद्यास्तुत्यर्थं गुणोपसंहारो विचार्यत इति प्रासङ्गिकी पादसङ्गतिः। तत्र यथा पूर्वं विद्यासन्निधौ श्रुतस्यापि मन्त्रादेर्विद्यायामसामर्थ्यादनुपसंहार उक्तः, एवं क्वचित्कौषीतकिरहस्ये हीनसन्निधौ श्रुतस्याप्युपादानस्योपादानमन्त्रेणापि तूष्णीं हानसम्भवेन हानस्योपादानोपपादन-

सामर्थ्याभावान्नोपसंहार इति दृष्टान्तेन प्राप्ते ब्रूमः । तुः कैवल्यवाची । तथा च केवलहानौ श्रुतायां सत्यां तत्रोपादानमुपसंहर्तव्यम् । कुतः । उपायनशब्दशेषत्वात् । अश्वरोमविधूननदृष्टान्तेनोक्तस्य पुण्यपापहानस्य नाशत्वाभावेन विधूतयोः पुण्यपापयोरन्यत्रावस्थानरूपोपायनसापेक्षत्वादुपायनं क्वचिदपि हानसन्निधौ श्रूयमाणं केवलहानश्रवण आयाति । पुण्यपापहानेनापेक्षितस्योपादानात्मकस्योपायनस्य तद्धानशेषत्वादित्यर्थः । ज्ञानात्पूर्वयोः पुण्यपापयोर्नाश उत्तरयोरश्लेष इति फलाध्याये वक्ष्यते । अतो हानं विद्वद्भोग्यत्वाभावः, तत्तुल्यकर्मप्राप्तिरुपादानमिति फलतो द्रष्टव्यम्, अमूर्तयोः पुण्यपापयोरन्यत्रसञ्चारात्मकोपादानस्य मुख्यस्यायोगात् । सूत्रे शब्दशब्देन हानावुपायनोपसंहारस्य स्तुत्यर्थत्वं सूचितमिति बोध्यम् । शाखाऽन्तरस्थो विशेषः शाखाऽन्तरेऽप्यपेक्षित उपसंहरणीय इत्यत्र दृष्टान्तमाह "कुशाछन्दः" इत्यादिना । तत्र कुशादृष्टान्तो यथा । "कुशा वानस्पत्याः स्थ" इत्यादौ भाल्लविनां श्रुतौ, हे कुशाः समिद्रूपा यूयं वानस्पत्याः स्थ मां यजमानं रक्षतेति यजमानप्रार्थने, वनस्पतियोगित्वेन सामान्यसमिच्छ्रवणे, शाट्यायनिनामौदुम्बरा इति शाखाऽन्तरीयो विशेष आश्रितः "औदुम्बराः कुशाः" इति । छन्दोदृष्टान्तो यथा । "छन्दोभिः स्तुवते" इत्यत्र देवासुरच्छन्दसामशेषेण पौर्वापर्यप्रसङ्गे, "देवच्छन्दांसि पूर्वाणि" इति पैङ्गिश्रुत्या निर्णयः । स्तुतिदृष्टान्तो यथा । षोडशिनः पात्रविशेषस्य ग्रहणेऽङ्गभूतं स्तोत्रं कदा कर्तव्यमित्याकाङ्क्षायां, छन्दोगानां कालाविशेषप्राप्तौ, "समयाध्युषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोति" इति तैत्तिरीय-

कवाक्यात्कालविशेषधीर्भवति । एवम्भूताया आर्चानां श्रुतेर्वा कालविशेषधीरिति । उपगानदृष्टान्तो यथा । "ऋत्विज उपगायन्ति" इति सामान्यवाक्यं शाखान्तरीयं "नाध्वर्युरुपगायति" इति विशेषमपेक्ष्य, अध्वर्युवर्जिता ऋत्विज उपगायन्तीत्येतदर्थपरतया निश्चीयत इति-तथा च, यथा कुशादिषु श्रुत्यन्तरगतविशेषान्वयः, तथा हानावुपायनान्वय इत्यर्थः। कुशादिसामान्यश्रवणं शाखान्तरीयविशेषसापेक्षमित्यङ्गीकर्तव्यम् । निरपेक्षत्वेऽष्टदोष(क)दुष्टविकल्पः स्यात् । इदं च सामान्यवाक्यस्य विशेषसापेक्षत्वं जैमिनेरपि सम्मतमित्याह "तदुक्त"मिति । पूर्वमीमांसायां जैमिनिना तदुक्तमित्यर्थः । तथाहि "अपि तु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य विधीनामेकदेशः स्यात्" इति जैमिनिसूत्रम् । अस्यार्थः । "आश्रावय" इति चतुरक्षरं, "अस्तु श्रौषट्" इति चतुरक्षरं, "यज" इति द्व्यक्षरं, "ये यजामहे" इति पञ्चाक्षरं, द्व्यक्षरो वषट्कारः, "एष वै सप्तदशः प्रजापतिर्यज्ञमन्वायत्तः" इत्यनारभ्याधीतवाक्यं श्रुतम् । "नानुयाजेषु येयजामहं करोति" इति विशेषवाक्यं तस्य वाक्यस्य शेषः स्यात् । तथा च नञः पर्युदासार्थतयाऽनुयाजव्यतिरिक्तेषु यज्ञेषु सप्तदशाक्षरा गणाः प्रयोक्तव्या इत्येको विधिर्भवति । नञो निषेधकत्वेन सामान्यवाक्यं विशेषानपेक्षम् । तदा सामान्यवाक्येन विहितस्य गणस्य निषेधादनुयाजेषु तस्य विकल्पः स्यात् । स चान्याय्यः, विधीनामेकदेश एव

(क) अप्राप्तस्य प्राप्तिः १ । प्राप्तस्य निषेधः २ । प्रमाणस्याप्रामाण्यम् ३ । अप्रमाणस्य स्वीकारः ४ । श्रुतस्य हानिः ५ । अश्रुतस्य परिग्रहः ६ । स्वीकृतस्यास्वीकारः ७ । अस्वीकृतस्य स्वीकारः ८ ॥

Digitized by Google

ॐ परमात्मने नमः ॥

न्यायसिद्धान्तमञ्जरी ।

भट्टाचार्यचूडामणिजानकीनाथविरचिता ।

श्रीयादवाचार्यविरचितन्यायमञ्जरी-

साराख्यटीकासहिता ।

प्रणम्य परमात्मानं जानकीनाथशर्म्मणा ।
क्रियते युक्तिमुक्ताभिर्न्यायसिद्धान्तमञ्जरी ॥ १ ॥

श्रीगणेशाय नमः ॥ श्रीविश्वेशपदारक्तपद्मद्वन्द्वं निरन्तरम् । ध्यात्वा गङ्गां तथा दुर्गां स्वाभीष्टं साधयाम्यहम् ॥ १ ॥ भट्टाचार्यचक्रवर्त्तिरामकृष्णं जगद्गुरुं । श्रीमद्व्यासनृसिंहं च नतग्रीवो नमाम्यहम् ॥ २ ॥ श्रीमद्व्यासनृसिंहानां सूनुः करोति यादवः । श्रीवत्सबालकृष्णस्य मञ्जरीकौतुकं कृते ॥ ३ ॥ दोषबुद्धिर्न कर्त्तव्या नूतने कौतुके मम । न दुष्टो नूतनश्चन्द्रो निखिलैर्वन्द्यतेऽपि सः ॥ ४ ॥ शिवचरणसरोजद्वन्द्वमालम्बितस्त्वे त्रिभुवनविवरे किं किं न शक्यं जनानाम् । अहमपि सततं तं विश्वनाथं भजामि तदिह नवनिबन्धे नोपहासो मदीयः ॥ ५ ॥ सर्व्वेषु कार्येषु महेश्वरस्य हेतुत्वसिद्धौ यदहं तु गौणः । अमानभिज्ञाः पुरुषाधमा ये निन्दन्ति निदन्तु कृतिं मदीयाम् ॥ ६ ॥ प्रारब्धकर्मप्रतिबन्धकीभूतदुरितनिवृत्तये कायवाङ्मनोभिः कृतं परमात्मनमस्कारं शिष्यशिक्षायै निबन्धन् प्रेक्षावत्प्रवृत्त्यर्थं प्रतिपाद्यमाह । प्रणम्येति। प्रणम्य भक्तिश्रद्धारूपातिशयपूर्वकं नमस्कृत्य । भक्तिश्चाराध्यत्वेन ज्ञानं। श्रद्धा च फलावश्यंभावनिश्चयः। ईदृशातिशयस्य प्रशब्दो द्योतको न तु वाचक इति । द्योतकत्वं तात्पर्यग्राहकत्वं । विवेचयिष्यते चेदं शब्दमञ्जरीकौतुके । परमेति । परमश्चासावात्मा च परमात्मा । अत्र परमत्वं भ्रमरहि-

तत्त्वं । तथा च परमात्मानं भ्रमरहितात्मानमित्यर्थः घटादेर्भ्रमरहितत्वादात्मपदं । क्षेत्रज्ञस्य भ्रान्तत्वात्परमपदं । एतेन परमत्वं सर्वज्ञत्वमिति परास्तं । कर्मधारयस्थपदद्वयस्य व्यावर्त्तकत्वनियमेनात्मपदवैयर्थ्यापातात् । ननु यथात्ममनःसंयोगाधिकरणमात्मा तथा मनोपीति मनसि सुखोत्पत्तिः स्यादतः समवायसंबन्धेन यत्र सुखं तत्र तादात्म्यसंबन्धेनात्मेति । सुखसमवायिकारणतावच्छेदकत्वेन सिद्धमात्मत्वं कथमीश्वरे भविष्यतीति चेन्न । ज्ञानवत्त्वरूपात्मत्वस्यात्र विवक्षितत्वात् । एतेन शिवे तादृशात्मत्वाभावप्रयुक्तदशमद्रव्यत्वापत्तिरपि निरस्ता । यद्वा जीवात्मनि सिद्धस्यात्मत्वस्यात्मपदशक्यतावच्छेदकत्वे सिद्धे परमात्मन्यपि श्रुत्यादिभिरात्मपदप्रयोगादीश्वरेऽपि तदेवात्मत्वं बोध्यम् । न च सुखसमवायिकारणतावच्छेदकात्मत्वस्योभयत्र सत्त्वाज्जीव इव शिवेऽपि कथं न सुखाद्युत्पत्तिरिति वाच्यम् । धर्मादिरूपकारणविरहात् । नित्यस्य स्वरूपयोग्यस्य फलावश्यंभावनियम इति व्याप्तौ प्रमाणाभाव इति संक्षेपः । ननु मङ्गलस्य कारणता विघ्नध्वंसं प्रति समाप्तिम्प्रति वा नान्वयव्यतिरेकसहकृतप्रत्यक्षगम्या सत्यपि मङ्गले कादम्बर्यादौ समाप्तेरभावाद्विनापि मङ्गलं प्रमत्तनास्तिकानुष्ठितग्रन्थे निर्विघ्नसमाप्तिदर्शनाच्चेति चेन्न । मङ्गलं सफलं अविगीतशिष्टाचारविषयत्वात् । दर्शवदित्यनुमानेन मङ्गलस्य सफलत्वे सिद्धे फलजिज्ञासायां विश्वजिन्न्यायात्स्वर्गफलकल्पने गौरवात् समाप्तिरूपदृष्टफलकत्वं कल्प्यते । तथा च सत्यपि मङ्गले यत्र न समाप्तिस्तत्र विघ्नप्राबल्यं विघ्नबाहुल्यं वा कल्प्यते । बहुतरविघ्नानां प्रबलविघ्नस्य वा बहुतरमङ्गलनाश्यत्वात् । न च तथाऽपि कादम्बर्यादौ प्रतिबन्धकसत्त्वे तावती कादम्बरी कथं जातेति वाच्यम् । विघ्नानां साक्षाद्विरोधित्वाभावात् । किं तु स्वजन्यनृपाद्युपद्रवद्वारा । तथा च मङ्गलाद्यावत्कालीनोपद्रवकादृष्टनाशस्तावत्कालं कादम्बरी जाता पुनरग्रे विघ्नात्प्रतिबन्धो जात इति । एवं च बहुतरविघ्नशङ्कयाऽपि बहुतरमङ्गलाचरणं तदुक्तमाचार्यैः न हि घनमुक्तमुद्गरमेकस्तृणस्तम्भो न निवारयतीति तस्यमुद्रितं नोपादेयमिति । न च विघ्नसन्देहे कथं मङ्गलाचरणमिति वाच्यम् ।

विघ्नसन्देहे ऽपि तदा करणस्योचितत्वात् । अत एव शङ्कितानिष्टनिवारणाय प्रवर्त्तन्ते परीक्षका इति सङ्गच्छते तदुक्तमाचार्यैः । अन्यथानुपस्थितपरिपन्थिभिः पार्थिवैर्दुर्गरक्षयूथपतयो नाद्रियेरन्निति । प्रमत्तानुष्ठितग्रन्थे च जन्मान्तरीयमङ्गलकल्पनाच्च दोषलेशो ऽपीति संक्षेपः । अत्र नव्याः तृणारणिमणिन्यायेन विघ्नध्वंसविशेष एव मङ्गलस्य फलं विघ्नध्वंसविशेषान्तरं च विनायकस्तवपाठादेः फलं । समाप्तिस्तु विघ्नसंसर्गाभावादिकारणकलापजन्या । अत एव स्वतःसिद्धविघ्नविरहस्थले न दोषः । तत्र विघ्नात्यन्ताभावस्य सत्वात् । न च स्वतःसिद्धविघ्नविरहस्थले मङ्गलेन विघ्नध्वंसाजननात् तद्बोधकवेदाप्रामाण्यमिति वाच्यम् । सति दुरिते प्रायश्चित्तनाश्यत्ववत्सति विघ्ने मङ्गलनाश्यत्वस्य वेदबोधितत्वादिति । प्रमत्तानुष्ठितग्रन्थे च जन्मान्तरीयमङ्गलजन्यस्य जन्मान्तरीयविनायकस्तवपाठादिजन्यस्य वा विघ्नध्वंसस्य स्वतःसिद्धविघ्नविरहस्य वा सत्वाच्च दोष इत्याहुः । भ्रान्तप्रलपितत्वशङ्कानिरासाय स्वस्य ग्रन्थस्य च नाम निबध्नाति जानकीनाथेति । युक्तिमुक्ताभिरिति युक्तय एव मुक्ताः युक्तिमुक्तास्ताभिरित्यर्थः । तथा च यथा मुक्ताभिर्निर्मितं वस्तु पुण्यजनैः प्राप्यं तथा युक्तिमुक्ताभिर्निर्मिता मञ्जरी पुण्यजनैर्लभ्येति ध्वनितम् । न्यायसिद्धान्तमञ्जरीति नीयते प्राप्यते विवक्षितो ऽर्थः पञ्चावयववाक्यरूपः स न्यायस्तेषां मञ्जरी तथा च न्यायसिद्धान्तप्रतिपादिका मञ्जरी । तथा च न्यायसिद्धान्ता एवात्र प्रतिपाद्याः न्यायसिद्धान्तग्रन्थयोः प्रतिपाद्यप्रतिपादकभावः संबन्ध इति दर्शितम् ।

इह किल निखिललोकविमोक्षमुख्योपायं मननोपायमात्मनस्तत्त्वज्ञानमामनन्ति ।

प्रयोजनं दर्शयितुमाह इह किलेत्यादि । अत्र वा धर्मार्थकाममोक्षेषु चतुर्षु पुरुषार्थेषु मोक्ष एव परमपुरुषार्थः । सचात्मतत्त्वज्ञानाधीनस्तत्त्वज्ञानं प्रमाणाधीनमित्याह इह किलेत्यादिना । इह लोके किलेति वाक्यालङ्कारे निखिला ये लोकास्तेषां यो विमोक्षः नित्यसुखाभि-

र्थ्यत्तिरूपः । आत्यन्तिकदुःखध्वंसो वा मोक्षस्तदुपायं तद्धेतुभूतं । मननं उपायो यस्य तन्मननोपायं । एतादृशं यदात्मनस्तत्वज्ञानं तदामनन्ति इच्छन्ति । ननु निखिललोकान्तर्गतानां शूद्राणामध्यापने ग्रन्थकर्त्तुर्मुनेश्चप्रत्यवायः स्यात् गुरुनिगदितशब्दप्रयोज्यार्थज्ञानमध्ययनं तत्प्रयोजकत्वं चोभयोरस्त्येवेति चेन्न । अध्यापकत्वस्य तच्छरीरावच्छिन्नोद्देश्यकशब्दप्रयोक्तृत्वरूपत्वात् । अत एव चैत्रमुद्दिश्य गुरुणा ऽध्यापने विधीयमानेऽदासीनमैत्रेणाश्रवणे मैत्रस्य नाध्ययनकर्तृत्वव्यवहारः । न च ग्रन्थस्य निखिलोद्देश्यत्वे शूद्रोद्देश्यता केन वार्य्येति वाच्यम् । शूद्रोपलक्षितात्मनोऽपि ब्राह्मणशरीरपरिग्रहदशायामुद्देश्यतायाः सत्वात् इति संक्षेपः । तदुक्तं प्रत्यक्षदीधितौ शिरोमणिभट्टाचार्य्यैः 'उद्देश्यता तु कीटपतङ्गादीनामपीति' अत्र मोक्षो मुख्यं प्रयोजनं । व्युत्पत्तिरवान्तरप्रयोजनं । प्रयोजनकामो मुमुक्षुः परमोऽधिकारी । अवान्तरो व्युत्पित्सुरित्यनुबन्धचतुष्टयो बोध्याः । अनुबन्धाश्च विषयप्रयोजनसम्बन्धाधिकारिणः । विषयश्च प्रतिपाद्यार्थरूपः प्रयोजनं च यदुद्दिश्यपुरुषः प्रवर्त्तते तत् । सम्बन्धः प्रतिपाद्यप्रतिपादकभावरूपः । प्रयोजनकामो ऽधिकारीति । तज्ज्ञानं विना प्रेक्षावतां प्रवृत्त्यभावात्तत्प्रदर्शनमावश्यकमिति दिक् । अत्र मोक्षः स्वसमानाधिकरणदुःखप्रागभावेनासमानकालीनं यद्दुःखं तस्य ध्वंसो न तु तादृशासमानकालीनो दुःखध्वंसः चरमदुःखोत्पत्तिदशायां दुःखप्रागभावासमानकालीनोपान्त्यदुःखध्वंसेऽति व्याप्तेः । उपान्त्यदुःखस्य तु चरमदुःखप्रागभावसमानकालीनत्वाद्विवक्षिते तु न दोषः । दुःखध्वंसो मोक्षइत्युक्ते चैत्रादीनामिदानींतनदुःखध्वंसे ऽतिव्याप्तेरत उक्तं दुःखप्रागभावासमानकालीनेति दुःखविशेषणम् । न च तद्वारणार्थं दुःखासमानकालीनत्वेन दुःखध्वंसो विशेष्यतामिति वाच्यम् । सुषुप्तिदशायां मुक्तित्वापत्तेः । मुक्तिप्रतियोगिनः शुकदुःखस्यास्मादृशदुःखप्रागभावसमानकालीनत्वात्तदीयमुक्तावव्याप्तिरत उक्तं स्वसमानाधिकरणेति दुःखप्रागभावविशेषणं । एवं मुक्तिः तत्प्रतियोगि दुःखं । नन्विदमयुक्तं मोक्षस्य नित्यसुखाभिव्यक्तिरूपत्वात् । न च नित्ये सुखे मानाभाव इति वाच्यम् । नित्यवि-

ज्ञानमानन्दं ब्रह्म । आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमिति श्रुतेर्मानत्वादिति चेन्न । अभिव्यक्तेर्नित्यत्वे मुक्तसंसारिणोरविशेषापत्तेः । न चानित्यत्वमपि शरीरं विना तदुत्पत्तेरसम्भवात् ज्ञानमात्रे सुखमात्रे च शरीरस्य हेतुत्वात् । अत एव स्वर्गीय शरीरकल्पनापि संगच्छते । तथा चानन्दं ब्रह्मणो रूपमित्यादावानन्दपदेनानन्दवद्बुध्यते तेन सहाभेदबोधः । अन्यथाऽऽनन्दमित्यत्र मत्वर्थीयाद्प्रत्ययान्तत्वेन नपुंसकतानुपपत्तिरिति । विवेचयिष्यते चेदमुपरिष्टात् ।

तच्च प्रमाणाधीनमिति प्रमाणन्निरूप्यते तत्र प्रमायाः करणं प्रमाणं प्रमा च यथार्थानुभवः । तदाहुराचार्याः 'यथार्थानुभवो मानमिति' ।

तच्च तत्त्वज्ञानं प्रमाणाधीनमिति । अयमर्थः । प्रमाणैः पदार्थान्विविच्य श्रुतिस्मृतीतिहासपुराणोक्तविधिना निरवच्छिन्नतया बहुकालसेवितनिवृत्तिलक्षणधर्मादेव तत्त्वज्ञानं जायते । तत्त्वज्ञानाच्च मोक्ष इति । तत्र प्रमाणे निरूपणीये । कर्मधारयादिभ्रमनिरासाय षष्ठीतत्पुरुषेण व्याचष्टे प्रमाया इति । माकरणमित्युक्ते दुष्टेन्द्रियेऽतिव्याप्तिः । दुष्टेन्द्रियस्य भ्रमजनकत्वादतः प्रपदमुक्तम् । करणं प्रमाणमित्युक्ते कुठारेऽतिव्याप्तिरत उक्तं प्रमाया इति । प्रमाकारणमित्युक्ते चक्षुः संयोगादावतिव्याप्तिरत उक्तं करणमिति । ननु उत्पत्तिकाभिन्नो घटो गन्धवान् पृथिवीत्वादित्यादौ भ्रमानुमिति करणे सदनुमानेऽव्याप्तिरिति चेन्न । प्रमाकरणवृत्तिप्रमाणविभाजकोपाधिमत्त्वस्य विवक्षितत्वात् द्वितीयक्षणे प्रमानुमितेरपि जनकत्वाच्च ।

नन्वितरभेदसाध्यकानुमितौ लक्षणं हेतुरिति सकलवादिसिद्धं तच्चात्र न सम्भवति । तथाहि । व्याप्तिज्ञानेन हेतुसाध्यसामानाधिकरण्यं विषयी क्रियते । अनुमित्या तु पक्षतावच्छेदकसाध्यसामानाधिकरण्यमिति सकलवादिसिद्धं । तच्च प्रमाकरणत्वलक्षणरूपहेतुनेतरभेदसाधने यदि प्रमाणत्वं पक्षतावच्छेदकं तर्हि पक्षतावच्छेदकहेत्वोरैक्यादव-

नुमित्या कर्तव्यं तद्व्याप्तिज्ञानेनैव कृतमिति सिद्धसाधनमिति चेन्न । प्रमाणत्वेन व्यवहर्तव्यत्वस्यैव पक्षतावच्छेदकत्वात् । तथा च प्रमाकरणत्वरूपहेतुपक्षतावच्छेदकयोर्भेदात् । साध्यनिष्ठविधेयतानिरूपितपक्षतावच्छेदकनिष्ठधर्मितावच्छेदकीयविषयिताया व्याप्तिज्ञानेऽभावात् न सिद्धसाधनमिति । प्रमालक्षणघटकीभूता प्रमाकेत्यत आह प्रमा चेति । ज्ञानं प्रमेत्युक्ते भ्रमेऽतिव्याप्तिस्तद्वारणाय यथार्थेति । स्मृतावतिव्याप्तिवारणायानुभवेति । ननु यथार्थज्ञानस्यैव प्रमात्वमस्तु किमनुभवपदेन । न च स्मृतेः प्रमात्वनिवृत्त्यर्थं तदिति वाच्यम् । तस्या अपि प्रमात्वे बाधकाभावादिति चेन्न । स्मृतिरूपविलक्षणप्रमाकरणप्रमाणान्तरकल्पनापत्तेरित्यभिप्रायवानाचार्यसंमतिमाह तदाहुरिति । मानं मितिः । यद्वा मानजन्यं प्रमात्मकं ज्ञानमित्यर्थः । वयं तु तदभाववद्विशेष्यकत्वे सति तत्प्रकारकत्वं भ्रमत्वं तद्भिन्नानुभवत्वं प्रमात्वमिति निर्विकल्पकस्यापि संग्रहः तथा च भ्रमभिन्नानुभवकरणं प्रमाणमिति ब्रूमः ।

ननु किमिदं याथार्थ्यं किञ्चानुभवत्वं उच्यते तद्वति तदवगाहित्वं याथार्थ्यं । भवति हि रजते इदं रजतमिति ज्ञानं रजतत्ववति तदवगाहीति यथार्थं । शुक्ताविदं रजतमिति ज्ञानञ्च न रजतत्ववति तदवगाहीति न यथार्थं । नन्वेवं रजते इदं रजतन्नवेति संशयोऽपि प्रमास्यादिति चेत्सत्यं । रजतत्वांशे प्रमैव तद्वति तदनुभवस्तत्प्रमेति प्रामाणिकाः । शाखावच्छेदेन कपिसंयोगवति वृक्षे । मूले वृक्षः कपिसंयोगीति प्रत्ययोऽपि प्रमास्यात्कपिसंयोगवति वृक्षे तदवगाहित्वादिति चेन्न । वृक्षे कपिसंयोगप्रत्ययः प्रमैव मूले ऽवच्छेदकत्वप्रत्ययस्तु न तथा तस्य तदनवच्छे-

दकत्वात् स्मृतिभिन्नज्ञानत्वमनुभवत्वं जातिविशेषो वा । अनुभवामीति प्रतीतेर्बाधकं विना जाति विषयत्वात् ।

तद्वतीति । अत्र विशेष्यत्वं सप्तम्यर्थः ॥ तेन ज्ञानवृत्तितत्प्रकारकत्वस्य रजतादिस्मृतित्वेऽपि न क्षतिः । तथा च तद्वति रजतत्ववद्विशेष्यकत्वे सति तदवगाहित्वं रजतत्वप्रकारकत्वं । तदवगाहि । रजतत्वावगाहि । याथार्थ्ये व्यतिरेकं दर्शयति शुक्ताविति । एवं तद्वति तदवगाहित्वस्य यथार्थत्वे अंशे प्रमात्वव्यवस्थापनाय रजत इत्युक्तं । रजते इदं रजतं न वेति संशयो हि रजतत्वरजतत्वाभावविषयकः तत्र रजतत्वाभावाभाववति रजतत्वाभावावगाहित्वेन रजतत्वाभावांशे भ्रमत्वेऽपि रजतत्ववति रजतत्वावगाहित्वेन रजतत्वांशे प्रमैवेति समाधत्ते रजतत्वांशे प्रमैवेति । मूल इति । सप्तम्यर्थोऽवच्छेदकत्वं तथा च मूलावच्छेदेन कपिसंयोगीति प्रत्ययोऽपि प्रमात्वादित्यर्थः । न तथा न प्रमा । तस्य मूलस्य । तदनवच्छेदकत्वात् कपिसंयोगानवच्छेदकत्वात् । किञ्चानुभवत्वमित्यत्रोत्तरयति स्मृतीति । अनुमित्यादावनुभवत्वव्यवहारस्य स्मृतिभिन्नज्ञानत्वरूपोपाधिनैव निर्वाहात्साक्षात्कारत्वातिरिक्तानुभवत्वजातौ मानाभाव इति भावः । अथैवं यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरं । अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदमित्यादिवाक्यैः स्वर्गशाब्दबोधे जाते स्वर्गमनुभवामीति प्रत्ययापत्तिः । अनुभवामीति प्रतीत्याऽनुभवत्वजातिकल्पने तु तदापत्तेर्दुर्वारत्वमिति । यदि च तादृशी प्रतीतिः प्रामाणिकी तदानुभवत्वजातिनिरसनं ब्रह्मणोऽप्यशक्यम् । एवं च विशिष्टानुभवम्प्रति विशेषणधियो हेतुत्वमिति शिरोमण्युक्तमपि सङ्गच्छते अत एवाह जातिविशेष इति । अथ वा विशेषणतावच्छेदकप्रकारकनिश्चयस्य कार्यतावच्छेदकं विशिष्टवैशिष्ट्यानुभवत्वमिति तत्कार्यतावच्छेदककोटिप्रविष्टत्वेनानुभवत्वजातिसिद्धिः । तथा हि । व्याप्तिज्ञानत्वादिनैवानुमित्यादिहेतुत्वनिर्वाहे विशेषणतावच्छेदकप्रकारकनिश्चयस्य कार्यतावच्छेदकं न विशिष्टवैशिष्ट्य-

पक्षवत्त्वं यत्र साध्यस्याप्रसिद्धिस्तत्रापि साध्यतावच्छेदकविशिष्टसाध्यप्रकारकविशिष्टवैशिष्ट्यबोधरूपानुमित्यापत्तेर्दुर्वारत्वात् । विशकलितपदार्थोपस्थितावपि विशिष्टवैशिष्ट्यशाब्दबोधस्य दुर्वारत्वाच्च । अस्मन्मते तु तादृशकार्यकारणभावानुरोधात्तादृशस्थले साध्यविशेष्यिकैवानुमितिस्तत्र पक्षतावच्छेदकविशिष्टपक्षनिश्चयस्य सत्वात् । न च तादृशनिश्चयस्य कार्यतावच्छेदककोटिनिविष्टं स्मृतिभिन्नज्ञानत्वमिति वाच्यम् । अनुभवामीति प्रतीत्याऽनुभवत्वजातिसिद्धौ स्मृतिभिन्नज्ञानत्वापेक्षया लाघवादनुभवत्वस्यैव कार्यतावच्छेदकत्वादित्यभिप्रायवानाह जातीति । बाधकं विनेति जातिबाधकं विनेत्यर्थः । अयं भावः । आकाशत्वं न जातिः व्यक्त्यभेदरूपबाधकात् । बुद्धित्वोपलब्धित्वादिकं ज्ञानत्वातिरिक्ता न जातिः । तुल्यत्वरूपबाधकात् । भूतत्वं न जातिः जातिसङ्कररूपबाधकात् । अत्रेदं बोध्यं । मूर्त्तत्वं क्रियासमवायिकारणतावच्छेदकतया सिद्धो जातिविशेषः । न च भूतत्वेन साङ्कर्यमिति वाच्यम् । भूतत्वस्य बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वरूपोपाधित्वात् । जात्योः सङ्करस्य दूषकत्वात् । अपकृष्टपरिमाणवत्त्वं मूर्त्तत्वमिति प्राचीनप्रवादमात्रं । न च क्रियासमवायिकारणतावच्छेदकं द्रव्यत्वमेवास्त्विति वाच्यम् । नित्यस्य स्वरूपयोग्यस्य फलावश्यंभावनियमाद्गगनादेरपि क्रियारूपफलावश्यम्भावापत्तेः । न च सहकारिविरहादेव फलाभाव इति वाच्यम् । सार्वदिकस्य गगनादेः कदाचित्सहकारिसमवधानसम्भवादिति । जातौ न जातिः । अनवस्थारूपबाधकात् । विशेषत्वं न जातिः सामान्यान्यत्वे सति सामान्यवद्भिन्नत्वे सति समवेतत्वरूपविशेषलक्षणव्याघातात् । तस्यैव नाम रूपहानिरिति वदन्ति । समवायो न जातिः समवाये समवायरूपसंबन्धाभावात् । तदुक्तं व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः । रूपहानिरसंबन्धो जातिबाधकसंग्रह इति ।

करणत्वञ्च व्यापारवदसाधारणकारणत्वं घटंप्रतिकपालसंयोगवारणाय व्यापारवदिति ईश्वरज्ञानवारणायासाधारणेति। नन्वेवं ज्ञानं त्वस्माऽपिकरणं

स्यात् आत्ममनःसंयोगस्य व्यापारस्य सत्वात् तज्ज-न्यत्वे सति तज्जन्यजनको व्यापारः। भवति चात्मसंयोग आत्मजन्य आत्मजन्यज्ञानजनकश्चेति चेत्स्यादेव उपाधीनां करणत्वादीनां भेदाच्च व्यवहारभेदः । अत एव "विवक्षातः कारकविभक्तयो भवन्तीति" शाब्दिका। अत एवात्मानमात्मना वेत्सीति तृतीया। शिवादित्यमिश्रास्तु करणाद्याकारानुगतमतेः करण-त्वादिकमखण्डोपाधिरूपसामान्यमङ्गीचक्रुः। तच्च प्र-माणं चतुर्विधमित्याह भगवान्सूत्रकारः "प्रत्यक्षानु-मानोपमानशब्दाः प्रमाणानीति" तत्र साक्षात्काररू-पप्रमाकरणं प्रत्यक्षं साक्षात्कारत्वं च साक्षात्करो-मीत्यनुभवसाक्षिको जातिविशेषः ॥

प्रमाकरणं प्रमाणमित्यत्र प्रमात्वमुक्त्वा करणत्वमाह करणत्व-मिति । व्यापारवदिति । असाधारणे कारणे चक्षुरिन्द्रियादौ चक्षुर्घटसंयो-गादिरूपव्यापारस्य सत्वाद्भवत्येव तत्र करणत्वम् । घटं प्रति कपालसंयोग-स्यासाधारणकारणत्वेऽपि न तस्य करणत्वं व्यापारवत्त्वाभावादित्यर्थः । ईश्वरेति । ईश्वरज्ञानस्य कार्यमात्रजनकत्वाद्धर्म्यादिजनकत्वाद्व्यापारव-त्त्वेऽपि न करणत्वं तस्य साधारणत्वादित्यर्थः । एवं एतादृशकरणत्वनि-र्वचने । आत्ममनइति । यथात्ममनःसंयोगाश्रयत्वेन मनसः करणत्वं तथा तत्संयोगाश्रयत्वेनात्मनोऽपि करणत्वं स्यादित्यर्थः । ननु कथन्तत्संयोगस्य व्यापारत्वमतो व्यापारलक्षणमाह तज्जन्यत्वइति । तत्रेष्टापत्तिं करोति स्यादेवेति । नन्वेवं कर्तृकरणयोरैक्यात्कथं भेदव्यवहार इत्यत आह उपाधीनामिति । तथा च कर्तृत्वकरणत्वयोर्भेदात्कर्तृकरणयोर्भेदव्यव-हार इत्यर्थः । आदिना कर्मत्वसंग्रहः । अत एव उपाधीनां भेदाद्व्यव-

द्वारभेदादेव । यद्वा अत एव आत्मनि करणत्वस्वीकारादेव । विवक्षात इति । यदैवास्य कर्मत्वविवक्षा तदा द्वितीया यदा च कर्तृत्वकरणत्वविवक्षा तदा तृतीया तच्च कर्तृत्वकरणत्वयोरेकत्रसत्त्व एव सम्भवतीत्यर्थः । तत्र सम्मतिमाह । अत एवेति । अत एव विवक्षातः कारकविभक्तीनां नानात्वादेव । अवच्छेदोपाधीति । तथा च ज्ञानं प्रति मनःकरणं नात्मा तत्करणत्वरूपावच्छेदोपाधेरभावादित्यर्थः । अन्यथेत्युक्तस्यासङ्गतिं बोधयति । अस्यार्थस्य । आत्मनि करणत्वाभावे आत्मनेति करणत्वार्थकतृतीयानुपपत्तिः । करणत्वकर्मत्वकर्तृत्वादीनां परस्परविरोधे आत्मना ऽऽत्मानं वेत्सीत्यत्र द्वितीयानुपपत्तिश्चेति । तत्र चतुर्विधप्रमाणमध्ये । साक्षात्कार इति । अयं घट इत्यादिसाक्षात्काररूपा या प्रमा तत्करणं चक्षुरिन्द्रियादिः तत्प्रत्यक्षप्रमाणमित्यर्थः । अनुमानादावतिव्याप्तिवारणाय साक्षात्कार इति प्रत्यक्षलक्षणघटितं साक्षात्कारत्वं सद्युक्तिकं निर्वक्ति साक्षात्कारत्वमिति ।

नचेयमिन्द्रियजन्यज्ञानत्वविषया । ज्ञानमात्रस्य मनोरूपेन्द्रियजन्यत्वात् । इन्द्रियाप्रतीतावपि तथा प्रतीतेश्च ।

नन्विन्द्रियजन्यज्ञानत्वं साक्षात्कारत्वमिति साक्षात्करोमीति प्रतीतिरिन्द्रियजन्यज्ञानत्वविषया भविष्यतीति किमतिरिक्तजातिकल्पनेनेत्याह नचेति । एवं चेन्द्रियजन्यज्ञानं प्रत्यक्षमिति फलितम् । ईश्वरज्ञानस्यालक्ष्यत्वाच्चाव्याप्ति"रिन्द्रियार्थसन्निकर्षोत्पन्नमित्यादिसूत्रे" जन्यप्रत्यक्षस्यैव विवक्षितत्वात् । इयं साक्षात्करोमीति प्रतीतिः । ज्ञानमात्रस्येति । मनोरूपेन्द्रियजन्यज्ञानत्वस्यानुमित्यादावपि सत्त्वेन तत्रातिप्रसङ्गादित्यर्थः । ननु मनसः क्षित्यादिचतुष्टयातिरिक्त द्रव्यत्वेमानाभावः भौतिकपरमाणुस्वरूपस्य त्रुटिस्वरूपस्य वा मनस्त्वात् । नचाणुमात्रस्य मनस्त्वाच्चक्षुरणुसंयोगकाले रसनाणुसंयोगस्यापि सत्त्वेन युगपन्नानाज्ञानोत्पत्तिरिति वाच्यम् । तत्र यथा रसन मनःसंयोगदशायां ज्ञानमात्रजनकत्वङ्मनःसंयोगस्य सत्त्वेऽपि

Digitized by Google

न रासनस्पार्शनयोर्यौगपद्यं किंत्वदृष्टविशेषवशादेकमेव तथा ममापीति क्र ज्ञानमात्रस्य मनोजन्यत्वमित्यतो दूषणान्तरमाह इन्द्रियाप्रतीताविति । यद्वा नन्विन्द्रियत्वेनेन्द्रियजन्यज्ञानत्वविषया । नचेन्द्रियत्वं साक्षात्कारकारणत्वं साक्षात्कारत्वं चेन्द्रियजन्यज्ञानत्वमित्यन्योन्याश्रय इति वाच्यम् । शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वस्येन्द्रियत्वात् । आत्मन्यतिव्याप्तिवारणाय विशेषगुणानाश्रयत्वे सतीति । कालेऽतिव्याप्तिवारणाय ज्ञानकारणेति । चक्षुरादावव्याप्तिवारणायोद्भूतेति । उद्भूतत्वं चानुद्भूतत्वरूपजात्यभावः । श्रोत्रे ऽव्याप्तिवारणाय शब्देतरेति । परिमाणग्रहे इन्द्रियावयवावयवसंयोगस्य हेतुत्वात्तद्वतीन्द्रियावयवे ऽतिव्याप्तिवारणाय मनः पदं । तथा च ज्ञानमात्रस्य मनोरूपेन्द्रियजन्यत्वं नेन्द्रियत्वेन किंतु मनस्त्वेनेत्यतोदूषणान्तरमाह इन्द्रियाप्रतीतावपि तथेति । अत्र जन्यज्ञानत्वावच्छिन्नं प्रत्यात्मत्वेनैव कारणत्वम् । न चात्मनो व्यापकत्वाद्युगपन्नानाज्ञानोत्पत्तिरिति वाच्यम् । अदृष्टवदात्मप्राणयोर्विजातीयसंयोगस्यापि हेतुत्वात्तथा चानुमित्यादौ मनोरूपेन्द्रियजन्यत्वाभावाच्च दोष इति ध्येयम् । इन्द्रियजन्यज्ञानत्वघटकीभूतस्येन्द्रियस्याज्ञानेपि साक्षात्करोमीतिप्रतीतेः सत्त्वात् इन्द्रियजन्यज्ञानत्वं न साक्षात्करोमीति प्रतीतेर्विषय इत्यर्थः । तथा प्रतीतेश्च । साक्षात्करोमीति प्रतीतेश्च ।

नापि चाक्षुषत्वादिजातिविषया अननुगतत्वात् । यद्वाजन्यधीजन्यमात्रवृत्तिजातिशून्यत्वं तत् । भवति हिजन्यधीजन्यमात्रवृत्त्यनुमितित्वादि तच्छून्यत्वंसाक्षात्कारमात्रे ।

ननु माऽस्त्वयं प्रतीतिरिन्द्रियजन्यज्ञानत्वविषया चाक्षुषत्वादिविषया तु भविष्यत्येवेत्यत आह नापीति । अननुगमादिति । प्रतीतिविषयोऽप्येकोऽनुतो धर्मो वाच्यः । चाक्षुषत्वस्पार्शनत्वादीनां नानात्वान्नानुगतत्वमित्यर्थः । नन्वेतत्प्रतीतिविषयभूतसाक्षात्कारत्वं न जातिः किं तु ज्ञानाकरणं ज्ञानं प्रत्यक्षमित्येतत्पर्यवसितार्थकं जन्यधीजन्यमात्रवृत्तिजा-

तिशून्यज्ञानत्वरूपमभिव्यत्येवेत्यभिप्रायवानाह यद्वेति । अथचेन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षमिति सूत्रं । तत्र ज्ञानान्तमेकं लक्षणं । अव्यपदेश्यादिसंपूर्णमपरं । व्यपदेशःशब्दस्तज्जन्यं व्यपदेश्यं शाब्दज्ञानन्तद्भिन्नं तेन शाब्दबोधनिरासः । अव्यभिचारीत्यस्याव्यभिचारितत्वधीजन्यमात्रवृत्तिजातिरहितमित्यर्थस्तेनानुमितिनिरासः । विगतोऽवसायः सादृश्यज्ञानं इत्यस्यापि सादृश्यज्ञानजन्यभिन्नत्वमित्यर्थस्तेनोपमितिनिरासः । तथाचेन्द्रियार्थसन्निकर्षोत्पन्नमित्यस्य तात्पर्यार्थकमिन्द्रियजन्यज्ञानत्वमिति लक्षणं तत्तु ज्ञानमात्रस्येत्यादिदोषदुष्टमतोऽव्यपदेश्यमव्यभिचारिव्यवसायात्मकमित्यस्य निष्कृष्टलक्षणमाह । जन्येत्यादि । तथा च साक्षात्कारत्वपदवाच्यमपीदमेवेति भावः । तत् साक्षात्कारमात्र इत्याह भवतिहीत्यनेन । ईश्वरधीजन्यत्रमावृत्तिजन्यज्ञानत्वस्य जन्यानुभवत्वस्य चाक्षुषत्वस्य वा साक्षात्कारे सत्वादसम्भववारणाय प्रथमजन्यपदं । चाक्षुषत्वादिकमादायासम्भववारणाय द्वितीयजन्यपदं सत्तागुणत्वज्ञानत्वमादायासम्भववारणाय मात्रपदं तादृशधर्मशून्यत्वेन निर्वाहेऽपि जातिपदं समवायेन वृत्तिलाभाय अन्यथा साक्षात्कारेऽपि कालिकसम्बन्धेनानुमितित्वादेः सत्वादसम्भवापत्तेः । सामान्याद्यव्याप्तिवारणाय ज्ञानत्वमिति ।

न च निदध्यासनजन्यमात्रवृत्तिमोक्षजनकतावच्छेदकजातिमति तत्वसाक्षात्कारेऽव्याप्तिः । मानसावृत्तित्वेन जातेर्विशेषणीयत्वात् । मानसत्वञ्च जातिविशेष इत्यास्तां विस्तरः । नास्तिकास्तु वैशिष्ट्यानवगाहिज्ञानं साक्षात्कारः । अयं घट इत्यादिज्ञाने च साक्षात्कारत्वप्रत्ययो भ्रान्तिः घटत्वाद्यलीकविषयत्वादित्याहुस्तन्न । बाधकं विना भ्रान्तित्वायोगात् । न चालीकविषयत्वं बाधकं घटत्वा-

देरलीकत्वासिद्धेः । स च साक्षात्कारो द्विविधो नित्यो ऽनित्यश्च नित्यो भागवतः अनित्योऽन्यः । अनित्यो द्विविधो निर्विकल्पकं सविकल्पकञ्च तत्र वैशिष्ट्यानवगाहिज्ञानं निर्विकल्पकं निःप्रकारकं वा तच्च यद्यपि न प्रत्यक्षसिद्धमतीन्द्रियत्वाभ्युपगमात् ।

निदिध्यासनेति । निदिध्यासनं विषयान्तरसंचाररहितात्मविषयकं विच्छेदशून्यतत्त्वज्ञानत्वस्य मनोजन्यत्वेनानुमित्यादेर्मानसत्वान्मानसावृत्तिजातिशून्यत्वमसम्भवीत्यत आह मानसत्वमिति । तथा च मानसत्वं यदि जातिस्तदानुमित्यादिव्यावृत्तैव । यदि चोपाधिस्तदामनोमात्रजन्यप्रत्यक्षत्वमेव मानसत्वमिति नोक्तदोष इति संक्षेपः । वैशिष्ट्यानवगाहिज्ञानं सम्बन्धानवगाहिज्ञानं । नन्वयं घट इत्यादिज्ञाने घटघटत्वयोः सम्बन्धावगाहनात्साक्षात्कारत्वं न स्यात् । न चेष्टापत्तिः । घटं साक्षात्करोमीतिप्रतीतिविरोधादित्यत आह अयं घट इति । कुत इत्याह घटत्वेति । अनुगतधर्मोऽलीकः घटाद्यनुगतप्रत्ययस्य चाघटभिन्न इत्येवं क्रमेणनिर्वाहः तथा चालीकविषयकबुद्धेर्भ्रमत्वमित्यर्थः । बाधकं विना विषयबाधकमन्तरेण लघुघटत्वादेर्विषयस्यालीकत्वाद्विषयबाधोऽस्त्येवेत्याह न चेति । घटत्वादेः प्रत्यक्षसिद्धत्वेनालीकत्वासिद्धेरित्यर्थः । अन्यः । अस्मदीयः । तत्र नित्यानित्योभयविधसाक्षात्कारे । वैशिष्ट्येति वैशिष्ट्यं सम्बन्धस्तथा च घटघटत्वयोः सम्बन्धानवगाहिज्ञानं निर्विकल्पकमिति फलितम् । तत्र सांसर्गिकविषयताशून्यमिति निर्गलितार्थो बोध्यः । एवं सांसर्गिकविषयतावत्प्रकारताख्यविषयताया अप्यभावात्तद्विषयत्वशून्यमिति निर्गलितार्थकलक्षणान्तरमाह निराकारेति निष्प्रकारकमित्यर्थः । प्रकारताख्यविषयताशून्यमिति निर्गलितार्थः ।

अथ विशेष्यताख्यप्रकारताख्यसांसर्गिकविषयताशालिज्ञानस्य प्रत्यक्षत्वसम्भवान्निर्विकल्पके प्रत्यक्षप्रमाणाभावं दर्शयति तच्चेति तं च

निर्विकल्पकं चेत्यर्थः। तादृशविषयिताद्वयशून्यज्ञानत्वस्य मानसत्वावच्छिन्नं प्रति प्रतिबन्धकत्वादप्रत्यक्षमिति भावः। ननु मानसत्वावच्छिन्नं प्रति तादृशविषयताद्वयशून्यत्वस्य प्रतिबन्धकत्वापेक्षया लाघवात्तस्येन्द्रियत्वमेवोच्यताम्। न च तस्येन्द्रियत्वेऽनुव्यवसायापत्तिः प्रथमं यत्र निर्विकल्पकं ततो विशिष्टबुद्धिस्ततस्तदनुव्यवसायस्तत्र विशिष्टबुद्धिरूपव्यवसायवन्निर्विकल्पकभानस्येष्टत्वात्। न च व्यवसायाविषयको निर्विकल्पकमात्रविषयकोऽनुव्यवसायः कुतो नेति वाच्यम्। विषयवैशिष्ट्याविषयकज्ञानादिविषयकप्रत्यक्षस्य यथावक्ष्यमाणत्वेन निर्विकल्पमात्रविषयकप्रत्यक्षापादनस्याशक्यत्वात्। न च निर्विकल्पकोपनीतविषयोऽनुव्यवसाये भासतामिति वाच्यम्। निर्विकल्पकस्य प्रत्यासत्तित्वाभावात्। किञ्च ज्ञात्यतिरिक्तपदार्थस्य स्वरूपतोभानासम्भवेन शुद्धघटस्य प्रकारतयाभानानुपपत्तेः। अनुव्यवसाये त्वात्मनि ज्ञानं ज्ञाने घटो घटे घटत्वं प्रकारो घटमहं जानामीत्यनुव्यवसायात्। तथा च विशेषणतावच्छेदकप्रकारकनिश्चयाभावादनुव्यवसायरूपो विशिष्टवैशिष्ट्यबोधो नेतस्मान्निर्विकल्पके कथमतीन्द्रियत्वमिति चेत्। उच्यते। तादात्म्यसम्बन्धेन गुरुत्वादिव्यक्तिवत्तेन सम्बन्धेन निर्विकल्पकव्यक्तेरपि विषयतासम्बन्धेन प्रत्यक्षत्वावच्छिन्नं प्रति प्रतिबन्धकत्वात् न तस्येन्द्रियत्वं प्रामाणिकगौरवस्य दूषकत्वाभावाद्वा। विशेष्यताख्यादिविषयिताद्वयशालिज्ञानस्य मानसत्वावच्छिन्नं प्रति कारणत्वात्तादृशविषयताशून्यत्वस्य प्रतिबन्धकत्वाद्वा वैशिष्ट्यनवगाहिज्ञानस्य प्रत्यक्षत्वाभावान्निर्विकल्पकस्यातीन्द्रियत्वमिति संक्षेपः।

तथाप्ययं घट इति विशिष्टज्ञानरूपकार्यानुमेयम्। तथा हि जन्यविशिष्टज्ञानं प्रति जन्यतद्विशेषणज्ञानं कारणमिति निर्विवादम्। भवति हि प्राथमिकमस्माकमयं घट इति ज्ञानजन्यं घटत्वविशिष्टज्ञानमतस्तत्रापि घटत्वज्ञानं कारणम्। न च तदानीं घटघटत्वविशिष्टज्ञानमस्ति विशेषणीभूतघटत्वस्याज्ञानात्।

निर्विकल्पके प्रत्यक्षप्रमाणाभावेऽपि अनुमानरूपप्रमाणमस्त्येवेत्याह तथापीति । कार्येति । विशेषणज्ञानरूपकारणं विना विशिष्टज्ञानरूपकार्यस्यासम्भवादित्यर्थः । अन्यतद्विशिष्टज्ञानं अन्यघटत्वादिविशिष्टज्ञानं । तद्विशेषणज्ञानं घटत्वादिरूपविशेषणज्ञानं । ईश्वरज्ञाने व्यभिचारवारणाय अन्येति । द्वितीयादिज्ञाने विशिष्टज्ञानात्मकस्य पूर्वानुभवरूपस्य स्मरणरूपस्य वा विशेषणज्ञानस्य सम्भवात् प्राथमिकमुक्तं । तच्चापि प्राथमिकघटत्वादिविशिष्टज्ञानेऽपि । अयं घट इत्यादिविशिष्टज्ञानं विशेषणज्ञानजन्यं अन्यविशिष्टबुद्धित्वात् दण्डीपुरुष इति विशिष्टवदित्यनुमानं सूचितम् । ननु तच्च विशिष्टज्ञानं विशेषणज्ञानं भविष्यतीत्यत आह । न चेति । तदानीम्प्राथमिकविशिष्टज्ञानोत्पत्तिपूर्वदशायां कुतोनेत्यत आह विशेषणीभूतेति । तथा च । प्राथमिकघटत्वविशिष्टज्ञानात्पूर्वं तादृशज्ञानान्तरस्यासत्त्वादित्यर्थः ।

ततो वैशिष्ट्यानवगाह्येव तद्वाच्यन्तदेव च निर्विकल्पकं । न च जन्मान्तरीयघटत्वविशिष्टज्ञानन्तत्र कारणं अव्यवहितपूर्वकालवर्त्तिन एव विशेषणज्ञानस्य तत्र हेतुत्वात् । न च भागवतं घटत्वज्ञानन्तज्जनकं सामानाधिकरण्यप्रत्यासत्त्या तस्य हेतुत्वात् । भगवज्ज्ञानस्य व्यधिकरणत्वात् । नन्वस्तु घटत्वविशिष्टस्मरणमेव तत्र कारणं । न च विशेषणज्ञानं विना तदेव विशिष्टज्ञानं कथमिति वाच्यम् । विशिष्टानुभवे हि विशेषणज्ञानं कारणं न तु स्मरणेऽपि तेन विना तदुत्पत्तेः अन्यथाऽनवस्थानात् । अस्तु वा निर्विकल्पकं घटत्वस्मरणमिति चेन्न । चैत्रत्वादिविशिष्टबुद्धौ तदसम्भवात् न हि चैत्रत्वादिकं पूर्वमनु-

भूतं यतः स्मरेत् न चानुभवं विनैव स्मरणं। तस्य तद्धेतुत्वात्।

तत् विशेषणज्ञानं। तदेव वैशिष्ट्यानवगाहिविशेषणज्ञानमेव। तच्च प्राथमिकवैशिष्ट्यबोधे। तज्जनकं विशिष्टधीजनकं। प्रत्यासत्त्या संबन्धेन। तस्य विशेषणज्ञानस्य सामानाधिकरण्यप्रत्यासत्त्या ऽव्यवहितपूर्ववर्त्तिकारणं दर्शयितुं शक्नुते नन्विति। तदेव घटत्वविशिष्टस्मरणमेव। तेन विनापि विशेषणज्ञानेन विनापि। उपपत्तेः विशिष्टस्मरणोपपत्तेः। अन्यथा स्मरणं प्रत्यपि विशेषणज्ञानस्य हेतुत्वे ऽनवस्थानादिति स्मरणकारणीभूतमपि विशेषणज्ञानं विशिष्टज्ञानात्मकं तत्रापि विशिष्टज्ञानात्मकं विशेषणज्ञानं कारणमिति क्रमेणानवस्थेत्यर्थः। ननु यदि विशेषणज्ञानस्य कार्यतावच्छेदकं विशिष्टानुभवत्वं। तदानुभवत्वजातिकल्पने गौरवमित्यत आह अस्तु वेति। तथा च प्राथमिकमयं घट इति विशिष्टज्ञानकारणीभूतघटत्वस्मरणं नानुपपन्नमिति भावः। ननु ज्ञानस्मरणयोः समानविशेष्यकत्वेन समानप्रकारकत्वेनैव कार्यकारणभावान्निर्विकल्पकस्मरणोपपत्तिरिति। न च घटान्याविशेष्यकघटत्वान्याप्रकारकस्मृतित्वेन कार्यता। घटत्वप्रकारकघटविशेषकनिश्चयत्वेन कारणतेति वाच्यम्। गौरवादित्ययं घट इदं द्रव्यमिति संस्काराभ्यां सोयं घटो द्रव्यमिति स्मृतिर्न स्यादिति चेन्न। समानप्रकारकत्वेन समानविशेष्यकत्वेन ज्ञानसंस्कारयोः संस्कारस्मृत्योश्च कार्यकारणभावेनैवैकतरप्रकारकैकतरविशेष्यकज्ञानादपरप्रकारकापरविशेष्यकस्मरणमिति ज्ञानस्मरणयोर्ज्ञानत्वस्मृतित्वाभ्यामेव सामान्यतः कार्यकारणभावसंभवात्। एवं च प्रथमं न विशिष्टस्मरणं विशेषणज्ञानकारणाभावात् किन्तु सामान्यसामग्रीतो निर्विकल्पकस्मरणमेव। न चैवं चैत्रविषयकनिश्चयान्मैत्रनिर्विकल्पकं स्यादिति वाच्यं। मैत्रस्मरणगोचरोद्बोधकाभावादिति। अत एव प्रमेयत्वप्रकारकानुभवाद्विशेषरूपेण घटत्वपटत्वादिविशेषणज्ञानाभावकालेऽपि सार्वज्ञ्यापत्तिः। ज्ञानत्वेन स्मृतित्वेन कार्यकारणभाव इत्युक्तत्वेन सर्वासां

एव गन्धशब्दाश्रयत्वाद्यपि लक्षणं घटते। यत्तु खण्डितं नित्यानेकसमवेतत्वं लक्षणं नित्यमनित्यं वा। आद्ये अंशत आत्माश्रयः नित्यत्वेपि लक्षणान्तर्गते नित्यत्वस्योपगमात्। अन्त्ये जातिव्यक्तिसमवायादीनामेकतमस्यानित्यत्वमावश्यकं तदन्तरेण विशिष्टाभावासम्भवात् घटादावनित्ये तदनित्यतया घटत्वादौ लक्षणस्यानित्यत्वं यद्यपि सम्भवति तथाप्यात्मत्वादौ तदसम्भवः आत्मनोऽपि व्यक्तेर्नित्यत्वात् एवञ्चैकमेव नित्यानेकसमवेतत्वं घटत्वादावनित्यम्। आत्मत्वादौ तु नित्यमिति प्राप्तम्। एवं प्राप्तेऽभिधीयते। नित्यानेकसमवेतत्वमुपाधित्वात्सखण्डं सखण्डत्वाच्चान्यघटितं तथा च यत्र घटादिव्यक्तिघटितं तत्र तदनित्यत्वेनानित्यं यत्र त्वात्मादिव्यक्तिभिर्घटितं तत्र तासामपि नित्यतया दैवान्नित्यमिति। नन्वेकमेव वस्तु नित्यमनित्यञ्च ध्वस्तञ्च सच्चेति महद्वैशसमिति चेत्। न अन्येनानेकेन घटितं घटत्वादेरनेकवृत्तित्वमन्यदिति नैकस्य विरुद्धधर्माध्यासः। तत्कथमिदमेकं लक्षणमनेकवृत्तित्वस्योभयत्राविशेषात् नित्यत्वस्य च नित्यत्वं प्रामाणिकं तदनित्यत्वस्याप्रामाणिकत्वादिति सम्प्रदायः। नव्यास्तु अभिधादीनां भङ्गुरत्वेप्यभिधेयत्वादिकं यथा ध्रुवं तथा व्यक्तीनां भङ्गेप्यनेकसमवेतत्वं स्यादेवेत्याहुः॥

सामान्यलक्षणादीनां विशेषणैर्विशेषादयो यथासम्भवं निवार्या इत्यात्थ। तत्र के ते विशेषाः। नित्येष्वेव द्रव्येष्वेव वर्तन्त एव ये ते विशेषा इति चेन्न आत्मत्वादावतिव्याप्तेः। आत्मत्वादिकं सर्वस्मिन्नित्यद्रव्ये न वर्तते एते तु वर्तन्त एवेति चेन्न तर्हि एकैकविशेषस्य सकलनित्यवृत्तित्वमिति सर्वाव्याप्तिरिति खण्डनम्।

Digitized by Google

तन्न । एकैकव्यक्तिरेकैकत्र नित्यद्रव्ये वर्तेत इत्यनेन रूपेण ये नित्यद्रव्येष्वेव वर्तन्त एव ते विशेषा इत्यस्य लक्षणार्थत्वात् यद्येप्येकैका एव वर्तेत इत्यव्याप्तिरेव । तथाप्येतज्जातीयाः सर्व एवेति सर्वव्याप्तिः एतज्जातीयत्वं तु लक्षणैक्यादिति काणादादयः । अत्र गौतमीयाः । अत्र सर्वत्र वृत्त्याऽव्याप्तिनिरासेन लक्षणसिद्धिः लक्षणसिद्ध्या तल्लक्षणवत्त्वपुरस्कारेण सर्वत्र वृत्तिः व्यक्तीनां हि गङ्गावालुकायमानानामेकैकद्रव्यव्यक्तिमात्रविश्रान्तानां स्वतः सार्वत्रिकत्वासम्भवादित्यन्योन्याश्रयः विलक्षणधीस्तु वैलक्षण्याज्जात्यादिवदिति ॥

ननु लक्षणानि लक्ष्येषु कुतो व्यवहारकाणि सम्बन्धादिति चेत् । किमिदं सम्बन्धत्वं विशिष्टधीनियामकत्वम् असम्बन्धेभ्यो हि व्यावर्तमाना हि विशिष्टप्रमा विशेषणवत्येव विश्राम्यति न हि केवले पुंसि दण्डीति कश्चित् प्रमिणोति । नीरूपे वायौ रूपसम्बन्धोऽस्त्येवेति चेत् । अस्तु रूपात्यन्ताभावसम्बन्धोप्यास्ति तथा च विरोध्यनुपहितो विशेषणसम्बन्धो विशिष्टव्यवहारकः स तादृशो वायौ नास्तीत्यतो न तत्र रूपविशिष्टव्यवहारः । एवं दण्डिव्यवहारे दण्डसम्बन्धः संयोगलक्षणो हेतुः स च दण्डसंयोगात्यन्ताभावेनाव्याप्यवृत्तिनोपहितोपि विरोध्यनुपहित एव तस्यात्यन्ताभावस्याव्याप्यवृत्तित्वावच्छिन्नस्य तदविरोधित्वात् सम्बन्धेन समं सम्बन्धिनः सम्बन्धः संयोगेन समं समवायः समवायेन समं कः स्वरूपमेव । अस्तु तर्हि स्वरूपत एव स्वरूपं सम्बन्ध इति चेत् । भवेदेवं यदि जातिगुणक्रियाविशिष्टधियां सम्बन्धजन्यत्वानुमितिलाघवादेकं नावगाहेत । हन्तैवमभावरूपादिविशिष्टधियामप्येकः सम्बन्धो विषयो निमित्तं वास्तु लाघवादिति

तदेव वैशिष्ट्यं स्यादिति चेत् । इदं हि प्रत्यक्षनिर्णयेऽस्माभिः प्रपञ्चितमिति तत्रैवानुसन्धेयम् । एवञ्च नियामकत्वमेव सम्बन्धत्वमित्युत्प्रेक्षाभावोपि त्वया नियामकोऽङ्गीक्रियते तथापि सोपि सम्बन्धः स्यादिति यत्खण्डनम् तच्छलम् । विशिष्टधीनियामकस्य मया सम्बन्धत्वमुपेयते न तु नियामकमात्रस्येति ॥

ननु नियामकत्वं नियमकारणत्वं कारणत्वञ्च नियतप्राक्सत्त्वमत्र च प्रागिति व्यर्थं सत्त्वमात्रमेवास्तु कारणत्वमिति चेन्न नियामकं न हि भविष्यदतीतं कर्तुं शक्नोति स्वरूपासिद्धेः प्राच्यन्तु भाविनं कुर्यात् व्यापारादियोगात् अत एव घटार्थी मृदमुपादत्ते न तु जलाहरणादिकमिति सार्वलौकिको व्यवहारः । ननु स्वभावस्य नियामकत्वे स्वयमेव स्वं नियमयतीति प्राप्तं तथा च स्वस्याप्रसक्तत्वे नियामकतानतिप्रसक्तत्वे च न नियम्यता । अयमेव सम्भाव्यत्वादिति सत्यम् । नियामकमन्तरेण यन्नियतत्वं तदेव स्वभावनियम्यस्यार्थः । यद्वा तेजःप्रभृतेरौष्ण्यादि स्वभावनियम्यं तेजस्त्वादिप्रयुक्तमित्यर्थः । ननु दण्डादिना कारणेन घटादिकार्यं नियम्यत इति ब्रूषे तस्य किं नियम्यते स्वरूपं वा कालविशेषयोगो वा उभयमप्यनियतं वा । आद्ये घटमिव पटमपि घटस्योत्तरकालसम्बन्धमिव पटस्याप्युत्तरकालसम्बन्धं नियमयेदविशेषात् अनियतत्वेनोभयोरपि नियतत्वात् तदाह ।

यदि कुर्यादसत्कालानियतं नियतं परः ।
तत्स्यादतिप्रसक्तत्वमन्यथा च नियन्तृता ॥ इति ।

अस्यार्थः । परो दण्डादिः यदि असत्कालानियतं वा घटादिः नियतं घटादिस्वरूपेण नियतं कालविशेष-

Digitized by Google

योगितया वा नियतं कुर्यात्तदातिप्रसक्तिः स्यात् न ह्युत्पत्तेः प्राक् पटस्यालब्धात्मकस्यात्मलाभे कोपि विशेषोस्ति अभ्युपेत्याह अन्यथा घटस्य तदीयकालविशेषयोगस्य वा नियतत्वे नियामकं न नियन्तृ तदन्तरेणैव घटस्य तत्कालविशेषयोगस्य वा नियतत्वादिति । तन्न । न ह्यसत्त्वकाले घटादेर्नियतत्वादिकं धर्मो भवितुमर्हति । धर्मिण एवासत्त्वात्तथा च प्रष्टा चोत्तरयिता च द्वावपि शून्यहृदयौ । ननु सुहृद्भावेन पृच्छामः घटकारणानि कुतो नियामकाद्घटमेव जनयन्ति । तत्समवायिकपालमिलनात् । कपालमेव कुतो घटमेवारभते न तु पटं स्वभावादिति ब्रूमः । कार्यमप्राप्तानि कारणानि जनयन्त्यतिप्रसङ्गात् तत्प्राप्तानि च न तज्जनयन्ति विशेषादिति ब्रूम इति चेत् । इमे हि प्राप्त्यप्राप्तिसमे हि जातीति स्वव्याघातमपि न वेत्सीति दूरमपसर । अस्तु व्याघातः किं नश्छिन्नम् न वयं किञ्चिदपीच्छामः किञ्चिदपि साधयामः किञ्चिदपि स्थापयामः किञ्चिदपि ब्रूम इति चेन्न । न हि लौकिको न परीक्षक इत्युन्मत्तवदुपेक्षणीयः स्या इति ॥

ननु नियामकं नियम्ये सन्नियम्यं नियमयेत् तत्र च कः सप्तम्यर्थः । आधारत्वमिति चेत् । किमाधारत्वम् देशे इहेति प्रत्ययविषयत्वम् गवादौ अत्रेति प्रत्ययविषयत्वम् अवसरे एतर्हीति प्रत्ययविषयत्वमिति चेत् । इहेत्यादयः शब्दपरा अर्थपरा वा । नाद्यः न हि देशानां नामाधारताबुद्धौ प्रात्यक्षिक्यादयः शब्दा अपि चकासति । नान्त्यः सर्वसाधारणस्य तस्यैव सप्तम्यर्थस्य निरूप्यमानत्वादिति खण्डनम् । अत्रोच्यते । अयमाधारत्वस्य लक्षणप्रश्नो वा स्वरूपे प्रश्नो वा आधारपदप्रवृत्तिनिमित्तप्रश्नो वा । नाद्यः

Digitized by Google

तस्य प्रमेयत्ववत् केवलान्वयित्वात् सर्वं किं वस्तु स्वीयलक्षणस्याधार एव। ननु कारकत्वगर्भमाधारत्वं पृच्छामीति चेत्। अत्रोच्यते। चरमध्वंसेतरत्वमिति गृहाण। चरमध्वंसः परमकारकः शेषास्तु धर्मित्वे सति कारका इति। द्वितीये स धर्मी इत्येवोत्तरम् यावान् धर्मी तावान् धर्मस्याधार एव। अन्त्ये धर्मित्वमित्येवोत्तरम् धर्मित्वमेव प्रतीत्याधारवाचिपदं प्रयुज्यते। कुण्डे बदरमित्यादि कुण्डादेर्धर्मिभूतस्य धर्मभूतं बदरादि। कुण्डस्य बदरं प्रति किमाधारत्वमिति चेत्। बदरपतनप्रतिबन्धकत्वम्। नन्वेवं ब्रह्माण्डधर्ता प्रयत्नवान् परमपुमान् ब्रह्माण्डस्याधारः स्यात्। तदुक्तं भगवतैव।

मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इवेति।

केचित्त्वेवमनिच्छन्तो मूर्तपदमत्रविशेषणमाहुः। बदरादिकं हि कुण्डाद्यपेक्षते न तु कुण्डेन बदरं स्वास्तितायै तदपेक्ष्यते सहैव कुण्डेन पतति बदरे नाधाराधेयभावः। एवं रूपादिना तदुत्पत्तिमता पटादिकं स्वोत्पत्त्यर्थमपेक्ष्यते न तु पटादिना रूपादि तदर्थमपेक्ष्यते एवं गोत्वादिना गवादि ज्ञप्तयेऽपेक्ष्यते न तु गवादिना तदर्थं गोत्वादिकमपेक्ष्यते। तदाहुः। उत्पत्तये स्थितये ज्ञप्तये च यद्येनापेक्ष्यते तत्तस्याधिकरणमिति। एवञ्च प्रतिबध्यपतनानाश्रयत्वे सति पतनप्रतिबन्धकसंयोगवन्मूर्तत्वं कुण्डादेर्बदरादिकं प्रत्याधारत्वम्। ननु किमिदं पतनं नाम अधःसंयोगफलककर्मत्वमिति चेत्। कोयमधःपदार्थः पतनभागी देश इति तावदयुक्तमन्योन्याश्रयात्। अन्यथाधःपदार्थभूतमनुगतं दुर्वचमिति। सत्यम्। न ह्यधस्त्वमप्रतियोगिकं गोत्वादिवदनुगतं मृगयसे किन्तु प्रति-

स्वभिमतं तथाहि यद्यदपेक्षया गुरुत्वासमवायिकारणक-क्रियाजन्यफलाश्रयस्तत्तदपेक्षया अध इति। एवं सूर्यापेक्षया भूः तदपेक्षया पातालं तदपेक्षया नरकस्ततदपेक्षया गर्भोदकमित्यादि यथाक्रममधः एतत्प्रतिलोममूर्द्धम्। उभयरूपाश्रयो मध्यमित्यादि। गवि गोत्वसमवाय इत्यादौ स्वरूपसम्बन्धेनैव विशिष्टधीज्ञानघटयोरिव विषयविषयिभावः॥

ननु कोयं विषयविषयिभावः। प्रकाशस्य सतस्तदीयतामात्ररूपः स्वभावविशेषो विषयविषयिभाव इति तावदव्यापकम्। इच्छाया विषयिण्या अप्रकाशत्वात् किञ्च स्वस्य वा भावः स्वश्चासौ भावश्चेति वा स्वभावः। आद्येपि सकलसाधारणो वा घटज्ञानादिप्रत्येकविश्रान्तो वा। अत्राद्यो नास्य घटादिप्राहितज्ज्ञानमात्ररूपकासकलज्ञानसाधारण्यात् तद्धर्मतोपगमाच्च। द्वितीये तु ज्ञानकारकस्यैव प्रतिज्ञानव्यक्तिभेदादिति वचनभङ्ग्या साकारपक्षाद्याकार एव। किञ्चायं धर्मश्चौपाधिकः स्वाभाविको वा। आद्ये कुङ्कुमारुणा तरुणीतिवदुपाधेरप्यवभासः स्यात्। विषयीभूतो घटादिरेव च तत्रोपाधिरिति चेत्। नासम्बन्धात्। न हि सोपि ज्ञानेन सम्बध्यते विषयविषयिभावस्यासिद्धत्वात् नापि स्वाभाविकः न हि घटज्ञानेष्वेकः पटज्ञानेषु पर इत्यभ्युपगमे समूहालम्बने सङ्कीर्येत। एकं ज्ञानं द्व्यालम्बनं नैव भवतीति चेत्। तर्हि विशिष्टज्ञानाभावे विशिष्टस्य व्यवहारो न स्यात्। न हि विशिष्टमेकं नापि द्वितीयः न हि ज्ञानमेव विषयविषयिभावः ज्ञानव्यक्तेः प्रतिस्वं भेदे ततोनुगतविषयविषयिभावस्य व्यवहारानापत्तेः। एतेन ज्ञानं स्वाकारालम्बन-

मित्याद्यपि साधव्यमिति। अत्र ब्रूमः। ज्ञानस्य निर्विषयतां साधयसि वा सविषयतां निरस्यसि वा अभिप्रैषि वा किञ्चिदपि वा न कुरुषे वा। नाद्यौ विपरीतापत्तेः। यथा यथा निर्विषयतायै यत्नस्तथातथा सविषयता प्रत्यापद्यते। न हि त्वदुक्तं निर्विषयतां नालम्बते निर्विषयता च सिध्यतीति सम्भवति। वयं शुद्धवैतण्डिका अतो न ज्ञानस्य निर्विषयतां साधयामो न वा तामभिप्रैम इति चेत्। तथापि सविषयतां निरस्यसि तदपि नेति चेत्। तर्हि शून्यहृदयपशुवदुपेक्षणीयोऽसि। मदर्थं मा यस्व तव तु विषयविषयिभावस्य निरुक्तिः कथं घटतामिति ब्रूहीति चेत्। उक्तं प्रकाशस्येत्यादि। तथाहि प्रकाशप्रकाश्ययोरतिरिक्तः सम्बन्धस्तावन्नानुभूयते तेनासम्बन्धो वा स्यादनतिरिक्तो वा सम्बन्धः तत्राद्यो व्याघातदूषित एवेति परिशेषादन्त्यः सिध्यति। ननु सम्बन्ध्येव कथं सम्बन्धोऽस्तु तथा सति वा समवायमपि त्यजेति चेत्। स ह्यनुभूयमानतया न त्यज्यते प्रवाहस्तु त्यज्यत एव सम्बन्धिनि तु सम्बन्धातिदेशः स च कार्यातिदेशः पर्यवस्यति न तु स्वरूपस्यातिदेशः सम्भवति तथा सत्युपदेश एव स्यात्। तेन सम्बन्ध्येव सम्बन्धकार्यं विशिष्टव्यवहारादिरूपं करोति। ननु विशिष्टव्यवहारो वैशिष्ट्यव्यवहाराधीनः तच्च वैशिष्ट्याधीनं वैशिष्ट्यञ्च सम्बन्धः स च सम्बन्धिनोर्भिन्नः न हि स एव तद्वांस्तेनैव भवतीति चेत्। उपदेशे तथैव अयन्तु कार्यातिदेश इत्युक्तम्। यत्तु यज्ज्ञानजनिता ज्ञातता यस्मिन् धर्मिण्युदेति तज्ज्ञानं तद्विषयकमिति। तन्न। ज्ञाततायाः नैयायिकैरनभ्युपगमात्। भट्टैरुपेयत एव सेति चेत्। उपेयताम्। यत्रेत्यत्र कः सप्तम्यर्थः न हि ज्ञातता धर्मिणि

समवेता नापि संयुक्ता किन्तु स्वभावसम्बद्धा तथा च ज्ञानमेव स्वभावसम्बद्धमस्तु किमन्तर्गडुना ज्ञाततया अतीतानागतयोश्चार्थयोस्तदुपादानमशक्यम् । तत्रापि घटत्वादौ नित्ये धर्मे ज्ञाततोदय इति चेत् । तर्हि घटे धर्मिणि ज्ञातव्यवहारो न स्यात् धर्मधर्मिणोर्भेदात् विरोधेन भेदाभेदपक्षस्य शङ्कितुमशक्यत्वात् । अतीतानागतयोर्ज्ञाततां विनैव ज्ञातव्यवहारश्चेत् । वर्तमानेऽप्येवमस्तु अन्यथा वर्तमाने ज्ञाततया तयोस्तु ज्ञाततां विनैव ज्ञानव्यवहारो भवन् भ्रान्तः स्यादिति । तत्प्रतिबन्धव्यवहारानुकूलशक्तिशालित्वं तद्विषयत्वमित्यपि न तत्प्रतिबन्धो हि तद्विषय इति विषयविषयिभावखण्डनं नातिवर्तते । अथ ज्ञानं स्वाभिन्नमेव स्वाकारं विषयीकरोति बाह्यघटादिसिद्धिस्तु ज्ञानस्य घटाकारत्वान्यथानुपपत्त्या न हि बाह्यघटमन्तरेणैव ज्ञानस्य घटाकारता सर्वज्ञानानां घटाकारतापत्तेः तथा च ज्ञानाकारत्वमेव ज्ञानविषयत्वमिति सौगताः । तन्न । प्रभावत्वानुपपन्नं ज्ञानं तदपि हि आकारमात्रग्राहि न तु बाह्यग्राहि न हि भेदे विषयविषयिभाव इति ब्रूषे तथा च न बाह्यासिद्धिः कोयं भेदः यं प्रातीतिकमप्यशक्यसमर्थनमनिर्वचनीयमाविद्यकमात्थ ॥

ननु कथमस्तु भेदस्तथाहि ब्रह्म तावदेकमेव प्रपञ्चस्तु न प्रमाणसिद्धः स न स्वप्रकाशः जडत्वात् नापि परप्रकाशः प्रकाशजडयोः सदसतोः सम्बन्धाभावात् तस्माद्युक्त्यापि प्रपञ्चे निरस्त एकमेवाद्वितीयं नेह नानास्ति किञ्चन इन्द्रो मायाभिः पुरुरूप इत्यादिभिरुपनिष-

Digitized by Google

द्विरेव हि ब्रह्मणैक्यं प्रपञ्चस्य विषय[1] फलभेदो भाविकः स्यादिति। उच्यते। अस्ति विस्वरूपोन्योन्याभावो वैधर्म्यं-भेदालौकिकप्रत्ययो यदूघटोयं न पटो मृन्मयश्चेति कात्रापि कथन्ता स्वरूपभेदस्य लक्षणं ताद्रूप्येणाप्रतीता प्रतीतिरिति अन्योन्याभावस्य तु लक्षणमबाधितः समानाधिकरणो निषेधप्रत्ययो वैधर्म्यस्य तु एकधर्म्यसमावेशलक्षणो विरोध इति। अत्र प्रतीतिरित्येतावत् कृते इदं रजतमिति भ्रमेपि शुक्तिकायां या धीस्तया शुक्तिकायां रजतरूपव्यवहारः स्यादिति तद्वारणाय ताद्रूप्येणाप्रतीतेति। तथाहि यतो रजतादेर्भेदावधिभूतात् शुक्तिकाव्यवहारः स्यात्तद्रूपत-यैव शुक्तिकायाः प्रतीतिरभूदिति नेयं धीः शुक्तिकायां स्वरूपभेदतः। एवमपि द्विचन्द्रबुद्धेः स्वरूपचन्द्रस्य मायाचन्द्रताद्रूप्येणाप्रतीतौ प्रतीतिरस्तीति तत्रापि स्वरूपभेदः स्यादतो प्रतीतिरियं दोषात् तत्र तु स्वरूप-चन्द्रस्य मायाचन्द्ररूपत्वेनाप्रतीतिर्दोषादेव तत्त्वाप्रती-तावतत्त्वप्रतीतौ चोभयत्रापि मन्मते दोषानां हेतु-त्वोपगमात्। ननु ताद्रूप्येणाप्रतीतौ प्रतीयमानस्य धर्मिणः स्वरूपभेदे प्रतीते कथमभेदारोप इति चेत्। दोषमाहात्म्यादिति गृहाण। न चाभेदो नारोप्यते किन्तु तादात्म्यमिति वाच्यम्। तर्हि संसर्गाभावोयं स्यात्तादा-त्म्यस्य धर्मिणि निषेधादिति। अपरौ तु भेदौ स्था-पयिष्यामः प्रपञ्चस्य चाबाध्यतां वक्ष्यामः। ननु भेदधी-कालेऽवच्छेद्यन्वयोपि नौ कीदृशौ भेदवन्तावेवेति गृहाण। अनुयोगिनि स एव भेदोस्तु अवधौ तु अनुयोगिप्रतियो-गिक इति शेषः। ननु किम्भेदविशिष्टे किं भेदवृत्तिः न

(१) अत्राठर्शपुस्तकेषु कश्चिदंशो निपतितोस्ति।

जानीमः । वस्तुतो यावत्सत्त्वमन्योन्याभाववैधर्म्ये सहैव स्तः अन्योन्याभावस्य जातिरूपवैधर्म्यस्य चाद्यक्षण एव तत्रान्वयात् अन्त्यक्षणपर्यन्तञ्च तत्र स्थितेः । स्वरूपभेदस्तु धर्मिणि वर्तत एवाभेदात् । कथं तर्हि पृथिवीत्वादिना वैधर्म्येणाभावात् स्वरूपभेदः पृथिव्यादेरनुमीयते धर्मिज्ञाने सिद्धसाधनात् धर्म्यज्ञाने चाश्रयासिद्धेरिति चेत् । न । तोयत्वेन पिपासोपशमनशक्तेस्तद्भिन्नाया अनुमितिवदत्राप्यनुमितिसम्भवात् । तत्रापि कथमनुमितिरुपाधिभेदस्यानुमेयत्वात् । तोयत्वेन जात्या पिपासोपशमनकारणतावच्छेदकरूपत्वेन तदेव तोयमनुमीयते यथा तथा पृथिवीत्वेन जात्या पृथिव्याः स्वभावाद्विलक्षणशरीरमनुमीयते । ननु पृथिवीत्वस्वरूपभेदयोः सामानाधिकरण्याभावात् कथं व्याप्तिः निरुपाधिसम्बन्धादित्यवेहि । तथाहि चतुर्द्धा न हि व्याप्तिः यो धूमवान् सोग्निमानिति यत्र धूमस्तत्राग्निरिति यो धूमवान् तत्राग्निरिति यत्र धूमः सोग्निमानिति इदञ्च व्याप्तिखण्डनोद्धारे प्रपञ्चितमतस्तत्रानुसन्धेयम् । ननु स्वरूपं निरवधिभेदः समाधिः स्वरूपमन्यनिरूप्यं भेदान्यनिरूप्यं तत्कथं स्वरूपं भेदोऽस्त्विति चेत् । इत्थम् । यथा घटस्य घटत्वेन निरूप्यमानस्य न सप्रतियोगिता न वान्यनिरूप्यता घटाभावाभावत्वे तु प्रतीयमानस्योभयस्यापि तथा स्वरूपत्वेन प्रतीयमानस्य माभूद्भेदत्वेन प्रतीयमानस्यावधिमत्ता वान्यनिरूपिता च स्यादेव । ननु चाभावस्य स्वरूपं निषेधत्वात् सप्रतियोगिकत्वं भेदत्वात् सावधिकं तथा च प्रतियोग्यनुयोगिभावोऽवध्यवधिमद्भावश्च द्वयमप्यभावस्य स्वरूपं तथा भावस्यैकस्य

विरुद्धं द्वयं कथं स्वभावोऽस्तु एकस्य द्विस्वभावत्वात् सप्रतियोगिकोऽस्तु एकस्य द्विस्वभावत्वासम्भवादिति चेत्। न भेदस्यावध्यवधिमद्भावे प्रमाणाभावात्। घटोऽयं न पट इत्यादिधियावध्यवधिमद्भावस्यानुल्लेखात् प्रमाणान्तरस्य च तत्राभावात्। अन्योन्याभावस्तु भेदोऽभावत्वात् सप्रतियोगिकोऽस्तु न प्रतियोग्यनुयोगिभाव एव तयोः सम्बन्धः अन्यप्रत्येकविश्रान्तधर्मसमाहाररूपतया सम्बन्धत्वायोगात् तथाहि प्रतियोगित्वमभावविरहात्मत्वं सत्प्रतियोगिमात्रधर्मश्चानुयोगित्वं तन्निषेधत्वं तदुपमर्दत्वम् स च निषेधमात्रधर्मः॥

एतेन कार्यकारणभावक्रियाकर्मभावज्ञाप्यज्ञापकभावव्याप्यव्यापकभावावध्यवधिमद्भावप्रभृतयोऽप्यधिका निरस्ता वेदितव्याः। तदयं सङ्क्षेपः। घटः पटो नेत्यादिप्रतीतेः स्वरूपवैधर्म्ये तु न सप्रतियोगिके सावधिकास्तु नात्र केऽपि अभावोऽपि न सावधिकः अभावबुद्धाववधेरस्फुरणात्। अत एवाभावधीकारणीभूतायामपि बुद्धाववधेर्भानमित्यपास्तम्। घटः पटो नेति बुद्धेरव्यवहितप्राक्क्षण्यवधेरभानात्। तस्यैव स्वभावस्य भेदत्वेन ज्ञानेऽवधिज्ञानापेक्षा घटाभावाभावत्वेन घटज्ञाने घटाभावज्ञानापेक्षावत्। अमुकादमुको भिन्न इत्यादिकं पृथक्त्वशादित्यप्याहुः। घटः पटो नेति प्रयोगे घटो धर्मी पटप्रतियोगिकान्योन्याभाववानानुभूयतेऽत्र चाभावे नञर्थैकदेशे प्रतियोगितया पटोऽन्वीयत इति। न च भेदेषु भेदाकारानुगतमतेर्भेदत्वं तत्र च विलक्षणधीसाधिका भेद इति परस्पराश्रयाश्रयिभाव इति वाच्यम्। प्रामाणिकेनास्यादोषत्वात्। न च विजातीयस्य द्वयस्यैकं भेदत्वमयुक्तम् अभेदव्यवहारविरोधित्व-

Digitized by Google

स्येोपाधेस्त्रिष्वपि सम्भवात् घटत्वादयश्च पदप्रवृत्तितया प्रतीयन्ते ततः स्वाश्रयं भिन्दन्तीति नान्योन्याश्रयादि। नन्वननुगतैर्भेदैरनुगतो व्यवहारः कथम् अननुगतैरालोकधूमादियाथार्थ्यगता वह्न्यनुमितिः सापि कथं वह्निव्याप्यत्वेन भासते न आलोकादीनामनुगतिमत्त्वादिति यदि तर्ह्यभेदविरोधित्वेन भासिता भेदा अप्यनुगता एवेति। ननु भेदः कुत्र वर्तते यत्र प्रमीयते तत्र वर्तते कुत्र तर्हि प्रमितिव्यक्तिर्यत्र वृत्तिप्रमितिः अस्तु इयं रूढितोक्तिप्रत्युक्तिः सुहृद्भावेन पृच्छामः भेदो भिन्ने वर्ततेऽभिन्ने वा। नान्त्यो विरोधात् आद्येपि तेनैव भेदेन भिन्ने भेदान्तरेण वा। अत्राद्य आत्माश्रयः एकस्य क्रमिकवृत्तिद्वयासम्भवाच्च न ह्येक एव एकस्मिन्नेव धर्मिण्यादौ प्रविश्य पुनः प्रविशतीति सम्भवति। बहिःस्थस्यैव प्रवेशसम्भवात्। अन्त्येऽनवस्थाए (१) भिन्नादभेदाभिन्नाद्वा अत्राद्यकल्पस्य एतद्भिन्नीभूतादयं भिन्नो भविष्यतीति भिदा एतस्मिन् भिन्नीभूतत्वेन ज्ञातादयं तद्भिन्नत्वेन ज्ञातव्यमिति वा अर्थः। अत्र नाद्य उभययोरपीति भेदयोरन्योन्याभाववत्त्वेन तुल्यस्थित्या क्रमिकत्वायोगात्। नापरोन्योन्याश्रयात्। नान्त्यो बाधात्। न ह्यभिन्नात् भेदो भवतीति। किञ्च भेदः स्वप्रतियोगिनः स्वाश्रयतः स्वधर्मतश्च भिद्यते न वा आद्ये बहुमुखोऽनवस्था अन्त्ये स तेष्वेव लीयेतेति क्व भेदवार्तापीति। यद्यपि भेदं प्रतिभासमानं नापह्नोतुं शक्यमतस्तथाप्युक्तदूषणगणग्रस्ततया पत्रनिर्भरमभ्युपेयः। अत्रोच्यते। भेदो भिन्ने वर्तेताभिन्ने वा इति पृच्छतः सकलधर्मधर्मिभावखण्डनमभिप्रयतः किं गवि गोत्वमुतागवि गोत्वमिति धर्मकीर्तिपुरस्कृ-

(१) अत्रादर्शपुस्तकद्वये ऽपि कश्चिदंशो निपतितः।

तेन कापथेन संचरमाणस्य तव शून्योभिसन्धिः तथाहि न हि रूपवति रूपं वर्तते नापि रूपे रूपं वर्तेत आत्माश्रयात् नापि नोरूपे रूपं वर्तते विरोधात् किन्तु रूपवानित्यत्र यो विशेषस्तत्र विशेषं वर्तेत इति कात्रापि कथन्ता कोयं विशेष्यः पृथिव्यप्तेजोन्यतमः। स विशेष्यो रूपवृत्तेः प्राक्कीदृगिति चेत्। जन्यरूपस्थले रूपप्रागभाववानित्युत्तरम् अजन्यरूपस्थले तु रूपवृत्तिप्राक्कालो नास्त्येव क्व प्रश्नः। एवञ्च भेदो धर्मिणि निविशते नापि भिन्ने नापि भेदे। न च भेदवृत्तेः प्राक् स धर्मी कीदृशः नास्त्येवेति ब्रूमः यदैव हि धर्मी लब्धात्मकस्तदैव तत्र जातिरूपवैधर्म्यनामा भेदः समवेतो जातः सम्बन्धश्चेति मदुपगमात्। अन्योन्याभावस्वरूपभेदावपि तदैव न हि स तदानीमारभ्य तदात्मासीत्पश्चात्तदन्य इति सम्भवतीति। भिन्नभावप्रतियोगिकोन्योन्याभावलक्षणभेद इति सत्यम्। न तु भेदप्रतियोगिनि पिशाचादौ स्मृते स्तम्भे ऽनुभूयमाने योग्यानुपलब्ध्या स्तम्भः पिशाचो न भवतीति अन्योन्याभावप्रतियोगितः स्वाश्रया [१]धर्मतः भिद्यत इत्यत्रानुज्ञया वर्तितव्यम्। न चानवस्था तत्र मया स्वरूपभेदस्यैवोपगमात्। ननु स्वरूपं भेदो न सम्भवति अभेदे धर्मधर्मिभावाभावात्। न हि स एव तद्वान् तेनैव भवतीति चेत्। सत्यम्। ताद्रूप्येणाप्रतीयमानत्वे सति प्रतीयमानत्वं यत् धर्मिणः तदेव तस्मिन् तस्माद्विलक्षणं व्यवहारमर्जयतीति। न हि सम्भवति व्यवहर्तृषणा प्रतीयमानोपि धर्मी न व्यवह्रियते। नापि च सम्भवति अन्यतदात्मतया अप्रतीयमानोऽन्यतदात्मतयैव व्यवह्रियते तस्मात्ताद्रूप्येणाप्रतीतौ

(१) अत्रादर्शपुस्तकद्वये ऽपि कश्चिदंशो निपतितः।

धर्मिणः प्रतीतिर्भवन्ती तद्विलक्षणतयैव धर्मिणि व्यवहारयतीति स एव धर्मो तादृश्या बुद्ध्याभिलप्यमानः स्वस्मिन् नेतरविलक्षणव्यवहारं जनयन् भेदकार्यकारितया भेद इत्युच्यते। अत एव कर्मव्युत्पत्त्या स्वस्वरूपं करणव्युत्पत्त्या वैधर्म्यं ईषद्व्युत्पत्त्यान्योन्याभावं भेदं वर्द्धमानोपाध्याया आहुः। अन्याय्यश्चानेकार्थत्वमिति जैमिनिसूत्रस्वरसेनात्र नानार्थत्वे निरस्ते लाघवादभावार्थत्वस्यैव युक्तत्वे तस्य व्युत्पत्तिमात्रप्रदर्शनपरत्वात्। परस्परस्पर्द्धया यत्र नानार्थाधिगतिस्तस्यैव नानार्थत्वात् भावार्थधीनियतत्वात् परद्वयप्रतीतेः वैधर्म्ये स्वरूपान्योन्याभावौ द्रव्यादिषु त्रयमिति। किञ्च वेदान्तिनोपि महचीवपि भेदानवबुध्यमाना धर्मकीर्तनेन किं गवि गोत्वमित्यादिना भ्रमितान्तःकरणा भेदान् व्यवस्थापयितुमशक्नुवन् अनिर्वचनतानगरं प्रविश्य सुखं शेरते। नैयायिकास्तु तर्ककान्तारसञ्चारधुरीणा उक्तिप्रत्युक्तिप्रवीणास्त्र्यक्षकणभक्षपक्षिण उपनिषद्विरुद्धपञ्चनखीकुण्डमतय एकत्वविरुद्धमपि शङ्कितमर्थं करतलानलकरतलमुपन्यस्यन्तः कीर्तिप्रभृतिव्याहृतीस्तृणवदस्यन्तः स्वमतमुन्नतं कुर्वते अत एवान्यत्र टीकाकृताप्युक्तं न हि मृगाः सन्तीति शालयो नोप्यन्ते भिक्षवः प्रचरन्तीति स्थाल्यो वा नाधिश्रियन्त इति। तत्र चानिष्टनिर्णेजनेन स्वेष्टं रक्षणीयमिति तेषां भाव उन्नीयत इत्यलमतिविस्तरेणेति॥

नन्वेकधर्म्यसमावेश इति वैधर्म्यलक्षणमुक्तम्। तदयुक्तम्। प्रमाणत्वप्रमेयत्वयोरेकधर्मिसमाविष्टयोरपि परस्परवैधर्म्यरूपत्वात्। प्रमाकरणत्वं हि प्रमाणत्वं प्रमाविषयत्वं च प्रमेयत्वमिति। अथैवमपि एतावुपाधी भिन्नावि-

स्युक्तं भवतीति न तु विरुद्धौ एकधर्मिसमावेशादेव अन्यथा घटत्वकम्बुग्रीवावत्त्वेऽपि परस्परविरुद्धे किं न स्तां तस्मात् क्वचिदर्थैक्येऽप्यक्षरमात्रभेदो यथा कारकत्वं व्यापारवत्कारणत्वं चेति क्वचिद्विरोधेपि भेदः यथा गन्धवत्त्वपृथिवीत्वादीनां समसमावेशवतां क्वचित्तु समावेशो व्याप्यस्य स्वव्यापकधर्म्यधिष्ठितस्यानधिष्ठितधर्मिभेदकत्वेन ततो वैधर्म्यरूपत्वं यथा पृथिवीत्वस्य द्रव्यत्ववदबाधवृत्तित्वेन ततो भेदकतया तद्वैधर्म्यत्वं तथेह प्रमेयत्वाक्रान्तहेत्वाभासावृत्तितया प्रमाणत्वमस्तु हेत्वाभासादिभ्यो वैधर्म्यं प्रमेयत्वं तु न स्यात् केवलान्वयित्वेन सर्वीयत्वादितिघटपटत्वादि तु परस्परवैधर्म्यमिति सुप्रसिद्धमेवेति । एवं बाधिताभेदसाक्षाद्धीरर्थकारणिकेत्यतोपि भेदसिद्धिः ॥

ननु किमिदं कारणत्वं न तावत्प्राक्सत्त्वम् चिरध्वस्तस्यापि कारणत्वापत्तेः । ननु स्वाङ्गस्याव्यवधायकव्यापारेण व्यापारी न व्यवधीयत इति चेत् । न व्यापारानिरुक्तेः तज्जन्यत्वे सति तज्जन्यजनकस्तद्व्यापार इति चेत् । कुम्भकारस्यापि स्वपितृव्यापारतापत्तेः तज्जन्यकुम्भस्तत्पितृजन्यो न भवतीति चेत् । न । स्वर्गे यागध्वंसस्यापि तज्जन्यजनकत्वाविरोधात् व्यवहितयोः कार्यकारणभावे गृहीते तन्निर्वाहाय यत्र मध्यम आक्षिप्यते तत्र स व्यापारो यथा यागस्वर्गयोः यत्र तु न तथा तत्र प्रथमस्य मध्यमेऽन्यथासिद्धिर्यथा कुम्भकारपितुः कुम्भकारेणेति चेत् । तर्ह्यनन्यथासिद्धपूर्ववर्तित्वं तदित्यायाति तथा च भक्षितं विनष्टबीजमङ्कुरे कारणं न स्यात् तदङ्कुरपूर्ववर्तित्वाभावात् । अनन्यथासिद्धनियतपूर्ववर्तिजातीयत्वं तदिति चेत् । तर्हि रासभोप्यङ्कुरकारणं स्यात् द्रव्यत्वेन तस्यापि बीजसजाती-

यत्वात् । येन रूपेणाङ्कुरवत्ताभिवध्यते तेन रूपेण साजात्यं विवक्षितमिति चेत् । कारणावच्छेदकरूपेण साजात्यकारणत्वविवक्षायामात्माश्रयापत्तेः । तर्हि बीजत्वमपि न तथा न ह्यङ्कुरवत्ता बीजत्वेनावच्छिद्यते भक्षितविनष्टे बीजे अङ्कुरासम्बन्धिनि गतत्वात् । अङ्कुरवत्ता येन रूपेणावच्छिद्यते तेन रूपेण साजात्यं विवक्षितमिति चेत् । न । कारणावच्छेदकरूपेण साजात्यकारणत्वविवक्षायामात्माश्रयापत्तेः ॥

अनन्यथासिद्धिस्त्वन्यथासिद्धिविरहः सा च दुर्वचेति खण्डनम् । तन्न । अनन्यथासिद्धञ्च तन्नियतपूर्ववर्तित्वञ्चेति कार्योपहितं कारणशरीरं तज्जातीयं सदेव बीजत्वाद्यवच्छिन्नं व्यक्त्यन्तरञ्चेति । अन्यथासिद्धमपि दण्डत्वादिकं घटादिपूर्वसमये नियमतोऽस्त्येवेति तद्वारणायानन्यथासिद्धं चेति । अन्यथासिद्धिस्त्रेधा येन सहैव यस्यान्वयव्यतिरेकौ गृह्येते तस्य तेन सा यथा घटं प्रति दण्डेन दण्डरूपस्य यागापूर्वयोस्तन्नैवं तत्र हि यागस्य पूर्ववर्तित्वेऽवगतेऽपूर्वस्य तथात्वमवगम्यते । न त्ववगम्यमाने एवं दण्डेन दण्डत्वमप्यन्यथासिद्धं तस्याप्यन्वयव्यतिरेकौ दण्डेनैव सह गृह्येते तथा च स्वतन्त्रान्वयव्यतिरेकयोः कारणताबीजस्याभावात् न दण्डरूपं दण्डत्वं वा घटस्य कारणमुद्भूतरूपन्तु विषयेऽनुगततया प्रत्यक्षावच्छेदकमपि सत् स्वतन्त्रान्वयव्यतिरेकित्वात् घटादिप्रत्यक्षं प्रति कारणमेवेत्युभयरूपं तथा अन्यं प्रति पूर्ववर्तित्वे ज्ञात एव यत् प्रति यस्य पूर्ववर्तित्वं ज्ञायते यथा शब्दं प्रति पूर्ववर्तित्वे ज्ञात एव घटादिकं प्रत्याकाशस्य तथात्वं ज्ञायत इति शब्देन घटादिकं प्रति व्योमान्यथासिद्धं धर्मिग्राहक-

Digitized by Google

तरं मुनीनां प्रामाण्यमिति सिद्धान्ताद्भाष्योक्तरीत्या सर्वत्र दीङि परे र्नोनित्यं सत्वमिति स्थिते सूत्रवार्तिकमतेऽपि शेषे विभाषेति व्यवस्थितविभाषामाश्रित्य भाष्याविरोधः सम्पादनीयः । एकवाक्यतयैव सर्वनिर्वाहसम्भवे मतभेदकल्पनस्यानाश्रयणीयत्वादिति सर्वमिदं शब्दकौस्तुभे स्पष्टम् ॥

आद्यन्तवदेकस्मिन् । १ । १ । २१ ॥

एकस्मिन्क्रियमाणं कार्यमादाविवान्त इव स्यात् ॥ यथा कर्तव्यमित्यत्र प्रत्ययाद्युदात्तत्वम्भवति । एवमौपगव इत्यत्रापि । यथा वृक्षाभ्यामित्यत्र सुपि चेति दीर्घत्वम्भवति । एवमाभ्यामित्यत्रापि । एकस्मिन्निति किम् । सभासन्नयने भवः साभासन्नयनः । आकारमाश्रित्य वृद्धसंज्ञा न भवति । दरिद्राधातावियर्णान्तलक्षणो ऽप्न न ॥

तरप्तमपौ घः । १ । १ । २२ ॥

एतौ घसंज्ञौ स्तः ॥ कुमारितरा । कुमारितमा । घप्रदेशा घरूपेत्येवमादयः ॥

बहुगणवतुडति संख्या । १ । १ । २३ ॥

एते संख्यासंज्ञाः स्युः ॥ बहुकृत्वः । संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् । बहुधा । संख्याया विधार्थे धा । बहुभिः क्रीतो बहुकः । संख्याया अतिशदन्तायाः कन् । बहुशः । बह्वल्पार्थाच्छस्कारकादित्यनुवर्तमाने संख्यैकवचनाच्च वीप्सायामिति शस् । गणकृत्वः । गणधा । गणकः । गणशः । तावत्कृत्वः । तावद्धा । तावत्कः । तावच्छः । कतिकृत्वः । कतिधा । कतिकः । कतिशः । बहुगणयोर्वैपुल्ये संघे च वर्तमानयोर्नेह ग्रहणम् । संख्यायतेऽनयेत्यन्वर्थसंज्ञाविज्ञानात् । किन्तु संख्यावाचिनोरेव । अनियतबहुत्ववाचि-

Digitized by Google

माड्वेदनयोरेवेति नियमेन भूयादीनां निवृत्त्यर्थं संख्यासंज्ञा विधीयते ॥ अध्यर्द्धग्रहणञ्च समासकन्विध्यर्थम् ॥ * ॥ अर्द्धेनाधिकम् अध्यर्द्धम् । अध्यर्द्धेन शूर्पेण क्रीतं अध्यर्द्धशूर्पम् । दिक्संख्ये इत्यनुवर्त्तमाने तद्धितार्थेति समासः ततः शूर्पादञन्यतरस्यामित्यञ्ञो वा अध्यर्द्धपूर्वेति लुक् । अध्यर्द्धेन क्रीतं अध्यर्द्धकम् । संख्याया अतिशदन्तायाः कन् । समासविध्यर्थमिति सम्बन्धसामान्ये षष्ठी । समासे विधीयमाने समासनिमित्ते अन्यस्मिन् कार्ये च विधीयमाने इत्यर्थः । तेन द्विगुनिमित्तो लुगपि लभ्यते । तथा चाध्यर्द्धपूर्वेति सूत्रे अध्यर्द्धग्रहणं न कर्त्तव्यम्भवति ॥ अर्द्धपूर्वपदश्च पूरणप्रत्ययान्तः ॥ * ॥ संख्येत्यनुवर्त्तते । पूरणप्रत्ययान्त इत्यस्य पूरणप्रत्ययान्तोत्तरपद इत्यर्थः । समासकन्विध्यर्थमित्येव । अर्द्धं पञ्चमं येषामिति बहुव्रीहिः । अर्द्धपञ्चमैः शूर्पैः क्रीतं अर्द्धपञ्चमशूर्पम् । पूर्ववदञ्ञो वा लुक् । अर्द्धपञ्चमेन क्रीतं अर्द्धपञ्चमकम् ॥ अधिकग्रहणञ्चालुकि समासोत्तरपदवृद्ध्यर्थम् ॥ * ॥ अधिकया षष्ट्या क्रीतः अधिकषाष्टिकः । अधिकसाप्ततिकः । तद्धितार्थेति समासः । प्राग्वतेष्ठञ् । अलुकीति वचनाल्लुकि कर्त्तव्ये संख्यासंज्ञा नास्तीति द्विगुत्वमपि न । तेनाध्यर्द्धपूर्वद्विगोरिति लुक् न । ततः संख्यायाः संवत्सरसंख्यस्य चेत्युत्तरपदवृद्धिः । नन्तूत्तरपदवृद्ध्यर्थमिति वचनाल्लुक् न भविष्यति किमलुकीत्यनेन । नैतदस्ति । अर्हत्यर्थात्परेष्वर्थेषु यः प्रत्ययस्तस्य लुगभावात्तत्रैवोत्तरपदवृद्धिः स्यात् ॥ संख्याव्ययासन्नेति सूत्रे चाधिकग्रहणं न कर्त्तव्यम् । संख्येत्येव सिद्धेः ॥

ष्णान्ता षट् । १ । १ । २४ ॥

षान्ता नान्ता च संख्या षट्संज्ञा स्यात् ॥ षट् तिष्ठन्ति ।

Digitized by Google

षट् पञ्च । पञ्च सप्तेत्यादि । संख्येति किम् । विप्रुषः । पामानः । षट्प्रदेशाः षड्भ्यो लुगित्येवमादयः ॥

डति च । १ । १ । २५ ॥

डत्यन्ता संख्या षट्संज्ञा स्यात् ॥ कति सन्ति । कत्यद्राक्षीः । संख्येति किम् । पातेर्डतिः । पतयः । न चास्य संख्यासंज्ञाऽपि स्यादिति वाच्यम् । बहुगणवतुडतिग्रहणस्य तद्धितस्यैव ग्रहणात् ॥

क्तक्तवतू निष्ठा । १ । १ । २६ ॥

एतौ निष्ठासंज्ञौ स्तः ॥ कृतः । कृतवान् । निष्ठाप्रदेशाः श्वीदितो निष्ठायामित्येवमादयः ॥

सर्वादीनि सर्वनामानि । १ । १ । २७ ॥

सर्वादीनि शब्दरूपाणि सर्वनामसंज्ञानि स्युः ॥ तदन्तस्यापीयं संज्ञा । द्वन्द्वे चेति ज्ञापकात् । तेन परमसर्वेति च परमभवकानित्यत्राकच्च सिद्ध्यति । सर्वः, सर्वौ, सर्वे, सर्वस्मै, सर्वस्मात्, सर्वेषाम्, सर्वस्मिन्, शेषं रामवत् । एवं विश्वादयोऽप्यदन्ताः । सर्वनामप्रदेशाः सर्वनाम्नः स्मै इत्येवमादयः । सर्वादयश्च पञ्चत्रिंशत् । सर्व, विश्व, उभ, उभय, डतर, डतम, अन्य, अन्यतर, इतर, त्वत्, त्व, नेम, सम, सिम । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् । स्वमज्ञातिधनाख्यायाम् । अन्तरं बहिर्योगोपसंव्यानयोः । त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, अस्मद्, भवतु, किम्, इति । सर्वादयस्त्रिलिङ्गाः । उभशब्दो द्वित्वविशिष्टस्य वाचकः । अत एव नित्यं द्विवचनान्तः । तस्येह पाठस्तूभकावित्यकजर्थः । न च कप्रत्ययेनेष्टसिद्धिः । द्विवचनपरत्वाभावेनोभयत उभयेत्यादाविवायच्प्रसङ्गात् । तदुक्तम् । उभयोऽन्यत्रेति । अन्यत्र

द्विवचनपरत्वाभावे । उभयशब्दस्य द्विवचनं नास्तीति कैयटः । अस्तीति हरदत्तः । तस्माज्जस्ययजादेशस्य स्थानिवद्भावेन तयप्प्रत्ययान्ततया प्रथमचरमेति विकल्पे प्राप्ते विभक्तिनिरपेक्षत्वेनान्तरङ्गत्वान्नित्यैव संज्ञा भवति । उभये । डतरडतमौ प्रत्ययौ । यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति । सुप्तिङन्तमिति ज्ञापकात् । तथापीह तदन्तग्रहणम् । केवलयोः संज्ञायाः प्रयोजनाभावात् । अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावाद् द्विबहुवचनविषये निर्द्धारणे वर्तेते । तत्रान्यतमशब्दस्य गणे पाठाभावान्न संज्ञा । त्वत् त्व इति द्वावप्यदन्तावन्यपर्यायौ । एक उदात्तोऽपरोऽनुदात्त इत्येके । एकस्तान्त इत्यपरे । नेम इत्यर्द्धे । समः सर्वपर्यायः । तुल्यपर्यायस्तु नेह गृह्यते । यथासंख्यमनुदेशः समानामिति ज्ञापकात् । एकशब्दः संख्यायामेकवचनान्तः । संज्ञोपसर्जनीभूतास्तु न सर्वादयः । महासंज्ञाकरणेन तदनुगुणानामेव गणे सन्निवेशात् । अतः संज्ञाकार्यमन्तर्गणकार्येषु तेषां न भवति । सर्वो नाम कश्चित्तस्मै सर्वाय देहि । अतिक्रान्तः सर्वमतिसर्वस्तस्मै अतिसर्वाय देहि । अतिकतरं कुलम् । अतितत् ॥

विभाषा दिक्समासे बहुव्रीहौ । १ । १ । २८ ॥

अत्र सर्वनामता वा स्यात् ॥ उत्तरपूर्वस्यै । उत्तरपूर्वायै । दिङ्नामान्यन्तराल इति प्रतिपदोक्तस्य दिक्समासस्य ग्रहणान्नेह । योत्तरा सा पूर्वा यस्या उन्मुग्धायास्तस्यै उत्तरपूर्वायै । बहुव्रीहिग्रहणं स्पष्टार्थम् ॥

न बहुव्रीहौ । १ । १ । २९ ॥

बहुव्रीहौ चिकीर्षिते सर्वनामता न स्यात् ॥ त्वकं पिता यस्य

त्वत्कपितृकः । अहकं पिता यस्य मत्कपितृकः । इह समासात्प्रा-गेव प्रक्रियावाक्ये सर्वनामसंज्ञा निषिध्यते । अन्यथा लौकिकविग्रह-वाक्य इव तत्राप्यकच् प्रवर्तेत । स च समासेऽपि श्रूयेत । अतिक्रान्तो भवकन्तमतिभवकानितिवत् । भाष्यकारस्तु त्वकत्पितृको मकत्पि-तृक इति रूपे इष्टापत्तिं कृत्वैतत्सूत्रं प्रत्याचख्यौ । यथोत्तरं मुनी-नां प्रामाण्यम् ॥

तृतीयासमासे । १ । १ । ३० ॥

अत्र सर्वनामता न स्यात् ॥ मासपूर्वाय । तृतीयासमासार्थ-वाक्येऽपि न । मासेन पूर्वाय ॥

द्वन्द्वे च । १ । १ । ३१ ॥

द्वन्द्वे उक्ता संज्ञा न स्यात् ॥ वर्णाश्रमेतराणाम् । समुदायस्यायं निषेधो नत्ववयवानाम् । नचैवं तदन्तविधिना सुट्प्रसङ्गः । सर्वनाम्नो विहितस्यामः सुडिति व्याख्यास्यमानत्वात् ॥

विभाषा जसि । १ । १ । ३२ ॥

जसाधारं यत्कार्यं शीभावाख्यं तत्र कर्तव्ये द्वन्द्वे उक्ता संज्ञा वा स्यात् ॥ वर्णाश्रमेतरे । वर्णाश्रमेतराः । शीभावमात्रस्येव विभाषेत्यु-क्तमतो नाकच् । किन्तु कप्रत्यय एव । वर्णाश्रमेतरकाः ॥

प्रथमचरमतयाल्पार्धकतिपयनेमाश्च । १ । १ । ३३ ॥

एते जसः कार्यं प्रत्युक्तसंज्ञा वा स्युः ॥ प्रथमे । प्रथमाः । चरमे । चरमाः । तयप् प्रत्ययः । ततस्तदन्ता ग्राह्याः । द्वितये । द्वितयाः । अल्पे । अल्पाः । अर्धे । अर्धाः । कतिपये । कतिपयाः । शेषं रामवत् । नेमे । नेमाः । शेषं सर्ववत् ॥

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् । १ । १ । ३४ ॥

एषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणपाठात्सर्वत्र या प्राप्ता सा जसि वा स्यात् ॥ पूर्वे । पूर्वाः । एवं परादीनामपि । स्वाभिधेयापेक्षावधिनियमो व्यवस्था । व्यवस्थायां किम् । दक्षिणा गाथकाः । कुशला इत्यर्थः । असंज्ञायां किम् । उत्तराः कुरवः ॥

स्वमज्ञातिधनाख्यायाम् । १ । १ । ३५ ॥

ज्ञातिधनान्यवाचिनः स्वशब्दस्य या प्राप्ता संज्ञा सा जसि वा स्यात् । स्वे । स्वाः । आत्मीया इत्यर्थः । आत्मान इति वा । ज्ञातिधनवाचिनस्तु स्वाः । ज्ञातयोऽर्था वा ॥

अन्तरं बहिर्योगोपसंव्यानयोः । १ । १ । ३६ ॥

बाह्ये परिधानीये चार्थेऽन्तरशब्दस्य या प्राप्ता संज्ञा सा जसि वा स्यात् । अन्तरे अन्तरा वा गृहाः । बाह्या इत्यर्थः । अन्तरे अन्तरा वा शाटकाः । परिधानीया इत्यर्थः ॥ अन्तरं बहिर्योगेति गणसूत्रेऽपुरीति वक्तव्यम् ॥ * ॥ अन्तरायां नगर्यां । अन्तरायां पुरि ॥ विभाषाप्रकरणे तीयस्य ङित्सूपसंख्यानम् ॥ * ॥ द्वितीयस्मै । द्वितीयाय । एवं तृतीयः । अर्थवद्ग्रहणान्नेह । पटुजातीयाय ॥

स्वरादिनिपातमव्ययम् । १ । १ । ३७ ॥

स्वरादयो निपाताश्च प्राग्रीश्वरान्निपाता इत्यारभ्य अधिरीश्वरे इत्येतत्पर्यन्तं वक्ष्यमाणा अव्ययसंज्ञाः स्युः ॥ स्वर्, अन्तर्, प्रातर्, पुनर्, सनुतर्, उच्चैस्, नीचैस्, शनैस्, ऋधक्, ऋते, युगपत्, आरात्, पृथक्, ह्यस्, श्वस्, दिवा, रात्रौ, सायम्, चिरम्, मनाक्,

ईषत्, जोषम्, तूष्णीम्, बहिस्, अवस्, समया, निकषा, स्वयम्, वृथा, नक्तम्, नञ्, हेतौ, इद्धा, अद्धा, सामि, वत्, ब्राह्मणवत्, क्षत्रियवत्, सना, उपधा, सनत्, सनात्, तिरस्, अन्तरा, अन्तरेण, ज्योक्, कम्, शम्, सहसा, विना, नाना, स्वस्ति, स्वधा, अलम्, वषट्, श्रौषट्, वौषट्, अन्यत्, अस्ति, उपांशु, क्षमा, विहायसा, दोषा, मृषा, मिथ्या, मुधा, पुरा, मिथो, मिथस्, प्रायस्, मुहुस्, प्रवाहुकम्, प्रवाहिका, आर्यहलम्, अभीक्ष्णम्, साकम्, सार्द्धम्, नमस्, हिरुक्, धिक्, अथ, अम्, आम्, प्रताम्, प्रशान्, प्रतान्, मा, माङ् । आकृतिगणोऽयम् । चादयो निपाताः । अव्ययप्रदेशा अव्ययादाप्सुप इत्येवमादयः ॥

तद्धितश्चासर्वविभक्तिः । १ । १ । ३८ ॥

यस्मात्सर्वा विभक्तिर्नोत्पद्यते स तद्धितान्तोऽव्ययं स्यात् ॥ परिगणनं कर्तव्यम् । तसिलादयः प्राक् पाशपः । शस्प्रभृतयः प्राक्समासान्तेभ्यः । अम् । आम् । कृत्वोर्थाः । तसिवती । नानाञाविति । तेनेह न । पचतिकल्पम् । पचतिरूपम् ॥

कृन्मेजन्तः । १ । १ । ३९ ॥

कृद्यो मान्त एजन्तश्च तदन्तमव्ययं स्यात् ॥ स्मारं स्मारम् । जीवसे । पिबध्यै ॥

क्त्वातोसुन्कसुनः । १ । १ । ४० ॥

एतदन्तमव्ययं स्यात् ॥ कृत्वा । उदेतोः । विसृपः ॥

अव्ययीभावश्च । १ । १ । ४१ ॥

अव्ययं स्यात् ॥ अधिहरि ॥

Digitized by Google

शि सर्वनामस्थानम् । १ । १ । ४२ ॥

शि इत्येतत्सर्वनामस्थानसंज्ञं स्यात् ॥ कुण्डानि । सर्वनामस्थानप्रदेशाः सर्वनामस्थाने चासम्बुद्धावित्येवमादयः ॥

सुडनपुंसकस्य । १ । १ । ४३ ॥

सुट् प्रत्याहारः । स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य ॥ राजा । राजानौ । राजानः । राजानम् । राजानौ । अनपुंसकस्य किम् । सामनी ॥

न वेति विभाषा । १ । १ । ४४ ॥

निषेधविकल्पयोर्विभाषा संज्ञा स्यात् ॥ उभयत्र विभाषाः प्रयोजयन्ति । विभाषाप्रदेशेषु विभाषा श्वेरित्येवमादिषु प्रतिषेधविकल्पावुपतिष्ठेते । तत्र प्रतिषेधेन समीकृते विषये विकल्पः प्रवर्तते । शुशाव । शिश्वाय । शुशुवतुः । शिश्वियतुः ॥

इग्यणः सम्प्रसारणम् । १ । १ । ४५ ॥

यणः स्थाने प्रयुज्यमानो य इक् स सम्प्रसारणसंज्ञः स्यात् ॥ यज् । इष्टम् । वप् । उप्तम् । ग्रह । गृहीतम् । सम्प्रसारणप्रदेशाः सम्प्रसारणाच्चेत्येवमादयः । विधिप्रदेशेषु तु सूत्रशाटकवद्भाविसंज्ञाऽऽश्रयणीया । अदुह्वितरामित्यादौ लस्योत्तमैकवचने इटि तस्य हल इति दीर्घापत्तिस्तु यथासंख्यसम्बन्धात्परिहर्तव्या । द्युभ्यामित्यादौ तु दिव उदिति तपरत्वान्न दीर्घः । नन्वेवमपि अक्षद्युवावित्यादौ ऊठः संप्रसारणसंज्ञायां संप्रसारणाच्चेति पूर्वरूपं स्यादिति चेन्न । संप्रसारणपूर्वत्वे समानाङ्गग्रहणस्य वार्तिककृता कृतत्वात् । वार्णादाङ्गं बलीय इत्युक्तत्वप्रवृत्तेश्च । पूर्वरूपात्पूर्वं हल इति दीर्घस्य प्रवृत्तत्वेन तस्य संप्रसारणत्वाभावेन पूर्वत्वाप्राप्तेश्च । एतेनाक्षद्यूस्वाभा-

वहुवस्वावङ्गुलस्य इत्यादौ पूर्वत्वं दुर्वारमित्यपास्तम्। हूतो जीन इत्यादौ हल इति सूत्रारम्भसामर्थ्यादल्विधौ स्थानिवत्त्वाङ्गीकारेण पूर्वत्वनिष्पन्नस्य संप्रसारणत्वेऽपि दीर्घनिष्पन्नस्य तथात्वे मानाभावात्। अत एव समानाङ्गग्रहणप्रत्याख्यानेन न फलभेदः॥

आद्यन्तौ टकितौ। १। १। ४६॥

टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः॥ भविता। यापयति। पुरस्तादपवादन्यायेन स्थानेयोगत्वस्यायमपवादः। प्रत्ययः परश्चेत्यनेन तु परत्वाद्बाध्यते। तेन चरेष्टादयः परा एव भवन्ति॥

मिदचोऽन्त्यात्परः। १। १। ४७॥

अच इति निर्द्धारणे षष्ठी। अचां मध्ये योऽन्त्यस्तस्मात्परस्तस्यैवान्तावयवो मित् स्यात्॥ तृणह इति निर्देशादयं बाध्यसामान्यचिन्तया स्थानेयोगत्वप्रत्ययपरत्वयोरपवादः। वनानि। पयांसि। मुञ्चति। रुणद्धि॥ अन्त्यात्पूर्वो मस्जेरनुषङ्गसंयोगादिलोपार्थम्॥ *॥ मग्नः। मग्नवान्। मङ्क्ता। मङ्क्तुम्॥

एच इग्घ्रस्वादेशे। १। १। ४८॥

आदिश्यमानेषु ह्रस्वेषु एच इगेव स्यात्॥ रैशब्दमतिक्रान्तं कुलं अतिरि। चित्रगु। अतिरि। अतिनु॥

षष्ठी स्थानेयोगा। १। १। ४९॥

अनिर्द्धारितसम्बन्धविशेषा षष्ठी स्थानेयोगा बोध्या॥ स्थानञ्च प्रसङ्गः। अस्तेर्भूः। अस्तेः स्थाने इत्यर्थः। भविता। भवितुम्। ब्रुवो वचिः। वक्ता। वक्तुम्॥

स्थानेऽन्तरतमः। १। १। ५०॥

प्रसङ्गे सति सदृशतम आदेशः स्यात् ॥ सादृश्यञ्च चतुर्द्धा । स्थानार्थगुणप्रमाणभेदात् । तत्र स्थानतो दैत्यारिः । अर्थतो वतण्डी चासौ युवतिश्च वातण्ड्ययुवतिः । पुंवद्भावेन वतण्डापत्यवाचिनो वतण्डीशब्दस्य तदपत्यवाची वातण्ड्यशब्दो भवति । वतण्डीत्यत्र वतण्डाच्चेत्यपत्ये यञ् तस्य लुक् स्त्रियामिति लुक् शार्ङ्गरवादित्वान्ङीन् । गुणतः । पाकः । त्यागः । प्रमाणतः । अमुष्मै । अमूभ्याम् । तमप् किम् । वाग्घरिरित्यादौ महाप्राणत्वसाम्येन जायमानः पूर्वसवर्णो वर्गतृतीयो माभूत् किन्तु नादवान्महाप्राणश्चतुर्थो घ एव यथा स्यादिति । इह स्थाने इत्यनुवर्तमाने पुनः स्थानेग्रहणं तृतीयया विपरिणामेन वाक्यभेदमाश्रित्य प्रसङ्गे सति सम्भवे स्थानत एवान्तरतम इत्यर्थकम् । तदुक्तम् । यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीय इति । तेन चेता स्तोतेत्यादौ प्रमाणत आन्तर्यवानप्यकारो गुणो न भवति । किन्तु स्थानत एवान्तर्यवन्तावेकारौकारौ भवतः ॥

उरण् रपरः । १ । १ । ५१ ॥

ऋ इति त्रिंशतः संज्ञेत्यणुदित्सूत्रे वक्ष्यते । तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्तते ॥ तत्रान्तरतम्यात्कृष्णर्द्धिरित्यादौ रेफपरः । तवल्कार इत्यादौ लपरः । कर्ता । कारकः । किरति । द्वैमातुरः । उः किम् । दे च खनः । खेयम् । अण् किम् । सुधातुरकङ् च । सौधातकिः ॥

अलोऽन्त्यस्य । १ । १ । ५२ ॥

स्थानषष्ठीनिर्दिष्टस्य यदुच्यते तदन्त्यस्यालः स्थाने बोध्यम् ॥ त्यदादीनामः । सः । यः । स्थानषष्ठीति किम् । आर्द्धधातुकस्येट् तृच

षकारात् पूर्वो माभूत् । अलः किम् । पदस्येत्यधिकृत्य विधीयमानं वसुस्रंस्विति दत्वं परमानडुह्यामित्यादावन्त्यस्य पदस्य माभूत् ॥

ङिच्च । १ । १ । ५३ ॥

ङिदनेकालप्यन्त्यस्य स्यात् ॥ सर्वस्येत्यस्यापवादः । दधा । दधे । तातङ्स्तु यथा सर्वादेशत्वं तथा तद्विधावेव वक्ष्यते ॥

आदेः परस्य । १ । १ । ५४ ॥

परस्य यद्विहितं तत्तस्यादेरलो बोध्यम् ॥ अलो ऽन्त्यस्येत्यस्यापवादः । ईदासः । अत्र तस्मादित्युत्तरस्येत्युपतिष्ठते । तेनादेरीकारः । आसीनः । अलः किम् । द्व्यन्तरुपसर्गेभ्यो ऽप ईत् । द्वीपम् । अत्र पांतसमुदायस्येत्वं माभूत् ॥

अनेकाल् शित्सर्वस्य । १ । १ । ५५ ॥

स्पष्टम् । अलो ऽन्त्यसूत्रापवादः । अस्तेर्भूः । भविता । इदम इश् । इतः । अतो भिस ऐस् अष्टाभ्य औशित्यादावादेः परस्येत्येतदपि परत्वादनेन बाध्यते ॥

स्थानिवदादेशो ऽनल्विधौ । १ । १ । ५६ ॥

आदेशः स्थानिवत्कार्यं लभते प्रवर्तयति च ॥ तृतीयान्ताद्वतिना स्थानिना तुल्यं वर्तते इति वाक्यार्थलाभात् । यद्रूपवैकल्यादुपदेशाप्रवृत्तौ सत्यामतिदेशो मृग्यते तद्रूपं स्थान्यलो ऽसाधारणं न भवेत् । काभ्याम् । कैः । इहाकृत्त्वातिदेशाद्दीर्घैस्भावौ । आवधिषीष्टेत्यत्र हन्तेर्विधीयमानमात्मनेपदमतिदेशाद्वधेरपि । न हि तत्राप्राप्नोति । रामायेत्यादौ सुपि चेति दीर्घे कर्तव्ये यद्यपि यथाप्राप्तमप्राप्नोति तथापि न तत्र तद्विरहप्रयुक्ता सुपि चेत्यस्याप्रवृ-

तिः । यादेशस्य यशादित्वात् । सुप्वैकल्यात्तूपदेशस्याप्रवृत्तिः । सुप् चेह यद्यपि ए, इत्यस्मिन्नस्ति वर्तते तथापि न तदलोऽसाधारणम् । भ्यामादौ समुदाये विश्रान्तेः । एतेनाहदितामहदितमित्यादाविडागमोऽपि व्याख्यातः । प्रत्यासत्त्या च शास्त्रीयकार्ये एव स्थानिवत्त्वम् । तेन नायक्षिद्धिरित्याहुः । प्रत्यासत्त्यैव च यद्रूपवैकल्यप्रयुक्तोपदेशाप्रवृत्तिस्तद्रूपमपि शास्त्रीयमेवापेक्षितम् । तेन जघसिथेत्यादौ तासौ नित्यानिट्त्वस्याशास्त्रीयत्वेन तदनतिदेशादचस्तास्वदिति न भवति । इह कार्यातिदेशपक्षे शास्त्रातिदेशपक्षेण तुल्यफलत्वाय यद्रूपवैकल्यप्रयुक्तोपदेशाप्रवृत्तिस्तद्रूपातिरिक्तसर्वरूपनिमित्तकत्वमतिदेशस्यापि बोध्यम् । अत एव सर्वस्मै इत्यादौ न दीर्घः । षत्किम् । स्थान्यादेशस्य संज्ञा मा विज्ञायीति स्वाश्रयमपि यथा स्यात् । आङो यमहन इत्यात्मनेपदमुभयत्रापि भवति । आहत । आवधिष्ट । आजघ्ने । न चैवं तण्डुलानित्यादौ स्थानिवद्भावेन प्रत्ययान्तत्वेऽपि स्वाश्रयाप्रत्ययान्तत्वात्प्रातिपदिकत्वं स्यादिति वाच्यम् । अतिदेशस्वभावेनातिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभावात् । प्रत्ययान्तत्वाप्रत्ययान्तत्वयोर्विरोधात् । नचाप्रत्यय इत्यस्य पर्युदासत्वस्य भाष्ये उक्तत्वेनाशास्त्रीयकार्यत्वात्स्थानिवत्त्वमेव कथमिति वाच्यम् । पर्युदासलभ्याशास्त्रीयस्य शास्त्रीयत्वस्वीकारात् शास्त्रतात्पर्यविषयत्वात् । आदेशग्रहणं किम् । आनुमानिकस्याप्यादेशस्य स्थानिवद्भावो यथा स्यात् । एहः । पचतु । अनल्विधाविति किम् । तेन, तस्मात्, तस्य, तस्मिंश्च, विधौ माभूत् । तत्र अला विधौ । यथा व्यूढोरस्केन । अत्र सकारस्य स्थानिवत्त्वेन विसर्गवदट्त्वमाश्रित्याड्व्यवाये इति णत्वं प्राप्तम् । अलः परस्य । द्योः । पन्थाः । हल्ङ्यादिलोपो न । अलो विधौ । व्युक्रामः ।

वलि लोपो न । अलि विधौ । यजेः क्तः । क इष्टः । हशिचेत्युत्वं न । अनल इत्युक्तेऽपि सम्बन्धसामान्ये षष्ठ्या प्रागुक्तानेकविभक्त्यर्थसंग्रहेऽपि विधिग्रहणं वलादेरित्यादावप्राधान्येनाप्यलाश्रयणे निषेधार्थम् । तेन प्रपठ्येत्यादौ वलादिलक्षण इट्न । नन्वेवमनुबन्धाश्रयकार्येष्वनल्विधाविति निषेधात्प्रदीव्येत्यादौ कित्वातिदेशो न स्यादिति चेन्न । अनेकान्ता अनुबन्धा इति पक्षे तेषां स्थान्यल्त्वाभावात् । एकान्तपक्षेऽपि अन्तरङ्गेण लोपेन आदेशसम्बन्धात्प्रागेव तेषामपहारात् । न ल्यपीति लिङ्गाच्च । नन्वेवमपि सामान्यातिदेशे विशेषानतिदेशात्कित्वातिदेशो न स्यादेव । तद्धि क्त्वाविशेषधर्मः । सेट्के तदभावादिति चेन्न । न ल्यपीति लिङ्गादेव चात्र सूत्रे विशेषातिदेशस्याप्यङ्गीकारात् ॥

अचः परस्मिन् पूर्वविधौ । १ । १ । ५७ ॥

अल्विध्यर्थमिदम् । परनिमित्तोऽजादेशः स्थानिवत्स्यात्स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये ॥ अत्र सूत्रे भावाभावयोरुभयोरप्यतिदेशो भवति । नपदान्तसूत्रे यलोपदीर्घादिग्रहणाल्लिङ्गात् । निगाल्यते । गणयति । अचः किम् । आगत्य । मलोपस्य स्थानिवत्वाद्ध्रस्वस्येति तुक् न स्यात् । परस्मिन्निति किम् । आदीध्ये । दीधीङ उत्तमैकवचने टेरेत्वस्यापरनिमित्तत्वाद्यीवर्णयोर्दीधीवेव्योरिति लोपो न भवति । पूर्वविधाविति किम् । नैधेयः । आतो लोपो ह्यच्लक्षणो ढक्प्रत्ययविधौ न स्थानिवत् ॥

न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु । १ । १ । ५८ ॥

पदस्य चरमावयवे द्विर्वचनादौ च कर्तव्ये परनिमित्तोऽजा-

देशो न स्थानिवत्स्यात् । कानि सन्ति । कौ स्तः । इत्यत्रास्तेरल्लो-
पस्य स्थानिवत्त्वेन यणादेशो प्राप्तो पदान्तविधौ तन्निषेधान्न स्तः ।
द्विर्वचने । सुद्ध्युपास्यः । वरे । यायावरः । यश्च यङ इति वरच्
अतोलोपः । स चातो लोप इटि चेत्यालोपे कर्तव्ये न स्थानिवत् ।
यलोपे । यातिः । यातेर्यङन्तात् क्तिच् । अतो लोपः । यलोपः । अल्लो-
पस्य स्थानिवत्त्वादातो लोपः । न च पुनरालोपः शङ्क्यः । चिणो लुक्-
न्यायेनालोपस्यासिद्धत्वात् । स्थानिवद्भावाच्च । स्वरे । चिकीर्षकः ।
सनोऽतो लोपः । लितीति ककारेकारस्योदात्तत्वे कर्तव्ये न स्थानि-
वत् । सवर्णानुस्वारयोः । शिण्ढि । शिंषन्ति । दीर्घे । प्रतिदीव्नः
जशि । सग्धिश्च मे । अदनं ग्धिः । अदेः क्तिनि बहुलञ्छन्दसीति
घस्लादेशः । घसिभसोर्हलि चेत्युपधालोपः । झलो झलीति सलोपः ।
धत्वम् । घस्य जश्त्वम् । सहस्य स इति सूत्रात्स इत्यनुवर्तमाने
समानस्य छन्दस्यमूर्द्धप्रभृत्युदर्केष्विति सूत्रेण सः । चरि । जक्षतुः ।
स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवदिति वक्तव्यम् ॥ * ॥
अन्यस्तु स्थानिवदेव । अचितीकोऽखट्वक, इत्यादौ चितेः कपीति
दीर्घस्य केऽणः, आपोऽन्यतरस्यामिति ह्रस्वस्य च स्थानिवत्त्वात् ह्र-
स्वान्तेऽन्त्यात्पूर्वमिति क्रमेण प्रवर्तते न च प्रवर्तते । किर्योर्गिर्योरित्या-
दौ व्युत्पत्तिपक्षे हलि चेति दीर्घः प्राप्तो यणः स्थानिवत्त्वान्न भवति ।
वाय्वोरित्यादौ वलि लोपो न भवति ॥ क्विलुगुपधात्वचङ्परनिर्ह्रास-
कुत्वेषूपसंख्यानम् ॥ * ॥ अच क्वावित्यस्य क्वौ विधिं प्रति न स्था-
निवत् क्वौ लुप्तं च न स्थानिवदित्यर्थः । लवमाचष्टे लौः । अच
णिचि यष्टिलोपो यश्च क्वौ णिलोपस्तदुभयमपि क्वौ विधिमूठं प्रति न
स्थानिवत् । एत्येधत्यूठ्स्विति वृद्धिः । कुमारीमिच्छन्ब्राह्मणः कुमारी ।
क्यजन्तात्कर्तरि क्विप् । अल्लोपयलोपौ । हल्ङ्यादिलोपः । अल्लोपस्य

स्थानिवत्त्वाद्यण् प्राप्तः । क्वौ लुप्तं न स्थानिवदिति न भवति । किन्तु सखीयतेः क्विप् कस् सख्युः । इहाल्लोपे यलोपेऽल्लोपस्य स्थानिवत्त्वात्परत्वात्क्विपो लोपं बाधित्वा यण् स्यात् । ततः क्विन्निमित्तके यलोपे सख इति स्यात् । ङसिन्निमित्तकस्य तु बहिरङ्गत्वेनासिद्धत्वान्न लोपः । स्थानिवत्त्वे तु व्यवधानात्तन्निमित्तकोऽपि न स्यात् । अत एव व्यत्यात्सूत्रे क्वौ लुप्तं न स्थानिवदिति यत्नं परिजहार कैयटः । किन्तु गोमत्यतेः क्विप् गोमान् । इहाल्लोपस्य स्थानिवत्त्वात्सर्वनामस्थानपरत्वाभावान्नुम्न स्यात् । न चाधातुग्रहणस्याधातुभूतपूर्वस्यापि नुमर्थताया वक्ष्यमाणत्वेन तत्सामर्थ्यात्स्थानिवत्त्वकृतव्यवाये सत्यपि नुम् स्यादिति वाच्यम् । गोमततेः क्विपि गोमानित्यादौ चरितार्थत्वादिति दिक् । तस्मात्क्वौ लुप्तं नेत्येव शरणम् । इदं पुनरिहावधेयम् । क्वौ विधिं प्रतीत्येव सार्वत्रिकम् । क्वौ लुप्तमिति तु क्वाचित्कम् । अन्यथा पिपठिषतेरप्रत्ययेऽल्लोपे नपुंसकबहुवचने शौ पिपठिषीत्यत्राल्लोपस्य स्थानिवत्त्वनिषेधाज्झलन्तलक्षणनुमापत्तेः । अत एव कैयटोऽपि दीधीवेवीटामित्यत्र क्वौ विधिम्प्रतीत्यर्थो व्यवस्थितो न तु क्वौ लुप्तं न स्थानिवदित्याह । लुगित्यस्य लुक्ता लुप्तं न स्थानिवदित्यर्थः । पञ्चभिः पट्वीभिः क्रीतः पञ्चपटुः । आर्हादिति ठक् । तस्याध्यर्द्धपूर्वेति लुक् । लुक्तद्धितलुकीति ङीषो लुक् । तस्य स्थानिवत्त्वाद्यण् प्राप्तः । लुक् न स्थानिवदिति न भवति । तथा पञ्चेन्द्राण्योऽग्नाय्यश्च देवता अस्य पञ्चेन्द्रः । पञ्चाग्निः । साऽस्य देवतेत्यण् । तस्य द्विगोर्लुगनपत्य इति लुक् । ततो ङीषो लुक् । तस्य स्थानिवत्त्वान्ङीषा सन्नियुक्तः आनुक् ऐकारश्च श्रूयेत । न च सन्नियोगशिष्टन्यायेन निवृत्तिः । परतद्धितलुङ्निमित्ताया: ङीष्निवृत्तेः पूर्वयोरानुगैकारयोर्निवृत्तौ कर्तव्यायामचः परस्मिन्निति स्थानिवत्त्वादिति स्पष्टं

शब्दकौस्तुभे । समानायामाकृतौ भाषितपुंस्कत्वाभावाद्वर्णाश्रयत्वाद्व-त्वाभावाच्च पुंवद्भावो नास्ति । अथवा यस्येति लोपप्रसङ्गः । उप-धात्वे कर्तव्ये न स्थानिवत् । पारिखीयः । परिखाशब्दाच्चातुरर्थि-केऽपि कृते आकारलोपस्य स्थानिवत्त्वात्पारिखे भव इति वृद्धाद्के-कान्तखोपधादिति छो न स्यात् । न चैवं पटयतीत्यादौ वृद्धिः स्यादिति वाच्यम् । यचोपधासंज्ञामुपजीव्य प्रत्ययो विधित्सितस्तत्रै-वायं निषेध इति भाष्ये स्थितत्वात् । अतएव चङ्परनिर्ह्रासग्रहणं सार्थकम् । चङ्परे णौ यो ह्रस्वः स चङ्परनिर्ह्रासः तत्र न स्था-निवत् । वादितवन्तं प्रयोजितवानवीवदद्वीणां परिवादकेन । वारि आख्यदवीवरत् । न चेह नाग्लोपीति निषेधः शङ्क्यः । परत्वाद् वृद्धौ सत्यां टिलोप इत्यभ्युपगमेनाग्लोपित्वाभावात् । अत एव इलकले-त्यदन्तनिपातनं सार्थकम् । कुत्वे न स्थानिवत् । अर्चतेरौणादिकः कप्रत्ययः । अर्कः । पाचयतेः क्तिच् । पाक्तिः । चोः कुरिति कुत्वे णिलोपो न स्थानिवत् । इदन्तु पूर्वत्रासिद्धे न स्थानिवदित्यनेन गतार्थम् । पूर्वत्रासिद्धे च न स्थानिवदिति वक्तव्यम् ॥ * ॥ याय-ज्यतेर्यायष्टिः । याजयतेर्याष्टिः । द्विर्वचनादीनि च न वक्तव्यानि भवन्ति वरे यलोपस्वरवर्जम् । तस्य दोषः संयोगादिलोपलत्व-णत्वेषु ॥ * ॥ तस्य पूर्वत्रासिद्धेचेत्यस्यैषु दोषः । प्रतिषेधो वक्तव्य इत्यर्थः । वास्यर्थम् । काक्यर्थम् । स्कोरिति लोपो न । निगार्यते । निगाल्यते । अचि विभाषेति लत्वं भवति । माषवपनी । समासान्तस्य नकारस्य णत्वं विधीयमानमल्लोपस्य स्थानिवत्त्वनिषेधान् ङीबुत्पत्तेः प्राक् समासविधानात् प्राप्नोति ॥

द्विर्वचनेऽचि । १ । १ । ५९ ॥

Digitized by Google

॥ श्रीः ॥

श्रीगणेशाय नमः ।

पराशरस्मृतिः ।

विद्वन्मनोहराख्यव्याख्यासहिता ।

श्रीवत्साङ्कितवक्षसः प्रणयिनो नित्यार्चने संविधा-
माधातुं निहितं गिरीन्द्रसुतयोत्सङ्गे स्वयं धूर्जटेः ।
चूडाचुम्बिकलङ्कपङ्किलकलं चन्द्रं मृणालभ्रमा-
दादातुं करमुत्क्षिदं तमसकृत्तुण्डिं चिरं भावये ॥ १ ॥

यं साक्षात्कर्तुमाद्यं पुरुषमविकृतिं योगिनः शुद्धचित्ता
मैत्र्याद्यैः क्लेशकर्मोद्भवविविधविपाकाशयैरप्रसृष्टाम् ।
भेदख्यातिं प्रपद्य प्रकृतिपुरुषयोराश्रयन्ते सबीजं
योगं तं श्रीसहायं हरिमनिशमहं सच्चिदानन्दमीडे ॥ २ ॥

धर्माधिकारिकुलकैरवकाननेन्दु-
श्रीरामपण्डितसुतेन विनायकेन ।
व्याख्यायते कलियुगोचितवर्णधर्म-
शास्त्रं पराशरमुखोद्गतमल्पशब्दैः ॥ ३ ॥

तरतः संततं विनैव पोतं स्मृतिसिन्धौ हठतर्कनक्रबन्धौ ।
सहृकण्डुजनेरिवावलम्बो मम भूयादभयाय केशवोऽयम् ॥४॥

माधवाचार्यनिर्दिष्टपथमार्गानुसारिणः ।
स्खलने ऽपि न मे दोषः परप्रत्ययगामिनः ॥ ५ ॥

इह खलु कलिकवलितानुभावान्वर्णाश्रमाननुगृह्णानैः परम-
कारुणिकैर्महामुनिभिर्वेदाभ्यासपुरस्सरैस्तत्त्वजिज्ञासया पृष्टान् कलिकाला-

नुष्ठेयान् वर्णाश्रमधर्मान् पराशरमुनिमुखादाकर्ण्य कश्चिद्विपश्चिद्वृत्ति-रनवद्यैः पद्यैःषट्शतैःनैर्द्वादशाध्यायान् परिकल्प्य काव्यत्रयेण तान्नि-बबन्ध ।

तत्रादावुपक्रमेण ग्रन्थावतरबीजमाह ।

अथातो हिमशैलाग्रे देवदारुवनाश्रये ।
व्यासमेकाग्रमासीनमपृच्छन्नृषयः पुरा ॥ १ ॥

उपनीय शौचाचारांश्च शिक्षयेदित्यनेनोपनयनानन्तरं शौचाचारा-णां यतो विज्ञेयत्वमुपदिश्यते अतो हेतोरथोपनयनानन्तरं हिमशैलाग्रे हिमाचलशिखरे देवदारूणां वनाश्रयत्वेन विविक्ते मनोऽनुकूले च विक्षेप-कारणाभावेन तत्त्वप्रतिभासयोग्य इति यावत् । व्यासं पराशरात्मजं कृष्ण-द्वैपायनम्, एकाग्रं यमनियमाद्यष्टाङ्गाभ्यासपाटवादेकस्मिन्विषये वृत्तिप्र-वाहरूपेण प्रतिष्ठितचित्तं पञ्चधासु चित्तभूमिष्वतीन्द्रियवस्तुदर्शनयो-ग्यप्रदर्शभूमिस्थितचित्तमिति यावत् । आसीनमेकाग्र्यनिर्वाहाय "आसी-नस्य सम्भवादि"ति न्यायात् । ऋषयो ऽतीन्द्रियार्थदर्शनयोग्यास्तापसाः पुरा कलियुगादावपृच्छन् पप्रच्छुः । अन्वयव्यतिरेकाभ्यां प्रश्नस्यैवावग-त्युपायत्वात् । विधिवत्प्रणिपातेन परिप्रश्नेन सेवयेति शास्त्रेण प्रणिपा-तपूर्वकप्रश्नावगतस्य श्रेयस्करत्वाच्च ।

प्रश्नस्वरूपमाह ॥

मानुषाणां हितं धर्मं वर्तमाने कलौ युगे ।
शौचाचारं यथावच्च वद सत्यवतीसुत ॥ २ ॥

अर्वाचीनानां पश्वादीनामसामर्थ्यादुत्तमानां देवादीनां धर्मानुष्ठाने प्रयोजनाभावाच्च मनुष्यमात्राधिकारकत्वाच्छास्त्रस्येति मानुषाणामित्य-धिकारिनिर्देशः । साधारण्यं तु वर्णाश्रमानुलोमजप्रतिलोमजानभिप्रेत्य । हितमभिमतफलसाधनं साक्षात्परम्परया वा ऐहिकामुष्मिकाभ्युदयनिःश्रेय-ससाधनमिति यावत् । धर्ममभ्युदयनिःश्रेयसे साधनीभूय धारयतीति

धर्मः, स्वलक्षणप्रमाणाभ्यां चोदनसूत्रव्यवस्थापितं शौचाचारं शौचं शुद्धिः प्रायश्चित्तादिराचारः स्नानाचमनादिस्तयोः समाहारस्समाचारप्रायश्चित्ते इति यावत् । व्यवहारस्य न्यायमूलकत्वेन तस्य च सर्वयुगसाधारण्येनानवद्यत्वात् । वर्तमाने कलौ युगे स्मृत्यन्तरधर्मस्य सानुभावपुरुषानुष्ठेयत्वेन कलिकालीनाल्पसामर्थ्यपुरुषविषयत्वाभावात्तत्कालानुष्ठेयं यथावत्कलिकालानुष्ठेयधर्मप्रतिपादकस्मृत्यर्थस्मरणपूर्वकं चकारात्तत्कालाननुष्ठेयं च भो सत्यवतीसुत सत्यवदनशीलात्मज वद कथय । एतेन प्रेक्षावत्प्रवृत्तिप्रयोजकं विषयप्रयोजनसम्बन्धाधिकारिलक्षणमनुबन्धचतुष्टयमप्यभिहितम् ।

एवं पृष्टो व्यासः किं चकार ।

तच्छ्रुत्वा ऋषिवाक्यं तु सशिष्योऽग्न्यर्कसन्निभः ।
प्रत्युवाच महातेजाः श्रुतिस्मृतिविशारदः ॥ ३ ॥

तत्पूर्वोदितमृषीणां वाक्यं श्रुत्वा सशिष्यः सुमन्तुजैमिनिवैशम्पायनपैलसुतैश्चतुर्वेदपुराणसंहिताप्रवर्तकैः शिष्यैस्समेतोऽग्न्यर्कसन्निभो ज्वलनादित्यवच्चिज्ज्वलतेजोभिः पूर्णोऽत एव महातेजा ब्रह्मवर्चस्वी श्रुतिस्मृतिविशारदो वेदशास्त्रनिपुणः तु अनन्तरं प्रत्युवाच प्रतिवचनमाह ।

न चाहं सर्वतत्त्वज्ञः कथं धर्मं वदाम्यहम् ।
अस्मत्पितैव प्रष्टव्य इति व्यासः सुतोऽवदत् ॥ ४ ॥

अपशवो वा अन्ये गोअश्वेभ्य इतिवच्च चाहं सर्वतत्त्वज्ञ इति स्वस्य सर्वतत्त्वज्ञानाभावप्रतिपादनं पितृप्रशंसार्थम् । यद्वा पराशरस्यैव प्रतिकल्पं कलिधर्मप्रवचनाधिकारिपुरुषत्वं श्रुतिस्मृतिभ्यामवगत्य स्वस्यानुचितं कलिधर्मानुशासनं मन्वानो व्यासः सुतोऽहं धर्मं कथं वदाम्यस्मत्पितैव पराशरः प्रष्टव्य इत्यवदत् ।

एवं प्रत्युक्ता ऋषयः किं चक्रुः ।

ततस्ते ऋषयः सर्वे धर्मतत्त्वार्थकाङ्क्षिणः ।
ऋषिं व्यासं पुरस्कृत्य गता बदरिकाश्रमम् ॥ ५ ॥

Digitized by Google

ततो ऽनन्तरं ते प्रष्टार ऋषयः सर्वे सन्निहितव्यासनिराकरणे-नासन्निहितपराशरस्य पुनः प्रष्टव्यत्वेन चाध्यवसायादविच्युता इति यावत् । धर्मतत्त्वार्थकाङ्क्षिणः धर्मस्य कलिकालानुष्ठेयस्य तत्त्वमबाधितं रूपं तत्काङ्क्षिणो ऽर्थो ऽभ्युदयसाधनं तेन श्येनाद्यभिचाराणामनर्थानां निरासः, तं काङ्क्षन्ति अत एव ऋषिमतीन्द्रियधर्मतत्त्वार्थप्रश्नाभियुक्तं व्यासं पुरस्कृत्य तन्मुखेनैव प्रष्टुकामाः पराशराश्रमं बदरिकाश्रमं गताः जग्मुः । तस्य कलिकल्मषनिर्मोकक्षमत्वेन पराशरनिवासत्वमुचितम् । तदुक्तं कूर्मपुराणे ।

बदर्याश्रममासाद्य मुमुचे कलिकल्मषात् ।
तत्र नारायणो देवो नरेणास्ति सनातन इति ।

तमाश्रमं विशिनष्टि ।

नानापुष्पलताकीर्णं फलवृक्षैरलङ्कृतम् ।
नदीप्रस्रवणोपेतं पुण्यतीर्थोपशोभितम् ॥ ६ ॥
मृगपक्षिनिनादैश्च देवतायतनावृतम् ।
यक्षगन्धर्वसिद्धैश्च नृत्यगीतैरलङ्कृतम् ॥ ७ ॥

एतैराश्रमविशेषणैः पराशरतपःसिद्ध्युत्कर्षो ऽभिहितः । तथा हि नानाविधपुष्पावनम्रलताकीर्णत्वेन देवार्चनलक्षणतपःसिद्धिः फलोपचितवृक्षोत्कर्षादाहारनियतेः ग्रीष्मकाले ऽप्यशुष्यन्नदीप्रस्रवणप्रवाहेण चिरवर्णस्नानपाननियतेः, उष्णतीर्थविष्णुगङ्गादिपुण्यतीर्थशोभया च नानातीर्थाटनतपःसिद्धिः मृगपक्षिणामन्योन्यवैरत्यागेन विस्रब्धनिनादादहिंसानुष्ठानस्य । उक्तं च पातञ्जले तपःसिद्धिलिङ्गसूत्रेण "तत्सन्निधौ वैरत्याग" इति । देवतायतनावृतत्वेन निरन्तरस्वस्वाराध्यदेवताध्यानयोगस्य नृत्यगीताद्यलङ्कृतत्वेन सुखहेतुतौर्यत्रिकपरिहारस्य ततश्च यद्यत्तपः पराशरेणाचं चीर्णं तत्फलं तत्रोपस्थितमिति तात्पर्यम् ।

प्राक्प्रमपाद्यनन्तरवृत्तमाह ।

तस्मिन्नृषिसभामध्ये शक्तिपुत्रं पराशरम् ।
सुखासीनं महातेजामुनिमुख्यगणावृतम् ॥ ८ ॥
कृताञ्जलिपुटो भूत्वा व्यासश्च ऋषिभिः सह ।
प्रदक्षिणाभिर्वादैश्च स्तुतिभिः समपूजयत् ॥ ९ ॥

तस्मिन्नाश्रमे ऋषीणां तापसानां सभा समूहस्तन्मध्ये । तेन तेषां कल्मषाकलितधर्मेषु संमतिर्दर्शिता । शक्तेर्वसिष्ठतनयस्य पुत्रं तेन विशिष्टजन्मना ऽप्यनुभावविशेषो दर्शितः । पराशरम्

पराकृताः शरा यस्माद्राक्षसानां वधार्थिनाम् ।
अतः पराशरो नाम ऋषिवक्तो मनीषिभिः ॥

इत्यादिनिरुक्तनामानं सुखासीनमकल्मषासनोपविष्टम् । महातेजा ब्रह्मवर्चस्वी । मुनिषु मुख्याः स्मृतिकर्तारो मोक्षकर्तारश्चात्र्यादयः तत्समुदायेनाप्यावृतं तेन स्मृतिकर्तृणामप्यत्र सम्मतिर्ज्ञापिता । कृतमञ्जलिपुटं येनासौ व्यासः तैः षड्भिर्ऋषिभिः सह प्रदक्षिणाभिः स्तुत्युक्तेरभिवादैर्वैदिकलौकिकाभिस्स्तुतिभिर्गुणकीर्तनैश्चत्कारात्पादोपसंग्रहणादिभिश्च सम्यक्कायवाङ्मनोभिरपूजयत् । अञ्जलिकरणं चोक्तमाश्वलायनेन

उत्तानं वामकर्यो वाङ्मुखं दक्षिणं तथा ।
पाण्योः पृष्ठं दृढं कुर्यादङ्गुलीभिः परस्परम् ॥
अङ्गुष्ठौ च दृढीकृत्य क्रियते या तथाऽञ्जलिः ।
सा ब्रह्मणा कृतत्वात्तु ब्रह्माञ्जलिरिति स्मृता ॥
वेदारम्भे विशेषेण समाप्तौ च विधीयते ।
ब्रह्मयज्ञे च कार्यः स्यात्स्वाध्यायोपक्रमे तथेति ॥

एतेन गुरूपसत्तिप्रकारो दर्शितः ।
एवं पूजितः पराशरः किं चकार ।

ततः संतुष्टहृदयः पराशरमहामुनिः ।
आह सुस्वागतं ब्रूहीत्यासीनो मुनिपुङ्गवः ॥ १० ॥

ततो ऽनन्तरं सम्यक् तुष्टहृदयः पराशरनामा महामुनिरतिमननशीलो मुनिपुङ्गवस्सर्वमुनिमान्यस्तेन तपसा वयसा च वृद्धत्वादासीन एव नाभ्युत्थितस्तस्य "ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति। प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते" इति स्मृत्या स्थविरविषयत्वात्, सुस्वागतं ब्रूहीत्याह।

एवमनुयुक्तो व्यासः प्रतिवचनपूर्वकं पृच्छतीत्याह।

कुशलं सम्यगित्युक्त्वा व्यासः पृच्छत्यतः परम्।

अतः परं पराशरस्य कुशलप्रश्नानन्तरं स्वकुशलं सम्यगभिधायानन्तरं विवक्षितमर्थं मुनिप्रश्नादवश्यजिज्ञासितव्यं व्यासः पृच्छति।

प्रश्नप्रकारमाह।

यदि जानासि भक्तिं मे स्नेहाद्वा भक्तवत्सल॥ ११॥
धर्मं कथय मे तात ह्यनुग्राह्यो ऽस्म्यहं तव।

यदि मे भक्तिमाराध्यत्वेन स्वज्ञानविषयां जानासि तदा भक्तवत्सलत्वेन यदि वा पुत्रस्नेहेनोभयथाप्यनुग्राह्यस्तवाहमिति हे तात धर्मं, वर्तमाने कलौ युग" इति मुनिप्रश्नबला"त्सर्वे नष्टाः कलौ युग"-इति प्रश्नशेषाच्च कलिकालानुष्ठेयं मे मह्यं कथय पुनर्म्मदितिवचनं स्वस्योपदेशार्हभावप्रयोजकधर्मवत्त्वज्ञापनाय यथोक्तं गन्धर्वविद्यायां छन्दोगैः "इदं तावज्ज्येष्ठपुत्राय पिता ब्रह्म प्रब्रूयात् प्रणाय्याय वान्तेवासिने नान्यस्मै कस्मै च नेति।

ननु मन्वादिधर्माः किं त्वया न श्रुता येन पुनर्धर्मप्रश्नः क्रियते इत्याशङ्क्य बुभुत्सितं धर्मं परिशेषयितुमाह।

श्रुता मे मानवा धर्मा वासिष्ठाः काश्यपास्तथा॥ १२॥
गार्गीया गौतमीयाश्च तथैवौशनसाः स्मृताः।
अत्रेर्विष्णोश्च संवर्ताद्दक्षादङ्गिरसस्तथा॥ १३॥
शातातपाच्च हारीताद्याज्ञवल्क्यात्तथैव च।
आपस्तम्बकृता धर्माः शंखस्य लिखितस्य च॥ १४॥

धर्मराजकृताश्चैव बृहस्पतिकृताश्च ये ।
कात्यायनकृताश्चैव तथा प्राचेतसान्मुनेः ॥ १५ ॥

मे मयेत्यर्थः । बहुलानुशासनात् । पञ्चम्यन्तानामत्र्यादिपदाना-मनुवृत्तेन श्रुतपदेन सम्बन्धः । आपस्तम्बेन कृताः प्रोक्ता इति यावत् शंखस्य लिखितस्य च प्रवचनेन ये संबधिनो धर्माः, प्रचेता एव प्राचेतसः प्रायसराक्षसादिवत् ।

यदि स्मार्ता मानवादयो धर्माः श्रुतास्तर्हि श्रौता किं बुभुत्सिता इत्याशङ्क्याह ।

श्रुता ह्येते भवत्प्रोक्ताः श्रुत्यर्था मे न विस्मृताः ।
अस्मिन्मन्वन्तरे धर्माः कृतत्रेतादिके युगे ॥ १६ ॥

अस्मिन् वर्तमाने वैवस्वते मन्वन्तरे तथा तदन्तर्गतेषु कृतत्रेताद्वापरेषु आदिशब्दाद्द्वापरग्रहणं न कलेस्तस्य प्रायेण श्रौतधर्मविकलत्वात् । युगेषु ये श्रुत्यर्था प्रत्यक्षश्रुतिविहिता अग्निहोत्रादयो धर्माः, एते मया श्रुताः । तदेतत्त्वयाऽपि प्रष्टुमिति हिशब्दार्थः, तत्र हेतुर्भवत्प्रोक्ता इति श्रुतानामपि विस्मरणे पुनः श्रवणं मर्योप्सितमित्याशङ्क्य न विस्मृता इत्युक्तं ततश्च स्मार्तानां मानवादिधर्माणां श्रौतानामग्निहोत्रादीना-मेतन्मन्वन्तरान्तर्गतकृतत्रेताद्वापरधर्माणां च नायं प्रश्नस्तस्मात्परिशेषेण कलिधर्मप्रश्न इति सिद्धम् । एतन्निर्देशेन प्रतियुगमिव प्रतिमन्वन्तरमपि धर्मभेद उक्तः । तथा च वायवीये

प्रतिमन्वन्तरं चैव श्रुतिरन्या विधीयत इति ।

यद्यपि नित्यत्वात्सर्वकालमेकरूप एव वेद इति न्यायविदां घ-ट्टाघोषेण प्रतिमन्वन्तरमध्येयवेदस्वरूपभेदो नास्ति तथाऽपि कालभेदेन तत्तत्कालीनधर्मविधायकानां वेदवाक्यानां भेदे नानुपपत्तिर्यथा वसन्ते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्यः पौर्णमास्यां पौर्ण-मास्यया यजेतामावास्यायाममावास्ययेत्यादीनां तथा प्रतिमन्वन्तरमपि

तत्तद्धर्म्मविधायकवेदवाक्यभेदे न दोषस्तथा च तन्मूलकधर्म्माणामपि भेद इत्यलम्। एतेन "श्रुतिश्च शौचमाचारः प्रतिकालं विभिद्यते" इत्यौपकायनवाक्यमपि व्याख्यातम्।

तमेव धर्म्मभेदं विवृणोति।

सर्वे धर्माः कृते जाताः सर्वे नष्टाः कलौ युगे।
चातुर्वर्ण्यं समाचारं किञ्चित्साधारणं वद ॥ १७ ॥

सर्वे देशकालावस्थादिभेदेन बहुविधा ये धर्म्माः।

धर्म्मा बहुविधा लोके श्रुतिभेदमुखोद्गताः।
देशभेदाश्च दृश्यन्ते कुलभेदास्तथैव च॥
जातिधर्म्मा वयोधर्म्मा गुणधर्म्माश्च शोभने।
शरीरकालधर्म्माश्च आपद्धर्म्मास्तथैव च॥
एतद्धर्म्मस्य नानात्वं क्रियते लोकवासिभिः।

इत्यानुशासनिकोक्तान् कृते सत्ययुगे युगसामर्थ्येनातीयप्रभावाणां पुरुषाणामसन्दिग्धाविपर्यस्तप्रमाणप्रमेया यथावदनुष्ठेयाश्च जातास्ते त्रेतादिषु पादहानिक्रमेण हीयमानाः कलौ युगे यथोत्तरं सर्वात्मना विनष्टास्तादृशप्रमातृप्रमाणाद्यभावात्। तदुक्तं पुराणसारे

कृते चतुष्पात्सकलो निर्व्याजो व्याधिवर्जितः।
वृषः प्रतिष्ठितो धर्म्मो मनुष्येष्वभवत्पुरा॥
धर्म्मः पादविहीनश्च त्रिभिरंशैः प्रतिष्ठितः।
त्रेतायां द्वापरेऽर्द्धेन व्यामिश्रो धर्म्म इष्यते॥
त्रिपादहीनस्तिष्ये तु सत्तामात्रेण तिष्ठति।

वृषो वृष रूपः तिष्यः कलिः। मात्स्ये।

ततः प्रभृत्ययं लोकः सर्वोऽप्यापत्स्यते वृषम्।
अनृतोऽपहितो भ्रष्टो धर्म्मतः कामतोऽर्थतः॥
श्रौतस्मार्त्ते प्रशिथिले नष्टधर्म्माश्रमे तथा।
सङ्करं दुर्बलात्मानः प्रतिपत्स्यन्ति मोहिताः इत्यादि।

अतश्चाल्पसामर्थ्यैः पुरुषैस्तेषां देशकालवयोवस्थादिभेदभिन्नानां धर्माणां यथावत्प्रमाणानुष्ठानासम्भवाच्चतुर्वर्णानुष्ठेयं तत्तद्विशेषानादरेण सर्वसाधारणं किञ्चिद्वदेति । यस्त्वहिंसादिसाधारणधर्मप्रश्नोऽयमिति व्याख्यातं तन्न । तथा तेषामप्रतिपादनेनोत्तरस्य न्यूनत्वप्रसङ्गात् । तस्माद्यथोक्तमेव साधीय इति ।

ननु चतुर्वर्णधर्मप्रश्नोऽयमनुपपन्नः कलौ क्षत्रियवैश्ययोरभावात् । तथा च भागवते ।

महानन्दिसुतो राजन् शूद्रागर्भोद्भवो बली ।
महापद्म इति ख्यातो नन्दः क्षत्रविनाशकृत् ॥
ततो नृपा भविष्यन्ति शूद्रप्राया अधार्मिकाः ।
येऽतीता वर्तमाना ये भविष्यन्ति च पार्थिवाः ॥
ते ऽत उद्देशतः प्रोक्ता वंशीयाः सोमसूर्ययोः ।
आरभ्य भवतो जन्म यावन्नन्दाभिषेचनमिति ॥

अत्र सामान्येन क्षत्रविनाशावगमात्परीक्षितमारभ्य नन्दपर्यन्तमेव तत्सद्भावबोधनाच्चोपरिष्टात्तदभावो गम्यते, वैश्यानां त्वनुपलब्ध्यैव तन्निश्चय इति ।

उच्यते । अत्रोपक्रमोपसंहाराभ्यां क्षत्रियाणां राज्याभावमात्रं प्रतीयते न स्वरूपाभावः । न च क्षत्रियविनाशकृदित्यनेन तत्सिद्धिः । तस्यापि ताभ्यां राज्याभावमात्रपरत्वात् । अन्यथा प्रत्यक्षविरोधापत्तेः प्रत्यक्षेणैव तदुपलब्धेः । अत एव हरिवंशे ।

वैश्याचाराश्च राजन्या धनधान्योपजीविनः ।
युगोपक्रमणे पूर्वं भविष्यन्ति द्विजातय इति ।

युगोपक्रमणे कलियुगोपक्रमणे तथैवोपक्रमात् । एवं च वैश्यानामपि गूर्जरदेशे प्रत्यक्षोपलब्धेरेव सत्तासिद्धेरित्यलं विस्तरेण ।

इदानीं तत्तत्पुरुषविहितमसाधारणधर्मं पृच्छति ।

चतुर्णामपि वर्णानां कर्तव्यं धर्मकोविदैः ।
ब्रूहि धर्मस्वरूपज्ञ सूक्ष्मं स्थूलं च विस्तरात् ॥१८॥

विविधवादिविप्रतिपत्त्या दुर्निरूपं धर्मस्वरूपं सम्यक् जानातीति धर्मस्वरूपज्ञस्सो ऽत्र सम्बोध्यते । विप्रतिपत्तिश्चेत्थं विहितनिषिद्धक्रियासाध्यावात्मगुणौ धर्माधर्माविति तार्किकाः । यो यागादिकमनुतिष्ठति तं धार्मिकमिति आचक्षत इति यागादिकमेव धर्म इति भाष्यकृतः । द्रव्यक्रियागुणादीनामैन्द्रियकत्वे ऽपि न तद्रूपेण धर्मत्वमपि तु श्रेयःसाधनतया वेदात्मतीयमानत्वेनेन्द्रियागोचरत्वाद्धर्मस्येति भाट्टाः । धात्वर्थसाध्यं स्वर्गादिफलसाधनमपूर्वमेव कार्यनियोगापरपर्यायो धर्म इति प्राभाकराः ।

मत्स्याऽऽर्यैः क्रियमाणं तु शंसन्त्यागमवेदिनः ।
सधर्मो यं न गर्हन्ति तं धर्मं स्वं निबोधतेति मानवाः । दुर्निरूपत्वं च महाभारते ।

अधर्मो धर्म इति च व्यवसायो न शक्यते ।
कर्तुमस्माद्धि धर्मज्ञस्ततो न व्यवसाम्यहमिति, धृष्टद्युम्नेनोक्तम् । राजधर्मे ऽपि

न कल्माषो न कपिलो न कृष्णो न च लोहितः ।
अणीयान् क्षुरधारायाः को धर्मं वक्तुमर्हतीति ॥

एवं विप्रतिपत्तौ दुर्ज्ञेयत्वे च स्वर्गादिसाधनं शास्त्रोक्तं समधिगम्यातिशयो धर्म इति सर्वानुगतधर्मस्वरूपज्ञ चतुर्णां वर्णानां कर्तव्यं धर्मकोविदैर्धर्मशास्त्रतत्त्वाभिज्ञैश्च कर्तव्यं विस्तरात्कात्स्न्र्येन सूक्ष्मं स्थूलं च द्विविधमपि धर्मं ब्रूहि तत्र चतुर्वर्णाभिप्रायेण स्थूलं धर्मकोविदाभिप्रायेण च सूक्ष्ममिति विवेकः । द्वैविध्यं च "बहुधा दृश्यते धर्मः स्थूलः सूक्ष्मो द्विजोत्तमेति" धर्मव्याधोपाख्याने प्रयोजितं तत्र लोकवेदविरोधे जायत्येव विहितः सूक्ष्मस्तदविरोधे विहितश्च स्थूल इति । सूक्ष्मश्च धर्मो द्रौपदी-

विवाहादिः तथा च लोकविरोधे तस्मादेकस्य बहवो जाया भवन्ति नैकस्यै बहवः सहपतय इत्यादि श्रुतिविरोधे च जायति युधिष्ठिरेण लोकवेदविरुद्धो ऽयं धर्मो धर्मभृतां वर "सूक्ष्मोधर्मो महाराज ना ऽस्य विद्मो गतिं वयमि"ति धर्मं सन्दिहानं द्रुपदन्प्रति सूक्ष्मधर्मत्वेन प्रपञ्चितः ।

एतेन प्रत्यक्षश्रुतिविरुद्धस्य कथं धर्मत्वमिति चोद्यं निरस्तम् । सूक्ष्मत्वाद्दुर्ज्ञेयत्वाच्च । सूक्ष्मो धर्मस्तत्र तत्र वक्ष्यमाणस्तथाविधो ऽल्पप्रायश्चित्तादिः स्थूलश्च धर्मः स्नानाचमनादिः बोदाहमेरपि बोद्धुं योग्यः । चतुर्णां वर्णानामिति समुदितप्रश्ने ऽपि प्रत्येकं कार्यपरिसमाप्तेरसाधारणधर्मप्रश्न एव तात्पर्यम् । तांश्चोत्तरतः स्वयमेव स्पष्टयिष्यति । एवं च साधारणासाधारणधर्मप्रश्नद्वयेन तत्र तत्र साधारणासाधारणप्रायश्चित्तादिप्रतिपादनमुपपादितमिति ।

उक्तवक्ष्यमाणयोः प्रश्नोत्तरयोरसाङ्कर्यायोत्तरमवतारयति ।

व्यासवाक्यावसाने तु मुनिमुख्यः पराशरः ।
धर्मस्य निर्णयं प्राह सूक्ष्मं स्थूलं च विस्तरात् ॥

व्यासवाक्यावसाने व्यासोक्तिसमाप्तौ मुनिमुख्यः स्थूलसूक्ष्मधर्मविवेचनप्रवचनकुशलः पराशरो धर्मस्य व्यासप्रश्नविषयस्य निर्णयं निर्णीयत इति निर्णयः स्वरूपं सूक्ष्मं स्थूलं च विस्तरात् कार्त्स्न्येन प्रकर्षेणोक्तिचातुर्येणाह ।

वक्ष्यमाणधर्मतत्त्वग्रहणाय श्रोतृसावधानतां विधत्ते ।

शृणु पुत्र प्रवक्ष्यामि शृण्वन्तु मुनयस्तथा ॥ १६ ॥

हे पुत्र पुन्नामनरकत्राणसमर्थ त्वदनुभुत्सितं धर्ममहं प्रवक्ष्यामि तं त्वं सावधानीभूय शृणु तथा त्वया सहागता यत्रा ऽवस्थिताश्च मुनयः धर्ममननशीला अपि मया वक्ष्यमाणं धर्मं शृण्वन्तु अत्र पुत्रे मुनिषु च स्वस्य समपक्षपाततां ज्ञापयितुं मुन्युपादानं तेन मुनीनामपि व्यासं प्रति प्रश्नादेव लब्धोत्तरत्वमिति ।

इदानीं स्वाभिधेयधर्मस्य स्वोक्तिमात्रमूलत्वशङ्काया वारणाय तत्प्रमातृप्रमाणानां प्रावाहिकीं नित्यतां वक्तुं सृष्टिप्रलयौ प्रपञ्चयति ।

कल्पे कल्पे क्षयोत्पत्त्या ब्रह्मविष्णुमहेश्वराः ।
श्रुतिस्मृतिसदाचारनिर्णेतारश्च सर्वदा ॥ २० ॥

कल्पते जगदस्मिन्काले इति कल्पः स च सृष्ट्यादिप्रलयान्तो जगदवस्थितिकालः स द्विविधो ऽवान्तरकल्पो महाकल्पश्च तत्र चतुर्मुखस्य दिनमात्रमवान्तरकल्पः तदुक्तं कौर्म्ये

ब्राह्ममेकं महाकल्पस्तावती रात्रिरिष्यते ।
चतुर्युगसहस्रं तत्कल्पमाहुर्मनीषिण इति ।

चतुर्मुखायुःपरिमितो महाकल्पः स च ब्राह्मेण मानेन शतसंवत्सरपरिमितः परार्द्धापरपर्यायः । तदुक्तं सूतसंहितायाम्

त्रिशतैः षष्टिभिः कल्पैर्ब्रह्मणो वर्षमीरितम् ।
वर्षाणां यच्छतं तस्य तत्परार्द्धमिहोच्यते ॥
ब्रह्मणो ऽन्ते मुनिश्रेष्ठ मायायां लीयते जगदिति ।

तदेवं कल्पानामनन्तत्वप्रदर्शनाय क्षयोत्पत्त्येति । तदुक्तं लैङ्गे

एवं कल्पास्तु संख्याता ब्रह्मणो ऽव्यक्तजन्मनः ।
कोटिकोटिसहस्राणि कल्पानां मुनिसत्तमेति, ।

कल्पे कल्पे प्रतिकल्पं क्षयोत्पत्त्या पूर्वकल्पान्ते क्षय उत्तरकल्पादौ उत्पत्तिरिति क्षयपूर्विका उत्पत्तिः क्षयोत्पत्तिः क्षयस्य पूर्वनिर्देशश्च संसारानादित्वसूचनाय प्रेत्यभावस्यादुत्पत्तेः । नित्यनैमित्तिकप्राकृतिकात्यन्तिकचतुर्विधेषु क्षयेषु नैमित्तिकप्राकृतिकाभ्यां क्षयाभ्यां उत्पत्त्या पुनः प्रादुर्भावेन च ब्रह्मविष्णुमहेश्वराः श्रुतिस्मृतिसदाचारास्तन्निर्णेतारश्चकाराद्धर्मो ऽपि सर्वदा प्रमाद्यन्ते संसारे उपलक्ष्यन्ते, तत्र नैमित्तिकः क्षयो ऽवान्तरकल्पान्ते ब्रह्मदिवसान्तरूपे ब्रह्मणि सुप्ते चतुर्विधभूतग्रामस्य भूर्भुवर्लोकपर्यन्तस्य नाश उच्यते, श्रुतिर्नाम वेदः स्मृतिर्धर्मशास्त्रं सदाचारो होलाकाद्याचारस्तन्निर्णेतारो वेदशाखार्थविभागकारिणो व्यासकठकौथु-

मबोधायनाश्वलायनजैमिन्याद्याः स्मृतिनिर्णेतारो मन्वाद्या अष्टादशमूलस्मृतिकर्तारो जाबाल्याद्यो अष्टादशोपस्मृतिकर्तारो वसिष्ठाद्यश्चैकविंशतिरिति।

तदुक्तं।

मनुर्बृहस्पतिर्दक्षो गौतमोऽथ यमोऽङ्गिराः।
योगीश्वरः प्रचेताश्च शातातपपराशरौ॥
संवर्त्तोशनसौ शङ्खलिखितावत्रिरेव वा।
विष्णवापस्तम्बहारीता धर्मशास्त्रप्रवर्तकाः॥
एते ह्यष्टादश प्रोक्ता मुनयो नियतव्रताः।
जाबालिर्नाचिकेतश्च स्कन्दो लौगाक्षिकाश्यपौ॥
व्यासः सनत्कुमारश्च शन्तनुर्जनकस्तथा।
व्याघ्रः कात्यायनश्चैव जातूकर्ण्यः कपिञ्जलः॥
बौधायनश्च काणादो विश्वामित्रस्तथैव च।
पैठीनसिर्गोभिलश्चेत्युपस्मृतिविधायकाः॥
वसिष्ठो नारदश्चैव सुमन्तुश्च पितामहः।
विष्णुः कार्ष्णाजिनिः सत्यव्रतो गार्ग्यश्च देवलः॥
जमदग्निर्भरद्वाजः पुलस्त्यः पुलहः क्रतुः।
आत्रेयश्च गवेयश्च मरीचिर्वत्स एव वा॥
पारस्करश्च ऋष्यशृङ्गो वै बैजवापस्तथैव च।
इत्येते स्मृतिकर्तार एकविंशतिरीरिता इति।

सदाचारनिर्णेतारो होलाकाद्यनुष्ठातारस्तत्कुलवृद्धाः चकारात् पुराणोपपुराणप्रणेतारो व्यासादयोऽपि एते सर्वेऽपि प्रतिकल्पं हीयन्ते पुनरुत्पद्यन्त इत्यर्थः। तदाह मनुः

तस्य सोऽहर्निशस्यान्ते प्रसुप्तः प्रतिबुध्यते।
प्रतिबुद्धश्च सृजति मनः सदसदात्मकम्॥

एवं स आयस्त्वप्राभ्यामिदं सर्वं चराचरम् ।
संजीवयति चा ऽजस्रं प्रमापयति चाऽव्ययरति ।

प्राकृतस्तु लयो मायापरपर्यायायां प्रकृतौ यदा ब्रह्मादीनां लयः । तदुक्तं सूतसंहितायाम् ।

ब्रह्मणो ऽन्ते मुनिश्रेष्ठ मायायां लीयते जगत् ।
तथा विष्णुश्च रुद्रश्च प्रकृतौ विलयं गतौ ॥
ब्रह्मणश्च तथा विष्णोस्तथा रुद्रस्य सुव्रताः ।
मूर्तयो विविधास्तेषु कारणेषु लयं ययुरिति ॥

एवं लीनेषु ब्रह्मादिषु ब्रह्मायुःकालपरिमितप्रलयकालानन्तरं भगवत्सच्चिदानन्दरूपस्य सिसृक्षोत्पद्यते "सो ऽकामयत बहु स्यां प्रजायेयेति" श्रुतेः । ततो ब्रह्मविष्णुरुद्रात्मकत्वेन त्रेधा भवति तेषामाद्यो ब्रह्मा "ब्रह्मादेवानां प्रथमः संबभूवेति श्रुतेः । तस्य प्रोक्ता मय्यास्तनवो ब्रह्मा रुद्रो विष्णुरित्यथ ह खलु वास्य राजसांशः सोऽयं ब्रह्मा ऽथ यो ह खलु वास्य तामसांशः सोऽयं रुद्रो यो ह खलु वास्य सात्त्विकांशः सोयं विष्णुः सर्वं एकस्त्रिधा भूत इति मैत्रश्रुतेः

एक एव शिवः साक्षात् सृष्टिस्थित्यन्तसिद्धये ।
ब्रह्मविष्णुशिवाख्याभिः कलनाभिर्व्यजृम्भत इति । स्कन्दाच्च ।

एवं सृष्टो ब्रह्मा धर्मं सृजति । तथा च श्रुतिः । स नैव व्यभवत्तच्छ्रेयो रूपमत्यसृजत धर्मं तदेतत्क्षत्रस्य क्षत्रं यद्धर्मस्तस्माद्धर्मात्परं नास्तीति । मनुरपि

सृष्टिं ससर्ज चैवेमां स्रष्टुमिच्छन् इमाः प्रजाः
कर्मणां च विवेकार्थं धर्माधर्मौ व्यवेचयदिति ।

तदेवं प्रतिकल्पं ब्रह्मादीनां मन्वादीनां धर्मस्य च जायमानत्वाद्वेदमपूर्वं ममेव प्रवचनमिति तात्पर्यम् ।

नन्वेवं स्मृतिवत् श्रुतेरपि पौरुषेयत्वात्तन्मूलकस्मृत्याद्यभिधेय-धर्मस्याप्यप्रद्धेयतैवेत्यत आह

न कश्चिद्वेदकर्तास्ति वेदं स्मृत्वा चतुर्मुखः ।
तथैव धर्मान्स्मरति मनुः कल्पाऽन्तरेऽन्तरे ॥२१॥

ईश्वरब्रह्मव्यासानां मध्ये कश्चिदपि वेदानामृगादीनां कर्ता वाक्यार्थज्ञानपूर्वकवाक्यरचयिता नास्त्यपि तु चतुर्मुखो ब्रह्मा ईश्वरात्पूर्वकल्पाधिगतं वेदं स्मृत्वा कल्पान्तरेऽन्तरे प्रतिकल्पं धर्मान्स्मरति तच्च मन्त्रार्थवादादिषु विप्रकीर्णान्वर्णाश्रमधर्मान् सङ्कलयन् पितामहप्राजापत्याविस्मृतिरूपेणोपनिबध्नाति । व्यासस्तु केवलं राशीभूतं वेदं ऋगादिपृथक्करणेन चतुर्धा करोतीति न कस्याऽपि वेदकर्तृत्वम् । तदुक्तं मात्स्ये

अस्य वेदस्य सर्वज्ञः कल्पादौ परमेश्वरः ।
व्यञ्जकः केवलं विप्रा नैव कर्ता न संशयः ॥
ब्रह्माणं मुनयः पूर्वं सृष्ट्वा तस्मै महेश्वरः ।
दत्तवानखिलान्वेदानात्मनि सुस्थितान् ॥
ब्रह्मणा चोदितो विष्णुर्व्यासरूपी द्विजोत्तमः ।
हिताय सर्वभूतानां वेदभेदान्करोति स इति ।

ब्रह्मणो धर्मशास्त्रकर्तृत्वं मनुराह

इदं शास्त्रं तु कृत्वाऽसौ मामेव स्वयमादितः ।
विधिवद्ग्राहयामास मरीच्यादीनहं मुनीनिति ।

यथा ब्रह्मा धर्मशास्त्रं करोति तथैव प्रतिकल्पं स्वायंभुवो मनुरपि वेदात् धर्मान्स्मृत्वोपनिबध्नाति । मनुरिति विष्ण्वादीनामप्युपलक्षणम् । एतेन प्रतिमहाकल्पं प्रत्यवान्तरकल्पं च ब्रह्ममन्वादिभिः श्रुतिस्मृतिधर्माणां स्मरणप्रवचनाभ्यां प्रावाहिकी नित्यतोक्ता भवतीति । तदुक्तमाश्वमेधिके

युगेष्वावर्तमानेषु धर्मोऽप्यावर्तते पुनः ।
धर्मेष्वावर्तमानेषु लोकोऽप्यावर्तते पुनरिति ।

युगभेदधर्मवैलक्षण्यमभिप्रेत्य धर्मानिति बहुवचनात्तदेव प्रतिजानीते

अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे युगे ।
अन्ये कलियुगे नृणां युगरूपानुसारतः ॥ २२ ॥

कृतयुगे सत्ययुगे धर्मा वक्ष्यमाणास्तपः प्रभृतयोऽन्ये भिन्नस्वरूपाः भिन्नचोदनाचोदितत्वाद्धर्मस्वरूपभेदे च शब्दान्तरादेरेव प्रयोजकत्वात् । तथैव त्रेतायां द्वापरे युगे कलियुगे चाऽन्ये तत्र हेतुमाह नृणां युगरूपानुसारत इति । युगस्य कृतादेः रूपं स्वरूपं चतुःसहस्रवर्षपरिमितत्वं चतुश्चरणधर्माधिष्ठितत्वादि च तदनुसारतस्तदनुसरणेन ।

अयमभिसन्धिः चतुःसहस्रवर्षपरिमिते सत्ययुगे मनुष्याणां चतुर्वर्षशतान्यायुर्भवति इतरे युगे त्रेतायुगादिषु एकैकसहस्रन्यूनेष्वेकैकशतन्यूनमायुर्भवति तथा कृतयुगे धर्मप्राबल्यादारोग्यादिसामर्थ्यमधिकम् । इतरेषु त्वधर्माभिभवात्सामर्थ्यन्यूनतेति । एवं च सति सर्वधर्मेषु सर्वयुगसाधारण्येन समानमधिकारं कथं मनुष्याणां चोदना ब्रूयात् सामर्थ्यरूपाधिकारिविशेषणतारतम्यात् । सिद्धं चैतत्तृतीयेऽधिकरणे । यथाविनियोगमधिकारसमर्पणात् ।

अत एव मनुनापि ।

चत्वार्याहुः सहस्राणि वर्षाणां तु कृतं युगम् ।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु ।
एकापायेन वर्तन्ते सहस्राणि शतानि चेति

सर्वयुगपरिमाणमभिधाय ।

चतुष्पात्सकलो धर्मः सत्यं चैव कृते युगे ।
नाऽधर्मेणागमः कश्चिन्मनुष्यान्प्रतिवर्तते ॥
इतरेष्वागमाद्धर्मः पादशस्त्ववरोपितः ।
चौरिकानृतमायाभिर्धर्मश्चापैति पादशः ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्य
श्रीभाष्यस्य प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं॰श्रीराममिश्रशास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः	७।)
श्रीभाष्यस्य प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा ..	६)
श्रीभाष्यस्य तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा ..	१=)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः	२।)
शेहपूर्त्तः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं॰स्वामिश्रीराममिश्रशास्त्रिप्रणीतो निर्विशेषाद्वैतनिराकरणपरः	१॥=)
शेहपूर्त्तिसहितो वेदार्थसंग्रहः	३॥।)
शास्त्रदीपिका	६।)
सङ्कर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टचन्द्रिकोपेतम्, पं॰स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् ।	१।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजप॰दामोदरशास्त्रिणा संशोधिता पूर्वार्द्धरूपा	५॥।)
तथा उत्तरार्द्धम्	८॥।)
माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता	७॥)
काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता	६॥)
श्रीतिङन्तार्णवतरणिः	६)
दिङ्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता	॥=)
जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता ..	५॥)
लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्यायमुक्तावल्याख्यया टीकया सहिता	॥।)
सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम्	॥।)
तत्त्वमुक्ताकलापः-सर्वार्थसिद्धियुतः, बोधायनीयार्थसिद्धान्तानुसारी विशिष्टाद्वैतब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्किककेसरिणा सर्वतन्त्रस्वतन्त्रधिषणेन श्रीवेङ्कटनाथदेशिकेन प्रणीतः	५॥=)
वेदान्तसिद्धान्तमुक्तावली, आर्यवीनिस्साहबकृताङ्गलभाषानुवादयुता ..	१॥।)
काव्यप्रकाशस्य इङ्ग्लण्डीयभाषानुवादः	२॥)
अथर्ववेदसंहिताया इङ्ग्लण्डीयभाषानुवादः	१२)
आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्यकाराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम्	॥।)
तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्विश्वकर्मविरचितया न्यायप्रदीपाख्यटीकया सहित	

CONTENTS.

Page.

SHRIBHĀSHYA OF RĀMĀNUJA, (Text only,) Edited by the Revd. J. J. Johnson, Benares ... ... 1, 49.

VÁLMIKÍYA-RÁMÁYAṆA with foot-notes edited by Pandit Rasik Lal Bhattácharya M. A., Benares ... 17.

SANKALPASÚRYODAYA with commentary, edited by R. Krishnamáchári, Madura ... ... 33.

KHANḌANODDHĀRA, by Vāchaspati Miṣra, Ed. by Pandits Vindhyeçvarīprasāda Dvivedin, Librarian, Sanskrit College, Benaras, and Vámácharan Bhaṭṭácharya, Professor, Sanskrit College, Benares ... . 65, 145.

PADÁRTHA-DHARMA-SANGRAHA, translated by Pandit Ganganath Jha, M. A., Professor of Sanskrit, Muir Central College, Allahabad ... ... 81.

VYÁKARAṆADÍPIKÁ by Orambhatta, edited by Pandit Ganapati Shastree, Scholar Sanskrit College, Benares 97, 161.

BRAHMÁMRITAVARSHIṆI, edited by S. Vyankataramana Iyer, B. A., B. L., High Court, Triplicane, Madras ... ... 113.

NYÁYASIDDHÁNTAMANJARI by Bhattácháryachudámaṇi Jánakí Náth, with the commentary Nyáyamanjarísára by Yádavácharya, edited by Pandit Jíwa Náth Mishra, Professor, Sanskrit College, Benares ... ... 129.

PĀRĀSHARA SMRITI with the Commentary Vidvanmanohará, by Pandit Vináyaka Dharmádhikári, edited by Pandit Nágeshwara Panta Dharmádhikári, Professor, Sanskrit College, Benares. ... ... 177.

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

Nos. 4, 5 and 6.] April, May and June 1907. [VOL. XXIX.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1907.

Copyright on each article reserved.

Price Rs. 9 per annum.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुररश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
चित्रमीमांसा, अप्पयदीक्षितकृता तै॰ श्रीरामशास्त्रिणा संशोधिता	१।)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधित	।≈)
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	२)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतडाक्तरबालन्टैनाचार्य्येणाङ्ग्लपदीयभाषायामनूदिता ..	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणाङ्ग्लपदीयभाषायामनूदितम्	४)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	३।)
शीतपदार्थनिर्वचनम्	४)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकामकोल्लूरशास्त्रि-संशोधिता	३)
काव्यप्रदीपः, पं॰ रामशास्त्रिभागवताचार्येण परिशोधितः	३॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	७॥)

Digitized by Google

द्विर्वचने इत्यावर्तते। तत्रैकं सप्तम्यादिना द्विर्वचननिमित्ते इत्यर्थकमचीत्यनेन समानाधिकरणम्। अपरं कालावधारणार्थम्। द्वित्वनिमित्तेऽचि परेऽच आदेशो न स्याद्द्वित्वे कर्तव्ये। कृते तु द्वित्वे यथाप्राप्तमादेशः स्यादेवेत्यर्थ इत्याहुः। चक्रतुः। चक्रुः। द्वित्वनिमित्ते किम्। दुद्यूषति। न ह्यूठ् द्वित्वनिमित्तम्। नन्वेवं चक्रतुरित्यादावपि यण् स्यादेव। अतुसो द्वित्वनिमित्तत्वेऽप्यकारस्यातथात्वात्। सूत्रन्तु चक्रे इत्यादौ सावकाशमिति चेत्सत्यम्। इह निमित्तशब्देन साक्षाद्वा समुदायघटकतया वा द्वित्वप्रयोजकत्वमाश्रीयते न तु साक्षादेवेत्याग्रहः। लक्ष्यानुरोधात्। तदाहुः। तद्भावभावितामात्रेणेह निमित्तत्वमिति। अचि किम्। जेघ्रीयते। देध्मीयते। अधिजगे। जग्ले। मम्ले। किञ्च भसेः क्सौ घसिभसोर्हलीत्युपधालोपस्य निषेधो माभूत्। अन्यथा द्वित्वे बप्सानिति स्यात्। बभ्सानिति चेष्यते। अचः किम्। असूषुपत्। इह स्वापेश्चङीति सम्प्रसारणे निषिद्धेऽभ्यासे उवर्णो न श्रूयेत। न च द्वित्वे कृते पुनः सम्प्रसारणम्। न सम्प्रसारणे इति निषेधात्। किञ्च इजाते, इजाथे, इत्यादौ सम्प्रसारणे निषिद्धे द्वित्वोत्तरमभ्यासे संप्रसारणं न स्यात्। न सम्प्रसारणे इति निषेधात्। न च तावस्थायामेव सम्प्रसारणमिति वाच्यम्। कित्त्वाभावात्। न च कित्त्वमपि प्रवर्ततामिति वाच्यम्। अन्तरङ्गैस्तिबादिभिर्बाधितत्वात्॥

अदर्शनं लोपः। १। १। ६०॥

स्थाने इत्यनुवर्तते। तदर्थस्य प्रसङ्ग इति। शास्त्रतोऽर्थतश्च प्रसक्तस्यानुच्चारणं लोपसंज्ञं स्यात्। अर्थस्यैषा संज्ञा न तु शब्दस्य। महासंज्ञाकरणसामर्थ्यात्। गोधेरः। पचेरन्। प्रासादात्प्रेक्षते। संज्ञाप्रदेशा लोपो व्योर्वलि ल्यब्लोपे कर्मणीत्येवमादयः॥

Digitized by Google

प्रत्ययस्य लुक्श्लुलुपः । १ । १ । ६१ ॥

अनेकसंज्ञाकरणसामर्थ्यात्तन्त्रावृत्त्याद्याश्रित्य तद्भावितसंज्ञा इह विज्ञायन्ते । अतो न सङ्करः । लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्संज्ञं स्यात् ॥ संज्ञाप्रदेशा लुक्तद्धितलुकि जुहोत्यादिभ्यः श्लुः जनपदे लुबिति । पञ्चभिः पट्वीभिः क्रीतः पञ्चपटुः । जुहोति । पञ्चालानां निवासो जनपदः पञ्चालाः । विधिप्रदेशेषु भाविसंज्ञाविज्ञानान्नान्योन्याश्रयः ॥

प्रत्ययलोपे प्रत्ययलक्षणम् । १ । १ । ६२ ॥

प्रत्यये लुप्तेऽपि तदाश्रितं कार्यं स्यात् ॥ अतृणेडित्यत्र हलादौ पिति सार्वधातुके विहित इम् लुप्तेऽपि तस्मिन् भवति । स्थानिवत्सूत्रेण तु न सिध्यति । अल्विधित्वात् । वर्णाश्रये नास्ति प्रत्ययलक्षणमिति तु वर्णप्राधान्यविषयकम् । स्थानिवदित्यनुवृत्त्यैव सिद्धे प्रत्ययलक्षणमित्येतत्सामर्थ्येन यत्र प्रत्ययः प्राधान्येनाश्रीयते तत्रैव प्रत्ययलक्षणं भवति न तु वर्णप्राधान्ये इत्येतत्फलितत्वात् । तेन गवे हितं गोहितमित्यादावबादिकं नेति दिक् ॥

न लुमताऽङ्गस्य । १ । १ । ६३ ॥

लुक् श्लु लुप् एते लुमन्तः । लुमता लुप्ते प्रत्यये यदङ्गं तस्य यत्कार्यं प्रत्ययाश्रयमाङ्गमनाङ्गं वा तन्न भवतीत्यर्थः ॥ गर्गाः । मृष्टः । जुहुतः । इह यञ्शपोर्लुमता लुप्तयोरङ्गस्य गुणवृद्धी न भवतः । लुमतेति किम् । कार्यते हार्यते । अङ्गस्येति किम् । पञ्च । सप्त । उत्तरपदत्वे चापदादिविधौ प्रतिषेधः ॥ * ॥ परमवाचा । परमगोदुहा । परमलिहा । परमदण्डिना । परमदिवा । परमकुमार्यो । इहान्तर्वर्तिनीं विभक्तिमाश्रित्य पूर्वपदस्येवोत्तरखण्डस्यापि पदसंज्ञायां चोः

कु: दादेर्धातोर्घः होढः न लोपः प्रातिपदिकान्तस्य दिव उत् इको-ऽसवर्णे शाकल्यस्य ह्रस्वश्चेत्येते विधयः प्राप्ताः प्रत्ययलक्षणप्रतिषेधा-दपदत्वान्न भवन्ति । अपदादिविधौ किम् । दधिसेचौ । इह षत्व-निषेधे कर्तव्ये पदत्वमस्त्येव । कुत्वे तु न । ननु भवेदेवं दध्नः सेचा-विति षष्ठीसमासे । उपपदसमासे तु प्राक्सुबुत्पत्तेः समासविधानात्सेच्-शब्दस्य पदत्वाभावात्स्यादेव षत्वमिति चेत् । अत्राह कैयटः । सोपपदात्क्विप् नास्ति । अनभिधानात् । अतो दधिषेचावित्यादि न भव-त्येवेति । अन्ये त्वाहुः । प्राक्सुबुत्पत्तेः समासविधानेऽपि पदादादिः पदादिरिति पञ्चमीसमासेनाश्र न षत्वमितीति दिक् । शब्दकौस्तुभे तु उपपदसमासोऽपि सुबुत्पत्त्यनन्तरमेवाभ्युपगन्तव्यः । घनक्रीते-त्यादिसिद्धये तस्यानित्यताया आवश्यकत्वादित्यप्युक्तम् ॥ सत्सुपू-र्वस्य चापदादिविधौ ॥ * ॥ मधुसेचौ । मधुसेचः । इहापि षत्वनिषेधे कर्तव्ये पदत्वमस्त्येव । कुत्वे तु न ॥

अचो ऽन्त्यादि टि । १ । १ । ६४ ॥

अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात् ॥ पचते । पचेते । टिप्रदेशाश्च टित आत्मनेपदानां टेरित्यादयः ॥

अलो ऽन्त्यात्पूर्व उपधा । १ । १ । ६५ ॥

अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः स्यात् ॥ पाचयति । भेदयति । उपधाप्रदेशा अत उपधाया इत्यादयः ॥

तस्मिन्निति निर्दिष्टे पूर्वस्य । १ । १ । ६६ ॥

सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम् । इको यणचि । दध्यत्र । मध्वत्र ॥

तस्मादित्युत्तरस्य । १ । १ । ६७ ॥

पञ्चमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य बोध्यम् ॥ तिङ्ङतिङः । अग्निमीळे । इह न भवति । ईळे अग्निम् ॥

स्वं रूपं शब्दस्याशब्दसंज्ञा ।१।१।६८॥

शब्दस्य स्वं रूपं संज्ञि शब्दशास्त्रे या संज्ञा तां विना ॥ अग्नेर्ढक् । आग्नेयम् । अशब्दसंज्ञेति किम् । उपसर्गे घोः किः । दाधाभ्यां यथा स्यात् । घुधातोः शब्दार्थान्माभूत् । शब्दः शब्दशास्त्रं तत्र संज्ञेति सप्तमीसमासः न तु शब्दस्य संज्ञेति । अन्यथा कर्मसं-ज्ञादेरर्थसंज्ञात्वेन निषेधाप्रवृत्तौ कर्मण्यणित्यादौ स्वरूपग्रहणापत्तेः ।

अणुदित्सवर्णस्य चाप्रत्ययः ।१।१।६९॥

अ परेण णकारेणेत्युक्तम् । प्रतीयते विधीयते इति प्रत्ययः । अविधीयमानोऽण् उदिच्च सवर्णस्य संज्ञा स्यात् ॥ अस्य च्वौ । शुक्ली स्यात् । माली स्यात् । एरनेकाचोऽसंयोगपूर्वस्य । चिच्यतुः । निन्यतुः । ऋदोरप् । यवः । स्तवः । लवः । पवः । उरण् रपरः । कर्ता । किरति । कु चु टु तु पु एते उदितः । कुहोश्चुः । चकार । जगाद । अप्रत्यय इति निषेधस्तु उदित्सु न प्रवर्तते । उदित्करणसामर्थ्यात् । अप्रत्यय इति किम् । विधीयमानानां प्रत्ययादेशागमानां सवर्णग्राहकत्वं मामूत् । अत इञ् । इदम इश् । आर्धधातुकस्येट् । भुवो वुक् । अम्सम्बुद्धौ । तदेवम इत्यष्टादशानां संज्ञा । तथेकारोकारौ । ऋकारस्त्रिंशतः । एवं लृकारोऽपि । एचो द्वादशानाम् । एदैतोरोदौतोश्च न मिथः सावर्ण्यम् । ऐऔजिति सूत्रारम्भसामर्थ्यात् । तेनैचश्चतुर्विंशतेः संज्ञाः स्युरिति नापादनीयम् । अननुनासिका यवला द्वयोः । रहौ तु स्वस्यैव । यद्यपि हकार आकारस्य संज्ञेति प्राप्तम् । तथापि तत्परिहाराय नाज्झलावित्यत्रैव यत्नः कृतो न विस्मर्तव्यः ॥

तपरस्तत्कालस्य । १ । १ । ७० ॥

तः परो यस्मात्स च तात्परश्चोच्चार्यमाणसमकालस्यैव संज्ञा स्यात्। तेन अत् इत् उत् इत्यादयः षण्णां षण्णां संज्ञाः। ऋदिति द्वादशानाम्। अतो भिस ऐस्। वृक्षैः। तत्कालस्येति किम्। खट्वाभिः। वृद्धिरादैजिति॥

आदिरन्त्येन सहेता । १ । १ । ७१ ॥

अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात्॥ अच्। अक्। हल्। सुप्। तिङ्। इता सहित आदिरुत्तरेषामपि ग्राहको माभूत् एवमन्त्येनेता सहितः पूर्वेषां संज्ञा माभूदित्यन्त्यादिग्रहणम्। इतेति किम्। रप्रत्याहारो यथा स्यात्। स ह्यनन्त्येनापि अनुनासिकप्रतिज्ञासामर्थ्याद्भवति। न चेतदितेत्येतस्य विरहे लभ्यते॥

येन विधिस्तदन्तस्य । १ । १ । ७२ ॥

येन शब्देन विधिर्विधीयते स तदन्तस्य आत्मान्तस्य समुदायस्य संज्ञा स्यात् स्वस्य च रूपस्य॥ अन्येन चान्यस्य विधिर्भवति। यथा चेषस्य संज्ञामं ह्रस्वत्वादिभिर्विधत्ते। एवमचो यदिति अचा धातोर्यतं विधत्ते इत्यजन्ताद्धातोर्यत्प्रत्ययो भवतीत्यर्थः। चेयम्। जेयम्। श्रेयम्। एरच्। चयः। जयः। अयः॥ समासप्रत्ययविधौ प्रतिषेधः॥ * ॥ तेन द्वितीया श्रितेति कृष्णश्रित इत्येव भवति न तु कृष्णं परमश्रित इत्यादावपि। तथा नडादिभ्यः फक्। नाडायनः। नेह। सूत्रनाडिः। अस्यापवादमाह॥ उगिद्वर्णग्रहणवर्जम्॥ * ॥ महान्तमतिक्रान्ता अतिमहती। उगिदन्तात्स्त्रीत्वे ङीप्। अत इञ्। दाक्षिः। वर्णेनापि तदन्तग्रहणान्यथैवतत्र चान्येन च तदन्त-

विधिं प्रयोजयन्ति ॥ मन् । राज्ञेत्यर्थवता । साम्नेत्यनर्थकेन । इन् । दण्डीत्यर्थवता । वाग्मीत्यनर्थकेन । अस् । सुपया इत्यर्थवता । सुस्रोता इत्यनर्थकेन । मन् । सुशर्मेत्यर्थवता । सुप्रथिमेत्यनर्थकेन । तदन्तविधेर्बाधनिक्रमपवादमाह वार्त्तिककारः ॥ यस्मिन्विधिस्तदादावल्ग्रहणे ॥ * ॥ अचि श्नुधात्वितीयङुवङ् च यथेह भवति श्रियौ भुवाविति । एवमिहापि सिध्यति श्रियः भुव इति । तदन्तविध्यपवादस्तदादिविधिरतो विशेषणेनैव ॥

वृद्धिर्यस्याचामादिस्तद्वृद्धम् । १ । १ । ७३ ॥

यस्य समुदायस्यावयवानामचां मध्ये प्राथमिकोऽज् वृद्धिसंज्ञकः स वृद्धसंज्ञकः स्यात् ॥ आम्रगुप्तीयः । वृद्धाच्छः । अचामिति जातौ बहुवचनम् । तेन द्वयोरपि भवति । शालीयः । एकस्यापि भवति व्यपदेशिवद्भावात् । सा ब्राह्मणी तस्याः अयं सीयः ॥ वा नामधेयस्य ॥ * ॥ पौरुषेयं नाम तस्य वृद्धसंज्ञा वा स्यादित्यर्थः ॥ उभयत्र विभाषेयम् । देवदत्तादीनामप्राप्ते वामनादीनाञ्च प्राप्ते आरम्भात् । देवदत्तीयाः । दैवदत्ताः । "विधाय मूर्तिं कपटेन वामनीमिति" श्रीहर्षः ॥ गोत्रोत्तरपदस्य च ॥ * ॥ नित्यं वृद्धसंज्ञा वक्तव्येति शेषः ॥ कम्बलचारायणीयाः । ओदनपाणिनीयाः । घृतरौढीयाः । कम्बलप्रियस्य चारायणस्य शिष्या इत्यादिरर्थः । ननु पाणिनेश्छात्राः पाणिनीया इति न सिद्ध्यति । वृद्धाच्छं बाधित्वा इञश्चेत्यणः प्रसङ्गात् । न च छे विवक्षिते यूनि लुगितीञो लुकि सति नायमिञन्त इति वाच्यम् । प्रत्ययलक्षणेनेञन्तत्वानपायात् । नैतदस्ति । इञश्चेत्यत्र हि कण्वादिभ्यो गोत्रे इत्यतो गोत्रग्रहणमनुवर्तते । तच्च तत्रापत्याधिकारादन्यत्वेऽपि स्वरितत्वप्रतिज्ञानादिना पारिभा-

त्रिकमेव गृह्यते न तु लौकिकमिति सिद्धान्तः । पाणिनिरिति च युनीष् न तु गोत्रे । कुठस्यापत्यं रौढिः । अत इञ् । अनन्तरे गोत्रे वा । न चैवमिञश्चेत्यणप्रसङ्गः । न द्व्यचः प्राच्यभरतेष्विति निषेधात् । स्यादेतत् । यदि गोत्रोत्तरपदस्य वृद्धसंज्ञा विधीयते तर्हि पिङ्गलकाण्वस्य छात्राः पैङ्गलकाण्वाः इत्यत्र वृद्धाच्छः स्यात् इष्यते तु कण्वादिभ्यो गोत्रे इत्यण् । कण्वो गर्गादिः । सत्यम् । अत एवापरितोषादुक्तं वार्तिककृता । गोत्रान्ताद्वा असमस्तवदिति । शैषिकाधिकारे प्राग्दीव्यतोऽणित्यत्र वा इत्यमतिदेशः कर्तव्य इत्यर्थः । अपत्याधिकारादन्यत्वाच्च लौकिकगोत्रग्रहणादौदनपाणिनीया इत्यादि सिध्यतीति भावः । किमविशेषेण । नेत्याह । जिह्वाकात्यहरितकात्य वर्जम् । कतशब्दो गर्गादिः । जिह्वाचपलो हरितवर्णश्च कात्यः तस्य छात्रा इत्यर्थेऽणेव भवति । जैह्वाकाताः । हारितकाताः ॥

त्यदादीनि च । १ । १ । ७४ ॥

वृद्धसंज्ञानि स्युः ॥ त्यदीयम् । तदीयम् । अदसीयम् । इदमीयम् । किमीयम् । त्यादायनिः । मादायनिः । उदीचां वृद्धादिति फिञ् ॥

एङ् प्राचां देशे । १ । १ । ७५ ॥

यस्याचामादिरिति मण्डूकप्लुत्याऽनुवर्तते । एङ् यस्याचामादिस्तद्वृद्धसंज्ञं वा स्याद्देशाभिधाने ॥ एणीपचनीयः । ऐणीपचनः । गोनर्दीयः । गोनर्दः । भोजकटीयः । भोजकटः । एङिति किम् । आहिच्छत्रः । कान्यकुब्जः । विधेयसंज्ञासम्बन्धबलेन प्राग्ग्रहणमाचार्यनिर्देशार्थम् । व्यवस्थितविभाषा चेयम् । तेन क्रोडदेवदत्तशब्दयोरप्राग्देशवाचिनोर्न वृद्धसंज्ञा । तेन क्रौडा दैवदत्त इत्यणेव भवति । प्राग्देशवाचिनस्तु देवदत्तशब्दस्य भवत्येव वृद्धसंज्ञा । ततः काश्या-

Digitized by Google

इत्याद्वृद्धलक्षणौ ठञ्ञिठौ भवतः । शैषिकेष्विति वक्तव्यम् ॥ ॥ शैपुरिकी । शैपुरिका । स्कौनगरिकी । स्कौनगरिका । शेपुरं स्कौनगरञ्च वाहीकग्रामौ तत्र वृद्धत्वाद्वाहीकग्रामेभ्यश्चेति ठञ्ञिठौ भवतः । शैषिकेष्विति वचनादपत्ये वृद्धलक्षणः फिञ् न । विकारे च नित्यं वृद्धेति मयडाद । तदेवं कुक्षिमतं भाष्यमतञ्चानुसृत्य प्राग्ग्रहणमाचार्यनिर्देशार्थमिति व्याख्यातम् । वयाद्वित्यस्तु प्राचि देशे ये सन्ति ते प्राञ्चः पुरुषास्तेषां यो देशस्तदभिधाने इति व्याचख्यौ । प्राचामित्यस्य सूत्रमात्रदेशविशेषणत्वे सम्भवति अध्याहर्तव्येन मतेनेत्यनेनान्वयो न कर्तव्य इति तदाशयः । अस्मिन्पक्षे वाहीकग्रामे देवदत्त इत्यत्रावृद्धत्वादेव ठञ्ञिठौ न भवत इति स्पष्टम् । किन्तु शैपुरिकीत्यादि भाष्योदाहृतं वचनेनैव साधनीयं स्यादिति दिक् । देशे इति किम् । गोमती नाम प्राग्देशनदी तत्र भवा मत्स्याः गोमताः । देशग्रहणेन नदी न गृह्यते । नदीदेशोऽग्रामा इति पृथगुपादानाल्लिङ्गात् । प्रागादिदेशविभागश्चेत्थम् । शरावती नाम नदी उत्तरपूर्वाभिमुखी तस्या दक्षिणपूर्वस्यान्दिशि व्यवस्थितो देशः प्राग्देशः । उत्तरापरस्यामुदग्देशः । केचित्तु ऐशानीतो नैर्ऋत्यां पश्चिमाभिगामिनी शरावतीति वदन्ति । उभयथापि प्रागुदक्त्वस्वरूपे न विवादः । वाहीकदेशस्तु प्रत्यग्बहिर्भूतः । यदुभयबहिर्भूत इति तन्न । अव्ययात्त्यबिति सूत्रे भाष्यकारेण शाकलनाम्नो ग्रामस्योदीच्यवाहीकोभयरूपताभ्युपगमात् । एतच्च विवेचनं वाहीकग्रामेभ्यश्चेत्यत्रानुपयोक्ष्यते इति सर्वं सुस्थितिः ॥

वासुदेवभट्टेन विरचितायां व्याकरणदीपिकाभाष्यायां पाणिनिसूत्रवृत्तौ प्रथमस्याध्यायस्य प्रथमः पादः समाप्तः ॥

अथ प्रथमाध्यायस्य द्वितीयः पादः ।

गाङ्कुटादिभ्योऽञ्णिन्ङित् । १ । २ । १ ॥

गाङादेशात्कुटादिभ्यश्च परेऽञ्णितः प्रत्यया ङिद्वत्स्युः ॥ अध्यगीष्ट । अध्यगीषत । विभाषा लुङ्लृङोरितीङो गाङ् । इह विशेषणार्थ एव हि गाङादेशे ङकार इति गाङ् लिटीति सूत्रे वक्ष्यते । कुटिता । कुटितुम् । अञ्णित् किम् । कोटः । घञ् । चुकोट । अथ कथं लिखितुं स्वयमेव लिखिष्यतइति । न च कुटादिभ्य इत्यत्रैव षष्ठीतत्पुरुषबहुव्रीह्योरेकशेषेण लिखेरपि कुटस्यादितया संग्रह इति वाच्यम् । शकुनिष्वालेखने इत्यादिप्रयोगविरोधात् । हरदत्तस्तु संज्ञापूर्वकविधेरनित्यतया समादधौ । चुकुटिषतीत्यादौ सनो ङित्त्वातिदेशेऽपि आत्मनेपदं यथा न भवति तथा तद्विधावेव स्फुटीभविष्यति ॥

विज इट् । १ । २ । २ ॥

विजेः पर इडादिः प्रत्ययो ङिद्वत् ॥ उद्विजिता । उद्विजितुम् । इट् किम् । उद्वेजनम् । इह वृद्धिर्यस्येति सूत्रान्मण्डूकप्लुत्या यस्यादिरित्यनुवर्तते । तेन इडादिः प्रत्ययो लभ्यते न तूलमेकवचनमिट् । तथा हि सति विजिषीयेत्यत्रैव स्यात् । ओविजी भयचलनयोरित्यस्य रुधादेस्तुदादेश्चेह ग्रहणं न तु विजिर् पृथग्भावे इत्यस्य जुहोत्यादेर्व्याख्यानादिति बोध्यम् । यत्तु तस्यानिट्त्वादित्याहुः । तन्न । विवेजिथेति थलीट्सम्भवात् । न च ङित्त्वेन गतार्थता । तत्र पित्त्वेन ङित्त्वाभावात् ॥

Digitized by Google

विभाषोर्णोः । १ । २ । ३ ॥

इडादिः प्रत्ययो ङिद्वा स्यात् ॥ ऊर्णुविता । ऊर्णविता । इट् किम् । ऊर्णवनीयम् ॥

सार्वधातुकमपित् । १ । २ । ४ ॥

अपित्सार्वधातुकं ङिद्वत्स्यात् ॥ कुरुतः । कुर्वन्ति । चिनुतः । चिन्वन्ति । पचेते पचेथे इत्यादौ ङितो यत्कार्यमात्मने ङित इतीय् सोऽपि भवति । नन्वेवं चिनुत इत्यादौ तास्यनुदात्तेदिति स्वरापत्तिरिति चेन्न । उपदेशग्रहणस्योभयसम्बन्धेन ङिदुपदेशाददुपदेशाच्चेति वार्त्तिभाष्ये व्याख्यातत्वात् । अन्हिङोरिति पर्युदासेनोपदेशे ङकारवतो ग्रहणाद्वा । सार्वधातुकं किम् । कर्ता । कर्तुम् । अपित्किम् । करोति ॥

असंयोगाल्लिट् कित् । १ । २ । ५ ॥

असंयोगात्परोऽपिल्लिट् कित् स्यात् ॥ निन्यतुः । बिभिदतुः । अपित्किम् । बिभेद । असंयोगात्किम् । सस्रंसे । ङित्वे प्रकृते कित्करणं यजादीनां कितीति संप्रसारणार्थम् । ईजतुः । ईजुः । पूर्वेणापि कित्वं कुतो न कृतमिति चेत् । वक्तः वक्थ इत्यत्र संप्रसारणापत्तेः ॥ ऋदुपधेभ्यो लिटः कित्वं गुणात्पूर्वविप्रतिषेधेन ॥ * ॥ कित्वस्यावकाशः । ईजतुः । गुणस्य । चेतति । ववृते ववृधे इत्यत्र पूर्वविप्रतिषेधात्कित्वम् ॥

इन्धिभवतिभ्यां च । १ । २ । ६ ॥

आभ्यां लिट् कित्स्यात् ॥ समीधे दस्युं हन्तम् । पुत्र ईधे अथर्वणः । बभूविथ । अत्र वार्तिकम् ॥ इन्धेश्छन्दोविषयत्वाद्भुवो वुको नित्यत्वात्ताभ्यां लिटः किद्वचनानर्थक्यमिति । अयं

भावः । अन्येष्वप्ययामित्यादेश्चेत्यामा भाव्यम् । छन्दसि त्वमन्त्रे इति प्रतिषेधाद्व्याप्याम्नास्ति तथापि छन्दस्युभयथेति लिटः सार्वधातुकत्वे ङित्त्वात्समीधे इति नलोपः । श्नमभावस्त्वार्धधातुकत्वाद्व्यत्ययाद्वा । भुवोऽपि वुक् नित्यत्वादेव गुणवृद्धी बाधिष्यते इति । एषैव सूत्रकृतोऽपि गतिः । अन्यथा बभूवेत्यत्रानिमित्तत्वाया वृद्धेर्निषेधासंभवेन वुको नित्यतां विना गत्यन्तराभावात् । कित्त्वन्त्विह बभूवेत्यत्र कित्त्वाभावपक्षे थलि च चरितार्थमिति न तत्सामर्थ्यादनिमित्तत्वाया अपि वृद्धेर्निषेधं प्रत्याशा । अत एव च यङ्लुकि णल्थलोः श्तिपा निर्देशात्कित्त्वाप्राप्तावपि बोभूव बोभूविथेति सिद्ध्यतीति प्रत्याख्यातं सूत्रं भाष्ये । श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्त्वं वेति व्याकरणान्तरम् देभतुः सस्वजे इति भाष्योदाहरणादेकदेशानुमत्या इहाप्याश्रीयते । तत्र कित्त्वपक्षे श्रन्थिग्रन्थ्योरेत्वाभ्यासलोपावपि वक्तव्याविति हरदत्तादयः । दम्भेस्तु षष्ठे वक्ष्यते एव । श्रेथतुः । शश्रन्थतुः । ग्रेथतुः । जग्रन्थतुः । देभतुः । ददम्भतुः । सस्वजे । सस्वञ्जे । इदं कित्त्वं पिदपिद्विषयकमिति सुधाकरादयः । तन्मते श्रेथिथ । अस्मिन्नपि पक्षे णलि शश्रन्थ । उत्तमे तु शश्रन्थ शश्रन्थेति माधवः । तत्र मूलं मृग्यम् । दम्भेश्च तिप्सिप्मिप्सु देभ देभिथ देभेति रूपान्तरं बोध्यम् । अपिद्विषयकमिति न्यासकारादिमते तु ददम्भ ददम्भिथ ददम्भेत्येव ॥

मृडमृदगुधकुषक्लिशवदवसः क्त्वा । १ । २ । ७ ॥

गुधकुषक्लिशिभ्यः क्त्वो रलो व्युपधादिति विकल्पे प्राप्ते इतरेभ्यो न क्त्वा सेडिति निषेधे प्राप्ते कित्त्वं विधीयते ॥ मृडित्वा । मृदित्वा । गुधित्वा । कुषित्वा । क्लिशित्वा । उदित्वा । उषित्वा ॥

Digitized by Google

रुदविदमुषग्रहिस्वपिप्रच्छः संश्च । १ । २ । ८ ॥

एभ्यः संश्च क्त्वा च कितौ स्तः ॥ रुदित्वा । रुरुदिषति । विदित्वा विविदिषति । मुषित्वा । मुमुषिषति । गृहीत्वा । जिघृक्षति । सुप्त्वा । सुषुप्सति । पृष्ट्वा । पिपृच्छिषति । स्वपिप्रच्छ्योः सनर्थं ग्रहणम् । क्त्वा किदेव हि ॥

इको झल् । १ । २ । ९ ॥

इकः परो झलादिः सन् कित्स्यात् । चिचीषति । तुष्टूषति । चिकीर्षति । इकः किम् । यियासति । पिपासति । झल् किम् । यियविषति । किमर्थं पुनरिदमुच्यते । गुणो माभूदिति । दीर्घत्वं गुणस्य बाधकं भविष्यति । एवमपि कृते दीर्घे गुणो भवेत् । दीर्घस्य सनि मीमेत्यत्र मीग्रहणेन मिनोतिमपि ग्राहयित्वा कृतार्थत्वात् । मासाहचर्यान्मीग्रहणेऽपि लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्तेः । सिद्धान्तेऽपि एतस्या एव युक्तेस्त्वयाऽपि शरणीकर्तव्यत्वात् । ननु कित्वाभावे एज्विषयत्वेन मीनातिमिनोतीत्यात्वे कृते गामादाग्रहणेष्वविशेषान्माग्रहणेनैव मीनातिमिनोत्योरपि सिद्धेर्दीर्घविधानमकृतार्थमेवेति चेत् । अत्रोच्यते । दीर्घेण गुणे बाधिते एज्विषयत्वं स्वीक्रियते । न वा । नाद्यः । दीङ् दिदीषते इत्यत्रात्वापत्त्या कित्वस्यावश्यकत्वात् । नान्त्यः । एज्विषयताया अभावेनात्वासंभवान्माग्रहणेन मीनातिमिनोत्योर्ग्रहणस्याशक्यत्वाद्दीर्घविधानस्य मिनातिमपि ग्राहयित्वा कृतार्थत्वे प्रत्यक्षे दृश्यमाने तदकृतार्थत्वबलेन दीर्घस्य गुणबाधकत्वोक्तेर्बालभाषणतुल्यत्वात् । अत एवासति कित्वे यद्यनवकाशत्वाच्चिचीषतीत्यादौ दीर्घो गुणं बाधिष्यते तदा चीषयतीत्यत्र णिलोपमप्यविशेषाद्बाधेत । यदि च सामान्यग्रहणा-

विधानाच्छे कृतार्थे दीर्घे चीयमानीत्यत्र परत्वादिव लोपो बाधते तर्हि गुणोऽपि बाधेत । तस्मात्क्त्वं वक्तव्यमित्युपसंहृतं भाष्ये सङ्गच्छते । अन्यथा मीनातीत्यादिना आत्वे कृते माग्रहणेनैव मीनातिमिनोत्योर्ग्रहणे सिद्धे दीर्घविधानस्य सामान्यग्रहणार्थत्वाभावेन सामान्यग्रहणार्थत्वेन कृतार्थे दीर्घे विलोप इव गुणोऽपि बाधेतेत्युक्तेरसङ्गत्यापत्तेः । मम तु क्त्वाभावेऽपि दीर्घस्यापि इग्विषयताया अपहारात् आत्वासंभवेन दीर्घत्वस्य सामान्यग्रहणार्थत्वे सुस्थे तदर्थे कृतार्थे दीर्घे विलोप इव गुणोऽपि बाधेतेत्युक्तेर्न काप्यनुपपत्तिः । एतेन क्त्वाभावे इग्विषयत्वेनात्वे कृते माग्रहणेनैव सामान्यग्रहणं भविष्यतीत्याशङ्काकुलितचित्तो भाष्यकारेण सामान्यग्रहणार्थत्वं न सुष्ठु निरूपितमिति वदन् कैयटोऽपि समाहितः । क्त्वारम्भे क्त्वेनैव क्त्वाभावेऽपि दीर्घेणेग्विषयताया अपहारात् आत्वासंभवेन दीर्घत्वस्य भाष्यकारोक्तसामान्यग्रहणार्थत्वस्य सुष्ठुतरत्वात् । अन्यथा दिदीषते इत्यत्रात्वापत्तेः । एतेन दीर्घत्वस्य सामान्यग्रहणार्थत्वमसंभवदेवेति मत्वा दीर्घेण गुणबाधमङ्गीकृत्य विलोपस्य तु येननाप्राप्तिविरहादेव बाधो न भविष्यतीत्याशङ्का तदर्थमवश्यमिको झलिति कर्तव्यम् । योगविभागः किमर्थ इति चेदग्रे वर्णयिष्यते । सोऽपि कुटादौ गुङ् शब्दे इति कैयटमते दीर्घान्तोऽपि न्यासकारमते ह्रस्वान्तस्तस्य जुगूषते इत्यत्र गु पुरीषोत्सर्गे घु गतिस्थैर्ययोरिति पाठात् जुगूषति दुघूषतीत्यत्र च कृतार्थे दीर्घः चिचीषतीत्यादौ परेण गुणेन बाध्येत स मा बाधीत्येवमर्थो यद्यपि सम्भवति तथापि उङ्नेति वक्तव्ये उक्नेति प्रत्याहारग्रहणं विस्पष्टार्थमेव । न च गमेरिडादेश्च क्योर्निवारणीयः प्रत्याख्यातुं तन्त्रादिना सम्भवव्यभिचाराभ्यां गमेरपि विशेषयिष्यमाणत्वात्-

ग्रहणसामर्थ्यं शङ्क्यम् । एवं हि ऊतो दीर्घ इत्युक्त्वा ऋद्धनोरिति सूचयेत् । ऋकारादेशस्यापि ग्रहणमिति पक्षेऽपि ऋद्धनोरिति ब्रूयात् । हना साहचर्याच्च ऋधातुरेव ग्रहीष्यते न तु ऋवर्णान्तः । यथान्यासपाठेऽपि हनिसाहचर्याल्लुग्विकरणस्यादेशगमेर्ग्रहणसम्भवाच्च । न चैवमपि पुरस्तादपवादन्यायेन णिलोप एव बाध्येतेति भ्रमितव्यम् । उभयापवादतासम्भावनायामेव तदवतारात् । इह तु णिलोपेन सह येननाप्राप्तिविरहात् । न च बाध्यसामान्यचिन्तायां णिलोपबाधो दुर्वार इति वाच्यम् । स्याद्यपां ज्ञीप्स्यमान इति निर्देशाल्लक्ष्यानुरोधाच्चेह बाध्यविशेषचिन्ताया एव युक्तत्वात् । एवं चाज्ग्रहणसामर्थ्यस्य ज्ञीप्स्यमान इत्यादेर्ज्ञापकस्य च पर्यालोचनाक्लेशपरिहारार्थं लक्षणैकचक्षुषो बाध्यसामान्यचिन्ताभ्रमं वारयितुं योगविभाग इति निष्कर्षयन्तः शब्दकौस्तुभकारा अपि प्रत्युक्ताः । दीर्घविधानस्य सामान्यग्रहणार्थत्वस्योपपादितत्वेन निष्कर्षमूलयुक्तदीर्घविधानस्याकृतार्थताया एव विरहात् । तदेवं दीर्घे कृते गुणो माभूदित्येवमर्थं कित्त्वं वक्तव्यमिति स्थितम् । नन्वेतादृशक्लेशेन किमिति कित्त्वस्यावश्यकत्वं प्रतिपाद्यते न किं लुलूषतीत्यादिदीर्घेषु फलाभावात् दीर्घाप्रवृत्त्या गुणनिषेधार्थं कित्त्वमावश्यकम् । किञ्च दीर्घेण गुणस्येव ऋदित्वस्यापि बाधापत्त्या चिकीर्षतीत्यपि न सिद्ध्येदिति चेन्न । दीर्घेषु पर्जन्यवल्लक्षणप्रवृत्तेरङ्गीकारात् । गुणनिवृत्तिरूपफलस्यापि सत्त्वाच्च । मो राजीत्यत्रानुस्वारनिवृत्तिफलवत् यं विधिं प्रतीति न्यायेन ऋदित्वस्याबाधात् । तितीर्षतीत्यादौ तु अकृते दीर्घे इत्त्वस्य गुणेन प्रतिबद्धत्वाद्दीर्घेण गुणबाधे सत्येवेत्त्वं लभ्यं न तु ततः प्राक् । एवं च यस्य तु विधेरित्ययंशो ह्रस्व एव दीर्घेऽप्यविचिष्णुः ॥

हलन्ताच्च । १ । २ । १० ॥

कर्मधारयोऽयम् । अन्तशब्दः परसमीपवाची । इक इत्यनुवृत्तं षष्ठ्या विपरिणम्यते । इक्समीपाद्धलः परो झलादिः सन् कित्स्यात् ॥ हलश्चेति सूचयितुमुचितम् । इकः पराद्धलः परो यः सन्नित्यर्थसङ्गतेः । गुहू । जुघुक्षति । बिभित्सति । इकः किम् । यियक्षते । झल् किम् । विवर्धिषते । हल्ग्रहणं जातिपरम् । तृंहू । तितृक्षति । धिप्सति । धीप्सति ॥

लिङ्सिचावात्मनेपदेषु । १ । २ । ११ ॥

इक्समीपाद्धलः परौ झलादी लिङ् तङ्परः सिच्चेत्येतौ कितौ स्तः ॥ भित्सीष्ट । अभित्त । इकः किम् । यक्षीष्ट । अयष्ट । आत्मनेपदेषु किम् । अस्राक्षीत् । अद्राक्षीत् । सिच एवेदं विशेषणं न तु लिङः । असम्भवात् । झलनुवृत्त्यैव लिङः परस्मैपदस्य व्यावर्तितत्वाच्च । हलः किम् । चेषीष्ट । अचेष्ट । झल् किम् । वर्तिषीष्ट । अवर्तिष्ट । लिङ्सिचोः किम् । द्वेष्टा । द्वेक्ष्यते ॥

उश्च । १ । २ । १२ ॥

ऋवर्णात्परौ झलादी लिङ् तङ्परः सिच्चेत्येतौ कितौ स्तः ॥ कृषीष्ट । अकृत । झलादी किम् । वरिषीष्ट । अवरिष्ट । लिङ्सिचोरितीह । तङि किम् । अकार्षीत् ॥

वा गमः । १ । २ । १३ ॥

गमः परौ झलादी लिङ्सिचौ वा कितौ स्तः ॥ सङ्गसीष्ट । सङ्गंसीष्ट । समगत । समगंस्त ॥

हनः सिच् । १ । २ । १४ ॥

कित्स्यात् ॥ अनुनासिकलोपः । आहत । आहसाताम् ।

आहसत । झलित्येव । आघानिषाताम् । यद्यपि सिजन्तस्यात्मनेपदं कित्परमस्तीत्यनिदितामित्येव सिद्धं तथापि सिजन्तस्योपधालोपो नेति विकरणप्रयुक्तोपधात्वमाश्रित्य लोपो नेति वा ज्ञापनार्थमिदमितीदितो नुम् धातोरित्यत्र वक्ष्यामः । यद्यपीह लिङ्सिचावित्यनुवृत्त्या सिद्धं तथाप्युत्तरार्थमवश्यं कर्तव्यं सिज्ग्रहणं स्पष्टार्थमिहैव कृतम् । अन्यथा हि लिङि वधादेशो नित्यः । घानिषीष्टेति चिण्वदिटि स्यसिच्सूत्रस्थभाष्यरीत्या वधादेशाभावेऽपि झलादित्वान्न कित्त्वमित्यादि व्युत्पादनीयं स्यात् ॥

यमो गन्धने । १ । २ । १५ ॥

सिच् कित्स्यात् ॥ उदायत । उदायसाताम् । उदायसत । गन्धनं सूचनं परदोषाविष्करणम् । गन्धने किम् । उदायंस्त पादम् । आकृष्टवानित्यर्थः ॥

विभाषोपयमने । १ । २ । १६ ॥

यमः सिच् किद्वा स्याद्विवाहे ॥ रामः सीतामुपायत । उपायंस्त वा । उदवोढेत्यर्थः । गन्धनाद्धि उपयमने तु पूर्वविप्रतिषेधान्नित्यं कित्त्वम् ॥

स्थाघ्वोरिच्च । १ । २ । १७ ॥

अनयोरिदादेशः स्यात्सिच्च कित्स्यात् ॥ समस्थित । समस्थिषाताम् । अदित । अधित । झलित्येव । अदायिषाताम् । इह वा गम इत्यारभ्य पञ्चसूत्र्यामात्मनेपदेष्वित्यनुवृत्तिर्निष्फला । तथाहि । गमेः परस्मैपदे सिच् नास्ति अङा बाधात् । लिङ् तु न झलादिः । हन्तेस्तु परस्मैपदे वधादेशो नित्यः । यमेस्तु यमरमेतीट्सकोः सतोर्झलादिः सिच् परस्मैपदे नास्ति । उपयमने तु नित्यमात्मनेपदम् । स्थाघ्वोः परस्मैपदे सिचो लुक् ॥

कालीनां निर्विकल्पकस्मरणासंभवादिति परास्तम् प्रथमतः फलबलेन प्रमेयत्वात्मकविशेषणांश एवोद्बोधकस्य कल्पनात्प्रमेयत्वप्रकारकस्मरणे प्रमेयत्वरूपेणैव सकलज्ञातिस्मरणादिति । न चैवं संस्कारोत्पत्तिक्षणे स्मरणापत्तिरिति वाच्यम् । स्वजन्यसंस्कारसंबन्धेनैव ज्ञानस्य स्मृतिजनकत्वकल्पनात् । ननु विनिगमनाविरहाज्ज्ञानस्मृत्योरेव समानप्रकारकत्वेन समानविशेष्यकत्वेन हेतुत्वमस्तु संस्कारस्मृत्योस्तु संस्कारस्मृतित्वाभ्यामेवास्त्विति चेन्न । घटविशेष्यकद्रव्यत्वप्रकारकघटविशेष्यकघटत्वप्रकारकसमूहालम्बनाच्च घटविशेष्यकद्रव्यत्वप्रकारकसंस्कार एव जातस्तत्र घटविशेष्यकघटत्वप्रकारकसंस्काराभावेऽपि घटविशेष्यकघटत्वप्रकारकस्मरणापत्तेर्दुर्वारत्वात् स्वजन्यसंस्कारसम्बन्धेन घटविशेष्यकघटत्वप्रकारकज्ञानस्य सत्त्वात् । मम मते तु घटविशेष्यकघटत्वप्रकारकसंस्काराभावादेव न तादृशस्मृतिरिति दिक् । चैत्रत्वादिविशिष्टबुद्धौ, अभिनवचैत्रत्वादिविशिष्टबुद्धौ, । तदसम्भवात् चैत्रत्वादिनिर्विकल्पकस्मरणासम्भवात् ॥

किञ्च यत्र घटत्वं न स्मृतं तत्र विशिष्टज्ञानसामग्र्यभावात् घटघटत्वयोः साक्षात्कारसामग्रीतः साक्षात्कारोपपत्तौ न किञ्चिद्बाधकमस्ति । तदेव चास्माकं निर्विकल्पकमिति संक्षेपः । ननु विशेषणज्ञानस्य हेतुतासिद्धौ सर्वमेतदेवं स्यात् तत्रैव मानं न पश्याम इति चेन्न । अन्वयव्यतिरेकाभ्यान्तदवधारणात् ।

अथ जन्मान्तरीयचैत्रत्वप्रकारकानुभवादेव चैत्रत्वविशिष्टबुद्धिः यदि वाऽव्यवहितपूर्वकालीनस्यैव विशेषणज्ञानस्य हेतुत्वमिति मत्कपाठः पठ्यते तदा जन्मान्तरीयतादृशानुभवेन स्वजन्यसंस्कारद्वारा चैत्रत्वनिर्विकल्पस्मरणं ततश्चैत्रत्वविशिष्टबुद्धिरुपपद्यते स्वरसतोऽपि चिन्त्यमिति । न स्मृतमिति उद्बोधकाभावादिति शेषः । तथा च घटघटत्वयोर्विशिष्टज्ञानसामग्र्यभावान्न तद्विशिष्टबोधः । परन्तु घटघटत्वयोर्निर्विकल्पकवि-

रूपकारणसत्त्वे घटघटत्वयोर्ज्ञाने किं बाधकमित्यस्य फलितार्थः। ननु तथापि कथन्तथाभिमतनिर्विकल्पकसिद्धिरित्यत आह तदेवेति। ननु न विशेषणज्ञानत्वेन हेतुत्वं किन्तु विशेषणविषयकत्वेन। तथा च विशेषणज्ञानं विनापि विशेषणविषयकसंस्कारादित एव विशिष्टस्मरणादिसम्भवादनुपपत्तिलेशोऽपीत्यभिप्रायवानाह नन्विति। विशेषणज्ञानस्येति विशेषणज्ञानत्वेन विशेषणज्ञानस्य न हेतुत्वमित्यर्थः। विशेषणविषयकत्वस्य संस्कारसाधारणकारणस्य विशेषणज्ञानेऽपि सत्त्वात्। यद्वा विशेषणज्ञानस्यापि कार्यतावच्छेदकं जन्यविशिष्टप्रत्यक्षत्वं न तु विशिष्टज्ञानत्वं। अनुमित्युपमितिशाब्दबोधानां तद्व्यापारसम्बन्धेन व्याप्तिसादृश्यपदज्ञानैरेव निर्वाहसम्भवात्। तथा च तादृशप्रत्यक्षत्वं सविकल्पकस्यैव कार्यतावच्छेदकमस्तु किं विशेषणज्ञानस्य हेतुत्वकल्पनेनेत्यभिप्रायवानाह नन्विति। एतदेवं विशेषणज्ञानस्य व्यभिचारवारणोपयोगितर्कचिन्तनम्। तदवधारणात्, विशेषणज्ञानस्य हेतुतावधारणात्, ॥

विस्तरस्तु मणिमरीचावनुसंधेयः।

विस्तरस्त्विति। अयं भावः। कदाचिज्जातिमानिति विलक्षणविशिष्टबोधः कदाचिद्घट इति विलक्षणविशिष्टबोधस्तत्र नियामकमवश्यं वाच्यमिति जातित्वविशिष्टबुद्धौ विलक्षणविषयताशालिजातित्वज्ञानस्य घटत्वविशिष्टबुद्धौ तु निर्विकल्पकसाधारणविषयताशालिघटत्वज्ञानस्य हेतुत्वमिति सिद्धं विशेषणज्ञानस्य हेतुत्वमिति। न च तथापि जातिमान्घट इति ज्ञानमनुपपन्नं तत्र घटत्वोपरि जातित्वभासकसामग्रीविरहादिति वाच्यम्। तज्ज्ञानस्यार्थसमाजसिद्धत्वात्। ननु जातिमान् जातित्वविशिष्टजातिमानित्यनयोर्वैलक्षण्यं दुर्लभम्। न च जातिमानित्यत्र जातित्वोपरि न कस्यापि प्रकारत्वं जातित्वविशिष्टजातिमानित्यत्र तु जातित्वस्योपरि जातित्वत्वस्य भानात्तद्वैलक्षण्यमिति वाच्यम्। जात्यतिरिक्तपदार्थानां स्वरूपतः प्रकारत्वाभावेन जातिमानित्यत्रापि जातित्वोपरि कस्यचिद्धर्मस्य प्रकारत्वावश्यकत्वेन साम्यादिति चेन्न। जाति-

मानित्यत्र जातित्वनिर्विकल्पके जातित्वघटकीभूतपदार्थानां स्वरूपत एव भानं ततस्तेषां विशिष्टबोधः जातित्वविशिष्टवानित्यत्र तु जातित्वनिर्विकल्पके जातित्वघटकीभूताः पदार्थाः स्वरूपत एव भासन्त इति तदनन्तरकालं तेषां विशिष्टबोधः । जात्यतिरिक्तविशकलितपदार्थानां स्वरूपेण प्रकारत्वे बाधकाभावादिति साम्याभावादन्यथा जातिमानित्यतोऽपि जातित्वविशिष्टवानित्यत्र विलक्षणविषयतास्वीकारे जातित्वत्वविशिष्टवद्वानित्यत्रापि तत्कल्पनावश्यकत्वात् विषयानवस्थास्यादिति । अत एव निर्विकल्पकं स्मरणं प्रामाणिकं । अन्यथा निरुक्तप्रकारासङ्गतेः । तथा च विशेषणज्ञानस्य जन्यज्ञानत्वं न कार्यतावच्छेदकं प्रत्यक्षत्वेन जातिसाङ्कर्यात् जातित्वास्वीकारे तु तस्य जन्यत्वघटितत्वेन गुरुत्वात् किन्तु जातिरूपं जन्यप्रत्यक्षत्वं । वस्तुतस्तु स्मृत्यनुभवसाधारणविलक्षणविशिष्टज्ञानमात्रवृत्तिविषयताविशेष एव कार्यतावच्छेदक इति दिक् ॥

वैशिष्ट्यावगाहि सप्रकारकम्वा ज्ञानं सविकल्पकं । प्रकारता चायं घट इत्यादि ज्ञाने विशेषणस्य घटत्वादेर्विशेषणत्वापरनामा विषयताविशेषः । विषयता च विषयाकारप्रतीतिसाक्षिकः स्वरूपसंबन्धविशेषः । पदार्थान्तरमित्येकदेशिनः ।

द्वितीयसाक्षात्कारमाह वैशिष्ट्यावगाहीति । अयं घट इति ज्ञानस्य सविकल्पकस्य घटघटत्वयोः सम्बन्धावगाहित्वादित्यर्थः । तथा च सांसर्गिकविषयिताश्रयत्वमिति लक्षणार्थः । सविकल्पके सांसर्गिकविषयितावत्प्रकारताख्यविषयतायाः सत्त्वात्प्रकारताख्यविषयताघटितमपि लक्षणमाह सप्रकारेति । तथा च प्रकारताख्यविषयताकं ज्ञानं सविकल्पकमित्यर्थः । निर्विकल्पकव्यावृत्तायाः सांसर्गिकविषयतायाः प्रकारताख्यविषयताया वा सत्त्वादेतद्विषयतावत्त्वं लक्षणं । एवं विशेष्यताख्यविषयतावत्त्वमपि । एतद्विषयतावत्त्वस्य समूहालम्बने विरहात्समूहाल-

ज्ञानविशिष्टज्ञाने ऽभेद इति । सविकल्पकलक्षणघटकां प्रकारतां निर्वक्ति प्रकारता चेति । या घटत्वादिनिष्ठप्रकारता सा ज्ञाननिष्ठा प्रकारिता । ज्ञान इति सप्तम्यर्थो विषयत्वं । घटत्वादेरिति षष्ठ्यर्थो निरूपितत्वम् । विषयतेति । ज्ञाननिष्ठा या प्रकारिता सैव विषयितेत्युच्यते । तथा च घटज्ञानविषयघटत्वादिनिरूपितविषयिताविशेषः प्रकारितेत्यर्थः । यदा सप्तम्यर्थो न विषयत्वं तदा ज्ञान इत्यस्य तादृशविषयतेत्यनेनान्वय इति । स्वरूपसम्बन्धस्यातिरिक्तत्वमतं प्रेत्याह पदार्थान्तरमिति । गौरवमेवात्रास्वरसबीजम् । यच्चैवं प्रतिभाति । विशेषणतोपलक्षणताभेदेन प्रकारता द्विविधा । तत्र विद्यमानं व्यावर्त्तकं सद्विशेषणं अविद्यमानमपि व्यावर्त्तकं सत्तु उपलक्षणं तदुक्तमसङ्गतं । तथा हि । काकवन्तो देवदत्तगृहाः । जटाभिस्तापस इत्यादौ भवनोपरि भ्रमत्काकस्य शिरसि जटायाश्च विद्यमानत्वेपि विशेषणत्वाभावादिति चेद्रुण्डीकुण्डलीवासस्वीदेवदत्त इत्यादौ दण्डादिमति भवदण्डादिव्यावृत्तिर्बुध्यत इत्यदण्डादिव्यावर्त्तकतावच्छेदकं दण्डादिकमिति तद्विशेषणं । न च पुरुषत्वमेवास्त्विति वाच्यम् । यदादिसाधारण्यात् । काकजटादिकं न गृहतापसादिविशेषणं तदभावेवत्यपि तृणत्वादिना व्यावृत्तिदर्शनात् । तस्माद्व्यावृत्त्यधिकरणतावच्छेदकत्वे सति व्यावृत्तिजनकं विशेषणं अवच्छेदकत्वं चान्यूनानतिरिक्तवृत्तित्वम् । व्यावृत्त्यधिकरणतानवच्छेदकत्वे सति व्यावृत्तिजनकमुपलक्षणं । उपलक्षणस्य व्यावृत्त्यधिकरणतावच्छेदकत्वाभावादिति संक्षेपः ।

भट्टास्तु ज्ञातो घट इति प्रतीतेर्ज्ञानजन्यो विषयनिष्ठः प्राकट्यापरनामा पदार्थो ज्ञातता सैव च विषयता घटज्ञानयोः सम्बन्धस्वरूपा । युक्तञ्चैतत्कथमन्यथा ज्ञानकर्मत्वं घटादेः क्रियाजन्यफलशालित्वाभावादित्याहुस्तन्न । विनष्टे घटे ज्ञात इति प्रतीतेः । न हि तत्र ज्ञानं किञ्चिज्जनयितुं शक्नोति तस्ये-

वासत्वात् । न च समवायिकारणं विना भावकार्योत्पत्तिः संभवति । तत्र स्वरूपसम्बन्धविशेष एव प्रतीतेर्विषय इति चेदन्यत्रापि स एवास्तु कृतमधिकेन कर्मविभक्तेरपि तद्वदेवोपपत्तेरिति संक्षेपः । अन्ये तु भासमानवैशिष्ट्यप्रतियोगित्वं प्रकारत्वं अयं घट इत्यत्र हि घटत्वस्य वैशिष्ट्यं भासते तत्प्रतियोगि घटत्वमित्याहुः ।

ज्ञानमात्रस्यातीन्द्रियत्वादतीन्द्रियेण ज्ञानेन विषये घटादौ ज्ञातता जन्यते । तथा च ज्ञानमनुमीयत इत्याद्यभिप्रायवतां नामपूर्वकं मतमाह भट्टास्त्विति । ज्ञाततायां मानमाह ज्ञात इति । अन्यथा, ज्ञाततायाः अनङ्गीकारे, । ज्ञानकर्मत्वं, घटमहं जानामि ज्ञातो घट इत्यादि ज्ञानकर्मत्वम्, । कथन्तायां हेतुमाह क्रियेति । धात्वर्थः क्रिया तथा च ज्ञाततायाः ज्ञानजन्यत्वाभावे ज्ञानरूपक्रियाजन्यफलस्य घटादावसत्वादित्यर्थः । तस्येव, घटस्येव, । ननु विनापि घटं ज्ञातताजनने किं बाधकमत आह न चेति । भावकार्यस्य समवायिकारणकत्वनियमादित्यर्थः । ध्वंसरूपकार्यस्य समवायिकारणकत्वाभावाद्भावेत्युक्तम् । तत्र, नष्टघटस्थले, प्रतीतेः, ज्ञातो घट इति प्रतीतेः, । अन्यत्रापि, वर्त्तमानघटादिस्थलेऽपि, । स एव स्वरूपसम्बन्ध एव । कृतमिति । तथा चातिरिक्तज्ञाततायां मानाभावादिति भावः । ननु तर्हि घटमहं जानामीति ज्ञानकर्मत्वं घटस्य कथं भविष्यतीत्यत आह कर्मविभक्तेरपीति । तद्वदेव, ज्ञातो घट इति प्रतीतिवदेव, । तथा च यथा ज्ञातो घट इति प्रतीतिविषयः स्वरूपसम्बन्धविशेषस्तथा द्वितीयार्थोऽपीत्यर्थः । एवं च स्वरूपसम्बन्धरूपविषयत्वं द्वितीयार्थ इति । घटं जानामीत्यत्र घटविषयकज्ञानवानिति बोधः । इयान् परं भेदः स्वरूपसम्बन्धे ज्ञातो घट इति प्रतीतिविषयत्वं शक्त्या, द्वितीयार्थत्वं लक्षणयेति । न चैवं द्वितीयार्थस्वरूपसम्बन्धे ज्ञातो

Digitized by Google

घट इति प्रतीतिविषयत्वं लक्षणया शक्त्या तु ज्ञाततायामिति ज्ञाततासिद्धिर्दुर्वारेति वाच्यम् । स्वरूपसम्बन्धेनैवोपपत्तावतिरिक्तज्ञाततायां मानाभावात् । न च शक्त्या द्वितीयार्थोऽपि स्वरूपसम्बन्ध एवास्त्विति वाच्यम् कर्मणि द्वितीयेति सूत्रानुरोधात्कर्मत्व एव शक्तेः कल्पनात् । ननु सुविभक्तौ न लक्षणा अन्यथा व्यत्ययानुशासनवैयर्थ्यात् । तथा च द्वितीयायाः कथं स्वरूपसम्बन्धे लक्षणेति चेन्न । सुविभक्तौ न लक्षणेत्यस्य विभक्तिनिरूपिता विभक्त्यर्थे न लक्षणेत्यादिरूपः संक्षेपार्थो बोध्य इति । अन्ये त्विति । अत्र प्रतियोगित्वं निरूपकत्वम् । एवं भासमानवैशिष्ट्यानुयोगित्वं विशेष्यत्वमित्यपि बोध्यं विशिष्टज्ञाने प्रतियोगित्वमनुयोगित्वं च समूहालम्बनादधिकं भासत इति तयोर्वैलक्षण्यमिति ।

तन्न दण्डपुरुषसंयोगा इति समूहालम्बने दण्डीपुरुष इति वद्दण्डस्य प्रकारतापत्तेः संयोगो हि दण्डस्य वैशिष्ट्यं भासते तत्प्रतियोगी च दण्ड इति दिक् । तच्च प्रत्यक्षमिन्द्रियात्मकं द्वेधा द्रव्यग्राहकं तदग्राहकं च । द्रव्यग्राहकाणि चक्षुस्त्वङ्मनांसि । अन्यद् घ्राणं रसनं श्रवणञ्च । ननु मनसो द्रव्यग्राहकत्वेऽन्धस्यापि विप्रकृष्टघटोपलब्ध्यापत्तिः ।

तन्मतं दूषयति तन्नेति दण्डपुरुषसंयोगा इति समूहालम्बने एते त्रय एव बुध्यन्ते दण्डीपुरुष इत्यत्रापि त एवेति समूहालम्बनविशिष्टज्ञानयोर्भेदो न स्यादिति भावः । तदेवाह संयोग इति । दिगिति । ननु दण्डीपुरुष इत्यत्र प्रतियोगित्वमनुयोगित्वं चातिरिक्तं बुध्यते दण्डपुरुषसंयोगा इत्यत्र तु त्रय एव बुध्यन्त इति कुतो न वैलक्षण्यमिति चेन्न । दण्डपुरुषसंयोगप्रतियोगित्वानुयोगित्वानीति समूहालम्बनस्य दण्डीपुरुष इति विशिष्टज्ञानस्य च भेदो न स्यात् । न च तत्र प्रतियोगित्वानुयोगित्वयोरपि सम्बन्धो बुध्यत इति वाच्यम् विषयानवस्थापत्तेरिति । अत्र

विषयताविशेषरूपप्रकारता ऽपि दण्ड कुतो नेति चेन्न । समूहालम्बनविषयीभूतस्य दण्डस्यास्मदभिमतविलक्षणप्रकारताया अभावात् तथा हि समूहालम्बने सर्वे स्वातन्त्र्येण भासन्ते न तु तत्र दण्डादेः प्रकारतया संयोगादेः संबन्धतया पुरुषादेर्विशेष्यतया भानं । दण्डीपुरुष इत्यत्र तु दण्डस्य प्रकारतया संयोगस्य संसर्गतया पुरुषस्य विशेष्यतया भानमिति । दण्डादौ प्रकारताख्यविषयतायाः संयोगादौ सांसर्गिकविषयतायाः पुरुषादौ विशेष्यताख्यविषयतायाश्च सत्वात्तयोर्भेद इति । अथ फलात्मकं प्रत्यक्षमुक्त्वा करणात्मकं प्रत्यक्षमाह तच्चेति । तच्च साक्षात्कारिप्रमाकरणं च । इन्द्रियत्वं चेन्द्रियमिति परिभाषाविशेषविशेषयत्वम् । घ्राणादिषट्कान्यतमत्वं वा । साक्षात्कारत्वव्याप्यजातिमत्कार्यनिरूपितकार्यताप्रतियोगिककारणतावत्त्वे सति द्रव्यत्वव्याप्यवत्त्वं वा । स्मृतिस्वरूपायोग्यत्वे सति ज्ञानजनकमनःसंयोगाश्रयत्वं वेति । भवति च साक्षात्कारत्वव्याप्या जातिश्चाक्षुषत्वादीत्येवं लक्षणसमन्वयः । द्रव्यत्वपदमात्ममनःसंयोगवारणाय मात्रपदं शरीरादिवारणाय । एवमन्तिमे ज्ञानजनकात्ममनःसंयोगश्चक्षुरादिमनःसंयोग इत्येवं लक्षणसमन्वयः । आत्मन्यतिव्याप्तिवारणाय स्मृतिस्वरूपायोग्यत्वे सतीति । चक्षुस्त्वङ्मनांसि चक्षुस्त्वङ्मनांस्येवेत्यर्थः । अन्यद् द्रव्याग्राहकम् । दूरस्थितघटस्यापि चक्षुषा ग्रहणादन्यस्येत्युक्तम् । अन्येनापि सन्निहितस्य त्वचा ग्रहणाद्दूरेत्युक्तम् । व्यवहितत्वाभावस्यापनाय परिस्फुटेत्युक्तम् । परिस्फुटत्वमव्यवहितत्वम् ।

न च तदात्ममात्रग्राह्यं सर्वविषयत्वसिद्धान्तव्याघातात् उच्यते मनः सर्वविषयकमपि बहिर्विषयज्ञानजनने परतन्त्रं । परं चक्षुरादि उपस्थितियोगजधर्मः सामान्यलक्षणा च । न पुनश्चक्षुरादिमात्रस्मृतपदार्थानां मनसा संसर्गग्रहात् कथमन्यथा कविकाव्यादि योगिनां योगजधर्मप्रत्यासत्त्या मनसा सर्वसाक्षात्काराश्च ।

नन्विन्द्रियस्य मनस आत्ममात्रग्राहकत्वमित्यत आह नचेति । तत्, मनः, । सर्वेति । सर्वेतरविषयकज्ञानजनकमपि परतन्त्रं, परव्यापारकं, । परं किमत आह । परमिति । आदिना त्वगादिपरिग्रहः । उपस्थितिः, ज्ञानम्, । तथा च चक्षुरादिज्ञानलक्षणा योगजधर्मलक्षणा सामान्यलक्षणा च एतद्द्वारा मनो ज्ञानमात्रजनकमित्यर्थः । ननु ज्ञानलक्षणा किमर्थं स्वीकर्तव्येत्यत आह न पुनरिति । मात्रमित्यनन्तरं परमित्यनुषज्यते । स्मृतपदार्थानामिति । अयमर्थः सुरभिचन्दनमित्यादिचाक्षुषे मृतेऽपि स्थितं सौरभं भासते तच्च न ज्ञानलक्षणां विना सौरभेण सह चक्षुषः सन्निकर्षाभावात् । ननु सौरभत्वसामान्यलक्षणयैव निर्वाहे कृतं ज्ञानलक्षणयेति चेत् । तथापि सौरभत्वज्ञानस्य विना ज्ञानलक्षणामनिर्वाहात् । किञ्च यत्र शुक्तौ रजतत्वज्ञानानन्तरं रजतमहं जानामीत्यनुव्यवसायस्तत्र रजतत्वभानार्थं ज्ञानलक्षणा स्वीकार्यैवेति । एवं रजतत्वेन शुक्तिज्ञानानन्तरमनुव्यवसाये शुक्तिभानं ज्ञानलक्षणयैव । तत्र शुक्तित्वरूपसामान्यलक्षणाभावात् । मानसे ज्ञानलक्षणादिचयं मनस एव प्रत्यासत्तिः न तु चक्षुरादेः तेषां नानात्वेन प्रतीन्द्रियं न प्रत्यासत्तित्वं कल्पते गौरवादिति ध्येयम् । कवीति । कवेः काव्यमित्यर्थः । तथा च काव्यकारैर्हेतुपरम्परातस्तत्तत्पदार्था ज्ञायन्ते ततस्तेऽनुव्यवसाये भासन्ते ततस्तेषां काव्यप्रत्ययानन्तरमन्येषामपि तत्पदार्थज्ञानमिति तच्च न ज्ञानलक्षणां विनेत्यर्थः । योगिनां, युक्तयुञ्जानभेदेन द्विविधयोगिनाम्, । योगजधर्मप्रत्यासत्त्या, द्विविधयोगजधर्मप्रत्यासत्त्या, । तथा चायमर्थो युक्तयोगिनः परमाण्वादयो निखिलाः सर्वदा बुध्यन्ते तत्र योगजधर्म एव सन्निकर्षः । युञ्जानयोगिना तु परमाण्वादयश्चिन्तासहकृतयोगजधर्मेण बुध्यन्त इति । योगजधर्मश्च बहिर्विषयात्मनो निवृत्तिरूपप्रणिधानविशेषः । सोऽपश्यत्प्रणिधानेनेति कालिदासोक्तम् । मिथिलास्थः स योगीन्द्रः क्षणं ध्यात्वा ब्रवीन्मुनि इति याज्ञवल्क्योक्तं सङ्गच्छते । योगजधर्मसहकारेणापि चक्षुषा चक्षुर्योग्यं गृह्यते न तदयोग्यमपि न खलु योगिनापि रूपं श्रोत्रेण गृह्यते । तदुक्तम् । न रूपे श्रोत्रवृत्तितेति । विप्रकृष्टं व्यवहितं च महत्त्वादिकमन्तरेणापि गृह्यते ।

Digitized by Google

तदुक्तम् । विप्रकृष्टं व्यवहितं च सम्यक् पश्यन्ति योगिन इति पश्यामि योजनशतादिति च ॥

प्रमेयत्वसामान्यलक्षणप्रत्यासत्त्या मनसा सर्वग्रहाच्च । कृतद्धि मनःस्वतन्त्रम् अबाह्यवस्तुनि । कान्यबाह्यानि आत्मा तद्योग्यगुणास्तदभावस्तद्वृत्तिर्जातिश्च । के तद्योग्यगुणाः सविकल्पकज्ञानेच्छाप्रयत्नसुखदुःखद्वेषास्तदेकत्वपरिमाणे च । तदेकत्वपरिमाणे न योग्य इति टीकाकृतः । नन्वित्थम्परात्मा परेण गृह्येत तद्गुणाश्च न परात्मतद्गुणानामयोग्यत्वात्स्यादेतत् चक्षुर्यदि द्रव्यग्राहकं तदा परमाण्वादयोऽपि गृह्येरन्निति चेन्न तेषां चक्षुरयोग्यत्वात् किन्तावच्चक्षुषो योग्यं महदुद्भूतरूपवद्द्रव्यं परमाणुश्च न महान् आत्मादयश्च न रूपवन्तः पिशाचादयश्च नोद्भूतरूपवन्तः तद्रूपस्यानुद्भूतत्वात् ।

सामान्यलक्षणायां युक्तिमाह । प्रमेयत्वेति । सन्निकर्षान्तरेण प्रत्यक्षत्वाभावादुक्तत्वेन निखिलवन्हेर्धूमत्वेन सकलधूमस्य ज्ञानाय सामान्यलक्षणा स्वीकर्तव्यैवेति । न चैवं सार्वज्ञापत्तिः प्रमेयत्वेन सर्वप्रमेयज्ञानादिति वाच्यम् । प्रमेयत्वेन रूपेण सर्वज्ञत्वे [illegible] रूपेण सकलपदार्थानां ज्ञानाभावेन तेन तेन रूपेण सार्वज्ञ्याभावात् । विशेषयिष्यते चान्यदुपरिष्टात् । तर्हि सर्वविषयकधीजनने परतन्त्रत्वम् । तद्योग्यगुणाः, । आत्मयोग्यगुणाः, । अदृष्टादिवारणाय योग्येत्युक्तम् । तदभावः, आत्मयोग्यगुणानामभावः, । तद्वृत्तिः, । आत्मवृत्तिः, तद्गुणवृत्तिश्च, सविकल्पकेति निर्विकल्पकस्यातीन्द्रियत्वेनायोग्यत्वा-

Digitized by Google

दिति भावः । तदेकत्वपरिमाणे. आत्मैकत्वपरिमाणे, टीकाकृत इत्यस्वारसबीजं अहमेकोऽहं महानिति प्रतीतिर्विरोध इति । आत्मनो विभुत्वेन विभूतानां सर्वमूर्तसंयोगित्वेन स्वमनसोऽपि परात्मसंयुक्तत्वा-त्परात्मप्रत्यक्षं स्यादित्यभिप्रायवानाह नन्विति । इत्थम्, आत्मादीनां मनोयोग्यत्वे, । तद्गुणाश्च । परात्मगुणानामिति । आत्मा च गुणाश्चे-त्यात्मगुणाः तथा च परात्मा परात्मगुणाश्च परस्यायोग्या इत्यर्थः । तेषां, परमाण्वादीना,म् । चक्षुरयोग्यत्वादिति । तथा च चाक्षुषत्वावच्छिन्नं प्रति चक्षुर्योग्यत्वेन कारणतेत्यर्थः । चक्षुर्योग्यं द्रव्यं दर्शयति महदिति । तथा च द्रव्यचाक्षुषे महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वमेव योग्यतेत्यर्थः । महत्पदकृत्यं दर्शयति । परमाणुरिति । रूपपदकृत्यं दर्शयति आत्मादय इति । उद्भूतपदकृत्यं दर्शयति पिशाचादय इति तद्रूपस्य, पिशाचरूपस्य, उद्भूतत्वं किमत आह उद्भूतत्वमिति । अथोद्भूतत्वं न जातिः । शुक्ल-त्वादिना सङ्करप्रसङ्गात् । तथा हि शुक्लत्वं विहायोद्भूतत्वमुद्भूतस्पर्शादौ । उद्भूतत्वं विहाय शुक्लत्वमनुद्भूतशुक्लरूपे । उद्भूतशुक्लरूपे चोभयमपि । न च नानैव शुक्लत्वादिव्याप्यमुद्भूतत्वमिति वाच्यम् । चाक्षुषत्वावच्छिन्नं प्रत्यु-द्भूतरूपत्वेन कारणत्वे तादृशरूपत्वस्यैव कारणतावच्छेदकत्वादनन्त-कार्यकारणभावप्रसङ्गाच्च ।

उद्भूतत्वं च जातिविशेष इत्येके । अनुद्भूतत्वरू-पजात्यभाव इत्यपरे । योग्यगुणाः योग्यद्रव्यरूपन्त-न्मात्रवृत्तिसंख्यापरिमाणपृथक्त्वस्नेहसंयोगविभागप-रत्वापरत्वद्रवत्ववेगाः । मात्रपदं घटाकाशादिसं-योगवारणाय कर्म्म च योग्यद्रव्यसमवेतं । जातिस्तु यो-ग्यवस्तुगता द्रव्यत्वरूपादिःसमवायश्च । त्वचो मह-दुद्भूतरूपस्पर्शवद्योग्यन्द्रव्यम् तेन परमाणुवायुप्रदी-पप्रभादयस्त्वचा न गृह्यन्ते परमाणोरमहत्वात् वायो-

शीरूपत्वात् प्रभाया उद्भूतस्पर्शाभावात् गुणाश्च रूपातिरिक्तचक्षुर्योग्यमहदुद्भूतस्पर्शवन्मात्रवृत्तयो महदुद्भूतस्पर्शश्च । अत एव वायुपरिमाणादयस्त्वचा न गृह्यन्ते चक्षुरयोग्यत्वात् न वा प्रदीपप्रभापरिमाणादय उद्भूतस्पर्शवन्मात्रावृत्तित्वात् न वा घटप्रभासंयोगादय उद्भूतस्पर्शवन्मात्रावृत्तित्वात् तत्र ह्यनुद्भूतस्पर्शादयो वर्तन्ते । कर्म्म च योग्यद्रव्यसमवेतम् सामान्यं च योग्यवस्तुसमवेतम् समवायश्च ।

उद्भूतत्वस्य जातित्वे तु तदपि कारणतावच्छेदकं तथा च रूपत्वविशिष्टोद्भूतत्वेनोद्भूतत्वविशिष्टरूपत्वेन वा कारणत्वमित्यभिप्रायवतां नवीनानामतमाह । अनुद्भूतत्वेति नन्वद्भूतत्वस्य जातित्वेऽपि तथैव सङ्कर इतिचेन्न शुक्लत्वविव्याप्यनानैवानुद्भूतत्वस्वीकारेर्णातिविरहात्तेन रूपेण कारणत्वाभावात् । चक्षुर्योग्यगुणानाह योग्यगुणा इति । योग्येति परमाणुरूपवारणाय । तन्मात्रवृत्ति, योग्यद्रव्यमात्रवृत्ति, । कर्म चेति । तथा च योग्यद्रव्यसमवेतं कर्म चक्षुर्योग्यमित्यर्थः । जातिश्चेति । वस्तुपदङ्गुणकर्मगतजातिलाभाय । तथा च योग्यद्रव्यसमवेतजातिषु महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वं स्वाश्रयसमवायसम्बन्धेन योग्यगुणकर्मसमवेतजातिषु तु स्वाश्रयसमवेतसमवायेन । समवायश्चेति । द्रव्यवृत्तित्वावच्छेदेन समवाये स्वाश्रयसम्बन्धित्वेन द्रव्यसमवेतवृत्तित्वावच्छेदेन समवाये स्वाश्रयसमवेतसम्बन्धित्वेन तादृशयोग्यत्वस्य सत्त्वादिति भावः । अथ प्राचां मते त्वगिन्द्रिययोग्यद्रव्यमाह त्वच इति । तथा च त्वाचप्रत्यक्षत्वावच्छिन्नं प्रति महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वे सति स्पर्शवत्त्वरूपयोग्यत्वं तन्त्रमित्यर्थः । त्वगिन्द्रिययोग्यगुणानाह योग्यगुणाश्चेति । रूपवारणाय रूपातिरिक्तेति । अथ रूपातिरिक्तचक्षुषो योग्यस्य

प्रभाविमाणाद्देस्त्वचो योग्यत्वं, स्यादित्यत आह उद्भूतस्पर्शवत्त्वाव- च्छिन्नत्वय इति । नन्वेवं रूपातिरिक्तचक्षुर्योग्यत्वसति महदुद्भूतस्पर्शवत्त्वाव- च्छिन्नमेव त्वचो योग्यत्वमिति फलितम् तच्च महदुद्भूतस्पर्शि न सम्भवति तस्य चक्षुर्योग्यत्वाभावाद् अत आह महदुद्भूतस्पर्शश्चेति । महत्त्वस- मानाधिकरणोद्भूतस्पर्शश्चेत्यर्थः । परमाणुस्पर्शवारणाय महदिति । प्रभास्पर्शवारणायोद्भूतेति । अत एव, चक्षुर्योग्यरूपवत्त्वादेव, । त्वचो योग्यकर्म किमत आह कर्म चेति । तथा च कर्मणि त्वचो योग्यत्वं महत्त्वसमानाधिकरणोद्भूतस्पर्शवत्समवेतत्वं त्वचो योग्यं द्रव्यगुणकर्म- साधारणं सामान्यमाह सामान्यं चेति । योग्यवस्तुसमवेतं, योग्यद्रव्यगुण- कर्मसमवेतं, योग्यत्वं विभु यथोक्तमेव । अत्र रूपत्वभिन्नत्वमपि देयम् । तथा च रूपत्वभिन्नद्रव्यगुणकर्मसमवेतं सामान्यं त्वचो योग्यमित्यर्थः । समवायश्च योग्यद्रव्यगुणकर्मसमवायस्त्वचो योग्य इत्यर्थः ॥

मीमांसकास्तु महदुद्भूतस्पर्शवद्द्रव्यत्वेनैव त्वचो- योग्यता लाघवात् न तु महदुद्भूतरूपमपि तत्र प्रयो- जकं गौरवात् । अतो वायोरपि स्पार्शनप्रत्यक्षम् । न च बहिरिन्द्रियजन्यद्रव्यसाक्षात्कारत्वावच्छेदेनो- द्भूतरूपस्य हेतुत्वाद्वायौ च तदभावान्नैवमिति वा- च्यम् । लाघवाद्द्रव्यचाक्षुषत्वावच्छेदेन तस्य हेतु- त्वादित्याहुः ।

ननु महदुद्भूतरूपस्पर्शवद्द्रव्यत्वेन न त्वचो योग्यत्वं किन्तु महदुद्भू- तस्पर्शवत्त्वेन । तथा च वायोरपि प्रत्यक्षं भवत्येवेति नवीनपक्षपातिनां मीमांसकानां मतमाह मीमांसकास्त्विति । तत्र त्वाचप्रत्यक्षे, गौरवात् महदुद्भूतरूपवत्त्वे गौरवात् । ननु द्रव्यचाक्षुषत्वावच्छिन्नं प्रति महदुद्- भूतरूपस्य कारणत्वमवश्यं वाच्यमन्यथाऽऽत्मपवनपिशाचादेश्चाक्षुषत्वाप-

त्तिः । तथा च लाघवात्तादृशरूपस्य बहिरिन्द्रियद्रव्यलौकिकप्रत्यक्षत्वमेव
कार्यतावच्छेदकमस्त्वित्याशयवानाह न चेति । तदभावात्, तादृशरूपा-
भावात्, । नैवं, न वायोः स्पार्शनप्रत्यक्षं, लाघवादिति । द्रव्यचाक्षुषत्वस्य
बहिरिन्द्रियजन्यद्रव्यलौकिकप्रत्यक्षत्वापेक्षया लघुत्वादित्यर्थः । तादृशरू-
पस्य बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वे कार्यतावच्छेदकत्वमुताऽऽत्मेतरद्रव्यप्र-
त्यक्षत्वे वेति विनिगमनाविरहश्चेति बोध्यम् । तद्धेतुत्वात्, महदुद्भूत-
रूपस्य हेतुत्वात्, । इत्थं चेदं प्रतिभाति यद्यपि द्रव्यचाक्षुषत्वावच्छिन्नम्प्रति
महदुद्भूतरूपवत्त्वेन द्रव्यस्पार्शनत्वावच्छिन्नं प्रति च महदुद्भूतस्पर्शवत्त्वेन
हेतुत्वमिति पर्यवसितम् । तथाऽपि बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वाव-
च्छिन्नम्प्रति किं नियामकम् । न तावन्महदुद्भूतस्पर्शवत्त्वं प्रभायास्तादृ-
शप्रत्यक्षं न स्यात् । न चेष्टापत्तिः प्रभायास्तेजसो रूपत्वात् प्रभां पश्या-
मीति प्रतीतेश्च । नचेयं प्रतीती रूपं पश्यामीतिवद्द्रव्यत्वाभावेऽप्युपपद्यत इति
वाच्यम् प्रभा चलति प्रभा शुक्लेति प्रतीतेः । नचेयं भ्रान्तिः बाधकं विना
भ्रमत्वायोगात् । नापि महदुद्भूतरूपवत्त्वं । वायोरूपाभावेन स्पार्शनं न
स्यात् । न भवत्येवेति चेत् । शरीरपवनसंयोगानन्तरं शीतो वायुरनुष्णो वायु-
रिति स्पार्शनप्रत्यक्षानुपपत्तिः । नचेयं स्पर्शमात्रगोचरेति वाच्यम् । वायु-
विशेष्यकत्वानापत्तेः वायुं स्पृशामीत्यनुव्यवसायानुपपत्तेश्च । किं च तादृ-
शस्पर्शस्यैव बहिर्द्रव्यप्रत्यक्षम्प्रति कारणत्वमुच्यताम् । प्रभायाः प्रत्यक्षत्वा-
भावे इष्टापत्तेः । अथ प्रभां पश्यामीति प्रतीतिरनुपपन्नेति चेत्तर्हि वायुं स्पृ-
शामीति प्रतीतावपि दीयतां दृष्टिरिति तस्माद्बहिरिन्द्रियजन्यद्रव्यप्रत्यक्ष-
त्वावच्छिन्नम्प्रति न तादृशरूपस्य न वा तादृशस्पर्शस्य न पुनस्तदुभयो-
र्नियामकत्वं किन्तु विभुवृत्तिभिन्नविशेषगुणवत्त्वस्य नियामकत्वं । एवं
च महदुद्भूतस्पर्शवत्त्वस्य त्वग्योग्यत्वेन महदुद्भूतरूपवत्त्वस्य चक्षुर्योग्य-
त्वेन च पवनप्रभयोः प्रत्यक्षत्वे न काप्यनुपपत्तिः पवने तादृशस्पर्शा-
त्मकतादृशविशेषगुणवत्त्वस्य प्रभायां तादृशरूपस्य तादृशविशेषगुणस्य
सत्त्वादिति । एवं च पवनप्रभादिवृत्तसंख्यापरिमाणादेः क्रियाया जातेश्च
प्रत्यक्षत्वं भवत्येवेति दिक् ॥

वैशेषिकास्तु समवायो न प्रत्यक्षः सम्बन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वात् कथमन्यथा घटाकाशसंयोगो न प्रत्यक्षः। न च समवायस्य सर्वे आश्रयाः प्रत्यक्षाः परमाण्वादेरयोग्यत्वादित्याहुस्तन्न। तथा हेतुतायां मानाभावात्। न च घटाकाशसंयोगस्य प्रत्यक्षतापत्तिः योग्यमात्रसमवेतगुणस्यैव योग्यत्वात्।

ननु व्यासज्यवृत्तिप्रत्यक्षे समानेन्द्रियजयावदाश्रयप्रत्यक्षस्य हेतुत्वमिति निखिलवादिसिद्धम्। तथा च समवायस्य कथं प्रत्यक्षमित्यभिप्रायवतां वैशेषिकाणां मतं दूषयितुमाह वैशेषिकास्त्विति। सम्बन्धेति। सम्बन्धस्य व्यासज्यवृत्तित्वादिति भावः। अन्यथा, सम्बन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वाभावे,। घटाकाशेति। स्वाश्रयसमवायसंबन्धेन गगनमादायापि महत्त्वस्य घटमादायैव रूपवत्त्वस्य सत्त्वादिति भावः। अथ समवायप्रत्यक्षे बाधकमाह न चेति। तथाहेतुतायां, सम्बन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षहेतुतायाम्,। योग्यमात्रेति। तथा च घटाकाशसंयोगस्य योग्यमात्रसमवेतत्वाभावादित्यर्थः।

किं च लाघवात्संयोगप्रत्यक्षत्वावच्छेदेन यावदाश्रयप्रत्यक्षस्य हेतुता युज्यते न तु सम्बन्धप्रत्यक्षत्वावच्छेदेन सम्बन्धत्वं हि संयोगसमवायान्यतरत्वमिति गौरवात्।

ननु तर्हि यावदाश्रयप्रत्यक्षस्य कुत्र हेतुत्वमत आह किं चेति। लाघवात्कार्यतावच्छेदके लाघवात्। प्रस्तुतगौरवमाह सम्बन्धत्वमिति। अत्रेदं विचार्यते। व्यासज्यवृत्तिधर्मप्रत्यक्षे समानेन्द्रियजयावदाश्रयप्रत्यक्षस्य केन रूपेण कार्यकारणभावः। न च व्यासज्यवृत्तिधर्मप्रत्यक्षत्वेन प्रत्य-

द्राश्रयलौकिकप्रत्यक्षत्वेनेति वाच्यम् । जातिचाक्षुषे व्यभिचारात् । नापि द्विष्ठगुणचाक्षुषत्वेन द्विष्ठतद्गुणाश्रयविषयकचाक्षुषत्वेनेति तत्तदाश्रयभेदेनासङ्ख्यकार्यकारणभावप्रसङ्गात् । नापि तत्तद्द्वित्वादिचाक्षुषत्वेन तत्तद्द्वित्वाश्रयचाक्षुषत्वेनेति तत्तद्द्वित्वाश्रयभेदादनन्तकार्यकारणभावप्रसङ्गादिति । अत्रोच्यते । व्यासज्यवृत्तिगुणप्रत्यक्षत्वेन समानेन्द्रियजयावदाश्रयलौकिकप्रत्यक्षत्वेन हेतुहेतुमद्भावः । एवं जातिप्रत्यक्षे समवायप्रत्यक्षे च न व्यभिचारः । जातिसमवायप्रत्यक्षस्य कार्यतावच्छेदकानाक्रान्तत्वात् । अपरे तु व्यासज्यवृत्तिधर्मप्रत्यक्षत्वेन यावदाश्रयप्रत्यक्षत्वेन न कार्यकारणभावोऽपि तु गुणचाक्षुषत्वावच्छिन्नं प्रतिस्वाश्रयसमवेतत्वसंबन्धेन रूपाभावो महत्त्वाभावश्च प्रतिबन्धको नातो घटाकाशसंयोगस्य प्रत्यक्षतापत्तिः । त्रसरेणुचाक्षुषे व्यभिचारवारणाय गुणेत्यपि वदन्ति । तत्र चैत्रमैत्रोभयसन्निकर्षे सत्यपि दोषाद्यत्र न तदुभयप्रत्यक्षं तन्निष्ठद्वित्वसंयोगादेः प्रत्यक्षतापत्तौ गतिश्चिन्तनीयेति संक्षेपः । अथ व्यासज्यवृत्तिधर्मप्रत्यक्षे यावदाश्रयसन्निकर्षोऽप्यावश्यकः । अन्यथा यत्र घटपटोभयसन्निकर्षो नष्टस्तद्वितीयक्षणे एकाश्रयमात्रसन्निकर्षे सत्यपि तन्निष्ठद्वित्वसंयोगादेः प्रत्यक्षतापत्तिः । तस्य व्यासज्यवृत्तिधर्मचाक्षुषादिप्रत्यक्षत्वेन यावदाश्रयचक्षुःसंयोगत्वेन तत्र द्वित्वादिचाक्षुषत्वेन यावत्तद्द्वित्वाश्रयनिष्ठचक्षुःसंयोगत्वेन वा न कार्यकारणभावः जातिप्रत्यक्षे व्यभिचारात् । द्वितीयकल्पे यदि यावत्त्वं चक्षुःसंयोगविशेषणं तदा तादृशयावच्चक्षुःसंयोगस्य कुत्राप्यसम्भवात् । यदि द्वित्वाद्याश्रयविशेषणं तथापि यावद्द्वित्वाद्याश्रयवृत्तिचक्षुःसंयोगस्याप्रसिद्धिरिति चेत् । उच्यते गुणचाक्षुषत्वावच्छिन्नं प्रतिसमवायसम्बन्धावच्छिन्नप्रतियोगिताकचक्षुःसंयोगविशिष्टद्रव्यत्वसामान्याभावः प्रतिबन्धकः । तेन द्वित्वैकाश्रयमात्रसन्निकर्षदशायां द्वित्वादेर्न प्रत्यक्षम् । एकाश्रयमात्रचक्षुःसंयोगसत्त्वेऽप्यपराश्रयचक्षुःसंयोगाभावसत्त्वे च विशिष्टद्रव्यत्वाभावस्य सत्त्वाद्द्वित्वसंयोगादेः प्रत्यक्षतापत्तिः ॥ यत्रोभयचक्षुःसंयोगस्तत्र संयोगस्याव्याप्यवृत्तित्वेऽपि तद्विशिष्टद्रव्यत्वस्य व्याप्यवृत्तित्वाच्च द्वित्वसंयोगादेः प्रत्यक्षानुपपत्तिः ।

घ्राणयोग्यो महत्त्वसमानाधिकरणोद्भूतो गन्धस्तद्गतं सामान्यं तयोस्समवायश्च । अत एव न परमाणुगन्धो गृह्यते महत्त्वासमानाधिकरणत्वात् न वा घ्राणमणिवज्रादिगन्धोऽनुद्भूतत्वात् ।

घ्राणेन्द्रियस्य द्रव्यग्राहकत्वायोग्यत्वादनुवृत्तिजातिसमवायानां योग्यत्वमाह घ्राणेति तथा चात्र महदुद्भूतगन्धवत्त्वमेव योग्यत्वं तादृशगन्धसमवेतत्वं च जातौ तदुभयसम्बन्धत्वं च समवाय इति । तद्गतं, गन्धगतं, । तयोः, गन्धगन्धत्वयोः, । अत एव, महत्त्वसमानाधिकरणेति विशेषणादेव, । वज्रादिगन्धः घ्राणायोग्य इत्यनुषज्यते । आदिनोपलादिसंग्रहः । अनुद्भूतत्वादिति । ननु वज्रादावनुद्भूतगन्धे किं मानमिति चेत् । वज्रभस्मनि गन्धोपलब्ध्यैव वज्रे गन्धसिद्धिस्तथा हि । यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तद्द्रव्यं तदुपादानोपादेयमिति व्याप्तिरिति । वज्रध्वंसजन्ये भस्मनि गन्धोपलब्ध्या वज्रेऽपि गन्धसिद्धिः । अत्र मणिमयद्रव्यध्वंसजन्येदाहे मण्युपादानोपादेयत्वाभावात्प्रथमं द्रव्यपदं कामिनीचरणाघातेनाशोकपुष्पोद्गम इति काव्यादौ प्रसिद्धं तथा च पुष्पकुड्मलादौ कामिनीचरणाभिघातध्वंसजन्यत्वात्तत्र व्यभिचारवारणाय द्वितीयं द्रव्यपदं । यद्वा हरिवंशश्रवणजन्यपुत्रप्रतिबन्धकीभूतादृष्टध्वंसजन्ये पुत्ररूपद्रव्ये व्यभिचारवारणाय द्वितीयं द्रव्यपदम् ।

रसनायोग्यो महत्त्वसमानाधिकरणोद्भूतो रसः तद्गतं सामान्यं तयोस्समवायश्च तेन परमाणुरसो न गृह्यते । महत्त्वासमानाधिकरणत्वात् । न वा मण्यादिरसोऽनुद्भूतत्वात् । श्रवणयोग्यः शब्दस्तद्गता जातिस्तयोस्समवायश्चेति संक्षेपः ।

रसनेन्द्रियस्य द्रव्यग्राहकत्वायोग्यत्वात् रसस्य तद्वृत्तिजातिसमवायानां योग्यत्वमाह रसन इति । तथा च महत्त्वसमानाधिकरणोद्भूतरसत्व-

न क्त्वा सेट् । १ । २ । १८ ॥

सेट् क्त्वा किन्न स्यात् ॥ शयित्वा । सेट् किम् । कृत्वा । क्त्वा किम् । निगृहीतिः ॥

निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः । १ । २ । १९ ॥

एभ्यः सेण्निष्ठा किन्न स्यात् ॥ शयितः । शयितवान् । अनुबन्धनिर्देशो यङ्लुङ्निवृत्त्यर्थः । शेश्यितः । शेश्यितवान् । प्रस्वेदितः । प्रस्वेदितवान् । ञिष्विदेति भ्वादिरेव गृह्यते । ञीद्भिः साहचर्यात् । स्विद्यतेस्तु स्विदित इत्येव । ञिमिदा । ञिक्ष्विदा । दिवादी भ्वादी च । प्रमेदितः । प्रमेदितवान् । प्रक्ष्वेदितः । प्रक्ष्वेदितवान् । प्रधर्षितः । प्रधर्षितवान् । सेट् किम् । स्विन्नः । स्विन्नवान् । आदितश्चेति नेट् । विभाषा भावादिकर्मणोरिति पक्षे यो ऽभ्यनुज्ञायते स कित्त्वनिषेधस्य विषयः ॥

मृषस्तितिक्षायाम् । १ । २ । २० ॥

सेण्निष्ठा किन्न स्यात् ॥ मर्षितः । मर्षितवान् । क्षमायां किम् । अपमृषितं वाक्यम् । अविस्पष्टमित्यर्थः ॥

उदुपधाद्भावादिकर्मणोरन्यतरस्याम् । १ । २ । २१ ॥

उदुपधात्परा भावादिकर्मणोः सेण्निष्ठा वा किन्न स्यात् ॥ द्युतितम् । द्योतितम् । मुदितम् । मोदितं साधुना । प्रद्युतितः । प्रद्योतितः । प्रमुदितः । प्रमोदितः साधुः । उदुपधात्किम् । विदितम् । क्लिटितम् । खिटितम् । भावेत्यादि किम् । रुचितं कार्षापणम् । सेट् किम् । क्रुष्टम् ॥ शब्विकरणेभ्य एवेष्यते ॥ * ॥ नेह । गुध्यतेर्गुधितम् ॥

पूङः क्त्वा च । १ । २ । २२ ॥

पूङः क्त्वा निष्ठा च सेट् किन्न स्यात् ॥ पवितः । पवितवान् । पवित्वा । क्लिशः क्त्वानिष्ठयोः । पूङश्चेति वेट् । न क्त्वा सेडिति सिद्धे क्त्वाग्रहणमुत्तरार्थम् । नोपधादित्यत्र हि क्त्वेव संबध्यते ॥

नोपधात्थफान्ताद्वा । १ । २ । २३ ॥

नकारोपधात्थान्तात् फान्ताच्च सेट् क्त्वा किन्न स्याद्वा ॥ ग्रथित्वा । ग्रन्थित्वा । गुफित्वा । गुंफित्वा । नोपधात्किम् । रिफ कत्थनादौ । रेफित्वा । इह नोपधग्रहणसामर्थ्याद्रलो व्युपधादिति विकल्पोऽपि न । ऋफ ऋंफ हिंसायामिति धातुद्वयेन ऋफित्वा ऋफित्वा ऋंफित्वेति पक्षद्वयस्य नोपधग्रहणसत्त्वासत्त्वयोरविशेषात् ॥

वञ्चिलुञ्च्यृतश्च । १ । २ । २४ ॥

सेट् क्त्वा किन्न स्याद्वा ॥ वचित्वा । वञ्चित्वा । लुचित्वा । लुञ्चित्वा । ऋतित्वा । अर्तित्वा । सेट् किम् । वक्त्वा । उदित्त्वाद्वेट् ॥

तृषिमृषिकृशेः काश्यपस्य । १ । २ । २५ ॥

एभ्यः सेट् क्त्वा किद्वा स्यात् ॥ काश्यपग्रहणं पूजार्थम् । वेति प्रक्रमात् । तृषित्वा । तर्षित्वा । मृषित्वा । मर्षित्वा । कृश तनूकरणे । कृशित्वा । कर्शित्वा । न तु कृष विलेखने इति मूर्द्धन्यान्तः । अनिट्त्वात् ॥

रलो व्युपधाद्धलादेः संश्च । १ । २ । २६ ॥

उश्च इश्च वी । ते उपधे यस्य तस्माद्धलादेरलन्तात्परौ क्त्वासनौ सेटौ वा कितौ स्तः ॥ द्युतित्वा । द्योतित्वा । दिद्युतिषते । दिद्योतिषते । द्युतिस्वाप्योरिति सम्प्रसारणम् । रलः किम् । देवित्वा । दिदेविषति । व्युपधात्किम् । वर्तित्वा । विवर्तिषते । हलादेः किम् । एषित्वा । एषिषिषति । सेट् किम् । भुक्त्वा । बुभुक्षते ।

Digitized by Google

ऊकालोऽज्झ्रस्वदीर्घप्लुतः । १ । २ । २७ ॥

उश्च ऊश्च ऊ३श्च वः । वां काल इव कालो यस्य सोऽच् क्रमात् ह्रस्वदीर्घप्लुतसंज्ञः स्यात् ॥ संज्ञाप्रदेशाः ह्रस्वस्य गुणः । हे हरे । दीर्घोऽकितः । पापच्यते । वाक्यस्य टेः प्लुतः । एहि कृष्णा३ ॥

अचश्च । १ । २ । २८ ॥

ह्रस्वदीर्घप्लुतशब्दैर्यत्राज्विधीयते तत्राच इति षष्ठ्यन्तं पदमुपतिष्ठते ॥ इको गुणवृद्धीत्यनेन तुल्यमेतत् । नत्वलोन्त्यस्य शेषोऽपवादो वा । तेन शमामष्टानामित्यत्र शमादिभिरचो विशेषणात् शाम्यतीत्यादिसिद्धम् । ह्रस्वो नपुंसके अकृत्सार्वेत्यादौ तु अजन्तस्य प्रातिपदिकस्येति अजन्ताङ्गस्येति च व्याख्यानादलोऽन्त्यस्य ह्रस्वो दीर्घश्च । अतिरि । अतिनु । चीयते । स्तूयते । नेह । सुवाग् ब्राह्मणकुलम् । भिद्यते । वाक्यस्य टेः प्लुत उदात्तः । अत्र टेरच इति व्याख्यानादग्निमची३त् । सोमसू३त् । अजित्यनुवृत्तिसामर्थ्यात् स्वसंज्ञया विधाने इति लभ्यते । नेह । द्यौः । पन्थाः । सः ॥

उच्चैरुदात्तः । १ । २ । २९ ॥

ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात् ॥ प्रदेशा आद्युदात्तश्चेत्येवमादयः ॥

नीचैरनुदात्तः । १ । २ । ३० ॥

स्पष्टम् । प्रदेशा अनुदात्तौ सुप्पितावित्यादयः ॥

समाहारः स्वरितः । १ । २ । ३१ ॥

उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन्सोऽच् स्वरितसंज्ञः स्यात् ॥ प्रदेशास्तित्स्वरितमित्यादयः । ननु समाहारः स्वरित इत्युच्यते तत्र न ज्ञायते कस्मिन्नवकाशे उदात्तः कस्मिन्ननुदात्तः कियानुदात्तः कियाननुदात्त इत्यत आह ॥

Digitized by Google

तस्यादित उदात्तमर्द्धह्रस्वम् । १ । २ । ३२ ॥

ह्रस्वग्रहणमतन्त्रम् । स्वरितस्यादितोऽर्द्धमुदात्तम्बोध्यम् ॥ उत्तरार्द्धं तु परिशेषादनुदात्तम् । तस्य चोदात्तस्वरितपरत्वे श्रवणं स्पष्टम् । अन्यत्र तूदात्तश्रुतिः प्रातिशाख्ये विहिता । क्व १ वोऽश्वाः । रथानां न येऽराः । शतचक्रं योऽह्यः । इत्यादिष्वनुदात्तः । अग्निमीळे इत्यादौ तूदात्तश्रुतिः । इत आरभ्य नवसूत्र्या इत उत्कर्षेण च च इत्यतः प्राक् स्थापनेनास्य त्रिपाद्यामपि प्रवृत्तिः ॥

एकश्रुति दूरात्सम्बुद्धौ । १ । २ । ३३ ॥

सम्बुद्धिः सम्बोधना । अन्तर्भावितण्यर्थाद्बुधेः क्तिन् । न त्वेकवचनं सम्बुद्धिः । दूरादित्यपादानकारकान्वयाय क्रियाया एवाकाङ्क्षितत्वात् । दूरात्सम्बोधयति येन वाक्येन तदेकश्रुति स्यात् ॥ एका स्वराणामविभागेन श्रुतिर्यस्येत्यर्थः । आगच्छ भो माणवक देवदत्त३ । अन्त्यस्य तु वाक्यस्य टेरिति प्लुतेनापवादत्वादेकश्रुतिर्बाध्यते । दूरात्किम् । चैत्रयमेव । तत्रोपसर्गाद्यभिवर्जमित्याद्युदात्तः । गच्छेति तिङ्घातः । भोः शब्दो निपातत्वादाद्युदात्तः । शेषयोरामन्त्रितनिघातः । कृषिमायाः सम्बुद्धेरग्रहणादागच्छत ब्राह्मणा इत्यादावपि भवति ॥

यज्ञकर्मण्यजपन्यूङ्खसामसु । १ । २ । ३४ ॥

यज्ञक्रियायां मन्त्र एकश्रुतिः स्यात् जपादीन्वर्जयित्वा ॥ अग्निर्मूर्द्धा दिवः । यज्ञेति किम् । स्वाध्यायकाले चैत्रयमेव । जपेत्यादि किम् । ममाग्ने वर्चो विहवेष्वस्तु । जपो नाम उपांशुप्रयोगः । यथा जले निमग्नस्य । कृतश्वायमकरणमन्त्रेषु । यत्र जपतीति कल्पसूत्रकृतां व्यवहारः । अतएव याजुषत्वादुपांशु प्रयुज्यमानानामपीदं-

त्वेत्यादीनां जपत्वाभावादेकश्रुतिर्भवत्येव । शाखाच्छेदनादिकं प्रति तेषां करणत्वात् । न्यूङ्खा नाम षोडश ओकाराः । तेषु प्रथमसप्तमयोर्दशमस्य च उदात्तास्त्रिमात्राश्च । इतरे त्रयोदशानुदात्ता अर्द्धोकाराः । एतच्चाश्वलायनेन चतुर्थेऽहनीति खण्डे स्फुटीकृतम् । सामशब्दो वाक्यविशेषस्य गीतिवाचकः । तदुक्तं जैमिनिना । गीतिषु सामाख्येति । ए विश्वं समत्रिणं दह ३ । विश्वं अत्रिणं पाप्मानं सन्दहेति सम्बन्धः । एशब्दो गीतिपूरणः । निपात इत्यन्ये । जपादिपर्युदासाच्च मन्त्रेष्वेवैषा एकश्रुतिर्न तूहितादिष्विन्द्र शुषवेट्टुं स्त्वेत्यादिषु । ऊह्यमानस्यामन्त्रत्वात् । तदुक्तं भेदलक्षणे जैमिनिना । अनाम्नातेष्वमन्त्रत्वमिति । आपस्तम्बश्चाह । अनाम्नाता अमन्त्राः । यथा प्रवरोहनामधेयग्रहणानीति । ननु स्वाहेन्द्र शुषवेट्टुं स्वेति वेदे पठ्यत एवेति चेत्सत्यम् । ऊहितं यदमन्त्रभूतं अनुकार्यं तदनुकरणस्य पाठेऽप्यर्थपरस्यानुकार्यस्य लौकिकत्वमक्षतमेव । नन्वेवमुच्चैस्तरां वेति सूत्राद्विकल्पानुवृत्त्यैव सिद्धौ विभाषा छन्दसीत्यत्र विभाषाग्रहो व्यर्थः स्यात् । नित्यविकल्पविध्योर्विषयभेदस्यावश्यकतया आरम्भसामर्थ्यादेव यज्ञकर्मणीत्यस्य निवृत्तिसिद्धेः । प्रसज्यप्रतिषेधे तूहादिष्वमन्त्रेषु चरितार्थस्य पूर्वविधेरुत्तरेण छन्दोमात्रविषयकेण बाधसम्भवात्तन्निवृत्त्यर्थं तदपेक्षितमिति चेन्न । पर्युदासेऽपि मन्त्रे नित्यं ब्राह्मणे वेति विषयविभागसम्भवादित्याहुः ॥

उच्चैस्तरां वा वषट्कारः । १ । २ । ३५ ॥

यज्ञकर्मणि वौषट्शब्द उच्चैस्तरां वा स्यादेकश्रुतिर्वा । वषट्शब्देनात्र वौषट्शब्दो लक्ष्यते । सोमस्याग्ने वीही३ वौ३षट् । ब्रूहि प्रेष्येत्यनेन वौषट्शब्दस्यादेः प्लुत उदात्तो विहितस्तदपेक्षयायमुदा-

तरोऽन्त्यस्य विधीयते । द्वयोरप्ययमुदात्ततर इत्येके । तदा याज्याकाण्डीयैकश्रुतिमतोदात्तापेक्षः प्रकर्षः । एकश्रुतेरुदात्तानुदात्ततरोऽस्तीत्येकश्रुति दूरादित्यत्र भाष्यकैयटयोः स्पष्टम् । अस्योदात्तस्येत उत्कृष्य शास्त्रान्ते कर्तव्यत्वेनासत्वादसिद्धत्वात्प्लुतोदात्तत्वस्याप्यसिद्धत्वाच्च शेषनिघातो न । इत्येकश्रुतिः ॥

विभाषा छन्दसि । १ । २ । ३६ ।

छन्दसि विभाषा एकश्रुतिः स्यात् ॥ व्यवस्थितविभाषेयम् । संहितायां त्रैस्वर्यम् । ब्राह्मणे त्वेकश्रुतिर्बह्वृचानाम् । अन्येषामपि यथासम्प्रदायं व्यवस्था । अत्र तन्त्रावृत्त्यादिना अच्छन्दसीति नञः प्रश्लेषाद्भाषायामप्यैच्छिको विकल्पो बोध्यः । अतएव विभाषाग्रहणं चरितार्थम् । न च यज्ञकर्मणीत्यस्य निवृत्त्यर्थम् । छन्दसीत्युक्तेऽपि तन्निवृत्तिसिद्धेः । अन्यथा पूर्वसूत्रस्य निर्विषयत्वापत्तेः । न च जपादिषु सावकाशस्य परस्य पूर्वोऽपवाद इति वाच्यम् । एवं हि सति परत्वेव जपादिग्रहणं कुर्यात् किं नञा किन्तु छन्दोग्रहणेनेति दिक् ॥

न सुब्रह्मण्यायां स्वरितस्य तूदात्तः । १ । २ । ३७ ॥

सुब्रह्मण्याख्ये निगदे यज्ञकर्मणीति विभाषा छन्दसीति च प्राप्ता एकश्रुतिर्न स्यात् स्वरितस्योदात्तश्च स्यात् ॥ सुब्रह्मण्योऽम्१ । इन्द्रागच्छ२ । हरिव आगच्छ३ । मेधातिथेर्मेष४ । वृषणश्वस्य मेने५ । गौरावस्कन्दिन्६ । अहल्यायै जार७ । कौशिकब्राह्मण८ । गौतमब्रुवाण९ । श्वः सुत्यामागच्छ मघवन् । सुब्रह्मण्यि साधुरिति यत् । तित्वात्स्वरितः । तस्य टापा सहैकादेशः स्वरितानुदात्तयोरान्तर्यात्स्वरितः । ततो निपातेनाद्युदात्तेन ओम्शब्देन ओमाङोश्चेत्युदात्तस्वरितयोरेकादेशः स्वरित एव । एकादेश उदात्तेनेति तु न प्रव-

तेते । अनुदात्तस्येत्यनुवृत्तेः । ततः स्वरितस्य तूदात्त इति प्रकृत-
सूत्रेणैवोदात्त इति वृत्तिकारकैयटहरदत्तादयः । इन्द्रेत्यामन्त्रितमा-
द्युदात्तम् । आष्टमिको निघातस्तु भिन्नवाक्यत्वान्न भवति ।
द्वितीयो वर्णोऽनुदात्तः । स चोदात्तादनुदात्तस्येति स्वरितः । तस्या-
नेनोदात्तः । न चात्र कर्तव्ये स्वरितोऽसिद्धः । एतत्काण्डोत्कर्षस्यो-
क्तत्वात् । अतएवास्मिन्नुदात्ते शेषनिघातोऽपि न । तेन द्वावप्युदा-
त्तौ । आद्युदात्तः । ततः परस्योदात्तादनुदात्तस्येति स्वरितस्यानेनो-
दात्तः । न च तस्योदात्तादनुदात्तस्येति स्वरितः शङ्क्यः । प्रकरणो-
त्कर्षेणास्यासिद्धत्वात् । इरिव आगच्छेत्यत्रोक्तप्रक्रियया चत्वार उदा-
त्ताः । वकारश्छकारावनुदात्तौ । मेधातिथेरिति षष्ठ्यन्तस्य पराङ्गवद्भावे
आमन्त्रितस्याद्युदात्तः । धायन्द्रस्योदात्तादिति स्वरितत्वेऽनेनोदात्तः ।
ततश्चत्वारोऽनुदात्ताः । वृषेति पूर्ववद् द्वावुदात्तौ । पञ्चानुदात्ताः ।
गौरेत्यत्र गोऽश्वदक्ष्वान्दतीति विग्रहः । पूर्ववद् द्वावुदात्तौ । ततस्त्र-
योऽनुदात्ताः । अहेत्युदात्तौ । चत्वारोऽनुदात्ताः । कौशिकब्राह्मणेति
समस्तम् । कौशीत्युदात्तौ । चत्वारोऽनुदात्ताः । गौतेत्युदात्तौ ।
चत्वारोऽनुदात्ताः । स्व इत्युदात्तम् । सुत्यामित्यन्तोदात्तम् । संज्ञा-
यां समजेति क्यपो विधाने उदात्त इत्यनुवृत्तेः । आगेति द्वावुदात्तौ ।
छकारोऽनुदात्तः । मघवन्निति पदात्परमामन्त्रितं निहन्यते । आर्याविव्य-
न्तः ॥ * ॥ अमुविति प्रथमान्तोपलक्षणम् । तस्मिन्नेव निमित्ते प्रथ-
मान्तस्याप्युदात्तः स्यात् ॥ गार्ग्यो यजते । ञित्वादाद्युदात्ते
प्राप्तेऽन्तोदात्तत्वविधिः ॥ अमुष्येत्यन्तः ॥ * ॥ षष्ठ्यन्तोपलक्षणमे-
तत् । षष्ठ्यन्तस्यापि प्राग्वत् ॥ दाक्षेः पिता यजते ॥ स्यान्तस्योपोत्त-
मञ्च ॥ * ॥ चादन्तः । गार्ग्यस्य पिता यजते ॥ वा नामधेयस्य ॥ * ॥

Digitized by Google

स्यान्तस्य नामधेयस्य उपोत्तममुदात्तं वा स्यात् ॥ देवदत्तस्य पिता यजते ॥

देवब्रह्मणोरनुदात्तः । १ । २ । ३८ ॥

स्वरितस्य तूदात्त इति पूर्वसूत्रशेषस्यायमपवादः । अनयोः स्वरितस्यानुदात्तः स्यात्सुब्रह्मण्यायाम् । देवा ब्रह्माण आगच्छत । द्वयोरप्यामन्त्रिताद्युदात्तत्वे शेषनिघाते चोदात्तादिति स्वरितस्यानेनानुदात्तः । एतत्प्रकरणोत्कर्षस्य चैतदेव ज्ञापकं बोध्यम् । द्वितीयस्याष्टमिको निघातस्तु न । पूर्वस्याविद्यमानत्वेन पदात्परत्वाभावात्तः प्राचीनपदस्य तु भिन्नवाक्यस्थत्वात् । ये तु देवा ब्रह्माण इति सामानाधिकरण्येन व्याचक्षते तन्मते विभाषितं विशेषवचने इति पक्षे विद्यमानतया द्वितीयस्य निघातः । प्रकृतसूत्रेण स्वरितनिघातस्तु प्रकारस्यैव । अस्मिन्पक्षे ब्रह्मग्रहणं न कर्तव्यम् ॥

स्वरितात्संहितायामनुदात्तानाम् । १ । २ । ३९ ॥

स्वरितात्परेषामनुदात्तानामेकश्रुतिः स्यात्संहितायाम् ॥ इमं मे गङ्गे यमुने सरस्वति । क्वायं देवदत्तयज्ञदत्तौ । अनुदात्तानामिति जातौ बहुवचनम् । तेनैकस्य द्वयोश्च भवत्येव । संहिताग्रहणं ज्ञापकमन्यत्र पञ्चमीनिर्देशे कालो न व्यवधायक इति । तेन तिङ्‌तिङ इति निघातः पदपाठेऽपि भवति । अग्निं ईळे ॥

उदात्तस्वरितपरस्य सन्नतरः । १ । २ । ४० ॥

सन्नोऽनुदात्तः । उदात्तस्वरितौ परौ यस्मात्तथाभूतस्यानुदात्तस्यानुदात्ततरः स्यात् ॥ अग्निं कन्या । नन्विमं मे गङ्गे इति मन्त्रे शुतुद्रिशब्दस्य पादादित्वेन निघाताभावादाद्युदात्ततया तस्मिन्परे सरस्वतीतीकारस्य सन्नतर इष्यते एकश्रुतिरेव तु प्राप्नो-

ति । नवसूत्र्या उत्कर्षेणासिद्धतया सन्नतरायोगादिति चेन्न । अत्र पाठेन नवसूत्र्याः परस्परं प्रत्यसिद्धत्वाभावबोधनात् । देवदत्त न्यङ्ङित्यत्र तु न्यधी चेति पूर्वपदप्रकृतिस्वरे उदात्तस्वरितयोर्यण इत्यञ्चत्यकारस्य स्वरितः पूर्वस्य सन्नतरं प्रति नासिद्धः । प्रकरणोत्कर्षात् ॥

अपृक्त एकाल् प्रत्ययः । १ । २ । ४१ ॥

एकाल् प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात् ॥ संज्ञाप्रदेशा वेरपृक्तस्येत्यादयः । एकालिति किम् । दर्विः । जागृविः । प्रत्यय इति किम् । सुरां सुनोतीति सुरासुत् तमाचक्षाणः सुराः ॥

तत्पुरुषः समानाधिकरणः कर्मधारयः । १ । २ । ४२ ॥

समानाधिकरणावयवस्तत्पुरुषः कर्मधारयसंज्ञः स्यात् ॥ संज्ञाप्रदेशाः पुंवत्कर्मधारयेत्यादयः ॥

प्रथमानिर्दिष्टं समास उपसर्जनम् । १ । २ । ४३ ॥

समासविधायकं शास्त्रं समास इह गृह्यते । तत्र प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात् ॥ द्वितीया श्रितादिभिः । कृष्णश्रितः । महासंज्ञाकरणमन्वर्थसंज्ञार्थम् । लोके ह्यप्रधानमुपसर्जनमाहुः । तेन राज्ञः कुमार्याः राजकुमार्या इत्यत्रोभयोः षष्ठीति सूत्रे प्रथमानिर्दिष्टत्वाविशेषेऽपि राजैवोपसर्जनं न तु कुमारी । तेन तस्या न पूर्वनिपातो न वा गोस्त्रियोरिति ह्रस्वः । नन्वेवं पाचकवृन्दारको गोगर्भिणीत्यादिषु विशेष्यस्य पूर्वनिपातो न स्यादिति चेत् । वृन्दारकनागकुञ्जरैः पूज्यमाने चतुष्पादो गर्भिण्येत्यादौ विधिवाक्ये प्रथमानिर्देशस्यानन्यार्थत्वाददोषः । तस्मात्सति सम्भवे व्यवस्थापकमन्वर्थत्वमिति स्थितम् ॥

एकविभक्ति चापूर्वनिपाते । १ । २ । ४४ ॥

समासे इति वर्तते । समासार्थमलौकिकं विग्रहवाक्यं चेह समासः । तत्र यन्नियतविभक्तिकं तदुपसर्जनसंज्ञं स्यान्न तु तस्य पूर्वनिपातः ॥ अतिक्रान्तो मालामतिमालः । निष्कौशाम्बिः ॥ एकविभक्तावषष्ठ्यन्तवचनम् ॥ * ॥ नेह । अर्द्धं पिप्पल्या अर्द्धपिप्पली । एकदेशिसमासविषयेऽप्युपसर्जनसंज्ञानिषेधः । तेन पञ्चखट्वीत्यादि सिध्यति । न चात्र प्रमाणाभावः । अपथं नपुंसकमिति सूत्रे पञ्चखट्वीति भाष्योदाहरणस्यैव प्रमाणत्वात् ॥

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । १ । २ । ४५ ॥

धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा ऽर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात् ॥ बहुपटवः । अत्र प्रातिपदिकत्वेन पूर्वविभक्तिलुकि टकारोकारस्योदात्तत्वे पुनर्जसि टकारोकारोदात्तत्वसिद्धिः । अन्यथा विभक्त्यन्तस्योदात्तता स्यात् । डित्थादीन्यव्युत्पन्नान्यप्यस्यैवोदाहरणम् । अर्थवत्किम् । धनं वनमित्यादौ प्रतिवर्णं संज्ञा माभूत् । अधातुः किम् । अहन् । नलोपो माभूत् । अप्रत्ययः किम् । हरिषु । करोषि । अत्र सुप्सिपोर्माभूत् । अप्रत्ययान्तः किम् । तत्रैव विभक्तिविधिर्द्वयोर्माभूत् ॥

कृत्तद्धितसमासाश्च । १ । २ । ४६ ॥

अर्थवदित्यनुवर्तते । तत्सामर्थ्यात्संज्ञाविधावपि प्रत्ययग्रहणे तदन्तविधिः । अर्थवदिति हि प्रशंसायां मतुप् । एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वं च प्रशंसामूलम् । कृत्तद्धितान्तौ समासश्च एते अर्थवन्तः प्रातिपदिकसंज्ञाः स्युः ॥ लिट् धुक्ष इत्यादावधातुरिति कर्तेत्यादावप्रत्ययान्तमिति पर्युदासे प्राप्ते कृदन्तो विधिरयम् ।

Digitized by Google

एकमेपगच्छ इत्यादौ तद्धितान्तोऽपि । पूर्वसूत्रेणैव सिद्धे समासग्रहणं नियमार्थम् । यत्र सङ्घाते पूर्वो भागः पदं तत्र चेद्भवति तर्हि समासस्यैवेति । तेन वाक्यस्य न । चकारोऽनुक्तसमुच्चयार्थः । तेन निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा भवतीति गतार्थम् । येषां द्योत्योऽप्यर्थो नास्ति तदर्थमिदम् । प्रवदन्ति ॥

ह्रस्वो नपुंसके प्रातिपदिकस्य । १ । २ । ४७ ॥

क्लीबे प्रातिपदिकस्याजन्तस्य ह्रस्वः स्यात् ॥ श्रीपं कुलम् ॥

गोस्त्रियोरुपसर्जनस्य । १ । २ । ४८ ॥

स्त्रीशब्दः स्वर्यते । तेन स्त्र्यधिकारोक्तचातुर्थिकप्रत्ययलाभः । उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तश्च तदन्तस्य प्रातिपदिकस्य ह्रस्वः स्यात् ॥ चित्रगुः । निष्कौशाम्बिः । उपसर्जनस्य किम् । सुगौः । राजकुमारी । स्त्र्यधिकारोक्तप्रत्ययग्रहणान्नेह । अतिलक्ष्मीः । अति-श्रीः । कथं सुगोकुलं राजकुमारीपुत्र इति चेच्छृणु । उपसर्जनत्वस्य ससम्बन्धिकतया यस्य प्रातिपदिकस्य ह्रस्वो विधीयते तदर्थं प्रति यदुत्तरपदभूतमर्थं गोस्त्रियोर्गुणीभावस्तदेदम् ह्रस्वत्वम् । अतएव महत्संज्ञाकरणम् । न चेह तदस्ति । गोः कुलं प्रति गुणीभावेऽपि गां प्रत्यतथात्वात् । कुमार्यास्य पुत्रं प्रति गुणीभावेऽपि स्वं प्रत्यतथा-त्वात् । शास्त्रीयस्त्विहोपसर्जनत्वं गृह्यते । कृत्रिमत्वात् । अतएव कुमारीमिच्छन्कुमारीवाचरन् ब्राह्मणः कुमारीत्यत्र ह्रस्वो न ॥ ईयसो बहुव्रीहेर्नेति वाच्यम् ॥ * ॥ ईयसन्ताद्यः स्त्रीप्रत्ययस्तदन्तान्तो यो बहुव्रीहिस्तस्येत्यर्थः । बह्व्यः श्रेयस्यो यस्य बहुश्रेयसी । क्लीबत्वविव-क्षायां नपुंसकह्रस्वत्वमपीह न । ईयसो बहुव्रीहेर्नेति ह्रस्वमात्रस्य प्रतिषेधादिति कैयटहरदत्तमाधवग्रन्थादयः । अन्ये तूपसर्जनह्रस्व

एव निषिध्यते नपुंसकह्रस्वत्वं तु स्यादेवेत्याहुः । बहुव्रीहेः किम् । अतिमेयसिः ॥

लुक्तद्धितलुकि । १ । २ । ४९ ॥

तद्धितलुकि सति उपसर्जनस्य स्त्रीप्रत्ययस्य लुक् स्यात् ॥ लुक् तावत्प्रत्ययस्यैव सम्भवति न तु तदन्तस्य । अतएवोपसर्जनमिह लौकिकं न तु पूर्ववच्छास्त्रीयम् । असम्भवात् । न हि प्रत्ययमात्रं शास्त्रीयमुपसर्जनम् । आमलक्याः फलमामलकम् । नित्यं वृद्धशरादिभ्य इति मयटः फले लुक् । उपसर्जनस्य किम् । अवन्ती । कुरुः । पूर्वसूत्रस्य निष्कौशाम्बिरित्यादौ सावकाशत्वेन पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्र इत्यत्र परत्वाल्लुगेव ॥

इद्गोण्याः । १ । २ । ५० ॥

गोण्या इत्स्यात्तद्धितलुकि ॥ लुकोऽपवादः । पञ्चभिर्गोणीभिः क्रीतः पटः पञ्चगोणिः । पूर्वाचार्यमतं दूषयितुमुत्थापयति ॥

लुपि युक्तवद्व्यक्तिवचने । १ । २ । ५१ ॥

लुपि सति प्रकृतिवल्लिङ्गवचने स्तः ॥ कटुबदर्या अदूरभवो ग्रामः कटुबदरी । पञ्चालानां निवासो जनपदः पञ्चालाः । पञ्चालाः क्षत्रियाः । पुंल्लिङ्गा बहुवचनविषयाः । लुपि किम् । लवणः सूपः । संसृष्टे लवणाल्लुक् । व्यक्तिवचने इति किम् । शिरीषाणामदूरभवो ग्रामः शिरीषास्तस्य वनं शिरीषवनम् । अत्र वनस्पतित्वातिदेशे विभाषौषधीति णत्वं माभूत् ॥ समास उत्तरपदस्य बहुवचनस्य लुपो युक्तवद्भावो वक्तव्यः ॥ * ॥ मथुरापञ्चालाः । वर्तिपदार्थो यथा-पेक्षितपरस्परा द्वन्द्वार्थे इति सिद्धे समासे बहुवचनान्तप्रकृतिकलुबन्तार्थे चेदतिदेशस्तर्ह्युत्तरपदस्यैवेति नियमार्थमिदम् । तेनेह न ।

पञ्चालमथुरे । अत एव मथुरागोदा इति भवति न तु मथुरागोदा-विति । द्वन्द्वेऽपि गोदार्थस्य द्वित्वानतिक्रमात् । बहुवचनस्य किम् । गोदो ग्रामो मथुरा च गोदमथुराः । अबहुवचनान्तलुबन्तपूर्वपदस्य नियमेन व्यावृत्तिर्माभूत् ॥

विशेषणानाञ्चाजातेः । १ । २ । ५२ ॥

लुबर्थस्य विशेषणानामपि तद्वल्लिङ्गवचने स्तो जातिं वर्जयित्वा ॥ पञ्चाला रमणीयाः । गोदौ रमणीयौ । अजातेः किम् । पञ्चाला जनपदः । गोदौ ग्रामः ॥ हरीतक्यादिषु व्यक्तिः ॥ * ॥ नियमार्थमिदम् । तेन वचनं न युक्तवत् । हरीतक्याः फलानि हरीतक्यः ॥ गोरादिङीषन्तादनुदात्तादेश्चेत्यञ् । हरीतक्यादिभ्यश्चेति लुप् ॥ खलतिकादिषु वचनम् ॥ * ॥ अयमपि नियम एव । खलतिकस्य पर्वतस्यादूरभवानि वनानि खलतिकं वनानि ॥ मनुष्यलुपि प्रतिषेधः ॥ * ॥ मनुष्यलक्षणे लुबर्थे विशेषणानां न । लुबन्तस्य तु भवतीत्यर्थः । चञ्चा तृणमयः पुमान् । स इव चञ्चा अभिरूपः । संज्ञायामिति कन् । लुम्मनुष्ये इति लुप् । चर्मविकारविशेषो वध्रिका । स इव वध्रिका दर्शनीयः । तदिह द्वे वार्तिके आद्यस्य तृतीयन्तु द्वितीयस्यापवाद इति स्थितम् । एवमनूद्य दूषयति ॥

तदशिष्यं संज्ञाप्रमाणत्वात् । १ । २ । ५३ ॥

तद्युक्तवद्वचनं अशिष्यं अकर्तव्यं कुतः संज्ञानां प्रमाणत्वादित्यर्थः ॥ अयं भावः । पञ्चाला वरणा इत्यादयो न यौगिकाः । किं तर्हि । जनपदानां संज्ञाः । ताश्च यल्लिङ्गसंख्यतया लोके प्रसिद्धास्तथ प्रमाणीभूता एव न तु तथानुशासनापेक्षा । यथा आपो दाराः गृहाः सिकता वर्षा इत्यादाविति । ननु विषम उपन्यासः । आपो

दारा इत्यादयो न यौगिका इति न युक्तम् । अनुशासनाभावात् । अतस्तत्र न लिङ्गसंख्यानुशासनापेक्षा । पञ्चालादयस्तु यौगिका एव । तस्य निवासो जनपदे लुबित्याद्यनुशासनोपलम्भात् । अतस्तत्र युक्तवद्वचनं कर्तव्यमेवेत्यत आह ॥

लुब्योगाप्रख्यानात् । १ । २ । ५४ ॥

न पञ्चालादयो यौगिकाः । योगाप्रख्यानात् । योगस्यावयवार्थस्येहाप्रख्यानादप्रतीतेरित्यर्थः ॥ अयं भावः । न हि यौगिकत्वे अनुशासनं प्रयोजकं किं तर्हि योगार्थप्रतीतिः । सा च पञ्चालादिष्वपि आपो दारा इत्यादिष्विव नास्तीति । नन्वेवं लुबनुशासनवैयर्थ्यम् । योगार्थाप्रतीतेरेव तस्य निवासो ऽदूरभवश्चेति तद्धितस्यैवानुत्पत्तेरिति चेन्न । इष्टापत्तेरित्याह । लुबिति । जनपदे लुप् वरणादिभ्यश्चेति लुबप्यशिष्य इत्यर्थः । विपक्षे बाधकमप्यस्तीत्याह ॥

योगप्रमाणे च तदभावे ऽदर्शनं स्यात् । १ । २ । ५५ ॥

यदि हि पञ्चालादिशब्दो योगस्यावयवार्थस्य प्रमाणं बोधकं स्यात्तदा तदभावे न दृश्येत । दृश्यते च सम्प्रति विनैव क्षत्रिययोगं जनपदे पञ्चालशब्दः । न च भूतपूर्वगतिः । क्षत्रिययोगाद्देशे देशयोगाद्वा क्षत्रिये शब्द इत्यत्र विनिगमकाभावेन वैपरीत्यस्यापि सुवचत्वापत्तेरिति भावः । अतो ऽबादिवन्नानार्था एवैते इति तत्त्वम् । प्रसङ्गादन्यदपि पूर्वाचार्यमतमनूद्य दूषयति ॥

प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् । १ । २ । ५६ ॥

प्रत्ययार्थः प्राधान्येनेत्येवंरूपं वचनमशिष्यम् । कुतः ।

ऽर्थस्य लोकत एव सिद्धेः। आख्यातस्य क्रियाप्रधानतया व्यभिचाराच्चेत्यर्थः॥

कालोपसर्जने च तुल्यम्। १। २। ५७॥

अतीताया रात्रेः पश्चार्द्धेनागामिन्याः पूर्वार्द्धेन च सहितो दिवसोऽद्यतनः। विशेषणमुपसर्जनमित्यादि पूर्वाचार्यैः परिभाषितं तदप्यशिष्यत्वं समानमित्यर्थः॥ लोकप्रसिद्धत्वादेवेति भावः। प्रासङ्गिकं समाप्य प्रकृतमनुसरति॥

जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्। १। २। ५८॥

एकोऽप्यर्थो वा बहुवद्भवति॥ ब्राह्मणाः पूज्याः। ब्राह्मणः पूज्यः॥ संख्याप्रयोगे प्रतिषेधः॥ * ॥ एको व्रीहिः सम्पन्नः सुभिक्षं करोति॥

अस्मदो द्वयोश्च। १। २। ५९॥

एकत्वे द्वित्वे च विवक्षितेऽस्मदो बहुवचनं वा स्यात्॥ वयं ब्रूमः। पक्षे ऽहं ब्रवीमि। आवां ब्रूव इति वा॥ सविशेषणस्य प्रतिषेधः॥*॥ पटुरहं ब्रवीमि। कथं तर्हि "त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नता" इति भर्तृहरिः। अत्रोन्नतत्वस्य विधेयत्वाद्भवत्येव। अनुवाद्यविशेषणपरत्वात्प्रतिषेधस्येति हरदत्तः॥

फल्गुनीप्रोष्ठपदानाञ्च नक्षत्रे। १। २। ६०॥

द्वित्वे बहुत्वप्रयुक्तं कार्यं वा स्यात् नक्षत्रे यद्यभिधीयेते॥ पूर्वे फल्गुन्यौ। पूर्वाः फल्गुन्यः। पूर्वे प्रोष्ठपदे। पूर्वाः प्रोष्ठपदाः। नक्षत्रे किम्। फल्गुन्यौ माणविके। फल्गुन्योर्जाते इत्यर्थः। फल्गु-

न्यषाढाभ्यामिति टः । टित्वात् ङीप् । एकस्यां तु तारायां नेतो प्रयुज्येते । तद्गुतावयवभेदे समूहे एव रूढत्वात् ॥

छन्दसि पुनर्वस्वोरेकवचनम् । १ । २ । ६१ ॥

द्वयोरेकवचनं वा स्यात् ॥ पुनर्वसुर्नक्षत्रम् । पुनर्वसू वा । लोके तु द्विवचनमेव ॥

विशाखयोश्च । १ । २ । ६२ ।

प्राग्वत् ॥ विशाखा नक्षत्रम् । पक्षे विशाखे । छन्दसीत्यनुवृत्तेर्लोके विशाखे इत्येव ॥

तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् । १ । २ । ६३ ॥

छन्दसीति निवृत्तम् । बहुत्वं द्वित्ववद्भवति ॥ तिष्यश्च पुनर्वसू च तिष्यपुनर्वसू । तिष्येति किम् । विशाखानुराधाः । नक्षत्रेति किम् । तिष्यपुनर्वसवो माणवकाः । तिष्यपुनर्वसुशब्दाभ्यां नक्षत्रेण युक्त इत्यणो लुबविशेषे इति लुपि जातार्थे सन्धिवेलेत्यणः श्रविष्ठाफल्गुनीति लुक् । माणवकवृत्तिरयं द्वन्द्वो न तु नक्षत्रवृत्तिः । न चायं गौणः । यौगिकत्वात् । नक्षत्र इत्यनुवृत्त्या सिद्धे पुनर्नक्षत्रग्रहणं तिष्यपुनर्वस्वोः शब्दयोरभिधेये नक्षत्रे वर्तमानो यो नक्षत्रशब्दानां द्वन्द्व इत्यर्थलाभेन पुष्यपुनर्वसू सिध्यपुनर्वसू इत्यत्र पर्यायाणामपि यथा स्यादित्येवमर्थम् । द्वन्द्वे किम् । यस्तिष्यस्तौ पुनर्वसू येषां ते तिष्यपुनर्वसवः । तिष्यादय एव विपर्ययविषया इह बहुव्रीहिणोच्यन्ते । अतो भवत्ययं नक्षत्रसमासो न तु द्वन्द्वः । बहुवचनस्य किम् । इदं तिष्यपुनर्वसु ॥

अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः ।
कृतत्रेतादिषु ह्येषां वयो ह्रसति पादशः ॥
वेदोक्तमायुर्मर्त्यानामाशिषश्चैव कर्मणाम् ।
फलन्त्यनुयुगं लोके प्रभावश्च शरीरिणाम् ॥

इत्यन्तेनाधिकारिविशेषणानां सामर्थ्यादीनां तारतम्यं प्रतिपाद्य

अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे परे ।
अन्ये कलियुगे नृणां युगह्रासानुरूपतः ॥
इति स्पष्टमेवोपसंहृतम् ।

तथोपकायनोऽपि

श्रुतिश्च शौचमाचारः प्रतिकालं विभिद्यते ।
नाना धर्माः प्रवर्तन्ते मानवानां युगे युगे ॥ इति ।

यत्तु अत्रान्यशब्दो न धर्मस्वरूपान्यत्वपरोऽपि तु प्रकारान्यत्वपरोऽन्यथाधर्मप्रमाणचोदनानामपि प्रतियुगं भेदापत्तेः । न ह्ययं चोदना कृतेऽध्येतव्या इयं त्रेतायामिति व्यवस्थापकं किंचिदस्तीति तच्चिन्त्यम् । मनुगीतमपशङ्खलिखितपराशरवचनानुमितचोदनानां स्वरूपभेदभिन्नानां "कृते तु मानवा" इत्यादिवाक्येन प्रतियुगं व्यवस्थायाः प्रत्यक्षसिद्धत्वात् ।

यच्चात्र प्रकारान्यत्वे दृष्टान्तः । एकस्याप्यग्निहोत्रस्य सायम्प्रातःकालभेदेन ऋतं त्वा सत्येन परिषिञ्चामीति सायं परिषिञ्चति सत्यं त्वर्तेन परिषिञ्चामीति प्रातरित्यनुष्ठानप्रकारभेददर्शनं सोऽपि विषमः । न एको धर्मः तपःप्रभृतिभिः प्रकारैर्भिद्यत इति शक्यं वक्तुं शब्दान्तरन्यायेन यमदानहोमवत्तस्य भिन्नस्वरूपत्वात् । अग्निहोत्रे तु भेदकप्रमाणाभावेन विधिनैकत्वावगमात् प्रकारे भेदचोदनानामपि युगभेदेन भेदापत्तिश्च तुल्यैवेत्यास्तां तावत् । तस्माद्धर्मस्वरूपभेद एव वाक्यार्थ इति ।

प्रतिज्ञातं धर्मस्वरूपभेदमुदाहरति ।

तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।
द्वापरे यज्ञमेवाहुर्दानमेव कलौ युगे ॥ २३ ॥

Digitized by Google

तपसन्ताप इत्यस्माद्धातोर्निष्पन्नेन तपःशब्देन मुख्यवृत्त्या कृच्छ्रचान्द्रायणादिभिर्देहशोषणमेवोच्यते । तदुक्तं स्कान्दे

वेदोक्तेन प्रकारेण कृच्छ्रचान्द्रायणादिभिः ।
शरीरशोषणं यत्तत्तप इत्युच्यते बुधैरिति ॥

यद्यपि,

कोऽहं मोक्षः कथं केन संसारं प्रतिपन्नवान् ।
इत्यभिध्यानमर्थज्ञास्तपः शंसन्ति पण्डिताः ॥
तपस्त्वाधर्मवर्तित्वं शौचं सङ्करवर्जनम् ।

एतत् खलु वा वै तप इत्याहुर्यः स्वं ददातीत्यादिस्कान्दव्यासश्रुतिवाक्यैर्ज्ञानयज्ञदानानामपि तपस्त्वं गम्यते तथा ऽप्यत्र ब्राह्मणपरिव्राजकन्यायेन तदितरविषयस्तपःशब्द इति । परमत्यायाससाध्यं कठिनमित्यभिलषितफलसाधनं कृतयुगे सत्ययुगे तथा त्रेतायुगे ज्ञानं बाह्येन्द्रियवृत्तिनिरोधेनात्मदर्शनं परमुच्यते ।

यद्यपि धर्मभेदनिरूपणप्रस्तावे ज्ञानोपन्यासो न युक्तस्तथा "ऽयं तु परमो धर्मो यद्योगेनात्मदर्शनमिति" योगिवाक्येनात्मज्ञानस्या ऽपि परमधर्मत्वप्रतिपादनान्न विरोधः । द्वापरे यज्ञमेव ज्योतिष्टोमादिकं परमाहुः । कलौ युगे दानमेव देशे काले उपायेन श्रद्धया द्रव्यस्य पात्रे प्रतिपादनमेव परमाहुः ।

तदाह मनुः

तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ॥ इति ।

परत्वं चात्रत्य कृतयुगीयदानफलसाधकत्वेन । तदाह वृद्धपराशरः

शते तु या कृते दत्ते फलाप्तिः पुरुषस्य सा ।
दत्तेस्तु दशभिर्नृणां फलाप्तिः स्यात्कलौ युगे ॥ इति ।

नेयं परिसङ्ख्या तेन शास्त्रान्तरेण प्राप्तानामपि धर्माणामसाधारणत्वमभिप्रेतम् । यथोक्तं वासिष्ठलैङ्गयोः

कृते ध्यानं तपश्चैव कर्तुं शक्यमयत्नतः ।
ज्ञानयोगो मुनेः शक्यो त्रेतायामप्रमादतः ॥
द्वापरे शक्यते कर्तुं यागो ऽक्लेशेन सुव्रत ।
दानमेव कलौ शक्यं कर्तुं सर्वजनैः सदा ॥ इति ।

वायवीये ऽपि

इत्यादानं तपस्सत्यं त्रेतायां धर्म उच्यत इति ।

बृहस्पतिना ऽप्युक्तम्

तपो धर्मः कृतयुगे ज्ञानं त्रेतायुगे स्थितं ।
द्वापरे चाध्वरः प्रोक्तस्तिष्ये दानं दया दमः ॥ इत्यादि ।

एवं प्रतियुगं धर्मव्यवस्थामभिधाय तत्प्रमाणव्यवस्थामाह ।

कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः ।
द्वापरे शंखलिखिताः कलौ पाराशराः स्मृताः ॥२४॥

कृते सत्ययुगे मानवा मनुप्रोक्ता धर्मास्तेन प्रोक्तमित्यण् । एवं गौतमाः गौतमप्रोक्तास्त्रेतायां द्वापरे शङ्खलिखिताः शङ्खलिखिताभ्यां सम्भूय प्रोक्ताः छान्दसो वृध्यभावः कलौ पाराशराः पराशरप्रोक्ताः स्मृतशब्दस्य द्विर्वचनं प्रत्येकं वाक्यचतुष्टये ऽपि "उपरि हि देवेभ्यो धारयतीत्यत्रेव हेतुमन्निगदेन हि शब्देन समानार्थतया प्रसिद्धवदनुवादेन विधित्वं कल्पयितुम् । तेन कलौ पाराशरधर्माः कर्तव्या इत्यर्थः सिध्यति । ततश्चानुवादमात्रमेतदिति निरस्तम् । किं तु कृतादिषु मानवादिधर्मा व्यवस्थाप्यन्ते वार्त्रघ्नीपौर्णमास्यामनूच्येते वृधन्वती अमावास्यायामितिवत् । अत एव बृहस्पराशरेण मन्वादिधर्माणां कलावशक्यानुष्ठानत्वमुक्तम् ।

युगेषु त्रिषु ये प्रोक्ता धर्मा मन्वादिभिर्मुने ।
शक्यन्ते नैव ते कर्तुं वर्णैराश्रमवासिभिः ॥
मन्वर्थश्च स धर्माणां कृतादित्रियुगेष्वभूत् ।
धर्मं तु त्रियुगाचारं न शक्यं तु कलौ युगे ॥
मनुर्यां याज्ञवल्क्यश्च धर्मषुः प्राह निष्कृतिं ।
सा कृतादिषु वर्णानां सति धर्मे चतुष्पदे ॥ इति ।

ब्राह्मे ऽपि ।

यद्युगान्तर्युगो धर्मो नादर्तव्यः कलौ युगे ।
पापप्रसक्तास्तु यतः कलौ नार्य्यो नरास्तथा ॥

इत्यनादरणीयत्वमुक्तम् । न चैषां विषयभेदेन व्यवस्था साधीया। नैयायिकव्यास्तस्या वाचनिकव्यवस्थातो जघन्यत्वात् । सामान्यानामेवां विशेषपरतासङ्कोचस्तु न समाधेय एव । किं च प्रतिपुरुषमनेकविषयस्फूर्ति-सम्भवेन तत्तत्परतया व्यवस्थाकल्पनायामव्यवस्थितः शास्त्रार्थः स्यादि-त्यलं पल्लवितेन ।

नन्वेवं कलौ मानवादिधर्मा नानुष्ठेयाः स्युः । अनुष्ठेयत्वे ऽपि वा मन्वादिवाक्यैः पराशरवाक्यानामुपसंहारो न स्यात् । मैवं समाने विषये मन्वादिवाक्यैः पराशरस्य विरोधे व्यवस्थापकत्वात् । अन्यथैतद्वा-क्यानर्थक्यं सकलस्मृत्यन्तरवैयर्थ्यं वा स्यात् । उपसंहारस्तु प्रमाणबलाब-लापेक्षया प्रमेयबलाबलस्य न्यायस्त्वेन स्यादेव ततश्च ये धर्माः पराशरा-नुक्ता अपि मन्वाद्युक्ता ये वा तुल्यरूपा समान्यविशेषरूपा वा तेषाम-विरुद्धत्वेनोपसंहारेण चानुष्ठेयता सिध्यत्येव कलावपीति सर्वमनवद्यम् । तदाह बृहत्पराशरः

कृते तु मानवा धर्मास्त्रेतायां गौतमस्य च ।
द्वापरे शङ्खलिखिताः कलौ पाराशराः स्मृताः ॥ इति ।

प्रतियुगं धर्मतत्प्रमाणव्यवस्थावदधर्मजनकस्थानहानव्यवस्थामप्याह ।

त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् ।
द्वापरे कुलमेकं तु कर्तारं तु कलौ युगे ॥ २५ ॥

पतितपुरुषयुक्तं देशमेकराजाज्ञावशवर्तिग्रामसमूहं कृतयुगे त्यजेत् कृतयुगसामर्थ्यादधर्मसंक्रमभयेन । त्रेतायां तादृशमेव ग्रामं विप्रसद्भृत्यशूद्र-वासम् । अनेकजातीयनानावृत्त्युपजीविबहुजननिवासस्थानं नगरं वा ।

विप्राश्च विप्रभृत्याश्च यत्र वै निवसन्ति ते ।
स तु ग्राम इति प्रोक्तः शूद्राणां वास एव च ॥

पण्यक्रयादिनिपुणैश्चातुर्वर्ण्यैस्तु यद्युतम् ।
अनेकजातिसम्बद्धं नैकशिल्पिसमाकुलम् ॥
सर्वदैवतसम्बद्धं नगरं त्वभिधीयते ।

इति भृगुप्रोक्तलक्षणमुत्सृजेत् । द्वापरे पतितपुरुषयुक्तमेकं कुलं तत्स-पिण्डवर्गं त्यजेत् कुलत्यागो नाम पतितकुलमर्यादित्यर्थः ।

नन्वत्र कृतादिक्रमेण कर्तृकुलग्रामदेशत्यागा वक्तव्या धर्मप्राबल्येना-धर्मदौर्बल्यात् । तथा हि यत्र चतुष्पात्सकलो धर्मस्तत्रा ऽधर्मस्यैकपात्त्वेन कर्तृमात्रनिष्ठतया सकलदेशाभिभावकत्वं न सम्भवतीति कर्तृमात्रत्याग उचितो यत्र पुनरधर्मश्चतुष्पाद्धर्मश्चैकपात्तत्र धर्मस्य कर्तृमात्रनिष्ठतया अधर्मस्य सकलदेशव्यापकत्वसम्भवाद् देशत्याग उचित एवं त्रेताद्वापर-योरपि तत्कथमुच्यते कृते देशत्यागः कलौ कर्तृत्याग इत्यादि ।

उच्यते । नात्र धर्माधर्मयोः प्रबलदुर्बलभावो देशादित्यागे प्रयो-जकः किन्तु शक्यशक्ती । तथा हि कृते पतितपुरुषाक्रान्तदेशपरिहारे देशान्तरस्यातथाविधस्योपलब्धिः सम्भवतीति देशत्यागः शक्यते कर्तुं कलौ तु पतितप्रायपुरुषाक्रान्तत्वात्सकलदेशस्य त्यागो ऽशक्य एवेति कर्तृमात्रत्यागो विधीयते । नन्वेकस्य पातित्ये देशादीनां त्यागः कथं तेषामकर्तृत्वेनासंसर्गित्वेन च पातित्यनिमित्ताभावात्संसर्गे तु वाक्यान्त-रेणैव वर्जनादिति चेत् सत्यम् । देशादित्यागे संसर्गप्रकारेष्वपरिगणितस्यापि तद्देशवासादेरनेनैव वाक्येन तत्तद्युगेष्वसाधारण्येन संसर्गप्रकारत्वं बोध्यत इति कल्प्यते । अन्यथा ऽदृष्टार्थतादेशत्यागादीनां स्यात् । वक्ष्यति च कृते सम्भाषणादेवेत्यादि तस्मात्सुष्ठूक्तं त्यजेद्देशमित्यादि ।

तदाह बृहत्पराशरः ।

त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् ।
द्वापरे कुलमेकं तु कर्तारं तु कलौ युगे ॥ इति ।

देशादित्यागे हेतुरुक्तः पाद्मे ।

देशग्रामकुलानि स्युः पापभाञ्जि कृतादिषु ।
कलौ तु केवलं कर्ता भाजनं पुण्यपापयोः ॥ इति ।

प्रतियुगमधर्मजनकस्थानत्यागव्यवस्थावदधर्मजनकत्याज्यनिमित्त-व्यवस्थामाह ।

कृते सम्भाषणादेव त्रेतायां स्पर्शनेन च ।
द्वापरे त्वन्नमादाय कलौ पतति कर्मणा ॥ २६ ॥

कृते कृतयुगे पतितस्य संभाषणात्प्रीत्या परस्पराभिलापात्पतति एवकारो व्यवस्थापोद्बलनार्थः । न कर्मव्युदासार्थः । तस्य चतुर्ष्वपि युगेषु पातकत्वात् । त्रेतायां स्पर्शनेन परस्परमङ्गसंपर्केण चकारो ऽप्ये-वकारार्थः । द्वापरे त्वन्नमादाय पतितस्वामिकान्नभोजनेन कलौ कर्मणैव निषिद्धेन ब्रह्महत्यादिना पतति द्विजातिकर्मानर्हो भवति । कृतादिषु सम्भाषणादिव्यवस्थापनस्य कलावपरिहार्यत्वमभिप्रेत्य परिहार्ये तु कथं चित्कर्मेति तावन्मात्रप्रतिषेधः । कर्मशब्दोपादानसामर्थ्यान्मानसवाचिक-व्यापारयोः कलावपातकत्वं ध्वनितम् । तथा च भागवते ।

नानुद्वेष्टि कलिं सम्राट् सारङ्ग इव सारभुक् ।
कुशलान्याशु सिध्यन्ति नेतराणि कृतानि यत् ॥ इति ।

सारङ्गवत्सारग्राही राजा परिक्षित्कलिं न जघान यतो ऽस्मिन्कु-शलानि पुण्यानि मनसा वचसा च कृतानि सिध्यन्ति नेतराण्यकुशलान्य-पुण्यानि यतस्तानि कृतान्येव कायिकव्यापारविषयाण्येव सिध्यन्तीत्यर्थः । एतेन पूर्वोक्तेषु देशादित्यागेष्वप्येतानि निमित्तानि दर्शितानि यथा कृते सम्भाषणमात्रात्पातित्यं, तच्चैकदेशवासे ऽवश्यम्भावीति देशस्यैव त्यागः । त्रेतायां स्पर्शनं स च एकग्रामवासेऽवश्यं भावीति ग्रामस्यैव त्यागः । द्वापरे त्वन्नभोजनेन, तच्चैककुलवासेऽवश्यम्भावीति कुलस्यैव त्यागः । कलौ तु कर्मणैवेति कर्तृमात्रत्याग इति । तदाह बृहत्पराशरः ।

कृते सम्भाष्य पतति त्रेतायां स्पर्शनेन तु ।
द्वापरे भक्षणे ऽन्नस्य कलौ पतति कर्मणा ॥ इति ।

एतेन ग्रामणीर्वा यथोक्तरीतिन्यायेनाकर्तरि देशादौ पापसम्भवो न सम्भवतीति चोद्यं निरस्तम् । सम्भाषणादीनां पापहेतूनां सम्भवात् ।

नमु चतुर्णामेव निमित्तानां युगचतुष्टये व्यवस्थापने

संलापस्पर्शनिश्वाससहयानाशनाशनात् ।

याजनाध्यापनाद्यौनात्पापं सङ्क्रमते नृणाम् ॥

इत्यादिवाक्यैर्निमित्तान्तरपरिगणनमनर्थकं स्यादिति चेन्न । तेषां संवत्सरान्ते पातित्यापादकत्वात् मूलवचनोक्तानां तु कृतादिषु सद्यःपातित्यजनकत्वात् सद्यःपातित्यहेतुकर्मसाहचर्यात् । तथा च सम्भाषणादिभिः कलौ न सद्यः पातित्यं कृतादिष्विव किं तु कर्मणैव । सम्भाषणादिभिस्तु संवत्सरान्ते ऽपि कलौ न पातित्यं किं तु पतिततुल्यतामात्रम् । "भवेदूर्ध्वं तु तत्समः" इति वक्ष्यमाणत्वात् ।

एते महापातकिनस्तत्संसर्गी च पञ्चमः ।

एतैः सह समायोगं यः करोति दिने दिने ॥

तुल्यतां याति सो ऽप्याशु कलौ संवत्सरे गते ।

इति पाद्मवाक्याच्च । न चैतावतैव पातित्यं गम्यते, राजसमो मन्त्रीति वत्तत्साम्यबोधकत्वे ऽपि तस्यानवबोधकत्वात् ।

अत एव "संसर्गदोषः पापेष्विति" संसर्गदोषाभावः कलिवर्ज्यप्रकरणेऽभिहितः सङ्गच्छते । न चैवं संसर्गमाचरन्विप्र इत्यादिना अग्रे प्रायश्चित्ताभिधानमसङ्गतमिति वाच्यम् । तस्य संसर्गोत्थपापविषयत्वेन पातित्यविषयत्वाभावात् । दोषः पातित्यं "भवेदूर्ध्वं तु तत्समः" इति साम्याभिधाने ऽपि तत्प्रायश्चित्तानभिधानाच्च । तच्च तत्रैव यथासम्भवं व्याख्यास्यते । न च कर्मणः सर्वत्रा ऽपि सद्यःपातकत्वेन कलाविति व्यर्थम् । अन्यत्र सम्भाषणादेस्तस्य च सद्यःपातकत्वं कलौ तु केवलस्यैवेत्यर्थात् । तस्मात्कलौ कर्मणैव सद्यःपातित्यं न संसर्गेण यौनादिना ऽपि ।

न च यौनस्रौवमौख्यैः सद्यः पततीति विष्णुवाक्यविरोधः । तेषां कृतविषयमुखसम्भवसम्भाषणाध्यापनसाहचर्येण कृतादिविषयत्वात् । तथा हि मुख्यस्य मुखसम्भवाप्ताध्यापनस्य सम्भाषणत्वेन सम्भाषणेऽन्तर्भावः । यौनस्य मैथुनस्य योनिलिङ्गस्पर्शत्वेन स्पर्शेऽन्तर्भावः । स्रौवस्य याजनस्य पुरोडाशादिभक्षणत्वेनाशनेऽन्तर्भाव इति सर्वं सुस्थम् ।

इदानीं प्रसङ्गात्महापुरुषादिशापपरिपाकहेतुकालव्यवस्थामाह ।

कृते तात्क्षणिकः शापस्त्रेतायां दशभिर्दिनैः ।
द्वापरे चैकमासेन कलौ संवत्सरेण तु ॥ २७ ॥

कृतयुगे तात्क्षणिकः स एव क्षणः तत्र भवं तत्क्षणे भवस्तात्क्षणिकः शापः शापपरिपाको अनिष्टाशंसनं, त्रेतायां दशभिर्दिनैरहोरात्रैः, द्वापरे तु एकेन मासेन त्रिंशद्दिनसमूहेन, कलौ संवत्सरेण द्वादशमाससमूहेन भवतीति । अयमर्थः कृते धर्मस्य प्राबल्येन शप्तुः परानिष्टविषयिणी वाक्सिद्धिस्तत्कालमेव भवति कलौ तु धर्मदौर्बल्यात्संवत्सरेणेति । एवं त्रेताद्वापरयोरपि योज्यम् ।

तदाह बृहत्पराशरः ।

कृते तात्क्षणिकः शापस्त्रेतायां दशभिर्दिनैः ।
मासेन द्वापरे ज्ञेयः कलौ संवत्सरेण तु ॥ इति ।

शाप इत्याशीर्वादस्याप्युपलक्षणं न्यायसाम्यात् ।

ननु

यत्कृते दशभिर्वर्षैस्त्रेतायां हायनेन च ।
द्वापरे यच्च मासेन ह्यहोरात्रेण तत्कलौ ॥
तपसो ब्रह्मचर्यस्य जपादेश्च फलं द्विजाः ।
प्राप्नोति पुरुषस्तेन कलिः साध्विति भाषितम् ॥

इत्यादिविष्णुपुराणादिवाक्यैः कलौ धर्मस्याशुफलत्वप्रतिपादनात्कथमुच्यते संवत्सरेण शापपरिपाक इति । सत्यम् । कृतादिषु विलम्बेन फलजनकत्वमधर्मानभिभवात् । कलौ त्वविलम्बेन धर्मोत्पत्तावपि विलम्बेन फलत्वाभिधानात् । तदेतत्तत्रैवोक्तम् ।

धर्मसंसाधने क्लेशो द्विजातीनां कृतादिषु ।
अत्यल्पेनैव यत्नेन धर्मः सिध्यति वै कलौ ॥
धर्मोत्कर्षमतीवात्र प्राप्नोति पुरुषः कलौ ।
स्वल्पायासेन धर्मज्ञास्तेन तुष्टोऽस्म्यहं कलेरिति ॥

यद्वा विवादे सत्यासत्यनिर्णायकशपथपरिपाककालव्यवस्थामाह ।

Digitized by Google

शापः शपनं शपथ इति यावत् । "शपनं शपथः पुमानि"ति कोशात् स च विवादे सत्यासत्यनिर्णयाय देवतादिस्पर्शनम्, तत् कृते तत्त्वकमेव निर्णायकम् । त्रेतायां दशभिर्दिनैर्द्वापरे माससमात्रेण कलौ संवत्सरेण ।

कलौ द्वादशभिर्मासैः शपथः परिपच्यते । इति वायुपुराणात् ।

यत्तु कोशपानस्य शपथत्वे ऽपि चतुर्दशभिर्दिनैर्निर्णायकत्वम् ।

अर्वाक्चतुर्दशादह्नो यस्य नो राजदैविकम् ।
व्यसनं जायते घोरं स शुद्धः स्यान्न संशयः ॥

इति योगीश्वरादिभिरुक्तं तत्कृतादिषु कोशपानमात्रविषयम् । न शपथान्तरविषयम् । कोशपानं तु भक्तस्यैव तस्याभिधानात् । याज्ञवल्क्यादिस्मृतेर्युगान्तरविषयत्वाच्च ।

उक्तं च

कृते तु मानवा धर्मा इति ।
मनुर्यो याज्ञवल्क्यश्च वसिष्ठः प्राह निष्कृतिं ।
सा कृतादिषु वर्णानां सति धर्मे चतुष्पदे ॥ इति वृहत्पाराशरीयाच्च ।

दानमेव कलौ परमित्युक्तं तत्र गुणतारतम्येन फलतारतम्यं वक्तुं तदेव तावद्विभजते ।

अभिगम्य कृते दानं त्रेतास्वाहूय दीयते ।
द्वापरे याचमानाय सेवया दीयते कलौ ॥ २८ ॥

कृते अभिगम्य प्रतिग्रहीतृसकाशं गत्वा दानं क्रियते त्रेतासु बहुवचनं पात्रबहुत्ववत्कृतद्वापरादिषु वा जातावेकवचनम् । प्रतिग्रहीतारमाहूय तस्मै दीयते द्वापरे स्वयमेवागत्य मह्यं इदं देहीति याचमानाय प्रतिग्रहीत्रे दीयते कलौ सेवया तदाज्ञाकरणेन दीयते । अत्र वर्तमानापदेशाद्युगधर्मकथनमात्रं मतं न तु दानगुणव्यवस्थापनम् । अन्यथा सेवादानस्यातिनिष्फलतोपसंहाराद्बुधविरोधः स्यात् । तदाह वृहस्पतिः

कृते प्रदीयते गत्वा त्रेतास्वानीयते गृहे ।
द्वापरे च प्रार्थयतः कलावनुगमान्विते ॥

Digitized by Google

बृहत्पराशरो ऽपि ।

अभिगम्य कृते दानं त्रेतास्वाहूय दीयते ।
द्वापरे याचमाने तु कलौ सेवाय दीयते ॥

इदानीं तत्फलतारतम्यमाह ।

अभिगम्योत्तमं दानमाहूयैव तु मध्यमम् ।
अधमं याचमानाय सेवादानं तु निष्फलम् ॥ २६ ॥

अभिगम्य यद्दानं तदुत्तममनन्तफलम् । आहूय यद्दानन्तन्मध्यमं सहस्रगुणफलं याचमानाय यद्दानं तदधमं पञ्चशतगुणफलं सेवादानं तु निष्फलं फलाजनकमिति ।

तदुक्तं पुराणसारे ।

गत्वा प्रदीयते दानं तदनन्तफलं स्मृतम् ।
सहस्रगुणमाहूय याचितं तु तदर्द्धकम् ॥
अभिगम्य तु यद्दानं यद्वा दानमयाचितम् ।
विद्यते सागरस्यान्तो दानस्यान्तो न विद्यते ॥ इति ।

यद्यपि "याचिते नाऽपि दातव्यं श्रद्धापूतं तु शक्तितः" इति योगिवाक्येन याचिते ऽपि दानमुक्तम् । तथाऽपि याचितेन श्रद्धापगमे सति यद्दानं तदधममिति द्रष्टव्यम् । श्रद्धापूतमिति वचनात् । यद्यपि सेवादानं न सर्वात्मना निष्फलं तस्य तामसत्वेन तिर्यग्योन्युपभोग्यत्वात् । तथापि ऐहिकामुष्मिकफलहेतुत्वाभावान्निष्फलमिति ।

तदुक्तं गीतासु

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥

विष्णुधर्मोत्तरे ।

तामसानां फलं भुङ्क्ते तिर्यक्त्वे मानवः सदेति ।

स्कान्दे ऽपि वृथादानान्युपक्रम्य

"परिचारकाय भृत्याय सर्वस्य पिशुनाय च ।
इत्येतानि च राजेन्द्र वृथा दानानि षोडश" ॥ इति ॥

Digitized by Google

अभिगम्य दानस्योत्तमत्वाभिधानं सेवादानस्य निष्फलत्वाभिधानं चानुष्ठेयत्वाननुष्ठेयत्वप्रतिपादनाय ।

तदाह बृहत्पराशरः

अभिगम्योत्तमं दानमाहूतं चैव मध्यमम् ।
अधमं याचमानं स्यात्सेवादानं तु निष्फलमिति ॥

कृतादिषु धर्मभेदे नृणां युगरूपानुसरणे हेतुरुक्तस्तच प्रस्तुतत्वात्कलिस्वरूपं विशेषतः प्रपञ्चयति ।

जितो धर्मो ह्यधर्मेण सत्यं चैवानृतेन च ।
जिताश्चोरैश्च राजानः स्त्रीभिश्च पुरुषाः कलौ ॥३०॥

धर्मो विध्यर्थः सन्ध्यास्नानादिरधर्मेण तत्कालनिषिद्धेन निद्रालस्यादिना जितो ऽभिभूतः सत्यं साक्षिसभ्यादिवाक्येषु अनृतेन मिथ्यावचनेन तिरस्कृतं चोरैः परस्वापहारतत्परै राजानो ऽन्यायमार्गानुवर्तिनो जितास्तिरस्कृताः स्त्रीभिर्गृहिणीभिर्गृहकार्यचर्चायां पुरुषाः पराभूताः । यद्वा स्त्रीभिः स्वपरसाधारणीभिः स्वविषये धैर्यप्रच्यावनेनाभिभूताः पुरुषाः । अत्र धर्मादीनामभिभवकथनेन दुर्बलत्वमधर्मादीनां चाभिभावकत्वकथनेन प्रबलत्वमुक्तम् ।

तदाह बृहस्पतिः

तिष्ये ऽधर्मस्त्रिभिः पादैर्धर्मः पादेन संस्थितः ॥ इति ।

बृहत्पराशरे ऽपि

धर्मश्च सत्यमायुश्च तुर्यांशेन कलौ युगे ।
पुरुषाश्च जितास्त्रीभिः राजानो दस्युभिर्जिताः ।
जितो धर्मश्च पापेन अनृतेन तथा ऋतमिति ॥

किं च ।

सीदन्ति चाग्निहोत्राणि गुरुपूजा प्रणश्यति ।
कुमार्यश्च प्रसूयन्ते अस्मिन्कलियुगे सदा ॥ ३१ ॥

अग्निहोत्रस्य नित्यत्वात्तदुत्सादो निन्दातिशयनिमित्तम् ।

ननु

अग्निहोत्रं गवालम्भं सन्यासं पलपैतृकम् ।
देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत् ॥

इत्यनेन अग्निहोत्रस्य कलौ निषेधात्कथं तदभावोऽनिन्द्यानिमित्तम् । उच्यते । गोनराश्वमेधानामग्निहोत्रानन्तरभाविनां निषेधानुपपत्तेरेवाग्निहोत्रस्य कलौ गमिका तदभावे तेषामप्राप्यत्वात् । तथा अग्निहोत्रहवणीलेहस्य त्रिठापरिग्रहस्य सौत्रामण्यां सुराग्रहस्य मद्यत्रीताया विप्राणां शामित्रसोमविक्रययोः निषेधश्च कलावग्निहोत्राभावे नोपपद्येत । तस्माद्विशेषनिषेधः सामान्याभ्यनुज्ञानार्थं इति न्यायादस्त्यग्निहोत्रं कलौ । न चेदं लिङ्गं निषेधश्रुतेर्न बाधकमिति वाच्यम् । तयोः कलिपूर्वापरभागविषयत्वेन विषयभेदकल्पनायानुपपत्तिः । तथा हि । द्विविधं तावदग्निहोत्रं सर्वाधानेनार्द्धाधानेन च । तत्र सर्वाधानेन चतुश्चत्वारिंशच्छतवर्षपर्यन्तमेव कार्यं नोपरिष्टात् ।

तथाह व्यासः ।

चत्वार्यब्दसहस्राणि चत्वार्यब्दशतानि च ।
कलेर्यदागमिष्यन्ति तदा त्रेतापरिग्रहः ॥
सन्यासश्च न कर्तव्यो ब्राह्मणेन विजानता ॥ इति ।

अत्र त्रेतापरिग्रह इति वदन्सर्वाधानमेवाभिप्रेतवान् ।

अत एव लौगाक्षिः

अर्धाधानं स्मृतं श्रौतस्मार्ताग्न्योश्च पृथक्कृतिः ।
सर्वाधानं तयोरैक्यकृतिः पूर्वयुगाश्रितेति ।

युगस्य पूर्वं पूर्वयुगं कलिपूर्वभाग इति व्याख्येयम् । अन्यथा व्यासवाक्याद्विचमूलत्वापत्तेः । अर्धाधानं तु यावद्वर्णवेदविभागं कार्यम् ।

तदाह देवलः

यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्तते ।
सन्यासं चाग्निहोत्रं च तावत्कुर्यात्कलौ युगे ॥ इति ।

नन्विदमनुवादकं न व्यवस्थापकं वैदिककर्मणो वर्णवेदसाध्यत्वेन तदभावेऽर्थत एव तन्निवृत्तेः । मैवम् । तात्पर्यानवगमात् । तथा हि

वर्णानां विभागो नाम योनिवृत्तिधर्मलिङ्गसंस्कारानपगमाभ्यां यथावस्थितत्वम् । वेदप्रवृत्तिश्चानुष्ठीयमानं पदार्थाभिप्रायश्रुत्यनुसन्धानसामर्थ्यं तदुभयं यावत्तावदग्निहोत्राद्यनुष्ठेयं नोपरिष्टादित्यर्थः । यद्यग्निहोत्रं सामान्येनोपात्तं तथा ऽपि सर्वाधानव्यवस्थापकाविरोधेनार्धाधानं विवक्षितमित्यलमतिप्रपञ्चेन ।

एतेन सन्यासे ऽपि विवादः पराहतः । अत एव—

—"यतेस्तु सर्ववर्णेषु भिक्षाचर्याविधानत" इत्यनेन यतेः सार्वकालिकभिक्षाप्रतिषेधः कलिवर्ज्येषु संन्यासाश्रमे लिङ्गम् । व्यवस्थाद्वयं तु त्रिदण्डैकदण्डाभिप्रायेणेति ज्ञेयम् ।

अग्निहोत्राणि इति बहुवचनादन्यान्यपि श्रौतस्मार्तकर्माणि सीदन्ति नश्यन्ति ।

तथा च महाभारते

यज्ञे प्रतिनिधिः पार्थ दाने प्रतिनिधिस्तथा ।
व्रते प्रतिनिधिश्चैव तस्मिन्काले प्रवर्तते ॥
निवृत्तयज्ञस्वाध्यायाः स्थालीपाकविवर्जिताः ।
ब्राह्मणाः सर्वभक्ष्याश्च भवन्तीह गते युगे ॥

गुरूणां पितृश्वश्रादीनां पूजा अलंघनीयता प्रणश्यति ।

तथा च मात्स्ये ऽपि

पितॄन् पुत्रा नियोक्ष्यन्ति वध्वः श्वश्रूश्च कर्मणा ।
वाक्शरैस्तर्जयिष्यन्ति गुरुं शिष्यास्तथैव च ॥

भारते ऽपि

न त्रंस्यति पिता पुत्रं पुत्रश्च पितरं तथा ।
भार्या च पतिशुश्रूषां करिष्यति कदा च नेति ॥

कुमार्यः कन्याः कुमाराश्च प्रसूयन्ते प्रजनयन्ति ।

तथा च भारते ।

पञ्चमेवाथ षष्ठे वा वर्षे कन्या प्रसूयते ।
सप्तवर्षाष्टवर्षाश्च प्रजनिष्यन्ति वै नराः ॥

सप्तवर्षोऽष्टवर्षाश्च स्त्रियो गर्भधरा नृप ।
दशद्वादशवर्षाणां पुंसां पुत्रा भवन्ति च ॥ इति ।

अस्मिन्वर्तमाने कलियुगे सदा कल्पान्तरवर्तिनि च कलियुगे ऽप्येवैव स्थितिः ।

तदुक्तं विष्णुपुराणे

यदा यदा सतां हानिर्वेदमार्गानुसारिणाम् ।
तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः ॥

भारते ऽपि ।

यथर्तावृतुलिङ्गानि नानारूपाणि पर्यये ।
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥ इति ।

यद्वृदमेवं व्याख्येयम् । सीदन्ति चाग्निहोत्राणीत्यत्र वर्तमानापदेशेन भाव्यव्यापारमात्रं प्रतीयते । तस्य च भावकव्यापारमृते अन्यथाऽनुपपत्त्या भावकव्यापारः कल्प्यते । अष्टाकपालो भवतीत्यादिवत् । तथा च त्रैवर्णिकाः कलावग्निहोत्राणि सादयेयुरित्यर्थः सिध्यति । उक्तं च अग्निहोत्रं गवालम्भमित्यादि पूर्वोदाहृतवचनं तस्य च व्यवस्था पूर्वोदाहृतैव । तथा गुरुपूजा प्रणश्यति इत्यत्रा ऽपि प्रयोज्यव्यापारेण प्रयोजकव्यापारकल्पनावश्यम्भावाद्गुरुपूजां प्रणाशयेदित्यर्थः सिध्यति । तदुक्तं कलिवर्ज्यप्रकरणे दक्षिणा विधिचोदितेति । विधिचोदिता च दक्षिणा "गुरवे तु वरं दत्त्वे"त्यादिना विहिता । तथा कुमार्यश्च प्रसूयन्ते इत्यत्रापि कुमारीः प्रसावयेदित्यर्थः सिध्यति । तथा च निरुक्ते स्त्रीणां दानविक्रयातिसर्गाः विद्यन्ते न पुंसः पुंसो ऽपीत्येके शौनःशेपे दर्शनात् । दृश्यते च स्त्रीमण्डले मत्स्यादेशे ज्येष्ठकन्यापुत्रयोरपि विवाहः । अन्येषामतिसर्गः । सोऽपि निषिद्धः कलिवर्ज्यप्रकरणे बृहन्नारदीये । द्विजानामसवर्णासु कन्यासूपगतं तथेति । असवर्णासूपगतस्तथा इत्यन्वयः । न च असवर्णास्विति कन्याविशेषणम् । सवर्णान्याङ्गनादुष्टैः संसर्गः शोधितैरपीति असवर्णासु कन्यासु उपगतं तथेति । असवर्णासूपगमनस्याधिक-

निषेधात् । तथा चात्रपशब्दोऽपि निषेधार्थः सिध्यति । तत्रपस्मर्तव्यमिति शबरस्वामिना पशब्दस्य निषेधार्थकत्वप्रगठनादित्यलम् ।

यदुक्तं तपः परं कृतयुग इत्यादि, तत्र हेतुमाह ।

कृते त्वस्थि गताः प्राणास्त्रेतायां मांसमाश्रिताः ।
द्वापरे रुधिरं चैव कलौ त्वन्नादिषु स्थिताः ॥ ३२ ॥

प्राणाः पञ्चापि वायवः प्राणापानसमानोदानव्यानाः हृदयादिस्थानस्थितास्ते कृते अस्थ्यन्तर्वर्तिनो यावदस्थ्यव्याकुला त्रेतायां यावन्मांसं द्वापरे च यावद्रुधिरं कलौ तु यावदन्नोपभोगं चादिशब्दात्पानीयपानं च यावत् । तावत्स्वस्थता अव्याकुलाः चक्षुरादीन्द्रियाणि अपि प्राणाधीनव्यापारत्वात् प्राणशब्देनोपलक्ष्यन्ते न वै वाचो न चक्षूंषि श्रोत्राणि न मनांसीत्याचक्षते प्राणा इत्येवाचक्षत इति छान्दोग्यश्रुतेः । तान्यपि यावदस्थ्याद्यव्याकुलानीति तथाच कृते कृच्छ्रादितपसा मांसाद्युपक्षयेऽप्यस्थ्नामनुपक्षयादव्याकुलप्राणतया तपस्सिद्धिर्न त्रेतायां, तत्र बाह्येन्द्रियवृत्तिनिरोधेन रुधिरादिद्रवधातुक्षये ऽपि न मांसोपक्षय इत्यव्याकुलप्राणतया ज्ञानसिद्धिर्न द्वापरे तत्र तु यागीयव्रतपानेनान्नत्यागे ऽपि न रुधिरक्षय इति यागसिद्धिर्न कलौ कलौ त्वन्नापरिहारेणापि दानसिद्धिरिति सर्वयुगेषु प्राणाधाराबाधेन धर्मानुष्ठानं प्रदर्शितम् । तत्र तपसो मांसोपशोषकत्वमुक्तं स्कान्दे

वेदोक्तेन प्रकारेण कृच्छ्रचान्द्रायणादिभिः ।
शरीरशोषणं यत्तत्तप इत्युच्यते बुधैरिति ॥

इन्द्रियनिरोधस्य रुधिरोपशोषकत्वमुक्तमुत्तरगीतासु ।

इन्द्रियाणां निरोधेन देहे नश्यन्ति धातवः ।
देहे नष्टे कुतो बुद्धिर्बुद्धिनष्टे कुतो ज्ञतेति ॥

यागे दीक्षितस्यान्नत्याग उक्तः कल्पकारैः पीवा दीक्षते कृशो यजेतेति यदा ऽस्य चक्षुषो कृष्णं नश्यत्यथ सुमेध्यो भवतीति च । कलौ तु दानेषु नात्यन्तिको ऽन्नत्यागो ऽङ्गमिति न दानेषु प्राणपीडा ततश्च उत्तरोत्तर-

Digitized by Google

युगेषु पूर्वपूर्वयुगधर्मानुष्ठानमशक्यमेव पूर्वपूर्वयुगेषु तूत्तरोत्तरयुगधर्मा अपि स्वनुष्ठेया इति सर्वं सुस्थम् ।

तदाह बृहत्पराशरः ।

> कृते त्वस्थिगताः प्राणास्त्रेतायां मांसमेव च ।
> द्वापरे रुधिरं यावत्कलावन्नाद्यमेव त्विति ॥

नन्वेवं धर्मे सत्याग्निहोत्राचारविरहितेषु द्विजेषु कलिधर्मा दानादयोऽपि कथं साङ्गाः स्युः तेषामपि दातृदेययाजादिशुद्ध्यधीनत्वादित्यत आह ।

युगे युगे च ये धर्मास्तत्र तत्र च ये द्विजाः ।
तेषां निन्दा न कर्तव्या युगरूपा हि ते द्विजाः ॥ ३३ ॥

युगे युगे प्रतियुगं ये धर्मा गवालम्भनविधवानियोजनादयः कृतयुगादौ, स्वयं कृष्णवेदैकदेशाध्ययनादयश्च कलौ तत्र तत्र युगे तदनुष्ठातारो ये द्विजाश्च ब्राह्मणक्षत्रियवैश्याश्चकाराच्छूद्रादयोऽपि तेषां धर्मिणां द्विजानां च निन्दा अधर्माभासत्वोद्भावनेन दोषकीर्तनं न कर्तव्यं तत्तद्युगविहितत्वेन वास्तवाधर्मत्वाभावात्तदेवाह हि यतस्ते धर्माः द्विजाश्च युगरूपास्तत्तद्युगानुरूपाः वीप्सायां पुनर्वचनं प्रतियुगं धर्मवैलक्षण्यवद् द्विजातीनामपि धर्मवैलक्षण्यप्रतिपादनाय तच्च सर्ववर्णकन्यापरिणयेन युगान्तरे स्पष्टमेव मूर्धावसिक्तादीनामपि द्विजत्वात् ।

तदुक्तमारण्यके ।

> भूमिर्नद्यो नगाः शैलाः सिद्धा देवर्षयस्तथा ।
> कालेन सह वर्तन्ते तथा भावा युगे युगे ॥
> कालं कालं समासाद्य नराणां नरपुङ्गव ।
> बलवर्ष्मप्रभावा हि प्रणश्यन्त्युद्भवन्ति चेति ॥

वर्ष्म शरीरं प्रभावो धर्मातिशयः । इदमत्रोक्तम् । यथा कृतादौ गवालम्भादिधर्माणां लोकविरोधेऽपि व्यासादिद्विजानां चानेकनिषिद्धानुष्ठातृत्वेऽपि न निन्दा प्रभावाधिक्येन तत्कालानुरूपत्वात् । तदुक्तमापस्तम्बेन ।

Digitized by Google

सरूपाणामेकशेष एकविभक्तौ । १ । २ । ६४ ॥

विभक्तिः सारूप्ये उपलक्षणं नत्वेकशेषे निमित्तम् । उत्तरसूत्रादेवकारोऽपकृष्यते । एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते अन्ये लुप्यन्ते ॥ घटौ । घटाः । क्षितिक्षान्त्योः क्षमा । क्षासेन सम्यक् क्षमयोश्च तस्मिन्निति श्रीहर्षः । प्रियेनरेन्द्रस्य निरीक्ष्य तस्येति च । सरूपाणां किम् । घटपटौ । एवकारापकर्षः किम् । मातृमातृभ्याम् । अत्र जननीपरिच्छेत्तृवाचिनोर्मातृशब्दयोर्माभूत् । एवकारापकर्षे तु भ्यामादौ सारूप्येऽप्योजसादिषु वैरूप्यान्न दोषः । एकविभक्तौ किम् । हरिणी मृगी हरितवर्णा च हरिण्यौ । इहापि यथा स्यात् । अन्यथा पुंवद्भावेन तद्धितादौ वैरूप्यान्न स्यात् । एकेति किम् । कमल कमलौ कमल इत्यादावेव स्यात् । अन्यच्च स्वसरि च स्वस्रोश्च स्वसृष्वित्यादौ क्वापि न स्यात् । विभक्तिभेदेन वैरूप्यात् । तथोक्तौ तु समानायां विभक्तौ यानि स्वरूपाण्येवेत्यर्थान्न दोषः । एकशेष इत्यत्रैकेति किम् । द्विबहूनामपि शेषो माभूत् । शेष इति किम् । अश्वश्चाश्वश्चेत्यादौ द्व्युदात्तवत्त्वादिरूपान्तरेण तादृश एक आदेशो माभूत् ॥ स्वरभिन्नानां यस्योत्तरः स्वरविधिः स शिष्यते इति वक्तव्यम् ॥ * ॥ अक्षौ । अक्षस्यादेवनस्येति फिट्सूत्रेण शकटाक्ष आद्युदात्तः । देवनाक्ष तु फिष इत्यन्तोदात्तः । परत्वादाद्युदात्तस्य शेषः ॥ विरूपाणामपि समानार्थानाम् ॥ * ॥ वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ । कुटिलदण्डौ ॥

वृद्धो यूना तल्लक्षणश्चेदेव विशेषः । १ । २ । ६५ ॥

यूना सहोक्तौ गोत्रं शिष्यते गोत्रयुवप्रत्ययमात्रकृतं चेत्तयोः

कृत्स्नं वैरूप्यं स्यात् ॥ गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ । वृद्धः किम् । गर्गगार्ग्यायणौ । यूना किम् । गर्गगार्ग्यौ । तल्लक्षणः किम् । भागवित्तिभागवित्तिकौ । भागवित्तिशब्दादृद्धोषायेकेजन्ताद्यूनि वृद्धाट्ठक् सौवीरेषु बहुलमिति कुत्सायां ठक् । अतोऽत्र कुत्सा सौवीरत्वञ्चापरो विशेषः । कृत्स्नं किम् । गार्ग्यवात्स्यायनौ ॥

स्त्री पुंवच्च । १ । २ । ६६ ॥

यूना सहोक्तौ वृद्धा स्त्री शिष्यते तदर्थश्च पुंवत् तल्लक्षण एव विशेषश्चेत् ॥ गार्गी च गार्ग्यायणश्च गर्गाः । अस्त्रियामित्यनुवर्तमाने यञञोश्चेति लुक् । दाक्षी च दाक्षायणश्च दाक्षी । तल्लक्षण इत्यादि किम् । भागवित्ती च भागवित्तिकश्च गार्गी च वात्स्यायनश्चेत्यादौ माभूत् ॥

पुमान् स्त्रिया । १ । २ । ६७ ॥

सरूपाणां मध्ये स्त्रिया सहोक्तौ पुमान् शिष्यते तल्लक्षण एव विशेषश्चेत् ॥ हंसी च हंसश्च हंसौ । सरूपाणां किम् । हंसश्च वरटा चेत्यत्र माभूत् । अन्यथा हंसत्वजातिसाम्येऽपि शब्दवैलक्षण्यस्य स्त्रीत्वपुंस्त्वमात्रप्रयुक्तत्वादेकशेषः स्यात् । नन्वेवमपि गौरियं गौश्चायं तयोः सहोक्तौ एतौ गावाविति नियमतो न स्यात् तल्लक्षणविशेषाभावादिति चेन्न । इयमयमिति पदान्तरगम्यस्य तल्लक्षणविशेषस्य सत्वात् । चेदेवशब्दोपादानसामर्थ्येन विशेषश्चेत्तल्लक्षण एवेत्यन्वयेन तदितरकृतविशेषविरहरूपे विशिष्टाभावे तात्पर्याच्च । स चेह विशेष्याभावादस्त्येव । इन्द्रेन्द्राण्यावित्यादौ तु पुंयोगकृतविशेषान्नैकशेषः । स्त्रीपुंसयोर्विशेषप्रयोजकता च प्रधानयोरेव गृह्यते । प्रधाने कार्यसंप्रत्ययात् । तेन ब्राह्मणीवत्सश्च ब्राह्मणवत्सा चेत्या-

Digitized by Google

द्वौ नेकशेषः। पुमान्स्त्रिया किम्। प्राक् च प्राची च प्राक्प्राच्यौ। प्रपूर्वो-ऽञ्चुः क्विन्नन्तादस्तातेरञ्चेर्लुकि तद्धितश्चासर्वेत्यव्ययत्वादलिङ्गः प्राक् शब्दः॥

भ्रातृपुत्रौ स्वसृदुहितृभ्याम्। १। २। ६८॥

भ्राता च स्वसा च भ्रातरौ। पुत्रश्च दुहिता च पुत्रौ॥

नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्। १। २। ६९॥

अक्लीबेन सहोक्तौ क्लीबं शिष्यते तच्च वा एकवत् स्यात्तल्ल-क्षण एव विशेषश्चेत्॥ शुक्लः पटः। शुक्ला पटी। शुल्कं वस्त्रम्। तदिदं शुक्लम्। तानीमानि शुक्लानि। अनपुंसकेनेति किम्। शुक्लञ्च शुक्लञ्च शुक्ले। अस्येति किम्। उत्तरसूत्रे एकवद्भावानुवृत्तिर्माभूत्। तल्लक्षण एवेति किम्। हिमहिमान्यौ। अरण्यारण्यान्यौ। इह मह-त्त्वकृतोऽपि विशेषः॥

पिता मात्रा। १। २। ७०॥

मात्रा सहोक्तौ पिता वा शिष्यते॥ माता च पिता च पि-तरौ। मातापितरौ॥

श्वशुरः श्वश्र्वा। १। २। ७१।

श्वश्र्वा सहोक्तौ श्वशुरो वा शिष्यते॥ श्वशुरौ। श्वश्रू-श्वशुरौ॥

त्यदादीनि सर्वैर्नित्यम्। १। २। ७२॥

सर्वैः सहोक्तौ त्यदादीनि नित्यं शिष्यन्ते॥ स च देवदत्तश्च तौ॥ त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते॥ *॥ स च यश्च यौ। पूर्वशेषोऽपि दृश्यते इति भाष्यम्। स च यश्च तौ। अहं च भवांश्च आवाम्॥ त्यदादितः शेषे पुंनपुंसकतो लिङ्गवचनानि॥ *॥

लिङ्गप्रतिपादकानीत्यर्थः । सा च देवदत्तश्च तौ । तच्च देवदत्ता च यज्ञदत्ता च तानि । पुन्नपुंसकयोस्तु परत्वान्नपुंसकं शिष्यते । तच्च देवदत्तश्च ते ॥ अद्वन्द्वतत्पुरुषविशेषणानामिति वक्तव्यम् ॥ * ॥ कुक्कुटमयूर्याविमे । मयूरीकुक्कुटाविमौ । अर्धं पिप्पल्यास्तत् अर्धपिप्पल्यौ च ते अर्धपिप्पल्यस्ताः ॥

ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री । १ । २ । ७३ ॥

एषु सहविवक्षायां स्त्री शिष्यते ॥ पुमान्स्त्रियेत्यस्यापवादः । गाव इमाः । ग्राम्येति किम् । रुरव इमे । पशुषु किम् । ब्राह्मणाः । सङ्घेषु किम् । एतौ गावौ । सङ्घो बहूनां गृह्यते सामर्थ्यात् । अन्यथैकशेषस्यानेकविषयत्वात् किं तेन । अतरुणेषु किम् । वत्सा इमे । बर्करा इमे ॥ अनेकशफेष्विति वक्तव्यम् ॥ * ॥ अश्वा इमे । कथमुष्ट्रा इमे इति । आरण्यत्वात् । इह सर्वत्र एकशेषे कृतेऽनेकाभावात् द्वन्द्वो न । तेन शिरसी शिरांसीत्यादौ समासस्येत्यन्तोदात्तः प्राण्यङ्गत्वादेकवद्भावश्च न । पन्थानौ पन्थान इत्यादौ समासान्तो न ॥

इति श्रीव्याकरणदीपिकायां वृत्तौ प्रथमस्याध्यायस्य
द्वितीयः पादः ॥

अथ प्रथमाध्यायस्य तृतीयः पादः ।

भूवादयो धातवः । १ । ३ । १ ॥

क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः ॥ धातुत्वाल्लडादयः । भवति । एधते ॥

उपदेशेऽजनुनासिक इत् । १ । ३ । २ ॥

उपदेश आद्योच्चारणम् । उपदेशेऽनुनासिकोऽजित्संज्ञः स्यात् ॥ प्रतिज्ञानुनासिक्याः पाणिनीयाः । एधते । स्पर्धते । अनुदात्तत्वादात्मनेपदम् । भवान् । उगित्वान्नुम् । लणसूत्रेऽकारस्येत्वाद्रप्रत्याहारः । उपदेशे किम् । अभ्र आं अपः । अच् किम् । मनिनो मकारस्य माभूत् । अनुनासिकः किम् । चिरिणोति ॥

हलन्त्यम् । १ । ३ । ३ ॥

इदं सूत्रमावर्तनीयम् । तत्रैकस्यायमर्थः । हलिति प्रत्याहारसूत्रेऽन्त्यमित्स्यादिति । एवञ्चादिरन्त्येनेत्यनेन हल्संज्ञायां सिद्धायां उपदेशेऽन्त्यं हलित्स्यादित्यपरस्यार्थ इति नान्योन्याश्रयः । शेते । ङित्वात्तङ् । अइउणादिसूत्रेषु णादीनमित्त्वादण् अच् इत्यादिप्रत्याहाराः ॥

न विभक्तौ तुस्माः । १ । ३ । ४ ॥

विभक्तिस्थास्तवर्गसकारमकारा इतो न स्युः ॥ रामात् । पचेरन् । अमलाः । पचतः । रामम् । अद्राक्षम् । विभक्तौ किम् । अचो यत् । अर्णाया युस् । इधादिभ्यः श्नम् । इदमस्थमुरितिथा-

Digitized by Google

पक्षादनित्यमिदम् । तेन किमोऽत् क्वेति सिद्धम् । श्रोत् इटोऽत् इत्यत्र तु मुखसुखार्थस्तकारो नान्त्यसंज्ञकः । तिस्तरापत्तेः ॥

आदिर्ञिटुडवः । १ । ३ । ५ ॥

उपदेशे आदिभूता एते इतः स्युः ॥ ञिइन्धी । इद्धः । टुवेपृ । वेपथुः । डुकृञ् । कृत्रिमम् । उपदेशे किम् । ञिकारीयति । आदिः किम् । पटूयति ॥

षः प्रत्ययस्य । १ । ३ । ६ ॥

प्रत्ययस्यादिः ष इत्स्यात् ॥ शिल्पिनि ष्वुन् । नर्तकी । प्रत्ययस्य किम् । षोडश । आदिः किम् । अविषः । महिषः । अविमहीभ्यां टिषच् ॥

चुटू । १ । ३ । ७ ॥

प्रत्ययाद्यौ इतौ स्तः ॥ चफञ् । कौञ्जायन्याः । जस् । ब्राह्मणाः । षण्डिकादिभ्यो ञ्यः । षाण्डिक्यः । चरेष्टः । कुरुचरी । सप्तम्यां जनेर्डः । उपसरजः । अन्नाण्णः । आन्नः । छफ-ठकानां ईय्, अन्त, इक, एय्, एते आदेशा वक्ष्यन्ते । चुञ्चुप्चणप्टी-टचान्तु यादित्वादुपदेशे प्रत्ययादित्वाभावान्नेत्त्वम् ॥

लशक्वतद्धिते । १ । ३ । ८ ॥

तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः ॥ ल्युट् । भवनम् । कर्तरि शप् । भवति । क्तक्तवतू निष्ठा । भूतः । भूतवान् । प्रियवशे वदः खच् । प्रियंवदः । ग्लाजिस्थश्च ग्स्नुः । जिष्णुः । भञ्जभासमिदो घुरच् । भङ्गुरम् । ङे । हरये । अतद्धिते किम् । चूडालः । लोमशः । कर्णिका । कर्णललाटात्कनलङ्कारे ।

अच क्ङिति चेति वृद्धिः स्यात् ॥ इर उपसङ्ख्यानम् ॥ * ॥ अरु-धत् । अरौत्सीत् । अवयवे अचरितार्थस्य स्वरितत्वस्य समुदाय-विशेषकत्वात्स्वरितेत्त्वप्रयुक्तमात्मनेपदम् । तेन रुन्धे इत्यादि सिद्धम् ॥

तस्य लोपः । १ । ३ । ९ ॥

तस्येतो लोपः स्यात् ॥ तथैवोदाहृतम् । तस्य ग्रहणं सर्व-लोपार्थम् । ञिटुडूनामलोऽन्त्यस्य माभूत् ॥

यथासंख्यमनुदेशः समानाम् । १ । ३ । १० ॥

समानां समसंख्यानां अनुदेशः सम्बन्धो यथाक्रमं स्यात् ॥ नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः । नन्दनः । ग्राही । पचः । अच स्वरितेनेत्यपकृष्यते । तेन ख्यत्यादित्यादौ नातिप्रसङ्गः । प्रति-ज्ञास्वरिताः पाणिनीयाः ॥

स्वरितेनाधिकारः । १ । ३ । ११ ॥

इत्थम्भूतलक्षणे तृतीया । अधिकारो विनियोगः । स्वरित-त्वयुक्तं शब्दस्वरूपमधिकृतं बोध्यम् ॥ प्रत्ययः परश्चेत्यादि यथेति दिक् ॥

अनुदात्तङित आत्मनेपदम् । १ । ३ । १२ ॥

अनुदात्तेत उपदेशे यो ङित्तदन्ताच्च धातोर्लस्य स्थाने आत्म-नेपदमेव स्यात् ॥ एधते । स्पर्धते । बोभूयते । ऋतीयते । शेते । उप-देशे किम् । चुकुटिषति । धातोः किम् । अच्युतत् । अदुद्रुवत् । कथं पुनर्धातोरिति लब्धम् । भ्वादिसूत्रान्मण्डूकानुवृत्त्या विभक्ति-विपरिणामात् । ननु विकरणेभ्यो नियमो बलीयानित्यस्य वृद्भ्यः स्यसनोरिति स्यग्रहणेन ज्ञापितत्वाच्चङ्क्तोर्न दोष इति चेन्न ।

उपजनिष्यमाणेनापि ङिता उपसर्गजातनिमित्तस्यापि परस्मैपदस्य बाधापत्तेः । नियमो बलीयाननित्यस्यापि पाक्षिकत्वाच्च । विकरण-व्यवधानेऽपि नियमप्रवृत्तिरित्यपि स्यग्रहणेन ज्ञापयितुं शक्यत्वात् ।

भावकर्मणोः । १ । ३ । १३ ॥

अनयोर्विहितस्य तस्यात्मनेपदमेव स्यात् ॥ सुप्यते । क्रियते । न चैवं कर्मणि घञ् न स्यात् को भवता लाभो लब्ध इति । अकर्तरि चेत्यस्य त्वपादानादिरवकाश इति वाच्यम् । तुल्य-जातीयस्य परस्मैपदस्यैव नियमेन व्यावर्तनात् । ननु लूयते केदारः स्वयमेवेत्यादौ कर्मवद्भावेऽपि शास्त्रातिदेशेनैतदपेक्षया परत्वाच्छे-षात्कर्तरीति परस्मैपदं स्यादिति चेन्न । तत्र प्राधान्यात्कार्यातिदे-शस्यैवोपगमादात्मनेपदस्यैव परत्वात् । शास्त्रातिदेशेऽपि शेषात्क-र्तरीत्यत्र कर्तरीति कर्तरि कर्मेत्यतोऽनुवर्त्य कर्तैव यः कर्ता न तु कर्मकर्ता तत्रेति व्याख्यानाच्च ॥

कर्तरि कर्मव्यतिहारे । १ । ३ । १४ ॥

क्रियाविनिमये द्योत्ये कर्तर्यात्मनेपदं स्यात् ॥ व्यतिलु-नीते । अन्यस्य योग्यं लवनं करोतीत्यर्थः । परस्परकरणमपि कर्म-व्यतिहारः । सम्प्रहरन्ते राजानः । श्नसोरल्लोपः । व्यतिस्ते । व्यतिषाते । व्यतिषते । तासस्त्योर्लोपः । व्यतिसे । धि च । व्यतिध्वे । ह एति । व्यतिहे । व्यत्यसे । व्यत्यास्त । व्यतिषीत । व्यतिराते२ । व्यतिभाते२ । व्यतिबभे । कर्तृग्रहणमुत्तरार्थम् ।

न गतिहिंसार्थेभ्यः । १ । ३ । १५ ।

कर्मव्यतिहारे आत्मनेपदं न स्यात् । व्यतिगच्छन्ति । व्य-तिघ्नन्ति ॥ प्रतिषेधे हसादीनामुपसंख्यानम् ॥ * ॥ हसादयो हस-

प्रकाराः शब्दक्रियाः। व्यतिहसन्ति। व्यतिजल्पन्ति॥ हरतेरप्रतिषेधः॥ * ॥ सम्प्रहरन्ते राजानः। कथं ततः सम्प्रहरिष्यन्तौ दृष्ट्वा कर्णेधनञ्जयाविति। योत्स्यमानाविति विवक्षितं न कर्मव्यतिहारः॥

इतरेतरान्योन्योपपदाच्च। १। ३। १६॥

परस्परोपपदाच्चेति वक्तव्यम्॥ * ॥ इतरेतरस्यान्योन्यस्य परस्परस्य वा व्यतिलुनन्ति॥

नेर्विशः। १। ३। १७॥

आत्मनेपदं स्यात्॥ निविशते। न्यविशत। अर्थवद्ग्रहणान्नेह। मधूनि विशन्ति भ्रमराः। कथमित्युक्त्वा मैथिलीं भर्तुरङ्के निविशतीं भयादिति। अङ्कानि विशतीमिति पाठः॥

परिव्यवेभ्यः क्रियः। १। ३। १८॥

अकर्त्रभिप्रायार्थमिदम्। परिक्रीणीते। विक्रीणीते। अवक्रीणीते। परस्परसाहचर्येणोपसर्गाणामेव ग्रहणान्नेह। वे क्रीणासीति। एकदेशविकृतस्यानन्यत्वाद्विशब्दोऽयम्॥

विपराभ्यां जेः। १। ३। १९॥

विजयते। पराजयते। प्राग्वदुपसर्गग्रहणान्नेह। वे जयसि। परा जयति सेना। परा। उत्कृष्टा॥

आङो दो ऽनास्यविहरणे। १। ३। २०॥

आङ्पूर्वाद्ददातेर्मुखविकसनादन्यार्थे वर्तमानादात्मनेपदं स्यात्॥ विद्यामादत्ते। अनास्येति किम्। मुखं व्याददाति। आस्यग्रहणमविवक्षितम्। विपादिकां व्याददाति। पादस्फोटो विपादिका। नदी कूलं व्याददाति॥ पराङ्गकर्मकान्न निषेधः॥ * ॥ व्याददते पिपीलिकाः पतङ्गस्य मुखम्। कथं व्यादत्ते विहगपति-

मुखं स्वकीयमिति । कर्त्रभिप्रायत्वात् । अकर्त्रभिप्रायार्थो ह्ययमारम्भः ॥

क्रीडोऽनुसंपरिभ्यश्च । १ । ३ । २१ ॥

चादाङः ॥ अनुक्रीडते । संक्रीडते । परिक्रीडते । आक्रीडते । अनोः कर्मप्रवचनीयान्न । उपसर्गेण समं साहचर्यात् । माणवकमनुक्रीडति । तेन सहेत्यर्थः । तृतीयार्थे इत्यनोः कर्मप्रवचनीयत्वम् ॥ समोऽकूजने ॥ * ॥ कूजने तु संक्रीडति चक्रम् ॥ आगमेः क्षमायाम् ॥ * ॥ ण्यन्तस्येदं ग्रहणम् । आगमयस्व तावत् । सहस्व कञ्चित्कालम् । मा त्वरिष्ठा इत्यर्थः ॥ शिक्षेर्जिज्ञासायाम् ॥ * ॥ धनुषि शिक्षते । धनुर्विषये ज्ञाने शक्तो भवितुमिच्छतीत्यर्थः ॥ आशिषि नाथः ॥ * ॥ आशिष्येवेति नियमार्थमिदम् । सर्पिषो नाथते । सर्पिर्मे स्यादित्याशास्ते इत्यर्थः । कथं नाथसे किमु पतिं न भूभृतामिति । नाधसे इति पाठः ॥ हरतेर्गततांच्छील्ये ॥ * ॥ गतं प्रकारः । पैतृकमश्वा अनुहरन्ते । मातृकं गावः । पितुर्मातुश्चागतं प्रकारं सततं परिशीलयन्तीत्यर्थः । ताच्छील्ये किम् । मातुरनुहरति । सादृश्यमात्रमिह विवक्षितं न तु प्रकारताच्छील्यम् ॥ किरतेर्हर्षजीविकाकुलायकरणेषु ॥ * ॥ विक्षेपार्थः किरतिः । हर्षादयस्तु विषयत्वेनोपात्ताः । तत्र हर्षो विक्षेपस्य कारणम् । इतरे फले । षष्ठेऽपीदृशमेव वार्त्तिकम् । तेन गव्येवार्थेऽपाच्चतुष्पादिति सुड् वीधीयते । अपस्किरते वृषो हृष्टः । कुक्कुटो भक्षार्थी । श्वा आश्रयार्थी च । हर्षादिष्विति किम् । अपकिरति कुसुमम् । इह तु सुट् न । हर्षादिमात्रत्वे तु यद्यपि सुट् प्राप्तस्तद्विधौ चतुष्पाच्छकुनिकर्तृकस्यालेखनस्य चानिमित्तत्वात् । तथापि शब्दशक्तिस्वाभाव्यात्सुडभावे नेष्यते । तेन गजोऽपकिरतीत्येवेत्याहुः ॥ आङि नुप्रच्छ्योः ॥ * ॥ आनुते सृगालः । उत्कण्ठापूर्वकं शब्दं करोतीत्यर्थः । आपृच्छते

गुरुम् । शप उपालम्भे ॥ * ॥ आत्मनः शापात्स्वरितेतोऽकर्तृगेऽपि फले शपथरूपेऽर्थे आत्मनेपदं वक्तव्यमित्यर्थः ॥ कृष्णाय शपते । त्वत्पदौ स्पृशामि नैतन्मया कृतमित्येवं रूपं शपथं करोतीत्यर्थः ॥

समवप्रविभ्यः स्थः । १ । ३ । २२ ॥

सन्तिष्ठते । अवतिष्ठते । प्रतिष्ठते । वितिष्ठते ॥ आङः प्रतिज्ञायामुपसंख्यानम् ॥ * ॥ शब्दं नित्यमातिष्ठते । नित्यत्वेन प्रतिजानीत इत्यर्थः ॥

प्रकाशनस्थेयाख्ययोश्च । १ । ३ । २३ ॥

गोपी कृष्णाय तिष्ठते । स्वाशयं प्रकाशयतीत्यर्थः । संशय्य कर्णादिषु तिष्ठते यः । कर्णादीन्निर्णेतृत्वेनाश्रयतीत्यर्थः । स्थेयो विवादपदनिर्णेता । तिष्ठन्तेऽस्मिन्निति व्युत्पत्तेः । बाहुलकादधिकरणेऽचो यत् ॥

उदोऽनूर्ध्वकर्मणि । १ । ३ । २४ ॥

उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता । अनूर्ध्वेति किम् । आसनेन पीठादुदतिष्ठदच्युतः । ईहायामेव । नेह । ग्रामाच्छतमुत्तिष्ठति । उत्पद्यते इत्यर्थः ॥

उपान्मन्त्रकरणे । १ । ३ । २५ ॥

मन्त्रः करणं कारकविशेषो यत्र तस्मिन्नर्थे वर्तमानात्तिष्ठतेरित्यर्थः ॥ आग्नेय्याग्नीध्रमुपतिष्ठते । ऐन्द्र्या गार्हपत्यमुपतिष्ठते । मन्त्रकरणे किम् । भर्तारमुपतिष्ठति यौवनेन ॥ उपाद्देवपूजासङ्गतकरणमित्रकरणपथिष्विति वाच्यम् ॥ * ॥ आदित्यमुपतिष्ठते । कथं तर्हि स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वतीति । देवतात्वारोपात् । नृपस्य देवतात्वाद्वा । गङ्गा यमुनामुपतिष्ठते । उपश्लिष्यतीत्य-

र्थः । मिथक्करणं तु प्रश्लेषं विनापि भवति । रथिकानुपतिष्ठते ।
मित्रीकरोतीत्यर्थः । अयं पन्थाः स्रुघ्नमुपतिष्ठते । प्राप्नोतीत्यर्थः ॥
वा लिप्सायामिति वक्तव्यम् ॥ * ॥ भिक्षुकः प्रभुमुपतिष्ठते । उपति-
ष्ठति वा । लिप्सयोपगच्छतीत्यर्थः ॥

अकर्मकाच्च । १ । ३ । २६ ॥

उपात्तिष्ठतेरकर्मकादात्मनेपदं स्यात् ॥ भोजनकाले उपति-
ष्ठते । सन्निहितो भवतीत्यर्थः ॥

उद्विभ्यां तपः । १ । ३ । २७ ॥

अकर्मकादित्येव ॥ उत्तपते । वितपते । दीप्यते इत्यर्थः ।
स्वाङ्गकर्मकाच्चेति वक्तव्यम् ॥ * ॥ स्वमङ्गं स्वाङ्गं न त्वद्रवमिति परिभा-
षितम् । उत्तपते वितपते पाणिम् । नेह । सुवर्णमुत्तपति । सन्ताप-
यति विलापयति वेत्यर्थः । चैत्रो मैत्रस्य पाणिमुत्तपति । सन्ताप-
यतीत्यर्थः । उद्विभ्यां किम् । निष्टपति । ज्वलतीत्यर्थः ॥

आङो यमहनः । १ । ३ । २८ ॥

आयच्छते । आहते । अकर्मकात्स्वाङ्गकर्मकादित्येव । नेह ।
परस्य शिर आहन्ति । कथमाजघ्ने विषमविलोचनस्य वक्ष इति
भारविः आहध्वं मा रघूत्तममिति भट्टिश्च । प्रमाद एवायमिति
भागवृत्तिः । प्राप्येत्यध्याहारो वा । ल्यब्लोपे पञ्चमीति तु ल्यबन्तं
विनैव वाक्ये वाक्यैकदेशप्रयोगन्यायेन तदर्थावगतिर्यत्र तद्विषयम् ।
इह तु शब्दाध्याहारः । भेत्तुमित्यादि तुमुनन्ताध्याहारो वा ऽस्तु ।
विषमविलोचनस्य समीपमेत्य स्वं वक्ष आजघ्ने इति वा । मल्लो ह्यु-
त्साहाविष्करणाय स्वं वक्ष आस्फालयतीत्याहुः ॥

समो गम्यृच्छिभ्याम् । १ । ३ । २९ ॥

अकर्मकाभ्यामित्येव ॥ सङ्गच्छते। समृच्छिष्यते। अकर्मकाभ्यां किम्। ग्रामं सङ्गच्छति ॥ विदिप्रच्छिस्वरतीनामुपसंख्यानम् ॥ * ॥ वेत्तेरेव ग्रहणम्। परस्मैपदिभ्यां साहचर्यात्। संवित्ते। संविदाते। संविद्रते। संपृच्छते। संस्वरते ॥ अर्तिश्रुदृशिभ्यश्चेति वक्तव्यम् ॥*॥ अर्तीति द्वयोर्ग्रहणम्। अङ्विधौ त्वियर्तेरेव। लुग्विकरणशासिना साहचर्यात्। परस्मैपदेष्वित्युत्तरार्थमनुवर्तमानमपि पुषादिसूत्रे योगविभागसामर्थ्यात्सर्तिशास्त्यर्तिभ्यश्चेत्यनेनाङ्विधौ न सम्बध्यते। तेन मा समृत। मा समृषाताम्। मा समृषतेति। समार्त। समार्षाताम्। समार्षतेति च भ्वादेः। इयर्तेस्तु मा समरत। मा समरेताम्। मा समरन्तेति। समारत। समारेताम्। समारन्तेति च। संशृणुते। संपश्यते। अकर्मकादित्येव। अत एव रवांसीति पुरापि संशृणुमहे इति मुरारिप्रयोगः प्रामादिक इत्याहुः। अध्याहारो वा इति कथयदृश्य इति। अथास्मिन्नकर्मकाधिकारे हनिगम्यादीनां कथमकर्मकतेति चेत्। शृणु ॥

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥

वहति भारम्। नदी वहति। स्यन्दते इत्यर्थः। जीवति। नृत्यति। प्रसिद्धेर्यथा। मेघो वर्षति। कर्मणोऽविवक्षातो यथा। हितान्न यः संशृणुते स किम्प्रभुः ॥ उपसर्गादस्यत्यूह्योर्वेति वक्तव्यम् ॥ * ॥ अकर्मकादिति निवृत्तम्। बन्धं निरस्यति। निरस्यते। समूहति। समूहते ॥

निसमुपविभ्यो ह्वः। १। ३। ३० ॥

निह्वयते ॥

स्पर्धायामाङः ।१।३।३१॥

कृष्णश्चाणूरमाह्वयते । स्पर्धायां किम् । पुत्रमाह्वयति ॥

गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः ।१।३।३२॥

गन्धनं हिंसा । उत्कुरुते । सूचयतीत्यर्थः । सूचनं तु प्राणवियोगानुकूलत्वाद्धिंसैव । अवक्षेपणं भर्त्सनम् । श्येनो वर्तिकामुदाकुरुते । भर्त्सयते इत्यर्थः । हरिमुपकुरुते । सेवते इत्यर्थः । परदारान्प्रकुरुते । तेषु सहसा प्रवर्तते इत्यर्थः । प्रयोगोपाधिरयम् । धात्वर्थस्तु वशीकरणम् । अन्यथा परदारानिति कर्मणोऽनन्वयप्रसङ्गात् । एधो दकस्योपस्कुरुते । गुणमाधत्ते । गाथाः प्रकुरुते । प्रकथयतीत्यर्थः । शतमुपकुरुते । धर्मार्थं विनियुङ्क्ते इत्यर्थः । एषु किम् । घटं करोति ॥

अधेः प्रसहने ।१।३।३३॥

प्रसहनं क्षमाऽभिभवश्च । षह मर्षणेऽभिभवे चेति पाठात् । शत्रुमधिकुरुते । क्षमते इत्यर्थः । अभिभवतीति वा ॥

वेः शब्दकर्मणः ।१।३।३४॥

शब्दः कर्म कारकं यस्य तस्मादित्यर्थः ॥ स्वरान्विकुरुते । उच्चारयतीत्यर्थः । शब्दकर्मणः किम् । चित्तं विकरोति कामः ॥

अकर्मकाच्च ।१।३।३५॥

वेः कृञ इत्येव ॥ छात्रा विकुर्वते । विकारं लभत इत्यर्थः ।

संमाननोत्संजनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः ।१।३।३६॥

अत्रोत्सञ्जनज्ञानविगणनव्यया नयतेर्वाच्याः । इतरे

प्रयेगोपाधयः । तथाहि । शास्त्रे नयते । शास्त्रस्थं सिद्धान्तं शिष्येभ्यः प्रापयतीत्यर्थः । तेन च शिष्यसम्माननं फलितम् । उत्संजने । दण्डमुन्नयते । उत्क्षिपतीत्यर्थः । माणवकमुपनयते । विधिना आत्मसमीपं प्रापयतीत्यर्थः । तत्फलं माणवकसंस्कारः । तस्य चाकर्त्रभिप्रायत्वादप्राप्तमात्मनेपदमाचार्यकरणे विधीयते । उपनयनपूर्वकेणाध्यापनेन हि उपनेतरि आचार्यत्वं क्रियते । ज्ञाने । तत्त्वं नयते । निश्चिनोतीत्यर्थः । कर्मकरानुपनयते । भृतिदानेन स्वसमीपं प्रापयतीत्यर्थः । विगणनमृणादेर्निर्यातनम् । करं विनयते । राज्ञो देयं भागं शोधयतीत्यर्थः । शतं विनयते । धर्मार्थे विनियुङ्क्ते इत्यर्थः । एषु किम् । घटं नयति ॥

कर्तृस्थे चाशरीरे कर्मणि । १ । ३ । ३७ ॥

नियः कर्तृस्थे कर्मणि यदात्मनेपदं प्राप्तं तच्छरीरावयवभिन्न एव स्यात् ॥ सूत्रे शरीरशब्देन तदवयवो लक्ष्यते । शरीरतादात्म्यापन्नस्य कर्तृतया शरीरस्य तत्स्थत्वासम्भवात् । अवयवानां तु सम्बन्धविशेषेण तत्स्थत्वस्यानुभवात् । क्रोधं विनयते । अपगमयति । तत्फलस्य चित्तप्रसादस्य कर्तृगत्वात्स्वरितञित इत्येव सिद्धे नियमार्थमिदम् । तेनेह न । गडुं विनयति । कथं तर्हि विगणय्य नयन्ति पौरुषमिति । कर्तृगामित्वाविवक्षायां भविष्यति ॥

वृत्तिसर्गतायनेषु क्रमः । १ । ३ । ३८ ॥

वृत्तिरप्रतिबन्धः । ऋचि क्रमते बुद्धिः । न प्रतिहन्यत इत्यर्थः । सर्ग उत्साहः । अध्ययनाय क्रमते । उत्सहते । तायनं स्फीतता । क्रमन्ते ऽस्मिन् शास्त्राणि । स्फीतानि भवन्तीत्यर्थः ॥

उपपराभ्याम् । १ । ३ । ३९ ॥

Digitized by Google

वृत्त्यादिष्वर्थेषु आभ्यामेव क्रमतेर्न तूपसर्गान्तरपूर्वात् ॥ उपक्रमते । पराक्रमते । नेह । संक्रामति ॥

आङ उद्गमने । १ । ३ । ४० ॥

आक्रमते सूर्यः । उदयते इत्यर्थः ॥ ज्योतिरुद्गमन इति वाच्यम् ॥ * ॥ नेह । आक्रामति धूमो हर्म्यतलात् ॥

वेः पादविहरणे । १ । ३ । ४१ ॥

साधु विक्रमते वाजी । पादविहरणे किम् । विक्रामति सन्धिः । द्विधा भवति । स्फुटतीत्यर्थः ॥

प्रोपाभ्यां समर्थाभ्याम् । १ । ३ । ४२ ॥

समर्थौ तुल्यार्थौ । शकन्ध्वादित्वात्पररूपम् । प्रारम्भेऽनयोस्तुल्यार्थता । प्रक्रमते । उपक्रमते । समर्थाभ्यां किम् । प्रक्रामति । गच्छतीत्यर्थः । उपक्रामति । आगच्छतीत्यर्थः ॥

अनुपसर्गाद्वा । १ । ३ । ४३ ॥

क्रामति । क्रमते । अप्राप्तविभाषेयम् । वृत्त्यादौ तु नित्यमेव ॥

अपह्नवे ज्ञः । १ । ३ । ४४ ॥

शतमपजानीते । अपलपतीत्यर्थः ॥

अकर्मकाच्च । १ । ३ । ४५ ॥

सर्पिषो जानीते । सर्पिषा उपायेन प्रवर्त्तत इत्यर्थः ॥

सम्प्रतिभ्यामनाध्याने । १ । ३ । ४६ ॥

शतं संजानीते । अवेक्षत इत्यर्थः । शतं प्रतिजानीते । अङ्गीकरोतीत्यर्थः । अनाध्याने इति योगो विभज्यते । तत्सामर्थ्या-

मेव योग्यत्वं तादृशरससमवेतत्वं च जातौ समवाये च तदुभयसम्बन्धत्वमिति । तद्गतम्, रसगतम्, । तयोः रसरसत्वयोः । समवायः योग्य इत्यनुषज्यते । तेन महत्त्वसमानाधिकरणेति विशेषणदानेन, । मधुरादिरस इति गृह्यत इत्यनुषज्यते । तद्गताः, शब्दगताः, । तयोः शब्दशब्दत्वयोः, । अत्र द्रव्यसमवेतमात्रप्रत्यक्षत्वावच्छिन्नं प्रति महत्त्वस्य स्वाश्रयसमवेतत्वेन तद्गतजातिप्रत्यक्षे तु स्वाश्रयसमवेतसमवायेन कारणत्वमेवं रूपस्यापि कारणत्वमिति सुधीभिर्विभाव्य बोध्यमिति संक्षेपार्थः ।

तस्येन्द्रियस्यासन्निकृष्टाग्राहकत्वात् सन्निकर्षाः सहकारिणः । के ते सन्निकर्षाः संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायः विशेषणविशेष्यभावश्चेति । अथ केन सन्निकर्षेण किं गृह्यते । द्रव्यं संयोगेन शब्देतरगुणाः कर्मद्रव्यगता जातिः संयुक्तसमवायेन ।

तस्य प्रत्यक्षस्वरूपस्य ते इन्द्रियसहकारिणः, । क्रमेण सन्निकर्षानाह संयोग इति । द्रव्यमिति । तथा च द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रतीन्द्रियसंयोगत्वेन कारणतेत्यर्थः । इन्द्रियत्वस्यैकस्यानुगतस्याभावादिन्द्रियसंयोगस्यापि नैकत्वम् । तथा च विषयतासम्बन्धेन द्रव्यलौकिकचाक्षुषे चक्षुः संयोगः एवं विषयत्वसम्बन्धेन द्रव्यलौकिकस्पार्शने त्वक्संयोगः एवं विषयतया ऽऽत्मलौकिकप्रत्यक्षे आत्ममनःसंयोगः कारणमिति बोध्यम् । शब्देतेति । श्रवणस्य शब्दाश्रयभिन्नत्वाभावेन संयुक्तसमवायाभावाच्छब्देतरेत्युक्तं । तच्च गुणविशेषणम् । संयुक्तसमवायेनेति । अयमर्थः । इन्द्रियत्वस्यैकस्याभावेन तत्तदिन्द्रियसंयुक्तसमवायो वाच्यस्तथा च द्रव्यसमवेतचाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयुक्तसमवायः कारणं द्रव्यसमवेतस्पार्शनप्रत्यक्षत्वावच्छिन्नं प्रति त्वक्संयुक्तसमवायः कारणम् । परं तु महत्त्वसमानाधिकरणोद्भूतरूपावच्छिन्नत्वं तादृशोद्भूतस्पर्शावच्छिन्नत्वं च पूर्वोक्तरीत्या समुदितं प्रत्येकं

बा बोध्यम् । गन्धलौकिकप्रत्यक्षे घ्राणसंयुक्तसमवायः रसलौकिकप्रत्यक्षे रसनासंयुक्तसमवायः । आत्मसमवेतलौकिकप्रत्यक्षे मनःसंयुक्तसमवायः ।

भवति हि घटादि चक्षुरादिसंयुक्तं तत्र समवेतं रूपादि स्पन्दो जातिश्च द्रव्यत्वादिः शब्देतरगुणकर्मगता जातिः संयुक्तसमवेतसमवायेन । भवति हि चक्षुरादिसंयुक्तं घटादि तत्समवेतं रूपादि तत्र समवायो रूपत्वादेः । शब्दः समवायेन कर्णशष्कुल्यवच्छिन्ने नभसि शब्दस्य समवायात् । शब्दगता तु जातिः समवेतसमवायेन श्रवणसमवेते शब्दे शब्दत्वादीनां समवायात् । विशेषणतया समवायोऽभावश्च तत्र संयोगसमवाययोरभावात् ।

संयुक्तसमवायं दर्शयति भवति हीति । संयुक्तसमवायग्राह्या जातिः केत्यत आह द्रव्यत्वादिरिति । शब्देतरगुणकर्मगतेति । ननु गुणगतजातौ मानाभावात् किं तद्ग्राहकसन्निकर्षेणेति चेत् न । तत्रासमवायिकारणतावच्छेदकतया गुणत्वादिसिद्धेः । तथा हि । कारणतायाः सावच्छिन्नत्वनियमेन द्रव्यकर्मभिन्नत्वावच्छिन्नकारणताया अवच्छेदकं किंचिद्वाच्यम् तच्च न रूपत्वादि न्यूनवृत्तित्वात् नापि सत्ताऽधिकवृत्तित्वात् । तथा च निखिलगुणनिष्ठा जातिरवश्यं वाच्या सैव गुणत्वमिति । एवं कर्मत्वमपि बोध्यम् । द्रव्यसमवेतसमवेतलौकिकचाक्षुषप्रत्यक्षे महत्त्वसमानाधिकरणोद्भूतरूपावच्छिन्नचक्षुःसंयुक्तसमवेतसमवायः । द्रव्यसमवेतसमवेतलौकिकस्पार्शनप्रत्यक्षे घ्राणसंयुक्तसमवेतसमवायः । रससमवेतस्य रसनाजन्यलौकिकप्रत्यक्षे रसनासंयुक्तसमवेतसमवायः । आत्मसमवेतसमवेतलौकिकप्रत्यक्षे मनःसंयुक्तसमवेतसमवायः कारणमिति । शब्द इति शब्दलौकिकप्रत्यक्षं प्रति श्रोत्रावच्छिन्नसमवायः कारणमि-

Digitized by Google

त्यर्थः । तादृशसमवायलक्षणसन्निकर्षं शब्दे दर्शयति कर्णेति । शब्दत्वञ्जातिरिति शब्दसमवेतलौकिकप्रत्यक्षं प्रति श्रोत्रावच्छिन्नसमवेतसमवायः कारणमित्यर्थः । समवायाभावयोर्ग्राहकं सन्निकर्षमाह विशेषणतयेति । नन्वभावसमवायग्रहे संयोगादिरूपसन्निकर्ष एवोच्यतामत आह तत्रेति । तत्र, समवायाभावयोः, ।

सा च विशेषणता द्विविधा । इन्द्रियविशेषणता इन्द्रियसन्निकृष्टविशेषणता च । तत्रेन्द्रियविशेषणतया शब्दाभावो गृह्यते इन्द्रियरूपे श्रवणादौ तस्य विशेषणत्वात् । इन्द्रियसन्निकृष्टविशेषणतया च भूतलादौ घटाभावादि इन्द्रियसन्निकृष्टेभूतलादौ तस्य विशेषणत्वात् । इन्द्रियसन्निकृष्टविशेषणताऽपि बहुविधा सन्निकर्षस्य बहुविधत्वादवसेया ।

अथ विशेषणताया द्वैविध्यमाह इन्द्रियविशेषणतेति । विशेषणता स्वरूपसम्बन्धः । तत्स्वरूपमिन्द्रियात्मकमभावात्मकं च । तत्र श्रोत्रेन्द्रिये शब्दाभावरूपविशेषणतायाः सत्त्वादिन्द्रियविशेषणता । एवमिन्द्रियसम्बद्धभूतलादावभावसत्त्वे भूतलादावभावरूपायाः इन्द्रियसम्बद्धविशेषणतायाः सत्त्वाद्विशेषणताया द्वैविध्यमित्यर्थः । यद्वा विशेषणता प्रकारता तथा चेन्द्रियजन्येन्द्रियविशेष्यकज्ञाने प्रकारता एवमिन्द्रियसम्बद्धविशेष्यकेन्द्रियजन्यज्ञानप्रकारतेति योगार्थपुरःसरं द्वैविध्यमाह विशेषणतेति । अथ वा विशेषणता आश्रयता । तथा चेन्द्रिये तत्सम्बद्धे चाभावसमवाययोराश्रयतासम्भवेन योगार्थपुरस्सरं द्वैविध्यमाह विशेषणतेति । तत्र, विशेषणताद्वयमध्ये, शब्दाभाव इत्यनन्तरं शब्दादिसमवायश्चेति पूरणीयं । तस्य अभावस्य समवायस्य, च । भूतलादाविति । अत्रापि भूतलादिवृत्तिरूपसत्तादिसमवायो ऽपीन्द्रियसन्निकृष्टविशेषणतया ग्राह्य

इति बोध्यम्। वस्तुविधेति। यत्रेदं वाहुल्य श्रोत्रविशेषणतया ऽऽकाशवृ-
त्यभावो गृह्यते तत्कार्यतावच्छेदकमाकाशवृत्त्यभावत्वावच्छिन्नविषयतया
श्रोत्रत्वं। श्रोत्रसमवेतविशेषणतया शब्दवृत्त्यभावो गृह्यते तत्कार्यताव-
च्छेदकं च शब्दवृत्त्यभावत्वावच्छिन्नविषयतया श्रोत्रत्वं। श्रोत्रसमवेतसमवे-
तविशेषणतया शब्दत्ववृत्त्यभावो गृह्यते तत्कार्यतावच्छेदकं शब्दसमवे-
तवृत्त्यभावत्वावच्छिन्नविषयतया श्रोत्रत्वमिति। चक्षुःसंयुक्तविशेषणतया
भूतलादौ घटाद्यभावो गृह्यते तत्कार्यतावच्छेदकं भूतलादिवृत्त्यभाव-
त्वावच्छिन्नविषयतया चाक्षुषत्वम्। चक्षुःसंयुक्तसमवेतविशेषणतय-
च गुणादावभावो गृह्यते तत्कार्यतावच्छेदकं गुणादिवृत्त्यभावत्वाव-
च्छिन्नविषयतया चाक्षुषत्वं। चक्षुःसंयुक्तसमवेतसमवेतविशेषणतया गुण-
त्वादावभावो गृह्यते तत्कार्यतावच्छेदकं गुणत्वादिवृत्त्यभावत्वावच्छि-
न्नविषयतया चाक्षुषत्वं। एवं त्वाचेऽपीति बोध्यम्॥

ननु संयोगो न प्रत्यासत्तिः संयुक्तसमवायेन घटादिग्रहसम्भवात् इन्द्रियसंयुक्ते कपालादौ तेषां समवायात् मैवं। आत्मनि तदसम्भवात्तस्यासमवेतत्वादिति संक्षेपः।

ननु संयोग इति। नन्वेवं संयोगद्वारको घटादिर्न गृह्येतेत्यत आह संयु-
क्तेति तदेवाह इन्द्रियेति। तेषां, घटादीनां,। तदसम्भवात् संयुक्तसमवा-
यासम्भवात्,। तस्य आत्मनः,। इदमुपलक्षणं त्रुटावेव विश्रान्तिरिति पक्षे
त्रुटेरप्रत्यक्षत्वमपि बोध्यम्। ननु मानसेतरद्रव्यप्रत्यक्षमात्रेव संयुक्तसम-
वायस्य हेतुत्वमस्तु। न च परमाणुद्व्यणुकयोर्मानाभावे त्रुटेः प्रत्यक्षत्वाभा-
वेन त्रुटेरपि सिद्धिर्नस्यादिति वाच्यम्। तयोरनुमानसिद्धत्वात्। तथा हि
त्रुटिः सावयवा चाक्षुषद्रव्यत्वाद्घटवदित्यवयवसिद्धौ ते चावयवाः सावयवाः
चाक्षुषद्रव्यसमवायित्वादिति। न चैते ऽपि सावयवाः। चाक्षुषद्रव्यसमवायि-
समवायित्वादिति वाच्यम्। महत्सर्षपयोस्तुल्यावयवत्वप्रसङ्गादित्याद्यभि-

प्राथमिकानन्तरं संक्षेप इति । इदं तु बोध्यम् । द्रव्यचाक्षुषं प्रति चक्षुःसंयुक्त-समवेतसमवायस्यैव हेतुत्वसम्भवे किं चक्षुःसंयोगस्य तत्संयुक्तसमवायस्य च हेतुत्वकल्पनया । एवं च त्रुटेरवयवकादिसिद्धिः सुलभेति । इत्थं च स्वाश्रयसमवेतसमवायेनैवोद्भूतरूपस्यैक एव कार्यकारणभाव इति । अत्र न व्याः चक्षुःसंयोगतत्संयुक्तसमवायतत्संयुक्तसमवेतसमवायानां हेतुत्वकल्पनमपेक्ष्य परमाणुद्व्यणुकयोः कल्पनं महत्त्वस्य कार्यकारणभावकल्पनमप्येति तथैव गौरवं । त्रुटावणुत्वव्यवहारस्त्वपकृष्टपरिमाणवत्त्वेन । निरुक्तानुभावं चाक्षुषीत्वं । अन्यथा चाक्षुषद्रव्यसमवायिसमवायिसमवायित्वादिरीत्यनवस्थापत्तेः । मोक्षसर्वेपयोस्तुल्यावयवत्ववारणान्तु त्रुटौ विश्रामकल्पनादपिसम्भाव्यत इति दिक् ॥

स्यादेतदन्धकारस्थघटादि किमिति चक्षुषा नोपलभ्यते संयोगप्रत्यासत्तेस्तत्वादिति चेदुच्यते चक्षुषा द्रव्यग्रहे महदुद्भूतरूपालोकसंयोगस्सहकारी न चान्धकारस्थघटे सोऽस्ति । न च महत्त्वोद्भूतेतिव्यर्थं परमाणुषु चक्षुरादितेजःसंयोगयोर्विद्यमानत्वात् । नन्वेवं चक्षुषा तेजःप्रत्ययो न स्यात्तत्र तेजःसंयोगाभावात् । प्रदीपे तत्प्रभासंयोगोऽस्तीति चेत् ।

चक्षुषेति । तथा च द्रव्यचाक्षुषत्वावच्छिन्नं प्रति महत्त्वसमानाधिकरणरूपवान्य आलोकस्तत्संयोगः सहकारीत्यर्थः । न च बिडालादिचाक्षुषे व्यभिचार इति वाच्यम् । मानुषचाक्षुषत्वावच्छिन्नं प्रति तादृशालोकसंयोगस्य हेतुत्वात् । सः तादृशश्चालोकसंयोगः, । नन्वालोकसंयोगस्यैव कारणत्वमस्तु किं महदुद्भूतेति विशेषणदानेनेत्याह न चेति । तेजःपरमाण्वादीति तथा चान्धकारस्थघटे तेजःपरमाणुसंयोगस्योद्भूतरूपवदालोकसंयोगत्वेऽपि न महदालोकसंयोगत्वम् । चक्षुःसंयोगस्य महदालोकसम्बन्धत्वेऽपि चक्षुष्युद्भूतरूपाभावेन तस्य नोद्भूतरूपवदालोकसंयोगत्वमि-

ति न तयोश्चाक्षुषमित्यर्थः । एवं द्रव्यचाक्षुषत्वावच्छिन्नं प्रति तादृशालोकसंयोगस्य हेतुत्वे, । तत्र तेजसि, । न तु तेजसि तेजःसंयोगो नास्तीत्याशङ्कते प्रदीप इति । तत्प्रभा प्रदीपप्रभा, । तथा च प्रदीपरूपे तेजसि प्रभारूपतेजःसंयोगस्य सत्त्वान्नोक्तदोष इति भावः ॥

मणिप्रभादौ तदभावात् । दृश्यते च महान्धकारे चन्द्रकान्तप्रभृतिमणिविशेषप्रभा । अथालोकेतरद्रव्यचाक्षुषं प्रत्यालोकसंयोगः सहकारीति चेन्न । महान्धकारे सुवर्णरूपतेजःसाक्षात्कारापत्तेः ।

ननु सर्वत्र तेजसि तेजःसंयोगाभावाद्व्यभिचार इत्याह मणीति । तदभावात् तादृशतेजःसंयोगाभावात्, व्यभिचारन्दर्शयति दृश्यते चेति । तथा च तेजःसंयोगमन्तरेणापि प्रभाप्रत्यक्षसम्भवाद्व्यभिचार इत्यर्थः । ननु कार्यतावच्छेदककोटौ तेजोभिन्नत्वमपि देयमित्याह अथालोक इति । तथा चालोकस्य तेजःस्वरूपत्वात्तेजःप्रत्यक्षे तेजःसंयोगो नापेक्षित इति भावः । सुवर्णेति तथा च सुवर्णात्मकतेजःप्रत्यक्षे तेजःसंयोगस्यापेक्षितत्वादित्यर्थः । ननु सुवर्णस्य तैजसत्वसिद्धौ तच्चाक्षुषे व्यभिचारः । तत्रैव मानं न पश्याम इति चेत् सुवर्णं तैजसं अत्यन्तानलसंयोगेप्यनुच्छिद्यमानद्रवत्वात् । यत्रात्यन्ताग्निसंयोगे सत्यनुच्छिद्यमानद्रवत्वाभावस्तत्र तैजसत्वाभावो यथा पृथिव्यामिति । न चोपष्टम्भकपार्थिवभागे व्यभिचार इति वाच्यम् । जलमध्यगतमसीवत्तदुपष्टम्भकस्यभाग द्रुतत्वाभावात् । न चोक्तहेतुरस्तु पृथिवीत्वादिकमप्यस्त्वित्युक्तानुमानमप्रयोजकमिति वाच्यम् । पृथिवीजलद्रवत्वयोरत्यन्ताग्निसंयोगनाश्यत्वादिति । ननु पीतिमगुरुत्वाश्रये सर्वत्र पृथिवीत्वस्य सत्त्वात् तदाश्रयत्वेन सुवर्णेपि पृथिवीत्वमनुमेयमिति । तदुक्तं पीतिमा च गुरुत्वं च दाहे यस्य च रक्तिमा । तस्य लोकप्रसिद्धस्य स्वर्णत्वं केन वार्यत इति चेन्न । सुवर्णे पीतिमगुरुत्वाश्रयत्वाभावात् । किं तु पीति-

मगुरुत्वाश्रयविलक्षणद्रव्यसंयुक्तत्ववत्सुवर्णं तथा हि । अत्यन्ताग्निसंयोगे सति पीतिमगुरुत्वाश्रयो विलक्षणद्रवद्द्रव्यसंयोगवान् तादृशसंयोगे सति रूपान्तराभावात्तप्ततोयमध्यगतारक्तपटवदिति संक्षेपः ।

अत्रोच्यते द्रव्यचाक्षुषमात्रे आलोकसंयोगो हेतुः । न चालोकचाक्षुषे व्यभिचारः आलोकाकाशसंयोगस्यालोकेऽपि सत्वात्तस्य द्विनिष्ठत्वात् न । चैवमन्धकारे सुवर्णसाक्षात्कारापत्तिः अनभिभूतरूपालोकसंयोगस्यैव हेतुत्वात् सुवर्णरूपं त्वभिभूतं अन्यथा सुवर्णरूपालोकसंयोगाद्द्रव्यान्तरग्रहापत्तिः । सम्प्रदायविदस्तु सुवर्णभिन्नं यत्तेजस्तद्भिन्नद्रव्यचाक्षुषे आलोकसंयोगो हेतुः । भवति च सुवर्णमपि सुवर्णभिन्नं यत्तेजस्तद्भिन्नमतस्तद्ग्रहेप्यालोकसंयोगो हेतुस्तेनान्धकारे न सुवर्णसाक्षात्कार इत्याहुः ।

आलोकसंयोगः महदुद्भूतरूपवदालोकसंयोगः, । आलोकाकाश इति । अयमर्थः चाक्षुषं प्रत्यालोकसंयोगः कारणं । आलोकाकाशसंयोगस्याप्यालोकसंयोगत्वेन व्यभिचाराभाव इति । आकाशस्य व्यापकत्वेन तत्संयोगस्य सर्वत्र सम्भवात् आकाश इत्युक्तं । नन्वालोकस्याकाशेन सह संयोगो नालोकेन सहेत्यत आह तस्येति । तस्य आलोकाकाशसंयोगस्य, द्विनिष्ठत्वादिति । आलोकाकाशोभयनिष्ठत्वादित्यर्थः । एवमेतादृशसंयोगस्यापि हेतुत्वे, । स्वर्णेति स्वर्णाकाशसंयोगस्य सत्वादित्यर्थः । अनभिभूतेति । अनभिभूतरूपवान्यो महदालोकस्तत्संयोगस्यैव हेतुत्वादित्यर्थः । ननु प्रकृते किमायातमतआह स्वर्णरूपमिति । अभिभवश्च बलवत्सजातीयग्रहणाकृतमग्रहणं । साजात्यमिह रूपत्वेन । तथा च पार्थिवभागरूपस्य ग्रहणेन सुवर्णरूपस्याग्रहणमिति । तत्र किं मानमित्यत आह अन्य-

येति । अन्यथा स्वर्णकस्याभिभूतत्वाभावे, । सुवर्णमिति । अनभिभूतरूपाश्रयप्रदीपवत् परप्रकाशकत्वं स्यादिति भावः । सुवर्णभिन्नमिति । सुवर्णभिन्नतेजः प्रदीपः तद्भिन्नं द्रव्यं सुवर्णं घटादिश्च तच्चाक्षुषे किन्त्वालोकः सहकारीत्यर्थः सुवर्णमपीत्यस्य तद्भिन्नमित्यनेनान्वयः । तद्रूपे सुवर्णादिरूपे, । कार्यतावच्छेदके गौरवादाहुरित्युक्तम् ।

तथापि पूर्वस्यां दिश्यालोकसंयोगवतः परस्यां तदसंयुक्तस्य भित्त्यादेः परदिगवस्थितपुरुषेण साक्षात्कारः स्यात् आलोकसंयोगस्य पूर्वदिगवच्छेदेन सत्त्वान्नैवम् । यदवच्छेदेनालोकसंयोगस्तदवच्छिन्नचक्षुःसंयोगस्य हेतुत्वात् इह च तदभावात् । स्यादेतत् विशेषणता न प्रत्यासत्तिः समवायाभावयोरसत्वात् । न हि तयोर्मानमस्ति अयं घटः अयं रूपवान् अयं चलतीति प्रत्यक्षमेव घटत्वरूपचलनसम्बन्धविषयकं समवाये मानम् । न हि घटादौ तेषामन्यः सम्बन्धोऽस्तीति चेन्न स्वरूपसम्बन्धस्यैवाधाराधेयभावाख्यस्य सत्वात् ।

तथा ऽपि आलोकसंयोगस्य हेतुत्वे ऽपि, परस्यां पश्चिमायां, । तदसंयुक्तस्यालोकासंयुक्तस्य, परावस्थितपुरुषेण पश्चिमदिगवस्थितभित्त्यादिसन्निकृष्टपुरुषेण, । तदवच्छिन्नमिति । तथाचालोकावच्छिन्नचक्षुःसंयोगो हेतुरित्यर्थः । तदभावात् । आलोकावच्छिन्नचक्षुःसंयोगाभावात्, । ननु स्वरूपसम्बन्धेनाधिकरणात्मकत्वेन च निर्वाहे समवायाभावयोर्मानाभावस्तथा च किं तद्ग्राहकप्रत्यासत्तिविचारेणेत्यभिप्रायवानाह स्यादेतदिति । तयोः समवायाभावयोः, । ननु जन्यविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वाद्दण्डीतिविशिष्टबुद्धिवदित्यनुमाना-

त्समानत्वे विशेष्यविशेषणयोः सम्बन्धसिद्धिः न चायं घटे ऽयं रूपवान् ऽयं चलतीति जातिगुणक्रियाविशिष्टप्रत्यये न संयोगो विषयः । तेषां संयोगाभावात्किं तु समवाय इत्यभिप्रायवानाह अयं घट इति । जातिगुणकर्मभेदेनोदाहरणत्रयं तेषां घटत्वरूपचलनानां, । नन्वतिरिक्तः स्वरूपसम्बन्ध एव भविष्यति किं समवायेन तस्यातिरिक्तत्वसिद्धेः समवायेन किमपराद्धमित्यत आह [illegible]मिति । तथा चायं घट इत्यादौ घटघटत्वयोः [illegible] एव स्वरूपसम्बन्धो नत्वतिरिक्त इति भावः ।

न हि समवाय एव घटत्वस्याधारता पटादावपि सत्त्वात् एक एव हि घटत्वपटत्वयोः समवायः । नैवं घटे घटत्वं रूपं च समवेतं तन्तुषु पटः समवेतः । इह कर्मसमवेतमित्यनुगतसमवायाकारप्रतीत्या तत्सिद्धेः नचाभावोऽसन् घटो नास्तीतिप्रतीत्या तत्सिद्धेः ।

ननु समवायस्यैव तदात्मकत्वं भविष्यतीत्यत आह नहीति । पटादावपीति । तवाभिमतसमवायस्य पटादावपि सत्त्वेन पटे ऽपि समवायरूपघटत्वाधारतासत्त्वात्पटे घटत्वमिति प्रत्ययः स्यादिति भावः । न च पटे समवायरूपघटत्वाधारतायाः सत्त्वे ऽपि घटत्वाभावान्न तादृशप्रत्यय इति वाच्यम् । तथा सति पटो घटत्वसम्बन्धीति प्रतीत्यापत्तेः । ननु घटत्वसमवायः पटादौ नास्त्येवेत्यत आह एक एवेति । न चैवं जले गन्धवत्ताप्रतीतिः स्यादिति वाच्यम् । तत्र गन्धाभावेन तत्प्रत्ययाभावाद्गन्धाभाववत्ताज्ञानस्य प्रतिबन्धकत्वाच्च । अत्र नव्याः । समवायस्यानेकत्वमन्यथा जले गन्धसमवायस्य सत्त्वेन जलं गन्धसम्बन्धवदिति प्रतीतेर्दुर्वारत्वादिति । घटे घटत्वमिति । जातिगुणद्रव्यकर्मणां विशिष्टबोधे समवायस्य [illegible]त्वादुदाहरणचतुष्टयमपि दर्शितम् । तत्सिद्धेः सम-

चार्यसिद्धेः, । प्रतियोग्यनुल्लेखिकार्याभावविषयकप्रतीतेरभावादाह घट इति । तत्सिद्धेः अभावसिद्धेरित्यर्थः ॥

अत्र प्रभाकराः नाभावो ऽधिकः किन्तु केवलाधिकरणस्वरूप एव अतः किं तद्ग्राहकप्रत्यासत्त्यन्तरकल्पनेन । ननु किमिदं कैवल्यं भूतलस्वरूपञ्चेत् सघटभूतलस्यापि तत्वापत्तिः घटाभावत्वञ्चेत्सिद्धमभावेनेति चेन्न । यत्राधिकरणे भवद्भिरभावो ऽङ्गीक्रियते तदधिकरणस्यैवाभावत्वाङ्गीकारात् । न चाभेदे आधाराधेयभावानुपपत्तिः । घटाभावे घटोनास्तीति प्रतीतेरभेदे ऽपि त्वया ऽङ्गीकारात् ।

स्वरूप एवेत्यनन्तरं लाघवादिति शेषः । अत्रैवकारेण ज्ञानात्मकत्वं कालात्मकत्वं च व्यवच्छिद्यते ज्ञानकालयोश्च लघुत्वाभावादभावस्य च चाक्षुषत्वादिति । परेत्वभावस्य ज्ञानात्मकत्वे वन्धविच्छेदस्य संयोगाभावात्मकत्वेन तन्मते चेश्वरानङ्गीकाराद्विर्जनबन्धविच्छेदे ज्वलनिःसरणं न स्यादित्याहुः । अत इति । तथा चाधिकरणग्राहकसंयोगरूपप्रत्या सत्त्यैव निर्वाहादित्यर्थः । केवलाधिकरणस्वरूप इत्यत्र कैवल्यं किमित्याह किमिदमिति । तत्वापत्तेरिति । घटाभाव इति बुद्धिविषयत्वापत्तेरित्यर्थः । घटाभावत्वमिति । अभेदे त्वाश्रयत्वाभावादिति भावः । भवदभिमताधिकरणस्यैवाभावात्मकत्वमित्यभिप्रायेणाह यत्रेति । तथा च सघटभूतलस्य घटाभाव इति भावः । अथ तथापि भूतले घटाभाव इति प्रत्ययो न स्यादित्यत आह न चेति । अभेदे अभावस्याधिकरणाभेदे, । अभेदेऽपीति । इदमुपलक्षणं प्रमेयत्वे प्रमेयत्वमित्यपि बोध्यम् । अङ्गीकारात् । आधाराधेयभावाङ्गीकारात्, ।

न चान्य एव घटाभावे घटाभावः अनवस्था-

Digitized by Google

पत्तेरपसिद्धान्ताच्च । अत्रोच्यते यदि भूतलविशेषो घटाभावस्तदा भूतले घटाभाव इत्येवमाधारताप्रत्ययो न स्यात् न हि भूतलं भूतलाधिकरणं भूतले भूतलमिति प्रतीत्यापत्तेः । किं च यत्रेदानीं घट आनीतस्तदधिकरणं घटाभावो न वा आद्ये इदानीं घटो नास्तीति प्रतीतिः स्यात् ।

नन्वभावाधिकरणको ऽभावोऽतिरिक्त इत्यभिप्रायवानाह न चान्य इति । अनवस्थापत्तेरिति । घटाभावाभावनिष्ठाभावस्याप्यधिकत्वमेवं रीत्येत्यर्थः । ननु भेदो ऽतिरिक्तस्तद्भेदोऽप्यतिरिक्त इतिवत्प्रामाणिकी अनवस्था न दोषायेत्यत आह अपसिद्धान्ताच्चेति । अभावाधिकरणकाभावस्यातिरिक्तत्वाभाव इति सिद्धान्त इत्यर्थः । भूतलविशेषः घटशून्यभूतलविशेषः,। आधारता भूतलस्याधारता, प्रत्ययाभावे बीजमाह नहीति स्वस्मिन् स्वाधिकरणत्वे ऽनिष्टमप्याह भूतल इति । ननु तादात्म्यसम्बन्धेनाभावस्थल एवाभावस्याधाराधेयभावप्रतीतिनियामकत्वं न तु विशेषणतासम्बन्धेनान्यथाघटाभावे पटाभावतादात्म्यस्य सत्वात् घटाभावस्य पटाभावात्मकत्वेन पटाभाववद्घटवति भूतले ऽपि घटो नास्तीति प्रतीत्यापत्तेस्तथा चात्र घटाभावतादात्म्यस्य पटाभाव एव सत्वात्तादात्म्यसम्बन्धेन घटाभावस्य भूतलवृत्तित्वाभावाद्भूतले नाधाराधेयभावबोध इत्यस्वरसादाह किं चेति । यत्र घटशून्यभूतले, इदानीं एतत्कालावच्छेदेन, । एवमग्रेऽपि । न वा घटाभावभिन्नं वा, । प्रत्ययः स्यादिति । यदेव घटानयनात्पूर्वकालीनं घटशून्ये घटाभावप्रत्ययजनकं तदेव घटे आनीते ऽपीति घटो नास्तीति प्रत्ययजनकं स्यादित्यर्थः ।

अन्त्ये ऽन्यदापि घटो नास्तीति प्रत्ययो न स्यात् । किञ्च कपाले घटो भविष्यति घटो नष्ट

इति प्रतीतिरस्ति कपाले पूर्वं घटप्रागभावः उत्तरा काले घटध्वंसः स यदि कपालात्मा तदा सर्वदा-तत्प्रतीतिः स्यात्कपालस्य सत्वात् । अन्यथा कपा-लप्रतीतिरपि न स्यात् ।

अन्त्ये घटानयनकालीनभूतलस्य घटाभावभिन्नत्वे, । अन्यदापि घटस्यापसरणकालेपि, । प्रत्ययो न स्यादिति । घटस्यानयनकालीनं यदेव भूतलं तदेव भूतलं घटस्यापसरणकालेऽपीति घटस्यापसरणकालेऽपि घटो नास्तीति प्रत्ययो न स्यादित्यर्थः । ननु यदा घटः समानीतस्तदा घटवत्ताज्ञानस्य प्रतिबन्धकत्वान्न तद्बुद्धिः यदा तु घटो नीतस्तदा तु घटाभाववत्ताबुद्धौ किं बाधकमित्यस्वरसादाह किं चेति । घटो भवि-ष्यतीति । अयमर्थः । कपाले घटोत्पत्तेः पूर्वं घटो भविष्यतीति प्रती-तिसिद्धः कश्चिद्घटाभावः प्रतीयते स एव घटप्रागभावः । अत एवो-त्पत्तेः प्राक्काले कार्याभावः प्रागभाव इति सङ्गच्छते । एवं घटोत्प-त्यनन्तरं कपाले घटो नष्ट इति प्रतीतिसिद्धो ऽभाव उत्पद्यते स एव च ध्वंसः । अत एवोत्पत्तिमानभावो ध्वंस इति । नन्वेतावता ध्वंसप्रा-गभावौ सिद्धौ परं तु तौ प्रतियोगिसमवायिकारणकपाधिकरणस्वरूपा-वेत्यत आह स यदीति । सर्वदा घटकाले घटान्यकाले च तत्प्रतीतिः प्रागभावध्वंसयोः प्रतीतिः, कुतः इत्यत आह कपालस्येति । घटकाले-घटान्यकाले च प्रागभावध्वंसात्मक कपालस्य सत्वादित्यर्थः । अन्यथा कपालस्यासत्वे, ।

किञ्च मोक्षो दुःखाभावः आत्मरूपः स्यात् तथा चासाध्यतापत्तिर्नित्यत्वादिति संक्षेपः ।

ननु यत्कालावच्छेदेन प्रागभावध्वंसयोः प्रत्येकं कपालवृत्तित्वं तत्कालावच्छेदेन प्रत्येकं तयोः कपालात्मकत्वमिति नोक्तदोष इत्यत

आह किं चेति । दुःखाभाव इति । स्वसमानाधिकरणदुःखप्रागभावासमानकालीनं यद्दुःखं तस्य ध्वंसरूपाभाव इत्यर्थः ॥ विवेचितं चेदमधस्तात् । तथा च ध्वंसप्रागभावयोः प्रतियोगिसमवायिदेश एवाधिकरणत्वनियमेन तादृशदुःखध्वंसाधिकरणमात्मैवेति दुःखध्वंसस्यात्मस्वरूपत्वं स्यादित्यर्थः । तथा च किमनिष्टमत आह तथा चेति । असाध्यतापत्तिः । अहेतुकत्वापत्तिः तथा च तत्त्वज्ञानाय को ऽपि न प्रवर्त्तेतेत्यर्थः । तादृशदुःखाभावस्यात्मस्वरूपत्वे कथमसाध्यत्वमत आह नित्यत्वादिति ॥ अथ रूपरसाद्यभावानां वाय्वधिकरणत्वाद्वायुवत्तेषामप्यप्रत्यक्षत्वं स्यात् । नानाधिकरणात्मकत्वकल्पनापेक्षया तिरिक्ताभावकल्पने लाघवात्तत्तदभावानान्तत्तदिन्द्रियग्राह्यत्वेन तेषामधिकरणात्मकत्वे च तत्तदिन्द्रियग्राह्यता न स्यादिति संक्षेपार्थो बोध्य इति ।

स्यादेतत् एवं घटाभावो नास्तीति प्रतीत्या घटाभावाभावोप्यधिकः स्यात् स्यादेवेति चेत्तर्हि तदभावोप्यधिकःस्यादित्यनवस्था । केवलाधिकरणं तदभाव इति चेत्तर्हि सर्वत्र स एवाभावो ऽस्तु भवदुक्तदूषणगणप्रसङ्गश्चैवं स्यात् । अत्राहुः घटाभावाभावो घट एव तत्सत्वे घटाभावो नास्तीति प्रतीतेः न च केवलाधिकरणरूपः उक्तयुक्तेरिति सम्प्रदायः ॥

एवं अभावस्याधिकरणभिन्नत्वे सिद्धे, । घटाभाव इति । यथा ऽभावस्याधिकरणभिन्नत्वं तथा ऽभावाभावस्यापि प्रतियोगिभिन्नत्वमिति भावः । तर्हि अभावाभावस्यातिरिक्तत्वे, । तदभावो ऽपि । अभावाभावो, ऽपि इत्यनवस्था एवंरीत्यानवस्था, । तदभावः अभावाभावः, । तर्हि अभावाभावस्याधिकरणात्मकत्व, सर्वत्राभावस्थले ऽभा-

Digitized by Google

वस्थले तदभावस्थले च । स एव अधिकरणात्मक एव, । नन्वनव स्थादोषभीत्या ऽधिकरणात्मकत्वमेवोच्यतामित्यत आह भवदुक्तेति । आधाराधेयभावप्रत्ययानुपपत्तिरित्यादिदूषणसमूहप्रसङ्गः स्यादित्यर्थः घट एवेति । अत्रैवकारेणाधिकरणातिरिक्तत्वयोर्व्यवच्छेदः । तत्सत्त्व इति । अत्रेवकारो ऽनुषज्यते । तथा च तत्सत्त्व एव घटसत्त्व एव, यदि घटाभावाभावो ऽतिरिक्तस्तर्हि घटं विना ऽपि घटाभावो नास्तीति प्रत्ययः स्यादितिभावः । न च घटसमनियतोयमतिरिक्तो ऽभाव इति वाच्यम् । तस्य लाघवाद्घटात्मकत्वस्वीकारादिति । एवं च घटाभावाभावो यदि घटात्मकस्तदा तदभावो ऽपि घटाभावात्मक इति बोध्यम् । ननु विनिगमनाविरहादधिकरणात्मत्वमेवोच्यतामित्यत आह न केवलेति । उक्तयुक्तेः आधाराधेयभावानुपपत्तिरूपोक्तयुक्तः, । अत्रानन्ताधिकरणानामभावत्वकल्पने गौरवमित्यादिः संदर्भो बोध्य इति ।

नव्यास्तु घटाभावाभावोप्यधिक एव अभावत्वेन प्रतीतेः न चायं भ्रमः बाधकाभावात् तदभावस्तु घटाभाव एव नाधिक इति नानवस्थानमित्याहुः स्यादेतत् भूतलं घटभेदभिन्नं न वा अन्त्ये आयातं भूतलमेव घटभेद इत्यनेन । आद्ये तद्भेदभेदोप्यधिकः स्यात् स्यादेवेति चेत्तर्हि तद्भेदोप्यधिकः स्यादित्यनवस्था ।

ननु लाघवाद्घटात्मक एव भविष्यतीत्यत आह अभावत्वेनेति । अभावत्वमखण्डोपाधिः द्रव्यादिषट्कान्योन्याभाववत्त्वं वा तथा च घटाभावाभावो नास्तीतिप्रतीति विषयो न घटः घटस्य भावभिन्नत्वाभावादिति । अयं अभावत्वेन प्रतीतिरूपः, । बाधकाभावात् विषयबाधरूपबाधकाभावात्, । तदभावस्तु घटाभावाभावाभावस्तु, । नानवस्थानमिति । एकस्यैव घटाभावस्य घटाभावाभावस्याभावत्वे बाधकाभावा-

दिति भावः । अथात्यन्ताभावाभावस्यातिरिक्तत्वं व्यवस्थाप्यान्योन्याभावाभावादेरतिरिक्तत्वं व्यवस्थापयितुं भूमिकामारचयति स्यादेतदित्यादित्यन्ता । सूचीकटाहन्यायेनाह अन्त्य इति । भूतलमेवेत्यत्रैवकारः संपातायातः । तद्भेदो ऽपि । घटभेदभेदो ऽपि । तर्हि भेदभेदस्यातिरिक्तत्वे, । तद्भेदो ऽपि । भेदभेदभेदो ऽपि, ।

अथानस्थाभयाद्भेदभेदो नाधिकः किन्त्वधिकरणरूप इति चेन्न भवदुक्तदूषणगणप्रसङ्गश्चैवं स्यात् अत्राहुः भेदभेदो ऽप्यधिक एव । न चैवं तद्भेदो ऽप्यधिकः स्यादिष्टत्वात् न चेयमनवस्थादोषाय प्रामाणिकत्वात् तदाहुः सर्वतो बलवती ह्यन्यथानुपपत्तिरिति संक्षेपः । स चायमभावो द्वेधा अन्योन्याभावः संसर्गाभावश्च तत्रेदमिदं न भवति इदमेतद्भिन्नमिति प्रतीतिसाक्षिको ऽभावो ऽन्योन्याभावः । यदिदमाहुः तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताको ऽभाव इति ।

एवं भेदभेदस्याधिकत्वे, । अन्यथा ऽनुपपत्तिरिति । अत्रान्यथानुपपत्तिरेव । तथा हि । यथाघटाभावाभावस्याभावो घटात्यन्ताभावस्वरूपः । तथा घटभेदभेदस्यभेदो न घटभेदस्वरूपस्तस्य घटभेदातिरिक्ते घटादौ सर्वत्र वृत्तित्वाद्घटो घटभिन्न इति प्रत्ययः स्यादिति संक्षेपार्थो ऽप्ययमेव । अयमधिकरणभिन्नतया सिद्धः, अन्योन्याभावे मानमाह तत्रेति । तत्र द्विविधाभावमध्ये, इदं शरीरादिकं इदं न भवति आत्मस्वरूपं न भवतीति शरीरतादात्म्यावच्छिन्नाभावो बुध्यते इदं शरीरादिकमेतद्भिन्नं आत्मस्वरूपाद्भिन्नमित्यत्र शरीरतादात्म्यसम्बन्धावच्छिन्नभेदो बुध्यते स एवान्योन्याभाव इति ॥

तदन्यो ऽभावः संसर्गाभाव इति । सो ऽपि

त्रिविधः अत्यन्ताभावप्रागभावध्वंसाभावभेदात् तत्र नास्तीत्यनुभवसिद्धो नित्यः संसर्गाभावो ऽत्यन्ताभावः विनष्ट इति प्रतीतिसाक्षिक उत्पत्तिमानभावो ध्वंसः स च न विनाशी तद्विनाशकल्पनायां मानाभावात् न हि विनाशो विनष्ट इति कश्चित्प्रत्येति तत्प्रागभावश्च घटादिरूपः प्रतियोगी तत्प्रागभावश्च उभयत्र ध्वंसो भविष्यतीति प्रत्ययाद्विनाश्यभावः प्रागभावः ।

तदन्य इति । तदन्यः अन्योन्याभावान्यः, । तथा चान्योन्याभावाभिन्नाभावत्वं संसर्गाभावत्वमिति । संसर्गाभावे ऽन्योन्याभावभेदस्य सत्त्वादभावप्रतियोगिकाभावाधिकरणकाभावस्याधिकरणात्मकत्वेनान्योन्याभावभेदस्य संसर्गाभावात्मकत्वमिति ध्वनितं । अत एवान्योन्याभावस्यान्योन्याभावः संसर्गाभावस्वरूप इति पदार्थखण्डने शिरोमणिचरणाः । सो ऽपि संसर्गाभावो ऽपि, तत्र प्रमाणप्रदर्शनपूर्वकमत्यन्ताभावलक्षणमाह नित्य इति । प्रागभावध्वंसयोर्वारणाय नित्य इति । तथैव ध्वंसलक्षणमाह उत्पत्तीति । प्रागभाववारणायोत्पत्तिमानिति । स च ध्वंसश्च, । प्रमाणाभावादिति न च ध्वंसो विनाशी जन्यत्वादित्यनुमानमेव मानमिति वाच्यम् । तत्र भावत्वस्योपाधित्वात् । ननु प्रत्यक्षमेव मानं भविष्यतीत्यत आह न हीति । तत्प्रागभावः ध्वंसस्य प्रागभावः, । तत्प्रागभावश्च प्रतियोगिप्रागभावश्च । तथा च ध्वंसस्य द्वयं प्रतियोगि प्रतियोगी प्रागभावश्चेत्यर्थः । तत्र मानमाह उभयत्रेति । उभयत्र उभयकाले, तथा च घटकाले घटप्रागभावकाले च कपाले घटध्वंसो भविष्यतीति प्रत्ययेन घटध्वंसप्रतियोगिकप्रागभावस्य विषयीकरणात्तस्य च घटात्मकत्वघटप्रागभावात्मकत्वस्वीकारः । तत्र कपाले तत्प्रागभावयोः सत्त्वादित्यर्थः । ध्वंसादावतिव्याप्तिवारणाय विनाशीति ।

नानारत्नचयैश्चित्रां [1]हृष्टपुष्टजनावृताम् ।
अविच्छिन्नान्तरगृहां समभूमिनिवेशनाम् ॥ २० ॥
[2]मृदङ्गवेणुवीणानां रम्यैः शब्दैर्विनादिताम् ।
नित्योत्सवसमाजाढ्यां नित्यं हृष्टजनायुताम् ॥ २१ ॥
[3]ब्रह्मघोषस्वनवतीं धनुःस्वन[4]विनादिताम् ।
वरान्नपानकलिलां शालितण्डुलभोजनाम् ॥
[5]धूपगन्धहविर्गन्धैर्हृद्यैश्चाप्यधिवासिताम् ॥ २२ ॥
[6]लोकपालोपमैः शूरैः सर्वशास्त्रार्थपारगैः ।
गुप्तां योधशतैश्चैव नागैर्भोगवतीमिव ॥ २३ ॥
स्वयञ्चैवेन्द्रकल्पेन पुरीदेवपुरोपमा ।
सुगुप्तेक्ष्वाकुनाथेन राज्ञा दशरथेन सा ॥ २४ ॥
[7]वराग्निवद्भिर्गुणवद्भिरन्विता
द्विजोत्तमैर्वेदषडङ्गपारगैः ।
सहस्रदैः [8]सत्यतपोदमान्वितैः
महर्षिकल्पैर्यतिभिर्यतात्मभिः ॥ २५ ॥

इति रामायणे आदिकाण्डे अयोध्यावर्णनम् ॥

1. G. 14. धनधान्यसमन्विताम्; P. हृष्टपुष्टजनैर्युताम्. 2. For this Sl. B. 18. दुन्दुभीभिर्मृदङ्गैश्च वीणाभिः पणवैस्तथा । नादितां भृशमत्यर्थं पृथिव्यां तामनुत्तमाम् ॥ 3. This Sl. has no parallel or substitute in B. 4. G. 16. निनादिताम् । 5. G. 17 धूपमाल्य &c. 6. For this & the foll. Sl. B. 20-22- ये च बाणैर्न विध्यंति विविक्तमपरापरम् । शब्दवेध्यञ्च विततं लघुहस्ता विशारदाः ॥ सिंहव्याघ्रवराहाणां मत्तानां नदतां वने । हंतारो निशितैः शस्त्रैर्बलाद् बाहुबलैरपि ॥ तादृशानां सहस्रैस्तामभिपूर्णां महारथैः । पुरीमावासयामास राजा दशरथस्तदा ॥ 7. For this Sl. B. 23—तामग्निमद्भिर्गुणवद्भिरावृतां द्विजोत्तमैर्वेदषडङ्गपारगैः । सहस्रदैः सत्यरतैर्महात्मभिः महर्षिकल्पैरृषिभिश्च केवलैः ॥ 8. G. 20. सत्यतपोदयान्वितैः; but P. has सत्यतपोदमान्वितैः ।

VI.

[1]पुर्यान्तस्यामयोध्यायां [2]वेदवेदाङ्गपारगः ।
दीर्घदर्शी महातेजाः पौरजानपदप्रियः ॥ १ ॥
इक्ष्वाकूणामतिरथो यज्वा [3]धर्म्मभृतां वरः ।
महर्षिकल्पो [4]राजर्षिस्त्रिषु लोकेषु विश्रुतः ॥ २ ॥
[5]बलवान् [6]विजितामात्यो नीतिमान्नियतेन्द्रियः ।
[7]धनधान्यैश्च विभवैः शक्रवैश्रवणोपमः ॥ ३ ॥
[8]आदिराजो मनुरिव प्रजानां परिरक्षिता ।
राजा दशरथो नाम बभूव त्रिदशोपमः ॥ ४ ॥
तेन सत्याभिसन्धेन त्रिवर्गमनु[9]पश्यता ।
पालिताभूत् पुरी [10]साथ शक्रेणेवामरावती ॥ ५ ॥
[11]हृष्टपुष्टजने तस्मिन् पुरे नैवाबहुश्रुतः ।
कश्चिदासीन्नरो नापि कश्चिदन्यायवृत्तिमान् ॥ ६ ॥

---

1. B. VI. 1. तस्यां पुर्यामयोध्यायां वेदवित् सर्वसंग्रहः । &c. 2. G. VI. 1. वेदवेदाङ्गवित्तमः, but P. has वेदवेदाङ्गपारगः। 3. B. 2. धर्म्मपरो वशी. 4. P. देवर्षि &c. 5. For this Sl. B. 3. बलवान्निहतामित्रो मित्रवान् विजितेन्द्रियः । धनैश्च संचयैश्चान्यैः शक्रवैश्रवणोपमः ॥ 6. G. 3. विजितामित्रो &c; but P. has विजितामात्यो &c., and also विजितामित्रो as an alternative reading in the margin. 7. G. 3. धनधान्यसमृद्धिविभवैः &c. 8. For this Sl. B. 4. यथा मनुर्म्महातेजा लोकस्य परिरक्षिता । तथा दशरथो राजा लोकस्य परिरक्षिता ॥ 9. B. 5. तिष्ठता. 10. B. 5. येष्ठा इन्द्रेणेवामरावती, G. 5. सा तु शक्रेणेवा &c; but. P. has साथ &c. 11. For this Sl. B. 6. तस्मिन्पुरवरे हृष्टा धर्म्मात्मानो बहुश्रुताः । नारास्तुष्टा धनैः स्वैः स्वैरलुब्धाः सत्यवादिनः ॥

[1]न चाल्प[2]विभवः कश्चिदासीत्तत्र [3]जनः पुरे ।
न चाप्यासीदसन्तुष्टः कुटुम्बी तत्र कश्चन ॥ ७ ॥
[4]न कदर्यः कश्चिदासीन्नानृती न शठोऽपि वा ।
न मानी न च संरम्भी न नृशंसो न कत्थनः ॥ ८ ॥
[5]नामहात्मा न पिशुनो न परस्वोपजीवकः ।
न चावर्षसहस्रायु[6]र्नामर्षी नाबहुप्रजः ॥ ९ ॥
[7]नराः सदारनिरता नार्यश्चासन् पतिव्रताः ।
सुव्रता धृतिमन्तश्च नरा आसंस्तथा स्त्रियः ॥ १० ॥
[8]नाकुण्डली नामुकुटी नास्रग्वी नाविलेपनी ।
[9]तत्र कुप्रकृतो नासीद्दरिद्रो वा पुरोत्तमे ॥ ११ ॥
[10]नामृष्टभूषणधरो न चाप्यासीदनिष्कधृक् ।
नाहस्ताभरणोपेतो नानृजुर्न च नास्तिकः ॥ १२ ॥

1. For this Sl. B. 7. नाल्पसञ्चयः कश्चिदासीत्तस्मिन्पुरोत्तमे । कुटुम्बी यो ह्यसिद्धार्थो गवाश्वधनधान्यवान् ॥ 2. G. 7. निचयः &c.; P. has विभवः as an alternative in the margin. 3. G. पुरे नरः; but P. has जनः पुरे. 4. For this Sl. B. 8. कामी वा न कदर्यो वा नृशंसः पुरुषः क्वचित् । द्रष्टुं शक्यमयोध्यायां नाविद्वान्न च नास्तिकः ॥ 5. This Sloka is wanting in B. 6. G. 9. न दीनो &c., but P. has नामर्षी &c, with न दीनो in the margin as an alternative. 7. For this Sl. B. 9—सर्वे नराश्च नार्यश्च धर्मशीलाः सुसंयताः । मुदिताः शीलवृत्ताभ्यां महर्षय इवामलाः ॥ 8. For this Sl. B. 10. नाकुण्डली नामुकुटी नास्रग्वी नाल्पभोगवान् । नामृष्टो न नलिप्ताङ्गो नासुगन्धश्च विद्यते ॥ 9. G. 11. तत्रैव प्राकृतो &c, but P. has तत्र कुप्राकृतो &c., with तत्रैव प्राकृत as an alternative in the margin. 10. For this Sl. B. 11.

Digitized by Google

[1]नानाहिताग्निर्नायज्वा विप्रो नाप्यसहस्रदः ।
कश्चिदासीदयोध्यायां सद्वृत्तरहितो जनः ॥ १३ ॥
[2]स्वकर्मनिरताश्चासन् [3]सर्वे तत्र द्विजोत्तमाः ।
[4]यज्ञाध्ययननित्याश्च विरताश्च प्रतिग्रहात् ॥ १४ ॥
[5]न नास्तिको [6]नानृतवाक् न कश्चित् क्रोधनो नरः ।
न सूचको न चाशक्तो नाशुचिस्तत्र चाप्यभूत् ॥ १५ ॥
[7]नामृष्टभुङ् न चादाता नानुगन्धो न चानृजुः ।
न दुःखी पुरुषः कश्चि[8]न्न चासीदनलङ्कृतः ॥ १६ ॥
रूपचातुर्यमाधुर्यशीलाचारगुणान्विताः ।
नार्यश्चासन्नयोध्यायां मृष्टाभरणवाससः ॥ १७ ॥
नानात्मवान्न च क्रूरो न विरूपो न चालसः ।
कश्चिदासीदयोध्यायां [9]नाश्रीमा[10]न्नामहामनाः ॥ १८ ॥

नामृष्टभोजी नादाता नप्यनंगदनिष्कधृक् । नाहस्ताभरणो वापि दृश्यते नाप्यनात्मवान् ॥ 1. For this Sl. B. 12—नानाहिताग्निर्नायज्वा न क्षुद्रो वा न तस्करः कश्चिदासीदयोध्यायां न चावृत्तो न संकरः ॥ 2. B. 13. स्वकर्मनिरता नित्यं ब्राह्मणा विजितेन्द्रियाः । दानाध्ययनशीलाश्च संयताश्च प्रतिग्रहे ॥ 3. G. 14. सर्वे तत्र द्विजातयः, P. सत्येन च द्विजातयः । 4. G. यज्ञाध्ययनविख्याताश्च &c. 5. For this Sl. B. 14. (a) नास्तिको नानृती वापि न कश्चिदबहुश्रुतः । नासूयको न चाशक्तो नाविद्वान् विद्यते (b) क्वचित् ॥ (a) V. has न नास्तिको नानृतको &c, S. has नास्तिको नानृतो &c. (b) V. has तदा for क्वचित् ॥ 6. G. 15. नानृतवान् &c., but P. has नानृतवाक् &c. 7. For this and the following 3 Slokas—B. 15 & 16—नाषडङ्गविदत्रास्ति नाव्रतो नाबहुश्रुतः । न दीनः क्षिप्तचित्तो वा व्यथितो वापि कश्चन ॥ कश्चिन्नरो वा नारी वा नाश्रीमान्नाप्यरूपवान् । द्रष्टुं शक्यमयोध्यायां नापि राजन्यभक्तिमान् ॥ 8. G. 16 न चैवासीदलंकृतः but P. agrees with our text. 9. G. 18. नाश्रीको &c., but P. has नाश्रीमान् &c. 10. P. has न महाशनः, & नामहामनाः as alterna-

[1]न दीनो नापि चोद्विग्नो नातुरो न [2]भयान्वितः ।
द्रष्टुं शक्यो ह्ययोध्यायां नापि राजन्यभक्तिमान् ॥ १९ ॥
[3]वर्णश्रेष्ठान् पूजयन्तः पितॄन् देवातिथींस्तथा ।
आसन् दीर्घायुषस्तत्र नराः सत्यपरायणाः ॥ २० ॥
[4]आसीत् क्षत्रं [5]ब्रह्ममुखं विट्शूद्रं राजभक्तिमत् ।
न योनिसंकरश्चापि तत्र नाचारसंकरः ॥ २१ ॥
[6]एवमिक्ष्वाकुनाथेन पालिता साभवत् पुरी ।
यथा पुरस्तान्मनुना मानवेन्द्रेण भूरियम् ॥ २२ ॥
[7]योधानामग्निकल्पानां संयुगेष्वनिवर्त्तिनाम् ।
गुप्ता पुरी सहस्रैः सा सिंहैरिव गिरेर्गुहा ॥ २३ ॥
[8]काम्बोजदेशजै[9]श्चैव हयैर्वानायुजैस्तथा ।
नदीजै[10]र्वाह्लिकैश्चैव [11]कीर्णा हरिहयोपमैः ॥ २४ ॥
[12]विन्ध्यपर्वतजैश्चैव नागैर्हैमवतैस्तथा ।
सत्ववीर्यगुणोपेतैः शूरैरव्यालचेष्टितैः ॥ २५ ॥

---

tives. 1. G. 19. नामर्षी &c. 2. P. भयातुरः । 3. For this Sloka—B. 17 & 18 वर्णेष्वग्र्यचतुर्थेषु देवतातिथिपूजकाः । कृतज्ञाश्च वदान्याश्च शूराविक्रमसंयुताः ॥ दीर्घायुषो नराः सर्वे धर्मं सत्यं च संश्रिताः । सहिताः पुत्रपौत्रैश्च नित्यं स्त्रीभिः पुरोत्तमे ॥ 4. For this Sl. B. 19—क्षत्रं ब्रह्ममुखं चासीद्वैश्याः क्षत्रमनुव्रताः । शूद्राः स्वकर्मनिरतास्त्रीन् वर्णानुपचारिणः ॥ 5. G. 21. ब्रह्ममुख्यं &c., but P. has ब्रह्ममुखं & ब्रह्ममुख्यं as alternatives. 6. For this Sl. B. 20. सा तेनेक्ष्वाकुनाथेन पुरी सुपरिरक्षिता । यथा पुरस्तान्मनुना मानवेन्द्रेण धीमता ॥ 7. For this Sl. B. 21. योधानामग्निकल्पानां पेशलानाममर्षिणाम् । संपूर्णा कृतविद्यानां गुहा केसरिणामिव ॥ 8. For this Sl. B. 22. कांबोजविषये जातैर्बाह्लिकैश्च हयोत्तमैः । वनायुजैर्नदीजैश्च पूर्णा हरिहयोत्तमैः ॥ 9. G. 24. श्चापि, but P. चैव. 10. G. र्वाह्लिजैश्चापि, P. र्वाह्लिजैश्चैव. 11. G. पूर्णा &c., but P. has कीर्णा &c. 12. For this Sl. B. 23—

[1]पद्माञ्जनकुलोद्भूतैर्भद्रमन्द्रमृगान्वयैः ।
सा पुरी बहुभिः कीर्णा तदासीद् गन्धहस्तिभिः ॥ २६ ॥
[2]आयोजनाद्वा [3]भूमेर्वा [4]सत्यनामा व्यकाशत ।
सा पुरी यत्र राजासीत् पुरा दशरथोऽनघः ॥ २७ ॥
[5]तां [6]सत्यधामां [7]दृढतोरणार्गलां
महद्भिर्विविधैर्वेश्मशतैरलङ्कृताम् ।
पुरीं [8]महोद्यानवतीमनुत्तमां
स कोशलेन्द्रो नृपतिर्न्यपालयत् ॥ २८ ॥

इति रामायणे आदिकाण्डे राजवर्णना ॥

विंध्यपर्वतजैर्मत्तैः पूर्णा हैमवतैरपि । मदान्वितैरतिबलैर्मातंगैः पर्वतोपमैः । 1. For this Sl. B. 24—26. ऐरावतकुलीनैश्च महापद्मकुलैस्तथा । अंजनादपि निष्क्रान्तैर्वामनादपि च द्विपैः ॥ भद्रैर्मन्द्रैर्मृगैश्चैव भद्रमंद्रमृगैस्तथा । भद्रमंद्रैर्भद्रमृगैर्मृगमंद्रैश्च सा पुरी ॥ नित्यमत्तैः सदापूर्णा नागैरचलसन्निभैः । G. reads the following two lines between the two lines of this Sl. of our text—ऐरावतकुलीनैश्च वामनैरपि च द्विपैः ॥ भद्रमन्द्रैर्भद्रमृगैर्मृगमन्द्रैश्च संयुता । But P. has only the following line in the margin, to be read between, instead of the two lines in G—नित्यमत्तैः शुभैर्दान्तैर्नागैरचलसन्निभैः । 2. For this Sl. B 26—27. सा योजने द्वे च भूयः सत्यनामा प्रकाशते ॥ तां पुरीं स महातेजा राजा दशरथो महान् । शशास शमितामित्रो नक्षत्राणीव चन्द्रमाः ॥ 3. G. 28. भूयो वा; P. has भूमेर्वा in the margin. 4. G. साभिरामा; P. has सातिधामा & सातिरामा as alternatives. 5. For this Sl. B. 28—तां सत्यनामां दृढतोरणार्गलां गृहैर्विचित्रैरुपशोभितां शिवां । पुरीमयोध्यां नृसहस्रसंकुलां शशास वै शक्रसमो महीपतिः ॥ 6. G. 29. सत्यनाम्नीं but P. has सत्यधामां 7. G. दृढतोरणाकर्मां. 8. G. सभोद्यान &c.

VII.

[1]मन्त्रिणावृत्विजौ चैव तस्यास्तामृषिसत्तमौ ।
वसिष्ठो वामदेवश्च [2]वेदवेदाङ्गपारगौ ॥ १ ॥
[3]अष्टावन्ये बभूवुश्च तस्यामात्या महीपतेः ।
शुचयश्चानुरक्ताश्च नित्यं प्रियहिते रताः ॥ २ ॥
[4]धृष्टिर्जयन्तो विजयः सिद्धार्थोऽप्यर्थसाधकः ।
अशोको धर्म्मपालश्च सुमन्त्रश्चाष्टमोऽभवत् ॥ ३ ॥
[5]ह्रीमन्तो विनयोपेता नीतिज्ञा विजितेन्द्रियाः ।
मतिमन्तः सुविहिता राजनिर्देशकारिणः ॥ ४ ॥
[6]तेजःक्षमायशःप्राप्ताः स्मितपूर्वाभिभाषिणः ।

---

1. For this Sl. B. 4—ऋत्विजौ द्वावभिमतौ तस्यास्तामृषिसत्तमौ । वसिष्ठो वामदेवश्च मंत्रिणश्च तथापरे ॥ B. (5.) then gives a list of six other mantrins which is wanting in our text:—सुयज्ञोऽप्यथ जाबालिः काश्यपोऽप्यथ गौतमः । मार्कंडेयस्तु दीर्घायुस्तथा कात्यायनो द्विजः ॥ 2. G. 1. षडङ्गवेदपारगौ, but P. agrees with our text. 3. For this Sl. B. 1 & 2. तस्यामात्या गुणैरासन्निक्ष्वाकोः सुमहात्मनः । मंत्रज्ञाश्चेङ्गितज्ञाश्च नित्यं प्रियहिते रताः ॥ अष्टौ बभूवुर्वीरस्य तस्यामात्या यशस्विनः । शुचयश्चानुरक्ताश्च राजकृत्येषु नित्यशः ॥ 4. For this Sl. B. 3. धृष्टिर्जयन्तो विजयः सुराष्ट्रो राष्ट्रवर्धनः, अकोपो धर्मपालश्च सुमन्त्रश्चाष्टमोऽर्थवित् ॥ V. 3. has धृष्टिर्जयन्तो विजयः सिद्धार्थो ह्यर्थसाधकः । अशोको मन्त्रपालश्च सुमन्त्रश्चाष्टमो महान् ॥ 5. For this Sl. B. 6. & 7. यतैर्ब्रह्मर्षिभिर्नित्यमृत्विजस्तस्य पौर्वकाः । विद्याविनीता ह्रीमन्तः कुशला नियतेन्द्रियाः ॥ श्रीमन्तश्च महात्मानः शस्त्रज्ञा दृढविक्रमाः । कीर्त्तिमन्तः प्रणिहिता यथावचनकारिणः ॥ These & the following Slokas describe in B. the Mantrins enumerated in Sl. 5. quoted above, and not the amátyas like our text. 6. For this Sl. B. 8. तेजःक्षमायशःप्राप्ताः स्मित-

अलुब्धा धृतिमन्तश्च सत्यधर्म्मपरायणाः ॥ ५ ॥
[1]नैषामविदितं किंचित् स्वेषु चैव परेषु च ।
चिकीर्षितं [2]क्वचिद्राज्ञो मित्रोदासीनविद्विषाम् ॥ ६ ॥
[3]धर्म्माचारविवेकज्ञाः सर्वत्र [4]समदर्शनाः ।
कोषसंग्रहणे युक्तास्तथा बलपरिग्रहे ॥ ७ ॥
[5]पुत्रेऽपि च प्राप्तदोषे धर्म्मतो दण्डपातिनः ।
अद्रोग्धारः स्वधर्म्मेण शत्रोरप्यकृतागसः ॥ ८ ॥
[6]आगतज्ञानविज्ञानाः पितृपैतामहोचिताः ।
रक्षितारश्च वर्णानां नित्यं विषयवासिनाम् ॥ ९ ॥
[7]कोषसंग्रहणे युक्ता ब्रह्मस्वस्याविहिंसकाः ।
[8]सुतीक्ष्णदण्डवेत्तारः परार्थबलपौरुषाः ॥ १० ॥
[9]परस्परेणाविरुद्धाः प्रीतिमन्तः प्रियम्वदाः ।

पूर्वाभिभाषिणः । (a)क्रोधात्कामार्थहेतोर्वा न ब्रूयुरनृतं(b) वचः ॥ (a) S. has कामात्क्रोधार्थहेतोर्वा &c. (b) V. has क्वचित् for वचः ॥ 1. For this Sl. B. 9. तेषामविदितं किंचित्स्वेषु नास्ति परेषु वा । क्रियमाणं कृतं वापि चारेणापि चिकीर्षितम् ॥ 2. P. क्वचिद्राज्ञां &c. 3. For this Sl. B. 11. कोशसंग्रहणे युक्ता बलस्य च परिग्रहे । अहितं चापि पुरुषं न हिंस्युरविदूषकम् ॥ 4. G. 7. समदर्शिनः । 5. For this Sl. B. 10. कुशला व्यवहारेषु सौहृदेषु परीक्षिताः । प्राप्तकालं यथादण्डं धारयेयुः सुतेष्वपि ॥ The 2nd. lines of this and B. 11. quoted above will make up a Sl. similar to the one under notice in our text. 6. For this Sl. B. 12—श्रीमन्तश्च नियतोत्साहा राजशास्त्रमनुष्ठिताः । शुचीनां रक्षितारश्च नित्यं विषयवासिनां ॥ 7. For this Sl. B. 13. ब्रह्मक्षत्रमहिंसन्तस्ते कोशं समपूरयन् । सुतीक्ष्णदण्डाः संप्रेक्ष्य पुरुषस्य बलाबलम् ॥ 8. G. 10 सुतीक्ष्णदण्डधर &c.; P. has the marginal reading सुतीक्ष्णदण्डा &c. as an alternative. 9. For this Sl. B. 14. शुचीनामेकबुद्धीनां सर्वेषां संप्रजानतां ।

परापवाद[1]विरता गुणाढ्या न च गर्विताः ॥ ११ ॥
[2]आर्य्यदेशाः सुमनसो न च सन्दिग्धनिश्चयाः ।
नरेन्द्रवचनासक्तचेतसस्तत्परायणाः ॥ १२ ॥
[3]स्वगुणेषु परिख्याता नामरूपगुणा[4]न्विताः ।
[5]परराष्ट्रेषु विख्याता [6]नयबुद्धिगुणांशुभिः ॥ १३ ॥
[7]आसंस्तत्र ग्राहितास्तैः सर्वे वर्णाः स्वकर्म्मभिः ।
नासीत् पुरे वा राष्ट्रे वा तस्करो [8]नाशुचिर्नरः ॥ १४ ॥
[9]न दुष्टः कश्चिदप्यासीत् परदाराभिमर्षकः ।
कृत्स्नमासीदनुद्विग्नं राष्ट्रं तैः परिपालितम् ॥ १५ ॥
प्रशस्तं सर्वमेवासीद्राष्ट्रं पुरवराणि च ।
[10]अमात्यैरीदृशैस्तैस्तु राजा दशरथोऽन्वितः ।
धर्म्मतः पालयामास पृथिवीमनुरञ्जयन् ॥ १६ ॥

नासीत्पुरे वा राष्ट्रे वा मृषावादी नरः क्वचित् ॥ 1. G. 11. रहिता &c. 2. For this Sl. B. 16—शुचयश्च शुचेशाश्च ते च सर्वे सुविक्रताः । [a] हितार्थाश्च नरेन्द्रस्य जाग्रतो नयचक्षुषा ॥ [a] V. 16. हितार्थे च &c. 3. For this Sl. B. 17. गुरोर्गुणगृहीताश्च प्रख्याताश्च पराक्रमैः । विदेशेष्वपि विज्ञाताः सर्वतो बुद्धिनिश्चयाः ॥ 4. P,—न्वयैः. 5. P. has परमात्मेषु & परराष्ट्रेषु as alternatives. 6. P. has नयबुद्धिगुणान्विताः & नयबुद्धिगुणात्मभिः as alternatives. 7. For this Sl. B. 18. अभितो गुणवन्तश्च न चासन् गुणवर्जिताः । सन्धिविग्रहतत्त्वज्ञा प्रकृत्या सम्पदान्विताः ॥ but B. 14. quoted above, particularly the 2nd line of it, may more appropriately stand for this Sl. 8. P. वा &c. 9. For this Sl. and the first line of the next Sl. B. 15. [a] क्वचिन्न दुष्टस्तत्रासीत्परदाररतिर्नरः । प्रशान्तं सर्वमेवासीद्राष्ट्रं पुरवरं च तत् ॥ [a] V. 15. कश्चिच्च &c. 10. For this, and the following line, B. 20. ईदृशैस्तैरमात्यैश्च राजा दशरथोऽनघः । उपपन्नो गुणोपेतैरन्वशासद्वसुन्धराम् ॥

[1]अवेक्षमाणश्चारेण मह्यां सूर्य इवांशुभिः ।
नाध्यगच्छत्क्वचित्कञ्चिदिक्ष्वाकुः शत्रुमात्मनः ॥ १७ ॥
[2]तैर्मन्त्रिभि[3]स्तस्य हितैर्निविष्टै-
र्विद्वद्भिराप्तैः कुशलैः समस्तैः ।
स पार्थिवो दीप्तमवापयुक्त-
स्तेजोमयैर्गोभिरिवाम्बरेऽर्कः ॥ १८ ॥

इति रामायणे अमात्यवर्णना ॥ ७ ॥

—∞—

VIII.

[4]तस्य धर्म्मप्रधानस्य धर्म्मज्ञस्य महात्मनः ।
सुतार्थं तप्यमानस्य [5]नाभूद्वंशकरः सुतः ॥ १ ॥
[6]तस्य चिन्तयतो बुद्धिरुत्पन्नेयं [7]महामतेः ।
सुतार्थं वाजिमेधेन किमर्थं न यजाम्यहम् ॥ २ ॥
[8]सुनिश्चितां मतिं कृत्वा यष्टव्ये वसुधाधिपः ।
मन्त्रिभिः सह सम्मन्त्र्य तैः स्वामिहितकारिभिः ॥ ३ ॥

---

1. For this Sl. B. 21–23. अवेक्षमाणश्चारेण प्रजाधर्म्मेण रक्षयन् । प्रजानां पालनं कुर्वन्नधर्मं परिवर्जयन् ॥ विश्रुतस्त्रिषु लोकेषु वदान्यः सत्यसंगरः । स तत्र पुरुषव्याघ्रः शशास पृथिवीमिमां ॥ नाध्यगच्छद्विशिष्टं वा तुल्यं वा शत्रुमात्मनः । मित्रवानतसामन्तः प्रतापहतकण्टकः ॥ स शशास जगद्राजा दिवि देवपतिर्यथा । 2. For this Sl. B. 24. तैर्मन्त्रिभिर्मन्त्रहिते निविष्टैर्वृतोऽनुरक्तैः कुशलैः समर्थैः । स पार्थिवो दीप्तमवापयुक्तस्तेजोमयैर्गोभिरिवोदितोऽर्कः ॥ 3. G. 18—र्मन्त्रहिते निविष्टे &c.; P. has—र्मंत्रहितैः, &c. र्मन्त्रहि तैः &c. as alternatives. 4. B. 1. तस्य चैवं प्रभावस्य &c. 6. B. & G. 1. नासीद् &c., but P. has नाभूद् &c. 5. For this line. B. 2. चिन्तयानस्य तस्यैवं बुद्धिरासीन्महात्मनः । 7. G. 2. महीपतेः, but P. has महामतेः । 8. For this Sl. B. 3. स निश्चितां मतिं

[1]तत्राब्रवीदिदं राजा सुमन्त्रं मन्त्रिसत्तमम् ।
शीघ्रमानय सर्वांस्त्वं वसिष्ठप्रमुखान् गुरून् ॥ ४ ॥
[2]एवमुक्तो नृपतिना सुमन्त्रो वाक्यमब्रवीत् ।
नरेन्द्र श्रूयतां तावत् [3]पुराणे यन्मया श्रुतम् ॥ ५ ॥
[4]सनत्कुमारो भगवान् यथावत् प्रोक्तवान् पुरा ।
भविष्यं विदुषां मध्ये तव पुत्रसमुद्भवम् ॥ ६ ॥
[5]अस्तीह कश्यपसुतो विभाण्डक इति श्रुतः ।
ऋष्यशृङ्ग इति ख्यातस्तस्य पुत्रो भविष्यति ॥ ७ ॥
[6]स वने जातसंवृद्धो मुनिपुत्रो वनेचरः ।
नान्यं प्रज्ञास्यते कञ्चिन्मानवं पितृवर्ज्जितम् ॥ ८ ॥
[7]तस्यानुचर्यां ब्रह्मचर्य्यं भविष्यति महात्मनः ।
लोकेषु प्रथितं चोग्रं तपस्तस्य भविष्यति ॥ ९ ॥
[8]तपोरतस्य तस्यैवं कालः समभिवर्त्स्यति ।

कर्त्ता यष्टव्यमिति बुद्धिमान् । मन्त्रिभिः सह धर्म्मात्मा सर्वैरपि कृतात्मभिः ॥
1. B. 4. ततोऽब्रवीन्महातेजाः सुमन्त्रं मन्त्रिसत्तमं । शीघ्रमानय मे सर्वान्गुरूंस्तान्स-पुरोहितान् ॥ After this Sl. our text agrees with B, Chap IX. 2. For this Sl. B. IX. 1. एतच्छ्रुत्वा रहः सूतो राजानमिदमब्रवीत् । [a] श्रूयतां तत्पु-रावृत्तं पुराणे च मया श्रुतं ॥ (a) This line is wanting in V. 3. G. 5. पुराणं &c. but P. has पुराणे &c. 4. For this Sl. B. 2-3. ऋत्विग्भिरुप-दिष्टोऽयं पुरावृत्तो मया श्रुतः । सनत्कुमारो भगवान्पूर्वं कथितवान् कथां ॥ ऋषीणां सन्निधौ राजंस्तव पुत्रागमं प्रति । 5. For this line. B. 3. काश्यपस्य च पुत्रो-ऽस्ति विभाण्डक इति श्रुतः । 6. For this Sl. B 4-5. स वने नित्यसंवृद्धो मुनिर्वनचरः सदा ॥ नान्यं जानाति विप्रेन्द्रो नित्यं पित्रनुवर्त्तनात् । 7. For this Sl. B. 5-6. द्वैविध्यं ब्रह्मचर्यस्य भविष्यति महात्मनः ॥ लोकेषु प्रथितं राजन् विप्रैश्च कथितं सदा । 8. For this Sl. B. 6-7. तस्यैवं वर्त्तमानस्य कालः समभिवर्त्तत ॥ &c.

अग्निं शुश्रूषमाणस्य पितरञ्च यशस्विनम् ॥ १० ॥
एतस्मिन्नेव काले तु [1]लोमपादः प्रतापवान् ।
अङ्गेषु प्रथितो राजा भविष्यति महाबलः ॥ ११ ॥
[2]तस्य [3]व्यतिक्रमभवा भविष्यत्यतिदारुणा ।
अनावृष्टिर्जनपदे क्षयाय बहुवार्षिकी ॥ १२ ॥
* [4]अनावृष्ट्या तया राजा तदा स परिकर्षितः ।
प्रक्ष्यति ज्ञानिनो विप्राननावृष्टिप्रतिक्रियाम् ॥ १३ ॥
† [5]भवन्तः [6]श्रुतिदृष्टान्तैर्लोकवृत्तान्तवेदिनः ।
समाख्यातुमर्हन्ति [7]यथावत् प्रशमेदियम् ॥ १४ ॥
‡ [8]ते तमाज्ञापयिष्यन्ति श्रुतिदृष्टान्तवेदिनः ।
विभाण्डकसुतं राजन् सर्वोपायैस्त्वमानय ॥ १५ ॥

---

1. B. 7. & P. have रोमपादः &c. 2. For this Sl. B. 8-9. तस्य व्यतिक्रमाद्घोरो भविष्यति सुदारुणा ॥ अनावृष्टिः सुघोरा वै सर्वलोकभयावहा । 3. G. 12. व्यतिक्रमाद्घोरो &c., but P. has व्यतिक्रमभवा &c. 4. For this Sl. B. 9-10 अनावृष्ट्यां तु वृत्तायां राजा दुःखसमन्वितः ॥ ब्राह्मणांछ्रुतसंवृद्धान् समानीय प्रवक्ष्यति । * Between the two lines of this Sl., P. reads the additional line—ब्राह्मणान् श्रुतवृद्धांश्च समानाय्य च पार्थिवः, which is nearly the same as the 1st line of B. 10 quoted above. 5. For this Sl. B. 10-11. भवन्तः श्रुतकर्माणो लोकचारित्रवेदिनः ॥ समादिशन्तु नियमं प्रायश्चित्तं यथा भवेत् । † Between the two lines of this Sl. P. reads the line—अनावृष्टिर्यथा न स्यात्तथा कुरुत सत्तमाः । 6. G. 14. श्रुतकर्मा वै &c. 7. G. यथा च &c. 8. For this Sl. B. 11-12—इत्युक्तास्ते ततो राज्ञा सर्वे ब्राह्मणसत्तमाः ॥ वक्ष्यन्ति ते महीपालं ब्राह्मणा वेदपारगाः । विभाण्डकसुतं राजन् सर्वोपायैरिहानय ॥ ‡ Before this Sl, P. has the line—एवमुक्तास्तु धर्मज्ञा राजानमनुवंशतदा ।

Digitized by Google

[1]आनाय्य [2]च महाराज ऋष्यशृङ्गमृषेः सुतम् ।
[3]प्रयच्छास्मै सुतां शान्तां विधिना सुसमाहितः ॥ १६ ॥
[4]तेषामेतद्वचः श्रुत्वा स राजा चिन्तयिष्यति ।
[5]येनोपायेन वै [6]शक्यमिहानेतुमिति प्रभुः ॥ १७ ॥
[7]सुनिश्चयं यदा राजा स्वयं नाधिगमिष्यति ।
तदामात्यान् समाहूय प्रतिप्रक्ष्यति निश्चयम् ॥ १८ ॥
पुरोहितं जनांश्चान्यान्मन्त्रनिश्चयकोविदान् ।
ते चापि पृष्टा नैवात्र प्रतिपत्स्यन्ति निश्चयम् ॥ १९ ॥
[8]यदा तदा स्वयं राजा मन्त्रिणस्तत्र वक्ष्यति ।
आनयध्वं वनात्तस्मादृष्यशृङ्गं [9]मुनेः सुतम् ॥ २० ॥
[10]ते च राज्ञो वचः श्रुत्वा [11]भूय एव महीपते ।
न गच्छेम ऋषेर्भीता इति [12]तं नृपसत्तमम् ॥ २१ ॥

---

1. For this Sl. B. 13-14 (a) आनाय्य तु महीपाल ऋष्यशृङ्गं सुसत्कृतं । (b) विभाण्डकसुतं राजन् ब्राह्मणं वेदपारगं ॥ प्रयच्छ कन्यां शान्तां वै विधिना सुसमाहितः । (a) V. has आनयित्वा महीपाल &c. (b) this line is wanting in V. 2. G. 16. तु &c. but P. has च &c. 3. P. देहि तस्मै सुतां &c. ॥ 4. For this Sl. B. 14–15. तेषां तु वचनं श्रुत्वा राजा चिन्तां प्रपत्स्यते ॥ केनोपायेन वै (a) शक्यमिहानेतुं स वीर्यवान् । (a) V. has शक्य इहा &c. 5. G. 17. केनोपायेन &c. 6. G. शक्य इहा &c. 7. This, and the following Sl. are wanting in B.; G. 18. सुनिश्चयं स्वयं राजा यदा &c. 8. For this Sl. B. 16. ततो राजा विनिश्चित्य सह मन्त्रिभिरात्मवान् । पुरोहितममात्यांश्च प्रेषयिष्यति सत्कृतान् ॥ 9. G. 20. ऋषेः सुतम् । 10. For this Sl. B. 17. ते तु राज्ञो वचः श्रुत्वा व्यथितावनताननाः । न गच्छेम ऋषेर्भीता अनुनेष्यन्ति तं वयं ॥ 11. P. व्यथिता दीनचेतसः । 12. G. 21. वक्ष्यन्ति तं नृपम् ॥

Digitized by Google

[1]वक्ष्यन्ति चिन्तयित्वा तु [2]तद्योपायान् बहूंस्ततः
आनेष्यामो वयन्तञ्च न च दोषो भविष्यति ॥ २२ ॥
[3]इति तेषां वचः श्रुत्वा [4]भूय एव महीपतिः ।
तृतीयेऽह्नि निश्चित्य मन्त्रिभिर्मन्त्रनिश्चयम् ॥ २३ ॥
वेश्याभिर्मुनिरूपाभिरानयिष्यत्यृषेः सुतम् ।
लोभयित्वाभ्युपायेन [5]स्वपुरीं पितुराश्रमात् ॥ २४ ॥
वर्षिष्यति [6]ततो देवस्तस्य राष्ट्रे महीपतेः ।
तस्य ह्यागमनादेव ऋषिपुत्रस्य धीमतः ॥ २५ ॥
ततः स राजा विधिवच्छान्तान्तस्मै प्रदास्यति ।
स्वकां दुहितरं भार्यां [7]रूपौदार्यगुणान्विताम् ॥ २६ ॥
[8]एवं तस्य स जामाता भविष्यति [9]महातपाः ।
लोमपादस्य राजर्षेर्ऋष्यशृङ्गः प्रतापवान् ॥ २७ ॥
राज्ञो दशरथस्यापि स पुत्रानभिकांक्षितान् ।
विधास्यति महातेजा हविर्हुत्वाध्वराग्निषु ॥ २८ ॥
सनत्कुमाराद्वचनमिति वै संश्रुतं मया ।
ऋषिमध्ये कथयतस्तथा तदिति मे [10]मतम् ॥ २९ ॥

---

1. For this Sl. B. 18. वक्ष्यन्ति चिन्तयित्वा ते तस्योपायांश्च तान् क्षमान् । आनेष्यामोवयं विप्रं न च दोषो भविष्यति ॥ 2. G. 22. तस्योपायान् &c. 3. For this and the following 3 Slokas B. 19. एवमङ्गाधिपेनैव गणिकाभिरृषेः सुतः । आनीतो ऽवर्षयद्देवः शान्ता चास्मै प्रदीयते ॥ 4. G. 23, भूयः स पृथिवीपतिः &c. 5. G. 24. स्वां पुरीं &c; P. स्वपुरं &c. 6. P. तदा &c. 7. G.26. रूपौदार्यसमन्विताम्, but P, has रूपौदार्यगुणान्विताम्. 8. For this and the following 2. Slokas B. 20. ऋष्यशृङ्गस्तु जामाता पुत्रांस्तव विधास्यति । सनत्कुमारकथितमेतावद्व्याहृतं मया ॥ 9. P. has the Marginal reading महायशाः 10. P. श्रुतम् ॥

Digitized by Google

[1]मन्त्रिभिः सहितश्चैव तथा स कृतवांस्तदा ।
अङ्गराजो महाप्राज्ञो लोमपादो महायशाः ॥ ३० ॥
[2]इति श्रुत्वा दशरथ इदं वचनमब्रवीत् ।
कथयमृष्यशृङ्गस्य विस्तरेण त्वयोच्यताम् ॥ ३१ ॥

इति ऋष्यशृङ्गोपाख्याने मन्त्रिवाक्यम् ॥

IX.

[3]इति पृष्टः सुमन्त्रस्तदाख्यातुमुपचक्रमे ।
आनीत [4]ऋष्यशृङ्गोऽसौ येनोपायेन मन्त्रिभिः ॥ १ ॥
[5]लोमपादममात्यास्ते इदमूचुर्महीपते ।
उपायो [6]निरुपायोऽयमस्माभिः परिचिन्तितः ॥ २ ॥
[7]ऋष्यशृङ्गो वनचरस्तपस्येकरसे रतः ।
अनभिज्ञः स नारीणां विषयाणां सुखस्य च ॥ ३ ॥
[8]इन्द्रियार्थैरभिमतैर्नरचित्तापहारिभिः ।

---

1. This Sl. is wanting in B. 2. For this Sl. B. 20. अथ पृष्टो दशरथः सुमन्त्रं प्रत्यभाषत । यथर्ष्यशृंगस्त्वानीतो येनोपायेन सोच्यताम् ॥ Between the 2 lines of Sl. 31 of our text—G. has the lines—तस्य पुण्यात्मनः साधो ब्रह्मचर्यव्रतस्य च ॥ मुनेः साधो विशुद्धस्य कौमारब्रह्मचारिणः ।—but these lines are wanting in P. 3. For this Sl. B. Chap. X. Sl. 1. सुमन्त्रश्चोदितो राज्ञा प्रोवाचेदं वचस्तदा । यथर्ष्यशृङ्गस्त्वानीतो [a]येनोपायेन मन्त्रिभिः ॥ (a) V. has शृणु मे मन्त्रिभिः सह ॥ 4 G. 1. ऋष्यशृङ्गस्तु &c., but P. has ऋष्यशृङ्गो ऽसौ &c. 5. For this Sl. B. 2. रोमपादमुवाचेदं [b]सहामात्यः पुरोहितः । उपायो निरपायो ऽयमस्माभिरभिचिन्तितः ॥ (b) V. has सहामात्यं &c. 6. G. 2. निरपायोऽयं &c., P. has both निरपायोऽयं &c, निरुपायोऽयं &c. as alternatives. 7. For this Sl. B. 3. ऋष्यशृङ्गो वनचरस्तपस्वाध्यायसंयुतः । अनभिज्ञस्तु नारीणां विषयाणां सुखस्य च ॥ 8. For this Sl. B. 4. इन्द्रियार्थैरभिमतैर्नरचित्तप्रमाथिभिः । पुरमानाययिष्यामः

लोभयित्वा[1]भ्युपायेन [2]क्षिप्रमानीयतां वनात् ॥ ४ ॥
[3]मुनिवेषपरिच्छन्नास्तत्र गच्छन्तु योषितः ।
उपायज्ञाः कलाज्ञाश्च वैशिके परिनिष्ठिताः ॥ ५ ॥
[4]रहस्युत्पाद्य ता [5]एवमानयन्तु शुभव्रतम् ।
लोभयित्वा यथायोगं येनोपायेन शक्यते ॥ ६ ॥
[6]श्रुत्वा तथेति तद्राजा प्रत्युवाच विचारयन् ।
मन्त्रिभिः सहितश्चैव तथा तत्कृतवांस्तदा ॥ ७ ॥
[7]फलवन्तश्च ये वृक्षाः समूलविटपास्तथा ।
रोपयित्वा बृहन्नौषु सुरभीणि स पार्थिवः ॥ ८ ॥
पानानि च सुगन्धीनि फलान्यास्वादवन्ति च ।
सुसमृद्धास्तथा नौभिः प्रयाता यत्र वै मुनिः ॥ ९ ॥
[8]वारमुख्यास्तथा वेश्या गत्वा तन्निर्जनं वनम् ।
नातिदूरे तदा तस्थुराश्रमस्य महामुनेः ॥ १० ॥
तस्य सन्दर्शनार्थिन्य ऋषिपुत्रस्य धीमतः ।
विभाण्डकभयोद्विग्ना वनगुल्मलतावृताः ॥ ११ ॥

क्षिप्रं चाप्यवशीयतां ॥ 1. P. ह्युपायेन &c. 2. G. 4. शीघ्रमानीयतां &c, but P. has क्षिप्रमानीयतां &c. 3. For this & the following Sl. B. 5. गणिकास्तत्र गच्छन्तु रूपवत्यः स्वलंकृताः । प्रलोभ्य विविधोपायैरानेष्यन्तीह सत्कृताः ॥ 4. G. 6. रहस्युपेत्य &c. 5. G. एनम् &c. 6. For this Sl. B. 6. श्रुत्वा तथेति राजा च प्रत्युवाच पुरोहितं । पुरोहितो मन्त्रिणश्च तथा चक्रुश्च ते तथा ॥ 7. this, and the following Sloka, are wanting in B. 8. For this and the following Sl. B. 7-9. वारमुख्यास्तु तच्छ्रुत्वा वनं प्रविविशुर्महत् । आश्रमस्याविदूरेऽस्मिन् यत्नं कुर्वन्ति दर्शने ॥ ऋषेः पुत्रस्य धीरस्य नित्यमाश्रमवासिनः । पितुः स नित्यसंतुष्टो नातिचक्राम चाश्रमात् ॥ न तेन जन्मप्रभृति दृष्टपूर्वं तपस्विना । स्त्री वा पुमान् वा यच्चान्यत् सत्त्वं नगरराष्ट्रजम् ॥

श्रीजानकीवल्लभो विजयते ।

अथ सोमाकरसुधाकरभाष्याभ्यां सहितं

याजुषज्योतिषं प्रारभ्यते ।

पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम् ।
दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा शुचिः ॥ १ ॥
ज्योतिषामयनं पुण्यं प्रवक्ष्याम्यनुपूर्वशः ।
सम्मतं ब्राह्मणेन्द्राणां यज्ञकालार्थसिद्धये ॥ २ ॥

सोमाकरः— अव्याकृताद्व्याकृतं यत् तदाद्यं
वर्ण्यात्मकं शब्दराशिं विशिष्टैः ।
कालस्येदं कारकं यज्ञसारं
भोगावाप्तेः साधनं सम्प्रणम्य ॥ १ ॥
देशस्य कालस्य विपर्ययाद्य-
दुत्पन्नार्थं वाङ्मात्रं तु शास्त्रम् ।
ज्यौतिषं नामाकुलकं प्रधानं
सोमाकरोऽहं विवृणोमि शक्त्या ॥ २ ॥
लब्ध्वा ज्ञानं प्रातिभं बुद्धियोगात्
तद्वच्च भाष्यप्रचयोऽस्य नास्ति ।
सर्वज्ञत्वं नास्ति ममेति मत्वा
(१)ज्योतिर्विदो नूनं प्रणिपत्य मूर्ध्ना ॥ ३ ॥

(१) ज्योतिर्विदोऽन्यान् इति पाठान्तरम् ।

Digitized by Google

यस्मादहं स्वप्रभावात् प्रवृत्तो-
ऽहोरात्रीये गणिते चाप्ययत्नः ।
तस्मादन्ये वस्तुसारं विदित्वा
कृत्स्नार्थांश्च कल्पयिष्यन्ति शेषम् ॥ ४ ॥

पञ्चसंवत्सरमयमिति । एतेन श्लोकद्वयेन शास्त्रकारोऽभिधेयभूतामिष्टदेवतां नमस्कृत्य वस्तूपन्यासं करोति । तद्यथा । शुचिरहं वाङ्मनःकायशुद्धो ज्योतिषामयनं सूर्यचन्द्रनक्षत्राणां गमनं प्रवक्ष्यामि कथयिष्यामि । कथम् । अनुपूर्वशो यथाक्रमेणेत्यर्थः । कीदृशम् । पुण्यम् । यागकालविधिज्ञानतया पापापहम् । तथा सम्मतं ब्राह्मणेन्द्राणाम् । [1]यज्ञमानानामभिप्रेतम् । एते वै यज्ञस्येन्द्रा इति श्रुतेः । किमर्थम् । यज्ञकालार्थसिद्धये । यागचोदितकालविधानार्थमित्यर्थः । किं कृत्वा । प्रणम्य । नमस्कृत्य । कम् । प्रजापतिम् । स्रष्टारम् । केन । शिरसा । उत्तमाङ्गेन । कीदृशम् । पञ्चसंवत्सरमयम् । संवत्सरपरिवत्सरेदावत्सरानुवत्सरेद्वत्सरात्मकम् । तथा युगाध्यक्षम् । कृतादीनां [2]वैष्णवबार्हस्पत्येन्द्राग्नित्वाष्ट्राहिर्बुध्न्यपित्र्यसौम्यवैश्वदेवसर्पार्यम्णादाक्षभाग्यान्तानां द्वादशानां च स्रष्टारम् । तथा दिनर्त्वयनमासाङ्गम् । कालावयवा दिनादयो मुहूर्तकालपुरुषस्याङ्गानि । तथा स एव संवत्सरः प्रजापतिः षोडशकलस्तस्याहोरात्राय एव पञ्चदश कला ध्रुवैवास्य षोडशी कलेति । [3]मासाश्चार्धमासाश्च पर्वाणि ऋतवोऽङ्गानि संवत्सरो महिमेति । एवमहं प्रवृत्त इत्यर्थः ॥ १–२ ॥

सुधाकरः–'पञ्चसंवत्सरमययुगाध्यक्षं' इति पाठः साधुः ।

अहं शुचिः पवित्रो भूत्वा वा शुचिनामा ज्योतिषां ज्योतिश्शास्त्राणामयनं स्थानं निधिरूपं निबन्धम् । अनुपूर्वशो यथाक्रमम् । प्रव-

(१) यज्ञानामभिप्रेतम्–इति पाठान्तरम् ।

(२) वाजसंहितानुसारेण पित्र्यवैश्वदेवसौम्यब्राह्मानलदाक्षभाग्यान्तानाम्–इति पाठः साधुः ।

(३) मासाश्चार्धमासाश्च पर्वाणि ऋतवोऽङ्गानि संवत्सरो महिमेति । (तैत्तिरीयसंहिता, अष्टक ५, अध्याय ७, अनुवाक २५) ॥

ष्यामि कथयिष्यामि । किमर्थम् । यज्ञकालार्थसिद्धये । ज्योतिष्टोमादीनां यज्ञानां ये कालास्तदर्थानां वा सिद्धिस्तस्यै । किं कृत्वा । प्रजापतिं ब्रह्माणं शिरसा मूर्ध्ना प्रणम्य प्रणिपातपूर्वकं नमस्कृत्य । किं विशिष्टं ब्रह्माणम् । पञ्चसंवत्सरमययुगाध्यक्षम् । पञ्चसंवत्सरात्मकं यद्युगं तदध्यक्षं तदधिपतिम् । पुनः किंविशिष्टम् । दिनर्त्वयनमासाङ्गम् । दिनानि ऋतवः अयने मासाश्चैवाङ्गानि यस्य तम् । किंविशिष्टं ज्योतिषामयनम् । पुण्यं पवित्रं पुण्योत्पादकमित्यर्थः । पुनः किंविशिष्टम् । ब्राह्मणेन्द्राणां ब्राह्मणेषु श्रेष्ठानां ज्योतिर्विदां सम्मतं ज्योतिर्विद्भिः स्वीकृतमित्यर्थः ॥ १–२ ॥

वेदा हि यज्ञार्थमभिप्रवृत्ताः
कालानुपूर्वा विहिताश्च यज्ञाः ।
तस्मादिदं कालविधानशास्त्रं
यो ज्योतिषं वेद स वेद [1]यज्ञम् ॥ ३ ॥

सोमाकरः—वेदा हि यज्ञार्थमिति । वेदा ऋग्वेदादयः किल यस्माद्यज्ञार्थमभिप्रवृत्ताः प्रगता उत्पन्नाः ।

यथा च स्मृतिः ।

अग्निवायुरविभ्यश्च त्रयं ब्रह्म सनातनम् ।
दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम् ॥

तथा कालानुपूर्वा विहिताश्च यज्ञाः । दिनर्त्वयनेषु यज्ञा विहिता विभक्ताः श्रुताः । यथाह । पुण्याहे दीक्षा वसन्ते ज्योतिष्टोमेन यजेत यजेत वाजपेयेन ग्रीष्मे इति । तथा [2]पञ्चशारदीय इति । तस्मादिदं कालविधानशास्त्रम् । अनेन हि कालावयवा विज्ञायन्ते । यो ज्योतिषं वेद स वेद यज्ञम् । ज्योतिःशास्त्रज्ञः कालस्वरूपज्ञः । तथा यथो-

(१) यज्ञान् इति पाठः साधुः ।

(२) पञ्चशारदीयो वा एष यज्ञ इति (तैत्तिर्यब्राह्मण, अष्टक २, अध्याय ७, अनुवाक ११) ।

Digitized by Google

ज्यज्ञफलभाग्भवतीत्यर्थः । (१) न हि कुविदुरिव मनुष्यनक्षत्रमिति श्रुतिः । तथा । ते असुरा अयज्ञा अदक्षिणा अनक्षत्रा यच्च किञ्चाकुर्वत तां कृत्यामेवाकुर्वतेति ।

तथा च परिशिष्टकृत् ।

मन्त्रपादपदसन्धिविधिज्ञो धातुनामवचनप्रकृतिज्ञः ।
ईदृशो भवति यज्ञविधिज्ञः पक्षमासतिथिचन्द्रगतिज्ञः ॥ इति तृतीयः ॥ ३ ॥

सुधाकरः—अस्य ज्योतिषशास्त्रस्य कथं वेदाङ्गत्वमित्यत आह वेदा हीति । हि यतो वेदा यज्ञार्थमभिप्रवृत्ताः सन्ति । यज्ञाश्च कालानुपूर्व्याः कालाधीनाः सन्ति । तस्मादिदं ज्योतिषं कालविधानशास्त्रं कालविधिविधायकं यो वेद जानाति स वेदाङ्गज्ञानाद् यज्ञान् दर्शपौर्णमासादीन् वेद जानाति । कालबोधकत्वादस्य किल वेदाङ्गत्वं सिद्धम् । वेदाङ्गत्वादवश्यमेव द्विजैरध्येतव्यमिति ।

तथा च सिद्धान्तशिरोमणौ भास्करः ।

वेदास्तावद्यज्ञकर्मप्रवृत्ता
यज्ञाः प्रोक्तास्ते तु कालाश्रयेण ।
शास्त्रादस्मात् कालबोधो यतः स्याद्
वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात्—इति ॥ ३ ॥

यथा शिखा मयूराणां नागानां मणयो यथा ।
तद्वद्वेदाङ्गशास्त्राणां (२)गणितं मूर्धनि स्थितम् ॥ ४ ॥

सोमाकरः—यथा शिखेति । यथा मयूराणां शिखा चूलिका मूर्धनि तिष्ठति । शिरसि यथा नागानां सर्पाणां मणयो रत्नानि । तद्वदेव वेदाङ्गशास्त्राणां गणितं वेदसंख्याविज्ञानं देवयजनादीनाम् ।

यथाऽऽह विष्णुः ।

(१) न वै कुविदुरिव नाम पुण्यनक्षत्रमिति श्रुतिः—इति पाठः साधुः ।
(२) ज्योतिषं—इति पाठान्तरम् ।

अरूणा वेदशास्त्राभ्यां विकल माया तु दीयते ।

अत एवास्य वेदाङ्गत्वं विदीते तात्पर्येणाह: ॥ इति । सम-

धिकमर्थमभिहितवान् ॥ ३ ॥

सुधाकरः—इदानीं स्कन्धत्रयात्मकज्योतिषशास्त्रे गणितं प्रशं-सते । यथा शिखेति । यथा मयूराणां शिखा मयूरशिरसि स्थिता । यथा नागानां सर्पाणां मणयस्तच्छिरोरूपफणासु स्थिताः सन्ति । तद्वत् तथा वेदाङ्गशास्त्राणां व्याकरणशिक्षाकल्पनिरुक्तछन्दसां शिरःसु गणितं ज्योतिषं स्थितमस्ति । यतश्च वेदाङ्गेषु संख्याव्यवहारात् संख्याविधान-प्रतिपादकं गणितशास्त्रमेव प्रधानमिति ॥ ४ ॥

ये बृहस्पतिना भुक्ता मीनात् प्रभृति राशयः ।
ते हृताः पञ्चभिर्याताः यः शेषः स परिग्रहः ॥

सुधाकरः—इदानीं पञ्चवर्षात्मकयुगे संवत्सरानयनमाह । ये बृहस्पतिनेति । बृहस्पतिना गुरुणा ये मीनात् प्रभृति मीनराशेः सका-शात् राशयो भुक्तास्ते पञ्चभिर्हृता लब्धा याता युगसंख्या ज्ञेया । यः शेषः स वर्तमाने युगे परिग्रहो ग्राह्य इति । अत्र पञ्चवर्षात्मकयुग एव सर्वो व्यवहारोऽत इदं पद्यं क्षेपकम् । बृहस्पतिभुक्तराशीनां पञ्चाल्पत्वात् सोमाकरभाष्येऽस्य पाठाभावाच्चेति स्फुटं ज्योतिर्विदामिति ।

माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः ।
युगस्य पञ्चवर्षस्य कालज्ञानं प्रचक्षते ॥ ५ ॥

सोमाकरः—। माघशुक्लप्रपन्नस्येति । एवमिह ज्योतिर्विदः कालज्ञानं तत्स्वरूपप्रतिपादनं प्रचक्षते कथयन्ति । कस्य । युगस्य । कीदृ-शस्य । पञ्चवर्षस्य । संवत्सरादीनां चैकीकृत्य यतश्चत्वारि मानानि वक्ष्यमाणानि सौरसावनचान्द्रार्क्षाणि । तेषां च यतः परस्परवैषम्येण कालवैषम्यम् । यतः सावनस्य संवत्सरस्य प्रत्यब्दमेव षड्दिनानि लुप्यन्ते सौरमानापेक्षया चान्द्रमानापेक्षया षड्दिनानि वर्धन्ते युगे च तानि त्वधिकमासाभ्यां पूर्यन्ते । यतस्तौ द्वौ युगमध्ये भवतः । तौ च युगा

द्वादश [1]वैष्णववार्हस्पत्यैन्द्राग्निस्त्वाष्ट्राहिर्बुध्न्यपित्र्यसौम्यवैश्वदेवसार्पा-येयमदाखभाग्याः । तैः षडुपचर्यनिष्पत्तिस्ततः कान्यं भवति । सौरमानापे-क्षया तस्य कुतः प्रवृत्तिरित्याह माघशुक्लेति । तदादिकालगणनेत्यर्थः ।

तथा च लौगाक्षिः ।

माघ्याः पौर्णमास्याश्चतुरहे संवत्सराय दीक्षन्त इति ।

तथा च गर्गः ।

कालज्ञानं महत्पुण्यं कालस्त्वादित्य उच्यते ।

स च माघस्य शुक्लस्य सोमवासवयोः सह ॥

सहोदयं श्रविष्ठाभिः प्रत्यमक्रामुदङ्मुखे । इति ।

एवमेव पौषकृष्णसमापिनः । ततस्तदा तस्य समापनं पञ्चाना-मन्ते एव । यतः शुक्लपक्षादिकालप्रवृत्तिरिति सिद्धं भवति यतः । एवम-तोऽधिमासमृतानां कृष्णपक्षादिकालप्रवृत्त्यपेक्षयैव मृतादानुष्ठानं कुर्वन्ति ।

तथा च गर्गः ।

तेषां च सर्वेषां नक्षत्राणां कर्मसु कृत्तिकाः प्रथममाचक्षते । श्रवि-ष्ठा तु संख्यायाः पूर्वा लग्नानाम् । अनुराधं पश्चिमम् । [2]विद्वानां रोहि-णी सर्वनक्षत्राणाम् । मघाः सौर्याणाम् । भोग्यानां चार्यमा । नक्षत्राणां [3]सर्वासां षड्गणीतानामादिः श्रविष्ठा । एवं पञ्चवर्षस्य युगस्यादिः संवत्सरः । वसन्त ऋतूनाम् । माघो मासानाम् । पक्षाणां शुक्लः । अय-नयोरुत्तरम् । दिवसानां शुक्लप्रतिपत् । मुहूर्त्तानां रौद्रः । करणानां किं-स्तुघ्नः । पक्षाणां ध्रुव इति । ननु कथमेवा श्रातपथी श्रुतिः—या वैषा फाल्गुनी पौर्णमासी संवत्सरस्य प्रथमा रात्रिः । योत्तरा सा पूर्वमुत्तमेति मानुषाणां च विषयापेक्षया यतस्तेषां यथा चोदनास्ते फाल्गुन्यां पौर्ण-मास्यां लभन्त इति । ततो नैतेषां [4]नैसर्गिकी कालव्यवस्था । यस्माद-घमर्षणसूक्ते—

(१) १-२ श्लोकटीकायाष्टिप्पणी विलोक्या ।

(२) विद्यानां-इति पाठः साधुः । (३) सर्वेषां-इति पाठः साधुः ।

(४) सांसर्गिकी-इति वि·पुस्तके पाठः ।

अहो[1]रात्रं सूर्या चन्द्रमसां पुरा कल्पव्यवस्थया ।

कालानां च स्थितिः प्राप्ता या सा वेदावधार्यते—इति ॥ ५ ॥

सुधाकरः—इदानीमनाद्यन्तकालेऽथ कियत्कालपर्यन्तं गणने-च्छायामाशङ्क्याह माघशुक्लेति । अथ दैवज्ञाः पञ्चवर्षात्मकयुगस्य मध्ये कालानां चान्द्रसौरसावननक्षत्राणां ज्ञानं प्रचक्षते कथयन्ति । किंविशिष्टस्य । माघशुक्लप्रपन्नस्य माघशुक्लप्रतिपदि समुद्भूतस्य । पुनः किंविशिष्टस्य । पञ्चमे वर्षे पौषकृष्णसमापिनः पौषकृष्णामावास्यां यस्य समाप्तिर्भवति तस्य । अथ चान्द्रा मासा गृह्यन्ते येषामारम्भः शुक्लादिः समाप्तिस्तु दर्शान्ते ॥ ५ ॥

स्वराक्रमेते सोमार्कौ यदा साकं सवासवौ ।

स्यात् तदादियुगं माघस्तपः शुक्लोऽयनं ह्युदक् ॥ ६ ॥

सोमाकरः—स्वराक्रमेते सोमार्काविति । स्वर्देवत्र यस्मिन् काले आक्रमेते व्याप्नुतः । कौ । सोमार्कौ । कस्य साकं सह । तथा सवासवौ धनिष्ठायां नक्षत्र इत्यर्थः । तथा च तत्र यदि बृहस्पतिरास्ते । तदा किमित्याह । स्यात् तदादियुगम् । तदादियुगप्रारम्भो भवेत् । तथा तदेव माघो मास चतुर्थो भवेत् । तथा स एव तपो मासो भवेत् । तप[2]श्च तपस्यश्चेति श्रुतेः । तथा शुक्लः पक्ष इति वाक्यशेषः । तथा तदेव यस्मादुदगयनं भवेदिति प्रतिज्ञा । ननु यद्येवं कथमृतूनां वसन्तो जायते प्राच्यस्तत्पूर्वाः सर्वाः श्रुतय इति । उच्यते । तास्तु वर्णानां कर्मानुष्ठानाभिधायकत्वेन प्रवृत्ताः । यस्माच्छिशिरस्यैवाद्यं जन्म श्रूयते । शिशिराद्ये अग्नेर्जन्मेति । तस्मादग्निरभिव्यज्यतेऽभ्याजमाग्निजन्म यतः स्वयमनभिव्यक्तरूपमासीत् पश्चाच्च तेषामभिव्यक्तिं गतस्ततोऽस्य पश्चिमजन्मेतदित्यभिगतत्वादत एवाह सर्ववर्णानां कर्माधिकारस्तस्मात्तदात्वेव मुख्यप्रवृत्तिस्तथाप्येवम् ॥ ६ ॥

---

(१) अथ सूर्याचन्द्रमसां—इति पाठः साधुः ।

(२) तपश्च तपस्यश्च शैशिरावृतू इति । (तैत्तिरीयसंहिता अष्टक ४, अध्याय ४, अनुवाक ११) ॥

सुधाकरः—स्वर्लोके कस्य माघस्य शुक्लप्रतिपदि पञ्चवर्षात्मक युगस्यारम्भ इत्याह स्वराक्रमेते इति। यदा सहवासवौ धनिष्ठानक्षत्र-सहितौ सोमार्कौ चन्द्रसूर्यौ साकं सह स्वराकाशे आक्रमेते तदा तदा-ऽऽदियुगं भवति। अथैतदुक्तं भवति। "यदा रविचन्द्रौ धनिष्ठान्तं क्रा-न्तिवृत्ते एकत्रैव स्यातां तदाऽऽदिर्युगस्य। न चात्र धनिष्ठानक्षत्रसम्बन्धि-स्थानां युतिरपेक्षिता। ज्योतिषसिद्धान्ते सर्वत्र दर्शादिसन्धेन स्थानीय-युतिग्रहणात्" इति [1]बार्हस्पत्यमतम्। कस्यचिद्विदुषो मते नाम युगमिति प्रसिद्धम्। अतो यस्मिन् काले बिम्बाभिप्रायेण तयोर्युतिर्जाता स एव युगादिरिति बहूनां मतम्। क्रान्तिवृत्तस्य समाः सप्तविंशति-भागा एव ज्यौतिषवेदाङ्गे नक्षत्राणि। अतोऽयमश्वाकोऽत्र श्रविष्ठापदेन क्रान्तिवृत्ते तत्स्थानमेवापेक्षितमतोऽत्र बार्हस्पत्यमतमेव समीचीनमिति सम्मतम्। यदा युगादिस्तदैव माघो माघादिः। स एव माघः स एव तपः। माघस्तपश्चैकार्थवाचिनौ शब्दावित्यर्थः। तपःशब्देन तपो नाम ऋतुरिति बार्हस्पत्यमतं मन्महे न साधु। तपश्च तपस्यश्च शैशिरावृतू इति श्रुतेः। यदा युगादिस्तदैव शुक्लपक्षादिः। तथा हीति निरुक्तमेवा-वगाच्चमुदगयनादिश्चेति॥ ६॥

प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुदक्।
सार्पार्धे दक्षि[2]णार्कस्तु माघश्रावणयोः सदा॥७॥

सोमाकरः—प्रपद्येते श्रविष्ठादाविति। सर्वेषु युगेषु सूर्याचन्द्र-मसावुदक् प्रवर्तिं प्रपद्येते। श्रविष्ठादौ प्रथमेऽंशे। तथा सार्पार्धे आश्ले-षामध्ये योगमार्गे सूर्यो दक्षिणां प्रपद्यते। एवं तथा माघश्रावणयोः सर्वकालं पञ्चस्वपि संवत्सरेष्वित्यर्थः। एवं भूतस्य॥ ७॥

(१) ज्योतिषवेदाङ्गविषये बार्हस्पत्यनामा कविः सन् १९०६ वर्षीय हिन्दुस्तान रिव्यू (Hindustan Review) नामके मासिकपत्रे मार्चमासात् नोवेम्बरमासपर्यन्त-मङ्ग्लभाषायां लेखं लिलेख।

(२) दक्षिणार्कस्य इति पाठः साधुः।

सुधाकरः—श्रविष्ठादौ माघ शुक्लादौ रवि । सूर्याचन्द्रमसौ यदा श्रविष्ठादौ श्रविष्ठादौ प्रपद्येते तदैवायं वत्सरारम्भः । तथा तौ यदा सार्पार्धे श्लेषार्धे तदा दक्षिणं दक्षिणायनं भवति । यदा सर्वदाऽत्रैव सूर्यस्य माघश्रावणयोरस्ते उदग्दक्षिणायने भवतः ।

अत्रेदमवधेयं तावज्ज्योतिषवेदाङ्गसम्मतो रविभगणादयः प्रदर्श्यन्ते । वराहमिहिरकृतपञ्चसिद्धान्तिकायां पैतामहसिद्धान्ते ये रविभगणादयस्ते निर्दिष्टास्तत्र ज्योतिषवेदाङ्गीया इति (मत्कृता पञ्चसिद्धान्तिकाटीका विलोक्या) ॥

तत्रैकस्मिन् युगे रविवर्षाणि = ५ = एतावन्त एव रविभगणाः ।

सौरमासाः = ६० । सौरदिनानि = १८०० ।

चान्द्रमासाः = ६२ । चान्द्रदिनानि = १८६० ।

क्षयाहाः	=	३० ।
सावनदिनानि	=	१८३० ।
भभमा वा नक्षत्रोदयाः	=	१८३५ ।
चन्द्रभगणाः	=	६७ ।
चन्द्रसावनदिनानि	=	१७६८ ।
एकस्मिन् सौरवर्षे सावनदिनानि	=	३६६ ।
एकस्मिन् सौरवर्षे चान्द्रदिनानि	=	३७२ ।
एकस्मिन् सौरवर्षे नक्षत्रोदयाः	=	३६७ ।
अयनस्मादयनाद् द्वितीयायनपर्यन्तं सौरदिनानि	=	१८० ।

एते सौरांशा वा सौरदिनानि एकनक्षत्रभोगेन भक्ते लब्धानि तदर्धे २७/२ भैक्ता तत्राप्ययनयोरन्तरे नक्षत्राणि = $\frac{२७ \times १८०}{३६०} = \frac{२७}{२} = १३\frac{१}{२}$ । श्रविष्ठादिगणनया जातं द्वितीयमयनं श्लेषार्धेऽत उपपन्नम् । यद्वाऽयनाद् द्वितीयायनपर्यन्तं सौरवर्षार्धे तत्र रविः सप्तविंशत्यर्धमितानि नक्षत्राणि पूर्वागतनक्षत्रसमानि । माघे धनिष्ठागतत्वाद्रवेरुत्तरमयनम् । श्लेषार्धगतत्वेन कार्किराशिगतत्वाच्च श्रावणे मासि तस्य दक्षिणमयनमिति स्फुटम् ॥ ७ ॥

घर्मवृद्धिरपां प्रस्थः क्षपाह्रास उदग्गतौ ।
दक्षिणेतौ विपर्यासः षण्मुहूर्त्ययनेन तु ॥ ८ ॥

सोमाकरः—घर्मवृद्धिरपां प्रस्थ इति । तस्य सूर्यस्य उदग्गतौ निमित्ते घर्मवृद्धिर्भवतीति वाक्यशेषः । घर्म इत्यहर्नाम । घर्मः । [1]घ्रंसः । घृणिः । इत्यहर्नामसु पठितम् । तथा क्षपाह्रासः । रात्रिः । क्षपा । श्यावी । शर्वरी । इति रात्रिनामसु पठितम् । तदाप्रभृति दिनानि वर्धन्ते [2]रात्रिश्चापचीयते । एवमेव तस्य दक्षिणेतौ विपर्यासः । दक्षिणायने दिनह्रासो रात्रिवृद्धिश्चेत्युक्तं भवति । कियती वृद्धिरित्याह षण्मुहूर्त्ती षण्मुहूर्ताः ।

तथा च गर्गः ।

उदग्गतेऽर्के षण्मासास्तपाद्दीनार्कमानजाः ।
क्रमाद्देव्राचयः षट्संख्या दिनवृद्धिमिति ॥
उदग्गतेऽर्के षण्मासास्तपाद्या षर्कमानजाः ।
क्रमादह्नां मुहूर्ताः स्युः षट्संख्या दिनवृद्धये ॥

एवमयने वृद्धिह्रासौ । तथा च सापि कियतीत्याह । प्रस्थो [3]द्वात्रिंशत्पलात्मकमित्यर्थः । एवं पञ्चानामपि युगानामहः सामान्यलक्षणमाह ॥ ८ ॥

सुधाकरः—इदानीमयनयोर्दिनरात्रिमाने चाह घर्मवृद्धिरिति । उदग्गतावुत्तरायणे इत्यपां पयसां प्रस्थमात्रं प्रत्यहं घर्मवृद्धिर्दिनवृद्धिर्भवति तथा तदेव प्रस्थमात्रं क्षपाह्रासो रात्र्यपचयो भवति । दक्षिणेतौ दक्षिणायने च विपर्यासो भवति, प्रत्यहं जलप्रस्थसमो दिनह्रासस्तथा रात्र्युपचयो भवतीत्यर्थः । अयनेन तु एकस्मादयनात् द्वितीयायनेन दिनरात्र्योः षण्मुहूर्तौ । मुहूर्ता घटिकाद्वयमित्यनेन द्वादशघटिकातुल्यो

(१) घ्रंस इति पाठः साधुः ।
(२) रात्रिश्चापचीयते इति पाठान्तरम् ।
(३) सार्धद्वादशपलानीत्यर्थः इति पाठः साधुः ।

Digitized by Google

दिनरात्र्योर्वृद्धिक्षयौ भवतः । अत उत्तरायणारम्भे परमाल्पं दिनमानम् = २४ नाडिकाः । दक्षिणायनारम्भे च परमाधिकं दिनमानम् = ३६ नाडिकाः । एवं विपर्ययाद्रात्रिमाने च ।

अत्रोपपत्तिः ।

द्रोणस्तु खार्याः खलु षोडशांशः
स्यादाढको द्रोणचतुर्थभागः ।
प्रस्थश्चतुर्थांश इहाढकस्य
प्रस्थाङ्घ्रिराद्यैः कुडवः प्रदिष्टः ॥
इति भास्करपाटीगणितप्रसिद्धपरिभाषाभिस्तथा

पलानि पञ्चाशदपां धृतानि तदाढकं द्रोणमतः प्रमेयम् ।
त्रिभिर्विहीनं कुडवैस्तु कार्यं तन्नाडिकायास्तु भवेत् प्रमाणम् ॥

इति ज्योतिषवेदाङ्गचतुर्विंशश्लोकेन त्रिभिः कुडवैर्विहीनं द्रोणं नाडिकायाः प्रमाणम् ।

तथा

५० प. = १ आढकः । ४ आ. = १ द्रो. = २०० प. ।

४ प्र. = १ आ. = ५० प ∴ प्र. = १२$\frac{१}{२}$ प. ।

४ कु. = १ प्र. = १२$\frac{१}{२}$ प ∴ कु. = ३$\frac{१}{८}$ पलानि

अतः ३ कुड. = ९$\frac{३}{८}$ पलानि ।

एका नाडिका = १ द्रो. − ३ कु. = २०० प. − ९$\frac{३}{८}$ प. = १९०$\frac{५}{८}$ प.

$$= \frac{१९०\frac{५}{८}}{१२\frac{१}{२}} \text{ प्रस्थाः} = \frac{१५२५ \times २}{८ \times २५} \text{ प्र.} = \frac{६१}{४} \text{ प्रस्थाः ।}$$

द्वादशघटिकासु प्रस्थमानम् = १२ × $\frac{६१}{४}$ = १८३ ।

अयनयोर्मध्ये सूर्यसावनदिनानि सौरवर्षसावनदिनार्धसमानि = $\frac{३६६}{२}$ = १८३ । ततोऽनुपातो यदि १८३ सावनदिनैः १८३ प्रस्था लभ्यन्ते तदैकेन सावनदिनेन किं लब्धिः प्रस्थमितो प्रत्यहं दिनरात्र्योर्वृद्धिक्षयौ भवत

Digitized by Google

इत्युपपद्यते । यथा चषकं सच्छिद्रपात्रं पूर्णं जलघटी प्राचीनैः ज्योतिर्विद्भि॰र्निर्मिता यत्राधश्छिद्रेण प्रतिपलं पलात्मकं जलं पतति तथा ज्योतिषवेदाङ्गसमये तथैकं जलयन्त्रमासीत् यत्र $\frac{५१}{४}$ प्रस्थमितं जलमधश्छिद्रेण घटीतुल्येन कालेन निरसरत् । तत्र प्रस्थमितजलनिःसरणकालस्य पानीयपलकालवत् प्रस्थसंज्ञा उच्यते । एवमाढकतुल्यजलनिःसरणकाल आढकसंज्ञः । एवमन्येऽपि कालसंज्ञका बोध्या इति । एवमत्र ज्योतिषवेदाङ्गस्य यत्र रचना जाता तत्र परमं मकरघटीमानं षोडशाधिकं सिध्यति ततो 'दिग्नागसत्र्यंशगुणोर्विनिघ्नी' इत्यादिभास्करप्रकारेणोपपत्त्येन तत्र देशे स्वल्पान्तरात् अक्षांशाङ्गुलात्मिका = $\frac{१८०}{२१\frac{१}{३}}$ = $\frac{५४०}{६४}$ = $\frac{१३५}{१६}$ = ८ $\frac{७}{१६}$ । अथ चापीयत्रिभुजेन चरज्या = अक्षांशस्पर्शरेखा × क्रान्तिस्पर्शरेखा + त्रिज्या ।

अत्र प्राचीनरीत्या परमं चरं परमक्रान्तिं च त्रिंशांशसमां गृहीत्वा सूक्ष्मज्याविधिना लघुरिक्थपत्रेण

लास्पअ = लाज्याच − लास्पक्रां + १० । अनेन समीकरणेन सूक्ष्मा अक्षांशाः = ३४° । ४५′ । ४०″ ॥ ८ ॥

प्रथमं सप्तमं चाहुरयनाद्यं त्रयोदश ।
चतुर्थं दशमं चैव [1]द्विर्युग्माद्यं बहुलेऽप्यृतौ ॥ ९ ॥

सोमाकरः—प्रथमं सप्तमं चाहुरिति । एतानि आद्यानि दिनानि द्वे द्वे युगाब्दानां पक्षाणाम् । कथम् । प्रथमं सप्तमं चाद्यस्य माघशुक्लप्रतिपत् श्रावणशुक्लसप्तमी च तयोरुदगयनदक्षिणायने संवत्सरस्याद्यस्यावगर्भादयः । तथा द्वितीयस्य त्रयोदशं शुक्लं चतुर्थं कृष्णम् । एवं तृतीयस्य दशमं कृष्णम् । द्विरेवं पुनर्बहुलेऽप्यृतौ कृष्णपक्षकाले बहुलचन्द्रस्य कलास्ततो लीयन्ते । ततो बहुलमपरपक्षः । कथम् । प्रतिपदादि द्वे द्वे इत्यर्थः । एतदुत्तरश्लोके स्फुटतरं गर्गवाक्यैः प्रतिपादयिष्यामः ॥ ९ ॥

(१) द्विर्युग्म इति पाठः साधुः ।

सुधाकरः—अथैकस्मिन् युगे दशस्वयनेषु तिथीराह प्रथम-मिति। प्रथमं सप्तमं त्रयोदशं चतुर्थं दशमं तिथिं द्विगुणमाद्याया-मयनाद्यमाहुः। अत्रैतदुक्तं भवति। १। ७। १३। ४। १०। एतास्ति-थयो द्विः स्थाप्यास्तदा अयनाद्यास्तिथयः स्युः। प्रथममयनं प्रतिपदि द्वितीयं सप्तम्यां तृतीयं त्रयोदश्यां चतुर्थं चतुर्थ्यां पञ्चमं दशम्याम्। पुनः षष्ठाद्यं प्रतिपदादिषु भवतीत्यर्थः। तत्र युग्मं तिथिमाने चतुर्थी दशमी च बहुले कृष्णपक्षे ज्ञेयम्। अन्यानि तिथिमानानि चानुक्तत्वात् शुक्लपक्षे बोध्यानीति। अपि निश्चयेनैवमृतौ षट्तिथौ षडधिके तिथावेकायनति-थेरपरायनतिथिर्भवतीत्यर्थः।

अत्रोपपत्तिः। एकायनादपरायनपर्यन्तं वर्षचान्द्रदिनार्धसमा-स्तिथयो भवन्ति। एकस्मिन् सौरवर्षे चान्द्रतिथयः = ३७२। एतदर्धमा-नम् = १८६। अत्र मासानां प्रयोजनाभावात् त्रिंशत्तष्टे ह्येकायनतिथेर-परायनतिथिः षडधिका। तथाकृते जाता अयनाद्यास्तिथयः। १। ७। १३। १९। २५। १। ७। १३। १९। २५॥

अत्र चतुर्थी पञ्चमी संख्या तथा नवमी दशमी संख्या च पञ्च-दशतिथिवियोजनेन जाता कृष्णपक्षीया चतुर्थी दशमी च। अत्र शुक्लप-क्षादिमासो गृहीतः सप्तमश्लोके माघश्रावणयोः सदेत्युक्तत्वात्। प्रथ-ममयनाद्यं माघशुक्लप्रतिपदि। द्वितीयमयनं श्रावणशुक्लसप्तम्याम्। तृतीयं माघशुक्लत्रयोदश्याम्। चतुर्थं श्रावणकृष्णचतुर्थ्याम्। पञ्चमं च माघकृ-ष्णदशम्यां भवति। एवं नवमदशमे अपि श्रावणकृष्णचतुर्थीमाघकृष्णद-शम्योः क्रमेण भवत इति सर्वं निरवद्यम्। इदं बार्हस्पत्यव्याख्यानं समीचीनम्। तत्र ऋतुशब्देन मासो मन्यते न समीचीनः किन्तु ऋतुश-ब्देनात्र प्रसिद्धा षट् संख्या ग्राह्येति॥ ९॥

वसुस्त्वष्टा भवोऽजश्च मित्रः सर्पोऽश्विनौ जलम्।
(१)धाता कश्चायनाद्याः स्युरर्धपञ्चमभस्त्वृतुः॥१०॥

(१) अर्यमा कोऽयनाद्याः इति पाठः साधुः।

Digitized by Google

सोमाकरः—वसुस्त्वष्टा भवोऽजश्चेति । वसुर्धनिष्ठा देवतोप-
लक्षिता । एवं त्वष्टा चित्रा । भवो रुद्र आर्द्रा । अजः पूर्वप्रोष्ठपदाः ।
मित्रोऽनुराधाः । सर्प आश्लेषाः । अश्विनावश्वयुजौ । जलं पूर्वाषाढाः ।
धाता उत्तरफाल्गुनी धातार्यमेति मन्त्रवर्णात् । को रोहिणी । इत्येते
पक्षाः । एतेनैव क्रमेणायनाद्याः स्युर्भवेयुः । एवमप्यर्धपञ्चमभस्त्वृतुः ।
भतो भतो सार्धाश्चत्वार पक्षा भवन्ति । वक्ष्यमाणवचनैर्व्याख्यैः ।
एतस्मिन्नर्थे प्रतिपत्त्यर्थे विस्तरेणाह गर्गः ।

तद्यथा ।

अयनान्यृतवो मासाः पक्षास्तृक्षं तिथिं दिनम् ।
तत्त्वतो नाधिगम्यन्ते यदाब्दो नाधिगम्यते ॥ १ ॥
यदा तु तत्त्वतोऽब्दस्य क्रियतेऽधिगमो बुधैः ।
तदैवैषाममोहः स्यात् क्रियाणां चापि सर्वशः ॥ २ ॥
तस्मात् संवत्सराणां तु पञ्चानां लक्षणानि च ।
कर्माणि च पृथक्त्वेन दैवतानि च वक्ष्यति ॥ ३ ॥
यदा माघस्य शुक्लस्य प्रतिपद्युत्तरायणम् ।
सहोदयं श्रविष्ठाभिः सोमार्कौ प्रतिपद्यतः ॥ ४ ॥
तदा नभस्यसप्तम्यां क्रियते दक्षिणायनम् ।
सार्पार्धे कुरुते युक्तिं चित्रायां च निशाकरे ॥ ५ ॥
प्रथमः सोऽग्निदैवत्यो नाम्ना संवत्सरः स्मृतः ।
यदा माघस्य शुक्लस्य त्रयोदश्यामुदग्रविः ॥ ६ ॥
युक्ते चन्द्रमसा रौद्रे वासवं प्रतिपद्यते ।
चतुर्थ्यां नभसः कृष्णे तदार्को दक्षिणायनम् ॥ ७ ॥
सार्पार्धे कुरुते सूर्यस्त्वजयुक्ते निशाकरे ।
द्वितीयश्चार्कदैवत्यः स नाम्ना परिवत्सरः ॥ ८ ॥
कृष्णे माघस्य दशमी वासवादौ दिवाकरः ।

Digitized by Google

उदीचीं दिशमातिष्ठेत् मैत्रस्थे (१)कृष्णतेजसि ॥ ९ ॥
नभसश्चातिवर्त्तेत शुक्लस्य प्रथमे तिथौ ।
चन्द्रार्काभ्यां सुयुक्ताभ्यां सार्पार्धे वायुदैवतम् ॥ १० ॥
तदा तृतीयं तं प्राहुरिदासंवत्सरं जनाः ।
सप्तम्यां माघशुक्लस्य वासवाद्दौ दिवाकरः ॥ ११ ॥
अश्विनीसहिते सोमे यदा चामुत्तरां व्रजेत् ।
सौम्ये चाप्ये च संयुक्ते सार्पार्धेऽथो दिवाकरः ॥ १२ ॥
व्रजेत याम्यां शुक्लस्य माधवस्य त्रयोदशीम् ।
चतुर्थमिन्दुदैवत्यं प्राहुश्चाप्यनुवत्सरम् ॥ १३ ॥
फाल्गुनीमुत्तरां प्राप्ते सोमे सूर्ये च वासवे ।
यद्युत्तरायणं कृष्णे चतुर्थ्यां तपसो भवेत् ॥ १४ ॥
माधवस्य च कृष्णस्य सार्पार्धे दशमीं पुनः ।
रोहिणीसहिते सोमे रवेः स्याद्दक्षिणायनम् ॥ १५ ॥
इद्वत्सरः स विज्ञेयः पञ्चमो मृत्युदैवतः ।
एवमेतद्विजानीयात् पञ्चवर्षस्य लक्षणम् ॥ १६ ॥
दृष्ट्वा स्वरूपं युक्तस्य तद्वर्षमिति निर्दिशेत् । इति ।

अर्धपञ्चमभस्त्वृतुरितीह प्रतिज्ञा यस्मादृतुसंख्यायां विप्रतिपत्तिराचार्याणाम् । (२)पञ्चर्तवः संवत्सरस्येति च ब्राह्मणम् । तथा गर्गस्त्रय ऋतव इत्याह । कृष्णात्रेयः षट् द्वादशेति । नारदश्चतुर्विंशतिरित्याह । भागुरिस्त्रीणि शतानि सषट्षष्टीनीत्याह । क्रोष्टुकिः न सर्वे ह्येते मता ऋतव ऋषिभिरिति । एवमिहोक्तचतुर्वेदं च ॥ १० ॥

सुधाकरः—इदानीमयनेषु नक्षत्राणि ऋतुनक्षत्राणि चाह वसुरिति । वसुर्धनिष्ठा । त्वष्टा चित्रा । भवो रुद्र आर्द्रा । अज एकपात् ।

---

(१) ऽनुष्णतेजसि-इति पाठः साधुः ।

(२) द्वादश मासाः पञ्चर्तवः संवत्सरः संवत्सर इति । (ऋग्ब्राह्मणपञ्चिका ७, खण्ड ८) ॥

Digitized by Google

मित्रोऽनुराधा । सर्पं आश्लेषाः । अश्विनावश्विनी । जलं पूर्वाषाढा । अर्यमा उत्तरफाल्गुन्यः । को रोहिणी । एता यथाक्रमं चन्द्रोद्भवाः स्युः । चतुर्थार्धपञ्चमभः । पञ्चमभस्य अर्धे सार्धैक-४ १/२ सूर्यनक्षत्राणि चैकत्रौ भवन्ति ।

अथोपपत्तिः । एकस्मिन् युगे चन्द्रनक्षत्राणि = ६७ × २७ = १८०९ । दशभिर्हृतानि लब्धान्येकस्मिन् पक्षे नक्षत्राणि = १८० ९/१० । सप्तविंशतितष्टानि = १८ ९/१० । एवं द्वित्र्यादिगुणानि १८ ९/१० । ३७ ८/१० । ५६ ७/१० । ७५ ६/१० । ९४ १/२ । ११३ ४/१० । १३२ ३/१० । १५१ २/१० । १७० १/१० । १८९ । एतानि सप्तविंशतितष्टानि जातानि १८ ९/१० । १० ८/१० । २ ७/१० । २१ ६/१० । १३ १/२ । ५ ४/१० । २४ ३/१० । १६ २/१० । ८ १/१० । ० । धनिष्ठात एतत्संख्यान्तरचन्द्रनक्षत्रेषु अयनानि भवन्ति । यथा धनिष्ठात एकोनविंशतितमनक्षत्रे चित्रायामन्ययनम् । धनिष्ठात एकादशे नक्षत्रे आर्द्रायां ततोऽन्यत् । धनिष्ठातस्तृतीये नक्षत्रे पूर्वभाद्रपदायां ततोऽप्यन्ययनम् । एवमन्यान्यपि चन्द्रनक्षत्रेषु भवन्ति । अथैकस्मिन् वर्षे सूर्यनक्षत्राणि = २७ । षड्भिर्हृतानि लब्धान्येकत्रौ सूर्यनक्षत्राणि = २७/६ = ४ १/२ अत उपपन्नं सर्वम् ॥ १० ॥

एकान्तरेऽह्नि मासे च पूर्वान् कृत्वा[1] दिरुत्तरः ।
अर्धयोः पञ्चपर्वाणां मृदू पञ्चदशाष्टमौ ॥ ११ ॥

सोमाकरः—पुनरेकान्तरेऽह्नि यस्मिन्नहनि सूर्यसङ्क्रमणं तस्मादह्नस्तृतीयेऽह्नि चतुरन्यो भवतीति वाक्यशेषः । कथम् । मासे च मासमतिक्रम्य तं द्वितीयं तृतीयमिति । तस्मादर्धपञ्चमभस्त्वृतुरिति द्वावेवोक्तौ । यस्मादृचोदनमप्याह । पूर्वान् कृत्वादिरुत्तरः । उत्तर आर्द्रादिर्वक्ष्यमाणश्चतः । स एकान्तरेऽह्नि मासे चापि भवेत् । तत्र श्रविष्ठान्युपलक्षितमाघयुक्तां तत एकमतिक्रम्य[2]न्तराणां कृत्तिकायुतां कार्त्तिकीं भवित्युत्तरमेव । पर्यवान्यो वा चतुः । एकान्तरे च दिने मासे च । एव-

(१) कृत्वादिरुत्तरः इति पाठः साधुः ।
(२) अतिक्रम्य भरणीं इति का॰ द्वि॰ पुस्तके पाठः ।

Digitized by Google

वसन्तः-(स्वगतं) स खलु सङ्कल्पयोनिः निर्मूलनस्येव न इति शेषः अन्यथा तु पूरयामि ।

(प्रकाशं) शेषं पुनर्दुर्वचम् ॥ ५४ ॥

रतिः-(सभयसंभ्रमं) * नाह परिरक्ख परिरक्ख ।

(इति भर्तारमाश्लिष्यति ।)

कामः-(गाढमुपगुह्य) अभुक्तपूर्वमिव निर्वेशं नाटयन् ।

(आत्मगतं)

जनितवलयभङ्गे दत्तहारावमर्दे
मुषितनिखिलखेदे मोहसन्तोषहेतौ ।
सचकितपरिरम्भे साम्प्रतं कातराक्ष्या-
स्त्यजति युगलचिन्तामङ्गयोरन्तरात्मा ॥ ५५ ॥

(प्रकाशं)

सखि महामोहसैनिकधुरन्धरस्य मम प्रेयसी सती मा भैषीः । समाश्वसिहि समाश्वसिहि । इदं खल्वैन्द्रजालिकनगरनिगरणप्रायमनिपुणनैगमिकरथ्यापुरुषनिर्मितं किमप्येतिह्यम् ।

तथा हि

कुवृत्तमिति कौक्कुटं व्रतमधिक्षिपद्भिस्तथा
सुधाकरशतक्रतु प्रभृतिभिः स्वयं चस्खले ।

---

* नाथ परिरक्ष परिरक्ष

दुर्वचं वक्तुमनर्हमित्यर्थः ॥ ५४ ॥

यतद्वच भयत्र्याद्गतेर्भयसंभ्रमो जातौ । निर्वेशः सुखानुभवः ।

जनितेति- जनितः वलयानां भंगो यस्मिन् दत्तः हारस्यावमर्दः विच्छेदो येन तस्मिन् मुषिताः प्रत्याख्याताः निखिलाः खेदा येन तस्मिन् कातराक्ष्यास्सचकिते सभये परिरंभे अन्तरात्मा मनः अंगयोः युगलचिन्तां युगलताज्ञानं त्यजति ॥ ५५ ॥

तस्समाश्वासायाह इदमिति ।

ऐन्द्रजालमिन्द्रजालसंबन्धि यन्नगरनिगरणं तत् प्रायं अनिपुणाः नैगमिकाः पौराः रथ्या पुरुषाः रथ्यायां चरन्तः पुरुषाः तैर्निर्मितं । अनेन समर्थान्तरंगपुरुषनिर्मितत्वं नास्तीति तदसत्यता द्योत्यते । अतो वैराग्यमसुलभमित्याह ।

कुवृत्तमिति- कौक्कुटं व्रतं कुक्कुटसंबन्धिव्रतं स्त्रियमाक्रम्य भुक्तिरूपं कुवृत्तं कुत्सितं शास्त्रनिषिद्धं वृत्तं व्यापार इति अधिक्षिपद्भिः निरस्यद्भिः सुधाकर शतक्रतु-प्रभृतिभिः तदादिभिः । आदिशब्देन पराशरादयो गृह्यन्ते । स्वयं चस्खले स्खलितं ।

मदङ्कभरपङ्क्तिकेनमतिकार्मुके मामके
विरक्ति गृहदेहलीं क इह दोहली पीड्यते ॥ ५६ ॥

तिष्ठन्तु च महाबला मन्त्रिवर्गाः ।

प्रमादालस्यनिद्रादिविविधव्यूहविग्रहः ।
प्रज्ञावरणघोरात्मा मोहः केन विजेष्यते ॥ ५७ ॥

रतिः—(स्वगतं) * विहिवसेण विवरीअं फणिअं अं अउत्तेण (प्रकाशं) होउ मङ्गलं महाराअस्स

वसन्तः—अयि मन्मथपत्निमास्मभैषी
ननु मोहादिषु संस्थितेषु सत्सु ।
प्रकृतिं पुरुषः प्रपित्समानः
प्रतिपद्येत विरक्तितो विमुक्तिम् ॥ ५८ ॥

रतिः—(आत्मगतं) † अज्जः वसंत भासिअं वि विवरीअं वि पडीसइ

---

* विधिवशेन विपरीतं कथितमार्यपुत्रेण भूयात् मङ्गलं महाराजस्य

† आर्यः वसन्तभाषितमपि विपरीतमिव दृश्यते

ताराहल्यादिसंभोगेषु तेषां बलात्कारेण प्रवृत्तेः । मदन्ती भ्रमरपंक्तिर्यस्मिंस्तस्मिन् मामके कार्मुके नमति सति दोहली कौतुकी कलवको वा विरक्तेर्गृहस्य देहलीं पीड्यते नकोपि पश्यतीत्यर्थः ॥ ५६ ॥

महामोहोपि स्वतोदुर्जय इत्याह ।

प्रमादेति— प्रमादः अनवधानं आलस्यं कर्मण्यपाटवं निद्रा बाह्येन्द्रियव्यापारोपरमः आदि शब्देन मूर्च्छा गृह्यते प्रमादादयो विविधा व्यूहविग्रहा यस्य स तथा । प्रज्ञाया आवरणमावृतिः तदेवघोर आत्मा स्वरूपं यस्य स तथा एवंरूपो मोहः केन विजेष्यते न केनापीत्यर्थः । अत्र केनापि पुरुषेण विजिष्यतइति ध्वनिः ॥ ५७ ॥

विरुद्धार्थकामवाक्यप्रयोगेन भीता सत्येव रतिरियं वदतीति मत्वा तद्भयमपनेतुं वसन्त आह ।

अयीति—मास्मभैषीः माबिभीहि मोहादिषु संस्थितेषु सम्यक् स्थितेषु जीवत्सु सत्सु प्रकृतिं प्रपित्समानः प्राप्तुकामः पुरुषः विरक्तितः वैराग्याद्धेतोः विमुक्तिं प्रतिपद्येत ननु काकुः न प्रतिपद्येतेत्यर्थः ॥ ५८ ॥

वसन्तभाषितमित्यादि तथापि मोहादिषु संस्थितेषु मृतेषु सत्स्विति प्रतीतेः पुनः पश्यति आर्येत्यादि ।

(प्रकाशं)

* अं अ उत्त किं विवेअस्स अत्थि विवेओ अमच्चाणं वा तस्स समदमपमुहाणं पुरुसेसु पअदिं मोत्तूण अम्हाणं ताणं वि अ विसेस सुलहं अवसाणं

कामः—एवमेतत् अस्मदुन्मेषमसहमानाः पुनरेते पापाः प्रज्ञाचक्षुषि क्वचित् पुरुषे सात्त्विके कुलद्वयमूलकलङ्कषासु कुहनासु गहनमीहन्ते, सर्वथामूढचेतसश्चैते मोघकर्माणो भविष्यन्ति । यतः ।

प्रसुप्तानपि युद्धेन सुग्रीवसुभटानिव ।
कर्मशक्तिरनुच्छेद्या पुनरुद्बोधयिष्यति ॥ ५६ ॥

(नेपथ्ये)

कोऽसौ विपर्यस्तदृष्टिरनुबद्धैकनियतकौतुकानस्मानेव पापान् प्रलपति । रेरे दुर्विनीतदुराचारनिबन्धनिर्गलितकूटस्थानां नृशंसवृत्तीनां वः प्रतिक्षेपे पुरुषस्य निरस्तनिखिलदुःखनिरतिशयानन्दप्रापणे सदापि तद्बुद्ध्यनुप्रवेशेन स्वकुलसंजीवने च दनुजमथनदयाधीनवृत्तयो वयं प्रवर्तामहे अस्ति चोपनिषद्देव्यामुद्योगः ।

---

* आर्यपुत्र किं विवेकस्य नास्ति विवेकः अमात्यानां वा तस्य शमदमप्रमुखाणां पुरुषे खलु प्रकृतिं मुक्त्वागते अस्माकं तेषामपि अविशेष सुलभमवसानम्

अविशेषसुलभमवसानं नाशकमाभावादिति भावः । प्रज्ञानं चक्षुर्यस्य स तथा । अन्ध इति च । सात्त्विके साक्षाद्द्रष्टरि क्वचित्स्थिते सतीति शेषः । कुलद्वयस्य कूलंकषासु उन्मीलितस्वार्थः कुहनासु मायासु तद्विषये गहनं गूढं यथा भवति तथा । अन्ध इव पुरुषे चेष्टमाने अस्मदुन्मेषासहतया कुलद्वयघातिनीं मायामतिनिगूढमिच्छन्तीति भावः । मोघकर्माणो भविष्यन्तीत्युक्तं । तत्कथमित्यपेक्षायामाह यत इति ।

युद्धेन प्रसुप्तानपि मोहादीनिति शेषः सुग्रीवस्य सुभटान् वानरादीनिव अनुच्छेद्या प्रतिघातानर्हा कर्मशक्तिः कर्मणां पुण्यपापरूपाणां शक्तिः फलप्रदानसामर्थ्यं पुनरुद्बोधयिष्यति । कदाचिद्विनष्टा अपि मोहादयः कर्मशक्त्या पुनरुद्भविष्यन्त एवेति भावः ॥ ५६ ॥

एतत्कामवचनमाकर्ण्यानन्तरं प्रवेष्टुकामो विवेकः कोऽप्याह कोऽसाविति ॥

विपर्यस्ता विपरीता दृष्टिः यस्य स तथा । तदेवाह अनुबद्धेति निबन्धं निबन्धनं यथा भवति तथा निर्गलितः कूटस्थो यैस्तेषां । निरस्तनिखिलदुःखो यो निरतिशयानन्दस्तत्प्रापणे तदाविमुक्तिदशायामपि तस्य पुरुषस्य बुद्ध्यनुप्रवेशेन स्वकुलसञ्जीवने स्वकुलस्य संजीवने च दयाधीनाः वृत्तयो व्यापारा येषां ते तथोक्ताः । दनुजमथनदयाधीनत्वं विष्णुनियतात्वमित्याह । अस्ति चेति । तथैवाह शेषमाह ।

Digitized by Google

स्वाधीनसंसरणनाट्यनिरूढवृत्तेः
सन्तोषितः प्रणतभूमिकयास्य पुंसः ।
स्थाने विधास्यति विभुस्स्थिरचिह्नभेदं
क्रीडानटस्य भगवान् कृपया स्वसाम्यं ॥ ६० ॥

ततश्च ।

रिपुमथनकृतं यशो महीयः
पितृपरिरक्षणसंभृतश्च धर्मः ।
अभिमतघटनोद्भवश्च हर्षः
स्सपदि विधास्यति सन्निधिं स्वयन्नः ॥ ६१ ॥

कामः—(सभयावहित्थमवलोक्य) प्रिये मोहपरिपन्थिपक्षे मूर्धाभिषिक्तः स्वयमसौ स्वसहधर्मचारिण्या सुमत्या सहाभ्यमित्रीण उपसर्पति । अयं हि

मुकुलयति विवित्सां मोहविध्वंसमिच्छन्
विमृशति निगमान्तान् वीक्षते मोक्षधर्मान् ।

स्वाधीनेति—स्वशब्दो भगवत्परः । संसरणस्य भगवदधीनत्वं । एष एवासाधु कर्म कारयति । त यमधोनिं निनीषतीति श्रुतं । संसरणमेव नाट्यं तस्मिन् निरूढा स्थिरा वृत्तिर्यस्य तस्य । प्रणताः प्रपन्नाः तेषां भूमिकया वेषेण सन्तोषितः । विभुः स्थिरः चिह्नानां भेदो यस्मिन् तत् । स्वसाम्यं भोगमात्रे साम्यं स्थाने स्वासाधारणे स्थानविशेषे विधास्यति करिष्यति । स्थिरचिह्नभेदमित्यत्र योषित्पक्षोपपत्तिस्त्व अग-व्यापारादिचिह्ने शब्दार्थः ॥ ६० ॥

ततश्च हेतोः ।

रिपुमथनेति— रिपूणां मथनेन कृतं अर्जितं महीयः श्लाघ्यं यशः पितुः परिरक्षणेन संभृतः पूर्णः धर्मश्च अभिमतघटनायाः उद्भवः उत्पत्तिर्यस्य स तथा हर्षश्च सन्निधिं सान्निध्यं विधास्यति ॥ ६१ ॥

विवेकदर्शनाद्भयं क्रोधविधौ तदनुचितमित्यवहित्था ताभ्यां सहितं यथा भवति तथावलोक्य अभ्यमित्रीणः अमित्राभिमुखं ।

मुकुलयतीति— विवित्सां विवेक्तुं विज्ञातिलाभपूर्वेच्छां वा मुकुलयति नाशयतीत्यर्थः । मोहविध्वंसमिच्छन्निगमान्तान्विमृशति । तदर्थान् विधास्यति ।

निशमयति च गीतामित्यमेकान्तभक्त्या
गुणपरिषदुदर्को गुप्तमन्त्रो विवेकः ॥ ६२ ॥

अपि च

प्रत्यङ्मुखीं सुमतिदीप्तिमिह प्रचिन्वन्
प्राप्तोदयोऽप्यमितरागबलाभिभूतः ।
क्षाम्यन्नहङ्कृतिमयीमवशो हिमानीं
भास्वानसौ भजति विष्णुपदं विवेकः ॥ ६३ ॥

तत्सांप्रतमस्माभिरप्राप्तसमयैरसहायैश्चारातिसन्निधावात्मानं प्रकाशयितुमिति समित्रकलत्रो निष्क्रान्तः ॥

॥ मिश्रविष्कम्भः ॥

मोक्षधर्मान्मोक्षैकान्तान् धर्मान्वीक्षते। तत्प्रतिपादकान् ग्रन्थान् परिचिनोति एकान्तभक्त्या अनन्यभक्त्या गुणाः शमदमादयः तेषां परिषत् उपचयः तदुदर्को तस्यामेव दत्तदृष्टिः ॥ ६२ ॥

अथास्य विवेकस्य सूर्यसाम्यं वर्णयति ।

प्रत्यङ्मुखीति—प्रत्यङ्मुखीमात्मविषयां पश्चिमाशाभिमुखीं वा सुमतिः शोभनामतिरेवदीप्तिः तां इह लोके प्रचिन्वन् विस्तारयन् प्राप्तः उदयः अभ्युदयो येन स तथा प्राप्ताविर्भावश्च तथापि अमितो यो रागः पुरुषमोक्षाभिलाषः अरुणिमा च तद्बलेनाभिभूतः प्राप्तास्तुदयस्य परैरभिभवो न संभवतीति विरोध सूचकोऽपि शब्दः । अपेक्षसमुच्चयार्थत्वाद्विरोधस्याभासत्वं । अहंकृतिरहंकारः देहात्माभिमानः तन्मयीं हिमानीं क्षाम्यन् नाशयन्नित्यर्थः अवशः भगवत्परतन्त्रः भास्वान् दीप्तिमान् सूर्यश्च विवेकः विष्णुपदं हरिचरणं नभश्च विशति भजते प्रविशति च । एवम् तपनादीनां भगवदधीनत्वं । भीषास्माद्वातः पवते । भीषोदेति सूर्यः । भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम इति । श्रुतं ॥ ६३ ॥

अप्राप्तः समयः स्वोचितकालो यैस्तैरस्माभिः । मिश्रं वदन्तः । मिश्रसंकीर्णशुद्धसंकीर्णभेदाद्द्विविधो विष्कम्भः । तदुक्तं । एकानेककृतश्शुद्धः स्संकीर्णो नीचमध्यमैरिति । एकानेकैर्वा मध्यमपात्रैः कृतश्शुद्धः । नीचमध्यपात्रैः कृतस्संकीर्ण इत्यर्थः ।

ततः प्रविशति राजा सुमतिश्च ।

राजा–(सविमर्शं) प्रिये समाकर्णितस्त्वया अनवधिकदुरितविध्वंसनमूलभूतस्यामन्दवर्पस्य कन्दर्पवटोराटोपः, यदसावशेषपापनिष्कृतो प्रवर्तमाना नस्मानेव पापारोपेण परिवदति । अथवा

पश्यति परेषु दोषा
नसतोपि जनस्सतोपि नैव गुणान् ।
विपरीतमिदं स्वस्मिन्
महिमामोहाञ्जनस्यैष ॥ ६४ ॥

सुमतिः–* अं अ उंत विरूपासुजणाणि अ मुहदोसं णिम्मले सुविहंपवेसु-
समंपंति

राजा–देवि सत्यमेतत् यथार्थदर्शिनी यथा दृष्टार्थवादिनीव भवती

* आर्यपुत्र विरूपाः खलु जनाः निजमुखदोषं निर्मलेष्वपि दर्पणेषु समर्पयन्ति

अथांकः तत इत्यादि । तत्र

प्रत्यक्षनेतृचरितो बिन्दुव्याप्तिपुरस्कृतः ।
अंको नानाप्रधानार्थसंविधानरसाश्रयः ॥

इत्युक्तलक्षणः ।

राजा विवेकः सर्वोत्राप नायकत्वात् । नायकलक्षणं ।

अभिगम्यगुणोपेतो धीरोदात्तः प्रतापवान् ।
कीर्तिकामो महोत्साहस्त्रय्यास्त्राता महीपतिः ॥

इत्युक्तं ।

कन्दर्प एव पटुः बालः तस्याटोपः गर्वः । परिवदति निन्दति । एवमन्यथा ज्ञानस्य परिवादस्य चाभिमानमूलकत्वं प्रतिपाद्याय मोहहेतुकत्वमाह अथवेति ।

जनः परेष्वसतोपि दोषान् पश्यति । सतोपि नैव गुणान् पश्यति । स्वस्मिन्नात्मनि इदं विपरीतं सतोपि दोषान्न पश्यति असतोपि गुणान्पश्यति इति यत् । एष मोहाञ्जनस्य महिमा ॥ ६४ ॥

यथार्थे अर्थोतिक्रमो न यस्मिन् कर्मणि तद्यथा भवति तथा पश्यतीति यथार्थदर्शिनी । दृष्टार्थमनतिक्रम्य वदतीति यथा दृष्टार्थवादिनी ।

Digitized by Google

किं च ।

निर्धूतनिखिलदोषा
निरवधिपुरुषार्थलम्भनप्रवणा ।
सत्कविफणितिरिवत्वं
सगुणालङ्कारभावरसजुष्टा ॥ ६५ ॥

(विचिन्त्य) प्रिये हन्त निर्विकारपुरुषपीडया क्रोडन्त एते कामक्रोधलोभादयस्तुपस्थानमास्थिताः, वयं पुनस्तमेव निःश्रेयसे नियोजयितुं समस्तजनसां सिद्धिकसुहृदो भगवतस्तापत्रयाभिहतसर्वजनसञ्जीवनीं दयावृष्टिमावहन्तः कदध्वनाप्रवृत्ताः । अहो महानयमुन्मत्तालापः यस्य मे त्वया सह निर्वर्तनीयं परानुग्रहव्रतम् ।

महत्यारम्भेऽस्मिन्मधुरिपुदयासंभृतधृति-
र्बहिष्कृत्यारातीन्सुमुखि बहिरन्तश्च भवतः ।
समाधावाधाय क्षपितवृजिनं क्षेत्रिणमहं
परप्राप्त्याधन्यं परिणमयितुं प्राप्तनियमः ॥ ६६ ॥

निर्धूतेति– लंभनं लाभः तत्प्रवणा । सगुणा गुणसहिता गुणाः ओजः प्रसादादयः सौन्दर्यादयश्च अलंकाराः उपमादयः हारकेयूरादयश्च भावाः अभिप्रायाः विलासाश्च रसाः शृंगारादयः प्रीतयश्च तैः जुष्टा अतः सत्कविफणितिरिव ॥ ६५ ॥

पुनश्च तदुक्तमेव विचिन्त्याह प्रिये इति ।

हन्तेति खेदे । पुरुषस्य निर्विकारत्वं बाल्ययौवनादिविकाररहितत्वं । सर्वेषां जनानां सांसिद्धिकसुहृदः सम्यक् फलसिद्धिहेतुभूतसुहृदः आवहन्तः आकर्षन्तः संपादयन्त इत्यर्थः । कदध्वना कुत्सितमार्गेण । परानुग्रहे व्रतं नियमं ।

महतीति–महति आरंभस्य महत्त्वं । कार्यद्वारा । अस्मिन् आरंभे मधुरिपोः दयया संभृता संपूर्णा धृति धैर्यं यस्य स तथोक्तः । मधुरिपुशब्देनास्य विरोधिनिरासकत्वं तद्गुराश्च प्रत्यूहप्रशमनं च सूच्यते । बहिरन्तश्च भवतः मलयानिलकोकिलादयो बहिर्भवन्तः मोहरागद्वेषादयोऽन्तर्भवन्तः तानुभयविधानरातीन् बहिष्कृत्य विजित्य क्षपितं नाशितं वृजिनं पापं यस्य तं क्षेत्रिणं पुरुषं परस्य परमपुरुषस्य प्राप्त्याधन्यं परिणमयितुं धन्यतया कर्तुं प्राप्तनियमः अनेनारंभाख्या कार्यावस्था प्रतिपादिता । तदुक्तं । औत्सुक्यमात्रमारम्भः फललाभाय भूयसे । इति ॥ ६६ ॥

सुमतिः—* अज्ज उत्त कहंसो णिच्च णिम्मल महाणंद सअं पहो सव्वजण दंसण जोग्ग सहावो पुरुसो महामोहेण माण मअ मच्छर प्पमुहे हिंवि दुव्विणीएहिं दुव्वार गव्व संकुल दुरिअ महोम्मि संघाअ संघट्टण भीसणे दुक्ख साअरम्मि णिक्खित्तो ।

राजा—प्रिये सूक्ष्मदर्शिनि किं दृष्टमपह्नोतव्यं आगमिकं वा नप्रत्येतव्यं । पश्यतु भवती ।

स्वतः प्राप्तं रूपं यदिह किल भावेषु तदपि
त्यजन्तस्ते दृष्टा नियतिघटितोपाधिवशतः ।
प्रकृत्या तिष्ठन्ति ह्युपधिविगमे ते च तदसा
वनादिस्संसारः पुरुषमुपरुन्धे गलति च ॥ ६७ ॥

सुमतिः—† एवं एदं, तहविकहं एत्तावंतं कालं परमकारुणिएण देवेण लच्छीवल्लहेण दुस्सह दुक्ख सअ दूमिओ पुरुसो उवेक्खिओ ।

---

* आर्यपुत्र कथं अनित्यनिर्मलमहानन्दस्स्वयंप्रभस्सर्वजनदर्शनयोग्यस्वभावः पुरुषः महामोहेन मानमदमत्सरप्रमुखैरपि दुर्विनीतैः दुर्वारगर्वसंकुलदुरितमहोर्मिसंघातसंघटनभीषणे दुःखसागरे निक्षिप्तः ।

† एवमेतत्तथापि कथं एतावन्तं कालं परमकारुणिकेन देवेन लक्ष्मीवल्लभेन दुस्सहदुःखशतदूमितः पुरुष उपेक्षितः ।

सूक्ष्मानर्थान्पश्यतीति सूक्ष्मदर्शिनी तस्य संबुद्धिः । दृष्टं प्रत्यक्षसिद्धं अपह्नोतव्यं नास्तीति प्रतिक्षेप्तव्यं किं न प्रतिक्षेप्तव्यमित्यर्थः । आगमिकं आगमसिद्धं वा वस्तु किंच प्रत्येतव्यं शास्त्रसिद्धं सर्वमस्तीत्येवाधातव्य मित्यर्थः ।

स्वतः प्राप्तमिति—भावेषु पदार्थेषु स्वतः प्राप्तं यत् किल रूपं तत् नियत्या दैवेन घटितः संपादितः यः उपाधिस्तद्वशतः त्यजन्तस्ते भावाः दृष्टाः यथा स्फटिकमणयो जपाकुसुमसान्निध्येन स्वाभाविकं रूपमपहाय शोणिमानं वहन्तो दृश्यन्ते । ते भावाश्च उपधिविगमे उपाध्यपगमे प्रकृत्या स्वस्वरूपेण तिष्ठन्ति तत् उपधेः स्वसंनिधान तदभावाभ्यां स्वसंसृष्टवस्तुषु रूपान्तर निजरूप प्रापकत्वस्वाभाव्यादित्यर्थः । उपधिः उपाधिभूतः असौ संसारः संसारयति सम्यक् सञ्चारयतीति संसारशब्देन प्राचीनं कर्मोच्यते । कर्मणामेवहि सांसारिकसुखदुःखोपभोगहेतुत्वं । यथोक्तं भगवता पराशरेण

अविद्या कर्मसंज्ञान्या तृतीया शक्तिरिष्यते ।
यया क्षेत्रज्ञशक्तिस्सा वेष्टिता नृप सर्वगा ॥
संसार तापानखिलानवाप्नोत्यतिसन्ततानिति ।

पुरुषं नित्यनिर्मलमप्युपरुन्धे भगवत्कृपया गलति च ॥ ६७ ॥

Digitized by Google

राजा—किंच श्रूयते भवत्या, मदनादिनिजकर्मरूपाक्षिप्तोपरोधेन सेवको यमीश्वरेण क्षिप्तः संसरणावसरे तेनैव समुद्ध्रियत इति।

यथा

मिथः कलहकल्पनाविषमवृत्तिलीलादया
परिग्रहणकौतुकप्रथितपारवश्यः प्रभुः।
स्वलक्षितसमुद्गमे सुकृतलक्षणे कुत्रचित्
घुणक्षतलिपिक्रमादुपनिपातिनः पातिनः॥ ४८॥

अत्र च।

सुखदुःखवाहिनीनां
व्यत्ययविनिमयनिवर्तनानर्हे।
नियतक्रमे प्रवाहे
निपतितमुत्क्षिप्यमोदतेदेवः॥ ४९॥

सुमतिः—* अं भडंत अणादिंमि गए काले अलंधपुव्वो मोक्खो अणंतेवि उवरिल्ल कालंमि केण कहं लहिअ इति संकाकलंक कव्वुरि अं मे हिअअं।

* आर्यपुत्र अनादौ गते काले अलब्धपूर्वो मोक्षः अनन्तेऽप्युपरितनकाले केन क लभ्यत इति शङ्काकलङ्ककर्बुरितं मे हृदयं।

अयं सेवकः कर्मरूपाविक्षेपोपरोधेन भगवता निक्षिप्तस्संसरति अवसरे तेनैव समुद्ध्रियत इति यत् तत् किं न श्रूयते भवत्या। उक्तमेवार्थं दर्शयति।

मिथः इति— मिथः अन्योन्यं कलहकल्पनया विषमा परस्परविरुद्धा वृत्तिर्व्यापारो ययोस्ते विषमवृत्ती लीलादये च तयोः परिग्रहणे कौतुकमिच्छा तेन प्रथितं प्रसिद्धं पारवश्यं पराधीनत्वं यस्य स तथा प्रभुस्स्वामी स्वलक्षितः स्वेन दृष्टः समुद्गमः निष्पत्तिर्यस्य तस्मिन् सुकृतलक्षणे सुकृतरूपे कस्मिंश्चिद्धेतौ यादृच्छिकादौ घुणक्षतेषु काष्ठक्षतरेखासु लिपिक्रमात् लिपिसादृश्यात् कथंचिल्लिपित्वप्राप्तिक्रमादुपनिपातिनः पततः नः अस्मान् पाति रक्षतीति॥ ४८॥

अत्र किमैहिकरक्षणमात्रमित्यत आह।

सुखेति—सुखदुःखे एव वाहिन्यः नद्यः तासां व्यत्ययविनिमयनिवर्तनानर्हे व्यत्ययः विपर्ययः विनिमयः केन चिद्द्रव्येण द्रव्यान्तरस्याधानं निवर्तनं निरोधः एषामनर्हे नियतः क्रमो यस्य तस्मिन् प्रवाहे अनुभवपारंपर्ये निपतितमुत्क्षिप्य उद्धृत्य देवो मोदते॥ ४९॥

आर्यपुत्रेत्यादिकेन हेतुनेत्यर्थः।

कथमिति—प्रकारविषयप्रश्नः शंकाकलंकेन शंकारूपकलंकेन कर्बुरितं शबलितं एकरूपं न भवतीत्यर्थः।

Digitized by Google

राजा—देवि विवेकवत्यप्यनधिगतप्रमाणतर्कसरणिरिव कथमेवमाशङ्कसे ।

अथवा

> कालस्वभावनियतियदृच्छादिषु वस्तुषु ।
> कारणं किमिवाप्नोति तापसैरपि तर्कितम् ॥ ७० ॥

इदमत्र तावदवधातव्यं ।

> कर्माविद्यादिचक्रे प्रतिपुरुषमिहानादिचित्रप्रवाहे
> तत्तत्काले विपक्तिर्भवति हि विविधा सर्वसिद्धान्तसिद्धा ।
> तल्लब्धस्वावकाशप्रथमगुरुकृपागृह्यमाणः कदाचित्
> मुक्तैश्वर्यान्तसंपन्निधिरपि भविता कश्चिदित्थं विपश्चित् ॥ ७१ ॥

अनधिगता अविदिता प्रमाणानां तर्काणां च सरणिर्मार्गो यया सा तथात्वे कथमेवमाशङ्कसे ।

अयं भावः । श्रुतिस्मृत्यादिप्रमाणानि चिराय संसरतो जीवस्य कस्मिंश्चित्काले यादृच्छिकादि सुकृतं भवति परमकारुणिकः सर्वज्ञः स्वावसरं प्रतीक्षमाणस्तदेव व्याजीकृत्य दुर्वारविषमुत्पाद्य सदाचार्यसंबन्धे हेयोपादेयविवेकसामर्थ्यं लोकितपुरुषार्थानुगुणोपायानुष्ठानं तत्प्रभृतिस्वप्राप्तिरूपपरमपुरुषार्थाभिनिवेशं त्वरां च तीव्रां वर्धयित्वा शरीरान्ते मुक्तिं च प्रापयतीति वदन्ति । तर्काश्च तदनुगुणास्सन्तीति त्वयैव शङ्कितुमपि सांप्रतमित्याशयेनेति ।

काल इति—कालः सर्वेषां वस्तूनामुत्पत्त्यादिहेतुभूतः कलाकाष्ठादिरूपः स्वभावः पुण्यपापात्मकं कर्म नियतिरेवं यदृच्छा आकस्मिकविपाकः इत्यादिषु एषु लोके अत्र मोक्षलाभे तापसास्सर्ववस्तुसाक्षात्कारास्तैरपि तर्कितं ननु निर्धारितं ॥ ७० ॥

अथैतद्वक्तुकामस्तामवहितामारचयति । इदमिति । इदं वक्ष्यमाणं ।

कर्मेति । इह जगति प्रतिपुरुषं पुरुषे पुरुषे अनादिविचित्रश्च प्रवाहो नैरन्तर्यं यस्य तस्मिन् कर्माविद्यादिचक्रे कर्माविद्ये आदी येषां तानि कर्माविद्यादीनि कर्म पुण्यापुण्यरूपं अविद्या अज्ञानं वासना अभ्यासः रुचिरादरः प्रकृत्या संबन्ध इत्येतेषां चक्रं चक्रवत्परिवृत्तिस्तस्मिन् काले विपक्तिः विपाकः सर्वसिद्धान्तेषु सिद्धा अङ्गीकृता भवतीति प्रसिद्धा । सकलसिद्धान्तिभिरपि स्वस्वसमये मोक्षहेतोरङ्गीकारादिति भावः । तल्लब्धेति—इत्थं तल्लब्धस्तेन यादृच्छिकसुकृतादिरूपविपाकेन लब्धस्स्वावकाशः स्वाङ्गीकारसमयो येन स तथा तस्य प्रथमगुरोः भगवतः कृपया गृह्यमाणः । भगवतः प्रथमगुरुत्वं गुरुपरंपरायां प्रथमत्वात्सर्वाचार्यवंश्यो ज्येष्ठः । आचार्याणामसावसावाभगवत इति हि श्रूयते । विपश्चिद्वर्तितत्त्वज्ञानः कश्चित्पुरुषः मुक्तैश्वर्यं मुक्तानां यत् भगवद्दास्यानुभवरूपमैश्वर्यं तदन्तः अवधिः यस्यास्सा तथा तस्यास्संपदः निधिः निधीयतेऽस्मिन्निति निधिः स्थानं तत् भोक्तेति यावत् भविता भविष्यति । अनादावव्यतीतकाले भगवत्कृपया लब्धावकाशतया मुक्तभावः कदाचिद्यादृच्छिकसुकृतादिलब्धावकाशतया तत्कृपया मोक्षलाभश्च भवतीति न किंचिद्विरोध इति भावः ॥ ७१ ॥

स च मोहाक्रान्तो [illegible] लापह् ।

दर्पोदग्रदशेन्द्रियाननमनो नक्तञ्चराधिष्ठिते
देहेऽस्मिन्भवसिन्धुना परिगते दीनां दशामास्थितः ।
अद्यत्वेहनुमत्समेन गुरुणा प्रख्यापितार्थः पुमान्
लङ्कारुद्धविदेहराजतनयान्यायेन लालप्यते ॥ ७२ ॥

(अपि च)

बहुलदुरितद्वारे ब्राह्मे पुरे परसंमत-
स्वमतिघटितस्वातन्त्र्यत्वादयन्त्रितचेष्टितः ।
विषमसचिवैः स्वे स्वे कार्ये विगृह्य विकृष्यते
नरपतिरिव क्षीबो नानाविधैरयमिन्द्रियैः ॥ ७३ ॥

इदानीमस्य दशामाकर्ण्यैवाह सखेति ।

दर्पेति—दर्पेण गर्वेण उदग्रः उद्धतो दशेन्द्रियाणि ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च तान्येवाननानि यस्य स तथा स चासौ मनोनक्तञ्चरश्च मन एव नक्तञ्चरः राक्षसः रावण इत्यर्थः तेनाधिष्ठिते । भवस्संसारः स एव सिन्धुस्सागरः तेन परिगते दुस्तरत्वाभिप्रायेण संसारस्य सिन्धुसादृश्यं तेन परिवृते अस्मिन्देहे दीनां शोच्यदशामवस्थामास्थितः प्राप्तः । अद्यत्वे इदानीं हनुमत्समेन आज्ञनेयतुल्येन गुरुणा गुरोर्हनुमत्साम्यवर्णनं यस्य ज्ञानसंपत्त्यातिशयख्यापनार्थं । हनूमतो ज्ञानाधिक्यं । नूनं व्याकरणं कृत्स्नमनेन बहुधाश्रुतं । बहुव्याहरतानेन न किंचिदपशब्दितं । इत्यादौ प्रतीयते । भक्तिस्सागरलंघनौषधपर्वतानयनादौ सुव्यक्ता । स्नेहो मे परमो राजंस्त्वयि नित्यं प्रतिष्ठितः । भक्तिश्च नियता वीरभावो नान्यत्र गच्छति । इत्यादौ भगवद्भक्तिश्च प्रसिद्धा वैराग्यं चापि गीतं । प्रख्यापितः प्रकर्षेणावेदितः अर्थः ज्ञातव्यार्थः यस्य स तथोक्तः पुमान् लंकायां रुद्धायाः विदेहराजतनयायाः न्यायेन प्रकारेण लालप्यते भूयोभूयः प्रलपति ॥ ७२ ॥

पुनरप्यस्य दशामेवाह ।

बहुलेति—बहुलानि बहूनि दुरितान्येव द्वाराणि यस्मिन् तस्मिन् । दुरितशब्देन दुरितसाधनानीन्द्रियाण्युच्यन्ते । ब्राह्मे ब्रह्मकार्ये ब्रह्मप्रकाशे तत्स्थाने शरीरे ।

मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहं ।
संभवस्सर्वभूतानां ततो भवति भारत ।

इत्यत्र ब्रह्मशब्दः प्रकृतौ प्रयुक्तः । परेण ईश्वरेण संमतं मनोज्ञं स्वमतिघटितं स्वबुद्ध्या संपादितं स्वातन्त्र्यं यस्य स तथाप्यात् आत्मावीश्वरेण करणकलेवरप्रदानपूर्वकं तत्तत्कार्येष्वस्य कर्तृत्वप्रदानात् अयन्त्रितमनिवारितं चेष्टितं व्यापारो यस्य स तथा । नानाविधैः नानाप्रकारैरिन्द्रियैरयं पुरुषः विषमैः परस्परविरुद्धैः सचिवैः क्षीबः मत्तः नरपतिरिव स्वेस्वेकार्ये विगृह्य परस्परकलहं कृत्वा विकृष्यते आकृष्टो भवति ॥ ७३ ॥

सुमतिः—* अय्यउत्त एवं खु बहुवेढिअ उम्मत्तअं विअ अत्ताणं अप्पमत्त बुद्धी किंवा णिव्विणिग्गमिसा रक्खदि पुरिसो ।

राजा—प्रिये सर्ववेदिनि, अनादिः खल्वयमलंघनीयो रागजलधिः ।

स्थिरत्रसविभक्तिमत्त्रिविधरागहृद्योदयं
सुमृष्टमणिभित्तिवत्स्वयमभिद्यमानः पुमान् ।
त्रियुग्मगुणशिल्पिना त्रिगुणतूलिकाधारिणा
विविच्य विनिवेशितं वहति चित्रमत्यद्भुतम् ॥७४॥

सुमतिः—(सविषादं) † इदिणाम उम्मत्तदंसं पुरुसं बुद्धीवि पिअदमा किंव बोहेइ ।

* आर्यपुत्र एवं खलु बहुवेष्टितमुन्मत्तमिवात्मानमप्रमत्तबुद्धिः किंवा निर्विनिर्गमिषय रक्षति पुरुषः ।

† इतिनाम उन्मत्तदर्शपुरुषं बुद्धिः प्रियतमा किंच बोधयति ।

निर्विगमिषा निर्गन्तुमिच्छा । रागजलधिः रागः भोगेच्छा स एव जलधिः तस्य [illegible]अलंघनीयता हेतुभूतमपरिच्छिन्नत्वं प्रतीयते ।

संसारस्याद्भुत चित्रसाम्यप्रतिपादनद्वारा तदनुभवादस्य वैमुख्यमित्याह ।

स्थिरेति—॥ स्थिरत्रसविभक्तिमत् स्थावरजंगमविभागवत् त्रिविधः त्रिप्रकारः लोहितशुक्लकृष्णरूपः यो रागः वर्णः तेन हृद्यः दर्शनीयः उदयः उत्पत्तिर्यस्य तत्तथा । त्रिगुणाः त्रयोगुणा एव तूलिकालेखनशलाका तद्धारिणा त्रियुग्मगुणः षाड्गुण्यपूर्णः परमात्मा स एव शिल्पी तेन ज्ञानशक्तिबलैश्वर्यवीर्यतेजांसि षड्गुणाः षाड्गुण्यपूर्णत्वं च भगवतएवासाधारणं ।

ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥
तथानन्तगुणस्यापि षडेव प्रथमे गुणाः ।
यैस्त्वयेव जगत्कुक्षावन्येऽप्यन्तर्निवेशिताः ॥

इत्यादिषु तथा दर्शनात् । विविच्य पृथक् पृथक् विनिवेशितं निक्षिप्तं अत्यद्भुतं अत्याश्चर्यं अस्थिरेषु स्थैर्यबुद्धिजनकत्वं दुःखरूपेषु सुखत्वभ्रमहेतुत्वं अप्राप्तेषु प्राप्तताज्ञानकारणत्वं इत्यादिदर्शनादत्यद्भुतत्वं चित्रं चितं प्रत्यगात्मानं [illegible] इतिव्युत्पत्त्या चित्र शब्देन देह उच्यते । सुमृष्टा सुष्टु शोधिता मणिमया भित्तिरिव स्वयमभिद्यमानः देवादिभेदरहितः सुमृष्टादिभिर्भित्तिर्नभिद्यते । पुमान्वहति ॥ ७४ ॥

यते पुरुषदुःखज्ञानेनास्याविषादः ।

Digitized by Google

राजा–प्रिये सूक्ष्मवादिनि साम्प्रतमिदानीं स्वयं प्रकाशापि सुप्तप्राया वर्तते ।

यथा

पत्यौ दूरङ्गतवति रवौ पद्मिनीव प्रसुप्ता
म्लानाकारा सुमुखिनिभृता वर्तते बुद्धिरंबा ।
मायायोगान्मलिनितरुचौ वल्लभे तुल्यशीला
राहुग्रस्ते तुहिनकिरणे निष्प्रभा यामिनीव ॥ ७५ ॥

सुमतिः–*अं अउंत अद्रूकरुणा इमा बुधिसहि अंस पुरुसंस बंधदसा । ए अंस विउल दुंख जालविंहलंस विथरेण मोंखा अमं पआसंतो विसंकमंकुणसु ।

राजा–देवि अनवरतशोभनाशंसिनि, निदानमिह निपुणमुपपादयन् प्रतिपन्नामेव भवतीं प्रत्यभिज्ञापयामि ।

दुरासेधस्थैम्ना दुरितपरिपाकेन भविनः
प्रमाथी संसारः प्रशमरहितोयं प्रभवति ।

---

*आर्यपुत्र अतिकरुणेयं बुद्धिरहितस्य पुरुषस्य बन्धदशा एतस्य विपुलदुःखजालविह्वलस्य विस्तरेण मोक्षागमं प्रकाशयन् विशंकां मा कुरुष्व

स्वयंप्रकाशापि सुप्तप्राया अपि तु पत्युरीरग्लानिर्मालिन्यं च लोके न दृश्यते । अस्यास्त्विदानीं तदुभयमस्तीति दर्शयितुं दृष्टान्तद्वयीमाह ।

पत्याविति–॥ पत्यौ रवौ दूरं दूरदेशं गतवति सति प्रसुप्ता मुकुलिता पद्मिनीव म्लानाकारा क्रान्तदेहा अंबा अस्माकंमाता बुद्धिर्वर्तते मायायाः प्रकृतेर्दोषात् । मायां तु प्रकृतिं विद्यादिति श्रुतेः । मायाशब्देन प्रकृतिरुच्यते । विचित्रकार्यहेतुत्वादस्याः मायाशब्दवाच्यत्वं । तत्संबन्धजनितदोषादित्यर्थः । मलिनितरुचौ मलिनिर्मालिन्यं संजातमालिन्यं स्वप्रभाभूतस्थाने वल्लभे नायके पुरुषे तुल्यशीला तुल्यशीलसमाचारा यथा तथा तुहिनकिरणे हिमांशौ राहुग्रस्ते सति यामिनी निष्प्रभा वर्तते ॥ ७५ ॥

अतिकरुणातिशोच्या ।

निदानं प्रथमकारणं । निदानं त्वादिकारणमिति निघण्टुः । प्रतिपन्नां ज्ञातवतीमेव प्रत्यभिज्ञापयामि स्मारयामि ।

दुरासेधेति–॥ दुरासेधमनिवारणीयं स्थेम स्थैर्यं यस्य तेन दुरितपरिपाकेन भविनस्संसारिणः प्रमाथी बाधकः । ज्ञानसंकोचक इति यावत् । प्रशमरहितः अयं संसारः प्रभवति नियन्ता भवति । तस्य संसारस्य निरोधे विकल्पधिकं सहजं यत्का-

Digitized by Google

निरोधे तस्यैकानिरुपधिककारुण्यघटिता
स्वतन्त्रेच्छाशक्तिः स्वयमुपधिमाधाय रमते ॥ ७६ ॥

सुमतिः—* ज इ म एवि सो उवाहीसुणि अंबो तामं अं अउंता आचवेदु ।

राजा—प्रिये विशुद्धभाषिणि, श्रूयतामिह सूक्ष्मार्थसंग्रहः ।

मदनमत्सरमानमयः पुमान्
बहुपिशाचगृहीतइवार्भकः ।
निगमसिद्धनरेन्द्रनिरीक्षया
निपुणपद्धतिमभ्यवपद्यते ॥ ७७ ॥

ततश्च

अनघदेशिकदृष्टिसुधाप्लवे
विधिवशादुपसेदुषि देहिनः ।
विमलबोधमुखा विविधा गुणाः
परिणमन्त्यपवर्गदशाकुलाः ॥ ७८ ॥

---

* यदि मयापि स उपाधिः श्रोतव्यस्तदा मामार्यपुत्र आज्ञापयतु ।

तदर्थं । सुहृदं सर्वभूतानामिति गीयते । तेन घटिता संबद्धा स्वतन्त्रस्येश्वरस्येच्छायाश्शक्तिः स्वयमेव उपधिं अज्ञातसुकृतादिकमाधाय रमते क्रीडति । वैषम्यनैर्घृण्यप्रसंगपरिहाराय भगवान् यादृच्छिकसुकृतादिकमपेक्षत इति भावः ॥ ७६ ॥

मदनेति—॥ मदनः कामः मत्सरः परोत्कर्षासहत्वं मानः गर्वः एतन्मयः एतत्प्रचुरः बहुभिः पिशाचैः गृहीतार्भक इव स्थितः पुमान् निगमसिद्धः वेदान्तसिद्धश्च नारेन्द्रश्च नराणां जीवानामिन्द्रः स्वामी । भगवान्मान्त्रिकश्च जीवान्प्रतिभगवतः स्वामित्वं । तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतं । स कारणं करणकारणाधिपो नचास्य कश्चिज्जनिता नचाधिपः । इत्यादिश्रुतिसिद्धः । तस्य निरीक्षया कटाक्षेण निपुणां समीचीनां निपुणानां वा पद्धतिं मार्गं अभ्यवपद्यते प्राप्नोति । भगवत्कटाक्षवशाद्वेदादिकामाचार्यप्राप्तिपर्यन्तानां निपुणपद्धतिं प्राप्नोतीत्यर्थः ॥ ७७ ॥

अनघदेशिकेति—॥ अनघस्य मन्त्रान्तरसाधनान्तरदेवतान्तरप्रावण्यरहितस्य देशिकस्य दृष्टिरेव सुधा तया आप्लवे सेके विधिवशात् भगवत्कृपावशात् उपसेदुषि सति विमलः निर्मलः सन्नाशो बोधश्च यः सुखं चाविर्भवन्ति तदा अपवर्गसुखांकुर इत्यपि पाठः । विविधा गुणाः परिणमन्ति सिध्यन्तीत्यर्थः ॥ ७८ ॥

अपि च

स्वाधीनेतरपातभीतिपरुषस्वर्वासदुर्वासना
पाशाकर्षणयन्त्रणाभिरभितः क्षिप्तात्मनः क्षेत्रिणः ।
निष्प्रत्यूहविजृंभमाणकरुणा दुग्धार्णवे निर्भरा
भक्तिस्सेत्स्यति भागधेयवशतः प्राप्येपरे ब्रह्मणि ७९

अत्र चान्तरा सर्वस्वदक्षिणोयमध्वरः प्रवर्तते ।

यत्र तु

त्वया जुष्टः पत्न्या विधिवदिह यष्टा स्वयमहं
विधत्ते चार्त्विज्यं शमदमसुखोयं सुमनसः ।
अकस्मादुद्देश्यो भवति भगवानात्महविषः
पशुर्बद्धो मुक्तिं भजति विगलत्कर्मनिगलः ॥ ८० ॥

एवं भूतस्य भगवति भक्तिस्सेत्स्यतीत्याह ।

स्वाधीनेति—॥ स्वाधीनेतरः अस्वाधीनः कर्माधीनो यः पातः तस्मात् भीतिः तया परुषस्वभावो स्वर्वास स्वर्गवासस्तस्मिन् दुर्वासना दुरभ्यासः सैव पाशः बन्धहेतुत्वात् पाशत्वरूपं तेनाकर्षेण आकर्षितः यन्त्रणान्यन्यानि ताभिरभितः परितः क्षिप्तात्मनः निरस्तधैर्यस्य क्षेत्रिणः निष्प्रत्यूहं यथा तथा विजृम्भमाणा करुणैव दुग्धं क्षीरं तस्याया दुग्धत्वरूपं भोग्यत्व सर्वोत्तमत्वात् । तस्यार्णवे अपरिच्छिन्ने स्थाने प्राप्य पर ब्रह्मणि निर्भरा निरवद्या भक्तिः भागधेयवशतः सेत्स्यति ॥ ७९ ॥

अत्रान्तरा अस्मिन्नध्वरे सर्वस्वं दक्षिणा यस्मिन् स तथा । अस्मिन्नध्वरे यजमानपत्न्यादीनुद्दिश्य हविः पशून् दर्शयति ।

त्वयेति—॥ विधिवत् विधिशास्त्रं तदुक्तप्रकारेणेत्यर्थः आत्महविषः आत्मरूपहविषः आत्मनोहाविर्भूहविर्गृहीत्वात्मरूपं पशुरण्येति मन्त्रतः । मन्त्रोक्तं फलः स्मात् कस्मैचिदपि फलायेत्यर्थः उद्देश्यः उद्देश्यदेवता भवति बद्धः अनादिबद्धः पशुः विगलत्कर्मनिगलः कर्मैव निगलं यस्य सतथा मुक्तिं भजति ॥ ८० ॥

अत्रायमध्वरः । समित्साधनकादीनां यज्ञानां न्यासमात्मनः । नमसा-योऽकरोद्देवे सस्वध्वरउदीरितः । इत्युक्त आत्मसमर्पणरूपस्तस्यैव स्वध्वरत्वकथनात् । उपरितन श्लोके च तस्यैव वक्ष्यमाणत्वात् । ननु यज्ञान्तरे यूपे बद्धस्य पशोस्संज्ञपनं दृश्यते अस्मिन्नध्वरे बद्धस्य पशोः कथं मुक्तिः दुरितविगलनं च कथमित्यत आह ।

इदमप्यत्र भवत्या भावनीयं

स्वरक्षणभरार्पणक्षणिकसत्रिणः श्रेत्रिणः
प्रवर्त्य कृपया स्थितिं प्रभुरभूतपूर्वोदयाम् ।
जगद्विपरिवर्तनप्रथितनित्यशक्तिस्स्वयं
क्षिपत्यपुनरङ्कुरं दुरितमस्य लक्ष्मीपतिः ॥ ८१ ॥

सुमतिः—* अज्जउत्त एवं णामअवत्थिअंतो कोअंगदुसापुरुसस्स करणा होहिइ ।

राजा—देवि त्रैकाल्यवेदिनि, दुस्सहानादिदुःखसागरनिमग्नस्य यथागमं यथान्यायञ्च केनचित्कारणेन समुत्तारस्संभविष्यतीति सन्तोष्टव्यन्तावत् ।

इह हि

निरपायदेशिकनिदर्शितामिमां
कमलासहायकरुणाधिरोहणीं ।

* आर्यपुत्र एवं नाम अवस्थामापन्नोऽस्य पुरुषस्य कथा भविष्यति ।

स्वरक्षणेति—॥ स्वस्य रक्षणं स्वरक्षणं प्रकृतिविमोकपूर्वकभगवत्प्राप्तिरूपं तस्मिन् यो भरः तस्य अर्पणं न्यासः तस्य कालतः ध्र्यं क्षणिकं तस्मादेतं सत्रं च तदेव क्षणिकं सत्रमस्यास्तीति तथा तस्य श्रेत्रिणः अभूतपूर्वं उदयो यस्यास्तां स्थितिं प्रवर्त्य प्रवर्तयित्वा जगतां विपरिवर्तनं संहारः संहृतस्य जगतः पुनस्सृष्टिर्वा तेन प्रथिता नित्या शक्तिर्यस्य स तथा जगद्विपरिवर्तनेन प्रथितनित्यशक्तित्वं परमात्मन एव । असद्वा इदमग्र आसीत् । ततो वै सदजायत । तदात्मानं स्वयमकुरुत । सदेव सोम्येदमग्र आसीत् । एकमेवाद्वितीयं । तदैक्षत बहुस्यां प्रजायेयेति तत्तेजो सृजत सोऽकामयत बहुस्यां प्रजायेयेति सतपो तप्यत । सतपस्तप्त्वा । इदं सर्वमसृजत । यदिदं किञ्च । परास्य शक्तिर्विविधैव श्रूयते । स्वाभाविकी ज्ञानबलक्रिया च इत्यादि श्रुतिभ्यस्तथावगमात् । एवं भूतो लक्ष्मीपतिः अस्य दुरितं अपुनः अङ्कुरं यस्मिन् कर्मणि तदपुनरङ्कुरं भवति तथा क्षिपति अभूतपूर्वोदयां स्थितिं प्रवर्त्येति मुक्तिं दुरितं क्षिपतीति कर्म विनाशनं च करोति । भगवानित्यनेन । एतदध्वरपक्षोरध्वरान्तरपशुभ्यो व्यावृत्तिस्सूच्यते ॥ ८१ ॥

भूतभविष्यद्वर्तमानात्मकः कालस्त्रैकाल्यं तद्वेदिनी । आगमश्शास्त्रं न्यायो युक्तिस्तद् द्वयमनतिक्रम्य केनचित्प्रकारेणोत्तरमेवास्ति ।

निरपायेति— निरपायाः अपायरहिताः अपायशब्देन निषिद्धाचरणहेतुभूतमुपायापायं दर्शयति । यथोक्तं

उपायापायसंयोगेनिष्ठयाहीयतेनया ।
अपायसंप्लवे सद्यः प्रायश्चित्तं समाचरेत् ॥
प्रायश्चित्तिरियं सात्र यत्पुनश्शरणं व्रजेत् ।
उपायानामुपायत्वस्वीकारेप्येतदेव हि ॥ इति ॥

Digitized by Google

मृतावन्यस्मिन् । कथम् । पूर्वान् जावादीन् पञ्च पूर्वान् कृत्वा अतिक्र-म्येत्यर्थः । क्व । पञ्चपर्वणां पक्षाणामर्धसन्धीनां वक्ष्यमाणांशकल्पनया मध्ये पञ्चदशीप्रतिपदोर्भवेदित्यर्थः । एतदुक्तं भवति । जाविति चोदि-ताश्विनी यस्मिन् पर्वणि विहिता तस्मादुत्तरं पञ्च पञ्चदशान् पञ्च पर्वा-ण्यतिक्रम्य भरण्यादींश्च चतुरांस्ततो द्रेति चोदितार्द्रा भवति । भरण्या-दयश्चान्तरपर्वसु यागदिवसेष्वित्युक्तं भवति । ते च पुनरेकान्तरेऽह्नि मासे च पौर्वापर्येण भवन्ति । तद्यथा च । यत्र ह्यश्विनी ततः पुनः चतुर्थेऽह्नि पञ्चविंशे वा भवेत् ।

तथा च गर्गः ।

यावता त्वेव कालेन भवर्गं त्रिणवात्मकम् ।
भुङ्क्ते चन्द्रः स चार्क्षो मासस्तस्यार्धं पक्ष उच्यते ॥

यतश्चत्वारि मानानि तानि तु गर्गवाक्यैर्दर्शयिष्यामि ।

तद्यथा ।

सावनं चापि सौर्यं च चान्द्रं नाक्षत्रमेव च ।
चत्वार्येतानि मानानि यैर्युगं प्रविभज्यते ॥ १ ॥
अहोरात्रात्मकं लौक्यं मानं च सावनं स्मृतम् ।
अतश्चैतानि मानानि प्रकृतानीह सावनात् ॥ २ ॥
ततः सिद्धान्यहोरात्राण्युदयाश्चाप्यथार्कजाः ।
त्रिंशच्चाष्टादशशती दिनानां च युगे स्मृता ॥ ३ ॥
मासस्त्रिंशदहोरात्राः पक्षोऽर्धं सावनं स्मृतम् ।
अहोरात्रलवानां तु चतुर्विंशं शतात्मकम् ॥ ४ ॥
सौर्ये तु सूर्यसम्भूतं परिसर्पति भास्करे ।
यावता ह्युत्तरां काष्ठां गत्वा गच्छति दक्षिणाम् ॥ ५ ॥
कालेन सोऽब्दस्तस्यार्धमयनं तु त्रयोर्त्तवः ।
ऋतोरर्धो भवेन्मासस्त्रिंशद्भागो दिनोऽर्कजः ॥ ६ ॥

तस्यार्धमर्कजः पक्षस्तस्मात् पञ्चदशं दिनम् ।
शतं[१] लवानां षड्विंशं लवाः पञ्चदशस्तथा ॥ ७ ॥
यतश्चाष्टादशशतं १८०० युगमार्कैर्दिनैः स्मृतम् ।
वृद्धिक्षयाभ्यां सम्भूतं चान्द्रं मानं हि चन्द्रतः ॥ ८ ॥
लवं लवमथोनेन सावनेन निशाकरः ।
क्षयवृद्धिमवाप्नोति स चान्द्रो मास उच्यते ॥ ९ ॥
तस्यार्धं पार्वणः पक्षस्तस्मात् पञ्चदशी तिथिः ।
प्रमाणेन लवानां तु द्वाविंशं शतमुच्यते १२२ ॥ १० ॥
सोमस्याष्टादशशती युगे षष्ट्यधिका १८६० स्मृता ।
यावता स्वेव कालेन भवर्गं चिशावात्मकम् ॥ ११ ॥
भुङ्क्ते चन्द्रः स चार्क्षो मासस्तस्यार्धं पक्ष उच्यते ।
चार्क्षात् पक्षात् पञ्चदशं नाक्षत्रं दिनमुच्यते ॥ १२ ॥
प्रमाणेन लवानां तु द्वादशं शत ११२ मुच्यते ।
षष्ट्या तु सप्तषष्ट्यंशे $\frac{६०}{६७}$ नाधिकोऽस्मिन् परो लवः ॥ १३ ॥
दशोत्तरे द्वे सहस्रे २०१० युगमार्क्षैर्दिनैः स्मृतम् । इति ।

एतदुत्तरप्रतिपत्त्यर्थमाश्वलायनेनोदाहृतम् । यस्मादेतदेवाभिप्रेत्येदं शास्त्रं प्रवृत्तम् । वक्ष्यति च 'उदया वासवस्य स्युः । इति । एतेनोत्तरमन्यदूहितुं शक्यते । तेषां वक्ष्यमाणानामृक्षाणां मृदू पञ्चदशाष्टमावनुराधा[२]तिष्यं च । 'अनुराधा चतुस्तारं मृदु मित्रोऽत्र देवतम्'–इति । एतत् स्वरूपसूचनं "क्रूराण्युग्राणि च" वक्ष्यति यस्मादेवं तस्मात् ॥ ११ ॥

सुधाकरः–इदानीं मासान्तरे दिनानयनं पर्वविशेषं चाह एकान्तरेऽह्नि मासे चेति । पूर्वान् वारानादिं कृत्वा एकान्तरेऽह्नि मासे चोत्तरो दिवसो ज्ञेयः । यस्मिन् चान्द्रे मासे यो वारस्तदग्रिमे चान्द्रे मासे तदुत्तरो वारो ज्ञेयः । यथा यदि प्रथमचान्द्रमासारम्भे

(१) १००+२६+$\frac{१}{६१}$=१२६$\frac{१}{६}$ शते लवाः ।
(२) चाश्लेषाः इति पाठः साधुः ।

रविवारस्तदा द्वितीयमासारम्भे चन्द्रवारो भविष्यति स्वल्पान्तरा- च्चान्द्रमासस्यैकोनत्रिंशत्सावनदिनात्मकत्वात् । अत्र वारगणनया यदि वारेऽन्तरं पतति तदा वारः सैकः कार्य इति ज्योतिर्विदामहर्गण- वारानयनवत् स्फुटमेव । वक्ष्यमाणचतुर्दशश्लोके यानि दिवसस्य पञ्चभागात्मकानि पञ्चपर्वाणि तेषामर्धयोः खण्डयोर्यौ पञ्चदशा- ष्टमौ खण्डौ तत्र रवेस्तेजोमन्दात् मृदू ज्ञेयौ । तौ मृदुसंज्ञौ ज्ञेयावि- त्यर्थः ॥ ११ ॥

दु[(१)]हेयं पर्व चेत् पादे पादस्त्रिंशत् तु सैकिका ।
भागात्मनापवृज्यांशान् नि[(२)]र्दिशेदधिको यदि ॥ १२॥

सोमाकरः—दुहेयं पर्व चेत् पाद इति । पर्वार्धमासः । यथाह नैरुक्तः । अर्धमासः पर्व देवा अस्मिन् प्रीणन्तीति वचनात् । तच्चेद्यदि दुहेयं गर्गोक्तलवादिकल्पनयाऽधिकमासार्थं यच्छिष्यते तत् संख्यायैकं कल्पयेत् ।

यथाह गर्गः ।

तत: प्रक्षीयमाणस्य तिथिरित्येव संज्ञता ।

द्विलवोनमहोरात्रं सोमस्य गतिरुत्तमा ॥ इति ।

एतदूनं कियद्भवेदित्याह । पाद इति । तदप्यप्रतीतमित्याह पादस्त्रिंशत् तु सैकिका नाडिकेति वाक्यशेषः । तत्राधिकमासनिष्पत्तिः ।

यथाह गर्गः ।

द्विलवक्षयसम्भूता द्वाषष्टिर्भवते तिथिः ।

ऋतोरन्तमनुप्राप्य हीनरात्रेति नामतः ॥

यस्मात् तस्मादेतावन्मात्रमर्धमासस्याज्ञा ह्रसते तस्य भागात्म- नापवृज्यांशान् निर्दिशेत् । सङ्कलितं व्यवस्थायैकत्र सङ्कलयेदंशं लवानां कुतस्तदधिकदिनानां लुप्तत्वादिति वाक्यशेषः । एवं तूक्तभागानां विसूचितानामुत्तरत्र वक्ष्यमाणानामंशानाम् ॥ १२ ॥

---

(१) द्योर्ज्ञेयं-इति पाठः साधुः ।

(२) निर्दिशेदधिकं यदि इति पाठः साधुः ।

Digitized by Google

सुधाकरः—अथ पर्वणि अंशसाधनमाह द्युरिति । चेद् द्योर्दिनस्य पादे पर्व भवेत् तर्हि गणितागतमेकांशमानं ज्ञेयम् । यदंशमानं यावतोऽधिकं तदा तेभ्योऽशेभ्यः पादांशानपकृष्य वर्जयित्वा शेषानंशान् गणको निर्दिशेत् । पादे कियन्तोऽंशा इत्यत्र । पादस्त्रिंशत् तु सैकिकेति । भागात्मना विभागावयवेन पादे एकत्रिंशद्भवन्ति । एवेतदुक्तं भवति । ज्योतिषवेदाङ्गे सावनदिनस्य नक्षत्रादिमानस्य च चतुर्विंशत्यधिकशतभागाः कृताः सन्ति । ते च भागा अंशा वोच्यन्ते । अतो दिनादिचतुर्थांशे एकत्रिंशद्भागा भवन्ति । सावनदिनेन सावनमहोरात्रं गृह्यते । अतः पादांशा मध्याह्नपर्यन्तं भवन्ति । ततोऽधिकेभ्यभागेभ्यः पादांशान् विशोध्य शेषांशा दिनोत्तरदले बोध्याः । एवं रात्रावपि निजपादीया भागाः साधनीयाः । यथा यदि रात्रिपूर्वार्धे पर्वमानं दशभागमितं तदा सूर्योदयात् पादद्वयमिते दशपादाधिके पर्वमाने पादयोः स्वतो ज्ञानात् पर्वणोऽंशा दशसमा इत्येव गणका वदन्तीति । अत्र 'दुहेयं' वा बार्हस्पत्यशोधितं 'दुर्हयं' इति मन्मते न समीचीनमिति ॥ १२ ॥

निरेकं द्वादशाभ्यस्तं द्विगुणं चाप (१) संयुतम् ।
षष्ट्या षष्ट्या युतं द्वाभ्यां पर्वणां राशिरुच्यते ॥ १३ ॥

सोमाकरः—निरेकं द्वादशाभ्यस्तमिति । अर्धयोः पञ्चपर्वाणां आवावुक्तं प्रकृतं यस्मिन् पर्वणि तस्मिन् वक्ष्यमाणचोदनया यावन्तोऽंशा भवन्ति द्वौ त्रयश्चत्वारो वा तेषां निरेकमेकं निरस्य त्यक्त्वेत्यर्थः । ततः शेषं द्वादशाभ्यस्तं द्वादशभिर्गुणयेत् । यद्येकस्तदा द्वादश । यदि द्वौ तदा चतुर्विंशतिः । यदि त्रयस्तदा षट्त्रिंशत् । ततस्तदेतद् द्विगुणं कुर्यात् । चतुर्विंशतिरष्टचत्वारिंशत् द्वासप्ततिर्वा । ततश्चापसंयुतं कुर्यात् । आपो युगाः कृतादयश्चत्वारः । कृतमापानामिति श्रुतेः । चत्वारस्तदुपरि भवन्त्यन्ये । ततस्तेषामेव षष्ट्या षष्ट्या युतं द्वाभ्यां तदु-

(१) गतसंयुतम्-इति पाठः साधुः ।

परि द्वाभ्यां षष्टिद्वार्षष्टि ६२ भवति। एवमेतत्सर्वं तद्देकीहस्य याव-दुवति स पर्वणां यागकर्मणि राशिरुच्यते ज्योतिर्विद्भिरापर्वणस्तदा वा समाप्तेः। एतदुक्तं भवति। [1]द्व्यंशस्य चोदितस्य जावादीनां मध्यात् चषस्य नवतिर्नाडिकाः ९० पर्वकालराशिः। त्र्यंशस्य चतुर्दशाधिकं शतम् ११४। चतुरंशस्य षष्टत्रिंशदधिकं शतम् १३८। तस्य राशेः पर्वसन्धिकालात् पूर्वं पञ्चदशयुत्तरार्धे कार्यम्। उत्तरं प्रतिपदि यागाय। एवं त्वेव पर्वराशिः पौर्णमास एव पर्वेन्दुसम्बन्धात्। अमावास्यायां तू-परिष्टादुत्थस्यैकादशभिरभ्यस्येति सूर्यसम्बन्धेनान्तरालमुचाश्रये। अत एव-मुभयमेतत् तु राकाकुहूकालगत इति चोदितेन तत्त्वादनुवादिनापि किञ्चित् सङ्गतं विशेषमुत्तरत्र चत्रविधाने दर्शयिष्याम एवमपि ॥ १३ ॥

सुधाकरः—इदानीं युगादेरिष्टपर्वपर्यन्तं पर्वगणानयनमाह निरे-कमिति। अत्र पूर्णान्तदर्शान्तयोः पर्वसंज्ञा ज्ञेया। वर्तमानसौराब्द-मानं चाध्याहार्यम्। ततोऽस्य श्लोकस्यैवं व्याख्यानं कार्यम्। वर्तमान-सौराब्दमानं निरेकं शेषं द्वादशभिरभ्यस्तं गुण्यं गुणनफलं च द्विगुणं कर्तव्यम्। तच्च गतैः पर्वभिः संयुतं कार्यम्। संयुतं च षष्ट्या षष्ट्या द्वाभ्यां युतं कार्यम्। संयुतमानं द्विगुणं षष्ट्या विभक्तं निरवलब्धं च संयुतमान एव योज्यमित्यर्थः। तदेव पर्वणां चान्द्रपर्वणां राशिर्गण उच्यते आचार्यैरिति।

अत्रोपपत्तिः। मासार्धं स्वस्वपर्वेति एकयुगे सौराब्दाः = ५। सौरमासाः = ६०। सौरपर्वाणि = १२०। चान्द्रमासाः = ६२। चान्द्र-पर्वाणि = १२४। सौरचान्द्रपर्वान्तरं युगेऽधिपर्वाणि = ४। एतानि विं-शत्यधिकशतसौरपर्वसु जातानि तेन षष्टिमितसौरपर्वसु अधिपर्वमा-

(१) सोमाकरव्याख्यानेन द्व्यंशस्य पर्वराशिः
=२{१२ (२−१)} + ४ + ६२ = ९० नाडिकाः।
एवं त्र्यंशस्य पर्वराशिः = २ {१२ (३−१)} + ४ + ६२ = ११४ ना०।
चतुरंशस्य पर्वराशिः = २{१२ (४−१)} + ४ + ६२ = १३८ ना०।

Digitized by Google

नम् = २। अथ वर्त्तमानसौराब्दमानं निरेकं गतसौराब्दमानं जातम्। तद् द्वादशगुणं जाता गतसौरमासास्ते द्विगुणा जाता गतसौराब्दान्ते गतसौरपर्वगणः। तत्र वर्त्तमानचान्द्राब्दीयगतचान्द्रपर्वसंख्यासमा गतरविपर्वसंख्यैव योजिता। एवं गतचान्द्रपर्वाद्ये यद्रविपर्व तत्पर्यन्तं रविपर्वगणो जातः। तस्य चान्द्रपर्वकरणार्थं त्रैराशिकेनाधिपर्वानयनम्। यदि षष्टिमितैः सौरपर्वभिर्द्वयमधिपर्वमानं तदा गतसौरपर्वगणेन किम्। लब्धमधिपर्वमानं तच्छेषं च यदि गतरविपर्वगणे योज्यते तदा गतसौरपर्वान्ते सावयवश्चान्द्रपर्वगणो भवेत्। तत्र चान्द्ररविपर्वान्तरमधिपर्वशेषसमं वियोज्यं तदा निरवयवो गतचान्द्रपर्वगणो भवेत्। एवं स्थितौ निरग्रमधिपर्वमानमेव गतरविपर्वगणे योज्यं तदा लाघवेन गतचान्द्रपर्वगणो भवतीति। यथा सिद्धान्तशिरोमण्यादौ सिद्धान्तग्रन्थे चान्द्रमासगणानयनार्थमधिशेषत्यागकारणं विलिखितं तथैवात्रापि बोध्यमिति स्फुटं ज्योतिर्विदाम्। अत्र बार्हस्पत्यव्याख्यानं तच्छोधितं पद्यं च शङ्करबालकृष्णदीक्षितशोधितानुरूपं समीचीनम्। परन्तु तदुपपत्तौ च सशेषमधिपर्वमानमागच्छति येन गतरविपर्वान्ते सावयवो गतचान्द्रपर्वराशिरायाति तच्च समीचीनं चान्द्रपर्वगणस्य निरवयवत्वादिति स्फुटं ज्योतिर्विदामिति ॥ १३ ॥

स्युः [1]पादोऽर्धं त्रिपद्यायास्त्रिद्व्येकेऽह्नः कृते स्थितिम्।
साम्येनेन्दोः स्तृणोऽन्ये तु पञ्चकाः पर्वसम्मिताः॥१४॥

सोमाकरः—एवं जावादिचोदितानामृचामेकैकस्मिन् पञ्च पञ्च चोदिताः क्रमस्तुताः स्तृण चत्वाः स्युर्भवेयुः। कीदृशाः। पर्वसम्मिताः। चोदितपर्वत्वसदृशा इत्यर्थः। किमेत एव। न। अन्यदपि। किम्। त्रिपद्यायाः पञ्चदश्याः पादः पश्चिमो दिनभाग उपवसनीयः

(१) स्युः पादार्धास्त्रिपद्या ये त्रिद्व्येकेऽह्नः कृतस्थितेः।
साम्येनेन्दोस्तृणेऽन्ये तु पञ्चकाः पर्वसम्मिताः॥ इति पाठः साधुः।

सोमः सोऽपि भवेत् । तथाऽर्धमपि । यः पर्वभाविराशेस्तदर्धविभागः सोऽपि तथैव भवेदित्यर्थः । किमेकशरम् । न । त्रिद्विः । त्रीन् वारान् । द्विवारान् । पञ्चशरोऽपि पौनःपुन्येनेत्यर्थः । तथैवापि त्रिपङ्गाया-स्त्रिपदोपलक्षितायाः प्रतिपदः । "पाद्याः प्रतिपदस्त्रयः" इति यदुक्तं तदपि भवेत् । किमेवं सर्व आहुः । न । एकेऽह्नः कृते स्थितिम् । अह्नो यागदिवसस्यैवं कृते कल्पनायामेतां स्थितिं व्यवस्थामाहुर्न सर्वे । अन्ये तु ज्यावाप्तव्यवस्थां पञ्चस्वपि एवमाहुः । स्तृणा इति वा षष्ठी । तत्सम्बन्धिनी व्यवस्थेत्यर्थः । तस्य तत्र ॥ १४ ॥

सुधाकरः—इदानीं दिनस्याष्टयामेषु पर्वणि गते यामसंज्ञामाहुरिति । अह्ना दिनस्य ये त्रयस्त्रिंशके पादार्धास्ते त्रिपाद्याः पादार्धाः स्युः । तत्र कृतस्थितेः कृता स्थितिर्येन तस्येन्दोश्चन्द्रस्य साम्येन कारणेन पर्वदिने त्रिपदी योगविशेषो भवतीत्यर्थः । पदार्धद्वितीये यदि पर्व तदा तत्पूर्वापरयोः पादार्धयोरपि पर्वसान्निध्यात् स्नानदानादौ विशेषतः पुण्यमतः पादत्रयस्य त्रिपदी योगत्रैशिष्ट्यात् पूर्वैः संज्ञा कृतेति । एवं तस्मिन् पर्वणि येऽन्ये पञ्च पादार्धा अवशिष्टास्ते पूर्वसम्मिताः । तेषु स्नानदानादिजन्यं तथैव पुण्यं यथाऽन्यसाधारणपर्वसु भवतीत्यर्थः ॥ १४ ॥

भांशाः [1]स्युरष्टकाः कार्याः पक्षा द्वादशकोद्गताः ।
[2]एकादशगुणश्चोनः शुक्लेऽर्धं चैन्दवा यदि ॥ १५ ॥

सोमाकरः—भांशाः स्युरष्टकाः कार्या इति । यदृद्धा ज्यावादिः । तस्य येंऽशाः स्युर्भवेयुः । चत्वार ४ स्त्रयो ३ द्वौ २ वा तेऽष्टकाः कार्या अष्टनाडिका इत्यर्थः । एवं सामान्यव्यवस्था । एवमेव यागकालापेक्षया कल्पना च ततो व्याप्तिः । तेषामन्यथैवोपरिष्टाद्वक्ष्यति 'सप्तैकं भयुक् सोमः' । इति । द्व्यष्टकावेति पाठः । दिवसाष्टभागा इत्यर्थः । तथापि

(१) स्युरिष्टकाः इति पाठः साधुः ।
(२) एकादशगुणश्चेन्दोः इति पाठः साधुः ।

प्राप्ताः द्वादशकोद्गता द्वादशदिवसाभ्यधिकाः सार्धाः सप्तदश वा । किं सर्वे । न । यातो यत्र वक्ष्यमाणभेदविधानात् । यतो वाक्यादिना ये पञ्च चोदितास्तदा स्थितानि पञ्च पर्वाण्यतिक्रम्य चार्तवोदना ततश्च षष्ठितमेऽह्नि इत्यन्त च भवति । एवमेवाऽऽर्षी व्याप्तिः चान्द्रमासैक्य-त्वैकेन प्रयत्नेनेति तस्मादेवं चोदना । किं च एकादशगुणश्चोमः । यदि चान्द्रमासस्तदैकादशगुणो भवेत् एकादशदिवस इत्यर्थः । किं च शुक्लेऽर्धं भवेदिति वाक्यशेषः । यदि शुक्लपक्षस्तदार्धं भवेत्मासस्येति वाक्यशेषः । एवमेन्दवा यदि । यदि चान्द्रा मासोऽभिप्रेतस्तदा तिथिसंख्या या पूर्व-मुक्ताद्विनोदना सावनसौराणां तत एव व्यवस्था ॥ १५ ॥

सुधाकरः—इदानीं पर्वणि चन्द्रनक्षत्रानयनार्थं भांशानयनमाह भांशा इति । वर्तमानाब्दे द्वादशकेषु मासेषु उद्गताः प्राप्ता इष्टका अभीष्टाः पक्षाः कार्याः । ‘निरेकं द्वादशाभ्यस्त’मित्यादिना पूर्वोदितेन प्रकारेणाभीष्टपर्वणि पर्वगणा आनेयास्त एवात्रेष्टकाः पक्षाः सन्ति । ते च पक्षा एकादशगुणा इन्दोश्चन्द्रस्य भांशाः स्युः । यदि ऐन्दवाश्चान्द्राः पक्षाः शुक्ले शुक्लपक्षे तदा पूर्वागतभांशेषु अर्धं च-शब्दाद्योज्यम् । भांशानां चतुर्विंशत्यधिकैकशतमितानामर्धं द्विषष्टिर्योज्या तदा चन्द्रस्य भांशाः स्युरित्यर्थः ।

अत्रोपपत्तिः । एकस्मिन् युगे चान्द्रमासाः = ६२ । तत्पक्षाः = १२४ । चन्द्रभगणाः = ६७ । एते सप्तविंशतिगुणाश्चन्द्रभुक्तनक्षत्राणि = १८०९ । ततोऽनुपातो यदि १२४ पक्षैः पर्वभिर्वा १८०९ नक्षत्राणि तदैकपक्षेण किं जातान्येकपक्षे नक्षत्राणि = $\frac{१८०९}{१२४}$ = १४ $\frac{७३}{१२४}$ = १४ नक्षत्राणि + ७३ भांशाः । यत एकस्मिन्नक्षत्रे भांशाः = १२४ । इति पूर्वमेव प्रतिपादितम् । अत्र नक्षत्राणां प्रयोजनाभावात्त्यागे एकस्मिन् पक्षे भांशाः

= ७३ = ६२ + ११ । ततोऽनुपातो यद्येकस्मिन् पक्षे एते भांशा-स्तदा पक्षगणे कियन्तः । लब्धा इष्टपक्षेषु भांशाः = ६२ इप + ११ इप । अत्र यदि पक्षाः समाः कृष्णपक्षे तदा प्रथमखण्डे पूर्णानि नक्षत्राणि लभ्यन्ते

Digitized by Google

शेषां त्यागेन तदा भांशाः = ११६५ । अथ यदि पक्षा विषमाः शुक्लपक्षे तदा प्रथमखण्डे पूर्णनक्षत्राणां त्यागात् भांशाः = ६२ । अतस्तदा वास्तवा भांशाः

= ६२ + ११६५ । एवमत्राभीष्टे पक्षान्ते यत् किमपि नक्षत्रं तस्य भुक्ता भांशा आगच्छन्तीति सर्वं निरवद्यम् । अत्र बार्हस्पत्यव्याख्यानं तदुपपत्तिश्च निरर्थकेति ॥ १५ ॥

नवकैरुद्धतोऽंशः [1]स्यादूनः सप्तगुणो भवेत् ।
आवापस्त्वयुजे [2]द्वौ स्यात् पौलस्त्येऽस्तं [3] गते परम् ॥१६॥

सोमाकरः—नवकैरुद्धतोऽंशः स्यादिति । स पर्वांशः पक्षयोरर्धमासयोर्नवकैरुद्धतोऽंशः स्याच्च नाडिका ९ इत्यर्थः । ऊनः सप्तगुणः सप्तनाडिका इत्यर्थः । आवापस्त्वयुजे द्वौ स्यात् । यदि स पक्षो द्वावंशौ भवेत् तदा त्वयुजे प्रथमश्रावणो विकारः स्यात् "कला एकाच विंशतिः' वक्ष्यमाणस्तत्रादौ कुर्यात् । कालापेक्षया तथा परमंशं द्वितीयं पौलस्त्ये [4]पुरस्ताच्चन्द्रमा अभ्युदियादिति श्रुतेः । पौलस्त्ये चन्द्रमस्यस्तं गते द्वितीयमंशं कल्पयेद्बुध इति वाक्यार्थभेदः; । प्रथम उपग्रहणीये यजनीय इत्यर्थः; । एवमत्र ॥ १६ ॥

सुधाकरः—अधुना वक्ष्यमाणविंशश्लोकागततिथिनक्षत्रभांशेषु द्वितीयखण्डजन्यं संस्कारविशेषं कथयति नवकैरिति । अयुजे विषमे पक्षे शुक्लपक्षावसाने पञ्चदशतिथौ आवापः 'तिथिमर्कद्वशाभ्यस्ताम्'–इत्या विविंशश्लोकविधिना लब्धोऽंशो भांशो नवकैर्नवभिर्भांशैरुद्धतो वर्धितः कार्यस्तदा वास्तवभांशमानं भवेदित्यर्थः । अथ तदा 'कार्या भांशाष्टकास्थाने' इत्यादि एकोनविंशश्लोकविधिना या भादानकलास्तत्र अधः

(१) स्याद्युतः इति पाठः साधुः ।   (२) द्वु इति पाठः साधुः ।
(३) गतेऽपरम् इति पाठः साधुः ।
(४) यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति इति (तैत्तिरीयसंहिता अष्टक २, अध्याय ५, अनुवाक ५)

Digitized by Google

सप्तगुणो युतस्तदा स्त्र रविसावनदिनं सावयवं स्यात् । पौलस्त्ये चन्द्रऽस्तं गते दर्शान्ते तु अपरं मानं कुदिनमानमेव साधयेत् । तत्र नवकैरद्भुतोऽंशो न कार्यं इति ।

अत्रोपपत्तिः । विंशश्लोकप्रतिपादितनक्षत्रानयने द्वितीयखण्डं $\frac{९ति}{१२}$ यत् त्यक्तं तत्र पञ्चदशतिथिषु नव भांशा उत्पद्यन्ते । अवान्तरेऽनुपातेन भांशा आनेया इत्यनुक्तमपि बुद्धिमता ज्ञायते । दर्शान्ते च तिथ्यभावादयं संस्कारः शून्यसमो भवत्यतः शुक्लपक्षान्ते पूर्वागता भांशा नवभिर्भांशैर्वर्धनीयाः । दर्शान्ते च यथाऽऽगतास्त एव ज्ञेयाः । अथैकस्मिन् नक्षत्रे एकं भूदिनं सप्तकलाधिकं भवत्यतो नक्षत्रसंख्या सप्तगुणा तत्रत्यभादानकलासु युता रविसावनं दिनं स्यात् । दर्शान्ते च भांशसंस्काराभावात् सावनं कुमानमेव साध्यं तच्च तिथिनक्षत्राभावात् पर्वभादानसमं भवतीति । बार्हस्पत्येन पौलस्त्यपदेन सोमाकरसम्मतोऽर्थश्चन्द्रवाचकः साधुर्गृहीतस्तथाऽप्यत्र मन्मते न तद्व्याख्यानं समीचीनमिति ॥ १६ ॥

जावाद्यंशैः समं विद्यात् पूर्वार्धे (१)पर्वसूत्तराः ।
भादानं स्याच्चतुर्दश्यां (२)द्विभागेभ्योऽधिको यदि ॥१७॥

सोमाकरः—जावाद्यंशैः समं विद्यादिति । वक्ष्यमाणं जावादिकमृक्षमंशैरवयवैः समं विद्यात् । एतदुक्तं भवति । यमृक्षं चोदयिष्यति जो-द्रा-ग इत्येवं समं विद्याज्जानीयात् । तदा येनाक्षरेण तद्वेषताकेन वा चोदितस्तस्य तावन्तोऽंशा भवन्ति । जादित्याश्वयुजे चत्वारः । द्रा इति द्वौ तदुत्तरस्मिन् निर्देशो वक्ष्यामः । तेषां पूर्वार्धे पर्वसु उत्तरा अंशाः कार्याः । चोपवसथादौ यदा तैः पञ्चदशी समया व्याप्यते तदा भादानं स्याच्चतुर्दश्यां तदा तस्याः पूर्वं चतुर्दशीशेषे न्यसेत् । कदैतत् । द्विभा-

(१) पर्व तूत्तरे इति पाठः साधुः ।

(२) द्विभागेभ्योऽधिके यदि इति पाठः साधुः ।

गेभ्योऽधिको यदि । यदि स चतुरस्त्र्यंशश्चतुरंशो वा भवेत् । एतदेवाभिप्रेत्यैकादशीगणना राका कुहूः इत्यादीनां ज्योतिर्विद्भिः कल्पिता ।

तथा च परिशिष्टकृत् ।

अर्धं चतुर्दशी यत्र परे पञ्चदशी यदि ।
चतुर्दश्यवसाने तु पितृयज्ञं तु कारयेत् ॥ इति ।

तथा च गर्गः ।

चतुर्दश्यां यदा कृष्णे क्षयमभ्येति चन्द्रमाः ।
दृश्यो भवति वाप्युच्चैः सिनीवाली ततस्तदा ॥ इति ।
अमावास्यामदृष्टेऽपि सोमे प्राधान्यकारणात् ।
केचिदिच्छन्ति दृष्टेऽपि केचित्तेन गताध्वनि ॥
निश्युद्गतोऽथवाऽप्युच्चैरस्तं वाप्युपगच्छति ।
तदा पूर्वेऽप्युतौ ह्येतत् कार्यं चन्द्रवशाद्भवेत् ॥ इति ।

एतत्सर्वं सूत्रकारापेतमेकाङ्गवैकल्यापेतं चोत्तरत्र ह्रासदर्शनं पूर्वां पौर्णमासीमुत्तरां वोपवसेदित्यादि । एतेन ज्ञायते चतुर्दशीपञ्चदश्यो [1]या पूर्णमासी सानुमतिरित्यादौ विवक्षिते न पञ्चदशीप्रतिपदौ । एवं तु दाक्षायणयज्ञसिद्धिः । एवं च पूर्वे कृत्वा उत्तरां सचोदितां सप्रतिपत्त्या प्रतिपदादौ यागः । तदतिक्रमे कालस्याग्नेयमेवाग्नेये [2]पथिकृते कुर्यादिति चोदना । पूर्वापरार्धे चाभ्युदिते चाभ्युदितेष्टिरिति । एवमेतत् सुविदितं कृत्वोपवसथादिस्वकाले कार्यम् । पूर्वां पौर्णमासीमुपवसेदिति यथा चोदितम् । अन्यथा तु दोषः । यथाह श्रुतिः । ते असुरा अयज्ञा अदक्षिणा अनक्षत्रा अदर्शमपौर्णमासमनाग्रयणमतिथिवर्जं तं चाहुतमवैश्वदेवमश्रद्धयाऽविधिना हुतमासप्तमान् तस्य लोकं हिनस्तीति । तस्मादुभयसम्भवे ये चतुर्दशीमुपवसन्ति ते निःफलमेवात्मना यागं कृत्वा प्रजानां महान्तं दोषं जनयन्ति ।

(१) या पूर्वा पौर्णमासी सानुमतिरिति । (ऋग्ब्राह्मणपञ्जिका ७, खण्ड ११ । तथा निरुक्त उत्तरषट्क अध्या-५ खण्ड २९)

(२) जुहुयादग्नये पथिकृते स्वाहेति (ऋग्ब्राह्मणपञ्जिका ७, खण्ड ८)

Digitized by Google

यथाह स्मृतिः ।

दुरिष्टैर्दुरधीतैश्च दुराचारैर्दुरागमैः ।

विप्राणां कर्मदोषैस्तैः प्रजानां जायते भयम् ॥ इति ।

तस्मादुभयकालसंरक्षणायेदं ज्योतिःशास्त्रं महर्षिणा आम्नातम् । तत्र पञ्चानामपि वर्षाणां मासद्वयचोदनायामेकमेकसूत्रं चतुर्भिरन्तरान्तरवर्त्तमानैः सहितं निदर्शयति युगपदस्य सकृदेव । तद्यथा ॥ १७ ॥

सुधाकरः—इदानीमग्रिमश्लोकोक्तसङ्केतेन पर्वान्ते भांशज्ञानतो नक्षत्रमाह जावाद्यंशैरिति । पर्वसमये भांशैर्भांशैः समं तुल्यं जोयादि नक्षत्रं गणको विद्याज्जानीयात् । अत्रैतदुक्तं भवति । पर्वकाले "भांशाः स्युरष्टकाः कार्याः पर्वा द्वादशकोद्गताः" इति पूर्वोदितप्रकारेण ये भांशाः समागतास्तत्सङ्ख्या 'जौ द्रा गः खे' इत्यादिक्रमेण गणनया यस्मिन् नक्षत्रे स्यात् तदेव पर्वणि नक्षत्रं स्यात् । यथा यदि भांशमानम् = २ । तदा क्रमगणनया द्वितीयं द्रा आर्द्रा भं स्यात् । एवं यदि भांशमानम् = २७ । तदा क्रमगणनया सप्तविंशतिसंख्याकं ष्ठा श्रविष्ठाभं स्यात् । यदि भांशमानम् = २८ । तदेदं सप्तविंशतितष्टं शेषेणैकेन समं पुनः क्रमगणनया जौ अश्विनीभं स्यात् । एवं कस्मिंश्चिद्भांशमाने सप्तविंशतितष्टतो नक्षत्रं स्यात् । तस्य भस्य यानीता भांशा गताः स्युरित्यर्थः । अथ रविसावनदिनस्य पूर्वार्धे मध्याह्नात् प्राक् पर्व भवेत् तदा तस्मिन्नेव दिने पर्व ज्ञेयं तदैव स्नानदानादिकं कार्यमिति । यदि तूत्तरे दिनस्योत्तरार्धे पर्व तथा द्विभागेभ्यो द्विपादभागेभ्योऽधिके भांशमाने तदा तद्दिने चतुर्दश्यामेव पूर्वविधिनाऽऽगतस्य भस्यादानं ग्रहणं कार्यम् । अत्रैतदुक्तं भवति । भागद्वयमतिक्रम्य मध्याह्नानन्तरं यदि पर्व तदा तद्दिने न दर्शपौर्णमासप्रारम्भः किन्तु स्नानदानादिकर्मणि तद्दिने उदये चतुर्दशी ज्ञेया । पूर्वविधिनाऽऽगतनक्षत्रस्य ग्रहणं च तस्यां चतुर्दश्यामेव कार्यम् । अयं श्लोकः 'जौ द्रा ग' इत्यादि श्लोकस्य प्राक् प्रमादतो विलिखितः ।

अत्रोपपत्तिः । एकस्मिन् युगे चान्द्रपर्वाणि वा पक्षाः = १२४ । चान्द्रनक्षत्राणि = १८०९ पूर्वमेव पञ्चदशश्लोकभाष्ये लिखितानि । अथ यदि पर्वगणमानम् = प, तत्रत्यगतनक्षत्रमानम् = न । वर्त्तमाननक्षत्रस्य गता भांशाश्च = भा, तदा यदि १२४ पर्वैः पर्वभिर्वा १८०९ नक्षत्राणि लभ्यन्ते तदा प—पर्वभिः किमिति लब्धानि न—नक्षत्राणि शेषाणि भा-भांशाः । अतो लब्धिगुणो हरः शेषयुतो भाज्यराशिसमः । तेन

$$\text{१८०९ प} = \text{१२४ न} + \text{भा} \text{ । अतः } \text{प} = \frac{\text{१२४ न} + \text{भा}}{\text{१८०९}} \text{ ।}$$

अत्र पमानमभिन्नम् । अतः कुट्टकेन रूपक्षेपे ।

वल्ली { ०, १७, १, ४, २, ३, १, ० } ततो लब्धिगुणौ १७ । २४८ । स्वक्षेपेण भासंज्ञकेन गुणौ जातौ भा — क्षेपे लब्धिगुणौ १७ भा । २४८ भा । "ते भाज्यतद्धारकवर्णमाने" इति भास्करोक्तोक्त्या न = २४८ भा = (९ × २७ + ५)भा ।

प = १७ भा । नक्षत्राणां सप्तविंशतेरल्पत्वात् भा—वशेन गतनक्षत्राणि = न = ५ भा । अत्र भा — मानस्य हरा—१२४ ल्पत्वात् भामानं १, २, ३, ···, १२४ । इत्यादिभिरुत्थाप्य श्रविष्ठादिगणनया जावाऽदिनक्षत्रक्रमाण्युपपद्यन्ते ।

यथा यदि भांशमानम् = भा = १ तदा गतनक्षत्रसंख्या = न = ५ । श्रविष्ठातः क्रमगणनया गतभं रेवती वर्त्तमाननक्षत्रं चाश्विनी जौ वा । एवं यदि भा = २ तदा गतनक्षत्रसंख्या = १० । श्रविष्ठातः क्रमगणनया गतभं मृगशिरो वर्त्तमानं चार्द्रा वा द्रा — इति । एवमन्यानि पाठपठितान्यायान्तीति । अथ यदि भा = २७ इ + शे तदा गतनक्षत्रसंख्या = २७ × ५ × इ + ५ शे सप्तविंशतितष्टेन गतनक्षत्रसंख्या = ५ शे । अतः सप्तविंशतितष्ट — भांशमानेन एकाद्यादिसमेन पुनः पुनस्तान्येव नक्षत्राणि समायान्ति । एवं लब्धिमानम् "१७ भा" अस्मिन् भास्थाने १, २, ३, ···, १२४ उत्थापनेन पर्वमानं समायाति । यथा यदि भा = १ तदा पर्वमानम् = १७ । युगादितः १७ मिते पर्वगणे भांशमानं रूपं तत्रस्थं नक्षत्रं च 'जौ' भवतीति । एवं वास्तवभांशमानतः पर्वसंख्या तत्र स्थितं नक्षत्रं

च सुलभेन ज्ञायते । पूर्वोदितेनैव प्रकारेण द्रा० पिबो — लिखिता पर्वनक्षत्रसूची उत्पद्यते । इदं सर्वं हि प्रकारान्तरेण बार्हस्पत्येन साधु प्रतिपादितं परन्तु 'जावाद्यंशै' रिति श्लोकस्य तदीयं व्याख्यानं न साधिवति सुजनैर्नैपुण्यं विलोक्यमित्यलं पल्लवितेन ॥ १७ ॥

जौ द्रा गः खे श्वे ही रो षाश्चिन्मूषक्ण्यः सूमाधाणः ।
रे मृ (श्रे) घाः स्वा पो जः कृष्यो ह ज्ये ष्ठा इत्यृक्षा लिङ्गैः॥१८॥

सोमाकरः—जौ द्रा गः खे श्वे इति । सप्तविंशतिभिरक्षरैर्नामदेवतावयवभूतैर्नक्षत्राणि । तेषामवयवास्तेषां क्रमस्तस्य च कालव्यवस्था तथा तिथेर्वर्तनक्षत्रस्य युगस्य चाधिमाससम्भवस्योत्तरनक्षत्राणां वर्षस्य मानान्येतानि दश वस्तूनि चोदितानि भवन्तीति वाक्यशेषः । तेषां संख्याद्योतनार्थं स्थाननियमार्थं चैवं निर्देशः । यस्य पादाक्षरं यत्सङ्ख्याकं प्रतिपदादौ भवति पूर्वं पञ्चदश्यन्ते यदि द्वौ तदोभौ विभज्यौ । यथा द्व्यंशमार्द्रा द्रेति चोदितम् । एवं सर्वाणि द्व्यक्षरचोदितानि । त्र्यक्षराणां तु चोदिताक्षरनिर्दिष्टोऽंशः प्रतिपदादौ स यदि तृतीयस्तदाऽऽद्यः पञ्चदश्यन्तद्वावुत्तरे । यथा षेति चोदिते आश्लेषा तृतीये तु चोदितो द्वौ पूर्वमुत्तरः प्रतिपदि यथा ण्य इति भरणी । यदि चतुरंशस्तदा चोदितोऽंशः प्रतिपदादौ त्रयः पूर्वम् । यथा आदित्यश्वयुजोपलक्षिताश्विनीति । एतदर्थं भादानं स्याच्चतुर्दश्यामित्युक्तम् । पूर्वार्धे पर्वसूत्तरा इति वचनात् । संख्याक्षरचोदितानां पूर्वाक्षरचोदितानां तु प्रथमोऽंशः पञ्चदश्यन्ते शिष्टाः प्रतिपदि यावन्तो भवेयुः । यथा रो इति रोहिणी एवमन्येषां सर्वेषाम् । अथवा सैव प्रतिपदादौ चोदिता रो इत्यादिका भवेत् तदा तु न [(१)]नववासः पञ्चदश्यन्ते "नवकैर्द्भृतोऽंश" इति विधानात् । यथैषा चोदना । अथवा दर्शप्रधाना चैव वा । तेषां तत्र पूर्वाक्षरचोदिताऽपेक्षया च । एवं आदित्याश्विन्यन्तेन निर्देशं पर्वे तद्देषामपि देवतोपलक्षितानां तयोपलक्षित आश्वयुज्यादौ यागकालस्तस्मिन् सत्यपि वा ।

(१) नवाद्यंशः इति पाठः साधुः ।

ततः प्रभृति पञ्चवर्षाणि सैव व्यवस्था कर्तुं यावत् । तत्र तु षट्त्रिंशं शतं पर्वराशिर्भवति । ततोऽर्धभागेनैकोनसप्ततिः ६९ पूर्वं पूर्णान्तात् पृष्ठे विहाय पर्वान्तरमेकोनसप्तति ६९ रन्या नाडिका यागकालः । एवमेषां चतुरंशानां व्यवस्था । एषैव तदुत्तराणां चतुर्णामन्येषां पर्वणां व्यवस्थेत्येके आहुः । यस्मादेतदर्थमेवान्यानि चत्वारि नक्षत्राण्यन्तरा नोक्तानि । अन्ये त्वाहुर्यस्मात् पञ्चानामपि पर्वणामेकेनैव प्रत्यब्देन सकृदेव व्यवस्थाप्यते एकेनैव चान्द्रवर्षसमूहेन । तस्मादस्य या व्यवस्था साङ्गतया मुख्या ऽऽवृत्त्या स्वचोदिते पर्वणि भवत्यन्यत्र तु गौणी । तस्मात् पर्वचोदिता व्यवस्थेत्यन्येषां व्यवस्थामाहुः । एवमुत्तरेषामपि अन्तर्वाधिमासे कृत्तिकानां नियतग्रहणं यतस्तयोपलक्षितः कार्त्तिकः । कालचोदनायामनिर्दिष्टानां भरण्यादीनामपरपक्षपञ्चदशीषु कालावाप्ति[1]स्तृतीया । एवमन्येषाम् । एवमेतेनैवैकेन निर्देशेन पञ्च वर्षाणि गम्यन्ते । द्वेत्यार्द्रा द्व्यंशौ मार्गशीर्ष्यामुक्तप्रायमन्यत् । ग इति भगदेवतोपलक्षिता पूर्वाफाल्गुनी तस्या द्व्यंशो उक्ता व्यवस्था सा तु फाल्गुन्याम् । खे इति विशाखा त्र्योऽंशा वैशाख्यामुक्ता व्यवस्था । श्वे इति विश्वेदेवास्तदुपलक्षितोत्तराषाढी तस्यां चन्द्रगत्यपेक्षयांशकल्पनाश्चत्वारो द्वौ वा । एवमेव हिरित्यहिर्बुध्न्योपलक्षिता प्रोष्ठपदा । रो इति रोहिणी त्र्यंशा द्वितीये वर्षे ततः पञ्चपर्वाण्यतिक्रम्याधिकमासकल्पनार्थं कालव्यत्यासः सा कार्त्तिक्याम् । षा इत्याश्लेषास्त्र्यंशा इत्येव । चिदिति चित्रा तथा चैत्र्यां द्वौ । मू इति मूले द्वौ । षक्–इति शतभिषक् चतुरंशाः । ण्य इति भरणी त्र्योऽंशाः । (ज्यैष्ठ्यां तृतीयवर्षादिः) । सू–इति पुनर्वसू चतुरंशोऽधिकमासापेक्षा । मेत्यर्यमोपलक्षितोत्तराफाल्गुनी त्र्यंशाः । तथैव धेत्यनुराधा चतुरंशकल्पना । ण इति श्रवणं त्र्यंशम् । तथैव रे इति रेवती चतुर्थे संवत्सरे (प्रथम) त्र्यंशाः । मृ इति मृगशिरश्चतुरंशं तथैव । घेति मघा द्व्यंशं तथैव । स्वेति स्वाती तथैव । आपः पूर्वाषाढा तथैव ।

(१) तृतीया व्यवस्था इति पाठः साधुः ।

अज इति पूर्वप्रोष्ठपदा द्व्यंशं चतुरंशं वा । कृ इति कृत्तिका पञ्चमस्यार्धं त्र्यंशम् । ष्येति तिष्यं द्व्यंशं तथैव ह इति हस्तं द्व्यंशम् । ज्ये इति ज्येष्ठा तथैव (ज्येष्ठां) मासापेक्षया नियमः । ष्ठा इति धनिष्ठा श्रावणस्यान्ते त्र्यंशम् । एवमेभिः स्मर्यमाणैश्चैतैर्योगकालः प्रकल्प्यः । एवमेव त्वृत चन्द्रगत्यपेक्षया । अथवैतत्तु ऋत चोदनायामुत्तरोत्तरं षष्टिसङ्ख्याक्रमेणोदाहृता । आर्द्रा पौनःपुन्येन षष्टितमा स्यात् । गेति तस्मात् खे इति एवं सर्वं तस्मात् तथैव संख्यया पर्व ततस्ततोऽपि प्रकल्प्याः । एवं तु द्विमासान्तरचोदनाय पूर्वर्क्षचोदनायैव व्यवस्था । पौषमाघमासयोर्वर्षादौ यतः पञ्चानामृतवस्त्र्यंशात् पर्वर्क्षाश्च सप्तविंशतिः । तस्मादर्धपञ्चमभकल्पनयैव सर्वे प्रत्येतव्याः । तस्मादेवं सर्व एव प्रवक्ष्यतेऽस्य मासोपलक्षकाश्चापि भगणाख्याः । तस्मादेव कालसाम्यम् । एवमेतेषाम् ॥ १८ ॥

सुधाकरः—इदानीं पक्षान्ते पूर्वागतभांशतो नक्षत्रज्ञानार्थमादौ लाघवेन नक्षत्रनामस्मरणार्थं भांशक्रमतो नक्षत्राणां लघुनामान्याह जाविति । जौ (आश्वयुजौ=अश्विनौ) । द्रा (आर्द्रा) । गः (भगः=पूर्वफाल्गुन्यौ) । खे (विशाखे) । श्व (उत्तराषाढा=विश्वे) । हिर् (उत्तरभाद्रपदा=अहिर्बुध्न्यम्) । रो (रोहिणी) । षाः (आश्लेषाः) । चित् (चित्रा) । मू (मूलम्) । षक् (शतभिषक्) । ण्यः (भरण्यः) । सू (पुनर्वसू) । मा (उत्तरफाल्गुन्यौ=अर्यमा) । धाः (अनुराधाः) । णः (श्रवणः) । रे (रेवती) । मृ (मे) (मृगशिरः) । घाः (मघाः) । स्वा (स्वाती) । पः (पूर्वाषाढा=आपः) । जः (पूर्वभद्रपदा=अजः=एकपात्) । कृ (कृत्तिकाः) । ष्यः (पुष्यः) । ह (हस्तः) । ज्ये (ज्येष्ठा) । ष्ठाः (श्रविष्ठाः=धनिष्ठाः) । इति लिङ्गैः सङ्केतैः एता नक्षत्राणि द्राक्स्मरणार्थं ज्ञेया इति । इदं विद्युन्मालानाम छन्दः । तत्र सर्वे वर्णा दीर्घा भवन्ति, लाघवेनैकाक्षरेण नामग्रहणे सर्वेषां नामानि भिन्नानि यथा भवेयुर्यथा छन्दोभङ्गोऽपि न भवेत् तथा स्वेच्छया नक्षत्रनामतः पूर्वाक्षरे उत्तराक्षरे

तेषां तेजोविशेषेण प्रत्यवायो न विद्यते ।
तदन्वीक्ष्य प्रयुञ्जानः सीदत्यवरको जन इति ॥

तथा कतिधर्माणामपि स्वयमूर्ध्वरेतस्त्वैकदेशाध्ययनादीनां तदनुष्ठातॄणां द्विजानां च निन्दा न कार्या चाल्पप्रभावत्वे न कलिकालानुरूपत्वादिति ।

तदाह बृहत्पराशरः ।

युगे युगे तु ये धर्मास्तेषु धर्मेषु ये द्विजाः ।
ते द्विजानावमन्तव्या युगरूपा द्विजोत्तमाः ॥ इति ।

यतो युगरूपा इति हेतुरत एव युगाननुरूपा धर्मा द्विजाश्च प्रतिषिद्धाः ।

ब्रह्मपुराणे

दीर्घकालं ब्रह्मचर्यं धारणं च कमण्डलोः ।
गोत्रान्मातृसपिण्डाच्च विवाहो गोवधस्तथा ॥
नराश्वमेधौ मद्यं च कलौ वर्ज्यं द्विजातिभिः ।

तथा

देवराच्च सुतोत्पत्तिर्दत्ता कन्या न दीयते ।
न यज्ञे गोवधः कार्यः कलौ न च कमण्डलुरिति ॥

बृहन्नारदीये ऽपि ।

समुद्रयातुः स्वीकारः कमण्डलुविधारणम् ।
द्विजानामसवर्णासु कन्यासूपगतं तथा ॥
देवराच्च सुतोत्पत्तिः मधुपर्के पशोर्वधः ।
मांसदानं तथा श्राद्धे वानप्रस्थाश्रमस्तथा ॥
दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य च ।
दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ ॥
महाप्रस्थानगमनं गोमेधश्च तथा मखः ।
इमान्धर्मान्कलियुगे वर्ज्यानाहुर्मनीषिण इति ॥

शौनकीये धर्मज्ञसमये ऽपि ।

विहितान्यपि कर्माणि धर्मलोपभयाद्बुधैः ।
समापने निवृत्तानि साध्वभावात्कलौ युगे ॥

विधवायां प्रजोत्पत्तौ देवरस्य नियोजनम् ।
बालिकाक्षतयोन्याश्च वरेणान्येन संस्कृतिः ॥
कन्यानामसवर्णानां विवाहश्च द्विजातिभिः ।
आततायिद्विजाग्र्याणां धर्मयुद्धेन हिंसनम् ॥
द्विजस्याब्धौ तु नौयातुः शोधितस्याऽपि संग्रहः ।
सत्रदीक्षा च सर्वेषां कमण्डलुविधारणम् ॥
महाप्रस्थानगमनं गोसंज्ञप्तिश्च गोसवे ।
सौत्रामण्यामपि सुराग्रहणस्य च संग्रहः ॥
अग्निहोत्रहवण्याश्च लेहो लीढापरिग्रहः ।
वानप्रस्थाश्रमस्याऽपि प्रवेशो विधिचोदितः ॥
वृत्तस्वाध्यायसापेक्षमघसङ्कोचनं तथा ।
प्रायश्चित्तविधानं च विप्राणां मरणान्तिकम् ॥
संसर्गदोषः स्तेयाद्यमहापातकनिष्कृतिः ।
वरातिथिपितृभ्यश्च पशूपाकरणक्रिया ।
दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः ॥
सवर्णान्याङ्गनादुष्टैः संसर्गः शोधितैरपि ।
अयोनौ संग्रहे वृत्ते परित्यागो गुरुस्त्रियाः ॥
परोद्देशात्मसन्त्यागो उच्छिष्टस्याऽपि वर्जनम् ।
प्रतिमाभ्यर्चनार्थाय सङ्कल्पश्च सधर्मकः ॥
अस्थिसञ्चयनादूर्ध्वमङ्गस्पर्शनमेव च ।
शामित्रं चैव विप्राणां सोमविक्रयणं तथा ॥
षड्भक्तानशनेनान्नहरणं हीनकर्मणः ।
शूद्रेषु दासगोपालकुलमित्रार्धसीरिणाम् ॥
भोज्यान्नता गृहस्थस्य तीर्थसेवाऽतिदूरतः ।
शिष्यस्य गुरुदारेषु गुरुवद्वृत्तिरीरिता ॥
आपद्वृत्तिर्द्विजाग्र्याणामश्वस्तनिकता तथा ।
प्रजार्थं तु द्विजाग्र्याणां प्रजारण्यपरिग्रहः ॥
ब्राह्मणानां प्रवासित्वं मुखाग्निधमनक्रिया ।
बलात्काराविदुष्टस्त्रीसंग्रहो विधिचोदितः ॥
यतेस्तु सर्ववर्णेषु भिक्षाचर्या विधानतः ।

Digitized by Google

नवोदके दशाहं च दक्षिणा विधिचोदिता ॥
ब्राह्मणादिषु शूद्रस्य पचनादिक्रिया ऽपि च ।
भृग्वग्निपतनैश्चैव वृद्धादिमरणं तथा ॥
गोतृप्तिशिष्टे पयसि शिष्टैराचमनक्रिया ।
पितापुत्रविरोधेषु साक्षिणे दण्डकल्पनम् ॥
यत्र सायं गृहत्वं च मुनिभिस्तत्त्वतत्परैः ।
एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ॥
निवर्त्तितानि कर्म्माणि व्यवस्थापूर्वकं बुधैः ।
समयश्चा ऽपि साधूनां प्रमाणं वेदवद्भवेदिति ॥

अन्यत्रा ऽपि पुराणे ।

ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा ।
कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुमिति ॥

निगमे ऽपि ।

अक्षता गोपशुश्चैव श्राद्धे मांसं तथा मधु ।
देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेदिति ॥

स्मृत्यन्तरे ऽपि ।

देवराच्च सुतोत्पत्तिः गोमेधं च कमण्डलुम् ।
अक्षतां पौरुषं मेधं कलौ पञ्च विवर्जयेत् ॥

ब्रह्मपुराणे ऽपि ।

स्त्रीणां पुनर्विवाहश्च देवरात्पुत्रसन्ततिः ।
स्वातन्त्र्यं वा कलियुगे न कर्त्तव्यं कदाचन ॥

क्रतुरपि ।

देवरेण सुतोत्पत्तिर्दत्ता कन्या न दीयते ।
न यज्ञे गोवधः कार्यः कलौ न च कमण्डलुः ॥

बौधायनो ऽपि ।

विधिर्यो निश्चितः पूर्वं क्रियते नेह साम्प्रतम् ।
पुरा कल्पे स एतच्च विधवाया नियोजनम् ॥

Digitized by Google

हेमाद्रौ ।

यथा नियोगजो धर्मो नानुबन्ध्या वधो ऽपि च ।
तथोद्धारविभागो ऽपि नैव सम्प्रति वर्तते ॥

अन्यत्रा ऽपि ।

अग्निहोत्रं गवालम्भं सन्यासं पलपैतृकम् ।
देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत् ॥

ब्रह्मपुराणे ऽपि ।

शपथाः शकुनाः स्वप्नाः सामुद्रिकमुपश्रुतिः ।
उपयाचितमादेशाः सम्भवन्ति कलौ क्वचित् ॥
तस्मात्तन्मात्रलाभेन कलौ कार्यं न कारयेत् ।

अथैतानि व्याक्रियन्ते । दीर्घकालमष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यमित्यादिश्रुत्युक्तं तेन नैष्ठिकब्रह्मचर्यमर्थत एव निषिद्धम् । कमण्डलुधारणमथ कमण्डलुचर्यामुपदिशन्तीत्यादिबौधायनोक्तितिकर्तव्यताकं सोदकं च कमण्डलुमित्यनेन स्नातकस्य विहितं मृन्मयकरकधारणं न तु नैष्ठिकब्रह्मचर्यं पूर्वोक्तत्वेन पौनरुक्त्यात् । नाऽपि वानप्रस्थाश्रमः, बृहन्नारदीये पृथग् उपादानात् । गोत्राच्च गोत्रोत्पन्नायाः पितृष्वसुः, मातृसपिण्डान्मातुलाद्, गोत्रसापिण्ड्ययोः सामान्यनिषेधेनैव प्राप्त्यभावादेतन्निषेधानुपपत्तेरयमर्थः कर्तव्यो यः श्रुतिस्मृतिसदाचारैर्मातुलकन्यापरिणयो निर्णीतः सोऽत्र निषिध्यत इति । तेन यानि कानि चित् मातुलकन्यापरिणयनिषेधकानि मन्वादिवाक्यानि तानि कलिविषयाण्येव ।

अत एव व्यासेन कलिनिन्दाप्रक्रमे ।

तृतीयां मातृतः कन्यां तृतीयां पितृतस्तथा ।
शुल्केन चोद्वहिष्यन्ति विप्राः पापविमोहिताः ॥ इत्युक्तम् ।

मातृतो मातृपक्षे कूटस्थां तृतीयां मातुलसुतां पितृतः पितृपक्षे तृतीयां पैतृष्वसेयीमित्यर्थः । एतेन विधायकवाक्यानां युगान्तरविषयत्वं कृष्णार्जुनादीनां मातुलकन्यापरिणयेन स्पष्टीकृतमिति न क्वापि विरोधः । अत एवाधुनिकानां सदाचारो ऽप्यनाचारः इति बौधायनेन पञ्चधा विप्रतिपत्तिर्दक्षिणत इत्युपक्रम्य यथैतदनुपेतेन सह भोजनं स्त्रिया सह

Digitized by Google

भोजनं पर्युषितभोजनं मातुलपितृष्वसृदुहितृपरिणयनं चेति । तयोरतः, कन्याविक्रयः सीधुपानं उभयतोदद्भिर्व्यवहारः आयुधीयकं समुद्रयानमित्यनेन प्रतिपादितम् । यदपि तत्र तत्र देशप्रामाण्यमेव स्यादित्यनेन तत्तद्देशे ऽनुष्ठेयत्वमुक्तम्, तदपि पूर्वपक्षतया, सिद्धान्ते तु मिथ्या एतदिति गौतम, उभयमेव नाद्रियेत शिष्टस्मृतिविरोधादिति प्रतिपादितत्वाद्, इत्यलम् ।

गोवधो मधुपर्कादौ न तु गोमेधे तस्य बृहन्नारदीये पृथगुपादानात् । यद्यपि मुख्यनिषेधे अनुकल्पो न प्राप्नोति तथाऽपि वचनाद्भवति ।

तदाह मार्कण्डेयः ।

माधुपर्किकपश्वर्थे ततो मात्रां प्रकल्पयेत् ।
सहिरण्यं बीजमात्रं द्रविणेन सदैव तु ॥
पशुः कलौ न कर्तव्य इत्याह भगवान्भृगुरिति ।

नरमेधो ब्रह्मणे ब्राह्मणमालभत इत्यादिनोक्तः । अश्वमेधस्तरति सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजत इत्यनेनोक्तः । मद्यं सुरा । द्राक्षं तु सुरामद्यमिति पुलस्त्यस्मरणात् । सा च सौत्रामण्यादौ कलौ निषिध्यते । सौत्रामण्यां सुराग्रह इति कलिवर्ज्ये वचनात् । सौत्रामणीप्राप्तिश्च नराश्वमेधसाहचर्यात् । तत्रापि सुराशब्देन पैष्टयेव । तत्प्रकरणे तस्या एवोत्पत्तिप्रकारदर्शनात् ।

अथ वा मद्यशब्देन पानसाम्येकादशविधं मद्यमेव ।

यथाऽऽह पुलस्त्यः ।

पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवम् ।
मध्वूत्थं सैरमारिष्टं मैरेयं नारिकेलजम् ॥
समानानि विजानीयान्मद्यान्येकादशैव त्विति ।

तानि च द्विजातिभिस्त्रिभिर्मूर्द्धावसिक्तादिभिः चाद्भिश्चानुलोमजैः कलौ वर्ज्यानि । तत्र ब्राह्मणस्य नित्यं मद्यं ब्राह्मणो वर्जयेदिति चतुर्ष्वपि युगेषु प्रतिषेधे ऽपि यत्र अनन्यौषधसाध्यव्याध्युपशमार्थे मद्यमभ्यनुज्ञातं तस्या ऽयं कलौ निषेधः ।

तथा च धन्वन्तरिः ।

मद्यप्रयोगं कुर्वन्ति शूद्रादिषु महार्त्तिषु ।
द्विजैस्त्रिभिस्तु न ग्राह्यं मद्यमप्युज्जीवयेन्मृतमिति ॥

यच्चापि क्षत्रियवैश्ययोः ।

कामादपि हि राजन्यो वैश्यो वाऽपि कथं च न ।
मद्यमेवासुरां पीत्वा न दोषं प्रतिपद्यते ॥

इति वृद्धयाज्ञवल्क्येन तालादिमद्यमभ्यनुज्ञातं तदपि द्विजैस्त्रिभिस्तु न ग्राह्यमिति वचनात्कलौ निषिध्यत इत्यलम् ।

तथा देवरात्पतिसोदरात्सपिण्डात्सगोत्राद्वा वाग्दानानन्तरं पतिमरणे भ्रातृपत्न्यां पुत्रोत्पत्तिः ।

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥
अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया ।
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात् ॥

इत्यादिमनुयाज्ञवल्क्याद्युक्तविधिना । न तु विवाहानन्तरं विधवायाम् । तस्य "नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभि"रित्यादिना मनुनैव पूर्वं निषेधात् । तेन धर्मज्ञसमये बौधायनवाक्ये च विधवाशब्दो व्याख्यात इति प्राञ्चः । वस्तुतस्तु

उक्तो नियोगो मनुना निषिद्धः स्वयमेव तु ।
युगह्रासादशक्योऽयं कर्तुं सर्वैर्विधानतः ॥
तपोज्ञानसमायुक्ताः कृतत्रेतायुगे नराः ।
द्वापरे च कलौ नॄणां शक्तिहानिर्हि निर्मिता ॥

इति बृहस्पतिना विवाहोत्तरविधवानियोगनिषेधस्य मनूक्तस्य कलिविषयत्वेनोपसंहाराद्वाग्दत्ताविषयको नियोगः कलावप्यनुज्ञायत इति अपरार्ककुल्लूकभट्टादिसम्मत एव तत्पक्षः । नष्टे मृते प्रव्रजित इत्यनेनाऽपि पराशरेणैव देवरातिरिक्तवरविधानमपि कन्याविषयकम् । इयं च संस्कृता न वाग्दत्ता तदानीं पतित्वाप्रसक्तेन कन्यात्वविशेषणस्यानर्थक्यापातात् । अन्यथा

क्षततयोनिहतायाता इति वचनात् कन्येति विशेषणेन दानयोग्यता-यामपीत्युक्तं दानमन्यस्मै प्रतिपादनं पुनर्दानं परस्य चेति वचनात् । यज्ञे ज्योतिष्टोमादौ मैत्रावरुणीमनुबन्ध्यामालभेतेत्यादिना विहितो गोवधः । प्रत्येकमेवाऽत्र निषेधः स्पष्टः । समुद्रे नौकादिना द्वीपान्तरं यो याति तस्या-ऽन्यैः, "समुद्रयानं ब्राह्मणस्य न्यासापहरणमि"त्यादिबौधायनोक्तप्राय-श्चित्तकरणे ऽपि स्वीकारो व्यवहारः द्विजस्याब्धौ तु नौयातुः शोधितस्या-ऽपि संग्रह इति वाक्यात् । द्विजानां ब्रह्मक्षत्रविशामसवर्णकन्यासु स्वनु-गमनयाचने ऽपि गमनं तद्विवाहस्य धर्मेन्नसमये पृथक् निषेधात् । श्राद्धे पार्वणादौ मांसपरिवेषणम् ।

शौचं च पात्रशुद्धिश्च श्रद्धा च परमा यदि ।
अनन्ततृप्तिकृच्छ्राद्धे एतत् खलु न चामिषम् ॥
यस्तु प्राणिवधं कृत्वा मांसेनातर्पयेत् पितॄन् ।
सो ऽविद्वांश्चन्दनं दग्ध्वा कुर्यादङ्गारविक्रयम् ॥
क्षिप्त्वा कूपे यथा किञ्चिद्बाल आदातुमिच्छति ।
पतत्यज्ञानतः सो ऽपि मांसेन श्राद्धकृत्तथा ॥
सर्वधार्म्यं यदा न स्यादर्थार्थं तु तदाश्रयेत् ।
ब्राह्मणश्च स्वयं नाऽद्यात्तच्च श्वादिहतं यदि ॥

इति बृहत्पराशरस्मरणात् ।

मांसादनमिति पात्रे कथञ्चिद्दत्तस्याऽपि भक्षणम् । वानप्रस्थ-स्तृतीयाश्रमः, महाप्रस्थानगमनमुत्तरदिग्गमनं, गोमेधो यागविशेषः । विहि-तानीति जनमेजययज्ञसमापने सति बुधैस्तत्तद्वाक्यविहितान्यपि कर्माणि कलौ धर्मलोपभयान्निवर्तितानि तदनुष्ठानयोग्यसाधुपुरुषालाभात् । यथा आततायिनामुद्यतशस्त्रादीनां द्विजाग्र्याणां विप्राणां "ब्राह्मणं वा बहु-श्रुतं । आततायिनमायान्तं हन्यादेवे"त्यादिना विहितं सम्मुखमकूटश-स्त्रेण मारणम् । एतेन नाततायिवधे दोषो ऽन्यत्र गोब्राह्मणेभ्य इति सुम-न्तुवाक्यं सामान्यमपि कलिविषयं सिद्धम् । सत्रे गवामयनादौ सप्तदशावरा-श्चतुर्विंशतिपरमास्सत्रमासीरन्नित्यादिना विहिते दीक्षा यजमानानाम् ।

सौत्रामण्यां याग्विशेषे यजेत वा सौत्रामण्या इत्यादिना विहिते अथ सुराग्रहान्गृह्णातीति विहितसुराग्रहग्रहणकर्तुः संग्रहो व्यवहारः । तेन च सुराग्रहनिषेधोऽपि सिध्यति । सौत्रामणीति वाजपेयाद्युपलक्षणम् ।

यज्ञादौ च गवालम्भं वाजपेयसुराग्रहम् ।
अग्निहोत्रहवण्याश्च लिहं च कलौ त्यजेत् ॥

इति बौधायनीयभाष्ये वसिष्ठस्मरणात् । अग्निहोत्रं हूयते यया स्रुचा सा वैकङ्कत्यग्निहोत्रहवणी तस्याश्च नित्यं होमानन्तरं हुतावशिष्टप्राशनार्थं लेहो जिह्वयास्वादनम् । कथं चिल्लीढायास्तस्याः पुनः परिग्रहो दिनान्तरे होमसाधनता । वृत्तमग्निहोत्रादि स्वाध्यायो वेदस्तावपेक्ष्याचस्याशौचस्य वेदाग्नियुक्तविप्रस्य त्र्यहमाशौचमिष्यत इत्यादिवचनादिविहितसङ्कोचः । स चाशौचिसम्पर्के । सम्पर्काभावे तत्सङ्कोचस्य वक्ष्यमाणत्वात् । कामकृते महापातकादौ मरणान्तिकं यत्प्रायश्चित्तं "न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृत" इत्यादिनोक्तं तस्य विधानमुपदेशः । "मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिरिति" मनुस्मरणात् तर्हि कथं तदनुष्ठेयमिति चेत्स्वयमेव धर्मशास्त्राज्ज्ञात्वाऽन्यापदेशेन पृष्ट्वा वेति ब्रूमः ।

संसर्गदोषः पतितसंसर्गेण पातित्यं "संवत्सरेण पतति पतितेन सहाचरन्"इत्यादिना प्रतिपादितम् । कलौ पतति कर्मणेति वाक्यात् । उपपादितं चैतस्मात् । एवं च संसर्गः शोधितैरपीत्यादिसंसर्गनिषेधो नानुपपन्नः । अन्यथा पतितसंसर्गे दोषाभावः शोधितसंसर्गनिषेधश्चेति महद्वैषम्यं स्यात् । स्तेयान्यस्मिन्सुवर्णस्तेयव्यतिरिक्ते महापातके निष्कृती रहस्यप्रायश्चित्तं न प्रायश्चित्तमात्रं विरोधात् । नापि प्राणान्तिकं तस्योपदेशनिषेधेन स्वयं कर्तव्यताभ्यनुज्ञानात् । नापि व्यवहारः । ब्राह्मणभोजनादिविधिविरोधात् । नापि परलोकशुद्धिः । तस्याः साक्षात्सुवर्णस्यसाध्यत्वेनावर्जनीयत्वात् । नाप्युपायनिषेधेन तन्निषेधः । पूर्वोक्तविधिविरोधात् । तस्माद्रहस्यप्रायश्चित्तमिति व्याख्येयम् । तद्विधिर्मूने ।

अत एव बृहन्नारदीयविष्णुपुराणादिषु ।
श्रावयन्ति प्रयत्नेन स्वदोषम्पापकर्मिणः ।
रहस्यामेव कुर्वन्ति प्रायश्चित्तक्रियां कलौ ॥
मनःशुद्धिविहीनानां निष्कृतिर्न ततो भवेत् ।

इत्यादिना तत्र तत्र कलिनिन्दाप्रक्रमे रहस्यमेव निन्दितं वक्ष्यति चैतच्चमे "तस्मात्प्रकाशयेत्पापमि"त्यादिना । स्कान्देपि काशीखण्डे नवैतानि प्राकाश्यानि रहःपापमकुपितमित्यादिना । न चैवं सुवर्णस्तेयवर्जनमसङ्गतम् । तस्य कलावपरिहार्यत्वेन सुवर्णस्तेयस्य प्रतिनिमित्तं पर्षदुपदेशासम्भवेन रहस्यंप्रायश्चित्ताभ्यनुज्ञानार्थत्वात् । वरातिथिभ्यां मधुपर्के, पितृभ्यः श्राद्ध इति व्याख्यातम् ।

दत्तो मातापितृभ्यामन्यतरेण वा पुत्रं प्रतिग्रहीष्यन्बन्धूनाहूय राजनि निवेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा ऽदूरबान्धवं बन्धुसन्निकृष्ट एव प्रतिगृह्णीयादित्यादिवसिष्ठोक्तविधिना पुत्रीकृतः । औरसो धर्मपत्न्यां स्वस्मात्प्रसूतस्ताभ्यामितरेषां क्षेत्रजादीनां दशानां पुत्रत्वेन स्वीकारः ।

तथा च बृहस्पतिः ।

अनेकधा कृताः पुत्रा ऋषिभिर्ये पुरातनैः ।
न शक्यास्ते ऽधुना कर्तुं तपोहीनैरतन्द्रितैः ॥

अधुना कलियुग अतन्द्रितैरिति मुनिविशेषणम् । तथा

क्षेत्रजो गर्हितः सद्भिस्तथा पौनर्भवः सुतः ।
कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च ॥
दत्तो ऽपविद्धः क्रीतश्च अपविद्धस्तथैव च ।

दत्तनिषेधोऽत्रासवर्णविषयः। "सजातीयेष्वयं प्रोक्त"इति योगिना असवर्णनिषेधादिति तन्न । अपविद्धस्य द्विर्निषेधानुपपत्तिस्तस्मादेवं व्याख्येयम् । दत्तः पितृभ्यां परिग्रहीत्रा परिगृह्य त्यक्तः । सोऽन्येन न पुत्रीकार्यः । पुनर्भून्यायात् । सवर्णान्या असवर्णा-या अङ्गनाः ताभिर्दुष्टैस्तत्संसृष्टैः कृतप्रायश्चित्तैरपि संसर्गः । गुरुस्त्रियाः शिष्यस्त्रियाः भुक्तोपगतायाश्च स्त्रिया अयोनौ सङ्ग्रहे सति परित्यागः ।

चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या ।

पतिघ्नी च विशेषेण जुङ्गितोपगता च या ॥

इत्याद्युक्तः । अत्रायोनाविति विशेषोपादानादन्ययोन्ययोन्योः साधारण्येन संसर्गे परित्याग इति गम्यते ।

परेषां गोब्राह्मणादीनामुद्देशेन निमित्तेन तदार्त्तिमोक्षणार्थे प्राणत्यागः "गवार्थे ब्राह्मणार्थे वा सद्यः प्राणान्परित्यजे"दित्याद्युक्तः । उच्छिष्टस्पर्शादिवर्जनं स्वमुच्छिष्टमुच्छिष्टोपहतं चेत्यादिविध्याद्युक्तं तन्निमित्तं प्रायश्चित्तं च । विष्ण्वादिप्रतिमाविशेषस्य यावज्जीविकः पूजनसङ्कल्पः । इयमेव प्रतिमा यावज्जीवं मया पूजनीयेत्येवमादिः ।

चतुर्थेऽहनि कर्त्तव्यमस्थिसञ्चयनं बुधैः ।

ततः सञ्चयनादूर्ध्वमङ्गस्पर्शो विधीयते ॥

इत्यादिवाक्यविहितोऽस्थिसञ्चयनानन्तरमङ्गस्पर्शः । शामित्रं यज्ञे स्वयं पशुसमापनं विप्राणाम् । सोमलताया विक्रयश्च । षड्भक्तं भक्तानामनशनमुपवासत्रयं तस्मिन् बुभुक्षित त्र्यहं स्थित्वा धान्यमब्राह्मणा हरेदित्यादिना विहितमपहरणम् ।

शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः ।

भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत् ॥

इत्यादिना विहितं शूद्राणां भोज्यान्नत्वम् । गृहस्थस्याहिताग्नेरतिदूरेण तीर्थयात्रा ।

धनान्यर्जयितुं युक्तः प्रवासो ह्यग्निहोत्रिणः ।

धनैर्यत्सम्भवेद्धित्वा तीर्थार्थं न तु त्यजेदिति मनूक्ता ।

ब्राह्मणानामापदि क्षत्रादिवृत्तिभिर्जीवनम् । तत्रैव कर्म्मणां जीवे द्विजानां वाप्यापदि द्विज इत्याद्युक्तम् ।

तथैवाश्वस्तनिकतया जीवनम् । "त्र्याहिको ऽश्वस्तनो ऽपि वे"त्युक्ताम् । विप्राणां सन्ततिजीवनाय आत्मार्थ्यापरिग्रहः । ब्राह्मणानां सर्वदा प्रवासशीलत्वम् । "वृषा तु न चिरं वसेदिति" स्मरणात् ।

Digitized by Google

शुक्लेनाग्निधमनं “मुखेनोपधमेदग्निं मुखाद्ध्येषो ह्यजायते”त्युक्तम् । बला-त्कारीकरणादिना दुष्टायाः स्त्रियाः पुनः संग्रहः । संन्यासिनस्सार्ववर्णिकं भैक्ष्यं “चातुर्वर्ण्ये चरेद्भैक्ष्यमि”त्याद्युक्तम् । अभिनवोदके दशाहवर्ज्जनं “दशाहेन शुध्यन्ति भूमिष्ठमभिनवोदकमि”त्यादिनोक्तम् । आकालिक-वर्षोदकदशाहनिषेधस्य प्रतिप्रसवेऽपि कालिकत्र्यहनिषेधस्य न प्रतिप्रस-वः । तथा च स्मृत्यन्तरे ।

काले नवोदकं शुद्धं न पिबेच्च त्र्यहं तु तत् ।
अकाले तु दशाहं स्यात्पीत्वा नाद्यादहर्निशमिति ॥

ब्रह्मचारिणः स्नानार्थं गुरवे दक्षिणादानं “गुरवे तु वरं दत्त्वा स्नायीत तदनुज्ञये”त्यादिनोक्तम् । ब्राह्मणादिचतुर्वर्णगृहेषु शूद्राणां पाच-कत्वम् । “आर्याधिष्ठिता वा शूद्राः संस्कर्तारः स्युरि”त्यापस्तम्बोक्तम् । भृग्वग्न्यनशनाम्बुभिर्वृद्धादीनां प्राणत्यागः ।

वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः ।
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ॥ इत्याद्युक्तः ।

गोतृप्त्यधिके जले शिष्टानामाचमनकरणम् । “शुचि गोतृप्तिकृत्-तोयं प्रकृतिस्थं महीगतमि”त्युक्तम् । पितापुत्रयोर्विरोधे साक्षिणां समा-धातॄणां च दण्डविधानम् ।

पितापुत्रविरोधे तु साक्षिणां त्रिपणो दमः ।
अन्तरे च तयोर्यः स्यात्तस्याप्यष्टगुणो दम इत्युक्तम् ॥

संन्यासिनां यत्र सायङ्कालस्तत्रैवावस्थानं “यत्र सायं गृहो मुनि-रि”त्युक्तम् । एते पूर्वोक्ता धर्माः स्मृत्युक्ता अपि कलेरादौ महात्मभिरैकम-त्येन क्वचिच्छास्त्रविरोधात्क्वचिच्च दृष्टविरोधान्निवर्तिताः ।

ननु यत्र विशेषशास्त्रमस्ति तत्रास्तु तन्निवृत्तिर्दृष्टविरोधभावे तु शास्त्राविरोधे कथं महात्मवचनमात्रेण तन्निवृत्तिरस्त्वित्यत आह समयो-ऽपि शिष्टानां श्रुतिस्मृतिवत्प्रमाणं तदाहापस्तम्बः “धर्मज्ञसमयः प्रमाणं वेदाश्चेति” ।

ननु महात्मनां समयेऽपि कथं प्रामाण्यं न तावच्छ्रुतिवत्स्वतः, तस्य

लौकिकत्वात् । नापि स्मृतिवच्छ्रुतिमूलतया । प्रत्यक्षश्रुतिविरोधेन तदनुमानासम्भवात् । नापि स्मृतिमूलकतया । प्रत्यक्षस्मृतिविरोधात् । अत एव नानुमितस्मृतिमूलकतयापि । नाप्य"स्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न त्वि"त्यादिप्रत्यक्षस्मृतिरेवात्र मूलमिति वाच्यम् । श्रुतिस्मृतिविरोधेनाप्रमाणस्याचारस्य तद्बाधकत्वायोगात् । एवं च सति श्रुतिस्मृतिविहितस्य धर्मस्य लोकविरोधे नाननुष्ठानं विवक्षुमनेनोच्यत इति नास्यापि तन्मूलत्वसम्भवः । किं च त्रैविद्यानां वैदिककर्मविद्वेषासम्भवात्तद्बाह्यानां तु वैदिककर्ममात्रविद्वेषादेतावन्मात्रेण धर्मविशेषपरिगणनमपि न सम्भवति । वस्तुतस्तु अस्वर्ग्यं नाम दृष्टफलकं धर्ममपि मधुपर्कीयगवालम्भनादि लोकविद्विष्टं नाचरेदित्यर्थपरत्वात्तस्य सचदीक्षावादावदृष्टफलककर्मनिषेधकत्वं दुरध्यवसानमिति ।

अत्रोच्यते । यदेवानूचानः किं च नाभ्यूहत्यात्रै तद्ब्रवतीति श्रुतेः ।

धर्मशास्त्ररथारूढा वेदखड्गधरा द्विजाः ।

क्रीडार्थमपि यद्ब्रूयुः स धर्मः परमः स्मृतः ॥

इतिस्मृतेश्चास्य प्रामाण्ये मूलत्वम् । विशेषतस्तु आत्मनारदीयाद्युक्तनिषेधा एवास्य प्रायशो मूलमन्यत्रापि तत्तत्स्मृतिषु निषेधवाक्यानामेव मूलत्वमवगन्तव्यमित्यलं बहुना ।

ज्येष्ठांशं भ्रातृणां विभागे "ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वर"मित्याद्युक्तम् । मधु क्षौद्रम् ॥

मधुना रहिते श्राद्धे निराशाः पितरो गताः ।

इत्यादिना विहितम् । अग्निहोत्रादिकं च व्याख्यातमेव प्राक् । तथा शपथाः दिव्यानि प्रमाणानि । शकुनाः काककपोतादिचेष्टाविशेषाः । सामुद्रिकं करचरणादिवर्तिरेखापरीक्षादिकम् । उपश्रुतिश्चैत्यचत्वरादिदेवपार्श्वे स्थित्वा चिन्तितार्थसूचकशब्दाकर्णनम् । उपयाचितं ममास्मिन्नर्थे सिद्धे गणपतये मोदकान् दास्यामीत्यादिसङ्कल्पः । आदेश आशीर्वादः । ज्योतिःशास्त्रबलेन भविष्यादिकथनं वा । एतेषां कलौ क्वाचित्कः

संवादस्तेन तावन्मात्रावष्टम्भेन निःशङ्कप्रवृत्तिर्न कार्येति। युगमिति देश-स्याप्युपलक्षणं तेन तद्देशाचारोऽपि न निन्द्यः। यथाह बौधायनः।

पञ्चधा विप्रतिपत्तिर्दक्षिणतस्तथोत्तरतो यानि दक्षिणतस्तान्यनु-व्याख्यास्यामो यथैतदनुपेतेन सह भोजनं स्त्रिया सह भोजनं पर्युषितभो-जनं मातुलपितृष्वसृदुहितृगमनमित्यथोत्तरत ऊर्णाविक्रयः सीधुपानमुभ-यतोदद्भिर्व्यवहार आयुधीयकं समुद्रयानमिति तत्रेतरदितरस्मिन् कुर्वन् दुष्यतीतरदितरस्मिन् तत्र तत्र देशप्रामाण्यमेवस्यान्मिथ्यैतदिति गौतम उभयमेव नाद्रियेत शिष्टस्मृतिविरोधदर्शनादिति। बृहस्पतिः।

उद्बाह्यते दाक्षिणात्यैर्मातुलस्य सुता द्विजैः।
मत्स्यादाश्च नराः पूर्वे व्यभिचाररताः स्त्रियः॥
उत्तरे मद्यपाश्चैव स्पृश्या नृणां रजस्वलाः।
खशाताश्चापि गृह्णन्ति भ्रातृभार्याममर्तृकाम्॥
अनेन कर्मणा नैते प्रायश्चित्तदमार्हकाः।
विहिताकरणाच्चित्यं प्रतिषिद्धनिषेवणात्॥
भक्ताच्छाद्यप्रदायैषां रोषं गृह्णीतया। *
सर्वदेशेष्वनाचारो ख्याताम्लवर्णमिति॥

ननु तत्तद्धर्माणां युगानुरूपत्वादनिन्द्यत्वमस्तु अधर्मेषु तु कथमि-त्यत आह।

युगे युगे तु सामर्थ्यं शेषं मुनिविभाषितम्।
पराशरेण चाप्युक्तं प्रायश्चित्तं विधीयते॥ ३४॥

युगे युगे कृतादियुगेषु पराशरेण चकारान्मनुगौतमशङ्खलिखितैश्च यदुक्तं प्रायश्चित्तं तथा विधीयते।

यद्यपि कृते तु मानवा धर्मा इत्यनेनैवेदं सिद्धं प्रायश्चित्ताना-मपि धर्मत्वात्, तथापि मन्वाद्यनुक्तानां स्मृत्यन्तरादुपादानविधानाय पुनरनूद्यते तदेवाह शेषं, मन्वादिभिः कृतादिषूक्तप्रायश्चित्तादवशिष्टमा-काङ्क्षितं च यत्प्रायश्चित्तं तदन्यमुनिभिर्याज्ञवल्क्यादिभिर्विभाषितमेव विधीयते कुत एवमुच्यत इत्यत आह सामर्थ्यं यत इदं सम्यगर्थप्रा-

* असङ्गतमिदम्।

न्तम् । अयमर्थः येषु निमित्तेषु पराशरादिभिः प्रायश्चित्तं नोक्तं तत्र नैमित्तिकावश्यम्भावेन स्मृत्यन्तरोक्तं ग्राह्यं न्यायसिद्धत्वादस्याप्येवम् । इदमेव अभिप्रेत्य सुव्रतोऽपि कृतत्पराशरीये "पराशरस्य धर्माहे" इत्यादिना सर्वं स्वसंहितामतिपाद्यमनुक्रम्याऽन्ते ।

वसिष्ठं च तत्परं ध्येयं सर्वमेतत्पराशरः ।

प्रोक्तवान् व्यासमुख्यानां शेषं मुनिविभावितम् ॥ इत्युपसञ्जहार ।

ननु पराशरेण स्वयाकारापि तस्यावचनात्कथमस्माभिस्तज्ज्ञेयमित्यत आह ।

अहमद्यैव तत्सर्वमनुस्मृत्य ब्रवीमि वः ।
चातुर्वर्ण्यसमाचारं शृण्वन्तु मुनिपुङ्गवाः ॥ १५ ॥

अहं पराशरोऽद्यैव तत्सर्वं प्रायश्चित्तं पूर्वकल्पीयपराशरोक्तधर्मशास्त्रं तन्मूलभूतं श्रुतिनिश्चयं चानुस्मृत्य भो ऋषिपुङ्गवा मुनिमुख्याश्चातुर्वर्ण्यसमाचारं चत्वारो वर्णाश्चातुर्वर्ण्यं तेन सम्यक् श्रुतिस्मृत्यविधेनाचर्यतेऽनुष्ठीयते इत्याचारः स्नानसंध्यादिस्तं च वो युष्मभ्यं ब्रवीमि यूयं च सावधानाः शृण्वन्तु अहरहर्नियमातोऽपि नामस्वं पुरुषं पशुमिति वचनकाराभावेऽपि समुच्चयसिद्धेः । एवं च प्रश्नोत्तरयोः समानविषयत्वं भवत्यन्यथोत्तरस्य न्यूनतापातात् । प्रायश्चित्तस्य पूर्वमुपादानं प्रबलत्वात् । अहमित्यनेनार्थसमर्थप्रवक्तारैक्याभिधानाद्वाक्यतात्पर्यभिन्नतयाऽनर्थशङ्का निरस्ता । अद्यैवेत्यनेन कालविलम्बसम्भवनयोद्वेगो निरस्तः । अनुस्मृत्येत्यनेनामूलत्वविपर्यस्तमूलत्वशङ्का चापाकृतेति । एवमुपोद्घातं समाप्य विवक्षितधर्मश्रवणाय पुनः सावधानता सम्बोधनेनापाद्यते ।

वक्ष्यमाणधर्मजातस्य सत्यमाहात्म्यमभिधातुं तद्वादो प्रशंसति ।

पराशरमतं पुण्यं पवित्रं पापनाशनम् ।
चिन्तितं ब्राह्मणार्थाय धर्मसंस्थापनाय च ॥ १६ ॥

पराशरमतं पराशरोक्तं धर्मशास्त्रं पाठतोऽर्थतश्च चिन्तितं सत्पुण्यं पुण्यजनकं पुनः पाठस्यैव प्रयोजनद्वयमिष्टप्रापणमनिष्टनिवर्तनं च विशे-

Digitized by Google

थपादुयेनाह । पवित्रं पापनाशनमिति, पवित्रं स्वर्गादिजनकं पापनाशनं नरकादिनिवर्त्तकम् । प्रयोजनस्यापि विशेषणद्वयेन प्रयोजनद्वयमाह ब्राह्मणार्थाय धर्मसंस्थापनाय चेति, ब्राह्मणस्यार्थः प्रयोजनं स्वधर्मानुष्ठानमिति यावत्तस्मै धर्मसंस्थापनं परेषामुपदेशेनानुष्ठापनं तस्मै च ।

तदुक्तं वृहत्पराशरेण ।

पाराशरमतं पुण्यं पवित्रं पापनाशनम् ।
चिन्तितं ब्राह्मणार्थाय धर्मसंस्थापनाय च ॥

इति । इत्याचारावतारः ।

इदानीं वक्ष्यमाणाचारस्य प्रयोजनवत्त्वायान्वयव्यतिरेकाभ्यां धर्मसाधनतामाह ।

चतुर्णामपि वर्णानां साचारो धर्मपालकः ।
आचारभ्रष्टदेहानां भवेद्धर्मः पराङ्मुखः ॥ ३७ ॥

चतुर्णामपि वर्णानां ब्राह्मणक्षत्रियवैश्यशूद्राणामाचारः श्रुतिस्मृत्युदितसाधुसेवितक्रियानुष्ठानम् ।

श्रुतिस्मृत्युदितो यश्च साधुभिर्यश्च सेवितः ।
तमाचारं निरीक्षेत धर्मकामो जितेन्द्रियः ॥

इति विष्णुस्मरणात् । धर्मस्य सुकृतपूर्वस्य पालकमनुत्पन्नस्योत्पादकमुत्पन्नस्य च संरक्षकम् । "आचारप्रभावो धर्म आचारो धर्मपालनमि"तिस्मरणात् । आचारात्पूर्वोक्ताद् भ्रष्टो ऽनुष्ठानाशक्तो देहो येषां तेषां धर्मः सुकृतं पराङ्मुख उत्पत्तिकारणसद्भावेऽप्यङ्गवैकल्येन नोत्पद्यत इत्यर्थः ।

तदाह वसिष्ठः ।

नैनं तपांसि न ब्रह्म नाग्निहोत्रं न दक्षिणाः ।
हीनाचारमितो भ्रष्टं तारयन्ति कथं च न ॥ इति ।

वृहत्पराशरोऽप्येतदेवाह ।

चतुर्णामपि वर्णानामाचारो धर्मपालनम् ।
आचारभ्रष्टदेहानां भवेद्धर्मः पराङ्मुखः ॥ इति ।

यत् प्रतिज्ञातं चातुर्वर्ण्यसमाचारं ब्रवीमीति तदेवाह ।

षट्कर्माभिरतो नित्यं देवतातिथिपूजकः ।
हुतशेषं तु भुञ्जानो ब्राह्मणो नावसीदति ॥ ३८ ॥

षट् च तानि कर्माणि षट्कर्माणि तानि च संध्यास्नानादीनि तेषामेव वक्ष्यमाणत्वात् । बृहत्पराशरेणापि । षट्कर्माभिरत इत्यत्र कर्माणि कानीत्यपेक्षायां "कर्मषट्कं प्रवक्ष्यामी"ति प्रतिज्ञाय ।

संध्या स्नानं जपश्चैव देवतानां च पूजनम् ।
वैश्वदेवं तथातिथ्यं षट्कर्माणि दिने दिने ॥

इत्याभिधानाच्च न त्वध्यापनादीनि ।

अध्यापनं अध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मनः ॥

इति मनूक्तानि । तेषामये विधानात् । चातुर्वर्ण्यसाधारण्याभावेन प्रतिज्ञाविरोधाच्च । प्रकृतानां तु भूम्ना साधारण्यात् । तेषु नित्यमभिरतस्तदनुष्ठाने निरतो देवता विष्ण्वादिरतिथिर्वक्ष्यमाणस्तयोर्नित्यं पूजको हुतशेषं वैश्वदेवावशिष्टं च भुञ्जानो ब्राह्मणश्चातुर्वर्ण्यश्चातुर्वर्ण्योपक्रमेण "वेदो वा प्रायदर्शनादिति"न्यायेन ब्राह्मणपदस्य चातुर्वर्ण्यपरत्वात् । नावसीदति न प्रत्यवायी स्यात् । नित्यानेकाह्निकाननुष्ठानकृतः प्रत्यवायस्त्वेतावन्मात्रानुष्ठानेऽपि न स्यादित्यर्थः । देवपूजादीनां षट्कर्मान्तर्गतत्वेऽपि पुनर्वचनं सायं संध्योत्तरकालमप्येषां पुनरनुष्ठानप्रतिपादनाय । तथा च शौनकः ।

प्रातर्मध्ये दिने सायं विष्णुपूजां समाचरेदिति ।

अप्रणोद्योऽतिथिः सायमपि वाग्भूतृणोदकैः । इति योगीश्वरोऽपि । आश्वलायनोऽपि, अथ सायं प्रातः सिद्धस्य हविष्यस्य जुहुयादिति । मनुरपि ।

सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितमिति ।

एतेन अहोरात्रकर्तव्यमनेनोक्तमाह्निकमात्रमस्त्वेतनेनेति न पौनरुक्त्याशङ्केति साधीयसीयं व्याख्या

दकर्मकाच्चेति प्राप्तिरपि बाध्यते । मातरं मातुर्वा संजानाति । उत्कण्ठापूर्वकं स्मरतीत्यर्थः । कर्मणः शेषत्वविवक्षायां षष्ठी ॥

भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः । १ । ३ । ४७ ॥

उपसम्भाषोपमन्त्रणे धातोर्वाच्ये । इतरे प्रयोगोपाधयः । शास्त्रे वदते । भासमानो ब्रवीतीत्यर्थः । शिष्यैः स्तूयमानो हि भाषते । तथा चोपर्युपरि शास्त्रार्थप्रतिभासात्सुष्ठूक्तिर्निर्वहति । तेजोभङ्गे तु न शक्नुयाद्वदितुमिति भावः । उपसम्भाषोपसान्त्वनम् । भृत्यानुपवदते । सान्त्वयतीत्यर्थः । ज्ञाने । शास्त्रे वदते । उक्तिविषयकज्ञानवानिति फलितोऽर्थः । यत्न उत्साहः । क्षेत्रे वदते । तद्विषयकमुत्साहमाविष्करोतीत्यर्थः । विमतौ । क्षेत्रे विवदन्ते । विमत्या हेतुभूतया नानाविधं भाषन्त इत्यर्थः । उपमन्त्रणमुपच्छन्दनम् । भार्यामुपवदते । स्वाभिलषिते प्रवर्तयितुं प्रार्थयते इत्यर्थः । एषु किम् । यत्किञ्चिद्वदति ॥

व्यक्तवाचां समुच्चारणे । १ । ३ । ४८ ॥

मनुष्यादीनां संभूयोच्चारणे वदेरात्मनेपदं स्यात् ॥ सम्प्रवदन्ते ब्राह्मणाः । नेह । सम्प्रवदन्ति खगाः ॥

अनोरकर्मकात् । १ । ३ । ४९ ॥

व्यक्तवाग्विषयादनुपूर्वादकर्मकाद्वदेरात्मनेपदं स्यात् ॥ अनुवदते कठः कलापस्य । अनुः सादृश्ये । तेन कलापस्येति तुल्यार्थयोगे शेषलक्षणा षष्ठी । अकर्मकात्किम् । व्यक्तमनुवदति । व्यक्तवाचां किम् । अनुवदति वीणा ॥

विभाषा विप्रलापे । १ । ३ । ५० ॥

Digitized by Google

विरुद्धोक्तिरूपे व्यक्तवाचां समुच्चारणे उक्तं वा स्यात् । विप्रवदन्ते । विप्रवदन्ति वा वैद्याः ॥

अवाद्ग्रः । १ । ३ । ५१ ॥

अवगिरते । गृणातिस्त्ववपूर्वो न प्रयुज्यत एवेति भाष्यम् ॥

समः प्रतिज्ञाने । १ । ३ । ५२ ॥

शब्दं नित्यं सङ्गिरते । प्रतिजानीत इत्यर्थः । प्रतिज्ञाने किम् । सङ्गिरति ग्रासम् ॥

उदश्चरः सकर्मकात् । १ । ३ । ५३ ॥

धर्ममुच्चरते । उल्लंघ्य गच्छतीत्यर्थः । सकर्मकात्किम् । बाष्प उच्चरति । उपरिष्टाद्गच्छतीत्यर्थः ॥

समस्तृतीयायुक्तात् । १ । ३ । ५४ ॥

रथेन सञ्चरते । तृतीयेति किम् । उभौ लोकौ सञ्चरसि इममञ्चामुञ्च देवल ॥

दाणश्च सा चेच्चतुर्थ्यर्थे । १ । ३ । ५५ ॥

सम्पूर्वाद्दाणस्तृतीयान्तेन युक्तादुक्तं स्यात्तृतीया चेच्चतुर्थ्यर्थे ॥ अशिष्टव्यवहारे इति वक्तव्यम् ॥ * ॥ दास्या संयच्छते । धर्मे तु भार्यायै संयच्छति । पूर्वसूत्रे सम इति षष्ठी । तेन सूत्रद्वयमिदं व्यवहितेऽपि प्रवर्तते । रथेन समुदाचरते । दास्या समप्रयच्छते ॥

उपाद्यमः स्वकरणे । १ । ३ । ५६ ॥

स्वकरणं स्वीकारः ॥ भार्यामुपयच्छते ।

ज्ञाश्रुस्मृदृशां सनः । १ । ३ । ५७ ॥

सन्नन्तानामेषां प्राग्वत् ॥ धर्मं जिज्ञासते । शुश्रूषते । सुस्मूर्षते । दिदृक्षते ॥

नानोर्ज्ञः ।१।३।५८॥

पुत्रमनुजिज्ञासति । पूर्वसूत्रस्यैवायं निषेधः । अनन्तरस्येति न्यायात् । तेनेह न । सर्पिषोऽनुजिज्ञासते । सर्पिषा प्रवर्तितुमिच्छतीत्यर्थः । पूर्ववत्सन इति तङ् । अकर्मकाच्चेति केवलाद्विधानात् ।

प्रत्याङ्भ्यां श्रुवः ।१।३।५९॥

आभ्यां सन्नन्ताच्छ्रुव उक्तं न स्यात् ॥ प्रतिशुश्रूषति । आशुश्रूषति । कर्मप्रवचनीयात्स्यादेव । देवदत्तं प्रति शुश्रूषते ॥

शदेः शितः ।१।३।६०॥

शितः प्रकृतिभूतो यः शदिस्तस्मादात्मनेपदं स्यात् ॥ शद्लृ शातने इति पठ्यते । विशीर्णतायामयम् । शातनन्तु विषयतया निर्दिश्यते । ज्वलादावस्य पाठो णार्थः । तुदादौ पुनः पाठः स्वरार्थ एव । शबनुदात्तः । शस्तूदात्तः । न तु सदिवन्नुम्विकल्पार्थोऽपि । शदेः शित इत्यात्मनेपदोक्तेरस्माच्छपभावात् । शीयते । शितः किम् । शत्स्यति ॥

म्रियतेर्लुङ्लिङोश्च ।१।३।६१॥

लुङ्लिङोः शितश्च प्रकृतिभूतान्मृङस्तङ् नान्यत्र ॥ अमृत । मृषीष्ट । म्रियते । म्रियेत । नियमः किम् । ममार । ङित्त्वं तु स्वरार्थम् । मा हि मृत । लुङि तास्यनुदात्तेदिति ङिल्लक्षणः सार्वधातुकनिघातः । हि चेति तिङ्निघातो न ॥

पूर्ववत्सनः ।१।३।६२॥

सनः पूर्वो यो धातुस्तेन तुल्यं सन्नन्तादप्यात्मनेपदं स्यात् ॥ येन निमित्तेन पूर्वप्रकृतेरात्मनेपदं विधीयते तदेव निमित्तं सना व्यवहितं सदप्यात्मनेपदं प्रवर्तयतीत्यर्थः । एदिधिषते । शिशयि-

षते । निविविक्षते । बुभुक्षते इत्यादि । शिशत्सति । मुमूर्षतीत्यत्र तु न । न ह्येषा शदिम्रियतिव्यक्तिः शितः प्रकृतिः । सनो नात्मनेपदनिमित्तम् । कृते हि सनि सन्नन्तमेव शितः प्रकृतिः । शिशयिषते इत्यादौ तु प्रकृतौ ङित्त्वानपायान्निमित्तातिदेशः सम्भवत्येवेति वैषम्यात् । नन्वेवमनुचिकीर्षतीत्यत्रातिप्रसङ्गः । गन्धनादेरर्थस्य ङित्त्वस्य चात्मनेपदनिमित्तस्यातिदेशापत्तेरिति चेन्न । अनुपराभ्यां कृञ इति वचनपर्यालोचनया अनुपूर्वकत्वाभावविशिष्टस्यैवात्मनेपदनिमित्ततायाः अध्यवसायात् । अस्तु वा प्राधान्यात्कार्यस्यैवातिदेशः । प्राक् सनो येभ्य आत्मनेपदं दृष्टं तेभ्यः सन्नन्तेभ्योऽपि भवतीति । न चैवं शिशत्सति मुमूर्षतीत्यत्रातिप्रसङ्गः । शदेरित्यादिसूत्रद्वये सनो नेत्यनुवर्त्य वाक्यभेदेन व्याख्यानात् । अस्मिन्नपि जुगुप्सते इत्यादौ यथाऽऽत्मनेपदं तथा गुप्तिजित्यत्र वक्ष्यामः । पूर्ववत्किम् । बुभूषति ॥

आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य । १ । ३ । ६३ ॥

आम्प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिः । आम्प्रकृत्या तुल्यमनुप्रयुज्यमानात्कृञोऽप्यात्मनेपदं स्यात् । एधाञ्चक्रे । ञित्त्वादेव सिद्धे अकर्त्रभिप्रायार्थमिदम् । इह पूर्ववदित्यनुवर्त्य वाक्यभेदेन व्याख्येयम् । पूर्ववदेवात्मनेपदं न तु तद्विपरीतमिति । तेन कर्तृगेऽपि क्रियाफले ईहाञ्चकारेत्यादौ नात्मनेपदम् । कृञः किम् । एधामास । एधाम्बभूव । इह कृञ्ग्रहणसामर्थ्यान्न प्रत्याहारग्रहणम् ॥

प्रोपाभ्यां युजेरयज्ञपात्रेषु । १ । ३ । ६४ ॥

प्रयुङ्क्ते । उपयुङ्क्ते ॥ स्वराद्यन्तोपसर्गादिति वक्तव्यम् ॥ * ॥ उद्युङ्क्ते । नियुङ्क्ते । अयज्ञपात्रेषु किम् । द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति ॥

समः क्ष्णुवः । १ । ३ । ६५ ॥

संक्ष्णुते शस्त्रम् ॥

भुजो ऽनवने । १ । ३ । ६६ ॥

ओदनं भुङ्क्ते । अभ्यवहरतीत्यर्थः । बुभुजे पृथिवीपालः पृथिवीमेव केवलाम् । वृद्धो जनो दुःखशतानि भुङ्क्ते । इहोपभोगो भुजेरर्थः । अनवने किम् । महीं भुनक्ति । संसर्गवद्विप्रयोगस्यापि विशेषावगतिहेतुत्वान्नेह । विभुजति पाणिम् । भुजो कौटिल्ये इति तुदादिः ॥

णेरणौ यत्कर्म णौ चेत्स कर्ता ऽनाध्याने । १ । ३ । ६७ ॥

ण्यन्तादात्मनेपदं स्यादणौ या क्रिया सैव चेण्ण्यन्तेनोच्येत अणौ यत्कर्मकारकं स चेण्णौ कर्ता स्यान्नत्वाध्याने ॥ णिचश्चेति सिद्धे ऽकर्त्रभिप्रायार्थमिदम् । कर्त्रभिप्राये तु विभाषोपपदेनेति विकल्पे ऽणावकर्मकादिति परस्मैपदे च परत्वात्प्राप्ते पूर्वविप्रतिषेधेनेदमेवेष्यते । कर्तृस्थभावकाः कर्तृस्थक्रियाश्चोदाहरणम् । तथाहि । निवृत्तप्रेषणपक्षमाह । पश्यन्ति भवं भक्ताः । चाक्षुषज्ञानविषयं कुर्वन्तीत्यर्थः । प्रेरणांशत्यागे पश्यति भवः । विषयो भवतीत्यर्थः । ततो हेतुमण्णिच् । दर्शयन्ति भवं भक्ताः । पश्यन्तीत्यर्थः । पुनर्ण्यर्थस्याविवक्षायां दर्शयते भवः । इह प्रथमतृतीययोरवस्थयोर्द्वितीयचतुर्थ्योश्च तुल्यो ऽर्थः । तत्र तृतीयकक्ष्यायां न तङ् । क्रियासाम्ये ऽप्यणौ कर्मकारकस्य णौ कर्तृत्वाभावात् । चतुर्थ्यान्तु तङ् । द्वितीयामादाय क्रियासाम्यात् । प्रथमायां कर्मणो भवस्येह कर्तृत्वाच्च । एवमारोहयते हस्तीत्यप्युदाहरणम् । आरोहन्ति हस्तिनं हस्तिपकाः । न्यग्भावयन्तीत्यर्थः । तत आरोहति हस्ती । न्यग्भवतीत्यर्थः । ततो

णिच् । आरोहयन्ति । आरोहन्तीत्यर्थः । तत आरोहयते । न्यग्भवतीत्यर्थः । अध्यारोपितप्रेषणपक्षमाह । यद्वा वश्यन्त्यारोहन्तीति प्रथमकक्ष्या प्राग्वत् । ततः कर्मण एव हेतुत्वारोपाण्णिच् । दर्शयति भवः । आरोहयति हस्ती । पश्यत आरोहतश्च प्रेरयतीत्यर्थः । ततो णिज्भ्यां तत्प्रकृतिभ्यां च उपात्तयोर्द्वयोरपि प्रेषणयोस्त्यागे दर्शयते आरोहयते इत्युदाहरणम् । अर्थः प्राग्वत् । अस्मिन्पक्षे द्वितीयकक्ष्यायां न तङ् । समानक्रियत्वाभावात् । णिजर्थस्याधिक्यात् । अनाध्याने किम् । स्मरति वनगुल्मं कोकिलः । स्मरयति वनगुल्मः । उत्कण्ठापूर्वकस्मृतौ विषयो भवतीत्यर्थः ॥

भीस्म्योर्हेतुभये । १ । ३ । ६८ ॥

ण्यन्ताभ्यामाभ्यामात्मनेपदं स्याद्धेतोश्चेद्भयस्मयौ ॥ सूत्रे भयग्रहणं धात्वर्थोपलक्षणम् । मुण्डो भीषयते । भियो हेतुभये षुक् । बिभेतेर्हेतुभये इत्यात्वपक्षे भापयते । अत्र षुङ् न । तद्विधावीकारप्रश्लेषात् । जटिलो विस्मापयते । नित्यं स्मयतेरित्यात्वम् । हेतोश्चेद्भयस्मयावित्युक्तेनेह । कुञ्चिकयेनं भाययति । रूपेण विस्माययति ॥

गृधिवञ्च्योः प्रलम्भने । १ । ३ । ६९ ॥

प्रतारणेऽर्थे ण्यन्ताभ्यामाभ्यां प्राग्वत् ॥ माणवकं गर्धयते । वञ्चयते वा । प्रलम्भने किम् । श्वानं गर्धयति । अभिकाङ्क्षामस्योत्पादयतीत्यर्थः । अहिं वञ्चयति । वर्जयतीत्यर्थः ॥

लियः सम्माननशालीनीकरणयोश्च । १ । ३ । ७० ॥

लीङ्लियोर्ण्यन्तयोरात्मनेपदं स्यादकर्तृगेऽपि फले पूजाभिभवयोः प्रलम्भने चार्थे ॥ जटाभिर्लापयते । पूजामधिगच्छतीत्यर्थः । श्येनो वर्तिकामुल्लापयते । अभिभवतीत्यर्थः । बालमुल्लापयते । वञ्चयते इ-

त्यर्थः । विभाषालीयतेरित्यात्वं व्यवस्थितविभाषात्वेनाच नित्यमन्यच विकल्पेन । सम्माननादिष्विति किम् । बालकमुल्लापयति । आह्वयतीत्यर्थः ॥

मिथ्योपपदात्कृञो ऽभ्यासे । १ । ३ । ७१ ।

णेरित्येव । पदं मिथ्या कारयते । स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थः । मिथ्योपपदात्किम् । पदं सुष्ठु कारयति । अभ्यासे किम् । सकृत्पदं मिथ्या कारयति ॥

स्वरितञितः कर्त्रभिप्राये क्रियाफले । १ । ३ । ७२ ।

स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले ॥ यजते । पचते । सुनुते । कुरुते । कर्त्रभिप्राये किम् । यजन्ति याजकाः । सुन्वन्ति । पचन्ति पाचकाः । कुर्वन्ति कर्मकराः ॥

अपाद्वदः । १ । ३ । ७३ ॥

न्यायमपवदते । कर्त्रभिप्राय इत्येव । अपवदति ॥

णिचश्च । १ । ३ । ७४ ॥

णिजन्तादात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले ॥ कारयते ॥

समुदाङ्भ्यो यमो ऽग्रन्थे । १ । ३ । ७५ ॥

अग्रन्थे इति च्छेदः । व्रीहीन्संयच्छते । भारमुद्यच्छते । वस्त्रमायच्छते । अग्रन्थे किम् । उद्यच्छति वेदम् । अधिगन्तुमुद्यमं करोतीत्यर्थः । कर्त्रभिप्राये इत्येव ॥

अनुपसर्गाज्ज्ञः । १ । ३ । ७६ ॥

कर्त्रभिप्राये इत्येव ॥ गां जानीते । अनुपसर्गात्किम् । स्वर्गं लोकं न प्रजानाति । कथं तर्हि भट्टिः । इत्थं नृपः पूर्वमवालुलोचे ततो ऽनुजज्ञे गमनं सुतस्येति । कर्मणि लिट् । नृपेणेति विपरिणामः ॥

विभाषोपपदेन प्रतीयमाने । १ । ३ । ७७ ॥

स्वरितञित इत्यादि पञ्चसूत्र्या यदात्मनेपदं विहितं तत्समीपोच्चारितेन पदेन क्रियाफलस्य कर्तृगामित्वे द्योतिते तत्सूत्राणामप्रयोगादप्राप्तं वा स्यात् ॥ स्वं यज्ञं यजति । यजते वा । स्वं कटं करोति । कुरुते वा । स्वं पुत्रमपवदति । अपवदते वा । स्वं यज्ञं कारयति । कारयते वा । स्वं व्रीहिं संयच्छति । संयच्छते वा । स्वां गां जानाति । जानीते वा ॥

शेषात्कर्तरि परस्मैपदम् । १ । ३ । ७८ ॥

आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात् ॥ याति । वाति ॥

अनुपराभ्यां कृञः । १ । ३ । ७९ ॥

कर्तृगेऽपि फले गन्धनादौ च परस्मैपदार्थमिदम् ॥ अनुकरोति । पराकरोति । कर्तरीत्येव । भावकर्मणोर्माभूत् । न चैवमपि कर्मकर्तरि प्रसङ्गः । कार्यातिदेशपक्षस्य मुख्यतया तत्र कर्मवत्कर्मणेत्यात्मनेपदेन परत्वादस्य बाधात् । शास्त्रातिदेशपक्षे तु कर्तरि कर्मेत्यातः शेषादित्यतश्च कर्तृग्रहणद्वयमनुवर्त्य कर्तैव यः कर्ता न तु कर्मकर्ता तत्रेति व्याख्येयम् ॥

अभिप्रत्यतिभ्यः क्षिपः । १ । ३ । ८० ॥

क्षिप प्रेरणे । स्वरितेत् । अभिक्षिपति ॥

प्राद्वहः । १ । ३ । ८१ ॥

वह प्रापणे । स्वरितेत् । प्रवहति ॥

परेर्मृषः । १ । ३ । ८२ ॥

मृष तितिक्षायाम् । स्वरितेत् । परिमृष्यति । भ्वादिकस्य परिमर्षति । इह परेरिति योगं विभज्य वहेरपीति केचित् ॥

Digitized by Google

व्याङ्परिभ्यो रमः । १ । ३ । ८३ ॥

विरमति ॥

उपाच्च । १ । ३ । ८४ ॥

यज्ञदत्तमुपरमति । उपरमयतीत्यर्थः । अन्तर्भावितण्यर्थो-ऽयम् ॥

विभाषा ऽकर्मकात् । १ । ३ । ८५ ॥

उपाद्रमेरकर्मकात्परस्मैपदं वा ॥ उपरमति । उपरमते वा । निवर्तते इत्यर्थः ॥

बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः । १ । ३ । ८६ ॥

एभ्यो णयन्तेभ्यः परस्मैपदं स्यात् ॥ णिचश्चेत्यस्यापवादः । बोधयति पद्मम् । योधयति काष्ठानि । नाशयति दुःखम् । जनयति सुखम् । अध्यापयति । प्रावयति । प्रापयतीत्यर्थः । द्रावयति । विलापयतीत्यर्थः । स्रावयति । स्यन्दयतीत्यर्थः ॥

निगरणचलनार्थेभ्यश्च । १ । ३ । ८७ ॥

निगारयति । आशयति । भोजयति । चलयति । कम्पयति ॥ अदेः प्रतिषेधः ॥ * ॥ गतिबुद्धीति सूत्रे भाष्ये उक्तमेतत् । आदयते देवदत्तेन । गतिबुद्धीति कर्मत्वमादिखाद्योर्नेति प्रतिषिद्धम् । निगरणचलनेति सूत्रेण प्राप्तस्यैवायं प्रतिषेधः । शेषादित्यकर्त्रभिप्राये परस्मैपदं स्यादेव । आदयत्यन्नं बटुना ॥

अणावकर्मकाच्चित्तवत्कर्तृकात् । १ । ३ । ८८ ॥

ण्यन्तात् परस्मैपदं स्यात् ॥ शेते कृष्णः । तं गोपी शाययति ।

न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः । १ । ३ । ८९ ॥

एभ्यो ण्यन्तेभ्यः परस्मैपदं न ॥ पिबतिर्निगरणार्थः । इतरे चित्तवत्कर्तृकाकर्मकाः । नृतिश्चलनार्थोऽपि । तेन सूत्रद्वयेन प्राप्तिः । पाययते । दमयते । आयामयते । आयासयते । परिमोहयते । रोचयते । नर्तयते । वादयते । वासयते ॥ धेट उपसंख्यानम् ॥ * ॥ धापयेते शिशुमेकं समीची । अकर्त्रभिप्राये शेषादिति परस्मैपदं स्यादेव । वत्सान्पाययति पयः । दमयन्ती कमनीयतामदम् । भिक्षा वासयति ॥

वा क्यषः । १ । ३ । ९० ॥

लोहितायति । लोहितायते ॥

द्युद्भ्यो लुङि । १ । ३ । ९१ ॥

अद्युतत् । अद्योतिष्ट ॥

वृद्भ्यः स्यसनोः । १ । ३ । ९२ ॥

वर्त्स्यति । वर्तिष्यते । विवृत्सति । विवर्तिषते ॥

लुटि च क्लृपः । १ । ३ । ९३ ॥

कल्प्तासि । कल्पितासे । कल्प्तासे । कल्प्स्यति । कल्पिष्यते । कल्प्स्यते । चिक्लृप्सति । चिकल्पिषते । चिक्लृप्सते ॥

इति श्रीव्याकरणदीपिकायां वृत्तौ प्रथमस्याध्यायस्य
तृतीयः पादः ॥

Digitized by Google

अथ प्रथमाध्यायस्य चतुर्थः पादः ।

आकडारादेका संज्ञा ।१।४।१॥

इत ऊर्ध्वं कडाराः कर्मधारय इत्यतः प्रागेकस्यैकैव संज्ञा ज्ञेया ॥ या परा ऽनवकाशा च । तत्र परस्या उदाहरणम् । धनुषा विध्यतीति । शराणामपायं प्रत्यवधिभूतस्यैव धनुषो व्यधनं प्रति साधकतमत्वमित्युभयप्रसङ्गे परत्वात्करणसंज्ञाऽपादानसंज्ञां बाधते । तथा कांस्यपात्र्यां भुङ्क्ते इत्यधिकरणसंज्ञा धनुर्विध्यतीति कर्तृसंज्ञा च । अनवकाशायास्तु दतः दतेति । पद्दन्निति दन्तस्य दत् । यस्माद्यचि भसंज्ञैव न पदसंज्ञा । अतोऽत्र जश्त्वं न ॥

विप्रतिषेधे परं कार्यम् । १ । ४ । २ ॥

तुल्यबलविरोधे परं कार्यं स्यात् ॥ अतो दीर्घो यञि सुपि चेत्यस्यावकाशो वृक्षाभ्याम् । बहुवचने झल्येदित्यस्य वृक्षेषु । इहोभयं प्राप्नोति । वृक्षेभ्यः । परं भवति विप्रतिषेधेन ॥

यू स्त्र्याख्यौ नदी ।१।४।३॥

ईदूदन्तौ नित्यस्त्रीलिंगौ नदीसंज्ञौ स्तः ॥ गौर्यै । वध्वै । यू किम् । मात्रे । स्वस्रे । स्त्र्याख्यौ किम् । वातप्रम्ये । हूह्वे । प्रधीशब्दस्य तु वृत्तिकारादीनां मते लक्ष्मीवद्रूपम् । पदान्तरं विनापि स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वमिति स्वीकारात् । लिंगांतरानभिधायकत्वं तदिति कैयटमते तु पुंवद्रूपम् । प्रकृष्टा धीरिति विग्रहे तु लक्ष्मीवत् । अमि शसि च प्रध्यं प्रध्य इति विशेषः । सुष्ठु धीर्यस्याः सुष्ठु ध्याय-

Digitized by Google

तीति वा विग्रहे वृत्तिकारमते सुधीः श्रीवत् । मतान्तरे तु पुंवत् । सुष्ठु धीरिति विग्रहे तु श्रीवदेव । ग्रामणीः पुंवत् । ग्रामनयनस्यो-त्सर्गतः पुंधर्मतया पदान्तरं विना स्त्रियामप्रवृत्तेः । एवं खलपवनादे-रपि पुंधर्मत्वमौत्सर्गिकं बोध्यम् ॥ प्रथमलिंगग्रहणं च ॥ * ॥ पूर्वं स्त्राख्यस्योपसर्जनत्वेऽपि नदीत्वं वक्तव्यमित्यर्थः । प्रयोजनं क्विप्-लुप्समासाः । कुमारीमिच्छन्कुमारीवाचरन् ब्राम्हणः कुमारी । तस्मै कुमार्यै ब्राम्हणाय । खरकुट्यै ब्राम्हणाय । लुम्मनुष्ये इति लुप् । समासे । अतिलक्ष्म्यै । बहुश्रेयस्यै ब्राम्हणाय ॥

नेयङुवङ्स्थानावस्त्री १ । ४ । ४ ॥

इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्तो न तु स्त्री ॥ हे श्रीः । हे भ्रूः । अस्त्रीति किम् । हे स्त्रि । कथं तर्हि ह्वा-पितः क्वापि हे सुभ्रु इति भट्टिः । प्रमाद एवायमिति बहवः ॥

वामि १ । ४ । ५ ॥

इयङुवङ्स्थानौ स्त्राख्यौ यू आमि वा नदीसंज्ञौ स्तो न तु स्त्री ॥ श्रीणाम् । श्रियाम् । भ्रूणाम् । भ्रुवाम् । अस्त्री किम् । स्त्रीणाम् ॥

ङिति ह्रस्वश्च १ । ४ । ६ ॥

इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ च इउवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे ॥ श्रियै । श्रिये । भ्रुवै । भ्रुवे । श्रियाः२ । श्रियः२ । भ्रुवाः२ । भ्रुवः२ । श्रियाम् । श्रियि । भ्रुवाम् । भ्रुवि । अस्त्री किम् । स्त्रियै । नित्यस्त्रीलिंगो किम् । अतिश्रिये । कटप्रुवे ब्राम्हणाय । ह्रस्वयोर्यथा । मत्यै । मतये । धेन्वै । धेनवे । स्त्रीलिंगो किम् । अग्नये । वायवे । ह्रस्वश्चाद्ये नित्यस्त्री-

Digitized by Google

लिंगाविति नियमो नाश्रीयते । तेन ह्रस्वयनिप्रभृतीनामुभयलिङ्गानां स्त्रियां वृत्तौ नदीत्वविकल्पो भवत्येव ॥

शेषो घ्यसखि १ । ४ । ७ ॥

अनदीसंज्ञौ ह्रस्वौ याविदुतौ तदन्तं सखिवर्जं घिसंज्ञं स्यात् ॥ हरये । भानवे । शेषः किम् । मत्यै । एकसंज्ञाधिकारात्सिद्धे शेषग्रहणं स्पष्टार्थम् । ह्रस्वौ किम् । वातप्रम्यै । इदुतौ किम् । मात्रे । असखि किम् । सख्या सख्ये । सख्युः२ । सख्यौ । इह तु समुदायस्य सखिरूपत्वाभावेनासखीति निषेधाप्रवृत्तेर्घिसंज्ञा । सुसखिना । सुसखये । ङसिङसोर्गुणे कृते कृतयणादेशत्वाभावात् ख्यत्यादित्युत्वं न । सुसखेः । सुसखौ । एवमतिशयितेन सख्या अतिसखिना । परमः सखा यस्य तेन परमसखिना । सखीमतिक्रान्तेनातिसखिनेत्यादि ॥

पतिः समास एव । १ । ४ । ८ ॥

पतिशब्दः समास एव घिसंज्ञः स्यात् ॥ भूपतये । नेह । पत्या । पत्ये । इह तु सुसखिन्यायेन स्यादेव । बहुपतिना । बहुच्प्रत्ययः ॥

षष्ठीयुक्तश्छन्दसि वा । १ । ४ । ९ ॥

षष्ठ्यन्तेन युक्तः पतिशब्दश्छन्दसि घिसंज्ञो वा स्यात् ॥ क्षेत्रस्य पतिना वयम् । इह वेति योगं विभज्य छन्दसीत्यनुवर्तते । तेन सर्वे विधयश्छन्दसि वैकल्पिकाः । बहुलं छन्दसीत्यादिरस्यैव प्रपञ्चः ॥

ह्रस्वं लघु । १ । ४ । १० ॥

ह्रस्वं लघुसंज्ञं स्यात् ॥ लघूपधगुणः । चेतति । न च ह्रस्वप्रदेशेष्वपि लघुसंज्ञयैव व्यवहारः सुकरः । दधिच्छत्रमित्यादौ ह्रस्वात्तादौ तद्धित इति षत्वासिद्धिप्रसङ्गात् । गुरुसंज्ञया तत्र लघु-

संज्ञाया बाधात् । अत एवाततक्षदित्यादौ सन्वद्भावो न भवति ॥

संयोगे गुरु । १ । ४ । ११ ॥

संयोगे परे ह्रस्वमक्षरं गुरुसंज्ञं स्यात् ॥ शिक्षा । भिक्षा । गुरोश्च हल इत्यकारप्रत्ययः ॥

दीर्घं च । १ । ४ । १२ ॥

दीर्घं गुरुसंज्ञं स्यात् ॥ ईहांचक्रे ॥

यस्मात्प्रत्ययविधिस्तदादि प्रत्यये ऽङ्गम् । १ । ४ । १३ ॥

यः प्रत्ययो यस्माद्विहितस्तदादिशब्दरूपं तस्मिन्प्रत्यये परे ऽङ्गसंज्ञं स्यात् ॥ रामेण । भवामि भविष्यामीत्यादौ विकरणवि-शिष्टास्याप्यङ्गसंज्ञार्थं तदादिग्रहणम् । तेनातो दीर्घो यञीति दीर्घः सिध्यति । न चारम्भसामर्थ्यम् । पय वय गतौ । आभ्यां यङ्लुकि पापामि । पापावः । पापामः । वावामि । वावावः । वावामः । इत्यादौ चरितार्थत्वात् । विधिरिति किम् । स्त्री इयती । प्रत्यये किम् । प्रत्ययविशिष्टस्य ततोऽप्यधिकस्य वा माभूत् ।

सुप्तिङन्तं पदम् । १ । ४ । १४ ॥

सुबन्तं तिङन्तं च पदसंज्ञं स्यात् ॥ ब्राह्मणा ऊचुः ॥

नः क्ये । १ । ४ । १५ ॥

क्यचि क्यङि च नान्तमेव पदसंज्ञं स्यात् नान्यत् ॥ नलो-पः । राजीयति । राजायते । नान्तमेवेति किम् । वाच्यति ॥

सिति च । १ । ४ । १६ ॥

सिति प्रत्यये परे पूर्वं पदसंज्ञं स्यात् ॥ भसंज्ञापवादः । भवतष्ठक्छसौ । भवदीयः । ऋतोरण् । छन्दसि घस् । ऋतुः प्राप्तो ऽस्य ऋत्वियः ॥

स्वादिष्वसर्वनामस्थाने । १ । ४ । १७ ॥

कप्प्रत्ययावधिषु स्वादिषु असर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात् ॥ राजभ्याम् । राजभिः । राजत्वम् । राजता । सर्वनामस्थाने तु । राजानौ । राजानः । भुवद्वद्भ्यो धारयद्वद्भ्य इति पदसंज्ञायामुपसंख्यानं कर्तव्यम् । तसौ मत्वर्थे इति भसंज्ञाया अपवादः ॥

यचि भम् । १ । ४ । १८ ॥

यकारादिष्वजादिषु च स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात् ॥ गार्ग्यः । राज्ञः ॥ नभोऽङ्गिरोमनुषां वत्युपसंख्यानम् ॥ * ॥ नभसा तुल्यं नभस्वत् । भत्वाद्रुत्वाभावः । अङ्गिरस्वदङ्गिरः । मनुष्वदग्ने । जनेरुसीति विहित उसिप्रत्यये मनेरपि बाहुलकात् । आदेशप्रत्यययोरिति षत्वम् ॥ वृषन्वस्वश्वयोः ॥ * ॥ वृषन्वर्षकं वसु यस्य सः वृषण्वसुः । वृषा अश्वो यस्य स वृषणश्वः । इहान्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वे सति नलोपः प्राप्तो भत्वाद्वार्यते । अत एव पदान्तस्येति णत्वनिषेधोऽपि न । अल्लोपो न इति तु नानङ्गत्वात् । उपसंख्यानान्येतानि छन्दोविषयाणीति कैयटः ॥

तसौ मत्वर्थे । १ । ४ । १९ ॥

तान्तसान्तौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये परे ॥ विद्युत्वान् । यशस्वान् । यशस्वी । तसौ किम् । तक्षवान् ॥

अयस्मयादीनिच्छन्दसि । १ । ४ । २० ॥

एतानि छन्दसि साधूनि ॥ भपदसंज्ञाधिकाराद्यथायोगं संज्ञाद्वयं बोध्यम् । तथा च वार्तिकम् ॥ उभयसंज्ञान्यपीति वक्तव्यम् ॥ * ॥ अयस्मयं पात्रम् । भत्वाद्रुत्वं न । अयसो विकार

Digitized by Google

इत्यर्थे छुषश्छन्दसीति मयट् । एतेन मयड्वेतयोर्भाषायामित्युक्तेः कथमिह मयडित्यपास्तम् । स सुष्टुभा स ऋक्वता गणेन । पदत्वात्कुत्वं भत्वाज्जश्त्वाभावः । अयस्त्वविधानार्थाया: पदसंज्ञाया भत्वसामर्थ्येन बाधात् । नेनं हिन्वन्त्यपि वाजिनेषु । अत्र पदत्वाज्जश्त्वं भत्वात्कुत्वाभावः । वाचां इनाः प्रभवस्त्वित्यर्थः । छन्दसि किम् । अयोमयम् । आकृतिगणश्चायम् ॥

बहुषु बहुवचनम् । १ । ४ । २१ ॥

बहुत्वे एतत् स्यात् । वृक्षाः सन्ति ॥

द्व्येकयोर्द्विवचनैकवचने । १ । ४ । २२ ॥

द्वित्वैकत्वयोरेते स्तः ॥ वृक्षौ स्तः । वृक्षोऽस्ति ॥

कारके ॥ १ । ४ । २३ ॥

इत्यधिकृत्य ॥

ध्रुवमपाये ऽपादानम् । १ । ४ । २४ ॥

अपायो विश्लेषस्तस्मिन्साध्ये यद्ध्रुवमवधिभूतं कारकं तदपादानं स्यात् ॥ वृक्षात्पतति । ग्रामादायाति । धावतोऽश्वात्पतति । कारकं किम् । वृक्षस्य पर्णं पतति ॥ जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् ॥ * ॥ पापाज्जुगुप्सते । विरमति । धर्मात्प्रमाद्यति ॥

भीत्रार्थानां भयहेतुः । १ । ४ । २५ ॥

भयार्थानां त्राणार्थानां च प्रयोगे भयहेतुरपादानं स्यात् ॥ चोराद्बिभेति । चोरात्त्रायते । भयहेतुः किम् । अरण्ये बिभेति । त्रायते वा ॥

पराजेरसोढः । १ । ४ । २६ ॥

पराजेः प्रयोगे ऽसह्यो ऽर्थो ऽपादानं स्यात् ॥ अध्ययना-

संस्कृतपुस्तकानां सूचीपत्रम् ।

मूल्य

श्रीभाष्यस्य प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं॰श्रीराममिश्र-
शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः .. .. ६॥।)

श्रीभाष्यस्य प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा .. ८।)

श्रीभाष्यस्य तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा .. ४॥)

वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः .. .. ३॥।)

सेतुपूर्त्तः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं॰स्वामिश्रीराममिश्रशास्त्रि-
प्रणीतो निर्विशेषाद्वैतनिराकरणपरः .. .. १॥=)

सेतुपूर्त्तिसहितो वेदार्थसंग्रहः .. .. ३॥।)

शास्त्रदीपिका .. .. ८।)

संकर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-
न्द्रिकोपेतम्, पं॰स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् । १।)

काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजप॰दामोदर-
शास्त्रिणा संशोधिता पूर्वार्द्धरूपा .. .. ५॥।)

तथा उत्तरार्द्धम् .. .. ८॥।)

माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण
श्रीसायणाचार्येण विरचिता .. .. ७॥)

काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता ६॥)

श्रीतिङन्तार्णवतरणिः .. .. ६)

दिग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता .. .. ॥=)

जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता .. ५॥)

लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्याय-
मुक्तावल्याख्यया टीकया सहिता .. .. ॥।)

सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना
विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम् ॥।)

तत्त्वमुक्ताकलापः-सर्वार्थसिद्धियुतः, बोधायनीयार्थसिद्धान्तानुसारी विशिष्टाद्वै-
तब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्कि-
ककेसरिणा सर्वतन्त्रस्वतन्त्रधिषणेन श्रीवेङ्कटनाथदेशिकेन प्रणीतः ५॥=)

वेदान्तसिद्धान्तमुक्तावली, आर्यवीनिस्षाहकृताङ्गलभाषानुवादयुता .. १॥।)

काव्यप्रकाशस्य इङ्गलण्डीयभाषानुवादः .. .. २॥)

अथर्ववेदसंहिताया इङ्गलण्डीयभाषानुवादः .. .. १२)

आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्य-
काराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम् .. .. ॥।)

तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्विश्वकर्मविरचितया न्यायप्रदी-
पाख्यटीकया सहित .. .. १॥।)

Digitized by Google

CONTENTS.

Page.

VYÁKARAṆADÍPIKA by Orambhatta, edited by Pandit Ganapati Shastree, Scholar, Sanskrit College, Benares 193, 225, 257, 369. ... ...

NYÁYASIDDHÁNTAMANJARI by Bhattácháryachudámaṇi Jánakí Náth, with the commentary Nyáyamanjarísára by Yádavácharya, edited by Pandit Jíwa Náth Mishra, Professor, Sanskrit College, Benares ... 209, 273.

PARÁSHARA SMRITI with the Commentary Vidvanmanohará, by Pandit Vináyaka Dharmádhikári, edited by Pandit Nágeshwara Panta Dharmádhikári, Professor, Sanskrit College, Benares. ... 241, 353.

VÁLMIKÍYA-RÁMÁYAṆA with foot-notes, edited by Pandit Rasik Lal Bhattácharya M. A., Benares ... 289.

YAJUSHAJYOUTISHA, with Somákarasudhákara Bháshyas, edited by Mahamahopadhyaya Pandit Sudhákara Dvivedin, Professor, Sanskrit College Benares ... ... 305, 337.

SANKALPASÚRYODAYA with commentary, edited by R. Krishnamáchári, Madura ... ... 321.

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

Nos. 7, 8 and 9.] July, Aug. and Sept. 1907. [Vol. XXIX.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1907.

Copyright on each article reserved.
Price Rs. 9 per annum.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुररश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
विधिमीमांसा, अप्पयदीक्षितकृता पं॰ श्रीरामशास्त्रिणा संशोधिता	१।)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधित	।=)
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	७)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टैनाचार्येणाङ्गलदेशीयभाषायामनूदिता ..	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्येणाङ्गलदेशीयभाषायामनूदितम्	४)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
भागवतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	३।)
श्रौतपदार्थनिर्वचनम्	४)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या। श्रीकामकोल्लकशास्त्रि-संशोधिता	४)
काव्यप्रदीपः, पं॰ रामशास्त्रिभागवताचार्येण परिशोधितः	३॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
[illegible] सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	७)

Digitized by Google

त्पराजयते । ग्लायतीत्यर्थः । असोढः किम् । शत्रून्पराजयते । अभिभवतीत्यर्थः ॥

वारणार्थानामीप्सितः । १ । ४ । २७ ॥

वारणार्थानां प्रयोगे ईप्सितोऽर्थोऽपादानं स्यात् ॥ प्रवृत्तिविघातो वारणम् । यवेभ्यो गां वारयति । ईप्सितः किम् । यवेभ्यो गां वारयति क्षेत्रे ॥

अन्तर्द्धौ येनादर्शनमिच्छति । १ । ४ । २८ ॥

व्यवधाने सति यत्कर्तृकस्यात्मनो दर्शनस्याभावमिच्छति तदपादानं स्यात् ॥ मातुर्निलीयते कृष्णः । अन्तर्द्धौ किम् । चोरान्न दिदृक्षते । इच्छतिग्रहणं किम् । अदर्शनेच्छायां सत्यां सत्यपि दर्शने यथा स्यात् ॥

आख्यातोपयोगे । १ । ४ । २९ ॥

नियमपूर्वकविद्यास्वीकारे वक्ता प्राक्संज्ञः स्यात् ॥ उपाध्यायादधीते । उपयोगे किम् । नटस्य गाथां शृणोति ॥

जनिकर्तुः प्रकृतिः । १ । ४ । ३० ॥

जायमानस्य हेतुरपादानं स्यात् । ब्रह्मणः प्रजा जायन्ते ॥

भुवः प्रभवः । १ । ४ । ३१ ॥

भवनं भूः । भुवः कर्तुः प्रभवस्तथा ॥ हिमवतो गङ्गा प्रभवति । तत्र प्रकाशत इत्यर्थः ॥

कर्मणा यमभिप्रेति स सम्प्रदानम् । १ । ४ । ३२ ॥

दानस्य कर्मणा यमभिप्रेति स संप्रदानसंज्ञः स्यात् ॥ विप्राय गां ददाति ॥ क्रियया यमभिप्रैति सोऽपि सम्प्रदानम् ॥ * ॥

Digitized by Google

पत्ये शेते ॥ कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा ॥ * ॥ पशुना रुद्रं यजते । पशुं रुद्राय ददातीत्यर्थः ॥

रुच्यर्थानां प्रीयमाणः । १ । ४ । ३३ ॥

रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः सम्प्रदानं स्यात् ॥ हरये रोचते भक्तिः । अन्यकर्तृकोऽभिलाषो रुचिः । हरिनिष्ठप्रीतेर्भक्तिः कर्त्री । प्रीयमाणः किम् । देवदत्ताय रोचते मोदकः पथि ॥

श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः । १ । ४ । ३४ ॥

एषां प्रयोगे बोधयितुमिष्टः सम्प्रदानं स्यात् ॥ गोपी स्मरात्कृष्णाय श्लाघते । ह्नुते । तिष्ठते । शपते वा । ज्ञीप्स्यमानः किम् । देवदत्ताय श्लाघते पथि ॥

धारेरुत्तमर्णः । १ । ४ । ३५ ॥

धारयतेः प्रयोगे उत्तमर्ण उक्तसंज्ञः स्यात् ॥ भक्ताय धारयति मोक्षं हरिः । उत्तमर्णः किम् । देवदत्ताय शतं धारयति ग्रामे ॥

स्पृहेरीप्सितः । १ । ४ । ३६ ॥

स्पृहयतेः प्रयोगे इष्टः सम्प्रदानं स्यात् ॥ पुष्पेभ्यः स्पृहयति ईप्सितः किम् । पुष्पेभ्यो वने स्पृहयति । ईप्सितमात्रे इयं संज्ञा । प्रकर्षविवक्षायां तु परत्वात्कर्मसंज्ञा । पुष्पाणि स्पृहयति ॥

क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः । १ । ४ । ३७ ॥

क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः स उक्तसंज्ञः स्यात् ॥ हरये क्रुध्यति । द्रुह्यति । ईर्ष्यति । असूयति । यं प्रति कोपः किम् । भार्यामीर्ष्यति । मैनामन्योऽद्राक्षीदिति । क्रोधोऽमर्षः । द्रोहोऽपकारः । ईर्ष्याऽक्षमा । गुणेषु दोषारोपोऽसूया । द्रोहादयोऽपि कोप-

Digitized by Google

अभवा एव गृह्यन्ते ऽतो विशेषणं सामान्येन यं प्रति कोप इति ॥

क्रुधद्रुहोरुपसृष्टयोः कर्म । १ । ४ । ३८ ॥

सोपसर्गयोरनयोर्यं प्रति कोपस्तत्कारकं कर्मसंज्ञं स्यात् ॥ क्रूरमभिक्रुध्यति । अभिद्रुह्यति ॥

राधीक्ष्योर्यस्य विप्रश्नः । १ । ४ । ३९ ॥

एतयोः कारकं सम्प्रदानं स्यात् ॥ यदीयो विविधः प्रश्नः क्रियते । कृष्णाय राध्यति । ईक्षते वा । पृष्टो गर्गः शुभाशुभं पर्यालोचयतीत्यर्थः । शुभाशुभरूपकर्मणो धात्वर्थेऽन्तर्भावाज्जीवत्यादिवदकर्मकत्वम् । षष्ठ्यां प्राप्तायां वचनम् । अत एव राध्यतीति श्यन् । अकर्मकादेव तद्विधानात् । तथा च दिवाद्यन्तर्गणसूत्रम् । राधोऽकर्मकाद्वृद्धावेवेति । अस्यार्थः । एवकारो भिन्नक्रमः । राधोऽकर्मकादेव श्यन् । उदाहरणमाह । वृद्धाविति । अत एव कर्मवत्कर्मणेति सूत्रे राध्यत्योदनः स्वयमेवेति भाष्यं सङ्गच्छते । तत्र हि सिध्यतीत्यर्थः । एतेन "न दूये सात्वतीसूनुर्यन्मह्यमपराध्यति । क्रियासमभिहारेण विराध्यन्तं क्षमेत कः" इति माघप्रयोगो व्याख्यातो । तत्र हि अपराध्यतीत्यस्य द्रुह्यतीति विराध्यन्तमित्यस्य च द्रुह्यन्तमित्यर्थः । एतेनैतयोः कर्म कारकं सम्प्रदानं स्यादिति व्याचक्षाणाः परास्ताः । यस्येत्यनर्थकम् । यं प्रतीत्यनुवृत्त्यैवेष्टसिद्धेः ॥

प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता । १ । ४ । ४० ॥

आभ्यां परस्य शृणोतेर्योगे पूर्वस्य प्रवर्तनरूपव्यापारस्य कर्ता सम्प्रदानं स्यात् ॥ विप्राय गां प्रतिशृणोति । आशृणोति वा । विप्रेण मह्यं देहीति प्रवर्तितः प्रतिजानीत इत्यर्थः ॥

अनुप्रतिगृणश्च । १ । ४ । ४१ ॥

Digitized by Google

आभ्यां गृणातेः कारकं पूर्वव्यापारस्य कर्तृभूतमुक्तसंज्ञं स्यात् ॥ होत्रे ऽनुगृणाति । होता प्रथमं शंसति तमध्वर्युः प्रोत्साहयतीत्यर्थः ॥

साधकतमं करणम् । १ । ४ । ४२ ॥

क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात् ॥ काष्ठैः पचति । तमप्ग्रहणं किम् । गङ्गायां घोषः प्रतिवसति । यदा च तीरधर्मे आधारत्वं प्रवाहे उपचर्यते तदेदं प्रयोजनम् । यदा तु गङ्गाशब्द एव तीरे वर्तते तदा न प्रयोजनम् ॥

दिवः कर्म च । १ । ४ । ४३ ॥

दिवः साधकतमं कर्मसंज्ञं स्याच्चात्करणम् ॥ अक्षैरक्षान्वा दीव्यति ॥

परिक्रयणे सम्प्रदानमन्यतरस्याम् । १ । ४ । ४४ ॥

नियतकालं भृत्या स्वीकरणं परिक्रयणं तस्मिन्साधकतमं कारकं सम्प्रदानं स्याद्वा ॥ शतेन शताय वा परिक्रीतः ॥

आधारो ऽधिकरणम् । १ । ४ । ४५ ॥

कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञं स्यात् ॥ औपश्लेषिको वैषयिको ऽभिव्यापकश्चेत्याधारस्त्रिधा । कटे आस्ते । स्थाल्यां पचति । मोक्षे इच्छास्ति । सर्वस्मिन्नात्मास्ति ॥

अधिशीङ्स्थासां कर्म । १ । ४ । ४६ ॥

अधिपूर्वाणामेषामाधारः कर्म स्यात् ॥ अधिशेते । अधितिष्ठति । अध्यास्ते वा वैकुण्ठं हरिः ॥

अभिनिविशश्च । १ । ४ । ४७ ॥

अभिनीत्येतत्संघातपूर्वस्य विशतेराधारः कर्म स्यात् ॥ अभि-

निविशते सन्मार्गम्। परिक्रयणे सम्प्रदानमिति सूत्रादिह मण्डूकप्लु-
त्याऽन्यतरस्यां ग्रहणमनुवर्त्य व्यवस्थितविभाषाश्रयणात्क्वचिन्न।
पापे ऽभिनिवेशः॥

उपान्वध्याङ्वसः। १। ४। ४८॥

उपादिपूर्वस्य वसतेराधारः कर्म स्यात्॥ उपवसति। अनु-
वसति। अधिवसति। आवसति वा वैकुण्ठं हरिः। अभुक्त्यर्थस्य
न। ग्रामे उपवसति॥

कर्तुरीप्सिततमं कर्म। १। ४। ४९॥

कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्॥ हरिं
भजति। कर्तुः किम्। माषेष्वश्वं बध्नाति। कर्मण ईप्सिता माषा
न कर्तुः। तमब्ग्रहणं किम्। पयसा ओदनं भुङ्क्ते। कर्मेत्यनुवृत्तौ
पुनः कर्मग्रहणमाधारनिवृत्त्यर्थम्। अन्यथा गेहं प्रविशतीत्यत्रैव
स्यात्॥

तथायुक्तं चानीप्सितम्। १। ४। ५०॥

ईप्सिततमवत्क्रियायुक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात्॥
ग्रामं गच्छन् तृणं स्पृशति। विषं भुङ्क्ते॥

अकथितं च। १। ४। ५१॥

अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्॥

दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमन्थमुषाम्।

कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम्॥

दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्यु-
ज्यते तदेवाकथितं कर्मेति परिगणनं कर्तव्यमित्यर्थः। अन्यथा
नटस्य शृणोतीत्यादावतिप्रसङ्गः स्यादिति भावः। गां दोग्धि पयः।

बलिं याचते वसुधाम् । अविनीतं विनयं याचते । तण्डुलानोदनं पचति । गर्गान् शतं दण्डयति । व्रजमवरुणद्धि गाम् । माणवकं पन्थानं पृच्छति । वृक्षमवचिनोति फलानि । माणवकं धर्मं ब्रूते शास्ति वा । शतं जयति देवदत्तम् । सुधां क्षीरनिधिं मथ्नाति । देवदत्तं शतं मुष्णाति । ग्राममजां नयति हरति कर्षति वहति वा । अर्थनिबन्धनेयं संज्ञा । बलिं भिक्षते वसुधाम् । माणवकं धर्मं भाषते अभिधत्ते वक्तीत्यादि । कारकं किम् । माणवकस्य पितरं धर्मं पृच्छति । अथेदं विचार्यते । कर्मणि विधीयमाना लकृत्यक्तखलर्थाः किं द्विकर्मकेभ्यो मुख्ये कर्मणि स्युर्गौणे वेति । अत्राहुः ।

गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम् ।
बुद्धिप्रत्यवसानार्थशब्दकर्मसु चेच्छया ॥
प्रयोज्यकर्मण्यन्येषां ण्यन्तानामिह निश्चितः ।
लकृत्यक्तखलर्थानां प्रयोगो भाष्यपारगैरिति ॥

क्रमेणोदाहरणानि । गौर्दुह्यते पयः । दोह्या । दुग्धा । सुदोहा । अजा ग्रामं नीयते । नेया । नीता । सुनया । बोध्यते माणवकं धर्मः । माणवको धर्ममिति वा । देवदत्तो ग्रामं गम्यते । गमयितव्यः । गमितः । सुगम इति । नन्वकर्मकाणां प्राकृतकर्माभावात्कथं द्विकर्मकता । तथा च णिजन्तात्प्रयोज्ये प्रत्ययोऽस्तु । आस्यते माणवक इति मासमिति तु प्रयोगोऽसङ्गत इति चेन्न । अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यमिति वचनात् । अस्योदाहरणानि । कुरून् स्वपिति । मासमास्ते । गोदोहमास्ते । क्रोशमास्ते । एषामकर्मकाणां कालादिकर्मकाणां कर्मणि भावे च लकार इष्यते । मासो मासं वा आस्यते

देवदत्तेनेति। ननु भावे चाकर्मकेभ्य इति वचनान्मासादिकर्मकात्कथं भावे ल इति चेदुच्यते। अकर्मकेभ्य इत्यनेनान्तरङ्गं द्रव्यकर्म व्युदस्यते न तु बहिरङ्गं कालादिकर्म। कर्मणीत्यत्र तु व्याप्तिपक्षाश्रयणादन्तरङ्गाश्रयविधौ बहिरङ्गे कालादिकर्मण्यपि प्रवृत्तिरविरुद्धा। जातिव्यक्तिपक्षयोर्लक्ष्यानुरोधेन व्यवस्थेति सिद्धान्तात्॥

गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मका-
णामणि कर्ता स णौ। १। ४। ५२॥

गत्याद्यर्थानां शब्दकर्मकाणामकर्मकाणां चाणौ यः कर्ता स णौ कर्म स्यात्॥

शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत्।
आशयच्चामृतं देवान्वेदमध्यापयद्विधिम्॥
आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः।

गतीत्यादि किम्। पाचयत्योदनं देवदत्तेन। अण्यन्तानां किम्। गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः॥ नीवह्योर्न॥ * ॥ नाययति वाहयति वा भारं भृत्येन॥ नियन्तृकर्तृकस्य वहेरनिषेधः॥ * ॥ वाहयति रथं वाहान्सूतः॥ आदिखाद्योर्न॥ * ॥ आदयति खादयति वाऽन्नं बटुना॥ भक्षेरहिंसार्थस्य न॥ * ॥ भक्षयत्यन्नं बटुना। अहिंसार्थस्य किम्। भक्षयति बलीवर्दान्सस्यम्॥ जल्पतिप्रभृतीनामुपसंख्यानम्॥ * ॥ जल्पयति भाषयति पुत्रं देवदत्तः॥ दृशेश्च॥ * ॥ दर्शयति हरिं भक्तान्। सूत्रे ज्ञानसामान्यार्थानामेव ग्रहणं न तु तद्विशेषार्थानामित्यनेन ज्ञाप्यते। तेन स्मरति जिघ्रतीत्यादीनां न। स्मारयति घ्रापयति देवदत्तेन॥ शब्दायतेर्न॥ * ॥ शब्दाययति देवदत्तेन। धात्वर्थसंगृहीतकर्मत्वेना-

Digitized by Google

कर्मकत्वात्प्राप्तिः । येषां देशकालादिभिन्नं कर्म न सम्भवति तेऽका-
कर्मकाः । नत्वविवक्षितकर्माणोऽपि । तेन मासमासयति देवदत्त-
मित्यादौ कर्मत्वं भवति । देवदत्तेन पाचयतीत्यादौ तु न । गत्य-
र्थाकर्मकश्लिषेति सूत्रेऽप्येवम् । अत एवाविवक्षितकर्मकेभ्यः पचि-
ददातिप्रभृतिभ्यः कर्तरि क्तो न । अन्यथा पक्ववान् दत्तवानित्यर्थे
पक्वो दत्त इति स्यादिति दिक् ॥

हृक्रोरन्यतरस्याम् । १ । ४ । ५३ ॥

हृक्रोरणौ कर्ता णौ वा कर्म स्यात् ॥ हारयति कारयति वा
भृत्येन भृत्यं वा कटम् ॥ अभिवादिदृशोरात्मनेपदे वेति वाच्यम् ॥ * ॥
अभिवादयते दर्शयते वा देवं भक्तेन भक्तं वा ॥

स्वतन्त्रः कर्ता । १ । ४ । ५४ ॥

क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात् ॥ देवदत्तः
पचति । स्थाली पचति ॥

तत्प्रयोजको हेतुश्च । १ । ४ । ५५ ॥

कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च स्यात् ॥ संज्ञास-
मावेशार्थश्चकारः । कुर्वन्तं प्रेरयति कारयति हरिः । हेतुत्वात्त-
द्व्यापारे हेतुमति चेति णिच् । कर्तृत्वात्कर्तरि लकारः ॥

प्राग्रीश्वरान्निपाताः । १ । ४ । ५६ ॥

इत्यधिकृत्य ॥

चादयोऽसत्त्वे । १ । ४ । ५७ ॥

अद्रव्यार्थाश्चादयो निपातसंज्ञाः स्युः ॥ च । वा । ह ।
अह । एव । एवम् । नूनम् । शश्वत् । युगपत् । भूयस् । कूपत् ।
सूपत् । कुवित् । नेत् । चेत् । चण् । कच्चित् । यत्र । नह ।

हन्त । माकिः । माकीम् । नकिः । नकीम् । मा । माङ् । नञ् । यावत् । तावत् । त्वै । न्वै । श्रौषट् । वौषट् । स्वाहा । स्वधा । वषट् । तुम् । तथाहि । खलु । किल । अथ । सुष्ठु । स्म । आदह । उपसर्गविभक्तिस्वरप्रतिरूपकाश्च । अवदत्तम् । अहंयुः । अस्तिक्षीरा । अ । आ । इ । ई । उ । ऊ । ए । ऐ । ओ । औ । पशु । शुकम् । यथा । कथा । च । पाट् । प्याट् । अङ्ग । है । हे । भोः । अये । द्य । विषु । एकपदे । युत् । आतः । चादिराकृतिगणः ॥

प्रादयः । १ । ४ । ५८ ॥

अद्रव्यार्थाः प्रादयस्तथा । प्र । परा । अप । सम् । अनु । अव । निस् । निर् । दुस् । दुर् । वि । आङ् । नि । अधि । अपि । अति । सु । उत् । अभि । प्रति । परि । उप । एते प्रादयः ॥

उपसर्गाः क्रियायोगे । १ । ४ । ५९ ॥

गतिश्च । १ । ४ । ६० ॥

प्रादयः क्रियायोगे उपसर्गसंज्ञा गतिसंज्ञाश्च स्युः ॥ प्रणायकः । प्रकृत्य । उपसर्गसंज्ञया समावेशार्थश्चकारः । अन्यथा पर्यायः स्यात् । तेन प्रणेयमित्यादौ णत्वं कृदुत्तरपदप्रकृतिस्वरश्च सिध्यति । इह यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञाः । योगग्रहणसामर्थ्यात् । तेन प्रगतो नायकोऽस्मात्प्रनायको देश इत्यत्र प्रवृद्धं कृतं प्रकृतमित्यत्र च णत्वं गतिरनन्तर इति स्वरश्च न । नयत्यर्थकृदर्थविशेषकत्वे तु स्यादेव ॥

वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ॥

आपं चैव हलन्तानां यथा वाचा निशा दिशा ॥

वगाहः । अवगाहः । पिधानम् । अपिधानम् ॥ उपसर्गसं-

ज्ञायां मरुच्छब्दस्योपसंख्यानम् ॥ * ॥ मरुद्भिर्दत्तो मरुत्तः । उपसर्गसंज्ञाविधानसामर्थ्यादजन्तत्वाभावेऽप्यच उपसर्गात्त इति तत्वं प्रवर्तते इत्याहुः । एवं च मरुन्नयतीत्यत्र णत्वमपि प्राप्नोति तस्मात्तत्वे एव संज्ञा वक्तव्या । अत एव किविधिरङ् च न भवति । निपातसंज्ञा तु नास्त्येष्टा । तेन तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरे कृते मरुत्तशब्दो मध्योदात्तः । निपातत्वेत्वाद्युदात्तः स्यादिति दिक् । प्रकारान्तरेणापि तप्पर्वमरुद्भ्यामिति मत्वर्थीयान्तो मरुत्तशब्दः सिद्ध्यति ॥ श्रच्छब्दस्याङ्विधावुपसंख्यानम् ॥ * ॥ श्रद्धा । भिदादिपाठात्प्रश्राश्रद्धेति निपातनाद्वा सिद्धम् ॥ अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यम् ॥ * ॥ एतच्चान्तरपरिग्रहे इत्यत्र भाष्ये स्थितम् । अन्तर्द्धा । अन्तर्द्धिः । अन्तर्णयति । अन्तर्भवाणि ॥ सुदुरोः प्रतिषेधो नुम्विधितत्वषत्वणत्वेषु ॥ * ॥ सुलभम् । दुर्लभम् । उपसर्गात् खल्घञोरिति नुम्न । एतच्च प्रयोजनमापाततः । न सुदुर्भ्यां केवलाभ्यामिति सूत्रस्यावश्यारभ्यत्वात् । अन्यथा ऽतिसुलम्भमित्यत्र नुम्न स्यात् । तत्वे । सुदत्तम् । अच उपसर्गादिति तत्वं माभूत् । षत्वे । दुःस्थितिः । सुषिक्तम् । सुः पूजायामिति तु कर्तव्यमेव । पूजायामिति विशेषणार्थम् । तेन सुषिक्तं किं तवात्रेत्यादौ षत्वं भवत्येव । णत्वे । दुर्नीतम् । दुर्नयः ॥ गतिसंज्ञायां कारिकाशब्दस्योपसंख्यानम् ॥ * ॥ कारिका क्रिया । मर्यादा स्थितिरित्यर्थः । यत्न इत्यपरे । धात्वर्थनिर्देशे ण्वुल् । यस्तु कर्तरि ण्वुलन्तः कारिका दासीति यश्च श्लोकवाची तयोर्नेह ग्रहणम् । व्याख्यानात् । कारिकाकृत्य । यत्कारिका करोति । तिङि चोदात्तवतीति गतेर्निघातः । निपातत्वादव्ययत्वे सति विभक्तेर्लुक् ।

पुनश्चनसी छन्दसि गतिसंज्ञाविति वक्तव्यम् ॥ * ॥ पुनराधेयम् । गतित्वात्समासः । कृदुत्तरपदप्रकृतिस्वरेण यतो नाव इति धेशब्द उदात्तः । चनो हितः । चायतेरन्ने ह्रस्वश्चेत्यसुन्नन्तत्वान्निपातत्वाद्वा ऽऽद्युदात्तस्य चनःशब्दस्य गतिरनन्तर इति प्रकृतिस्वरः ॥

ऊर्यादिच्विडाचश्च । १ । ४ । ६१ ॥

एते क्रियायोगे गतिसंज्ञा स्युः ॥ ऊरीकृत्य । उररीकृत्य । शुक्लीकृत्य । पटपटाकृत्य ॥

अनुकरणं चानितिपरम् । १ । ४ । ६२ ॥

खाट्कृत्य । अनितिपरं किम् । खाडिति कृत्वा निरष्ठीवत् ॥

आदरानादरयोः सदसती । १ । ४ । ६३ ॥

सत्कृत्य । असत्कृत्य ॥

भूषणे ऽलम् । १ । ४ । ६४ ॥

अलङ्कृत्य । भूषणे किम् । अलङ्कृत्वोदनं गतः । पर्याप्तमित्यर्थः । अनुकरणमित्यादि त्रिसूची स्वभावात्कृञ्विषया ॥

अन्तरपरिग्रहे । १ । ४ । ६५ ॥

अन्तर्हत्य । मध्ये हत्वेत्यर्थः । अपरिग्रहे किम् । अन्तर्हत्वा गतः । हतं परिगृह्य गत इत्यर्थः । अयं भावः । हत्वा गमनं द्विधा । हतं त्यक्त्वा परिगृह्य चेति । आद्यमुदाहरणम् । द्वितीयं प्रत्युदाहरणम् । अपरिग्रहे इति च प्रयोगोपाधिर्न तु वाच्यकोटिनिविष्टमिति ॥

कणेमनसी श्रद्धाप्रतीघाते । १ । ४ । ६६ ॥

कणेहत्य पयः पिबति । मनोहत्य । कणेशब्दः सप्तमीप्र-

तिरूपको निपातोऽभिलाषातिशये वर्तते। मनःशब्दोऽप्येवम्। अतिशयेनाभिलष्य तन्निवृत्तिपर्यन्तं पिबतीत्यर्थः। ततश्च श्रद्धाया अपगमात्तत्प्रतीघातो गम्यते। श्रद्धाप्रतीघाते किम्। कणे हत्वा गतः। मनो हत्वा। सूक्ष्मतण्डुलावयवः कणस्तस्मिन्हत्वेत्यर्थः। मनःशब्दस्तु चेतसि॥

पुरोऽव्ययम्। १। ४। ६७॥

पूर्वाधरावराणामसीति व्युत्पादितो ऽसिप्रत्ययान्तो ऽव्ययं पुरःशब्दो गतिसंज्ञः स्यात्॥ पुरस्कृत्य। अव्ययं किम्। पूः पुरौ पुरः कृत्वा॥

अस्तं च। १। ४। ६८॥

अस्तमिति मान्तमव्ययं गतिसंज्ञं स्यात्॥ अस्तङ्गत्य। अव्ययं किम्। अस्तं कृत्वा काण्डं गतः। अस्तं काण्डम् क्षिप्तमित्यर्थः॥

अच्छ गत्यर्थवदेषु। १। ४। ६९॥

अव्ययमित्येव॥ अच्छगत्य। अच्छोद्य। अभिमुखं गत्वा उक्त्वा चेत्यर्थः। अव्ययं किम्। जलमच्छं गच्छति॥

अदोऽनुपदेशे। १। ४। ७०॥

अदःशब्दस्त्यदादिषु पठ्यते। सोऽनुपदेशे गतिसंज्ञः स्यात्॥ उपदेशः परार्थकथनम्। अदःकृत्य। अदः कृतम्। यदा स्वयमेवेत्थं पर्यालोचयति तदेदमुदाहरणम्। परम्प्रत्युपदेशे तु प्रत्युदाहरणम्।

तिरोऽन्तर्द्धौ। १। ४। ७१॥

तिरोभूय । अन्तर्द्धौ किम् । तिरो भूत्वा स्थितः । पार्श्वतो भूत्वेत्यर्थः ॥

विभाषा कृञि । १ । ४ । ७२ ॥

प्राप्तविभाषेयम् । तिरोऽन्तर्द्धावित्यनुवृत्तेः । तिरःकृत्य । तिरस्कृत्य । तिरः कृत्वा । अन्तर्द्धौ किम् । तिरस्कृत्वा काष्ठं तिष्ठति ॥

उपाजेऽन्वाजे । १ । ४ । ७३ ॥

एतौ कृञि वा गतिसंज्ञौ स्तः ॥ विभक्तिप्रतिरूपकौ निपातावेतौ दुर्बलस्य सामर्थ्याधाने वर्त्तेते । उपाजेकृत्य । उपाजे कृत्वा । अन्वाजेकृत्य । अन्वाजे कृत्वा । दुर्बलस्य बलमाधायेत्यर्थः ॥

साक्षात्प्रभृतीनि च । १ । ४ । ७४ ॥

कृञि वा गतिसंज्ञानि स्युः ॥ च्व्यर्थ इति वक्तव्यम् ॥ * ॥ साक्षात्कृत्य । साक्षात्कृत्वा । लवणंकृत्य । लवणं कृत्वा । मान्तत्वं निपातनात् । च्व्यन्ते तु पूर्वविप्रतिषेधादूर्यादिच्वीति नित्यैव संज्ञा । तेन लवणीकृत्येत्यत्र मान्तत्वं न । तद्धि विकल्पसन्नियोगेनेह गणे निपात्यते ॥

अनत्याधान उरसिमनसी । १ । ४ । ७५ ॥

विभक्तिप्रतिरूपकौ निपातावेतौ । कृञि वा गतिसंज्ञौ स्तः ॥ उरसिकृत्य । उरसि कृत्वा । अभ्युपगम्येत्यर्थः । मनसिकृत्य । मनसि कृत्वा । निश्चित्येत्यर्थः । अत्याधानमुपश्लेषस्तत्र न । उरसि कृत्वा पाणिं शेते ॥

मध्येपदेनिवचने च । १ । ४ । ७६ ॥

एते कृञि गतिसंज्ञा वा स्युरनत्याधाने ॥ मध्येकृत्य । मध्ये कृत्वा । पदेकृत्य । पदे कृत्वा । निवचनेकृत्य । निवचने कृत्वा ।

Digitized by Google

वाचं नियम्येत्यर्थः । निवचनं वचनाभावः । अविशेषेणेदन्तता निपात्यते । न तु संज्ञासन्नियोगेन । व्याख्यानात् । अनत्याधाने किम् । हस्तिनः पदे कृत्वा शिरः शेते ॥

नित्यं हस्तेपाणावुपयमने । १ । ४ । ७७ ॥

कृञि ॥ उपयमनं विवाहः । स्वीकारमात्रमित्यन्ये । हस्तेकृत्य । पाणौकृत्य । एतौ निपातावित्येके । तत्पुरुषे कृतीत्यलुगिति कश्चित् । उपयमने किम् । हस्ते कृत्वा सुवर्णं गतो भृत्यः ॥

प्राध्वं बन्धने । १ । ४ । ७८ ॥

प्राध्वमिति चादिषु पाठान्मान्तमव्ययमानुकूल्ये वर्तते ॥ तत्कृञि नित्यं गतिसंज्ञं स्यात् बन्धनहेतुकं चेदानुकूल्यम् ॥ प्राध्वंकृत्य । बन्धनेनानुकूलं कृत्वेत्यर्थः । प्रार्थनादिना त्वानुकूल्यकरणे प्राध्वं कृत्वा ॥

जीविकोपनिषदावौपम्ये । १ । ४ । ७९ ॥

कृञि नित्यं गतिसंज्ञौ स्तः ॥ जीविकामिव कृत्वा जीविकाकृत्य । उपनिषदमिव कृत्वा उपनिषत्कृत्य । औपम्ये किम् । जीविकां कृत्वा ॥

ते प्राग्धातोः । १ । ४ । ८० ॥

ते गत्युपसर्गसंज्ञा धातोः प्रागेव प्रयोक्तव्याः ॥ तथैवोदाहृताः । तद्ग्रहणमुपसर्गार्थम् । गतयो ह्यनन्तराः । धातोः किम् । प्रकर्तुमैच्छत्प्राचिकीर्षदित्यत्र सनः प्राक् प्रयोगो माभूत् ॥

छन्दसि परेऽपि । १ । ४ । ८१ ॥

व्यवहिताश्च । १ । ४ । ८२ ॥

स्पष्टम् । हरिभ्यां याह्योक आ । आमन्द्रैरिन्द्र हरिभिर्याहि ॥

Digitized by Google

कर्मप्रवचनीयाः । १ । ४ । ८३ ॥

इत्यधिकृत्य ॥

अनुर्लक्षणे । १ । ४ । ८४ ॥

लक्षणे द्योत्ये ऽनुरुक्तसंज्ञः स्यात् ॥ गत्युपसर्गसंज्ञापवादः । जपमनु प्रावर्षत् । हेतुभूतजपोपलक्षितं वर्षणमित्यर्थः । परा ऽपि हेतौ तृतीया ऽनेन बाध्यते । लक्षणेत्थम्भूतेत्यादिना सिद्धे पुनः संज्ञाविधानसामर्थ्यात् । न च तृतीयार्थे इति सूत्रेण गतार्थता । तस्य पुरस्तादपवादन्यायेन सहयुक्तेऽप्रधाने इत्येतावन्मात्रबाधकत्वात् ॥

तृतीयार्थे । १ । ४ । ८५ ॥

अस्मिन्द्योत्येऽनुरुक्तसंज्ञः स्यात् ॥ नदीमन्ववसिता सेना । नद्या सह सम्बद्धेत्यर्थः । षिञ् बन्धने । अस्मात्कर्त्तरि क्तः ॥

हीने । १ । ४ । ८६ ॥

हीने द्योत्येऽनुः प्राग्वत् ॥ अनु हरिं सुराः । हरेर्हीना इत्यर्थः ॥

उपो ऽधिके च । १ । ४ । ८७ ॥

अधिके हीने च द्योत्ये उपेत्यव्ययं प्राग्वत् ॥ उपपरार्द्धे हरेर्गुणाः । परार्द्धादधिका इत्यर्थः । यस्मादधिकमिति सप्तमी । हीने । उपहरिं सुराः ॥

अपपरी वर्जने । १ । ४ । ८८ ॥

एतौ वर्जने कर्मप्रवचनीयौ स्तः ॥ अप हरेः परि परि हरेः संसारः । पञ्चम्यपाङ्परिभिरिति पञ्चमी । परेर्वर्जने इति द्विर्वचनम् । तद्धि पञ्चमीसहितेन कर्मप्रवचनीयेन द्योतितेऽपि वर्जने भवत्येव ।

उभयोरपि विधानसामर्थ्यात् । वर्जने किम् । परिषिञ्चति । सर्वत इत्यर्थः । अत्रोपसर्गत्वात्षत्वम् ॥

आङ् मर्यादावचने । १ । ४ । ८९ ॥

आङुक्तसंज्ञः स्यान्मर्यादाशब्दो यस्मिन्सूत्रे उच्यते तत्रत्यस्यैव ॥ आङ् मर्यादाभिविध्योरित्यत्रोपात्तो ह्यर्थे इत्यर्थः । आमुक्तेः संसारः । आबालेभ्यो हरिभक्तिः ॥

लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः । १ । ४ । ९० ॥

एष्वर्थेषु विषयभूतेषु प्रत्यादय उक्तसंज्ञाः स्युः ॥ लक्षणे । वृक्षं प्रति पर्यनु वा विद्योतते विद्युत् । इत्थम्भूताख्याने । भक्तो विष्णुं प्रति पर्यनु वा । भागे । लक्ष्मीर्हरिं प्रति पर्यनु वा । हरेर्भाग इत्यर्थः । वीप्सायाम् । वृक्षं वृक्षं प्रति पर्यनु वा सिञ्चति । अत्रोपसर्गत्वाभावान्न षत्वम् । एषु किम् । परिषिञ्चति ॥

अभिरभागे । १ । ४ । ९१ ॥

भागवर्जे लक्षणादावभिरुक्तसंज्ञः ॥ हरिमभि वर्तते । भक्तो हरिमभि । देवं देवमभि सिञ्चति । अभागे किम् । यदत्र ममाभिष्यात्तद्दीयताम् ॥

प्रतिः प्रतिनिधिप्रतिदानयोः । १ । ४ । ९२ ॥

एतयोरर्थयोः प्रतिरुक्तसंज्ञः स्यात् ॥ प्रद्युम्नः कृष्णात्प्रति । तिलेभ्यः प्रतियच्छति माषान् । प्रतिनिधिप्रतिदाने च यस्मादिति पञ्चमी ॥

अधिपरी अनर्थकौ । १ । ४ । ९३ ॥

Digitized by Google

स्यादिति । प्रजापतिरिति स्तुतिसहितलिङ्गात्मा समृद्ब्रह्म इति । अथवा, उदाहृतश्रुतिष्वेव किं पुण्यपापयोर्विधूननं हानमभिप्रेतम्, उत तयोः फलतश्चालनम्, इति विशये, फलतश्चालनमेवेति न पुरुषान्तरे तयोः फलहेतुत्वम्, इति प्राप्ते ब्रूमः । हानावेवायं विधूननशब्दो वर्तितुमर्हति । उपायनशब्दशेषत्वात्, उपायनशब्दसन्निधौ विधूननशब्दस्य श्रुतत्वादित्यर्थः । उपादानात्मकोपायनस्य हानं विना ऽसम्भवात्, विधूननशब्देन "धूञ् कम्पने" इतिधातुजन्येन चलनवाचकेनापि हानमेव लक्ष्यमिति भावः । ननूपायनशब्दसन्निधौ श्रूयमाणविधूननशब्दस्य हानलक्षकत्वेऽपि केवलविधूननशब्दस्य न हानलक्षकत्वमिति शङ्कां "कुशाछन्दः" इत्यादिना निराकरोति । यथा कुशादिस्थले शाखाऽन्तरीयविशेषश्रवणं निर्णायकम्, तथेहापि क्वचिद्विधूननसन्निधौ श्रूयमाणमुपायनं सर्वत्र विधूननस्य निर्णायकमित्यर्थः । "तदुक्तम्" इति पूर्ववद्व्याख्येयम् ॥

साम्पराये तर्तव्याभावात्तथा ह्यन्ये ॥ ३ । ३ । २७ ॥

पूर्वं विद्यायाः कर्महानिहेतुत्वं सिद्धं कृत्वा, केवलहानश्रवण उपायनस्योपसंहार उक्तः । इदानीं विद्यायाः कर्महानिहेतुत्वं नास्तीत्याक्षेपात्सङ्गतिः । पर्यङ्कस्थब्रह्मोपासकस्य देहत्यागानन्तरं देवमार्गे ब्रह्मलोकं प्रति पर्यङ्कस्थब्रह्मप्राप्त्यर्थं गच्छतो मार्गमध्ये विरजानदीतरणानन्तरं कर्महानिः श्रूयते "विरजां नदीं तां मनसैवात्येति तत्सुकृतदुष्कृते विधूनुते" इति । तत्र संशयः, किं विरजानदीतरणानन्तरं कर्महानिः, उत देहत्यागात्प्राक्काले, इति । पूर्वपक्षे मरणप्राक्कालीनविद्यां विना नदीतरणस्यैव कर्महानिहेतुत्वमिति विद्याया हानिहेतुत्वासिद्धिः फल-

म्, सिद्धान्ते विद्यासामर्थ्याज्जीवत एव कर्महानिरिति भेदः । तत्र "तत्सुकृते"त्यत्रत्येन तदिति सर्वनाम्ना तस्मादर्थकत्वेन हेतुत्ववाचिना नदीतरणस्यैवाव्यवहितस्य कर्महानिहेतुत्वमिति गम्यते । तथा च नदीतरणानन्तरमेव कर्महानिरिति प्राप्ते ब्रूमः । साम्पराये परलोकसाधनीभूतविद्याकाल एव कर्महानिर्युक्ता । कुतः । तर्तव्याभावात्, नदीतरणानन्तरं पुण्यपापकर्मणा तर्तव्यस्य निर्वर्त्यस्य फलस्याभावादित्यर्थः । अत्रायं विकल्पः । किं नदीतरणानन्तरं कर्मणा निर्वर्त्यफलसत्त्वासावत्पर्यन्तमक्षीणत्वं कर्मण उच्यते, उत नदीतरणं विना कर्मक्षयहेतोरभावाद्वा । आद्ये सूत्रोक्तो हेतुर्बाध्यः । द्वितीयस्त्वसिद्धः, कर्मक्षयहेतोर्विद्यायाः सत्त्वात्, कर्मक्षयं विना नदीतरणानुपपत्तेश्च । न च सर्वनाम्ना नदीतरणस्य हेतुत्वप्रतीतिर्युक्ता, सर्वनाम्नः प्राधान्येन प्रकृतविद्यापरामर्शित्वादिति । तस्मात्पूर्वं जात एव कर्मक्षयो नदीतरणानन्तरं पठ्यत इति मन्तव्यम् । तथाह्येके शाखिनस्ताण्ड्यादयो जीवदशायामेव कर्मक्षयं "अश्व इव रोमाणि"इत्यादावधीयते । अतश्च जीवत एव विद्यासामर्थ्यात्कर्मक्षय इति ॥

ननु कर्मक्षयस्य विद्याफलत्वे ब्रह्मप्राप्तेरिव देहत्यागोत्तरकालीनत्वं स्यात् । अत आह ।

छन्दत उभयाविरोधात् ॥ ३ । ३ । २८ ॥

छन्दतः स्वेच्छया विद्याऽनुष्ठानं जीवत एवेति तद्धेतुकः कर्मक्षयोऽपि जीवत एव युक्तः, सति हेतौ कार्ये विलम्बायोगात् । एवं सति विद्याकर्मक्षययोर्निमित्तनैमित्तिकभावे ताण्ड्यादिश्रुत्योरुभयोरविरोधो भवतीत्यर्थः । ब्रह्मप्राप्तेर्देहत्यागं विनाऽनुपपत्तेः, प्रकृते चानु-

Digitized by Google

पपस्यभावाज्जीवत एव कर्मक्षय इति भावः । तस्माद्विद्याफलत्वं कर्मक्षयस्येति सिद्धम् ॥

एवं प्रसङ्गादागतं विद्योदयानन्तरमेव कर्महानमिति निरूप्य, यथा हानसन्निधौ क्वचिच्छ्रूयमाणमुपायनं सर्वत्रोपसंह्रियते, तथा हानसन्निधौ क्वचिच्छ्रूयमाणो देवयानः पन्थाः सर्वत्रोपसंहर्तव्यः, इति दृष्टान्तेनाक्षिप्य समाधत्ते ।

गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः ॥ ३ । ३ । २९ ॥

कर्महानसन्निधौ क्वचिद्देवयानः पन्थाः श्रुतः । क्वचिन्न श्रुतो निर्गुणविद्यास्थले । तत्र किं देवयानोपसंहारोऽस्ति न वेति सन्देहे, अस्तीति प्राप्ते ब्रूमः । गतेर्देवयानस्यार्थवत्त्वमुभयथा विभागेन भवितुमर्हति । क्वचित्सगुणविद्यायां देवयानमार्गोऽस्ति, क्वचिन्निर्गुणविद्यायां नेति । अन्यथा सर्वत्र देवयानमार्गोपसंहाराङ्गीकारे, "विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यं (प्रत्यगभिन्नब्रह्मलक्षणं नित्यसिद्धं) उपैति" इति श्रुतिविरोधः स्यादित्यर्थः ॥

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ ३ । ३ । ३० ॥

क्वचिद्विद्यायां गतिरस्ति क्वचिन्नास्तीति गतेरुभयथाभाव उपपन्नः, तल्लक्षणार्थोपलब्धेः, इत्यर्थः । सा गतिर्लक्षणं कारणं यस्य सगुणविद्याफलस्य पर्यङ्कस्थब्रह्मप्राप्तिरूपस्य लोकान्तरवर्तिनोऽर्थस्य तस्य श्रुतिषूपलब्धेरित्यर्थः । निर्गुणविद्यायां मार्गसाध्यफलाभावान्न तस्योपसंहारः ।

लोकवत् । यथा लोके रामसेतुवासिनां गङ्गाप्राप्त्यर्थं पन्था अपेक्षितः, न गङ्गास्थानां, तद्वदित्यर्थः । तस्मान्न निर्गुणविद्यायां मार्गोपसंहार इति सिद्धम् ॥

अनियमः सर्वेषामविरोधः शब्दानुमानाभ्याम् ॥ ३ । ३ । ३१ ॥

सगुणविद्यासु क्वचित्पञ्चाग्निविद्यादिषु मार्गः श्रूयते । क्वचित्तु वैश्वानरविद्यादिषु न श्रूयते । तत्र किं क्वचिच्छ्रुतमार्गस्यान्यत्रोपसंहारोऽस्ति न वेति सन्देहे, यद्विद्याप्रकरणे मार्गः श्रुतः स तत्रैवेति प्रकरणबलान्नियम एव, नोपसंहारः, इति पूर्वाधिकरणदृष्टान्तेन प्राप्ते, उच्यते । सर्वेषां सगुणोपासनानां मार्गस्यानियमः । क्वचिच्छ्रुतस्य सर्वत्रोपसंहार इति यावत् । ननु प्रकरणबलान्नियमो युक्तः, अन्यथा प्रकरणविरोध इति चेत्, उच्यते । प्रकरणेनाविरोध एवानियमस्य । कुतः । शब्दानुमानाभ्याम्, श्रुतिस्मृतिभ्यामित्यर्थः । "य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिरभिसम्भवन्ती"त्याद्या श्रुतिः । येऽधिकृता एतद्द्युलोकादिपञ्चकमेवमग्नित्वेन विदुस्तेऽर्चिरभिसम्भवन्तीति सम्बन्धः । तद्वद्येऽप्यमी अरण्ये सत्यं ब्रह्म श्रद्धां तपःपूर्वमुपासते तेऽर्चिरभिसंविशन्तीत्यर्थः । तथा च पञ्चाग्निविद्याविदामिव विद्यान्तरशीलानां वाक्येनैव प्रकरणाद्बलीयसा देवयानमार्गावगतेः प्रकरणं बाध्यमिति भावः । "शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते" इत्याद्या स्मृतिरप्युपासकस्याविशेषेण मार्गं दर्शयति । जगतो विद्यायां कर्मणि चाधिकृतस्य जनस्येत्यर्थः ॥

यावदधिकारमवस्थितिराधिका-

Digitized by Google

रिकाणाम् ॥ ३ । ३ । ३२ ॥

पूर्वं निर्गुणविद्यायां न मार्गः, सगुणविद्यायां तु सर्वत्र मार्गः, इति व्यवस्था कृता। इदानीं निर्गुणविद्याया मोक्षहेतुत्वानुपपत्तेरैश्वर्यादिकफलकत्वं वक्तव्यम्। तच्चामुष्मिकं फलं मार्गमन्तरेण न सम्भवतीति कृतव्यवस्थाया आक्षेपात्सङ्गतिः। अपान्तरतमोवसिष्ठसनत्कुमारादीनां निर्गुणब्रह्मविदां पुनः पुनरुत्पत्तिः स्मर्यते "अपान्तरतमाः कलिद्वापरयोः सन्धौ विष्णुनियोगात्कृष्णद्वैपायनः सम्बभूव" इत्यादिना। तत्र संशयः, विदुषो वर्तमानदेहपातादनन्तरं देहान्तरप्राप्तिरस्ति न वेति। अत्र पूर्वपक्षे वसिष्ठादिनिष्ठब्रह्मविद्याया इवेतरविद्वन्निष्ठब्रह्मविद्याया अपि मोक्षहेतुत्वाभावेनैश्वर्यादिफलप्राप्त्यर्थं देहान्तरप्राप्तेरस्त्येव निर्गुणविद्यायामपि मार्गोपसंहार इति फलम्। सिद्धान्ते त्वपान्तरतमःप्रभृतीनामाधिकारिकाणां वेदप्रवर्तनादिषु लोकव्यवस्थाहेतुष्वधिकारेषु परमात्मना नियुक्तानां यावदधिकारमवस्थितिर्यावत्प्रारब्धकर्मावस्थितिस्तस्य प्रारब्धस्य कर्मणः प्रतिबन्धकस्यानेकशरीरभोग्यफलहेतोस्तस्य फलस्य भोगेन नाशे प्रतिबन्धकान्तराभावादनादौ संसारे सञ्चितकर्मणां च ज्ञाननाश्यत्वेनाप्रतिबन्धकत्वादप्रतिबन्धः साक्षात्कारो वर्तमानदेहपातानन्तरं कैवल्यं सम्पादयतीति न देहान्तरप्राप्तिरप्रतिबद्धसाक्षात्कारवतः। तथैव श्रुतिः "तस्य तावदेव चिरं यावन्न विमोक्ष्ये ऽथ सम्पत्स्ये" इत्यप्रतिबद्धसाक्षात्कारवतो वर्तमानदेहपातावधिं कैवल्यस्य श्रावयति। तथा च न विदुषो मार्गापेक्षेति न मार्गस्य निर्गुणविद्यायामुपसंहार इति सिद्धम् ॥

अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥ ३ । ३ । ३३ ॥

बृहदारण्यके श्रूयते याज्ञवल्क्यस्य गार्गीं प्रति प्रत्युत्तरं "एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घ"मित्यादि । एवमाथर्वणेऽ "प्यक्षरमधिगम्यत" इत्यक्षरं ब्रह्मोपक्रम्य श्रावयति "यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षु"रित्यादि । एवं तत्र निर्गुणब्रह्मप्रमित्यर्था निषेधाः श्रूयन्ते । तत्र संशयः, क्वचिन्निषेधश्रुतावश्रुतनिषेधानां श्रुत्यन्तरादुपसंहारोऽस्ति न वेति । तत्र यथा पूर्वमाधिकारिकाणां वसिष्ठादीनां प्रारब्धकर्मण एव देहान्तरसम्बन्धसिद्धिर्न सञ्चितकर्मणो देहान्तरसम्बन्धहेतुत्वमित्युक्तम्, तथेहापि तत्तद्वाक्योक्तैरेव निषेधैरुपलक्षणतया सर्वद्वैतनिषेधसिद्धेर्न शाखान्तरीयनिषेधानां तत्र ब्रह्मप्रमितिहेतुत्वमित्यनुपसंहारः, इति दृष्टान्तेन प्राप्ते ब्रूमः । अक्षरे धर्मिणि द्वैतनिषेधधियोऽक्षरधियस्तासां सर्वत्र निषेधप्रकरणेष्ववरोध उपसंहारो न्याय्यः । कुतः । सामान्यतद्भावाभ्याम्, द्वैतप्रपञ्चनिरासेन ब्रह्मप्रतिपादनस्य सर्वत्र समानत्वात्तस्य ब्रह्मणः प्रतिपाद्यस्य सर्वत्र भावादेकत्वेन प्रत्यभिज्ञायमानत्वाच्च तच्छेषाणां निषेधशब्दप्रत्ययानां सर्वत्रोपसंहार इत्यर्थः । औपसदवत् । तथाहि यजुर्वेदे "जमदग्निः पुष्टिकामश्चतूरात्रेणायजते"त्युत्पन्ने जामदग्न्याहीने पुरोडाशिन्य उपसदो भवन्तीति पुरोडाशयुक्तासूपसत्स्वपिष्टूपदिष्टासु पुरोडाशप्रदानकमन्त्राणामुद्गातृवेदोत्पन्नानामग्नेर्वेर्होत्रं वेरध्वरमित्यादीनामुद्गात्रा प्रयोगे प्राप्ते, अध्वर्युकर्तृके पुरोडाशप्रदाने तेषां मन्त्राणां विनियोगाद्विनियोगविधेश्च सार्थ-

ध्यसम्पादकस्य स्वरूपमात्रबोधकोत्पत्तिविध्यपेक्षया मुख्यत्वान्मुख्यानुरोधेनाध्वर्युणैव प्रयोगो न गौणोत्पत्तिविध्यनुरोधेनोद्गात्रा प्रयोग इति यथाऽध्वर्युकर्तृकपुरोडाशशेषाणां मन्त्राणां यत्र क्वचिच्छ्रुतानामप्यध्वर्युणा सम्बन्धः, एवमक्षरप्रमितिशेषाणां निषेधानां यत्र क्वचिच्छ्रुतानामप्यक्षरेण सर्वत्र सम्बन्ध इत्यर्थः । अस्मिन्नेवार्थ उदाहरणान्तरविवक्षया जैमिनिसूत्रमुदाहरति "तदुक्त"मिति । "गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः" इति जैमिनिसूत्रम् । "य एवंविद्वानग्निमाधत्ते" इति यजुर्वेदविहिताधानेऽङ्गत्वेन "य एवंविद्वान्वारवन्तीयं गायति" "य एवंविद्वान्यज्ञायज्ञीयं गायति" "य एवंविद्वान्वामदेव्यं गायति"इति यजुर्वेद एव सामानि विहितानि । विषयः । वारवन्तपदयुक्तं साम वारवन्तीयम् । एवमग्रेऽपि । "उच्चैः साम्नोपांशु यजुषा" इति सामयजुषोः स्वरभेदोऽस्ति । तत्र संशयः, किमेतानि सामानि सामवेदोत्पन्नत्वात्तदीयेनोच्चैः स्वरेण प्रदाने प्रयोक्तव्यानि, उत येन यजुर्वेदेन विनियुज्यन्ते तदीयेनोपांशुस्वरेणेति । तत्रोत्पत्तिविधिबलादुच्चैः स्वरेण प्रयोगे प्राप्ते, सिद्धान्तो "गुणमुख्ये"ति । गुणमुख्ययोरुत्पत्तिविनियोगविध्योर्व्यतिक्रमे स्वरविषये विरोधे, मुख्येन विनियोगविधिना वारवन्तीयादेर्वेदस्य संयोगो ग्राह्यः । साम्नां विनियोजकवेदस्वरसंयोग इति यावत् । कुतः । तदर्थत्वात्, उत्पत्तिविधेर्विनियोगार्थत्वादित्यर्थः । एतत्समानन्यायत्वेनौपसदमन्त्राः पूर्वमुदाहृता इति मन्तव्यम् ॥

Digitized by Google

द्वयदामननात् ॥ ३ । ३ । ३४ ॥

"द्वा सुपर्णा सयुजे"त्यादिमन्त्र आथर्वणादौ श्रूयते । काठकेऽपि "ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे" इत्यादि श्रूयते । तत्र संशयः, किमनयोर्मन्त्रयोर्विद्याभेद उत विद्यैक्यमिति । पूर्वपक्षे विद्याभेदादन्योन्यं गुणानुपसंहारः फलम्, सिद्धान्ते विद्यैक्यादुपसंहार इति । तत्र, पूर्वं वेद्यस्याक्षरस्याभिन्नत्वेन विद्यैक्यादक्षरधियामुपसंहार उक्तः । तर्हि प्रकृते "द्वा सुपर्णे"ति मन्त्र एकस्यैव भोक्तृत्वं "ऋतं पिबन्ता"वित्यत्रोभयोरपि भोक्तृत्वं श्रूयते, इत्युभयत्र वेद्यभेदाद्विद्याभेद इति प्रत्युदाहरणेन प्राप्ते ब्रूमः । मन्त्रद्वये विद्यैक्यमेव । कुतः । द्वयत्वावच्छिन्नस्य द्वित्वावच्छिन्नस्य वेद्यस्योभयत्राप्यभिन्नत्वेनामननादित्यर्थः । अत्र हि मन्त्रद्वये भोक्तृजीवानुवादेन परमात्माभेदः प्रतिपाद्यः । "पिबन्ता"विति प्रयोगस्तु भोक्तृजीवसाहचर्यादभोक्तरीश्वरे "छत्रिणो गच्छन्ती"तिवदुपपद्यत इत्युक्तं गुहाऽधिकरणे । तथा च प्रतिपाद्यैक्यान्निर्गुणविद्यैक्यमित्यविरोधः ॥

अन्तरा भूतग्रामवत्स्वात्मनः ॥ ३ । ३ । ३५ ॥

बृहदारण्यक उषस्तो याज्ञवल्क्यं पप्रच्छ "यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वे"ति । स्वतोऽपरोक्षं ब्रह्मैव प्रत्यगात्मेत्याह "य आत्मे"ति । एतत्प्रश्नोत्तरे "यः प्राणेन प्राणिति स त आत्मा सर्वान्तर" इत्यादिना कार्यकारणरहित आत्मा प्रतिपादितः । एवमेतदनन्तरब्राह्मणे पूर्ववत्कहोलप्रश्ने "योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येती"त्यशनाद्यतीत आत्मा प्रतिपादितः । तत्र संशयः किम-

नयोर्ब्राह्मणयोर्विद्याभेद उत विद्यैक्यमिति । फलं पूर्व-
वत् । पूर्व "पिबन्ता"वित्यस्य पदस्य लाक्षणिकत्वेन
वेद्याभेदाद्विद्यैक्यमुक्तम् । इह तु वेद्यैक्येऽपि न विद्यै-
क्यम्, "समिधो यजती"त्यादौ यजत्यभ्यासवत्प्रकृत
आत्माभ्यासाद्विद्याया भेदसिद्धिः, इति मुख्यः पूर्वपक्षः ।
एकत्र कार्यादिरहितात्मन उपास्यत्वादन्यत्राशनायाद्य-
तीतात्मन उपास्यत्वादुभयत्र वेद्यभेदाद्विद्याभेद इति
गौणः पूर्वपक्षः । तत्र गौणं पूर्वपक्षं दूषयति "अन्तरे"ति ।
पूर्वसूत्रस्थस्य "आमननात्"इति पदस्यानुषङ्गः । ब्राह्मण-
द्वयेऽपि स्वात्मनः सर्वान्तरत्वामननाद्वेद्यस्यात्मन एकत्व-
मेव, उभयोरेकस्मिन्देहे सर्वान्तरत्वायोगात्, भूतग्राम-
वत् । यथा भूतसमूहात्मके स्थूलदेहे पृथिव्यपेक्षया जल-
मान्तरं जलापेक्षया तेज इत्यादिक्रमेणापेक्षिकं भूताना-
मान्तरत्वं न मुख्यं सर्वान्तरत्वम्, तद्वद्ब्राह्मणद्वये वेद्य-
भेदाङ्गीकारे वेद्यात्मद्वयस्यापि स्यादित्यर्थः । यद्वा भूत-
ग्रामवदिति श्रुत्यन्तरदृष्टान्तार्थश्च । यथा "एको देवः
सर्वभूतेषु गूढः" इत्यादिश्रुत्यन्तरे सर्वेषु भूतग्रामेषु
सर्वान्तर एक एवात्मा ऽऽम्नायते तद्वदनयोर्ब्राह्मणयोरि-
त्यर्थः । तथा च वेद्यैक्याद्विद्यैक्यं सिद्धम् ॥

मुख्यं पक्षमनूद्य दूषयति ।

अन्यथा भेदानुपपत्तिरिति चेन्नोप-
देशान्तरवत् ॥ ३ । ३ । ३६ ॥

अन्यथा विद्याभेदानङ्गीकारे, आम्नानभेदस्याभ्यास-
स्यानुपपत्तिः, प्रयोजनाभावात्, इति चेन्न । उपदेशान्तर-
वदभ्यासस्योपपत्तेरित्यर्थः । तथाहि, यथा छान्दोग्ये
"तत्त्वमसी"त्युपदेशे नवकृत्वोऽभ्यस्यमानेऽपि न विद्या

भिद्यते, उपक्रमोपसंहारयोरविशेषात्, तद्ब्राह्मणद्वयेऽपि प्रश्नरूपेणोपक्रमस्य "अतोऽन्यदार्त"मित्युपसंहारस्य चाविशेषात्, द्वितीयप्रश्ने "यदेव साक्षादपरोक्षाद्ब्रह्मे"त्येवकारेण विद्याभेदनिरासाच्च न विद्याभेदः । अभ्यासस्यादरार्थत्वेनाशनायाद्यतीतत्वादिविशेषप्रतिपादनार्थत्वेन चोपपत्तेरिति ॥

व्यतिहारो विशिंषन्ति हीतरवत् ॥ ३ । ३ । ३७ ॥

ऐतरेयिण आदित्यपुरुषमधिकृत्य समामनन्ति "तद्योऽहं सोऽसौ योऽसौ सोऽह"मिति । तथैव जाबाला अपि "त्वं वा अहमस्मि भगवो देवतेऽहं वै त्वमसी"ति । तत्र संशयः, किमात्मन ईश्वरेणैकत्वविषयमेकरूपमेव चिन्तनं विधीयते, उत जीवेश्वरयोरन्योन्यानुवादेनान्योन्यात्मकत्वरूपव्यतिहारेणोभयविषयं चिन्तनमिति । अत्र पूर्वपक्षिमत एकरूपत्वाल्लाघवम्, सिद्धान्तिमत उभयरूपत्वाङ्गीकारेण व्यतिहारसार्थक्यमिति भेदः । तत्राभ्यासस्यादरार्थत्ववद्व्यतिहारोपदेशस्याप्यादरार्थत्वान्न तदनुरोधेन चिन्तनस्योभयरूपत्वं किन्त्वेकरूपत्वमेवेति दृष्टान्तेन प्राप्ते, ब्रूमः । व्यतिहार एवात्रोपास्यत्वेनोपदिश्यते, न त्वात्मन ईश्वरेणैकत्वमात्रम् । इतरवत्, यथेतरे सर्वात्मत्वादयो गुणा उपास्यत्वेनोपदिश्यन्ते, तद्वत्प्रतिज्ञातेऽर्थे हेतुः "विशिंषन्ति ही"ति । समाम्नातारो जीवपरमात्मानौ व्यतिहारेण विशिंषन्ति "तद्योऽह"मित्यादिना तच्च व्यतिहारेण विशेषणं व्यतिहारस्योपास्यत्वे सार्थकं स्यात् । अन्यथा जीवस्येश्वरेणैकत्वमात्रस्योपास्यत्वे तत्प्रतिपादकश्रुत्यंशस्यैवार्थवत्त्वं, न त्वीश्वरस्य जीवेनैकत्वप्रतिपादकांशस्येति । तस्मादुभयांशसार्थक्यायोभ-

Digitized by Google

यद्रूपं चिन्तनं विधेयमिति सिद्धम् । पूर्वसूत्रे "उपदेशान्तरवत्" इति दृष्टान्तत्वेन "तत्त्वमसी"त्येकत्ववाक्यकथनप्रसङ्गेनैकत्ववाक्यस्य "तद्योऽह"मित्यादेर्विचारात्मासङ्गिकी पादसङ्गतिर्बोध्या । यद्वा, अस्यामहङ्ग्रहोपास्तौ व्यतिहारस्यानुपास्यत्वान्न सर्वत्राहङ्ग्रहोपास्तौ तस्य व्यतिहारस्योपसंहार इति पूर्वपक्षे फलम्, सिद्धान्ते तस्योपास्यत्वात्सर्वत्रोपसंहारः, इति साक्षादेव पादसङ्गतिः ॥

सैव हि सत्यादयः ॥ ३ । ३ । ३८ ॥

वाजसनेयके हृदयाख्यं हिरण्यगर्भं प्रस्तुत्य "स यो हैतंमहद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमान्लोका"निति सत्यविद्यां विधाय तदङ्गत्वेन "तदेतद्यक्षरं सत्यमिति स इत्येकमक्षरं तीत्येकमक्षरं यमित्येकमक्षरं प्रथमोत्तमे अक्षरे सत्यं मध्यतोऽनृतं तदेतदनृतमुभयतः सत्येन परिगृहीतं सत्यभूयमेव भवती"ति सत्यनामाक्षराणामुपासनमुक्त्वाऽनन्तरं श्रावयति "तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषः" इत्यादि । अयमर्थः । हशब्द उपास्यप्रसिद्ध्यर्थः । एतदिति हिरण्यगर्भाख्यं ब्रह्मोपास्यं परामृशति । महद्व्यापकं, यक्षं पूज्यं, प्रथमजं भौतिकापेक्षयेति शेषः । वेदनाप्रकारमाह "सत्यं ब्रह्मे"ति । सच त्यचेति सत्यं पञ्चभूतात्मकं हिरण्यगर्भाख्यं ब्रह्म यो वेदोपास्ते स इमाँल्लोकाञ्जयतीत्यर्थः । तीत्येकमक्षरमित्यत्र तकारोपरितनेकार उच्चारणार्थः । निरुक्तस्तकारो बोध्यः । अत्र हि प्रथमोत्तमे अक्षरे सत्यं, मृत्युसाम्याभावात् । मध्यतो मध्यस्थमक्ष-

Digitized by Google

रमनृतं मृत्युः, मृत्ध्वनृतयोस्तकारसाम्यात् । तदेतदनृतं मृत्युरूपमुभयतः सत्येन परिगृहीतमन्तर्भावितम् । अतोऽकिञ्चित्करं तत्सत्यभूयं सत्यबाहुल्यमेव भवतीत्यर्थः । तत्तत्र हृदयात्मकत्वे सत्यात्मकत्वे च ब्रह्मणः सिद्ध इत्यर्थः । "यत्तत्सत्य"मित्यादिकं "सम्बन्धादेवमन्यत्रापी"त्यधिकरणे व्याख्यातम् । तत्र संशयः, किं "तद्यत्तत्सत्यमसौ स"इत्यादिना श्रुता विद्या पूर्वसत्यविद्यातो भिद्यते न वेति । पूर्वपक्षे विद्याभेदाद्गुणानुपसंहारः, सिद्धान्ते तदुपसंहार इति बोध्यम् । तत्र पूर्वं जीवब्रह्मणोऽर्थतिहारोक्तिभेदाद्विद्याया द्विरूपत्वमुक्तम् । तद्वदिहापि सत्यविद्यायां लोकजयस्य फलत्वादनन्तरविद्यायां च "हन्ति पाप्मान"मित्यादिना पापनिवृत्तेः फलत्वात्, फलोक्तिभेदाद्विद्याभेदः, इति दृष्टान्तेन प्राप्ते, ब्रूमः । इयमनन्तरविद्या सैव सत्यविद्यैव । ततो न भिद्यते । कुतः । "तद्यत्तत्सत्य"मिति प्रकृतस्यैवोपास्यस्य हिरण्यगर्भस्याकर्षणादिति "हि" शब्दसूचितो हेतुर्बोध्यः । न हि वेद्याभेदे विद्याभेदो युक्तः । न च फलभेदाद्विद्याभेदः, सत्यविद्याप्रकरणे पठितस्य फलस्य सर्वस्यापि सत्यविद्याफलत्वादिति । तस्माद्विद्यैक्यात्पूर्वापरवाक्यस्थाः सर्वे सत्त्वादयो गुणा उपसंहर्तव्या इति सिद्धम् ॥

कामादीतरत्र तत्र चायतनादिभ्यः ॥ ३ । ३ । ३९॥

दहरविद्यायां दहराकाशमात्मानं प्रकृत्य छन्दोगा आमनन्ति "एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः" इत्यादि । तथा वाजसनेयिनोऽपि "स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आ-

काशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशानः'' इत्यादि । तत्र संशयः, किमन्योन्यं गुणोपसंहारो ऽस्ति न वेति । तत्र पूर्वं वेद्याभेदेन विद्यैक्याद् गुणोपसंहार इत्युक्तम् । तर्हि प्रकृते, छान्दोग्ये दहराकाशस्यैवोपास्यत्वात्, वाजसनेयक आकाशनिष्ठस्यात्मनो ज्ञेयत्वात्, वेद्यभेदेन सगुणनिर्गुणविद्ययोर्भेदान्नोपसंहार इति प्रत्युदाहरणेन प्राप्ते, ब्रूमः । कामादि सत्यकामत्वादिगुणजातमितरत्र वाजसनेयक उपसंहर्तव्यम् । यच्च सर्ववशित्वादिकं तदपि तत्र छान्दोग्य उपसंहर्तव्यम् । कुतः । आयतनादिभ्यः, हृदयस्यायतनस्य ब्रह्मणश्चोपास्यस्य ब्रह्मणः सेतुत्वस्य चोभयत्राविशेषादित्यर्थः । अयं भावः । दहराधिकरणे दहराकाशस्य ब्रह्मत्वसमर्थनान्न वेद्यभेदः । ननु तथाऽपि सगुणनिर्गुणविद्ययोरनयोर्भेदो दुर्वार इति चेत्, सत्यमस्ति भेदः । कथं तर्हि गुणोपसंहार इति चेत्, न ह्यत्रोपासनार्थं गुणोपसंहारं ब्रूमः, किन्तु विद्यास्तुत्यर्थम् । स्तुत्यर्थगुणोपसंहारश्च विद्याभेदे ऽपि सम्भवति, स्तुतेरुभयत्राविशेषादिति ॥

आदरादलोपः ॥ ३ । ३ । ४० ॥

छान्दोग्ये वैश्वानरविद्यायां प्राणाग्निहोत्रं श्रूयते "तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहे''त्यादिना । भक्तमन्नम् । जाबालश्रुतौ "पूर्वोऽतिथिभ्योऽश्नीया''दिति वैश्वानरोपासकस्यातिथिभ्यः पूर्वं भोजनं विधाय, अतिथिभोजनप्राथम्यनिन्दया पूर्वभोजनं स्तौति "यथा ह वै स्वयमहुत्वाऽग्निहोत्रं परस्य जुहुयादेवं त''दिति । यथा स्वाग्निहोत्राकरणेन पराग्निहोत्रकरणमयुक्तमेवं तदतिथिभ्यः

Digitized by Google

पूर्वं भोजनदानमित्यर्थः । तत्र संशयः, किं भोजनलोपे प्राणाग्निहोत्रस्य लोप उतालोप इति । अलोपसिद्धिः पूर्वपक्षे फलम्, सिद्धान्ते तु लोपसिद्धिरिति । उपास्तिविचारप्रसङ्गेन तदङ्गपूर्वभोजनाश्रितप्राणाग्निहोत्रविचारादस्ति पादसङ्गतिः । उपास्तिलोपेऽपि स्तुत्यर्थत्वेन गुणोपसंहारवत्, भोजनलोपेऽपि पूर्वभोजनस्तुत्युपपत्त्यर्थं प्राणाग्निहोत्रालोप इत्यवान्तरसङ्गतिः । तत्र पूर्वपक्षसूत्र-"मादरादलोप"इति । भोजनलोपेऽप्यग्निहोत्रस्यालोपः, पूर्वभोजनस्य प्राथम्यरूपधर्मलोपमसहमानया जाबालश्रुत्या प्राणाग्निहोत्र आदरकरणात् । न हि धर्मलोपमसहमाना श्रुतिः प्राणाग्निहोत्रस्य धर्मिणो लोपं सहते । तस्माद्भोजनलोपेऽप्यन्येन भक्ष्यद्रव्येण प्राणाग्निहोत्रं कर्तव्यम् । इत्येवं प्राप्ते ॥

सिद्धान्तयति ।

उपस्थितेऽतस्तद्वचनात् ॥ ३ । ३ । ४१ ॥

भोजन उपस्थिते सतोऽस्मादेव भोजनद्रव्यात्प्राणाग्निहोत्रं कर्तव्यम् । अनुपस्थिते भोजने प्राणाग्निहोत्रं न कर्तव्यमेव । कुतः । तद्वचनात्, 'तद्धोमीय'मिति वचनात्सन्निहितसाकाङ्क्षात् । "तद्यद्भक्तं प्रथममागच्छे"दित्यनेन सन्निहितस्य भोजनार्थं प्राप्तद्रव्यस्य होमसाधनत्वप्रतीतेरित्यर्थः । तथा च भक्तागमनस्य भोजनप्रयुक्तस्य भोजनलोपे लोपात्, द्रव्यस्य लोपेऽग्निहोत्रस्य लोप एव । आदरवचनं तु भोजनप्रसक्तिदशायां द्रष्टव्यम् ॥

तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ३ । ३ । ४२ ॥

सन्ति कर्माङ्गेषूद्गीथादिषु प्राणाद्युपासनानि । तानि किं पर्णतावत्कर्माङ्गानि नित्यकर्मवदनुष्ठेयान्युत गोदोहनवत्स्वतन्त्रफलसाधनान्यनित्यानीति संशयः । पूर्वोत्तरकोटिसिद्धिरेव पूर्वोत्तरपक्षयोः फलम् । उपासनाविचारात्मकत्वादस्य पादसङ्गतिः । अनित्यभोजनाङ्गाश्रितप्राणाग्निहोत्रस्यानित्यत्ववत्, नित्यकर्माङ्गाश्रितोपासनानां नित्यत्वमित्यवान्तरसङ्गतिः । तत्र "यस्य पर्णमयी जुहूर्भवती"ति कञ्चित्क्रतुमनारभ्याधीतस्य पर्णमयत्वस्याऽव्यभिचरितक्रतुसम्बन्धिजुहूद्वारा क्रत्वङ्गत्ववत्, अनारभ्याधीतानामुद्गीथाद्युपासनानामुद्गीथादिद्वारा क्रत्वङ्गत्वम्, इति प्राप्ते, ब्रूमः "तन्निर्धारणानियम"इति । तेषां कर्माङ्गाश्रितानां निर्धारणानामुपासनानामनियमो नित्यवदनुष्ठानाभावः । कुतः । तदृष्टेः, तस्यानियमस्य श्रुतौ दर्शनादित्यर्थः । तथाहि "तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेदे"त्यनुपासकस्यापि कर्मणि कर्तृत्वं वदन्ती श्रुतिरुपासनस्यानियतत्वं दर्शयति । उपासनस्य पृथक्फलश्रवणादपि पशुप्राप्तिफलकगोदोहनवन्न कर्माङ्गत्वमित्याह "पृथग्घी"ति । हि यतः पृथगप्रतिबन्धः कर्मणो वीर्यवत्तरत्वात्मकसमृद्धिरूपः फलमुपलभ्यते, अतो ऽपि न कर्माङ्गत्वमुपासनस्येत्यर्थः । तथाह्युपासनस्य पृथक्फलत्वे श्रुतिः "तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद नाना तु विद्या चाविद्या च यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवती"ति । तेनोङ्कारेणोभावपि कर्म कुरुतः । यश्चैतदोङ्काराख्यमक्षरमेवं रसतमत्वादिगुणकं वेद यश्च न वेद, तावुभाविति सम्बन्धः । एवमनभिप्रेतपक्षमुक्त्वा स्वाभिप्रेतमाह श्रुतिः "नाना त्वि"-

ति । तुः पूर्वपक्षनिरासार्थः । कर्माङ्गोङ्कारमात्रज्ञानापेक्षया रसतमत्वादिगुणकोङ्कारज्ञानं नानैव पृथक्फलकम् । दृष्टो हि मणिविक्रये शबरवणिजोः सामान्यविशेषज्ञानाभ्यां फलभेदः । तस्माद्यदेव कर्म विद्ययोद्गीथादिविषयया श्रद्धयाऽऽस्तिक्यबुद्ध्योपनिषदा तत्तद्देवताध्यानेन युक्तः करोति, तदेव कर्म वीर्यवत्तरं भवतीत्यर्थः । अनेन विद्याहीनं कर्म वीर्यवन्मात्रं विद्यासहितं तु वीर्यवत्तरमिति गम्यते । न हीदं विद्यायाः कर्माङ्गत्वे सम्भवति, अङ्गहीनस्य कर्मणो वीर्यवन्मात्रत्वस्य फलजनकत्वलक्षणस्यानुपपत्तेः । तस्मात्पर्णताया अक्रियात्मकत्वेन क्रतुसम्बन्ध विना स्वातन्त्र्येण फलजनकत्वाभावेन विषमत्वात्, विद्यायाः क्रियात्मकत्वेन स्वातन्त्र्येण फलसाधनत्वसम्भवाद्गोदोहनवत्स्वातन्त्र्यमेवेति सिद्धम् ॥

प्रदानवदेव तदुक्तम् ॥ ३ । ३ । ४३ ॥

बृहदारण्यके छान्दोग्ये च संवर्गविद्यायां, वागादिभ्यः प्राणः श्रेष्ठोऽग्न्यादित्यादिदेवताभ्यः श्रेष्ठो वायुरित्यवधारितम् । तत्र संशयः, किमस्यां विद्यायां वायुप्राणयोः प्रयोगैक्यमुत प्रयोगभेद इति । फलपादसङ्गती पूर्ववत् । पूर्वं फलभेदात्कर्मणां तदाश्रितोपासनानां च नित्यत्वानित्यत्वलक्षणप्रयोगभेद उक्तः । तर्हि प्रकृते वायुप्राप्तिलक्षणफलैक्याद्वायुप्राणयोः स्वरूपत एकत्वेन वेद्याभेदेन विद्यैक्याच्च प्रयोगैक्यमिति प्रत्युदाहरणेन प्राप्ते, ब्रूमः । यथैकस्मिन्नग्निहोत्रे दधितण्डुलादिभिर्गुणैः प्रयोगभेदः, एवमेकस्यामपि विद्यायां वायुप्राणयोः स्वरूपाभेदेऽप्याधिदैविकत्वाध्यात्मिकत्वरूपावस्थाभेदेन गुणभेदात्प्रयोगभेद इति । प्रदानवदेवेदं द्रष्टव्यम् । तथा हि

Digitized by Google

heres in a single substance ; '*anēkadravyā*' is that inhering in substances more than one ; the particle '*ca*' serves to indicate that these two are the only kinds of *numbers*.

Page 115.] Out of these two, the number belonging to one Substance may be shown to be eternal and non-eternal, in the same manner as the Colour &c., of the atoms of water &c. That is to say, just as in the water-atoms, Colour, Taste and Touch are eternal, so also is the number 'One' (belonging to such an atom); and just as the Colour &c., of aqueous products are non-eternal, being destroyed at the destruction of their substratum, and being produced in accordance with the Colour &c., of the originative aqueous substance,—so also is the number 'one' (as belonging to such products).

The number inhering in more than one substance includes all numbers from *two* to the highest conceivable number. 'Parārdha' is that at which all limitation of number ceases. The particle 'tu' is added with a view to show that 'duality' differs from 'unity' in point of belonging to more than one substance.

This second sort of number is not a mere aggregate of the quality of many *unities* ; it is produced out of many *unities* as accompanied by the notion of many objects ; and it disappears on the destruction of the 'distinctive notions.' '*Khalu,*' is meant to lend force to the declaration. We must explain '*ekatvebhyah*' as equivalent to '*ektave ca, ekatvāni ca, tebhyah*' ; otherwise the assertion would not include the origin of *duality* (which proceeds from *two unities* only, which would be expressed by the word '*ekatve*' and not by '*ekatvāni*') So also, in the clause, *accompanied by the notion of many objects*, the word '*anēka*' must be taken in this literal sense of '*not one,*' as applying to *two* as well as to *more than two*.

The author now proceeds to prove the aforesaid assertion by means of a discussion, beginning with the question "How ?"

Digitized by Google

At the time that there is a direct contact of the perceiver's eye with two like things, as two jars, or with two unlike things, like the jar and a piece of cloth,—then there arises a knowledge of the *unity* inhering in the two unities belonging to the two objects; as the knowledge of the qualified object is always brought about by the knowledge of the qualifications; and '*unity*' is the qualification of the properties of the two *units;* we take into consideration the knowledge of the singleness. But a visual cognition is never possible without proximity; and hence we have shown that *unity* is related to the sense-organ (of vision) by the relationship of inherence in that (*unit*) which inheres in the thing (jar) which is in direct contact with the organ.

The knowledge of 'unity' having thus been produced, that *singleness* becomes related to the two qualifying *unities;* and from the said knowledge there follows a single idea with regard to the two qualifying *unities*; the organ (in the case of visual perception) is one only, because of the impossibility of both Eyes being simultaneously enlivened by the internal organ; and thus in all cases, the perceiving being done by one organ only, the presence of another eye would be wholly useless. Consequently it is held that the two eyes together constitute the *organ of vision ;* and in all cases of visual perception, it is from both eyes that rays of light proceed; these rays of light come into contact with the object perceived ; in the same way as the rays of light emanating from a lamp in the house strike the outside object through two apertures in the wall. What is enlivened and guided by the Internal Organ is the Visual Organ directly by itself, and not through its relationship with the object; as the Internal Organ never moves out of the body; and as such it gives rise to the cognition only by means of its relationships established through the Visual Organ. And thus it becomes possible, through the power of the causes of perception, to have a simultaneous cognition of more than one object. Though the

power or potency of the causes is such, yet it gives rise to only one cognition at a time; because the contact of the Soul and the Internal Organ (which is a necessary element in the cause of cognition) is capable of producing a single cognition at a time.

Page 116] It is on account of this fact, that we have 'determinate' or 'concrete' cognitions as well as 'non-determinate' or 'abstract' ones; because there come up, in such cases, a number of impressions of several objects of verbal conventions; these impressions becoming operative give rise to certain remembrances; and then through the force of the contact of the Soul and the Internal Organ, there appears a single cognition accompanied by the remembrance of several objects.

Question: "Granted that there has appeared a single idea with regard to several qualities;—what then?"

Answer: Then on the basis of this idea, the two *unities* the qualities of 'one,' produce, in their substrate, *duality*. In this, the two substrata constitute the *material*, and the two qualities of 'one' the *immaterial*, and the idea of several objects, the *instrumental* or efficient, cause.

When there appears a single idea with regard to the two qualities of 'one,' then the two *unities* produce *duality*;—this is spoken of as constituting one point of time *viz.* the '*lava*' made up of two *moments* or '*kshaṇas*.' If we calculated in terms of the *moment* alone, then the time involved in the production of *duality* could not be spoken of as *one*; as the cause (the ideas of two unities) and its effect (the duality) appear at distinct *moments*.

Nor is there anything very uncommon in the production of an *object* (duality) from an *idea* (of two *unities*); because we find such *objects* as pleasure and pain proceeding from ideas. Nor can it be rightly argued that we have never found any external object being produced by Ideas. Because whether the effect is internal or external is a mere minor detail; the fact of being invariably concomitant with Ideas is common to both cases (of internal and external effects).

Digitized by Google

Objection: "It having been fully established that Duality is manifested by the substratum of the two qualities (of *unity*), it could not be proved that Idea is the immediate antecedent (cause) of that (duality)."

Reply: Not so; because that would lead to an absence of all restrictions. That is to say, if Duality were not born of Ideas, then, like Colour &c., it could be perceived by other persons also, as there would be no restricting cause; whereas when it is born of Ideas, it can be perceived by that person alone by whose ideas it is produced. The argument may be stated in this syllogistic form:—Duality is born of ideas,—because it is always cognised by a single person—that which is always cognised by a single person is always born of ideas *e. g.* Pleasure &c.,—Duality is always cognised by a single person,—hence it must be born of ideas.

The production of Duality having been explained, the author next proceeds to describe the means of cognising it—*Tatah punah &c. i. e.* after the production of Duality, there arises a cognition of Duality *in general* (*i. e.* the generic form of Duality). Herein also the cause of cognition lies in the inherence of something inhering in a thing that is in contact (with the cognitive organ). The expression '*punah*' has been added with a view to distinguish 'Duality' from 'Unity' in general. The generality 'Duality' is a qualification of the quality of Duality; and so long as the *qualification* is not cognised, there can be no cognition of the *qualified*. It is for this reason,—for the purpose of explaining the means of cognising the qualified (quality of Duality),—that the author has begun with pointing out the means of cognising the qualification, the generality 'Duality.' That this generality exists is also evidenced by the idea of 'Duality' qualified by the idea of the generality 'Duality'; and the idea of Duality again is proved by the idea that we have in the form '*two objects*.' The argument may be thus stated:—The idea of 'two objects' is preceded by the idea of

the qualification *Duality,*—because it is an idea of a qualified thing,—like the idea 'man with the stick.' And the idea of the qualification having been thus inferred, the idea also being in its turn found to be one of a qualified thing (the quality of Duality as qualified by the generality of 'Duality'), comes to be inferred as being preceded by the idea of that qualification.

Page 117.] Some people hold that both the *qualification* and the *qualified* form the substrates of a single idea. But, say others, what would these people say with regard to the case of the idea of 'fragrant sandal-wood'? For certainly the Eye (organ of visual cognition) cannot comprehend odour (fragrance); and the nose (the organ of odour-perception) cannot *see* the object (sandal wood); and hence these two organs cannot be accepted as comprehending or perceiving the relationship between *fragrance* and the *sandal-wood,* as the perception of relationship would depend upon the perception of the two factors related. As for instance, direct perception of recognition, produced by sense-action and Impression (respectively) is found to pertain to the past and the present, simply on account of the power of the two causes (Sense-action and Impression). In the same manner, the cognition 'fragrant sandalwood' must be regarded as brought about by the joint action of the Eye and the Nose; and the fact of its pertaining to two objects (odour and sandalwood) is due to the power of the two sense-organs.

This however is not quite right; as a Cognition or Idea is not a thing made up of parts; if the Idea were something made up of several parts, then alone could there be any possibility of one part of it being produced by the Nose and another by the Eye. As it is however, the Cognition is one impartite whole, sensed by means of the two organs, and comprehending the odour as well as the substance possessing the odour. From this it would follow that the odour is cognisable by the Eye, and the substance by the Nose; for the simple reason that the cognisability of a thing by an organ depends solely upon the fact of that thing being the object of cognition produced by that

Digitized by Google

organ. But the Mind being atomic, it could not operate upon two senseorgans at one and the same time. Hence it must be admitted that what occurs in the case in question is that the odour is at first perceived by the Nose; and then what the Eye does is to bring about the cognition only of the substance qualified by that odour; and thereby it aids the previous cognition of the odour. This must be admitted by all disputants, whether they like it or not.

Such then being the case, with regard to all cognitions of qualified things, we may lay down the following principle: 'The cognition of the qualified thing in question refers to the qualified thing alone (and not to the qualification),—because it is a cognition of the qualified thing, obtained by means of the senses,—like the cognition of the 'fragrant sandal-wood?' We have added the qualification 'obtained by means of the senses' in order to exclude inferential knowledge.

Objection: "If the mere form of the substance be the substratum of the cognition of a qualified thing, then such a cognition could be possible even when there would be no qualification. It might be argued that, in as much as the qualification would be the originative cause of the cognition in question, the said contingency of the cognition of the qualified thing appearing in the absence of qualifications would not be possible. But in any case the cognition of the *qualified* substance would not differ from that of the substance itself independently of the qualification, because when there would be no difference in the objects cognised, there could be none in the cognition."

Reply:—All this is not possible; because we do not admit of the supposition you put forward. That is to say, we do not hold that the cognition of the qualified thing has for its substratum the form of the thing alone; what we hold to be that substratum is the *qualified thing;* and certainly the character of being qualified is something distinct from the mere form of the thing; for instance, in the case of the idea of 'man wielding a stick',

what is cognised is not the form of the *man* alone, nor the mere *presence of the stick*; but a man differing from other men; and this difference lying only in the fact of his carrying a stick. It is for this reason that the qualification is called the *'differentia'* (that which differentiates); for instance the *stick* bringing about the cognition of its subserviency (or belonging) to the *man*, serves to differentiate him from other men. It is in this point that lies the difference of the *viçeshana* (Differentia, Inseparable or Inherent Property) from the *upalakshana* ('some feature purely accidental'). This latter also serves to distinguish the object to which it belongs, but it does not bring about the cognition of its own subserviency. For instance, in the case of the word *'dandin'* (man with the stick) the idea produced is that of the stick being subservient to the man; but in the case of the expression *'jatābhistāpasah'* (the ascetic marked by the matted locks), the presence of the locks is not recognised as necessarily subservient to the ascetic. What is meant by the *subserviency* of the stick is that the 'man is the predominating factor'; in view of his effective actions, wherefrom the fruits of experiences accrue to him.

Objection: "In that case the character of the *qualification* and the *qualified* is not absolute, but only relative."

Reply: Not so; do not you know that the character of the Agent and the Instrument also is absolute as well as relative? All this we have explained in detail in the *Sangraha-tīkā*.'

Page 118.] *Dvitvasāmānya-jñanāt apékshā-buddhērvinaçya-ttā.* By *apekshābuddhi* is meant the cognition of the two *Unities*; and this cognition is destructible by the knowledge of the generality of 'Duality'; *i. e.* the cognition is brought into contact with its destructive cause by this generality. And in as much as this generality is related to the quality of *duality*, and is cognised as along with this quality, from it originates the cognition of the quality of *duality*; which is brought into close proximity with its productive cause by that generality.

Thus the cognition of the generality of 'Duality' is destructive of the *Apekshā-buddhi* and productive of the cognition of the quality of Duality,—both of these, the destruction and the production, being simultaneous.

Thus then, the destruction of *Apekshā-buddhi* becomes the cause of the destruction of Duality; as while the former is present, the latter is never found to exist. Hence the destruction of the *Apēkshā-buddhi* constitutes the destructibility of Duality. We often find a thing being destroyed by its instrumental or efficient cause; as when the last Perception of the Truth is destroyed by the destruction of the body, on the occasion of final Deliverance.

Then again, the cognition of the quality 'Duality' is the cause of the destruction of the cognition of the generality 'duality'; because one cognition is not compatible with another cognition (that is to say, two cognitions cannot coexist simultaneously). And the cognition of the quality would also be the cause of the cognition of the substance to which the quality belongs. And thus the appearance of the cognition of the quality would mean the destruction of one cognition, and the appearance of another.

Dvitvaguṇajnānasambandhēbhyah—*i. e.* From ont of (1) *the quality of duality*, (2) *the cognition*, and (3) *the relationship*, there follows the cognition, in the form 'two substances'; and this appearance of the cognition of the substance means the destruction of Duality, which in its form means the destruction of the cognition of quality,—all these three occurring at one point of time. Though at the time of the appearance of the cognition of 'two substances' there is no Duality, yet that is its cause; and certainly there is no use in the actual continuance of the cause at the time of the production of the effect; specially as the potency of the cause lies only in its bringing about an operation tending towards the production of the effect; and hence if this has been done by the

मानेन शब्दकारणतयैव तत्सिद्धौ व्योम्नस्तदन्यकारणत्वकल्पनायां मानाभावात् । अत एव पुत्त्रं प्रति पूर्ववर्तित्वे ज्ञाते पितुस्तज्जन्यघटादिकं प्रति पूर्ववर्तिता ज्ञायत इति पुत्त्रस्य कार्ये पितान्यथासिद्धः कारणताग्राहकस्य स्वतन्त्रान्वयव्यतिरेकस्याभावात् । दण्डसंयोगभ्रामणयोस्तु नैवं तयोर्युगपदेव पूर्वभावित्वग्रहात् दण्डे भग्नेपि सतो भ्रामणस्य पूर्वभावित्वग्रहान्न दण्डरूपवदन्यथासिद्धिः । न च यागस्यापि स्वर्गं प्रति पूर्ववर्तित्वे ज्ञात एवापूर्वे तत्त्वं ज्ञायत इत्यपूर्वं प्रति यागोप्यन्यथासिद्धोस्त्विति वाच्यम् । अत्रैवं रूपत्वेपि अपूर्वकारणताग्राहिकायाः प्रतीतस्वर्गसाधनतानुपपत्तेः सत्त्वात् । तथा च यद्व्यवहितयोः शब्दादिना कार्यकारणभावे गृहीते तन्निर्वाहाय मध्यमः कल्प्यते तत्र नान्यथासिद्धिगन्धोपि । न हि प्रथमस्य मध्यमं प्रत्यकारणत्वे तद्द्वारा चरमं प्रति कारणत्वं निर्वहतीति तथा चान्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतत्वं यथा गन्धवति गन्धानुत्पादात् गन्धं प्रति गन्धप्रागभावस्य पूर्ववर्तित्वकल्पना तत एव पाकजस्थलेपि गन्धोदयसम्भवे रसादिप्रागभावानां त्रयाणामपि गन्धं प्रति कारणत्वं न कल्प्यते गौरवादित्यन्यथासिद्धत्वम् । एवञ्च सर्वत्र कारणताग्राहकाभावो मूलमन्यथासिद्धेरिति द्रष्टव्यम् । एतावदन्यथासिद्धिरहितं सत् यत्पूर्ववर्ति भवति तत् कारणम् । तत्र प्रागभावावच्छिन्नस्तु समयः पूर्वपदार्थः तत्र प्रतियोग्यन्यूनानतिरिक्तकालीनावधिकयावत्परत्वाश्रयसमानकालीनः कादाचित्कोऽभावः प्रागभावः जन्यगुणकर्मणोरपि प्रागभावः सम्भवति स च न प्रतियोग्यवधिकपरत्वाश्रयसमानकालः तत्प्रतियोगिनाममूर्त-

त्वेन परत्वोपाधित्वासम्भवादतः प्रतियोगि च तद्भिन्न-ञ्च तत्कालीनं द्वयमपीदृशं भवति । तत्र गुणकर्मणोः प्रतियोगिभिन्नमन्यत्र तु प्रतियोग्येव ग्राह्यम् एतादृशं प्रतियोगिन्यूनकालीनमपि तदधिकपरत्वाश्रयस्य च न समानकालीनो भवति घटादिप्रागभावस्तस्य घटाद्युत्प-त्त्या प्रागेव नष्टत्वादतोऽन्यूनेति । एवञ्च प्रतियोग्युत्प-त्तिक्षणोत्पत्तिक इत्यर्थो विवक्षित एतावत एवार्थस्य प्रागभावनिरूपणे उपयोगः शेषन्तु सम्पातायातमत एव समानकालीनपदार्थनिरूप्ययावत्परत्वाश्रयतुल्यकाल इति प्राञ्चोपि व्याचक्रुः । एवञ्च प्रतियोगिसमानकालोत्पत्ति-कावधिकपरत्वाश्रयो यत्र प्रतियोगिध्वंसानन्तरमप्यनुव-र्तते तत्र तु ध्वंसस्यापि प्रतियोगिसमानकालावधिकपर-त्वाश्रयसमानकालत्वमस्तीत्यतिव्याप्तिरतो यावदिति पर-त्वाश्रयविशेषणं ध्वंसस्तु नैवं पूर्वनष्टैः प्रतियोगिपरै-रसमानकालीनत्वात् । अत्र यावदिति यदि परत्वविशे-षणं तदासम्भवः न हि यावन्ति तदधिकानि परत्वानि कारणात्मक आश्रयः सम्भवति । अथाश्रयविशेषणं तदा-नन्वयः परत्वपदेन व्यवधानादिति यद्यपि तथापि परत्वा-नन्तरं यावत्पदं पठनीयमिति सम्प्रदायः । यथोक्ताव-धिकयावांश्च परत्वाश्रयः परत्वस्य तदधिकत्वेन तदाश्रय-स्यापि तदधिकत्वोपचारादिति केचित् । न चान्त्यशब्दस्य क्षणिकतया मूर्तस्य चाक्षणिकतया तदन्यूनानतिरिक्त-कालीनस्याप्रसिद्धया तत्प्रागभावाव्याप्तिरिति वाच्यम् । तस्यापि कालनाश्यत्वेन क्षणिकत्वानभ्युपगमात् । वस्तु-तस्तु छित्रिक्षणावस्थायिकमपि मूर्तं प्रतियोग्युत्पत्तिक्ष-णोत्पत्तिकं भवत्येव एतावदेव चेह विवक्षितमतो न

तदव्याप्तिः किन्तु खण्डप्रलयकालीनपरमाणुपरिस्पन्दानां प्रागभावव्याप्तिविरहदोषः । न हि तदभावविवक्षितपरत्वाद्यवधिभूतं मूर्तमस्तीति किन्तु गन्धानाधारसमयानाधारोऽभावः प्रागभावः गन्धत्वं स्वाधिकरणानधिकरणानधिकरणकालवृत्तिः कार्यमात्रवृत्तिधर्मत्वात् एतद्घटवदित्यस्य सत्त्वादिति स्वपदेन क्षारीकृतत्वात् किन्तु शब्दध्वंसः शब्दप्रागभावरहितवृत्तिः ध्वंसत्वात् घटध्वंसवदिति हि तत्र समानम् । ननु पूर्वसमयः प्रागभावविशिष्टो वा प्रागभावोपलक्षितो वा । नाद्यः तद्विशिष्टे तदवृत्त्या प्रागभावस्य पूर्ववर्तित्वाभावादकारणत्वापत्तेः । नापरः पूर्वसमये पूर्वसमयस्यावृत्त्या तस्याकारणत्वापत्तेः ध्वंसे प्रतियोगिनो ऽकारणत्वापत्तेश्च । न हि ध्वंसस्य प्रागभावः सम्भवति । प्रतियोग्येव तस्य प्रागभाव इति चेत् । न । तस्य जन्यभावस्याजन्याभावतादात्म्याभावादित्यभिप्रेत्य सहकारिविरहप्रयुक्तकार्याभाववत्त्वं तत्त्वमित्याहुः । शिलाशकलन्तु न तथा तस्याङ्कुरानुपधाने शिलात्वस्यैव प्रयोजकत्वादेवं च सहकारिविरहव्याप्यकार्यप्रागभाववत्त्वं तत्त्वमिति चेत् । न निमित्तासमवायिकारणाव्याप्तेः न हि तत्र कार्यप्रागभावोऽस्तीति । उच्यते । कारणे बीजादौ कार्यतदभावौ तावद्ध्रियेते तत्र बीजस्याङ्कुरासम्बन्धः कैवल्येनावच्छिद्यते न च बीजत्वेन सहकारिसहितात्तत एवाङ्कुरोदयात् शिलायान्तु शिलात्वेनैव शिलायामङ्कुरासम्बन्धाव्यभिचारात् । एवञ्चान्यासमवधानावच्छिन्नकार्यासम्बन्धिकत्वं कारणत्वम् । न च भक्षितविनष्टबीजाव्याप्तिः तस्यापि सत्त्वदशायामङ्कुरासम्बन्धस्यान्यास-

म्यन्धिनि चावच्छेदनात् । तदेव हि बीजं सत्त्वदशायां यदि सहकारिभिः सम्पत्स्यते अङ्कुरमजनिष्यदेवेति न चासमवाय्यादीनां कार्यसम्बन्धनियतानामव्याप्तिः आजानिकधर्मावच्छिन्नकार्यासम्बन्धस्य विरहः कारणत्वमस्य चासमवाय्यादावपि सत्त्वादिति कारणत्वं तावन्नियतप्राक्सत्त्वविशेषस्तद्ग्रहश्चान्वयव्यतिरेकाभ्यां नियतेनान्वयेन वा । नन्वस्तु या कारणता सापि कथं ग्राह्या तथाहि कारणता ह्यविशेषिता न गृह्यते किन्तु घटादिकार्यविशेषिता विशेषान्वयव्यतिरेकाभ्यां तस्या एव ज्ञानसम्भवात् । सा च न पूर्वकाले ग्राह्यविशेषणीभूतकार्यविरहात् कार्यसत्त्वकाले च तत्प्रागभावघटितसामग्रीविरहान्न कार्यजननविशेषितं कारणत्वमस्तीति न कदापि घटकारणत्वमस्तीति न कदापि घटकारणत्वमध्यक्षं स्यात् । अथ संस्कारोपनीतकारणत्वमादाय कार्यकाले प्रत्यक्षेण कारणविशिष्टकार्यग्रह इति चेत् । कार्यविशेषितस्य कारणस्य पूर्वक्षणे कार्यासत्त्वेनासत्तया ग्रहणाभावेन संस्काराभावात् । अनुमानेन तद्ग्रहे तत्राप्यनुमानान्तरेण तद्ग्रहेऽनवस्थापत्तेः । न चैवं कारणत्वाग्रहे तवापि प्रवृत्तिनिवृत्ती न स्तामिति वाच्यम् । ममानिर्वचनवादिनो दोषास्पर्शात् । कार्यस्य कादाचित्कत्वान्यथानुपपत्त्या दण्डादेः कारणत्वग्रह इति चेन्न । कदाचित्कार्यत्वस्य कार्यधर्मत्वेन कारणत्वस्य च कारणधर्मत्वेन नियतवैयधिकरण्येनाक्षेपायोगात् । न चार्थान्तरापत्तेर्वैयधिकरण्येनापि गमकत्वम् । अत एव देवदत्ताभावो गृहवृत्तिर्देवदत्ते बहिःसत्त्वं कल्पयति । अत एव चानुमानादसौ भिद्यते अपक्षवृत्तित्वात् । न च गृहसत्त्वाभावप्रतियोगित्वमाक्षेपकं देव-

दत्तासन्निकर्षे तद्विशेष्यकप्रत्यक्षतृतीयलिङ्गपरामर्शासम्भवात्। तथाप्युपपाद्योपपादकयोरसम्बन्धेऽतिप्रसङ्गात्। सम्बन्धे च सम्बन्धस्यापि सम्बन्धान्तरे चानवस्थानान्नोपपाद्योपपादकभाव इति। किञ्च कार्यवत्कारणस्यापि कादाचित्कत्वेन कारणत्वेऽनवस्था अकारणत्वे च पूर्वावधिविधुरत्वे तन्मात्रावधेः कार्य्यस्यापि पूर्वावधिविधुरत्वं स्यादिति । अपि चास्तु यत्किञ्चित्कारणत्वं तदपि प्रत्यक्षं यदि तदा स्वविषयप्रत्यक्षे तस्य कारणत्वं वाच्यं तथा चात्माश्रयः कारणत्वे कारणत्वबुद्धिस्वीकारात् । न च विषयाविशेषितस्य सन्निकर्षमात्रस्य साक्षात्कारणत्वमतिप्रसङ्गात् । इन्द्रियस्याप्यर्थवदेव कारणतापत्तेश्च। अपि च कारणत्वाकारणत्वसन्देहोच्छेदकं किञ्चिदवश्यं वाच्यम् । अन्यथा तदुच्छेदो न स्यात् । तथा च तदेव कारणत्वस्थानेऽभिषिच्यतां लाघवादावश्यकत्वाच्च । किञ्च कारणत्वं दण्डादेर्यदि स्वभावधर्मस्तदा यावत्सत्त्वं करोतीति धीः स्यात् । आगन्तुकत्वे च कार्योपधानात्प्राक् तद्धीर्न स्यात् । किञ्च कारणत्वं घटादिनिरूपितप्राक्सत्त्वमिति कारणव्यक्तिभेदात् कार्यव्यक्तिभेदाद्भिन्नमित्यनुगतधीव्यवहारौ न स्याताम्। किञ्च समवाय्यसमवायिनिमित्तानि कारणानि वृक्षशिंशपयोः सामग्रीद्वयं तदा कार्यद्वयं स्यात् । यद्येकैव तदा वृक्षाः सर्वे शिंशपात्मका एव स्युरिति खण्डनम् । अत्रोच्यते । घटकारणत्वं घटनियतप्राक्सत्त्वं तत्र च संस्कारोपस्थितो घटो विशेषणीभवति । एवं घटस्य दण्डकार्यत्वे संस्कारोपस्थितो दण्डः कारणत्वन्तु सामान्यं नियतप्राक्सत्त्वमात्रमेव । नन्वन्वयव्यतिरेकाभ्यां कथं कारण-

स्वग्रहः। ननु लिङ्गीभूय तौ तद् ग्राहयतः। न चान्वयव्यतिरेकप्रत्यक्षेण तद्ग्रहो भिन्नविषयत्वात्। नापि तज्जन्मना संस्कारेण विषयभेदात् तथथा संस्कारो ह्यन्वयव्यतिरेकालम्बन इन्द्रियन्तु प्राक्सत्त्वसम्बद्धमतो नानयोः सहकारो विषयभेदात्। दण्डस्य घटकारणत्वग्रहे नैवं तत्र द्वयोरपि संस्कारेन्द्रिययोर्विशिष्टालम्बनत्वादिति। मैवम्। अन्वयव्यतिरेकग्राहकं हि प्रत्यक्षं तद्धर्मिभूते कार्यकारणे अपि विषयीकरोति कारणताग्राहकमिन्द्रियमपि तत्सम्बद्धमेवेति भवत्येवानयोः सहकारिता समानविषयप्रत्ययत्वादिति। न च पूर्वभावित्वमपि दुर्वचं पूर्वकालसम्बन्धित्वस्यैव तत्त्वात्। न च पूर्वकाले सम्बन्धाभावात्तत्कालस्याकारणतापत्तिः। य एव दण्डे पूर्वकालसम्बन्धः स एव पूर्वकालेपि सम्बन्धस्योभयनिष्ठत्वात्। एतेन प्रागभावस्यापि हेतुत्वं स्थापितं कार्यप्रागभावोपलक्षितसमयसम्बन्धस्य कार्यप्रागभावेपि सत्त्वात्। न चैवं ध्वंसं प्रति कारणता न स्यात् तस्य प्रागभावाभावादिति वाच्यम्। प्रतियोगितत्प्रागभावान्यतरावच्छिन्नसमयस्यैवेह पूर्वसमयपदार्थत्वात्। न चैवं पूर्वपदस्य नानार्थतापत्तिः अगत्या तस्यापीष्टत्वात्। ननु कार्योपस्थिततत्सामग्र्यस्ति न वा आद्य उत्पन्नमपि तदुत्तरक्षणे पुनरुत्पद्येत्। अन्त्ये उत्पत्तिक्षणेपि नोत्पद्येत् तत्काले सामग्रीविरहात्। पूर्वक्षणस्यैव सामग्री अव्यवहितोत्तरक्षणं कार्यमर्जयति स्वभावादिति चेत्। तर्हि व्यवहितक्षणस्थमप्यर्जयेदविशेषादिति। मैवम्। प्राप्त्यप्राप्तिसमापत्तेः तद्यथा त्वदुक्तमपि दूषणं दुष्टबुद्धिं प्राप्य जनयेदप्राप्य वेत्यस्य मयापि सुवचत्वात्। ननु कारणसत्त्वे

कार्यसत्त्वं कारणासत्त्वे कार्यासत्त्वमिति नान्वयव्यतिरेकौ किन्तु प्राक्कार्याबुद्धौ तत्कारणबुद्धौ कार्याबुद्धौ अबुद्धिद्वयं तत्प्रत्यक्षमित्यबुद्धित्रयमनुपलम्भ इति। तदुक्तं कीर्तिना।

धूमार्थवह्निविज्ञानं धूमज्ञानमधीस्तयोः।
प्रत्यक्षानुपलम्भाभ्यामेभिः पञ्चभिरन्वयः॥ इति।

तदसत्। इदन्तु कारणताग्राहकं न तु कारणत्वमित्यस्योक्तत्वात्। तत्रापि नियतव्यतिरेकेण कारणताग्रहो नियतान्वयव्यतिरेकाभ्यां न त्वदुक्तपञ्चकेनाकारणसाधारण्यादिति। ननु न्यायमते नियतप्राक्सत्त्वं तावत् कारणत्वं तेन तदैव करोतीति प्रयोगः स्यादिति चेत्। न। कार्योत्पत्त्यनुकूलव्यापारवत्त्वस्य करोतिना प्रतिपादनात् प्रकृते तादृशव्यापाराभावात्। यत्तु दण्डघटयोर्विशेषयोः कारणत्वं दण्डघटत्वाभ्यां वा एतद्घटत्वैतद्दण्डत्वाभ्यां वा नाद्यः न हि विशेषयोः सम्बन्धः सामान्याभ्यामवच्छिद्यते ऽतिप्रसक्तत्वात्। नापरः न ह्यन्ययोरन्वयव्यतिरेकौ किन्तु दण्डघटयोरेवेति। मैवम्। सा हि सामान्यरूपेणापि विशेषाणामेव हि सम्बन्धो गृह्यते न तु तदस्पृष्टस्य सामान्यमात्रस्य तस्य शशविषाणायमानत्वात्। तदुक्तम्।

न निर्विशेषं सामान्यं भवेच्छशविषाणवदिति।

कथं तर्हि विशेषसिद्धिः सामग्रीविशेषात् सामग्रीविशेषेण घटविशेषः सिध्यति। कारणानान्तु सामान्यार्जने शक्तिः सामग्रीविशेषात्तु विशेषः सिध्यति। यथा शब्दानां पदार्थसामान्ये शक्तावपि वाक्यविशेषादन्वयविशेषधीः व्याप्यस्य व्यापकसामान्यबुद्धौ सामर्थ्येपि पक्षधर्मतासहकारेण पक्षवृत्तिसाध्यसिद्ध्यादि। एवं सिद्धे कारणत्वे तद्विशेषश्चिन्त्यते। ते च त्रेधा समवाय्यसम-

वायिनिमित्तभेदात् । यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणं यथा रूपादौ घटादि । यस्मिन् सति कार्यं नास्तीति तत्समवायिसाम्यम् । यस्मिन् कारणे विद्यते तद्गुणकर्मान्यतररूपमसमवायिकारणं पर्युदासे नञ् यथा पटे तन्तुद्वयसंयोगः घटरूपे कपालरूपमित्यादि । यत्तु न कार्याधिकरणं न वा कार्यस्थितिनियामकं किन्तु कार्योत्पत्तिनियामकमात्रं तन्निमित्तकारणमिति । न च कालत्रयानिरुक्तिः । कालस्य स्वभावत ऐक्येपि उपाधिभेदेन तावद्भेदव्यवहारात् । तदुपाधयश्च घटादय एव तथा च तत्स्वरूपेणावच्छिन्नः कालः तस्य वर्तमानः कालः तत्प्रागभावेनावच्छिन्नः तस्य पूर्वकालः तद्ध्वंसेनावच्छिन्नस्तस्योत्तरकालः । तदुक्तमात्मतत्त्वविवेके । वर्तमानैकस्वभावत्वाद्भावानामिति । नन्वेवं ज्ञानावच्छिन्नः कालो ज्ञानस्य वर्तमानः कालस्तत्र च जानामीति लट् साधुः । तथा च घटज्ञाने स्वोत्पत्तितृतीयक्षणे ध्वस्ते चतुर्थक्षणे घटमहं जानामीति न स्यात् । स्यात् चतुःक्षणरूपस्य स्थूलकालोपाधेर्घटज्ञानवत् स्वरूपोपहितत्वात् । यः कालो यस्य प्रागभावेनावच्छिन्नः स तस्य सतः पूर्वकालः । यश्च यस्य प्रध्वंसेनावच्छिन्नः स तस्य भविष्यत्कालः । एवञ्च भूतभविष्यद्वर्तमानत्वानि धर्मनिरूपकभेदात्प्रतिस्वम्भिन्नानि । न च प्रागभावप्रध्वंसयोरनिरुक्तिः गन्धानाधारसमयानाधाराभावस्य प्रागभावत्वात् । नित्यान्यत्वे सति प्रागभावातिरिक्ताभावस्य ध्वंसत्वात् । को हि प्रागभावस्य नाश इति । तदुक्तं तत्रोत्तरं प्रतियोग्येव नास्तिताव्यवहारस्य प्रतियोगिनैवोपपत्तेरतिरिक्ते प्रमाणाभावात् ॥

संशयनिरुक्तिखण्डनमप्यसत् । विरोधे भासमाने

विरोधिनानाप्रकारकैकधर्मिज्ञानत्वस्य तत्रिरुक्तित्वात्। एकस्मिन् धर्मिणि तज्ज्ञानालिङ्ग्यमानविरोधाभ्यां प्रकाराभ्यां यदेकं ज्ञानं संशय इति तदर्थः। संशयग्राहकन्तु ज्ञानं विरोधिनानाप्रकारकत्वप्रकारकं न तु विरोधिनानाप्रकारकं येन तदपि संशयः स्यादिति। ननु कोयं विरोधः सहानवस्थानमिति चेत्। न। संयोगतदत्यन्ताभावयोरेकत्रैव तरौ सहैव सत्त्वात्। अवच्छेदभेदाश्रयाणां तत्रापि सहभाव इति चेत्। मूढोसि। तथाहि परमाणौ हि परमाण्वन्तरस्य संयोगश्च तदभावश्च मन्यसे। न च तत्रावच्छेदः सम्भवति तरोः शाखावत् परमाणोः प्रतीकाभावात्। तत्राप्युदयाचलादालोकमण्डलः परमाणौ प्राच्यां दिशि लग्नः प्राच्यं परमाणुसंयोगमवच्छिनत्ति अस्ताचलादायातस्त्वालोकस्तस्मिन्नेव परमाणौ प्रतीच्यां लग्नः प्रत्यक्त्वन्तत्संयोगाभावमवच्छिनत्तीति चेत्। भ्रान्तोसि। न हि परमाणोः परमाण्वन्तरसंयोगेनानवच्छिन्नः कोपि भागोस्ति तस्य निर्भागत्वात् अन्यथा सभागो भवेत्। न च सापि नास्ति तस्यास्त्वयाभ्युपगमात्। अत एव यूपवच्च पङ्क्तिवत्स्यात्थेति। तस्मात्तदत्यन्ताभावयोर्देशगर्भं प्रतियोगिनैव समं प्रागभावध्वंसयोः कालगर्भं घटतदन्योन्याभावयोस्तु विरोध एव नास्ति एकस्मिन्नेव कपाले एकदैव स्थितेस्तादात्म्येन तु सममन्योन्याभावस्य विरोधो नियतवैदेश्यात्॥

अथेदानीं तर्कखण्डनकृदाह तर्को हि प्रसक्तमित्ययुक्तं सम्भावनायामव्याप्तेः इष्टापादने विपर्ययापर्यवसिते चातिव्याप्तेः तयोरतिप्रसङ्गत्वात्। वस्तुतस्तु यत्र पराभ्युपेतव्याप्तिरसेन परानिष्टाय तर्क्यते तत्र विपर्ययापर्यवसि-

तोपि परानिष्टाय प्रभवस्येव । तथाहि ज्ञानात्मा भवेदित्य-
प्रालीके विरोधो दृश्यते । यस्तु तर्कः स्वपक्षसिद्धये प्रवर्तते
तस्य परविपर्यये अनुमाने स्वयं दण्डभूतत्वेनाङ्गीभवतो वि-
पर्ययपर्यवसानापेक्षा । अत एव व्याप्यारोपेण व्यापकप्रस-
ञ्जनं तर्क इत्यपि निरस्तम् इष्टापादने मिथो विरुद्धेतिव्या-
प्तेश्च । किञ्च कार्यत्वाददृष्टजन्यमङ्कुरादि स्यात् हन्त तत-
एव कर्तृजन्यमपि स्यादिति सिद्धेनैव व्याप्येन यः प्रस-
ङ्गस्तस्य व्याप्तिः तत्रादृष्टजन्यत्वस्योभयानुमतत्वेन व्या-
प्यारोपादिति खण्डनम् । तन्न न हि सम्भावना तर्क
इति तार्किकः प्राह उत्कटकोटिकः संशयो ह्यसौ । तथा-
हि दूरादसौ कामीकहमवेत्याशोक एवायं प्रायः शतां-
शेन तु बकुलः स्यादिति । सोयं संशय एव उच्चावच-
भावेनापि कोटिद्वयालम्बनात् । तर्कस्तु सर्वस्मादेव
संशयाद्भिन्न इति ब्रूमः । संशयात् प्रच्युतो निर्णयं चाप्राप्त
इत्याचार्यवचनात् । इष्टापादने विपर्ययापर्यवसिते चा-
व्याप्तिरित्यप्यसत् । इष्टापादने प्रसङ्गमात्रस्य सत्त्वेनाहा-
र्यारोपरूपव्यापकप्रसञ्जनमस्ति । तथाहि क्षितिर्यदि कर्तृ-
जन्या स्यात् प्रयोजनिजन्या स्यादिति तावदिष्टापादनं
भगवतोपि प्रयोजनित्वात् । तथैवाभ्युपगमान्नैयायिकैः ।

जगच्च सृजतस्तस्य किन्नामेष्टं न सिध्यति ।
तदेवासृजतस्तस्य किं नामेष्टं न हीयते ॥ इति ।

तथा च नात्र प्रयोजनिजन्यत्वस्य व्यापकस्याहार्या-
रोपरूपं प्रसञ्जनमस्तीति । एवं विपर्ययापर्यवसितेपि
नातिव्याप्तिः । तथाहि यदीश्वरः कर्ता स्यान्नाशरीरो
स्यात् । अयं हि तर्को विपर्ययापर्यवसितः । ईश्वरस्य
सिद्धौ कर्तृत्वाभावानुमाने बाधात् । तदसिद्धौ चाश्रया-

सिद्धेरनुमानानवतारात्तद्विपर्ययापर्यवसानमिति । अत्र च नातिव्याप्तिः शरीरित्वस्य मन्मते कर्तृत्वाव्यापकत्वेन व्यापकप्रसञ्जनाभावात् । यत्तु पराभ्युपेतव्याप्त्यङ्ग-ङ्गाय परमात्राभ्युपेतव्याप्तिमङ्गेन यत्र तर्क्यते तत्र विपर्ययापर्यवसितोऽपि तर्कः सतर्क एव । यच्च असदपि स्फुरेत् ज्ञानं भवेदिति ज्ञानवादिकृत आपादने सौगतेन विरोधे दर्शिते अलीकं स्फुरति न च ज्ञानं तदिति तेषु एवं हि न विरोधापादनं तर्कः किन्तु तर्के मूलशैथिल्यं सौगतेनोच्यत इति त्वदुक्तमत्यन्तायुक्तम् । न हि तर्कमात्रे विरोधापादनं किन्तु तर्कदूषणमिह व्याप्यत्वासिद्धिरिति । यत्तु मिथो विरुद्धेऽतिव्याप्तिः तत्रापि हि व्याप्यारोपेण व्यापकप्रसञ्जनमस्तीति यथा शब्दो यद्यनित्यो न स्यात् कृतको न स्यादित्येकः यदि नित्यो न स्यात् श्रावणो न स्यादित्यपरः । तत्र कृतकश्चायं तस्मादनित्यः श्रावणश्चायमिति परस्परप्रतिबन्धेनानुमित्यनुत्पत्तेः करणयोः फलानर्जकत्वात् । उपकरणभूतावपि तर्काविमौ मिथो विरोधादाभासौ अत्रातिव्याप्तिरिति तन्न । न हि मिथो विरोधे उभयपक्षसत्त्वे व्याप्तिरस्ति । अन्यथा वस्तुनो वैरूप्यं स्यात् । यच्च यदि कार्यत्वादहष्टजन्यमङ्कुरादि स्यात्तदा तत एव कर्तृजन्यं स्यादिति तर्के सिद्धेनैव व्याप्येन प्रसङ्गो न तु व्याप्यारोपेणेत्येतदव्याप्तिदोष इति । तन्न । अयं हीष्टापादननामा तर्काभास इति । मन्मते तु शिथिलमूल इति अनुगुणस्त्वेतद्भिन्नः । तथाहि हिमं यदि दाहकतेजोवत् स्यात्तृणादिविकारकारि न स्यात् । भवति च तृणादिविकारकारि तस्माद्दाहकतेजोवदिति सिद्धव्याप्तिकत्वादाभासः । तदुक्तं

टीकाकृता । न हि त्रैलोक्यपरिपाकहेतोः सावित्रस्य रश्मेस्तुहिनादपगमः क्षमत इति । यस्यारोपितव्याप्ति- केनारोपितव्यापकताकस्य यदनुमानं तत्रातिव्याप्तिरत्र दोषः तत्रापि हि व्याप्यारोपेण व्यापकप्रसञ्जनमि- ति । अत्रोच्यते । व्याप्याभावप्रतियोगिकाधारता- प्रतियोगिव्याप्यज्ञानात् व्यापकाभाववत्ताप्रतियोगिका- धारताप्रतियोगिव्यापकज्ञानं तर्कः । अत्र व्याप्यज्ञाना- द्व्यापकज्ञानमित्यनुमितावतिव्याप्तमतः पूर्वविशेषणं त- स्यार्थः व्याप्याभावप्रतियोगिका या आधारता पक्षीकृत- स्य ह्रदादेस्तत्प्रतियोगि यद्व्याप्तं निर्वह्नित्वादि तस्य ज्ञाना- त्तेनोल्लिखिताभावस्य व्याप्यस्य ज्ञानादित्यर्थः । एवमपि धूमवान्निर्धूमो वायमिति संशये धूलीपटले धूमारोपादुत्प- न्नायामनुमितावतिव्याप्तिरत उत्तरविशेषणम् । अस्यार्थः । व्यापकाभाववत्ताप्रतियोगिका धूमवत्त्वादिप्रतियोगिका या आधारता तत्प्रतियोगि यद्व्यापकनिर्धूमत्वादि तस्य- ज्ञानं तेनावधारितव्यतिरेकस्य ज्ञानमित्यर्थतो न पूर्वोक्ता- नुमितावतिव्याप्तिरिति । यद्वा अव्यवस्थिताभ्युपगम्यमा- नकोट्युपाधिकानिष्टसत्त्वप्रतिबन्धानि तर्कः । तदुपाधिक- त्वञ्च तस्मिन्सति आवश्यकत्वम् । यथा शब्दो यद्यनित्यो न स्यात् कार्यो न स्यादित्यादौ समभिव्याहृतकोटेरभ्युप- गतत्वम् । अभ्युपगतञ्च द्वयमनिष्टस्यापीत्यत उक्तमनिष्टे- ति । अनिष्टत्वञ्च स्वीयकार्यताविरोधिधर्मवत्त्वं प्रमाणवि- रोधात् स्वाभ्युपगमविरोधाच्च व्याप्यारोपकोटेर्हीनबलव- त्त्वार्थम् । अन्यथा व्याप्यारोपव्यापकविरहबुद्ध्योः सत्प्र- तिपक्षः परं स्यान्न तु व्याप्यारोपस्य पराजय इति । स चायं तर्कः पञ्चविधः । आत्माश्रयान्योन्याश्रयचक्रका-

Digitized by Google

नवस्थातदन्यबाधितार्थप्रसङ्गभेदात् । तत्र स्वस्य स्वापेक्षा-मारोप्यानिष्टप्रसङ्ग आत्माश्रयः । स चायमुत्पत्तिस्थितिज्ञ-प्तिरूपद्वारभेदात्त्रेधा । तथाहि घटो यदि घटजन्यः स्यात् घटभिन्नः स्यात् । न चैतद्विपर्ययानुमाने घटत्वस्य हेतो-रसाधारणतया विपर्ययापर्यवसितत्वमस्येति वाच्यम् । विशेषदर्शने ह्यसाधारणस्यादोषता संशयस्य सत्प्रतिप-क्षस्य वा दुष्टबीजस्यानुत्थापनादिति । स्थितौ यद्ययं घट एतद्धटवृत्तिः स्यात्तदा तथा प्रतीयेत अत एव प्रमेयत्वं स्व-वृत्तित्वेन प्रमाणगोचर इति तत्रात्माश्रयो न दोषः । न हि प्रमेयत्वं न प्रमेयम् । ज्ञप्तौ तु घटज्ञप्तिर्यदि घटज्ञप्तिजन्या स्यादेतज्ज्ञप्तिभिन्ना स्यात् । न चेष्टापत्तिः स्वज्ञप्तेः स्वज्ञ-प्तिजन्यत्वनियमे त्वनवस्थानात् । स्वापेक्षापेक्षित्वनिबन्ध-नः स्वस्यानिष्टप्रसङ्गोऽन्योन्याश्रयः । अयमुत्पत्त्यादौ पूर्वव-द्द्रष्टव्यः । न चान्योन्याश्रयस्यात्माश्रयनियतत्वेनावश्यकत्वा-ल्लाघवाच्चात्माश्रय एव दोष इति वाच्यम् । साक्षात्स्वापे-क्षाया अभावात् परम्परया च तत्सम्भवे आत्माश्रयनिर्वा-हार्थं प्रथमोपस्थितस्य स्वतो दूषकत्वकल्पनात् । स्वापे-क्षापेक्षापेक्षित्वनिबन्धनोऽनिष्टप्रसङ्गश्चक्रकमिदमुत्पत्त्यादौ पूर्ववत् । अत्र त्रिकत्वमविवक्षितं चतुःकक्षादेरपि चक्र-कत्वात् तथैव हि तान्त्रिकव्यवहारात् । स चायं कक्षाभेद, आपत्तिप्रयोजकीभूतरूपवदापाद्यापादनमनवस्था । यथा ज्ञानं यदि समानकालीनसमानाधिकरणसाक्षात्कारवि-षयताव्याप्यजातिमत्स्यात् तदानुपदवेद्यं स्यात् सुख-वदेवञ्च तदप्यनुव्यवसीयेतेत्यर्थादनवस्था स्यात् । एषा-ञ्चाभासत्वे प्रामाणिकत्वं बीजं यथा बीजाङ्कुरादावि-त्यादि । उत्सर्गविनिगमकल्पना गौरवकल्पना लाघव-

Digitized by Google

प्रतिबन्द्यनौचित्यानि तु न तर्काः प्रसङ्गनात्मकत्वात् । तथाहि उत्सर्गस्तु बाधकैकापोद्यो नियमः ।

यथा

तस्माद्बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता ।
यथान्यथात्वहेतूत्थदोषज्ञानादपोद्यते ॥ इति ।

सोयं भूयः साहचर्यरूपो ज्ञानात्मक एव न भवति कुतस्तर्कः स्यात् । अविनिगमस्तु युगपदुपस्थितयोः प्रमाणाभावादन्यतरावधारणाभावः । अत्र च प्रमाणाभावो दोषो न त्वविनिगमः । लाघवगौरवे तु स्वल्पपरिच्छेदकत्वं प्रमाणानां स्वभावौ ज्ञानात्मकावपि न भवतः प्रमाणसहकारितामात्रेण द्वयोस्तर्कव्यपदेशोपि । प्रतिबन्दिस्त्वर्थान्तरम् । विरोधपरत्वे तु तदन्तर्भूतैव । अनौचित्यन्त्वौचित्यस्य प्रामाणिकत्वस्य विरहः प्रमाणाभावान्तर्गतः । न चार्थान्तरमर्थान्तरेण परिहरतः को दोषो वाच्यो यदनौचित्यं न दोषः स्यात् तच्च प्रमाणाभावान्तर्भावात् पृथगिति वाच्यम् । प्रथमार्थान्तरेणैव कथापर्यवसाने द्वितीयार्थान्तरस्यानवसरग्रस्तत्वात् । स चायं तर्को व्याप्तिग्राहको विषयपरिशोधकश्च । तथाहि व्यभिचारशङ्कानिराससहितं सहचारदर्शनन्तावद्व्याप्तिप्रत्यक्षकारणं तच्छङ्का च विरुद्धकोटावनिष्टमुपनयता तर्केण निवर्त्यते । केवलान्वयिन्यपि साधनसमानाधिकरणात्यन्ताभावप्रतियोगि साध्यं न वेति शङ्कास्त्येव सा च यद्यपि व्यापकतागोचरा तथापि समानसंवित्संवेद्यतया गोचरापि । न च शब्दादिना व्याप्तिग्रहे व्याघातेन शङ्कानुत्पादेन तर्कस्योभयत्राप्यकारणत्वमदोषाय विरोधिशङ्कानिरासमात्रेऽस्य कारणत्वोपग-

मात् । एवञ्च पुरुषप्रयत्नाधीनानुमितावस्य विषयपरि-शोधकतापि । तथाहि संशयाज्ञानाकोट्युपस्थितौ संश-यानुकारिण्युपस्थितनानाकोटिका जिज्ञासापि ततो जा-यते सा चांशतः साध्याभावविषयतया साध्यसिद्धिपरिप-न्थिनी तत्र तर्केण कोट्यन्तरेऽनिष्टमुपनयता सापनीयते यथा मधुविषसम्पृक्तान्नबुभुक्षामक्षणसाध्यानिष्टप्रतिस-न्धानेनेत्येवं परिशोधिते विषये तर्केण केवलसाध्यको-टिकजिज्ञासान्तर उत्पादिते समुत्पद्यमानस्तृतीयलिङ्ग-परामर्शोऽनुमितये प्रभवतीति । तर्काभासस्तु इष्टापादन-मनुगुणः प्रशिथिलमूलो विपर्ययापर्यवसितो मिथो वि-रुद्धश्चेति पञ्चधा । अत्राद्ये विपर्यये स्वरूपासिद्धिः द्वितीये सिद्धसाधनं तृतीये व्याप्यत्वासिद्धिः चतुर्थे बाधः पञ्चमे सत्प्रतिपक्षितत्वं प्रपञ्चितमिदं प्राक् । ननु तर्कस्य सकलप्रमाणसहकारितेति न्यायमतम् । तच्चायुक्तं विपर्ययापर्यवसाने ह्यस्य च तर्काभासतैव तत्पर्यवसाने-तु तदितिकर्तव्यतात्वमेव तर्कस्येति नोभयथाप्यस्य प्रत्यक्षाद्यङ्गतेति । नैवम् । विपर्यये यद्यपि प्रत्यक्षादिस्थले नायं पर्यवस्यति तथापि विपर्ययापर्यवसानयोग्य एता-वतैवादौ सत्तर्क इत्येतादृश इत्येवायं प्रत्यक्षादिसहकारो भवति । तथाहि यद्यत्र घटः स्यात्तदा भूतलवद्दर्शनगो-चरः स्यादिति । यत्तु यथा जात्युत्तरं स्वव्याघातकं तथा स-त्प्रतिपक्षोपीति । अयन्तु यद्विशेषो यज्ज्ञातावुत्तरमेव मन्दं सत्प्रतिपक्षे तु भाषापि । तत्र द्वयोरपि स्वव्याघातकत्वा-दिति गुरुणोक्तं तद्गुरुणोक्तमतः प्रागेव निरस्तमिति । एतावानर्थः सौत्र एव तथाहि पारमर्षसूत्रम् अविज्ञा-ततत्त्वेर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः । अत्र तर्क

इति लक्ष्यनिर्देशः शेषं लक्षणाय । अत्र ऊह इति कृते ज्ञान-
मात्रेऽतिव्याप्तिरत उक्तम् अविज्ञाततत्त्व इति । न विज्ञातं
विशेषतो ज्ञातं तत्त्वं वास्तवं रूपं यस्य तस्मिन्नर्थविशेष-
विशेषात् सामान्यज्ञानं धर्मिज्ञानञ्च तर्कहेतुसंशयहेतु-
र्लभ्यते । एवमपि तृतीयादिविग्रहेण बहुव्रीहौ मूढज्ञानमा-
त्रेतिव्याप्तिरत उक्तमर्थ इति । तथा च तृतीयविग्रहान-
न्तरं बहुव्रीहिसम्भवः विषयसप्तमी चानेन स्फोरिता ।
निश्चितेप्यर्थे पुनर्निश्चयार्थं य ऊहः स व्युदस्तः । एवमपि
संशयेतिव्याप्तिस्तद्वारणाय कारणोपपत्तित इति । कारणं
व्याप्यं तस्योपपत्तिराहार्यारोपः ततः एवमपीष्टापादनेति-
ऽव्याप्तिरत उक्तं तत्त्वज्ञानार्थमिति । तत्तु न तत्त्वज्ञानार्थं
भवति तद्विपर्ययस्याप्रमितत्वात् । अनेन निर्णयफलकता
दर्शिता । एवञ्च सम्बन्धो विषयः कारणमाहार्यारोपः
आहार्यतात्वस्यैच्छिकतामात्रेण न तु प्रतियोग्यारोप्यादि
बद्धाधितविषयत्वेनेति स्वरूपमनिष्टप्रसञ्जनं फलं निर्णयः ।
तर्कशरीरे यद्यपि पूर्वभागः करणव्युत्पत्त्या उत्तरभागस्तु
भावव्युत्पत्त्या तर्कपदार्थस्तथापि उत्तरभाग एव तर्कः सा-
क्षादनुमित्यनुकूलत्वादिति स एवात्र लक्ष्यः । नन्वात्मा-
श्रयादेर्मूलप्रमाणोपपत्तिश्चेत्तदा प्रामाणिकत्वाददोषत्वं
न चेत्तदा मूलशैथिल्याददोषत्वं तथा चैते सत्तर्का एवेति
खण्डनम् । तदप्यसत् । प्रमेयत्वं यदि प्रमेयवृत्तिः स्यात्तदा
प्रमेयत्वभिन्नं स्यादभिधेयत्ववदत्र तावन्न मूले प्रमाणोपप-
त्तेः प्रमेयवृत्तित्वप्रमेयभिन्नत्वयोर्व्याप्त्यभावात् प्रमेयत्व
एव तद्भङ्गात् । हन्त तर्हि मूलशैथिल्यं तदपि न पक्षता-
दशायामुद्भावनायोगात् । इदमेव वैलक्षण्यं गमयितुं प्रस-
ङ्गात्मनोप्यमी चत्वारोपि गोवृषन्यायेन पृथगुक्ता इति ।

cause, what would be the use of its continuance actually at the time of the production of the effect? For it would act as the cause through its operation (even when it would have disappeared after having set up that operation). Nor would this reduce the cause to the position of the secondary cause, the real causal efficiency belonging to the said operation. Because the causal efficiency cannot be regarded to have ceased merely with the intervention of the action of that same cause. If it were so, then in a case where a man has shot an arrow, and has been immediately struck dead by a stroke from behind, the man would not be regarded as the cause of the shooting of the arrow.

After that the cognition of the substance brings about the destruction of the cognition of the quality, and appearance of the "*sanskāra*" (Faculty or Impression). Then the appearance of this *sanskāra* means the destruction of the cognition of the substance. And at the next moment the *sanskāra* destroys the cognition of the substance. The fact of the *sanskāra* being the cause of this destruction of the cognition of the substance is inferred from the said destruction appearing only when the *sanskāra* is present, and never otherwise.

The above explanation of the production of Duality, holds good with regard to the production of 'three' &c. These also are produced out of many *singlenesses* accompanied by the notion of 'many' and destroyed by the destruction of the *Apekshābuddhi*.

Page 119.] The same explanation may be applied to the cases of the numbers 'hundred' and the rest also. That is to say, when each *unity* has been cognised by itself, these cognitions give rise to impressions in the same order as themselves; and after the last unity has been cognised, there becomes manifested an unseen potency tending to establish the usage or idea of 'hundred'; and the contact (of sense) being one only, there appears a single remembrance of objects more than one; and

Digitized by Google

then these two *Apekshābuddhis,* in the forms of direct cognition and indirect remembrance, produce the number 'hundred' in reference to their own substrate. This Number is affected by the impressions of all the substances (included in that number) and this must be regarded as perceptible directly by the senses, in as much as it forms the object of the cognition produced by the sense-organ coming into contact with the last (hundredth) substance.

Objection : "In many cases it so happens that we have the collective idea of a number ('hundred' for instance) after the things to whom the number belongs have been destroyed; e. g. we have the notion—'I have killed a hundred insects.' In this case, how would you explain the production of the number 'hundred'? As in this case there is no substratum wherein the number could be produced?"

Reply: In such a case the number is not produced, for want of the necessary substratum. As for the use of the word 'hundred', it must be regarded as secondary or figurative, just as in the case of Colour &c. Such is the explanation given by some people.

Others again hold that the idea of the number is exactly similar in both cases (i. e. when the things exist, as also when they are destroyed); and as such it is not right to take the use of the word to be secondary or figurative. Hence they told that the substratum of the number consists in the things destroyed which existed in the past, and which are recalled by remembrances of them. It is only such things as are absolute non-entities—like the 'sky-flower' and the like—which cannot serve as the required substratum. As for those that have existed in the past, though they are not connected with the present time, and their forms also are not present at the time in question, yet they become the material cause of the *number*, by being brought over to the present by means of memory, as aided by auxilliaries, the nature of which is quite compatible with reason. Nor would this theory entail the absurdity of

the possibility of such number being produced in any and every place. Because the said assumptions are made only in accordance with (and for the purpose of explaining) directly perceptible facts (which themselves cannot be denied).

It might be argued that if the past things could be the cause (of the number), then, in as much as direct cognition would be the cause of the necessary remembrance, there would be no use of assuming a *saṅskāra*.

But it is not so; because the direct cognition is utterly destroyed; and as such it could not have any causal potency unless it were recalled (by means of some such agency as that of *Saṅskāra*); and hence for the sake of its recalling, it becomes necessary to postulate the *Saṅskāra*. In the case of a Word, at the time that the last letter of the word is heard, though the preceding letters have all been destroyed, yet they are recalled to memory, and as such serve as the efficient cause in the denoting of the meaning of the whole word. In the same manner, such recalled things may serve as material causes also. Then too, just as the mind aided by the *Saṅskāra,* has the capability of remembering external things, so, in the same manner, it must be admitted, on the ground of palpable facts, that it has the power of bringing about direct cognition. Nor would this involve the impossibility of deafness, blindness &c; because the operation of the mind depends upon the functioning of the external organs of perception.

In a case where Duality is produced with regard to two things, one of which has been totally destroyed, and which is recalled by memory,—its destruction is due to the destruction of the *Apēkshābuddhi* in the form of remembrance. And in the case where Duality is produced while the substratum is extant, it is destroyed, not only by the destruction of the *Apēkshābuddhi* itself, but, in some cases, by the destruction of the substratum also; because there can be no notion of 'two' when either one or both of the two objects are destroyed. This is what is meant by the assertion *Kvacidāçrayavināçāt.*

Digitized by Google

The author proceeds to explain this in answer to the question—'how?'—put by an ignorant person;— *Yadā &c.* at the time when an action is produced in a part of the substance qualified by singleness, there arises the cognition of the generality 'Unity' inhering in the quality of singleness. And at the next point of time the said action separates that part from another part, and the cognition of the generality of 'unity' brings forth the *Apēkshābuddhi*; and then, at the very time that the disruption of the composite substance brings about the destruction of the conjunctive adhesion of the substance, there is produced Duality out of the *Apekshābuddhi;* and the destruction of the conjunction destroys the substance, and there is produced the cognition of the generality of 'Duality'; —all this constituting one point of time.

[**Page 120**.] When the cognition of the generality of 'Duality' destroys the *Apēkshābuddhi,* then the destruction of the substratum, leads to the destruction of Duality; and the cause of this latter destruction is not the destruction of the *Apēkshābuddhi*; because the two are found to co-exist.

Though there is no useful purpose served by the production of Duality which is destroyed without having given rise to the idea of 'two substances',—yet the production of the effect is such as is sure to come about whenever there is an efficient cause, and it is not necessary that there should be a useful purpose to be served by it; and hence what we have considered is only the production of the effect (Duality).

By means of the above process of the production of Duality, it has been shown that one cognition destroys that which has gone before it; this destruction is possible only when there is an opposition between the two cognitions; and this opposition some people hold to be of the same nature as that between the killer and the killed; while others regard it to be of the nature of mere *incompatibility* of co-existence; and the author accepting the former view, says—*Çobhanametad-vidhānan. Etadvidhānam* refers to the aforesaid process of the production

of Duality. In accordance with the theory that the opposition between two cognitions is of the same nature as that between the killer and the killed,—the second cognition having been produced at the next moment destroys the cognition of the previous moment; and this is quite proper. In accordance with the other view of 'opposition' however, the production or appearance of one cognition would be the destruction of another cognition (the appearance of the one constituting the destruction of the other, both of which therefore would never be simultaneous); and in accordance with this view it would not be possible for the idea of 'two substances' to be produced; and as such this theory cannot be right. This is what the author means.

He further explains this same thing—*Katham* &c. In accordance with the second theory, the *Apēkshābuddhi* would be destroyed at the time of the appearance of Duality; and this would lead to the destructibility of Duality; and the destruction of Duality would be simultaneous with the cognition of the quality; and hence at the second moment of time there could be no production of the cognition of 'two substances', which requires Duality; as there would be no cause for that production.

Objection: "*Laingikavat &c.* This is further explained "*Syānmatm &c.* Your view appears to be that, just as in a "case where the man is inferred from a particular kind of sound "or voice that is heard, it is only when the distinguishing "feature of the sound is known that it becomes a means of inference of the man existing at the present time, even though it "is itself destroyed and does not exist at the time of the inference; and hence it is the mere idea of the distinguishing "mark which, even though the 'mark' itself be not existent, "is enough for bringing about the inferential knowledge "— so also even though Duality were destroyed at the time "of the Cognition of the quality, the mere idea of Duality could "bring about the cognition of 'two substances'."

"Some people offer the following explanation: The action "of rain which does not appear becomes the inferential mark of "the past contact of the wind and the cloud; (and proves that "the clouds have been driven adrift by the wind); and in this "case even though the rain does not exist yet it is the mere "idea that serves as the inferential mark."

"But this explanation is not satisfactory; because in the "case of this inference, it is not the action of rain that is the "inferential mark; but it is the *absence of rain* which leads "to the inference; and certainly this absence is present at the "time; as while the thing (rain) has not been brought about "its *prior negation* remains intact. Hence the argument that "we have put forward above is what should be brought for-"ward here."

The above objections are answered thus:—*Not so; because the cognition in question is of the Substance as qualified (by Duality).* It is not a fact that the cognition of 'two substances' proceeds from mere cognition pure and simple; because, as a matter of fact, the cognition involves the idea of the Substance also. Another question:—"Even granting that the cognition is that of the *Substance*, why cannot the cognition in question be regarded as proceeding from the mere cognition (independently of the substance.)?" The answer to this is—*It is not &c.* The sense is that the qualification constitutes the very form of that which it qualifies; it is the very source of the idea of its own subserviency to that thing which it qualifies; and that which does not exist cannot *qualify* another thing; as that which does not exist cannot be the *source* of any idea; consequently no cognition of the *qualified* thing can be possible without its involving the cognition of the *qualification* also. The auther adds the corroboration of Kaṇāda to his interpretation:—*This is what has been declared &c.* Kaṇāda has declared that the cognition of the 'white object' proceeds from the cognition of the *whiteness* inhering in that object; and that for this reason there is the

Digitized by Google

relation of cause and effect between the cognition of the qualification and that of the qualified object ; and this causal relation cannot subsist between non-existing things; hence the qualification cannot be regarded as absolutely absent (in the cognition of what it qualifies.) By the particle '*tu*' the author proceeds to show the difference between inferential cognition and cognition of the qualified substance: *Na tu* &c. Inferential cognition conceives of the inferential 'mark' (middle term) as subordinate to the Major term and as such does not point to an idendity between these two (as the qulified cognition does with regard to the qualification and the qualified) ; and hence the instance cited is not quite appropriate. That is to say, the case of Inferential knowledge is not at all akin to the cognition of "two substances."

Objection : " At the time of this latter cognition, even Duality does not exist ; and then how could the cognition be qualified by it ? "

Reply : Not so ; because at the moment immediately preceding the cognition Duality does exist ; and in all cases the direct cognition of Duality has for its object something existing at the previous moment and as a matter of act, immediately before the congnition of 'two substances,' Duality does exist ; and as such it is sure to form part of the following cognition. It might be added that, just as the *substance* appears in the cognition of " two substances," so also does the Duality belonging to it. Nor is it possible for the Duality to appear, if it did not exist at all ; hence it must be admitted that this Duality is not destroyed, and continues to exist and form the substratum of the qualified cognition ; specially as the character of such substratum consists in the fact of its appearing in the cognition. This is what is meant by—'*na, āśūtpattēḥ*'—That is to say, it is not that Duality is not destroyed at the time of the substance ; but what happens is that the cognition of the quality of Duality, and also the cognition of the substance, are produced so close upon each other that we are unable to notice any sequence between the two, and hence we come to think that both Duality and the substances to

Digitized by Google

which it belongs, form objects of one and the same cognition; in reality however it is Duality that is cognised first, and then the substances.

The author cites a corroborative example: *Yathā* &c. In the idea 'the Ākāça has sound in it,' there are three cognitions coming one after the other,—(1) that of sound, (2) that of *Ākāça*, and (3) that of Ākāça being qualified by the sound; and similar is the case with the cognition of Duality &c. That is to say, just as in the case of the cognition of sound &c., in as much as the cognitions follow closely upon one another, we are unable to perceive any sequence in their appearance, and come to regard them as simultaneous,—in the same manner we have in the case of the cognitions of Duality and Substance.

Some people have urged that the appearance of the cognition of the substance is not possible in accordance with the theory of one cognition destroying another; and it is with regard to this that the another raises the question: *Badhyaghātaka-pakshē &c.* That is to say, the following argument may be urged:—"If the cognition of the substance do not appear on the "destruction of Duality, simultaneously with the cognition of "the quality, then it could not be produced, in accordance with "the theory of one cognition destroying another. Because just "as the *Apēkshābuddhi* on appearing produces Duality, so also "would it produce the Impression or Faculty, '*Sanskāra;*' and "this latter is the destroyer of that *Buddhi*; hence at the ap-"pearance of the *Sanskāra* and Duality, there is an appearance "of the cognition of the generality of 'Duality'; and also the "production of the idea of quality, and the destruction of the "*Apekshābuddhi,* and the destructiblity of Duality,—all this "constituting one point of time; and then at the next moment, "we have the appearance of the idea of quality and the destruc-"tion of Duality; and in as much as thesel atter are at a distinct "point of time, we could not have the cognition of 'two substan-"ces,' which depends upon the appearance and destruction; and "hence the objection applies also to the theory of the destruction "of one cognition by another."

Digitized by Google

स च भविष्यतीत्यनुभवसाक्षिको दुरपन्हवः ।

ननु प्रागभावे मानाभावः । न च घटादेरुत्पत्तिक्षणे निखिलसामग्रीसत्त्वादुत्पत्त्यनन्तरं द्वितीयक्षणे पुनरुत्पत्तिः स्यात् प्रागभावस्वीकारे तु तदुत्पत्त्यनन्तरन्तस्य प्रागभावाभावादेव न तदुत्पत्तिरिति वाच्यम् । कपालान्तरे घटप्रागभावस्य सत्त्वाद्घटान्तरोत्पत्तौ बाधकाभावात् । किं च । जन्यरूपत्वावच्छिन्नं प्रति समवायावच्छिन्नरूपत्वेन प्रतिबध्यप्रतिबन्धकभावमिव द्रव्यत्वेन द्रव्यत्वेन प्रतिबध्यप्रतिबन्धकभावस्यावश्यकत्वम् । इत्थञ्च कपाले जन्यद्रव्यस्य घटस्य सत्त्वान्न घटान्तरोत्पत्तिः । न च तथाप्युत्पन्नज्ञानादेः पुनरुत्पत्तिः स्यादिति वाच्यम् तज्ज्ञानं प्रति तदुत्पत्तेरेव प्रतिबन्धकत्वादित्यत आह भविष्यतीति । तथा च घटाद्यनुत्पत्तिदशायां कपालादौ घटो भविष्यतीत्यादिशब्दाभिलप्यमानाभावविषयकज्ञानस्य ध्वंसादेरविषयत्वात्प्रागभावविषयत्वमित्यर्थः । इदमुपलक्षणं । घटानुत्पत्तिदशायां कपाले इदानीं घटो नास्ति इदानीं घटप्रागभाव इति प्रत्यक्षस्य घटप्रागभावमात्रविषयत्वादित्यपि बोध्यम् । अत्र भविष्यत्त्वं वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वं न तु वर्त्तमानप्रतियोगित्वमात्रम् । श्वो भाविनि घटे ऽपि तादृशप्रतियोगित्वस्य सत्त्वात्तत्राद्य भविष्यतीति प्रत्ययापत्तेः । तथा हि अत्र प्रतियोगित्वं प्रागभावश्च धात्वर्थः । वर्त्तमानत्वमाश्रयत्वं च प्रत्ययार्थः । वर्त्तमानत्वं च प्रागभावे ऽन्वेति । प्रागभावश्च निरूपितत्वसम्बन्धेन विशेषणतया प्रतियोगित्वे प्रतियोगित्वं चाश्रयतया घटे एवं च घटो भविष्यतीत्यत्र वर्त्तमानप्रागभावनिरूपितप्रतियोगित्वाश्रयो घट इति बोधः । मन्मते तु धात्वर्थः । प्रतियोग्युत्पत्तिः तत्र च वर्त्तमानत्वान्वयः । तथा च वर्त्तमाना या प्रागभावप्रतियोग्युत्पत्तिस्तत्कत्वस्य भावि घटे ऽभावान्न तत्र तादृशप्रत्ययापत्तिरित्यर्थः । प्रागभावानङ्गीकारे तु वर्त्तमानकालोत्तरक्षणोत्पत्तिकत्वरूपं भविष्यत्त्वं वाच्यम् । अत्र वर्त्तमानकालोत्तरत्वं यत्क्षणे शब्दः प्रयुक्तस्तत्क्षणध्वंसाधिकरणत्वं तथा चाद्य भविष्यतीत्यत्राद्यात्मककालप्रविष्टा एव

सत्तास्त एव वर्तमानत्वास्त एव ध्वंसाधिकरणा न तु तदधिकरणं महाकालः। एवं च तदन्तर्गततत्तदुत्पत्तिकत्वस्य क्षणे भाविनि घटे ऽभावाच दोषः। भविष्यत्त्वघटितपदार्थज्ञानं त्वनुमानादिनेति। न चैवं घटानुत्पत्तिदशायां कथं कपाले घटो नास्तीति प्रत्यय इति वाच्यम्। सामयिकाभावस्यैव तत्प्रतीति विषयत्वात्। सामयिकत्वं च किञ्चित्समयावच्छिन्नवृत्तिकत्वं। अथात्यन्ताभावस्य कथं प्रतियोगिसमवायिदेशवृत्तित्वमिति चेन्न। घटानुत्पत्तिदशायां घटनाशदशायां चेह कपाले घटो नास्तीति प्रतीतेः। न चेयं यत्किञ्चित्प्रतियोगिकाभावविषया येन प्रागभावध्वंसौ तत्प्रतीतिविषयौ स्यातां तयोर्घटत्वावच्छिन्नप्रतियोगिकत्वाभावात्। किं तु तत्तद्घटत्वावच्छिन्नप्रतियोगिताकत्वम्। अन्यथा घटवत्यपि घटो नास्तीति प्रत्ययापत्तेः। तयोर्घटत्वावच्छिन्नप्रतियोगिताकत्वं कुतो नेति चेत्। पूर्वं केषां चिद्घटानां नाशात्तत्प्रागभावानां कपाले ऽभावात्केषां चिदुत्पत्स्यमानत्वात्तध्वंसानां कपाले ऽभावाच्च ध्वंसप्रागभावयोर्घटत्वावच्छिन्नत्वाभावात्। एवं तत्तत्कपाले तत्तद्घटोत्पत्तिविनाशयोः सत्त्वात्तत्तद्घटत्वावच्छिन्नप्रतियोगिताकप्रागभावध्वंसौ वाच्यौ न तु घटत्वावच्छिन्नप्रतियोगिताकौ अन्यथा घटत्वावच्छिन्ननिखिलघटानामेकस्मिन्कपाले प्रागभावविनाशौ स्यातामिति संक्षेपः।

तस्य च ध्वंसः प्रतियोगी तद्ध्वंसश्चोभयत्र विनष्टः प्रागभाव इति प्रतीतेः। अत्यन्ताभावो ऽन्योन्याभावश्च नित्यौ। नित्यश्चाभावो द्विविधः एकमात्रवृत्तिधर्मावच्छिन्नप्रतियोगिताको ऽन्यश्च। न चान्त्ये मानाभावः। घटवति घटपटौ न स्तः घटो न घटपटौ एकघटवति न घटौ एको न द्वाविति प्रतीतेः एकघटवति द्वित्वावच्छिन्नतदत्यन्ताभावस्य एकस्मिन्नुभयान्योन्याभावस्य च सत्त्वात्। न च प्रतियोगि-

मति कथन्तदत्यन्ताभावस्तयोर्विरोधादिति वाच्यम् । प्रतियोगितावच्छेदकावच्छिन्नेनैवाभावस्य विरोधात् ।

तस्य प्रागभावस्य तद्ध्वंसश्च प्रतियोगिध्वंसश्च, तथा च प्रागभावस्य ध्वंसद्वयं । प्रतियोगी प्रतियोगि ध्वंसश्चेत्यर्थः । उभयत्र ध्वंसप्रतियोग्यवच्छिन्नकपाले प्रतियोगिध्वंसावच्छिन्नकपाले च । अत्र शिरोमणिचरणाः ध्वंसस्य प्रागभावोऽतिरिक्तः प्रागभावस्य ध्वंसश्चातिरिक्तः घटवति काले घटध्वंसो नास्ति घटो नास्तीति प्रतीतेरभावत्वेनाभावविषयकत्वं न तु घटविषयकत्वमित्याहुः । अन्यः । उभयत्वावच्छिन्नप्रतियोगिताकः, । ननूभयत्वमेकविशिष्टापरत्वमिति । तदवच्छिन्नाभावस्यैकमात्रवृत्तिधर्मावच्छिन्नप्रतियोगिकत्वात्कथं द्वैविध्यमुक्तमित्याशयवानाह न चेति । अन्त्ये । उभयत्वावच्छिन्नप्रतियोगिताकाभावे, । उभयत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावे मानमाह घटवतीति । तादृशान्योन्याभावे मानमाह । घटो नेति । ननु घटवति घटपटौ नस्तः घटो न घटपटाविदृशप्रतीत्योः पटत्वावच्छिन्नात्यन्तान्योन्याभावो विषयाविति नोभयत्वावच्छिन्नप्रतियोगिताकाभावसिद्धिरित्यत आह एकघटवतीत्यादि । तदत्यन्ताभावस्य घटात्यन्ताभावस्य, । न च विशिष्टाभावेनान्यथासिद्धिरिति वाच्यम् । वैशिष्ट्यविरहे ऽपि घटत्ववति घटत्वपटत्वोभयन्नास्तीति प्रतीतेः । ननु तथा ऽपि घटवति घटो नस्त इत्याद्यसङ्गतमित्याह न चेति । तदभावः प्रतियभावः, । तयोः । अभावप्रतियोगिनोः, । प्रतियोगितेति । घटद्वयवति घटद्वये वा द्वित्वरूपप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकात्यन्ताभावस्यान्योन्याभावस्य चासत्त्वादित्यर्थः । नन्विदमसङ्गतं घटत्वेन पटो नास्तीति प्रतीतेर्व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य घटत्वावच्छिन्नपटाभावस्य घटवति सत्त्वादिति चेन्न । अभावप्रत्यक्षत्वावच्छिन्नं प्रति प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य हेतुत्वेन प्रतियोग्यवृत्तिधर्मस्य प्रतियोगितावच्छेदकत्वाभावात् । इतरथा घटनिर्विकल्पकादपि घटो नास्तीति प्रतीतिः स्यादिति संक्षेपः ।

न चैको द्वित्वावच्छिन्नः एको द्वावित्यप्रतीतेः। अत एव दण्डिपुरुषाद्दण्डे ऽपनीते पुरुषे सत्यपि दण्डीपुरुषो नास्तीति बलाद्विशिष्टाभावो विशेषणावच्छिन्नविशेष्याभावो ऽभ्युपेयते न चेयं दण्डाभावविषया दण्डवत्यपि तथाप्रतीतेः न वा पुरुषाभावविषया तस्य सत्वात् तस्मादत्र विशेषणाभावो विशेष्याभाव उभयाभावो वा तत्र विशिष्टाभावो ऽधिको ऽवसेयः।

ननूभयाभावप्रतियोगी एको पीत्युभयत्वावच्छिन्नत्वमेकस्यापि भविष्यतीत्यत आह न चेति कुतो नेत्यत आह एक इति। यथा द्वयोर्द्वित्वावच्छिन्नत्वे द्वौ इति प्रत्ययस्तथैकस्यापि द्वित्वावच्छिन्नत्वे एको द्वावितिप्रत्ययः स्यादित्यर्थः। विशिष्टाभावस्याप्यतिरिक्तत्वं साधयति अत एवेत्यादिना। अत एव एकस्य द्वित्वानवच्छिन्नत्वादेव,। यथैकस्य द्वित्वानवच्छिन्नत्वं तथाविशिष्टधर्मानवच्छिन्नत्वं शुद्धस्येत्यर्थः। अपनीते विशेषणे तद्दण्डावच्छिन्नपुरुषाभाव इत्यर्थः। इयं दण्डी नास्तीति प्रतीतिः,। तस्येति। यत्र सति पुरुषे दण्डीपुरुषो नास्तीतिधीस्तत्र पुरुषस्य सत्वादित्यर्थः। विशिष्टाभावो दण्डविशिष्टपुरुषाद्यभावः। तथा च क्वचिद्विशेषणाभावप्रयुक्तः क्वचिद्विशेष्याभावप्रयुक्तः क्वचिदुभयाभावप्रयुक्तो विशिष्टाभावो ऽतिरिक्तो बोद्धव्य इत्यर्थः॥

भट्टास्त्वभावो नेन्द्रियग्राह्यः क्लृप्तसन्निकर्षाणामभावात्किन्त्वनुपलब्धिप्रमाणगम्य इत्याहुस्तन्न। प्रमाणान्तरकल्पनातः सन्निकर्षान्तरकल्पनाया लघुत्वाद् अन्यथा संयोगादीनां क्लृप्तानां सन्निकर्षाणामभावाच्छब्दे ऽपि प्रमाणान्तरकल्पनापत्तेः।

ननु संयोगादिरूपप्रत्यासत्तिसन्निकर्षाभावात्कथमभावप्रत्यक्षं विशेषणतायाः अभावग्राहकत्वे तु घटवति घटात्यन्ताभावग्रहापत्तेः । चक्षुःसंयुक्तविशेषणताया घटात्यन्ताभावस्य च घटवद्भूतलादौ सत्त्वादतो योग्यानुपलब्धिरूपप्रमाणान्तरमवश्यमभ्युपेयमिति भट्टमतमाह भट्टास्त्विति । अनुपलब्धीति । योग्यानुपलब्धीत्यर्थः । विवेचनीयं चेदमनुपदं । सन्निकर्षान्तरकल्पनाया विशेषणतारूपसन्निकर्षान्तरकल्पनाया, लघुत्वादिति । प्रमाणान्तरकल्पनायामपि सन्निकर्षकल्पनाया आवश्यकत्वादिति । ननु संयोगादेरेव सन्निकर्षत्वं नत्वन्यस्येत्यत आह अन्यथेति । अन्यथा संयोगाद्यतिरिक्तस्य सन्निकर्षत्वाभावे, शब्दे ऽपि शब्दग्रहे ऽपि, । समवायस्य तव मते ऽभावादिति भावः ।

तत्र शब्दं साक्षात्करोमीति प्रतीतेः प्रत्यक्ष एवायमिति चेत्, इहापि पश्यामि घटाभावमिति प्रतीतेः अध्यक्ष एव स इति तुल्यं । किं चानुपलब्धेः प्रमाजननव्यापाराभावात्कथं प्रमाकरणत्वं, व्यापारवद्धि कारणं करणमित्युक्तं, नन्वेवं घटाभाववति घटोपलम्भे ऽपि घटाभावप्रत्ययः स्याद् इन्द्रियसम्बद्धविशेषणतायाः सत्त्वादिति चेन्न, योग्यानुपलब्धेरप्यभावग्रहे हेतुत्वात् । अथ केयं योग्यानुपलब्धिः । योग्यस्य प्रतियोगिनो ऽनुपलब्धिः सहकारिणीति मतं, तन्न जलपरमाणौ पृथिवीत्वाभावग्रहापत्तेः । भवति हि पृथिवीत्वं चक्षुर्योग्यं तदनुपलब्धिश्च जलपरमाणौ । स्तम्भे पिशाचभेदग्रहानुपपत्तेश्च पिशाचस्य प्रतियोगिनो ऽयोग्यत्वात् ।

ननु शब्दं साक्षात्करोमीति प्रत्यक्षविषयकानुव्यवसायवत्त्वाच्छब्द-

ग्रहे श्रोत्रेन्द्रियेणैव निर्वाहादित्याह तत्रेति तत्र शब्दग्रहे, प्रत्यक्ष एवा-
यमिति । अयं शब्दः, । अनेनप्रकारेण शब्दग्रहे प्रत्यक्षातिरिक्तप्रमाणान्त-
रव्यवच्छेदः । तथा च शब्दग्रहे श्रोत्रावच्छिन्नसमवायस्य हेतुत्वान्यथा-
नुपपत्त्या समवायस्य स्वीकार इति भावः । इहापि अभावग्रहे ऽपि, -
ननु घटाभावग्राहकसन्निकर्षाभावेन घटाभावप्रत्यक्षरूपविषयस्य बाधाद्-
घटाभावं पश्यामीति प्रतीतिर्भ्रमत्वमित्यतो दोषान्तरमाह किञ्चेति ।
व्यापाराभावादिति । विशेषणताया अस्वीकारादिति भावः । इत्थं
चातिरिक्तप्रमाणकल्पनमावश्यकं । सन्निकर्षस्तु विशेषणतैवेति तेनैव निर्वा-
होऽस्तु किमतिरिक्तप्रमाणेनेति मीमांसकः शङ्कते नन्विति । एवं विशे-
षणतायाः प्रत्यासत्तित्वस्वीकारे, । योग्येति तथा च तत्र योग्यानुपलब्धे-
रभावान्न घटाभावप्रत्यक्षमिति भावः । इयं अभावग्रहहेतुभूता, । योग्य-
स्येति । अभावप्रत्यक्षे प्रतियोगिनोऽनुपलब्धिः कारणमित्युक्ते तु पिशाचा-
त्यन्ताभावप्रत्यक्षं स्यादत उक्तं योग्यस्येति । अभावग्रहदशायां योग्यस्या-
धिकरणेऽनुपलब्धिसत्त्वात्प्रतियोगिन इत्युक्तम् । सहकारिणी सन्निकर्षस्य
सहकारिणी, । ननु महत्त्वोद्भूतरूपवद्विशेषणतारूपसन्निकर्षाभावादेव न
पृथिवीत्वाभावग्रह इत्यतो दोषान्तरमाह स्तम्भ इति । पिशाचात्यन्ता
भावस्तु न प्रत्यक्षः पिशाचान्योन्याभावस्तु प्रत्यक्षस्तत्र पिशाचरूपप्रतियो-
गिनो योग्यत्वाभावात्तदन्योन्याभावप्रत्यक्षं न स्यादित्यर्थः ॥

**अथ योग्ये ऽधिकरणे प्रतियोगिनो ऽनुपल-
ब्धिः सहकारिणीति चेन्न, भूतले पिशाचात्यन्ताभाव-
ग्रहापत्तेः । यत्त्वत्यन्ताभावप्रत्यक्षे योग्यप्रतियो-
ग्यनुपलब्धिरन्योन्याभावग्रहे च योग्ये ऽधिकरणे
प्रतियोगितादात्म्यानुपलब्धिः सहकारिणीति मतं,
तन्न जलपरमाणौ पृथिवीत्वात्यन्ताभावग्रहापत्तेर्वा-
यावुद्भूतरूपवद्भेदग्रहानापत्तेश्च, न चेष्टापत्तिः**

अनुभवविरोधाद् अत्रोच्यते, योग्या सहकारिसंपन्ना-नुपलब्धिः कारणम् ।

ननु योग्यानुपलब्धिरित्यत्र योग्यत्वमधिकरणविशेषणमित्यत आह योग्येति । तथा च स्तम्भरूपाधिकरणस्य योग्यत्वात्पिशाचभेदप्रत्यक्षे बाधकाभावादिति भावः । अत्यन्तान्योन्याभावप्रत्यक्षयोः सामग्रीभेदमाह यत्त्विति । तथा चात्यन्ताभावग्रहे प्रतियोगियोग्यत्वं तन्त्रं अन्योन्याभावग्रहे चाधिकरणयोग्यत्वं तन्त्रमित्यर्थः । प्रतियोगितादात्म्येति । अन्योन्याभावस्य तादात्म्यसम्बन्धप्रतियोगितावच्छेदकत्वाद् अन्योन्याभावग्रहे प्रतियोगितादात्म्यानुपलब्धिरपेक्षितेत्यर्थः । जलेति स्वाश्रयसमवायेन महत्त्वाभावाच्च पृथिवीत्वाभावप्रत्यक्षं तथापि घटादौ मनस्त्वात्यन्ताभावादेरप्रत्यक्षतापत्तिस्तस्यायोग्यत्वादिति । इदमुपलक्षणं संसर्गाभावग्रहे यत्किञ्चित्प्रतियोगियोग्यत्वं यावत्प्रतियोगियोग्यत्वं वा । आद्ये घटादिरूपयत्किञ्चित्प्रतियोगियोग्यत्वान्मूर्त्तसामान्याभावप्रत्यक्षप्रसङ्गात् । अन्त्ये च परमाणुरूपस्यायोग्यत्वेन महति वायावुद्भूतरूपसामान्याभावस्य प्रत्यक्षतानापत्तेः । अन्योन्याभावस्याधिकरणयोग्यत्वस्य तन्त्रत्वे बाधकमाह वायाविति । अनुभवविरोधात् । वायुरुद्भूतरूपवान्नेति इत्यनुभवविरोधात्, । प्रतियोगिव्याप्येतरयावत्प्रतियोग्युपलम्भकसमवधाने सति प्रतियोग्यनुपलब्धिरूपामाचार्याणां योग्यानुपलब्धिं मनसि निधाय समाधत्ते अत्रोच्यत इति । योग्यानुपलब्धिरित्यत्र योग्यपदार्थमाह सहकारिसम्पन्नेति । प्रतियोगिप्रतियोगिव्याप्येतरयावत्प्रतियोग्युपलम्भकरूपसहकारिसहिता प्रतियोगिनोऽनुपलब्धिरित्यर्थः न च पिशाचस्यायोग्यत्वात्तदुपलम्भकसामग्र्यभावात्पिशाचभेदप्रत्यक्षं न स्यादिति वाच्यम् । एतद्योग्यतायाः संसर्गाभावग्रहे हेतुत्वात् । अन्योन्याभावप्रत्यक्षे त्वधिकरणयोग्यताया अपेक्षितत्वात् । अनुपलब्धिः प्रतियोग्यनुपलब्धिः, । अभावग्रहदशायां प्रतियोगिप्रतियोगिव्याप्ययोरभावेन यावत्प्रतियोगिग्राहकसमवधानाभावादसम्भववारणाय

प्रतियोगिप्रतियोगिव्याप्येतरेत्युक्तं । अत्र प्रतियोगिव्याप्यं तु प्रतियोग्युपलम्भासाधारणकारणं बोध्यम् तच्च प्रतियोगीन्द्रियसन्निकर्षादि ॥

अत एवान्धकारे न घटाभावश्चक्षुषा । तत्रालोकाधिकरणसन्निकर्षस्यापि हेतुत्वात्, न वा जलपरमाणौ पृथिवीत्वाभावग्रहो योग्यसन्निकर्षाभावात् । कः सन्निकर्षो योग्यः पृथिवीत्वाभावग्राहक इति, चेत् इन्द्रियसन्निकृष्टमहदुद्भूतरूपवद्विशेषणता । उद्भूतरूपाभावे तु इन्द्रियसन्निकृष्टमहत्त्ववद्विशेषणता योग्यः सन्निकर्षः । अतो मनसि न तद्ग्रहः स्याद् भवति च महति वायौ । एवमन्यत्रापि सन्निकर्षा योग्याः कार्यवशादुन्नेयाः ॥

अत एव ईदृशयोग्यानुपलब्धेर्विवक्षणादेव, । अन्धकारे त्वचा घटाभावग्रहे बाधकाभावाच्चक्षुषेत्युक्तम् । तत्र घटाभावग्रहे, अथ वा तत्र घटग्रहे आलोकस्य हेतुत्वाद् घटाभावग्रहे ऽपि तस्य हेतुत्वमिति भावः । यद्यपि निरुक्तयोग्यानुपलब्ध्यभावाच्च जलपरमाणौ पृथिवीत्वाभावग्रह इति समाधातुं शक्यं तथापि कृप्तसन्निकर्षाभावादेव न पृथिवीत्वाभावग्रह इति समाधत्ते न वेति । उद्भूतरूपाभावेत्विति उद्भूतरूपत्वावच्छिन्नप्रतियोगिताकाभावप्रत्यक्ष इत्यर्थः । तत्रोद्भूतरूपमपि न प्रयोजकमिति भावः । अनुद्भूतरूपाभावस्यातीन्द्रियत्वज्ञानायोद्भूतेत्युक्तम् । अत इति । तादृशसन्निकृष्टमहत्त्ववद्विशेषणतायाः योग्यसन्निकर्षत्वादित्यर्थः । न तद्ग्रहः नोद्भूतरूपाभावग्रहः, । उद्भूतरूपपरित्यागे बीजमाह भवति-चेति महति वायौ उद्भूतरूपाभावप्रत्यक्षमित्यर्थः । परमाणौ तस्याप्रत्यक्षत्वादुक्तं महतीति । अन्यत्रापीति । अयं भावः । द्रव्यप्रत्यक्षे महत्त्वोद्भूतरूपवदालोकसंयोगानां साक्षात्कारणत्वं गुणादिप्रत्यक्षे च स्वाश्र-

पातञ्जलदर्शनम्

नागेशकृतभाष्यछायाख्यवृत्तिसहितम्

काशीस्थराजकीयसंस्कृतपाठशालीयन्यायाध्यापक-
तर्कतीर्थन्यायरत्नश्रीजीवनाथमिश्रेण
परिशोधितम् ।

BENARES:
PRINTED AT THE MEDICAL HALL PRESS.

1907

Digitized by Google

Digitized by Google

Digitized by Google

श्रीः

विधिविवेकः ।

श्रीमदाचार्यमण्डनमिश्रविरचितः

पूज्यपादश्रीमद्वाचस्पतिमिश्रनिर्मितया न्याय-
कणिकाख्यया व्याख्यया समलङ्कृतः ।

वाराणसेयराजकीयसंस्कृतप्रधानपाठशालायां साहि-
त्यशास्त्राध्यापकेन मानवल्ल्युपाह्वतैलङ्ग-
रामशास्त्रिणा परिशोधितः ।

काश्याम्

मेडिकल् हाल्-नाम्नि मुद्रणालये संमुद्र्य प्रकाशितः ।

वैक्रमसंवत् १९६४ । ई० सन् १९०७ ।

Digitized by Google

प्रसमवायेन गुरुत्वादिप्रत्यक्षे स्वाश्रयसमवेतसमवायेन द्रव्याधिकरणता-
काभावप्रत्यक्षे साक्षात् द्रव्यसमवेताधिकरणकाभावप्रत्यक्षे स्वाश्रयसमवा-
येन द्रव्यसमवेतसमवेताधिकरणकाभावप्रत्यक्षे च स्वाश्रयसमवेतसमवाय-
सम्बन्धेन च महदुद्भूतरूपवदालोकसंयोगवद्वृत्तियोग्यता योग्यताधिकर-
णत्वेन कार्यकारणभावोऽयमिति । अत्र स्वं महत्त्वादि ।

पिशाचात्यन्ताभावस्त्वयोग्यत्वादेव न गृह्यते, का पुनरत्यन्ताभावे योग्यता । योग्यमात्रप्रतियोगिके योग्यधर्मावच्छिन्नप्रतियोगिताकत्वं विशेषणम्, एवमन्यत्रानुभवानुसारेण योग्यता वाच्या, । सर्वाभावसाधारणं किं योग्यत्वमिति चेन्न किंचिदिति गृहाण । तत्किं नानैवाभावयोग्यता इति चेदोम् । गुणयोग्यतावदननुगतस्यैव तत्त्वादिति संक्षेपः ।

ननु द्रव्याधिकरणकाभावप्रत्यक्षे महदुद्भूतरूपादिमद्वृत्तियोग्यतायाः
कारणत्वं । तथा च पिशाचात्यन्ताभावप्रत्यक्षं स्यादत आह पिशाचेति ।
योग्यमात्रेति । घटत्वरूपयोग्यधर्मावच्छिन्नप्रतियोगिताको घटरूपयोग्यप्र-
तियोगिको घटाभावः प्रत्यक्षः । द्रव्याभावेनापि पिशाचात्यन्ताभावस्तु न
तथा योग्यप्रतियोगिकत्वाभावात् । एवं गुरुत्वप्रतियोगितावच्छेदकताकगु-
रुत्वात्यन्ताभावश्च न प्रत्यक्षः तस्य योग्यप्रतियोगित्वावच्छेदकत्वाभा-
वात् । घटाकाशप्रतियोगिकाद्यभाववारणाय मात्रपदं तथा च योग्यायो-
ग्यप्रतियोगिके योग्यधर्मावच्छिन्नप्रतियोगिताकत्वं न विशेषणमित्यर्थः ।
घटाकाशद्वित्वगुरुत्वादेरभावो न प्रत्यक्षः । एवमाकाशभेदो गुरुत्वव-
द्भेदश्च न प्रत्यक्षः । पिशाचभेदस्तु प्रत्यक्षः फलानुरोधेन तथैव स्वभावक-
ल्पना । एवं घटत्वत्वावच्छिन्नाभावो न प्रत्यक्षः घटेतरावृत्तित्वस्यायो-
ग्यत्वात् । एवं ब्राह्मणत्वाभावोऽपि न प्रत्यक्षः ब्राह्मणत्वव्यञ्जकीभूत-

विशुद्धपितृमातृजन्यत्वस्य शूद्रादावभावे ऽपि शूद्रत्वनिश्चयाभावदशायां सन्निकर्षसत्त्वे ऽपि ब्राह्मणत्वाभावस्य प्रत्यक्षाभावात् । शूद्रत्वनिश्चये तु विशुद्धमातृपितृयोनिजन्यत्वाभावमन्तरेणापि ब्राह्मणत्वाभावो प्रत्यक्ष इति । अन्यत्राप्यनुभवेति । श्रोत्रे शब्दाभावः श्रोत्रेण । आत्मनि ज्ञानाद्यभावो मनसा । गुडे तिक्ताभावो रसनया । पाषाणे गन्धाभावो घ्राणेन गृह्यत इत्याद्यनुभवानुसारेण योग्यता वाच्येत्यर्थः । ननु सर्वाभावसाधारणयोग्यताया अभावेन तत्तद्रूपरसाद्यभावात् प्रतिविभिन्नयोग्यता वाच्या । तथा चाननुगम इत्यत आह ओमिति । इष्टापत्तिरित्यर्थः । गुणेति । यथा रूपादिग्रहे योग्यता भिन्ना तथा रूपाद्यभावग्रहे पीत्यर्थः । तत्त्वाद् योग्यतात्वात् । संक्षेप इति । अयं भावः प्रतियोगि तद्व्याप्येतरेत्यत्र प्रतियोगि व्याप्यत्वं न दैशिकं यत्रेन्द्रियसंनिकर्षस्तत्र प्रतियोगीति दैशिकव्याप्त्यभावेन संनिकर्षस्य प्रतियोगिव्याप्यत्वाभावात् । जलपरमाणौ पृथिवीत्वाभावग्रहप्रसङ्गात् । महत्त्वादेः कालिकेन पृथिवीत्वव्याप्यत्वेनाभावग्राहकसामग्रीतरकोटिनिविष्टत्वात् । एवं चात्र व्याप्यपदेन प्रतियोगिग्राहकासाधारणमेव वाच्यमिति सन्निकर्षादेरप्यसाधारण्यात्तेषां व्याप्यत्वं । यदि चासाधारण्यं दुर्वचं तदा चिन्तामणिकारीया योग्यता वाच्या सा च प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपा । प्रतियोगी घटादिः तस्य सत्त्वप्रसञ्जनेन प्रसञ्जितः आपादितः प्रतियोगी यस्य तस्योपलम्भाभाव इत्यर्थः तथा च यदि स्यात्तोपलभ्येतेत्येतत्पर्यवसितार्थिका योग्यानुपलब्धिः नोपलभ्येतेति कृत्वा नास्तीत्येतादृशाभावप्रत्यक्षे कारणं । भवति हि आलोकादिसत्त्वे यदधिकरणे घटादिकमुपलभ्यते तत्र तदभावो नोपलभ्यत इति प्रतियोग्युपलम्भाभावोऽभावप्रत्यक्षे कारणं । तत्सत्त्वेपि क्वचिदभावो नोपलभ्यते क्वचिच्चोपलभ्यत इति योग्यता वश्यं वाच्येति दिक् ॥

अथ किमिदं चक्षुरादि तैजसमिन्द्रियं रूपग्राहकम् महदिन्द्रियं वा चक्षुः । वायवीयमिन्द्रियं स्प-

र्शग्राहकम् महदिन्द्रियं वा त्वक् । आप्यमिन्द्रियं रसग्राहकं महदिन्द्रियं वा रसनं । पार्थिवमिन्द्रियं गन्धग्राहकं महदिन्द्रियं वा घ्राणं । महत्पदं मनोवारणाय कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रं । शब्दग्राहकं महदिन्द्रियं वा श्रोत्रम् । निःस्पर्शमणु मनः । निःस्पर्शपदं पार्थिवपरमाणुवारणाय । अणुपदं विभुवारणाय

ननु साक्षात्कारिप्रमाकरणं प्रत्यक्षं तच्च चक्षुरादिस्तत्किमत आह अर्थेति । त्वगादिवारणाय तैजसमिति । चन्द्रादौ तद्वारणायेन्द्रियमिति । ननु चक्षुरादितैजसत्वसिद्धाविदं युज्यत इत्यत आह रूपेति । अनयैव रीत्याऽग्रेप्याभासा बोध्याः । दीपादावतिव्याप्तिवारणायेन्द्रियमिति । त्वगिन्द्रियमाह वायवीयमिति । विषयरूपवायौ तद्वारणायेन्द्रियमिति । घ्राणलक्षणमाह पार्थिवमिति । गन्धेति । घ्राणसंयुक्तसमवाये तद्वारणायेन्द्रियमिनि । श्रोत्रलक्षणमाह कर्णेति । नन्वीश्वरस्य शब्दकारणत्वेन नभस्य समवायिकारणत्वमात्रं कल्पते लाघवादित्यतिरिक्तनभसि मानाभावाल्लक्षणान्तरमाह शब्देति । समवाये तद्वारणायेन्द्रियमिति । मनोलक्षणमाह निःस्पर्शमणु मन इति । अत्र चक्षुरादीनां रूपग्राहकत्वेन तैजसत्वादिकमुपपन्नं । तथा हि चक्षुस्तैजसं रूपादिषु पञ्चसु मध्ये रूपमात्रग्राहकत्वात्प्रदीपवत् । अनयैव रीत्या त्वग्रसनघ्राणश्रोत्राणां यथायथं स्पर्शरसगन्धशब्दमात्रग्राहकत्वाद् वायवीयत्वं जलीयत्वं पार्थिवत्वं गगनात्मकत्वं च सिध्यति ।

अत्रमीमांसकाः ॥ मनो नाणु किन्तु विभु निःस्पर्शद्रव्यत्वाद् आत्मवत् । मनस्त्वं चात्मान्यत्वे सति ज्ञानासमवायिकारणसंयोगाश्रयत्वमित्याहुः । तन्न—विभुत्वे आत्मना संयोगानुपपत्तेः । तथा हि

द्विविधः संयोगः कर्मजः अवयवसंयोगजन्यश्च ॥ न च विभोरात्मनः कर्मास्ति, मनो यदि विभु तदा तस्यापि कर्माभावात् कुतः कर्मजसंयोगसंभवः । न चानयोरवयवोस्ति येन तत्संयोगजः संयोगः स्यात् न च नित्य एव विभुनः संयोगो ऽजसंयोगनिषेधात् । कुतोनिषेध इति चेत् मानाभावात्—संयोगत्वावच्छेदेन द्रव्यजन्यत्वावधारणाच्च अप्रयोजकमिदमनुमानमिति संक्षेपः इति श्रीचूडामणिभट्टाचार्यविरचितायां न्यायसिद्धान्तमञ्जर्यां प्रत्यक्षपरिच्छेदः ।

ननु मनसोऽणुत्वाभावात्कथमिदं लक्षणं सिध्यति । तथा च मनस्तदितरेभ्यो भिद्यते निःस्पर्शत्वे सत्यणुत्वादित्यत्र स्वरूपासिद्धिं शङ्कते मनो नाणु इति । निःस्पर्शेति । न च मनसो निःस्पर्शत्वासिद्धौ स्वरूपासिद्धिरिति वाच्यम् । स्पर्शवत्त्वेनारम्भकत्वान्मनसः स्पर्शवत्त्वे तस्य द्रव्यारम्भकत्वापत्तेः । मनस्त्वं क्रिमत आह मनस्त्वं चेति । आत्मन्यतिव्याप्तिवारणाय सत्यन्तम् । संयोगाश्रयत्वमसमवायिकारणासंयोगाश्रयत्वं च कपालादावतिव्याप्तमत आह ज्ञानेति । संयोगजश्चेति । यथा हस्ततरुसंयोगात्कायतरुसंयोग इति । मनसो विभुत्वे आत्मवृत्तान्तेन कर्मजन्यसंयोगाभावमुपपादयितुमाह । न च विभोरिति । मनसोऽवयवाभावादवयवसंयोगजावयविसंयोगाभावमुपपादयितुमाह न च तयोरिति । तयोः आत्ममनसोः, । तत्संयोगजसंयोगः अवयवसंयोगजसंयोगः, । ननु तर्हि विभुत्वादात्ममनसोरनित्यः संयोगो मास्तु नित्यस्तु भविष्यत्येवेत्याशङ्कते न चेवमिति । एवं तयोरनित्यसंयोगाभावे, समाधत्ते अज इति । ननु मनसो विभुत्वे सिद्धे तत्र ज्ञानाद्यन्यथानुपपत्तिरेव मानमिति दूषयान्तरमाह संयोगत्वेति । ननु जन्यसंयोगत्वावच्छिन्नं प्रत्येव द्रव्यजन्यत्वमि-

त्यत आह अप्रयोजकमिति । इदमनुमानमिति । मनो विभु निःस्पर्श-
द्रव्यत्वाद् इति निरुक्तानुमानमित्यर्थः । नन्वात्ममनोयोगस्य ज्ञानत्वा-
वच्छिन्नं प्रति जन्यज्ञानत्वावच्छिन्नं प्रति वा हेतुत्वे सिद्धे सत्य एवेदमुप-
पन्नं । तत्रैव मानं न पश्यामः । तथा हि । पुरीततिमनःसंयोगात्मक-
सुषुप्तिदशायामात्मनो विभुत्वेन पुरीतत्यवच्छेदेनात्ममनोयोगस्यापि सम्भ
वात्तदा ज्ञानाद्युत्पत्त्यापत्तिरिति जन्यज्ञानत्वाद्यवच्छिन्नं प्रति त्वङ्मनो-
योगस्य हेतुत्वेनैव निर्वाहात् । न च सुषुप्तिदशायां त्वङ्मनोयोगोऽपि
कुतो नेति वाच्यम् । त्वङ्मनोयोगकाले सुषुप्त्यभावात् । अत एव "मनो यदा
त्वचं परित्यज्य पुरीततिमनुप्रविशति तदा सुषुप्तिरिति गीयते" । न च
तथाऽपि सुषुप्तिदशायां ज्ञानाद्युत्पत्तिवारणाय प्राणमनःसंयोग एवास्तु
किन्त्वङ्मनोयोगस्य हेतुत्वेनेति वाच्यम् प्राणत्वत्वक्त्वयोर्जातित्वेन वि-
निगमनाविरहादिति चेन्न। सुषुप्तिदशायां किं ज्ञानमापाद्यते तदा चक्षु-
रादिमनोयोगाभावाच्च चाक्षुषादिप्रत्यक्षं । नापि स्मृतिः फलबलकल्प्योद्बो-
धकाभावात् । न वाऽनुमित्यादिः परामर्शाद्यभावात् । नाप्यात्मादि-
मानसम् ज्ञानादिरूपविशेषगुणाविषयकात्मविषयकज्ञानस्य शशशृङ्गायमा-
णत्वादिति संक्षेपः । अथात्ममनोयोगस्य जन्यज्ञानत्वाद्यवच्छिन्नं प्रति
कारणत्वे सिद्धे ऽपि तत्कारणतावच्छेदककोटिप्रविष्टात्मत्वस्य जातित्वे
मानाभावः । न च तत्कोटिप्रविष्टत्वमेव मानमिति वाच्यम् । ईश्वरे सा
स्यादिति चेत् । तत्र प्रत्यक्षस्यैव प्रमाणत्वात् । तथाहि स्वस्यात्मनि
निखिलानामहं सुखीत्यादिप्रत्यक्षस्यात्मविषयकत्वात् । न चान्यस्येदृशा-
त्मप्रत्यक्षत्वे किं मानमिति वाच्यम् । सम्प्रत्यन्येषां प्रश्नेन निश्चयाद्
यत्रातीतानागतशरीरिणां न तादृशं प्रत्यक्षं तत्रात्मा वारे द्रष्टव्य इत्यादि-
श्रुतेरेव मानत्वात् । एवं च कुत्रचिच्छ्रोतादिव्यवहारात्क्वचित्प्रत्यक्षादा-
त्मत्वसिद्धिः । अत एव सुखादिसमवायिकारणतावच्छेदकत्वेन सिद्धाया
विद्यमानशरीरात्मनि च प्रत्यक्षसिद्धाया आत्मपदशक्यतावच्छेदकरूपाया
आत्मत्वजातेर्भगवदात्मन्यपि स्वीकारः । श्रोतादिव्यवहारस्य भगवदात्म-

न्यपि सत्त्वाद्विति दिक् । अत्रायं मूलोक्तसंक्षेपार्थः प्रतिभाति । रासनसामग्री-सत्त्वे चाक्षुषो नोत्पद्यते युगपन्नानाज्ञानोत्पत्त्यभावादित्यनुभवसिद्धम् । तच्च मनसो विभुत्वे न सम्भवति सर्वेन्द्रियाणां मनसः सान्निध्यसम्भवात् । विभुत्वाभावे तु यस्येन्द्रियस्य सन्निधानं तेनैवेन्द्रियेण ज्ञानं जन्यत इति । न च शतावधानस्थले दीर्घशष्कुलीभक्षणादौ चैकदा कथं नानाज्ञान-मिति वाच्यम् तत्रैकदा ज्ञानोत्पत्तेरभावात् । परं तु मनसो वेगातिशयात्-प्रत्येकं निखिलेन्द्रियजन्यज्ञानमिति । न च यौगपद्यप्रत्ययः कथमिति वाच्यम् तस्य भ्रान्तत्वात् । न च मनसो ज्ञानेन्द्रियसमवधानेऽप्यदृष्ट-वशादेकमेकमेव ज्ञानमिति वाच्यम् । तर्हि तत्तददृष्टविशेषसहकृतमनसा एव चाक्षुषादिसम्भवे किञ्चक्षुरादिहेतुत्वकल्पनयेति दिक् ॥

श्रीमन्नृसिंहपदपङ्कजसेवनेन श्रीरामकृष्णपदपङ्कजचिन्तनेन ।
निर्णीय तर्कनिचयं द्विजनागरेण श्रीयादवेन
रचितः प्रथमोऽत्र खण्डः ।

Digitized by Google

अथानुमानं निरूप्यते। तत्रानुमितिकरणमनुमानम्। अनुमितित्वं च अनुमिनोमीत्यनुभवसिद्धो जातिविशेषः। जन्यज्ञानजन्यत्वाव्यभिचारि जन्यशब्दधीजन्यत्वव्यभिचारि जातिमदनुभवत्वं वा। प्रत्यक्षत्ववारणाय जन्यज्ञानजन्यत्वाव्यभिचारीति ज्ञानाजन्ये नित्ये निर्विकल्पके च तद् धीजन्यत्वव्यभिचारीति। तत्रापि प्रथमजन्यपदं चाक्षुषत्वादिवारणाय तद्धीश्वरज्ञानजन्यत्वाव्यभिचारि सर्वेषां तदाश्रयाणामीश्वरधीजन्यत्वात्। उपमितित्वशाब्दत्ववारणाय व्यभिचारीत्यन्तम्॥

श्रीगणेशाय नमः॥ उमोपेतं शिवं नत्वा नृसिंहं पितरं तथा। अनुमानपरिच्छेदे मञ्जर्याः सार उच्यते।

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रात्प्रथमं प्रत्यक्षोपस्थितौ प्रत्यक्षजिज्ञासा तद्वशात्प्रत्यक्षे निरूपिते तदनन्तरं च न प्रत्यक्षनिरूपणेच्छा। तत्र सिद्धत्वबुद्धेः प्रतिबन्धकत्वात् तथा च निरूपिते च प्रत्यक्षे ऽनुमाननिरूपणप्रतिबन्धीभूतायाः प्रत्यक्षेच्छाया निवृत्तौ क्रमप्राप्तत्वादनुमानोपस्थितौ तन्निरूपणे जिज्ञासायाः सत्वादनुमानस्यावश्यवक्तव्यत्वमित्यवसरसङ्गत्या नुमाननिरूपयितुमाह अथेति। अत्रानन्तर्यवाचकाथशब्देनावसरः सूच्यत इति। तथा चात्र प्रत्यक्षनिरूपणानन्तरवर्तमाननिरूपणविषयो ऽनुमानमिति बोधः। तत्र लक्षणोद्देशपरीक्षाभिरनुमाने निरूपणीये,। नन्वनुगतप्रतीत्यैव यदि जातिसिद्धिस्तदा सामान्यादावपि सदित्यनुगतप्रतीत्या जातिसिद्धिः स्यात्। न चानवस्था-

धीत्या नैवमिति वाच्यम्। यावत्प्रतीतिं तत्कल्पने नानवस्थानात्। न च परामर्शकार्यतावच्छेदकतया तत्सिद्धिरिति वाच्यम्। अनुमितेरन्यपक्षकान्यसाध्यकतया ऽनुमितित्वस्यानुगतस्यैकस्याभावादित्याशयवानाह जन्यज्ञानेति। यद्वा स्वकीयलक्षणापचाय पारिभाषिकमनुमितित्वमाह जन्यज्ञानेति। जन्यज्ञानं व्याप्तिज्ञानं तज्जन्यत्वाव्यभिचारि। जन्या या शब्दधीः जन्यपदज्ञानं शब्दविषयकातिदेशवाक्यार्थधीश्च तज्जन्यत्वव्यभिचारिजातिमदनुभवत्वस्यानुमितिमात्रे सत्त्वादित्यर्थः। ज्ञानाजन्ये जन्यज्ञानाजन्ये, । तद्धीजन्यत्वेति जन्यशब्दज्ञानजन्यत्वेत्यर्थः। तथापि जन्यज्ञानजन्यत्वाव्यभिचारीत्यत्रापि, । तर्हि चाक्षुषत्वादिरपि, । तदाश्रयाणां चाक्षुषत्वाश्रयाणाम्, ॥

तर्हि न यथोक्तज्ञानजन्यत्वव्यभिचारि। उपमितीनां सर्वासां शब्दविषयकातिदेशवाक्यार्थज्ञानजन्यत्वात् शाब्दानुभवानां च सर्वेषां शब्दज्ञानजन्यत्वात्। न च शब्दज्ञानजन्यत्वव्यभिचारीति सम्यक् अनुमितित्वस्य ईश्वरीयशब्दज्ञानजन्यत्वाव्यभिचारित्वेनासम्भवात् न च मोक्षजनकतावच्छेदकं तत्त्वज्ञानवृत्तिसामान्यं जन्यज्ञानजन्यमात्रवृत्तीत्यतिव्याप्तिः। तस्य शब्दविशेषविषयकमननजन्यमात्रवृत्तित्वेन जन्यशब्दज्ञानजन्यत्वाव्यभिचारित्वाज् जातिपदं वा मानसावृत्तिजातिपरं। अत एव भक्तिश्रद्धादेर्व्युदासः। अनुभवपदं स्मृतिवारणायेति दिक्।

तर्हि उपमितित्वं शाब्दत्वं चेति, । न यथोक्ते ति । उपमितित्वशाब्दत्वयोरतिदेशवाक्यार्थपदज्ञानरूपजन्यज्ञानजन्यत्वाव्यभिचारित्वादित्यर्थः । ननु द्वितीयदले प्रथमजन्यपदं किमर्थमित्याशङ्कते न

च तुल्याक्षरग्रहणे नामैक्यदोषात् तत्तद्वैवतनामतोऽक्षराणि गृहीतानि आचार्येण। मन्मते चित्रायामाचार्येण 'चित्'-इति गृहीतम् तेन 'चिन्मू' इति पाठः साधुः। एवं वैदिकव्याकरणानुसारेण 'मृ' इत्यस्यो-च्चारणं 'म्रे' इति भवति तेन न छन्दोभङ्गदोष इति। अत्र बार्हस्पत्य-व्याख्यानं समीचीनम्। युक्तपरो हि वर्णो दीर्घो भवति-इति बुद्ध्या-ऽऽचार्येण नक्षत्रनामसु आदिमध्यान्ताक्षराणि गृहीतानि यतो नामाक्ष-राणां कस्याप्यक्षरस्य ग्रहणेन न कश्चिद्विशेषस्तदक्षरेण तस्यैव नक्षत्रस्य ग्रहणादित्यलम् ॥ १८ ॥

कार्या भांशाष्टकास्थाने कला एकान्नविंशतिः।
ऊनस्थाने द्विसप्तति[1]मुद्वपेद्युक्तसम्भवे ॥ १९ ॥

सोमाकरः—कार्या भांशेति। तेषामृक्षाणां ये [2]स्थानमुक्तास्ते-ऽष्टकाः कार्या अष्टनाडिका इत्यर्थः। उक्तमेतद्विशेषार्थं पुनरुच्यते। विशेषस्तु कला एकान्नविंशतिरधिका उद्वपेदादाविति वाक्यशेषः। तथा ऊनस्थाने द्विसप्ततिमपि तत्र दद्यात्। किं सर्वकालम्। ऊनस्थाने युक्तसम्भवे ऊनर्क्षचन्द्रयोग इत्यर्थः। एवमेतेन प्रकारेण चन्द्रगतिमपेक्ष्य पर्वराशिः प्रकल्प्य इत्यर्थः। एवमत्रैषा यागकालचोदना मिश्रिताभिप्रा-यानुसारिणी तथा ऋतुयाजी वान्यश्चातुर्मास्ययाजीति। तथा तामेव चोदितां गणनामभिप्रेत्य लौगाक्षिणा तान्येव पञ्चवार्षिकाण्याम्नातानि। संवत्सरस्य षडहेऽतिरिच्यत इत्यादि यथा तस्मात् पञ्चानां वर्षाणा-मेक एव प्रयत्नः ॥ १९ ॥

सुधाकरः—इदानीं पर्वभांशतः कलानयनमाह कार्या इति। एक-स्मिन् वर्षे अष्टकाश्चतस्रो भवन्ति (अश्नन्ति पितरोऽस्यामित्यष्टका) ताश्च वेदे[3] प्रसिद्धास्तेनाष्टकाशब्देन चत्वारि गृह्यन्ते। ततोऽस्य श्लोकस्य

(१) मावपेदिनर्क्षयुताम्—इति पाठः साधुः।
(२) भांशा उक्ता इति पाठः साधुः।
(३) हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका एकस्यां वा इति

व्याख्यानम् । भांशानामष्टका भांशाष्टका तत्स्थाने एकोनविंशतिः कलाः कार्याः । तथा ऊनस्थाने हीनस्थाने हीनजातीयकाष्ठास्थाने गणक इनैः सूर्यैर्द्वादशभिः संयुतां द्विसप्ततिं चतुरशीतिमावपेत् प्रक्षिपेत् । अनेनैतदुक्तं भवति । भांशानां प्रतिश्चतुष्कं एकोनविंशतिः कलाश्चतुरशीतिः काष्ठाश्च कार्या इति ।

अत्रोपपत्तिः । यदि युगचन्द्रनक्षत्रैः १८०९ युगकुदिनानि १८३० लभ्यन्ते तदैकेन चन्द्रनक्षत्रेण किम् । लब्धम् = $\frac{१८३०}{१८०९}$ = $\frac{६१०}{६०३}$ = १ + $\frac{७}{६०३}$ = एकं कुदिनं $\frac{७}{६०३}$ कुदिनशेषं च । तत्रैकस्य कुदिनस्य हरसमान् त्र्यधिकषट्शतमितान् भागान् कृत्वैकस्य भागस्य संज्ञा कला कृता । तत एकस्मिन् चन्द्रनक्षत्रे एकं कुदिनं सप्तकला वा ६०३ + ७ = ६१० कला भवन्ति । वक्ष्यति चाचार्यः "ससप्तैकं भयुक् सोमः" इति । पुनरेककलायां चतुर्विंशत्यधिकशतसमान् भागान् कृत्वा एकभागस्य काष्ठा संज्ञा कृता । एवमपि वक्ष्यति चाचार्यः "काष्ठानां चैव ताः कला" इति । ततोऽनुपातो यद्येकचन्द्रनक्षत्रेण वा चतुर्विंशत्यधिकशतभांशैः ६१० कला लभ्यन्ते तदा चतुर्भिर्भांशैः किम् । लब्धा एकाष्टकायां कलाः = $\frac{६१० \times ४}{१२४}$ = $\frac{२४४०}{१२४}$ = १९ $\frac{८४}{१२४}$ = १९ कलाः + ८४ काष्ठाः । अत उपपन्नं सर्वम् । अत्र बार्हस्पत्यव्याख्यानं तदुपपत्तिश्च न साध्वीति ॥ १९ ॥

(१)तिथिमेकादशाभ्यस्तां पर्वभांशसमन्विताम् ।
विभज्य भसमूहेन तिथिनक्षत्रमादिशेत् ॥ २० ॥

सोमाकरः—एवमत्र या तिथिचोदना तामाह तिथिमेकादशाभ्यस्तामिति । पर्वचोदितां तिथिमेकादशाभ्यस्तां पञ्चदशीमेकादशभिर्गु-

आश्वलायनसूत्रम् । माघ्याः पूर्णमास्या उपरि कृष्टका तस्यामष्टमी ज्येष्ठया संपद्यते तामेवाष्टकेत्याचक्षते—इति आपस्तम्बसूत्रम् ।

ऊर्ध्वमाग्रहायण्यास्तिस्रोऽष्टकाः । ऐन्द्री वैश्वदेवी प्राजापत्या पित्र्या इति पारस्करगृह्यसूत्रम् । मघ्या वर्षे च तुरीया शाकाष्टका इति तत्रैव ।

(१) तिथिमर्कदशाभ्यस्तां इति पाठः साधुः ।

णिताम् । सङ्गुण्य पञ्चषष्टिः शतं भवति । विभज्य भसमूहेन सप्तविं- शत्या भागमपहृत्य चोऽवशिष्यन्ते । एवं पुनस्तृतीयं पर्वेदं तस्माद्भवति प्रागुक्तादेकान्तरं१ह्नीति यदुक्तम् । अथवा तिथिपरिमाणमुत्तरे श्लोके वक्ष्यति तासु सप्तगुणां तिथिमिति । एवं तिथेः समावयवास्तानेकादश- भिर्गुणयेत् सप्तसप्ततिर्भवति । ततः पर्वभांशसमन्वितां कुर्यादिति वा- क्यशेषः । एतदुक्तं भवति । तिथ्यवयवेषूपरि पर्वनक्षत्रावयवान् विन्यसेत् द्वौ वा त्रीन् चतुरो वा तत एकोनाशीति ७९ रशीति ८० रेकाशीति ८१ र्वा भवति । ततस्तान् विभज्य भसमूहेन भसगणेन(१)जातं सप्तविंश- तिस्तेन भागमपहृत्य पञ्चविंशं षड्विंशं सप्तविंशं वा नक्षत्रं तस्मिन्नहनि तिथिनक्षत्रमादिशेत् कथयेदित्यर्थः । सा च संख्या पर्वभांशसमन्वितामि- ति वचनात् तस्मादेव नक्षत्रादारभ्य प्रवर्तते नाश्विन्यादेः । एवं तु येन यो मास उपलक्षितस्तस्मिंस्तस्मादेव गणना प्रवर्तते । तथा तूत्तरेषु सर्वेषु स्फुटतरा प्रवृत्तिर्भवति । यतस्तथोपलक्षितं नक्षत्रं नियमेन सर्वकालं भवति। यदि त्वेवं सर्वासां तिथीनां नक्षत्रानयनमिच्छेत् तदा नष्टकाला- नयनान्यन्यानि करणान्यनुसृत्योहापोहाभ्यां कल्पयेदस्याप्रस्तुतत्वात् तेने- होपकारकृत् । यस्मादिह पर्वचोदनया पञ्चदुयचोदितो यागकाल एव प्रकृतस्तस्मादेतदेवोच्यते ॥ २० ॥

सुधाकरः—इदानीमिष्टतिथौ नक्षत्रानयनमाह तिथिमिति । एकैकादशभिर्दशभिश्चाभ्यस्तां गुणितां तिथिं किंविशिष्टाम् । पर्वभांश- समन्विताम् । पर्वणि 'भांशाः स्युरिष्टकाः कार्याः पक्षा द्वादशकोद्गताः' इति विधिना ये भांशाः स्युस्तैः समन्विता युक्तेति तां भसमूहेन भांश- समूहेन चतुर्विंशत्यधिकशतेन विभज्य लब्धं गणकस्तिथिनक्षत्रं तिथिस- म्बन्धिनक्षत्रमादिशेत् कथयेदिति ।

अत्रोपपत्तिः । एकयुगे चन्द्रदिनानि वा तिथयः = १८६० । चन्द्र- नक्षत्राणि च = १८०९ । ततोऽनुपातो यदि युगतिथिभिर्युगनक्षत्राणि

(१) सप्तविंशतिमितेन तेन ।

तदेष्टतिथिभिः किम्। लब्धानि नक्षत्राणि $= \frac{१८०९ \times \text{ति}}{१८६०}$ वा नक्षत्रांशाः $= \frac{१२४ \times १८०९ \times \text{ति}}{१८६०} = \frac{१८०९ \text{ ति}}{१५} = (१२० + \frac{९}{१५}) \text{ ति} = १२० \text{ ति} + \frac{९ \text{ ति}}{१५}$। अत्र द्वितीयखण्डं त्यक्तं तदर्थं १६ श्लोके नवकैरित्यादौ संस्कारविशेषः कथित आचार्येण। अत्र पर्वभांशयुतेनेष्टतिथौ भांशमानमेकनक्षत्रभांशमानेन भक्तं तिथिनक्षत्रमानं स्फुटमत उपपन्नम्। मन्मतेऽस्य श्लोकस्यात्र एव १६ श्लोकनिवेश उचितः। अत्र बार्हस्पत्यशोधितपाठस्तद्व्याख्या तदुपपत्तिश्चेति सर्वं न साध्विति सुधीभिर्भृशं विचिन्त्यम् ॥ २० ॥

याः पर्वभादानकलास्तासु सप्तगुणा तिथिः।
उक्ता[1]स्तासां विजानीयात् तिथिभादानिकाः कलाः॥२१॥

सोमाकरः—एवमत्र चोदितायास्तिथेः परिमाणमाह याः पर्वभादानकला इति। याः पूर्वमुक्ताः कथिताः पर्वभादानकलाः। भांशाः स्युरष्टकाः कार्या इति। सप्तनवकैस्त्वावापो यदि नेह विवक्षित-स्तिथीनां समूहत्वात्। कलापरिमाणमुपरिष्टाद्वक्ष्यति पर्वणां स्यात्चतु-ष्पादी काष्ठानां चैव ताः कला इति। किं तासामित्याह। तासु सप्त-गुणा तिथिर्भवेदिति वाक्यशेषः। एतदुक्तं भवति। पर्वभांशसमन्वितैरंशैः सप्तभिस्तिथिपरिमाणं कल्पयेत्। सप्तांशानि तिथिर्भवतीत्यर्थः। एवमतस्तासामपि कारणभूतानां सम्यग् विजानीयात् कास्तिथिभादानि-काः कला याः पूर्वचोदिताः कलाः। पूर्वार्धे पर्वसूत्तरा इत्यादौ तिथि-भादानिकाः कलास्तस्यां तिथौ पर्वनक्षत्रकल्पना तस्यामेव भवेदित्यर्थः। पूर्वपूर्णमास्यां तदंशचोदितयागकालकल्पनयोपपत्तेर्यथाहि कार्यमि-त्यर्थः ॥ २१ ॥

सुधाकरः—इदानीमिष्टतिथितुल्ये गतनक्षत्रे तत्कलानयनमाह या इति। पूर्वप्रकारेण पर्वसमये या भादानकला आगतास्तासु सप्तगु-णतिथिर्युक्ता ताश्च गणकस्तिथिभादानकलास्तिथितुल्ये गतभे सति भादानकला वक्ष्यमाणाः कला विजानीयात्। यदि पर्वतो गततिथि-

(१) युक्ता ताश्च इति पाठः साधुः।

Digitized by Google

संख्यासममेव गतनक्षत्रमानं तदा पर्वभादानकलासु सप्तगुणतिथिर्योज्या । योगसमाप्तिस्तिथितुल्ये पर्वतो गतभे तस्यादानकला भवन्तीति ।

अत्रोपपत्तिः । तिथितुल्ये पर्वतो गतभे तिथिसंख्यासमा गतनक्षत्र-संख्या । एकैकस्मिन् नक्षत्रे तु एकं कुदिनं सप्तकलाधिकं भवति "सप्तकं भयुक् सोमः" इति वक्ष्यमाणवचनात् । अतो दिनस्य प्रयोजनाभावात् पर्वभादानकलासु सप्तगुणा तिथिर्युक्ता ताश्च तिथिदिने भस्यादानकला भवन्तीति स्फुटम् । अत्र बार्हस्पत्यव्याख्यानं न स्फुटमिति ॥२१॥

अतीतपर्वभागेभ्यः शोधयेद् द्विगुणां तिथिम् ।
तेषु मण्डलभागेषु तिथिनिष्ठां गतो रविः ॥ २२ ॥

सोमाकरः—तथा परपदार्थमाह अतीतपरभागेभ्य इति । द्वौ चयश्चत्वारो वा षोडश चतुर्विंशतिर्द्वात्रिंशद्वा तेभ्यः शोधयेत् पातयेत् द्विगुणां तिथिं द्वौ सप्तकौ चतुर्दशेत्यर्थः । ततः किम् । तेषु मण्डल-भागेषु भायावत्सङ्ख्याकेषु तिथिनिष्ठां गतो रविर्भवेदिति वाक्यशेषः । एतदुक्तं भवति । अमावास्यायां पर्वतत्त्वोदनाभावात् ततः परं पञ्चदशं यत् तदपेक्षयोपलक्षणादौ प्रवृत्तिः । पूर्वेऽंशे तिथेर्निष्ठा निष्पत्तिगतो रविः । तद्दिवससूर्यतत्त्वभागकल्पना एवं वा भवन्तु ॥ २२ ॥

सुधाकरः—इदानीं तिथिमानमानयति अतीतेति । सूर्योदयादतीतपर्वणो गतपर्वणो ये भागा भोगभागा उन्नतांशा ये चैकसावनदिने चतुर्विंशत्यधिकशतमिता भवन्ति तेभ्यो द्विगुणां तिथिं मध्यकः शोधयेत् । शेषेषु तेषु मण्डलभागेषु स्वाहोरात्रवृत्तभागेषु यदा रविरागच्छति तदा स रविस्तिथिनिष्ठां तिथिमानान्तं गतो भवति । द्विगुणतिथिशोधनेन येऽहोरात्रवृत्तभागा आगतास्त एव तिथिभोगभागास्तद्भागसमो यदा रविरुन्नतस्तदा तिथ्यन्ते स्थितो भवतीत्यर्थः ।

अत्रोपपत्तिः । अतीतपर्वभागास्तद्दिने पर्वणो भोगभागाः । अथैकतिथौ रविसावनभागानयनार्थमनुपातो यदि १८६० तिथिभिः १८३० सावनदिनानि लभ्यन्ते तदैकतिथौ किमिति लब्धः सावनदिनावयवः $= \frac{१८३० \text{ ति}}{१८६०} = \frac{६१ \text{ ति}}{६२} = \text{ति} - \frac{\text{ति}}{६२} = \text{ति} - \frac{२ \text{ ति}}{१२४} =$ तिथिसमानि दिनानि

–२ तिथिभागाः । अत्र दिनानां प्रयोजनाभावात् द्विगुणतिथि-समा भागाः पर्वभागेभ्यो विशोधितास्ते वर्तमानतिथेर्भागमाना भवन्तीति बार्हस्पत्यव्याख्यानं गणितं च समीचीनमिति ॥ २३ ॥

[1]विषुवन्तं द्विरभ्यस्तं रूपोनं षड्गुणीकृतम् ।
पक्षा यदर्धं पक्षाणां तिथिः स विषुवान् स्मृतः ॥ २४ ॥

सोमाकरः–विषुवन्तं द्विरभ्यस्तमिति । द्विरिति द्विविध्यमुक्तं तद्विषुवत्संज्ञकमुक्तं दिवससंज्ञकमुक्तम् । तदेव पक्षा वा तदेव परिमाणं चतुर्दश रूपोनमेकेनोनं त्रयोदशकं तावन्मात्रं दिनद्वयं षड्गुणीकृतं द्वादशगुणनया दिनानि पक्षः । असावार्क एव न चान्द्र एतदेवागमतो यदेतत्तद्रूपोनमध्यर्धं मध्यतिथेः स विषुवान् स्मृतः । तिथिदिनानां तु चान्द्रमस एव न सौर्यः । पक्षा द्वादशका इति यदुक्तं तदेव पुनरुपपादितं वक्ष्यमाणतत्सङ्ग्रोपयोग्यम् ॥ २३ ॥

सुधाकरः–इदानीमभीष्टविषुवत्समये युगादितः पक्षतिथ्यानयनमाह विषुवदिति । "समरात्रिदिवं कालं विषुवद् विषुवं च तत्" इत्यमरः । विषुवच्चेऽस्मिन् सौरवर्षे सायनमेषादौ सायनतुलादौ भवतीति वर्षमध्ये वारद्वयं भवति । ज्योतिषवेदाङ्गे रविचन्द्रादीनां समानवेगेन चलनात् द्वयोर्द्वयोर्विषुवतोर्मध्ये समानान्येव सौरचान्द्रदिनानि भवन्तीति प्रसिद्धम् । विषुवद् युगादितोऽभीष्टविषुवतः संख्यात्मकं यन्मानं भवेत् तद् द्विर्द्विकेनाभ्यस्तं गुण्यं गुणितफलं रूपेणैकेनोनं शेषं षड्गुणीकृतं षड्गुणं कार्यम् । एवं गुणनफलं स्वविषुवति युगादितः पक्षा भवन्ति तथाऽऽगतानां पक्षाणां यदर्धं यद्दलं स एव विषुवान् तिथिः स्मृतः आचार्यैरिति । "तिथिर्द्वयोः" इति लिङ्गानुशासनात् तिथिशब्दः पुंलिङ्गेऽपि ।

अत्रोपपत्तिः । माघशुक्लादेर्युगादेः सौरमासत्रयान्तरे प्रथमं विषुवत् । अतो यदि ६० सौरैर्मासैर्युगचान्द्रपक्षा १२४ लभ्यन्ते तदा सौर-

(१) विषुवत् तद् इति पाठः साधुः ।

मासचयेण किमित्यनुपातेन लब्धाः पक्षाः $= \frac{१ \times १२४}{६०} = \frac{३१}{१५}$ क्षेपाख्याः । अथ द्वयोर्विषुवतोर्मध्ये षट् सौरा मासाः अतस्तदन्तर्गताः पक्षाः $= \frac{६२}{५}$ । द्वयोर्विषुवतोर्मध्ये ह्येकगुणा विषुवत्त्रयमध्ये द्विगुणाः अभीष्टविषुवन्मध्ये च (वि−१) एतद्गुणाः पक्षा भवन्ति । यद्यभीष्ट विषुवत्सङ्ख्या = वि । तर्हि विषुवदन्तर्गताः—

पक्षाः $= \frac{६२}{५}$ (वि − १) $= \frac{६२ \text{ वि}}{५} - \frac{६२}{५}$ । क्षेपाख्ययोजनेन जाता युगादितः पक्षाः $= \frac{६२ \text{ वि}}{५} - \frac{६२}{५} + \frac{३१}{५} = १२ \text{ वि} + \frac{२ \text{ वि}}{५} - १२ - \frac{२}{५} + ६ + \frac{१}{५}$
$= १२ \text{ वि} - ६ + \frac{२ \text{ वि}}{५} - \frac{१}{५} = ६ (२ \text{ वि} - १)$ पक्षाः $+ \left(\frac{२ \text{ वि} - १}{५}\right) १५$ तिथयः ।
$= ६ (२ \text{ वि} - १)$ पक्षाः $+ ३ (२ \text{ वि} - १)$ तिथयः
$= ६ (२ \text{ वि} - १)$ पक्षाः $+ \frac{६ (२ \text{ वि} - १)}{२}$ तिथयः ।

अत उपपद्यते सर्वम् । अत्र बार्हस्पत्यकृतं व्याख्यानं गणितं च समीचीनं शङ्करबालकृष्णदीक्षितगणितानुरूपमिति ॥ २३ ॥

पलानि पञ्चाशदपां धृतानि
तदाढकं द्रोणमतः प्रमेयम् ।
त्रिभिर्विहीनं कुडवैस्तु कार्यं
तन्नाडिकायास्तु भवेत् प्रमाणम् ॥ २४ ॥

सोमाकरः—यस्मात् कलाभिर्नाडिकानिर्वृत्तिस्तस्मादन्यथा-लघुत्वेनाह पलानि पञ्चाशदपां धृतानीति । पञ्चाशदपां धृतानि [(1)]अष्टाब्दर्धेन तस्मिन् परिमाणे ताम्रघटेनाढकं नाम प्रमाणम् । द्रोणमतस्तेन प्रमाणेन प्रमेयं प्रमातव्यम् । तदपि प्रमाणं पलशतद्वयप्रमाणं २०० तदेव पश्चात् त्रिभिर्विहीनं कुडवैस्तु कार्यम् । कुडवजा च्यङ्गुला शलाका तयाधश्छिद्रयेत् ततश्छिद्रोदकप्रसुत्या यावन्मात्रा कलोपगच्छति तन्नाडिकाया घटिकायाः प्रमाणं भवेत् सा भवतीत्यर्थः ॥ २४ ॥

---

(१) अष्टाकार्षिण इति पाठः साधुः ।

सुधाकरः— इदानीं नाडिकाप्रमाणमाह पलानीति । अपां जलस्य पञ्चाशत् पलानि यस्मिन् पात्रे धृतानि स्थापितानि तत् पात्रमाढकं कथ्यते । अतोऽस्मादाढकमानात् पूर्वाचार्यमतेभ्यो द्रोणं द्रोणमानं प्रमेयं प्रमातव्यम् । तद् द्रोणं त्रिभिः कुडवैर्विहीनं शेषं नाडिकाप्रमाणं भवेदिति सर्वं विस्तरतोऽष्टमश्लोकभाष्ये पूर्वं व्याख्यातमिह किं पिष्टपेषणेनेति ॥ २४ ॥

एकादशभिरभ्यस्य पर्वाणि नवभिस्तिथिम् ।
युगलब्धं सपर्व स्या[1]द्वर्त्तमानार्कभक्रमात् ॥ २५ ॥

सोमाकरः—तत्प्रसङ्गादुक्त्वा यागकालविधिविशेषमाह । पर्वाणीति । तदर्थानामवयवाः कलासमूहा येऽष्टकाः कार्या इत्युक्ताः षोडश वा चतुर्विंशतिर्द्वात्रिंशद्वा द्वित्रिचतुरंशानेकादशभिरभ्यस्य सङ्गुण्य षोडशानां षट्सप्तत्यधिकं शतं १७६ भवति । चतुर्विंशतेः शतद्वयं चतुःषष्टिः २६४ । द्वात्रिंशतः शतत्रयं द्विपञ्चाशच्च ३५२ । तथा नवभिस्तिथिं तिथ्यवयवानपि नवभिरभ्यस्य ते च सप्तानामष्टकानां षट्पञ्चाशत् ५६ भवन्ति । तान् नवभिरभ्यस्य शतपञ्चकं चत्वारि च ५०४ । ता एकीकृत्य शतत्रयेण द्वापञ्चाशता च सह शताष्टकं षट्पञ्चाशच्च ८५६ भवति । तेषां युगलब्धं युगा द्वादशेह युगोपन्यासप्राधान्यात् । तैस्ततो भागमपहृत्य यल्लब्धमेकसप्ततिकं ७१ स पर्व स्याच्चतुरंशः स्यादिति शेषः । एवं त्र्यंशावयवैश्चतुःषष्ट्यधिकेन शतद्वयेन सहाष्टषष्ट्यधिकं शतसप्तकं ७६८ भवति । तस्य तथैव भागापहारे लब्धं चतुःषष्टिः ६४ । तथैव द्व्यंशस्य शतषट्कमशीतिश्च ६८० । लब्धं तथैतत् षट्पञ्चाशत् ५६ । कृत्ये च कदोपवसथे पर्वकाल इत्याह वर्त्तमानार्कभक्रमात् । यस्मिन्वृते अर्के आस्ते तत उत्तरः काल इत्यर्थः । एष एव यागकालः । ओपवसथे तु पूर्वोक्त एव । अथवैतमेवार्थमन्यथा । तिथिं त्रिंशत्संख्याकं नवभिर्गुणयेत् तथा तदा द्वापञ्चाशत् पञ्चचत्वारिंशदेको[2]नचत्वारिंशत् कला एकोनविं-

(१) स्याद्वर्त्तमानार्कभं क्रमात्-इति पाठ साधुः ।
(२) ऊनचत्वारिंशत् इति पाठः साधुः ।

र्गतिमुद्रापं कृत्वा एवमेतयोः कालयोरुपक्रमापवर्गौ यथा भवतस्तथा वर्तितव्यम् । तमभ्युदितेष्टिपर्यायकृतो दशमी प्रकान्ते वेदनिष्पत्तिं विद्यादिति श्रुतेश्च । एतदमावास्यामधिकृत्योक्तम् ॥ २५ ॥

सुधाकरः—इदानीमिष्टतिथौ रविनक्षत्रानयनमाह एकादशभिरिति । युगादितो वर्त्तमानपर्वपर्यन्तं यावन्ति पर्वाणि "निरेकं द्वादशाभ्यस्तम्" इत्यादिना स्पष्टान्येकादशभिरभ्यस्य सङ्गुण्य तथा पर्वानन्तरं या तिथिस्तां तिथिं तिथिसंख्यां नवभिः सङ्गुण्य द्वयमेकीकृत्य युगलब्धं युगे यावन्ति पर्वाणि तत्संख्यया चतुर्विंशत्यधिकशतेन लब्धं फलं सपर्व पर्वमानेन सहितं कार्यं तदा तत् क्रमात् युगादिभवश्रविष्ठादितो वर्त्तमानार्कभं वर्त्तमानसूर्यनक्षत्रं स्यात् । इदं शङ्करबालकृष्णदीक्षितव्याख्यानं समीचीनम् ।

अत्रोपपत्तिः । युगे सूर्यनक्षत्राणि $=$ ५ × २७ $=$ १३५ । चान्द्रपर्वाणि च $=$ १२४ । ततोऽनुपातो यदि युगपर्वभिर्युगरविनक्षत्राणि तदेष्टपर्वभिः किमिति लब्धानि रविनक्षत्राणि $= \frac{\text{१३५ प}}{\text{१२४}} = \text{प} + \frac{\text{११ प}}{\text{१२४}}$ । अथैकेन पर्वणा वा पञ्चदशतिथिभिर्यदि रविनक्षत्रमानम् $= \frac{\text{१३५}}{\text{१२४}}$ इदं तदेष्टतिथिभिः किमिति लब्धमिष्टतिथिसम्बन्धिरविनक्षत्रमानम् $= \frac{\text{१३५} \times \text{इति}}{\text{१५} \times \text{१२४}} = \frac{\text{९} \times \text{इति}}{\text{१२४}}$। द्वयोर्योगेन जातं युगादितो रविनक्षत्रमानम् $= \text{प} + \frac{\text{११ प} + \text{९इति}}{\text{१२४}}$ । अतः श्रविष्ठादिगणनया वर्त्तमानतिथावर्कनक्षत्रं स्यादित्युपपन्नम् । अत्र बार्हस्पत्यव्याख्यानं न समीचीनं तद्गणितेनापि न वर्त्तमानार्कभमायातीति गणकैर्नैपुण्यं विलोक्यम् ॥ २५ ॥

सूर्यर्क्षभागान् नवभिर्विभज्य
शेषं द्विरभ्यस्य दिनोपभुक्तिः ।
तिथी(१)युता भुक्तिदिनेषु कालो
योगो दिनैकादशकेन तद्भम् ॥ २६ ॥

---

(१) तिथेर्युतेर्भुक्तिदिनेषु इति पाठः साधुः ।

सोमाकरः—अथ भेदेन परिमाणमाह। यस्मिन्नृक्षे सूर्यः स्थितः स सूर्यर्क्षस्तस्य भागान् भुक्तान् भागान् उक्तानष्टसंख्याकान् (यस्य[1] यावन्तः) तान् नवभिर्विभज्य भागं हृत्वा ततः शेषं द्विरभ्यस्य द्विगुणी-कृत्य षोडशानां नव [2]यात्यस्य सप्तांशा अवशिष्यन्ते ते द्विगुणाश्चतु-र्दश भवन्ति। चतुर्विंशतेर्द्वौ नवकावष्टादश [3]पात्य षडवशिष्यन्ते ते द्विगुणा द्वादश भवन्ति। तथा द्वात्रिंशतस्त्रीन् नवकान् सप्तविंशतिं [4]पात्य पञ्चावशिष्यन्ते ते द्विगुणा दश भवन्ति। ततः किम्। सा दिनोपभुक्तिः सूर्यस्येति वाक्यशेषः। कथम्। शेषं तथैव विभज्येति वर्तते। एतदुक्तं भवति। यावदस्यावशिष्यते तद्द्विगुणं कृत्वा तथा विभज्य यस्य यावती भागावाप्तिस्तस्य तावती सूर्यभुक्तिरित्युक्तं भवति। द्व्यंशस्य द्व्यंशकलना यावत् त्र्यंशस्य त्र्यंशाश्चतुरंशस्य चतुरंशा इव भावः। दिनकालपरिमाणमाह। तिथौ युता भुक्तिदिनेषु कालः। तिथियुता सप्रगुणाष्टकाः सा षट्पञ्चाशत्परिमाणा भुक्तिः। सा च भुक्तिः सहिता द्वाभ्यां त्रिभिश्चतुर्भिर्वा सहिता अष्टपञ्चाशत् ५८। एकोनषष्टिः ५९। षष्टिः। ता भागानां सङ्कलनया दिनेषु स कालो भवतीति वाक्यशेषः। एवं तु स्वकपरिमाणेन दिनेकादशकेन तद्भम्। एकादशभिर्दिवसैः सूर्यर्क्षं व्याप्नोतीत्यर्थः। एवमेतद्योगे सभावे सूर्यस्य विचार्यमिति वाक्य-शेषः॥ २६॥

सुधाकरः—इदानीं कदा वर्त्तमाननक्षत्रादौ रवेः प्रवेशो जात इत्याह सूर्यर्क्षभागानिति। अनन्तरोक्तप्रकारेण सूर्यर्क्षस्य वर्त्तमानसूर्यन-क्षत्रस्य ये भुक्ता भागा भवन्ति तान् नवभिर्विभज्य फलं ग्राह्यम्। तत् फलं द्विर्द्विवारं द्वाभ्यामभ्यस्य सङ्गुण्य गुणितफलेन दिनांशमानेन पूर्वागतं

(१) अयं प्रमादतोऽधिको व्यर्थ एव।
(२) अपास्य इति पाठः साधुः।
(३) अपास्य इति पाठः साधुः।
(४) अपास्य इति पाठः साधुः।

फलं दिनात्मकं हीनं कृत्वा शेषं ग्राह्यम् । तदेव शेषं सूर्यस्य दिनोपभुक्तिर्भवति । शेषसमेन सावनदिनाद्येन ते भागा रविणा भुक्ताः । अतस्तत्सावनदिनाद्येन वर्त्तमानकालात् प्रागेव तन्नक्षत्रादौ रवेः प्रवेश इति । एवं तिथेर्वर्त्तमानतिथिगतभुक्तभांशेभ्यो वा युतेः पर्वगणभवभुक्तभांशेभ्यश्च यानि भुक्तिदिनानि तेषु प्राक् यः कालः स एव योगो नक्षत्रादेरर्कस्य च योगकालो भवति । अथ योगकालज्ञाने सति दिनैकादशकेन दिने एकादशकेन "एकादशभिरभ्यस्य" इत्यादि भानयनप्रकारेण तद्भं योगसम्बन्धि नक्षत्रं च ज्ञेयमिति ।

अत्रोपपत्तिः । युगरविनक्षत्रे १३५ युगसावनदिनानि १८३० लभ्यन्ते तदेकेन नक्षत्रेण किम् । लब्धमेकनक्षत्रे सावनदिनमानम् $=\frac{१८३०}{१३५}=\frac{१२२}{९}=१३\frac{५}{९}$ एतदेव मानं वक्ष्यति चाचार्यः "सूर्यो कूनि त्रयोदश । नवमानि च पञ्चाह्नः" इति । अथान्योऽनुपातो यद्येकेन नक्षत्रेण वा चतुर्विंशत्यधिकशतभांशैरिदं $\frac{१२२}{९}$ सावनमानं लभ्यते तदा रविभुक्तभांशैः किमिति लब्धं भुक्तभांशसम्बन्धि सावनदिनमानम् $=\frac{१२२ \times \text{भुभां}}{१२४ \times ९}$

$$=\left(१-\frac{२}{१२४}\right)\frac{\text{भुभां}}{९}=\frac{\text{भुभां}}{९}-\frac{२}{१२४}\cdot\frac{\text{भुभां}}{९}=\frac{\text{भुभां}}{९}\text{ सावनदिनानि}$$

$-\frac{२\,\text{भुभां}}{९}$ सावनदिनांशमानम् । अस्यैव संज्ञा दिनोपभुक्तिः कृता यत एतावद्दिनपर्यन्तं रविणा तन्नक्षत्रभागा भुक्ता इति । उत्तरार्धोपपत्तिरतिसुगमा पूर्वार्धप्रकारागतभुक्तिदिनज्ञानत इति । अत्र मन्यते बार्हस्पत्यव्याख्यानं तद्दूषितं च न समीचीनमिति ॥ २६ ॥

त्र्यंशी[1] भशेषो दिवसांशभाग-
श्चतुर्दशाभ्याप्यपनीय भिन्नम् ।
[2]भार्धेऽधिके चापि गते परोऽंशो
द्वावुत्तमे तन्नवकैरवेद्युः ॥ २७ ॥

(१) त्र्यंशो भशेषो—इति पाठः साधुः ।
(२) भार्धेऽधिके वाऽल्पगते परोऽंशो द्वावुत्तमेतन्नवकैर्भवेद्यः इति पाठः साधुः ।

सोमाकरः—सिन्द्रगयकालपरिमाणमाह त्र्यंशी भशेषो दिव-सांशभाग इति । तद्भवेद्भुर्भवेदिति शेषः । तत्परिमाणं त्र्यंशः । तत्परिमाणमष्टौ । तथा दिवसचोदनाः सप्तगुणाः षट्पञ्चाशत्प्रमाणं तत्संख्याकां तिथिं किं समयाम् । त्र्यंशी भशेषं दिवसांशभागं चतुर्दशं चाप्यपनीय तस्या अपनीय यथैकत्वं प्रागुक्तं तथा कल्पनया नवकैर्भिन्नं द्वावुत्तमे तु द्व्यंशाद्यपेक्षया पञ्च षट् सप्त वा भवन्ति । तत् । तथा दिवसांशभागं चतुर्दशं चाप्यपनीय ते षष्टानामर्धं चत्वार एवं षट्पञ्चाशत् । तान् नव वा दश वैकादश वा [1]पात्य सप्तचत्वारिंशत् ४७ । षट्चत्वारिंशत् । पञ्चचत्वारिंश ४५ द्वाऽर्वाशिष्यते । तेषामादौ अंशा अष्टौ तथोपरिष्टादन्यः परोऽंशस्तेऽप्यष्टौ । एवं द्व्येकषष्टिर्द्विषष्टिस्त्रिषष्टिर्वा नक्षत्रापेक्षया भवति । एतत्तदावं सौरम् । सोमस्य यस्यां तिथिकल्पनायामिह प्रमाणं नक्षत्रापेक्षया किमेव भवतीति नाक्षत्री भुक्तिः । न[2]भे गते नभे नक्षत्रेऽतीते अधिके च काले वा सति तत्र किं परोंशो भवेदिति वाक्यशेषः । किं सर्वकाले । न । [3]द्वावुत्तर एव कालगत्यपेक्षया पश्चिमे द्वौ पञ्चांशौ भवतः । एवमेतस्यां कल्पनायां यद्गणितं तद्बहुगणितसापेक्षत्वान्न पर्यालोचितम् । तत्तु गणितज्ञाः स्फुटतरं कल्पयिष्यन्ति तेषां स्वागमप्रतिपत्तये पदार्थमेवं श्रुतिपुराणप्रतिपादितम् ॥ २७ ॥

सुधाकरः—इदानीं रविभुक्तनक्षत्रेषु सावनदिनान्याह त्र्यंश इति । चतुर्दशस्य सावनदिवसस्य योऽन्तिमस्त्र्यंशः स भशेष इति कथ्यते । भस्य नक्षत्रस्य सम्बन्धेन यः शेषः स भशेष इत्यन्वर्थकं नाम तदस्ति । अतस्तत्त्रिघ्नं खण्डात्मकं मानं चतुर्दशस्य सावनदिवसस्य मध्येऽपनीय हित्वा शेषमिते चतुर्दशदिनभागे रवेरेकस्य भस्य भोगो भवति । $14 - \frac{1}{3} = 13\frac{2}{3}$ एतेषु सावनदिनेषु रविरेकनक्षत्रं भुङ्क्ते इत्यर्थः । परं त्वत्र मानेऽन्तरं पतति तदर्थं विशेषं कथयति "भार्धेऽधिके" इति । रवौ भार्धं

(१) अपात्य इति पाठः साधुः
(२) मूले उत्तरार्धं 'चापि' स्थाने सोमाकरसंमतः पाठो 'नभे' तथा
(३) द्वावुत्तमे इत्यस्य स्थाने 'द्वावुत्तरे' इति पाठो विभाति ।

$१३\frac{१}{३}$ वाऽधिके भार्धाधिके वाल्पगते भार्धाल्पगते नवकैर्नक्षत्रैर्यः परोऽपर एकोऽंशो भवेत् एतदपि मानं क्वौ पूर्वप्रकारागतनक्षत्रसंबन्धिसावनदिन-मानेऽपनयनार्थं शोधनार्थमुक्तम् । अत्रैतदुक्तं भवति । एकनक्षत्रभोगसावनमानं "त्र्यंशो भशेष:" इत्यादिविधिनाऽऽगतमभीष्टनक्षत्रसंख्यागुण-मभीष्टनक्षत्रसंबन्धिसावनदिनमानमागच्छति तत्र नवभिर्नवभिर्नक्षत्रैर-केकं दिनमपनेयं तदा तद्वास्तवं मानं ज्ञेयमन्यथा स्थूलमित्यर्थः ।

अत्रोपपत्तिः । रवियुगनक्षत्रैः ५ × २७ = १३५ युगसावनदिनानि १८३० लभ्यन्ते तदैकेन किमिति लब्धमेकरविनक्षत्रे सावनमानम् = $\frac{१८३०}{१३५}$ = $\frac{१२२}{९}$ = $१३\frac{५}{९}$ = १३ + $\frac{६}{९}$ − $\frac{१}{९}$ = १३ + $\frac{२}{३}$ − $\frac{१}{९}$ = (१४ − $\frac{१}{३}$) − $\frac{१}{९}$ । इदमभीष्ट-नक्षत्रमानगुणमभीष्टनक्षत्रमानसम्बन्धि सावनदिनमानम् ।

= (१४ − $\frac{१}{३}$) इन − $\frac{इन}{९}$ । अत्राचार्येण प्रथमं प्रथमखण्डभवं फलं साधितं तत्र द्वितीयखण्डफलं यन्नवभिर्नवभिर्नवभिर्नक्षत्रैरेकमेकमुपलभ्यते तस्य शोधनं साधूक्तम् । अत्र बार्हस्पत्यव्याख्यानादिकं न साधितमिति । तत्र "द्वावुत्तमे" तथा "अवेक्ष:" इति शोधितपाठोऽपि न साधु रिति ॥ २७ ॥

त्रिंशत्यह्नां सषट्षष्टिरब्दः [१]पञ्चर्त्तवोऽयने ।
मासा द्वादश [२]सूर्याः स्युरेतत् पञ्चगुणं [३]युगम् ॥२८॥

सोमाकरः—एवमेतत्पूर्णमासस्य दर्शस्य चन्द्रसूर्यसम्बन्धेन पर्व-सञ्चोदनया यागकालं प्रतिपाद्यावयवानां संख्या तेन कालनिष्पत्तिप्रति-पत्त्यर्थमाह त्रिंशत्यह्नां सषट्षष्टिरब्द इति । त्रयाणां शतानां समा-हारस्त्रिशती या सा सषट्षष्टिः । षट्षष्ट्यधिकानि त्रीणि शतानीत्युक्तं भवति । ततः किम् । तदब्दो वर्षमितिर्भवतीति वाक्यशेषः । स च पञ्चर्त्तवः पञ्च वा ऋतव इति श्रुतिमभिप्रेत्य निरुक्तकृत् पञ्चर्त्तवः संव-

(१) वद वर्त्तवोऽयने इति पाठः साधुः ।
(२) सौराः इति पाठः साधुः ।
(३) युगे इति पाठः साधुः ।

स्सरस्येत्याह । तथा तस्यायने द्वे उदगर्धदक्षिणे इति तस्य ते । तयोर्मासा द्वादश भवन्तीति वाक्यशेषः । तेषु तु सूर्याश्रयणादर्का द्वादश स्युः । मासविभागेन [१]द्वादशादित्या इति श्रुतेः । ब्रह्म वा एव इतस्तपति यद्दृषत इत्याद्या विभागचोदना । एवमेतत्समग्रमेकीभूतम् । एतत् पञ्चगुणं युगम् । यदिह युगाध्यक्षमित्यादौ युगमधिकृतं तस्यैवा प्रतीतिने कृतादीनाम् । एते तु द्वादश पूर्वमेवेह कृतास्तत्प्राधान्येन शास्त्रप्रवृत्तिः । तस्य दिनानि ॥ २८ ॥

सुधाकरः—इदानीं युगे सावनदिनान्याह त्रिशतीति । सषट्-षष्टिः षट्षष्टिसहिता षष्ठ्यां रविसावनदिनानां त्रिशती अब्दः सौराब्दो भवति । तस्मिन् सौराब्दे ऋतवः षट् । अयने द्वे अयने । सौरा मासाश्च द्वादश भवन्ति ।

अत्रोपपत्तिः । अत्र वेधेन सौरवर्षे स्थूलाः ३६६ सावनदिवसा आनीताः । ते पञ्चगुणा युगे सावना दिवसाः = १८३० । शेषोपपत्ति स्फुटा ॥ २८ ॥

उदया वासवस्य स्युर्दिनराशिः सपञ्चकः ।
ऋषे[२]र्द्विषष्टिहीनं स्याद् विंशत्या चैकया स्तृणाम् ॥२९॥

सोमाकरः—उदया वासवस्य स्युरिति । वासव इन्द्रस्तत्संबन्धेन यज्ञ इति श्रुतेः । सवनानां प्रातरादीनां संबन्धात् सवनस्य प्राधान्यात् तस्य निर्देशः । तदीयमानस्य प्रमाणमुदया एव ते स्युर्भवेयुः । ते तु सूर्यस्य नान्येषाम् ।

यथाह परिशिष्टकृत् ।

> सा तिथिस्तदहोरात्रं यस्मादभ्युदिता रविः ।
> तथा कर्माणि कुर्वीत ह्रासवृद्धी न कारणम् ॥ इति ।

(१) अष्टौ वसवः एकादश रुद्रा द्वादशादित्याः प्रजापतिश्चेति ।
(जगद्ब्राह्मणपञ्चिका १, खण्ड १० ।)

(२) ऋषेर्द्विषष्ट्या हीनः स्याद् विंशत्या चैकया स्तृणाम् इति पाठः साधुः ।

एवं स भागो द्विसप्ततिभिर्वर्द्धते इति वाक्यशेषः । तथा सत्पञ्चकाः । चन्द्रस्य [1]ऋर्जिविंशत्याभिमिति मन्त्रवर्णात् तस्य स्वनामनिवृत्तः पञ्चकः । त्रिपञ्चक इति वा पाठः । सदा पञ्च एव । षड्द्विषष्टिहीनं स्यात् प्रत्येकस्यापि तिथेर्द्विषष्ट्या भागो हीयते ।

तथा च गर्गः ।

द्विलवोनमहोरात्रं चन्द्रस्य गतिरुत्तमा—इति ।

स एव त्रिंशिविंशत्या सैकया स्तृणाम् । स्तृणामृक्षाणां [2]ऋक्षास्तृभिरिति नक्षत्राणामिति नैरुक्ताः । तेषामेकविंशत्या हीनं स्यादिति वर्तते । तास्तु कला एव स्त्रीलिङ्गनिर्देशात् ।

तथा च गर्गः ।

दिनराशिषु यः पक्षपादवृद्ध्या चरेद्रविः ।
चरांशप्रमितैरंशैरेकविंशतिभिर्दिनैः ॥ इति ।

एवमेतानि मया पूर्वमेव गर्गवाक्यैर्विस्तरेण प्रतिपादितानि इहार्थमितमेतदुदाहृतम् । एवमेतस्य युगस्य ॥ २९ ॥

सुधाकरः—उदया इति । पूर्वविधिना युगे यो दिनराशिः सूर्यसावनाहर्गणः स सपञ्चकः पञ्चभिः सोहतस्तदा युगे वासवस्य धनिष्ठाया उदयाः स्युः । अत्र धनिष्ठाग्रहणमुपलक्षणार्थम् । तेन पूर्वागता संख्या सर्वेषां नक्षत्राणामुदया भभमा भवन्ति क्रान्तिवृत्तस्थानां सर्वेषां नक्षत्राणां समानकालेन भ्रमणात् । स दिनराशिर्द्विषष्ट्या हीनस्तदा चन्द्रस्योदयाश्चन्द्रसावनदिवसा भवन्ति । स एव दिनराशिः सैकया विंशत्या एकविंशत्या हीनस्तदा स्तृणां नक्षत्राणां चन्द्रनक्षत्राणां मनानि स्युरित्यर्थः ॥

अत्रोपपत्तिः । 'भभमास्तु भगणैर्विवर्जिता यस्य तस्य कुदिनानि तानि वा" इति भास्करोक्तिवैपरीत्येन युगे भभमाः = १८३० + ५ = १८३५ ।

(१) ऋर्जिविंशत्यां महिषो मगाणामिति । (ऋक्संहिता, अष्टक ७, अध्याय ४, वर्ग ७ । तथा आपस्तम्बोपनिषद् १० अनुवाक ६)

(२) ऋक्षास्तृभिरिति नक्षत्राणामिति (निरुक्तपूर्वषट्क अध्याय ३, खण्ड २० ।

Digitized by Google

युगे चान्द्रमासाः = ६२ । एते रविचन्द्रभगणान्तरसमा अतो विलोमेन युगे चान्द्रभगणाः = ६२ + ५ = ६७ । यथोक्तभास्करविधिनैव चन्द्रसावनदिवसाः = भच − चभ = १८३५ − ६७ = १८३० − ६२ = १७६८ । युगे चन्द्रभगणाः सप्तविंशतिगुणास्तन्नक्षत्राणां मानम् = ६७ × २७ = १८०९ = १८३० − २१ । इत्युपपन्नं सर्वम् ॥ २९ ॥

पञ्चत्रिंशं शतं पौष्णमेकोनमयनान्यृषेः ।
पर्वणां स्याच्चतुष्पादी काष्ठानां चैव ताः कला ॥३०॥

सोमाकरः—पञ्चत्रिंशं शतं पौष्णमिति । यत् पौष्णं सौरमयनमुदगयनाख्यमुक्तं तदृषेश्चन्द्रस्यायनानि पञ्चत्रिंशं शतमेकोनं चतुस्त्रिंशं शतं भवतीति वाक्यशेषः । चन्द्रमासापेक्षया प्रतिमासं द्वे द्वे इत्येतत् चान्द्रमासाः सप्तषष्टिस्तत्र भवति । पर्वणां स्याच्चतुष्पादी । पादस्त्रिंशत् तु सैकिकेत्युक्तम् । तेषां चतुष्पादी चत्वारः पादाश्चतुर्विंशं शतमित्यर्थः । केषां पर्वणां सर्वमासानां यस्मादधिकमासाभ्यां सह तत्र द्वाषष्टिमासास्तस्मादेतेषां तत्र समस्तत्र समस्तसंख्याप्रसङ्गादाह काष्ठानां चैव ताः कला । काष्ठा पञ्चाक्षरा भवेदिति वक्ष्यति । तासां चतुष्पादी च कलानिष्पत्तिरित्यर्थः । स चतुर्विंशं काष्ठाशतं कला भवतीत्यर्थः ॥ ३० ॥

सुधाकरः—पञ्चत्रिंशमिति । पौष्णं सौरं नक्षत्रमानं युगे पञ्चत्रिंशं शतं पञ्चत्रिंशदधिकं शतं १३५ भवति । तदिदं मान १३५ मेकोनं तत्समामानि युगे ऋषेश्चन्द्रस्यायनानि भवन्ति । युगे यानि चन्द्रपर्वाणि चतुर्विंशत्यधिकशतमितानि भवन्ति तेषां चतुर्थांशः पर्वपादः कथ्यते तेन युगे पर्वणां चतुष्पादी चतुर्विंशत्यधिकशतमितानि । एतन्मितानां काष्ठानां चैका कला भवतीत्यर्थः ॥

अत्रोपपत्तिः । युगे रविभगणाः सप्तविंशतिगुणास्तन्नक्षत्रमानम् = २७ × ५ = १३५ । युगे चन्द्रभगणा द्विगुणास्तानि तदयनमानानि = ६७ × २ = १३४ = १३५ − १ । शेषोपपत्तिः स्फुटा ॥ ३० ॥

अस्त्वेवं तथापि नायं सत्तर्कः विपर्ययापर्यवसितत्वात् । तथाहि प्रमेयत्वञ्च न प्रमेयभिन्नं प्रमेयत्वं प्रमेयमिति यावत् । ईदृशञ्च विधानं न भवति । न ह्युद्देश्यविधेययोरैक्यं सम्भवतीति । मैवम् । प्रमेयत्वं प्रमेयत्वप्रतियोगिकान्योन्याभावाश्रयो न भवतीत्यस्य विधेयत्वात् । तथा च प्रमेयत्वं न प्रमेयवृत्ति प्रमेयत्वान्यान्यत्वात् । ननु चाभावप्रतियोगी न विशेषणम् अभावविधौ प्रतियोगिनोप्यनुप्रवेशापत्तेः । नोपलक्षणम् अभावमात्रविधिस्तर्हि स्यात्तथा चातिप्रसङ्ग इति चेन्न । एवं हि निषेधमात्रखण्डने व्याघातः स्यादिति । व्याघातप्रतिबन्द्योस्तु यत्तर्कत्वमुक्तं तदयुक्तम् । द्वयोरप्रसङ्गत्वात् प्रसङ्गस्यैव च तत्कार्यत्वादिति । अन्योन्याश्रयापादनन्त्वित्थम् इतो भिन्नतया ज्ञात्वा तस्मादयं भिन्नतया ज्ञातव्यः । ततो भिन्नतया ज्ञाताच्चास्मात्सोपि भिन्नतया ज्ञातव्य इत्युभयीयं भेदज्ञानाधीनमित्युभयमपि ज्ञानं न स्यादन्योन्यापेक्षित्वादित्यसंवादयोरन्योन्याश्रयः न त्वन्योन्याश्रय आपाद्यते आपाद्याप्रसिद्धेः । एवं चक्रकेप्यूह्यं तत्र परम्परा परमधिकेति विशेषः । अन्योन्याश्रयापादनमेव नेति सत्यं किन्तु प्रकृते नैवं न हि पक्षभिन्नतया ज्ञातात् पक्षो भिन्नतया ज्ञेय उक्तदोषात् । नापि पक्षाभिन्नतया ज्ञातात् विरोधात् । किन्तु प्रतियोग्यनुयोगिनोः स्वरूपेण ज्ञाने एकस्मादपरस्तदन्योन्याभावरूपवत्तया प्रतीयते । सा तु भेदधीः सत्ये प्रमाणे त्वन्यथेति प्रमेयत्वादावात्माश्रयस्तु न दोषः प्रामाणिकत्वात् । एवं कार्यकारणयोरन्योन्याश्रयोपि न उपलक्षणाश्रयणात् । एवं दुःखजन्मेत्यादौ चक्रकं बीजाङ्कुरादावनवस्था च न दोषः व्यक्तिभेदाश्रयणेन प्रामाणिकत्वात् । चक्रकन्तु व्यक्तित्रया-

दित्थमेकभेदादनन्तरभेदम् । अनवस्था तु यदि द्रव्यं द्रव्यसमवेतत्वनियतं स्यात्तदा गुणकर्मान्यतरं स्यात् । अत्र द्रव्यस्य द्रव्यसमवेतत्वनियतत्वे अवयवव्यवस्था न स्यात् अवयवावयविप्रसङ्गो निरवधिरिति सुमेरुसर्षपयोरप्यविशेषापत्त्या निरस्तमेवेति । सा चेयमनवस्था कारणमुखी तु बीजाङ्कुरादौ न दोषाय प्रामाणिकत्वादात्माश्रयादिरूपेयते । आपादनस्थत्वे तु प्रमाणं नास्तीत्यात्माश्रयादयस्तत्र दोषाभावात् । तर्हि प्रमाणाभावस्तत्र तत्रोद्भाव्यतामुपजीव्यत्वात् किमात्माश्रयेणोद्भावमेनेनेति खण्डनम् । तन्न । आत्माश्रयादिव्यवस्थापनात्पुरत एव निरस्तत्वात् । ननु गगनारविन्दात् कूर्मरोम भिन्नमभिन्नं वेत्यत्र प्रश्ने न किञ्चिदप्युत्तरं घटते । न चानुत्तरमेवाप्रतिभापत्तेरिति तन्न । उत्तरार्हे उत्तराप्रतिपत्तेरप्रतिभात्वात् । नन्विदमुत्तरानर्हमित्यपि वाच्यमेवेति चेत् । न । अवस्तुनि विधिनिषेधयोरप्रवर्त्यत्वात् । ननु बन्ध्यासुतशशविषाणे कूर्मरोमैवेति वाक्यादपि सदुपरक्तमसद्भासते कथमन्यथा असद्ख्यातिवादिनां मतमपि ज्ञास्यसि । अज्ञात्वा च कथं ततो विमुखः स्या इति । तन्न । बन्ध्यासुत इत्यतो बन्ध्यासुतयोरन्वयः कथं प्रतीयताम् अस्याः सुतान्वये बाधात् । अजननी हि सा बन्ध्यापदेनोपस्थिता तस्माद्बन्ध्यायां सुतान्वयो निषिध्यते सुते च बन्ध्यान्वयः न तु बन्ध्यासुतो निषिध्यते प्रतियोगिसिद्ध्यसिद्धिपराहतेः । यत्तु खाण्डनिकस्य प्रज्ञाक्षेपे

तत्तुल्योऽस्त्वसतीवच्च योजनं विषयान्तरे ।
अनुल्लेखश्च तस्य क्षेपे च त्रिधा प्रमाति मत्कृत्या ॥

इति खण्डनकृतोपदिष्टमिति खण्डनोद्धारकृतापि समानमिति साधूपदिष्टमिति सर्वं चतुरस्रमिति ॥

यदक्षपादस्य महामुनेर्मतं
विखण्डितं पण्डितमानिनामुना ।
नतेन गौडेन(१) तदस्मसाधुना
मयोद्धृतं पश्यत वीतमत्सराः ॥
लङ्घयते वैनतेयोपि नीरक्षीरविवेचने ।
सुकृती राजहंसोयमेवमेवं प्रगल्भते ॥

इति श्रीमहामहोपाध्यायसन्मिश्रवाचस्पतिविरचितः
खण्डनोद्धारः समाप्तः ॥

(१) अत्र प्रथमद्वितीयादर्शपुस्तकयोरक्षराणि विलुप्तानि तृतीयादर्शपुस्तके ''उतनगौडेन'' एतान्यक्षराणि वर्तन्ते । तद्दर्शनादुद्धृतं "नतेन गौडेने"ति ।

Digitized by Google

षट्कर्माण्याह ।

सन्ध्या स्नानं जपो होमो देवतानां च पूजनम् ।
आतिथ्यं वैश्वदेवं च षट्कर्माणि दिने दिने ॥ ३९ ॥

यद्यप्यत्र सन्ध्यास्नानमितिशाब्दः क्रमः प्रतीयते तथाप्यग्निहोत्रं जुहोति यवागूं पचतीतिवदार्थक्रमेणासौ बाध्यते । स्नानस्य शुद्धिहेतुत्वाच्छुद्धस्यैव च सन्ध्यावन्दनाद्यधिकारात् । अत एव दक्षः ।

अस्नात्वा नाचरेत्कर्म जपहोमादि किं च न ।
सर्वमर्हति शुद्धात्मा प्रातः स्नायी जपादिकम् ॥ इति ।

ननु

सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।
यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत् ॥

इति दक्षेणैव सन्ध्यावन्दनस्यापि सर्वकर्माङ्गत्वाभिधानाद्यथास्थित एवास्तु क्रम इति चेत् । मैवम् । अत्र सर्वत्वमाधिकारिकमितिन्यायेन स्नानातिरिक्तसर्वकर्माङ्गता सन्ध्यावन्दनस्योच्यते । अन्यथा स्नानाङ्गताप्युच्येत । प्रातःस्नायी जपादिकमर्हतीति पूर्ववाक्येनाहत्यैव स्नानस्य सन्ध्यावन्दनाङ्गताबोधनात् । तस्मात्स्नानं पूर्वभावीति सिद्धम् । यद्वा अशक्तस्य प्रातःस्नानं विनापि प्रातःसन्ध्या भवतीति सूचयितुं सन्ध्यायाः पूर्वमुपादानम् । प्रातःसन्ध्यामुपासीत दन्तधावनपूर्विकामिति योगीश्वरस्मरणात् ।

वस्तुतस्तु सन्ध्यायां स्नानमिति विग्रहेण स्नानस्य कालविधानार्थं सन्ध्याग्रहणम् । अत एव वक्ष्यति द्वादशाध्याये ।

भास्करस्य करैः पूतं दिवास्नानं प्रशस्यते ।
अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात् ॥ इति ।

सन्ध्यालक्षणमाह बृहन्मनुः ।

उदयात्प्राक्तनी सन्ध्या घटिकात्रयमिष्यते ।
सायंसन्ध्या त्रिघटिका अस्तादुपरि भास्वतः ॥ इति ।

अत्र यद्यपि स्नानात्प्राग्भाविनां ब्राह्ममौहूर्तिकोत्थानहितचिन्तनदेहधर्मशौचाचमनदन्तधावनकेशप्रसाधनकुशोत्पाटनादीनामनभिधानान्न्यूनता मूलस्य तथापि कलौ षण्णामेव नित्यत्वादन्येषामनित्यतयाऽनभिधानाच्च न्यूनता । अन्यथा षट्पदानर्थक्यापातात् । तथात्वेऽपि तेषामन्यतो विधिग्रहणाविरोधात् । उक्तं च प्राक् स्वयमेव "शेषं मुनिविभाषितमिति" । अत एव बृहत्पराशरेणाप्येषामेव षण्णां चित्तशोधकत्वेन मुक्तिहेतुत्वमुक्तम् ।

कर्मषट्कं प्रवक्ष्यामि यत्कुर्वन्तो द्विजातयः ।
गृहस्था अपि मुच्यन्ते संसारैर्बन्धहेतुभिरिति ॥

यद्यप्यातिथ्यं वैश्वदेवं चेत्यनेनातिथ्यस्य पूर्वभावः प्रतीयते तथापि

पौरुषेण च सूक्तेन ततो विष्णुं समर्चयेत् ।
वैश्वदेवं ततः कुर्यात् बलिकर्म तथैव च ॥

इति नारसिंहे देवपूजानन्तरं वैश्वदेवस्य तत इति पञ्चमीश्रुत्या क्रमाभिधानेन सन्निधिरूपपाठक्रमबाधाद्वैश्वदेवस्य प्राथम्यात् । अत एव बृहत्पराशरः । "वैश्वदेवं तथातिथ्यं षट्कर्माणि दिने दिने इति । यद्वा वैश्वदेवात्प्राग् अतिथ्यागमने आतिथ्यस्य पूर्वभावं बोधयितुं प्राक्निर्देशः । वक्ष्यति च ।

वैश्वदेवे तु सम्प्राप्ते भिक्षुके गृहमागते ।
उद्धृत्य वैश्वदेवार्थं भिक्षुकं तु विसर्जयेदिति ॥

नन्वत्र सप्तत्वप्रतिभानात् षट्त्वं विरुद्धमिति चेत् । मैवम् । यानि कर्माणीत्युद्दिश्य तानि दिने दिने कर्तव्यानीति नित्यत्वविधौ संमार्गन्यायेनोद्देश्यगतायाः षट्त्वसंख्याया अविवक्षितत्वादिति केचित् । तन्न । अस्यां स्मृतौ सन्ध्यादीनां वाक्यान्तरेणोत्पत्त्यभावादनेनैव वाक्येन नित्यत्वविशिष्टानां तेषामुत्पादनादुपादेयगतत्वेन पश्वेकत्ववत् षट्त्वस्यापि विवक्षितत्वात् । यद्यप्यग्निहोत्रं गवालम्भमित्यनेनाग्निहोत्रस्य कलौ निषेधात्तद्धोमपरिहारेण षट्त्वमविरुद्धम् ।

Digitized by Google

अत एव

सन्ध्या स्नानं जपश्चैव देवतानां च पूजनम्।
वैश्वदेवं तथातिथ्यं षट्कर्माणि दिने दिने॥

इति बृहत्पराशरेण होमपरिहारेणैव षट्त्वाभिधानादिति। तदपि न। एवमग्निहोत्रहोमपरिहारेऽप्यौपासनहोमापरिहारात्। उक्तरीत्या अग्निहोत्रहोमस्याप्यपरिहाराच्च। तर्हि कथमिदं समाधेयम्। इत्थम्। जपस्य सन्ध्याप्रधानत्वेन पृथक्प्रधानत्वाभावाच्च षट्त्वविरोधः। पृथगुपन्यासस्तु सकलकर्माशक्तौ गायत्रीजपमात्रमेव कार्यमित्येतदर्थः। प्राधान्यं च तस्यैव फलसम्बन्धश्रवणात्। अत एव बृहत्पराशरः।

गायत्र्युपासिता येन तेनोपास्तं जगत्त्रयम्।
गायत्रीमेव यो ज्ञात्वा सम्यगभ्यसते पुनः।
इहामुत्र च पूज्योऽसौ ब्रह्मलोकमवाप्नुयात्॥ इति।

स्वयमप्यष्टमे वक्ष्यति।

गायत्रीरहितो विप्रः शूद्रादप्यशुचिर्भवेत्॥
गायत्रीब्रह्मतत्त्वज्ञाः सम्पूज्यन्ते जनैर्द्विजाः॥ इति।

यद्वा जपः गुरूपदिष्टमन्त्रस्य।

अस्नाताशी मलं भुङ्क्ते अजपी पूयशोणितम्।
अनर्चयित्वा देवांस्तु नरकं प्रतिपद्यते॥

इति जपस्य प्राधान्यश्रवणात्। स च ब्रह्मयज्ञतर्पणयोरुपलक्षणम्। तथा च स्मृत्यन्तरे।

स्नानं सन्ध्या जपो होमः स्वाध्यायो देवतार्चनम्।
वैश्वदेवं तथातिथ्यं नवमं पितृतर्पणम्॥
एतानि नव कर्माणि कर्तव्यानि दिने दिने॥ इति।

तत्र ब्रह्मयज्ञं द्वितीयाध्याये स्वयमेव वक्ष्यति। स्वाध्यायं चैवमभ्यसेदिति। तर्पणस्यात्रावचनं ब्रह्मयज्ञाङ्गत्वेन प्राधान्याभावात्। अङ्गत्वञ्चास्य ब्रह्मयज्ञानन्तरं देवतास्तर्पयति इत्युपक्रम्य देवर्षिपितृतर्पणान्यभिधाय पतितपुरुषं पितॄंस्तर्पयित्वेत्युक्त्वा गृहानेत्य यद्ददाति सा

दक्षिणेत्यभिधानात् सन्दशन्यायेन सिध्यति। तथाश्वलायनानाम्.। याजुषाणां तु तर्पणं स्वतन्त्रमेव प्रधानम् ।

स चार्वाक् तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः ।
वैश्वदेवावसाने वा ब्रह्मयज्ञस्त्रिधा स्मृतः ॥

इतिकात्यायनस्मरणात् । अत एव उदाहृतवाक्ये तर्पणस्य पृथङ् निर्देशः प्रधान्याभिप्रायेण । मूलवाक्ये षट्संख्याग्रहणं नवकर्मांशत्वाभिप्रायेण। वाक्यद्वयेऽपि दिने दिने इति वीप्साश्रवणात्। तेषां च षण्णामपि दिने दिन इति वीप्सया वसन्ते वसन्ते ज्योतिषा यजेतेत्यनेनाग्निष्टोमस्येव जीवनवदधिकारकत्वाज्जित्यत्वं बोध्यते। अत एव तत्र तत्रैषामकरणे प्रत्यवायोक्तिरपि । तत्र स्नानं सविशेषं द्वादशाध्याये प्रतिपादयिष्यति। तदनन्तरं कार्यं वस्त्रपरिधानं स्वयोच्यते । तत्र योगियाज्ञवल्क्यः । 'स्नात्वैवं वाससी धौते अच्छिन्ने परिधाय चेति" । धौते स्वयमेव । तथा च देवलः ।

स्वयं धौतेन कर्तव्या क्रिया धर्म्या विपश्चिता ।
न तु नेजकधौतेन नाहतेन न कुत्र चिदिति ॥

नाहतमहतभिन्नम् । अच्छिन्ने सदशे "क्षौमं वासः प्रशंसन्ति तर्पणे सदशं तथेति" प्रजापतिस्मरणात् । वाससोऽधिस्वक्रमयोर्विवक्षामाह ।

व्यासः ।

नोत्तरीयमधः कुर्यान्नोपर्यधस्यमम्बरम् ।
नान्तर्वासो विना जातु निवसेद्वसनं बुधः ॥ इति ।

अन्तर्वासो लक्षणं संग्रहे ।

षोडशद्वादशाष्टाभिरङ्गुलैर्विस्तृतन्तु यत् ।
आयतं व्याममात्रं च तदन्तर्वास ईरितम् ॥

जातूकर्ण्यः, वस्त्रोत्तरीयाभावे द्व्यङ्गुलं त्र्यङ्गुलं चतुरङ्गुलं वा सूत्रैर्वस्त्राकृतिपरिमण्डलं तदुत्तरीयं कुर्याद्वस्त्रस्य विवरं चेति। तच्च जीवत्पितृकेर्न धार्यम् ।

तथा च संग्रहे—

उत्तरीयं योगपट्टं तर्जन्यां रजतं तथा।
न जीवत्पितृकैर्धार्यं ज्येष्ठो वा विद्यते यदि॥

उत्तरीयासम्भवे यज्ञोपवीतं धार्यम्।

यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि।
तृतीयमुत्तरीयार्थे वस्त्राभावे तदिष्यते॥

इति स्मरणात्। शाणादीन्यपि वा धार्याणि।
तदाह योगियाज्ञवल्क्यः।

अलाभे धौतवस्त्रस्य शाणक्षौमाविकानि च।
कुतपं योगपट्टं वा द्विवासास्तु यथाभवेत्॥

अत्र द्विवासास्तु यथाभवेदिति हेतुमन्निगदेनोत्तरीयार्थमेव तदुपादानं न परिधानार्थमित्युक्तं भवति। तथा च जातूकर्ण्यः—

परिधेयं सदा वासः कार्पासं सदशं सितम्।
क्षौमं वा कुतपं वापि न कौशेयं कदा च नेति॥

सर्वथापि तदभावे पारस्करः "एकं चेद्वासो भवति तस्यैवोत्तरवर्गेण प्रच्छादयीतेति। प्रतिवर्णं वस्त्रवर्णमाह भृगुः

ब्राह्मणस्य सितं वस्त्रं तु यते रक्तमुल्बणम्।
पीतं वैश्यस्य शूद्रस्य नीलं मलवदिष्यते॥
विकच्छोऽनुत्तरीयश्च नग्नश्चावस्त्र एव च।
श्रौतं स्मार्तं तथा कर्म न नग्नश्चिन्तयेदपि॥
नग्नः स्यान्मलवद्वासा नग्नः कौशेयकेवलः।
नग्नो द्विगुणवस्त्रः स्यान्नग्नो दग्धपटस्तथा॥
नग्नश्च स्यूतवस्त्रः स्यान्नग्नो ग्रथितवस्त्रकः।
नग्नश्च बहुवस्त्रः स्यान्नग्नः कौपीनकेवलः॥
काषायवस्त्रः साक्षाच्च दश नग्नाः प्रकीर्तिताः।

परिधानप्रकारमाह जातूकर्ण्यः

परिधानाद्बहिः कक्षा निबद्धा ह्यासुरी मता।
धर्मकर्मणि विद्वद्भिर्वर्जनीया प्रयत्नतः॥

Digitized by Google

आर्द्रवस्त्रोत्तारणे विशेषः संग्रहे ।

स्नानं कृत्वार्द्रवस्त्रं तु ऊर्ध्वमुत्तारयेद्द्विजः ।
आर्द्रवस्त्रमधः स्याच्चेत्पुनः स्नानेन शुध्यति ॥

जाबालिः ।

निष्पीडितं धौतवस्त्रं यदा स्कन्धे विनिक्षिपेत् ।
तदासुरं भवेत्कर्म पुनः स्नानं विशोधनम् ॥
वस्त्रं चतुर्गुणीकृत्य निष्पीड्य सदशं तथा ।
वामप्रकोष्ठे निक्षिप्य स्थलस्थश्च द्विराचमेत् ॥
वस्त्रं त्रिगुणितं यस्तु निष्पीडयति मन्दधीः ।
वृथास्नानं भवेत्तस्य स्नातस्याद्दशमम्बुनीति ॥

अथ तिलकविधिः, ब्रह्माण्डे

मृत्तिकां चन्दनं चैव भस्म तोयं चतुर्थकम् ।
एभिर्द्रव्यैर्यथाकालमूर्द्ध्वं पुण्ड्रम्भवेत्सदा ॥
स्नात्वा पुण्ड्रं मृदा कुर्याद्धुत्वा चैव तु भस्मना ।
देवानभ्यर्च्य गन्धेन सर्वपापापनुत्तये ॥
जलेन तिलकं कुर्याज्जलान्तःकर्मसिद्धये ॥ इति ।

अत्र मृदादीनां स्नानाद्यनन्तरकालनियमेन स्नात्वा भस्मादिधारणं न सिध्यति । न चास्य पापापनोदकत्वेन काम्यत्वं शङ्क्यम् ।

ऊर्ध्वपुण्ड्रविहीनस्य स्मशानसदृशं मुखम् ।
अवलोक्य मुखं तस्य आदित्यमवलोकयेत् ॥
मद्भक्तो धारयेन्नित्यमूर्ध्वपुण्ड्रं विना तु यत् ।
यः कर्म कारयेन्नित्यं तत्सर्वं निष्फलं भवेत् ॥
इति तत्रैवाभिधानात् ।

अथ सन्ध्याविधिः । तत्र सन्ध्याशब्दो यद्यपि कालवचनस्तथापि दर्शपूर्णमासादिशब्दवत्कालयोगं निमित्तीकृत्य कर्मनामधेयमिति कर्मसु गणितः । सा चैकस्मिन् दिवसे त्रिवारमुपास्या । यथाहात्रिः, "सन्ध्यात्रयं तु कर्तव्यं द्विजेनात्मविदा सदे"ति । तस्याश्च कालनामत्रयमाह व्यासः ।

गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिने ।
सरस्वती च सायह्ने सैव सन्ध्या त्रिषु स्मृता ॥ इति ।

तस्याः कालमाह बृहन्मनुः ।

उदयात्प्राक्तनी सन्ध्या घटिकात्रयमिष्यते ।
सायंसन्ध्या त्रिघटिका अस्तादुपरि भास्वतः ॥ इति ।

ननु सर्वस्मृतिषूदयात्पूर्वमेव सन्ध्याकालोऽभिहितस्तत्कथमिदमुच्यते । सत्यम् । तस्योदयात्प्राक्कालीनस्नानपरत्वविषयत्वात् । अत्र तूदयानन्तरं स्नानं वक्ष्यतीति तदुत्कर्षेण सन्ध्योत्कर्षस्तदाद्युत्कर्षन्यायात् । आग्निमारुतादूर्ध्वमनुयाजैश्चरन्तीतिवत् । सूर्ये ज्योतिषि जुहोमीति मन्त्रलिङ्गाच्च तेनायमेवात्र युक्त इति । तत्तदितिकर्तव्यतामाह बृहत्पराशरः ।

आमणिबन्धनाद्धस्तौ पादौ वा जानुतः शुचिः ।
प्रक्षाल्य ह्याचमेद्विर्ह्मन्तर्जानुकरो द्विजः ॥
निर्मलाफेनपूताभिर्मनोज्ञाभिः प्रयत्नवान् ।
आचमेद्ब्रह्मतीर्थेन पुनराचमनाच्छुचिः ॥
वक्त्रनिर्मार्जनं कृत्वा द्विस्तेनैवापराण्यथ ।
अद्भिश्च संस्पृशेत्खानि सर्वाण्यपि विशुद्धये ॥
अङ्गुष्ठेन प्रदेशिन्या सव्यपाणिस्थवारिणा ।
घ्राणं संस्पृश्य नेत्रे च तेनानामिकया श्रुती ॥

नेत्रे च प्रदेशिन्यङ्गुष्ठाभ्यामेवेति शेषः । मध्यमाङ्गुष्ठयोगेन वा "मध्यमाङ्गुष्ठयोगेन स्पृशेन्नेत्रद्वयं ततः" इति पैठीनसिस्मरणात् ।

नाभिं च तत्कनिष्ठाभ्यां वक्षः करतलेन च ।
शिरः सर्वाभिरंसौ च अङ्गुल्यग्रैश्च संस्पृशेत् ॥
आचम्य प्राणसंरोधं कृत्वा चोपस्पृशेत्पुनः ।
प्रत्योङ्कारसमायुक्ताः प्रणवाद्यन्तकास्तथा ॥
महाव्याहृतयः सप्त दैवतर्ष्यादिसंयुताः ।
प्रणवाद्यन्तगायत्री शिरस्तस्यास्तथैव च ॥
त्रिरावर्तनमेतस्य प्राणायामो विधीयते ।
भूर्भुवःस्वर्महर्जनस्तपस्सत्यं तथैव च ॥

Digitized by Google

आद्यास्तिस्रो महाप्रोक्ताः सर्वं चैतत्प्रवर्तते ।
अग्निर्वायुस्तथा सूर्यो बृहस्पत्याप एव च ॥
इन्द्रश्च विश्वेदेवाश्च देवताः समुदीरिताः ।
गायत्र्युष्णिगनुष्टुप्च बृहती पङ्क्तिरेव च ॥
त्रिष्टुप्च जगती चैव छन्दांस्येतान्यनुक्रमात् ।
भरद्वाजः कश्यपश्च गोतमोऽत्रिस्तथैव च ॥
विश्वामित्रो जमदग्निर्वसिष्ठ ऋषयः क्रमात् ।
ओमापोज्योतिरित्येतच्छिरस्तस्मात्प्रयुज्यते ॥
आपोहिष्ठादि जल्पन्ति छन्दो दैर्वाविसंयुतम् ।
सिन्धुद्वीप ऋषिः छन्दो गायत्रमृत्तु तिसृषु ॥
आपो हि देवताः प्राहुरापोहिष्ठादिषु द्विजाः ।
आपोहिष्ठेति च ऋचां पादाच्चरा न च ॥
पादान्ते तु क्षिपेद्वारि पादमध्ये च निःक्षिपेत् ।
भूमौ मूर्ध्नि तथाकाशे मूर्ध्न्याकाशे तथा भुवि ॥
आकाशे भुवि मूर्ध्नीति मार्जनं तु विधीयते ।
अत्रोपस्पर्शने नेत्रं प्रातः किं चित्यवन्ति हि ॥
सूर्यश्चमेति मध्याह्ने पुनन्त्वापो विपर्ययम् ।
मन्त्रैरभिमन्त्रितं कृत्वा कुशपूतं तथा जलम् ॥
आचम्य विधिवद्धीमान् सन्ध्योपासनमारभेत् ।
जलपूर्णं तथा हस्तं नासिकाग्रे समर्पयेत् ॥
ऋतं चेति पठित्वा तु तद्वारि भुवि निक्षिपेत् ।
अघमर्षणसूक्तस्य ऋषिरेवाघमर्षणः ॥
छन्दोऽत्रानुष्टुभं प्राहुरापश्चैव तु दैवतम् ।
जलेनाञ्जलिमापूर्य गायत्रीं मनसा स्मरन् ॥
निक्षिपेत् पूर्वमुत्थाय पतिता बिन्दवः पुनः ।
वज्री भूत्वा ययुस्ताश्च मद्गुहाद् घ्नन्ति राक्षसान् ॥
प्रदक्षिणप्रक्रमेण पापं धुन्वन्ति भूसुराः ।
कालत्रयेऽपि तं ध्यात्वा सकलं भद्रमश्नुते ॥ इति ।

ध्यानस्वरूपमाह श्रुतिः ।

असावादित्यो ब्रह्मेति ब्रह्मैव सन् ब्रह्माप्येति एवं वदेति ।

अथसन्ध्याप्रधानजपविधिः । कौर्मे ।

ओङ्कारव्याहृतियुतां गायत्रीं वेदमातरम् ।
जप्त्वा जलाञ्जलिं दद्याद्भास्करं प्रति तन्मनाः ॥
प्राक्कूलेषु ततः स्थित्वा दर्भेषु सुसमाहितः ।
प्राणायामत्रयं कृत्वा ध्यायेत्सन्ध्यामिति श्रुतिः ॥
ध्यात्वार्कमण्डलगतां सावित्रीं वै जपेद्बुधः ।

न्यासविधिमाह व्यासः ।

हृदि तत्सवितुर्न्यस्य न्यसेद्मूर्ध्नि वरेण्यम् ॥
भर्गोदेवस्येति पदं शिखायां च ततो न्यसेत् ।
धीमहीति न्यसेद्वर्म धियोयोनश्च नेत्रयोः ॥
प्रचोदयादिति पदमस्त्रार्थे विनियोजयेत् ।

गायत्र्यास्त्वर्थ्योमुक्ता बृहत्पराशरेण ।

दैवत्यमस्यां सविता सुराच्यंश्छन्दोऽपि गायत्रमभूच्च तस्याम् ।
विश्वस्य मित्रो द्विजराजपूज्यो मुनिर्नियोज्यस्तु जपादिकेषु ॥

जपसङ्ख्यामाह यमः ।

सहस्रपरमां देवीं शतमध्यां दशावराम् ।
गायत्रीं प्रजपेन्नित्यं सर्वपापप्रणाशनीमिति ॥

व्यासोऽपि ।

अष्टोत्तरशतं नित्यमष्टाविंशतिमत्र वा ।
विधिना दशकं वापि त्रिकालेषु जपेद्बुधः ॥

जपानन्तरमर्कोपस्थानं कार्यम् ।

तदाह कूर्मः ।

अथो मतिश्चेदादित्यमुदुत्यन्तं समाहितः ।
मन्त्रैस्तु विविधैः सौरैः ऋग्यजुःसामसम्भवैः ॥ इति ।

ऋग्यजुःसामसम्भवैरिति स्वस्वशाखीयमन्त्रप्रदर्शनार्थम् । न त्वेकस्य सर्वमन्त्रप्राप्त्यर्थम् । "उपस्थानं स्वकैर्मन्त्रैरादित्यस्य तु कारयेदि"ति वसिष्ठस्मरणात् । अयमेव विधिः स्वल्पः सन्ध्यात्रयेऽपि वेदितव्यो

मन्त्रास्तु प्रतिपदोक्ता ग्राह्याः । तत्र मध्याह्नसन्ध्यायां विशेषं द्वितीयाध्याये वक्ष्यामः । सायंसन्ध्यायां स्वयं विशेषः । तत्र भरद्वाजः ।

सायमग्निश्चमेत्युक्त्वा प्रातः सूर्यस्त्वपः पिबेत् ।
आपः पुनन्तु मध्याह्ने तेनैवाचमनं चरेत् ॥ इति ।

उपस्थाने विशेषमाह नारायणः ।

वारुणीभिरथादित्यमुपस्थाय प्रदक्षिणम् ।
कुर्वन् दिशो नमस्कुर्यादिग्गीशांश्च पृथक् पृथगिति ॥

वारुण्यः इमं मे वरुणेत्याद्याः । यद्यपि वारुणीनां वरुणोपस्थान एव विनियोगो युक्तस्तथापि आदित्योपस्थान एव श्रुत्या विनियुज्यन्ते लिङ्गस्य दौर्बल्यात् । ऐन्द्र्या गार्हपत्योपस्थानवद् इति न विरोधः ॥

अथ होमविधिः । तत्र दक्षः ।

सन्ध्याकर्मावसाने तु स्वयं होमो विधीयते ।
स्वयं होमे फलं यत्स्यात्तदन्येन न लभ्यते ॥

स च होमः श्रौतः स्मार्तश्च श्रौतोऽग्निहोत्रहोमः स्मार्तश्चौपासनहोमः । तदाह याज्ञवल्क्यः ।

कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही ।
दायकालाहृते वापि श्रौतं वैतानिकाग्निष्विति ॥

तत्रोभयोः सद्भावेऽनुष्ठानक्रममाह ।

होमं वैतानिकं हुत्वा स्मार्तं कुर्याद्विचक्षणः ।
स्मृतीनां वेदमूलत्वात्स्मार्तं केचित्पुराविदुः ॥

श्रौतकर्माशक्तौ स्मार्तमात्रं कर्तव्यम् । तदाह व्यासः ।

श्रौतं कर्म न चेच्छक्तः कर्तुं स्मार्तं समाचरेत् ।
तत्राप्यशक्तः करणे सदाचारं लभेद् बुधः ॥

सदाचारः स्नानसन्ध्यादिस्तावन्मात्रमेव चानुतिष्ठेत् । शक्तस्य तु श्रौतपरित्यागे प्रत्यवायमाह गर्गः ।

यो वैदिकमनादृत्य कर्म स्मार्तैतिहासिकम् ।
मोहात्समाचरेद्विप्रो न स पुण्येन युज्यते ॥

स्वयं होमाशक्तौ प्रतिनिधिमाह शातातपः ।

श्रौतं यस्यात्स्वयं कुर्यादन्योपि स्मार्तमाचरेत् ।
अशक्तौ श्रौतमप्यन्यः कुर्यादाचारमन्ततः ॥

आचारः स्नानसन्ध्यादिस्तमप्यन्यः कुर्यात् ॥

अन्यपदार्थमाह दक्षः ।

ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः ।
एतैरपि हुतं यत्तु तद्धुतं स्वयमेव तु ॥

अन्यहोमेऽपि दम्पतीसान्निध्येन भाव्यं तदाह कात्यायनः ।

असमक्षं तु दम्पत्योर्होतव्यं नर्त्त्विजादिना ।
द्वयोरप्यसमक्षं तु भवेद्धुतमनर्थकम् ॥

होमकालमाहापस्तम्बः, उषस्युपोदयं समाविधित उदिते प्रातरिति । पञ्चधा विभक्तस्य दिनस्याद्यो भागः प्रातः स एवात्रोपयुज्यते पूर्वोक्तन्यायात् कालान्तरं तु यथोपक्रमविषयम् ।

सायंहोमकालमाह कात्यायनः ।

यावत्सम्यङ् न भाव्यन्ते नभस्यृक्षाणि सर्वतः ।
लोहितत्वं च नापैति तावत्सायं तु हूयते ॥ इति ।

उभयत्र गौणकालमहाश्वलायनः । सङ्गवान्तः प्रातः प्रदोषान्तः सायमिति । होमद्रव्यमाह नारायणः ।

पयो दधि यवागूश्च सर्पिरोदनतण्डुलाः ।
सोमो मांसं तथा तैलमापस्तानि दशैव तु ॥

मांसं तु स्मार्तातिरिक्ते होम्यं च मांसं वर्ज्यमित्याश्वलायनस्मरणात् । होमसाधनमाह । स एव "द्रवं हविः स्रुवेणैव पाणिना कठिनं हविरिति ।

आहुतिपरिमाणमाह बौधायनः ।

व्रीहीणां वा यवानां वा शतमाहुतिरिष्यते ।
तिलानां तु तदर्धं स्याच्छुवमात्रं घृतस्य तु ॥

Digitized by Google

विशेषेतिकर्तव्यता तु स्वस्वगृह्योक्ता याह्या "स्वगृह्योक्तेन विधिना होमं कुर्यादथाविधौ"ति परिशिष्टात् ।

अथ देवार्चनविधिः । तत्र मूलवचने देवतानामिति सामान्यापादानेऽपि कलौ हरिहरचण्डीविनायकसूर्याः पूज्याः । बहुवचनसामर्थ्याद्विशेषविहितत्वाच्च । तथा च महाभारते ।

कलौ कलिमलध्वंसं सर्वपापहरं हरिम् ।
येऽर्चयन्ति नरा नित्यं तेऽपि वन्द्या यथा हरिः ॥

स्कान्देऽपि ।

ब्रह्मा कृतयुगे देवस्त्रेतायां भगवान् रविः ॥
द्वापरे भगवान्विष्णुः कलौ देवो महेश्वरः ।

यद्यप्यत्र विधिर्न श्रूयते तथापि प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्तीत्यत्र रात्रिपर्यायेण ये प्रतितिष्ठासन्ति त एता रात्रीरुपेयुरितिवद्धुरिवद्धुन्यस्त्वकामाः कलौ हरिमर्चयुरित्यसौ कल्पनीयः । तथा 'कलौ चण्डीविनायकावि"त्यत्रापि ज्ञेयम् । तच्च देवार्चनं यद्यपि

अप्स्वग्नौ हृदये सूर्ये स्थण्डिले प्रतिमासु च ।
षट्स्वेतेषु हरेः सम्यगर्चनं मुनिभिः स्मृतम् ॥

इत्याद्याग्नेयादिवाक्यैरनेकत्र प्रतीयते तथापि कलौ शालग्रामशिलायामवश्यं कार्यम् ।

कामासक्तोऽथ वा क्रुद्धः शालग्रामशिलार्चनात् ।
भक्त्या वा यदि वाभक्त्या कलौ मुक्तिमवाप्नुयात् ॥
वैवस्वतभयं नास्ति तथा न कलिजं भयम् ।
यः कथां कुरुते विष्णोः शालग्रामशिलाग्रतः ॥
शालग्रामशिलायास्तु प्रतिष्ठा नैव विद्यते ।
महापूजां तु कृत्वादौ पूजयेत्तं ततो बुधः ॥

इत्यादिस्कन्दवाक्यात् । तथा शिवपूजनमपि कलौ लिङ्गे वा स्थण्डिले वा कार्यम् ।

Digitized by Google

तथा च महाभारते ।

सदा तं यजते यस्तु श्रद्धया मुनिपुङ्गव ।
लिङ्गे वा स्थण्डिले वाऽपि शङ्करं विधिपूर्वकम् ॥
युगदोषं विनिर्जित्य रुद्रलोके प्रमोदते ॥ इति ।

युगं कलिस्तस्यैव सदोषत्वात् । लिङ्गं बाणलिङ्गं तस्य स्वतः-सिद्धत्वात् । तथा भविष्ये ।

बाणलिङ्गानि राजेन्द्र ख्यातानि भुवनत्रये ।
न प्रतिष्ठा न संस्कारस्तेषामावाहनं तथेति ॥

तत्र प्रतियुगं विष्णुमूर्त्तिभेद उक्तो वाराहे ।

कृते नारायणः शुद्धः सूक्ष्ममूर्तिरुपास्यते ।
त्रेतायां विष्णुरूपेण वासुदेवश्च द्वापरे ॥
कृष्णवर्णः कलौ कृष्णः साङ्गोपाङ्गः सपार्षदः ।
पूज्यते मनुजै राजन् श्रेयसामीश्वरो हरिरिति ॥

अत्र नारायणादिदेवताकमन्त्राद्युपादानमनेनोक्तं तेन कलौ कृष्ण-दैवत्यमन्त्रेण तन्मन्त्रध्येयरूपः शालग्रामे कृष्णः पूज्यः । तत्रापि प्रतिवर्णं शालग्रामशिलाभेदो हेमाद्रौ शालग्रामशिलामाहात्म्ये अभिहितः ।

ब्राह्मणैर्वासुदेवस्तु नृपैः संकर्षणस्तथा ।
प्रद्युम्नः पूज्यते वैश्यैरनिरुद्धस्तु शूद्रजैरिति ॥

ब्राह्मणैर्वासुदेवादिलक्षणोपेतायां शालग्रामशिलायां कृष्णः पूज्य इत्यर्थः । तल्लक्षणं तु विष्णुधर्मोत्तरे ।

पञ्चवक्त्रो वासुदेवः षड्भिः प्रद्युम्नकः स्मृतः ।
सङ्कर्षणः सप्तचक्रोऽनिरुद्ध एकादशैः स्मृतः ॥

संख्याविशेषोऽप्युक्तस्तत्रैव ।

चत्वारो ब्राह्मणैः पूज्यास्त्रयो राजन्यजातिभिः ।
वैश्यैर्द्वावेव सम्पूज्यौ तथैकः शूद्रजातिभिरिति ॥

तच्चैवं मूर्त्यन्तराणां संख्यान्तराणां वानर्थक्यं, काम्यपूजायामुपा-दानात् ।

Digitized by Google

यत्तु

एकमूर्तिर्न पूज्यैव गृहीणा बुद्धिमिच्छता ।
अनेकमूर्त्तिसम्पन्नः सर्वकामानवाप्नुयादिति ॥
शालग्रामाः समाः पूज्या विषमा न कदा च न ।
समेषु द्वितयं नैव विषमेष्वेक एव हीति ॥

तत्संख्याविधिवाक्यैकवाक्यतया व्यवस्थाप्यम् । यथाविशेषविहितसंख्यायाः प्राबल्येन तदेकवाक्यतया तद्भिन्नविषयतया वा निषेधो व्यवस्थाप्य इति ।

ननु

शालग्रामशिलां वापि चक्राङ्कितशिलां तथा ।
ब्राह्मणः पूजयेन्नित्यं क्षत्रियादिर्न पूजयेत् ॥

इति विष्णुधर्मोत्तरे ।

प्रणवोच्चारणाच्चैव शालग्रामशिलार्चनात् ।
ब्राह्मणीगमनाच्चापि शूद्रश्चाण्डालतां व्रजेत् ॥

इत्यापस्तम्बीये च क्षत्रियादीनां शालग्रामपूजानिषेधे नानुपपन्नमिदमिति चेत् । नैवम् ।

ब्राह्मणस्यैव पूज्योऽहं शुचेरप्यशुचेरपि ।
स्त्रीशूद्रकरसंस्पर्शो वज्रस्पर्शाधिको मम ॥

इति लैङ्गवाक्ये उपक्रमोपसंहाराभ्यां विशेष्यसङ्गतैवकारेणान्ययोगव्यवच्छेदाच्च ब्राह्मणमात्रस्यैव स्पर्शवत्पूजायामधिकारो नान्येषामिति विशेषेण पूजामात्रनिषेधस्य सामान्यस्योपसंहारात् । यथाग्नेयं चतुर्द्धा करोतीति विशेषेण पुरोडाशं चतुर्द्धा करोतीति सामान्यस्योपसंहार इति ।

अत एव बृहन्नारदीये ।

स्त्रीणामनुपनीतानां शूद्राणां च जनेश्वर ।
स्पर्शने नाधिकारोऽस्ति विष्णोर्वा शङ्करस्य वा ॥
शूद्रो वानुपनीतो वा स्त्री वापि पतितोऽपि वा ।
केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते ।

इत्यनास्थया प्रत्येकं वा शब्देन क्षत्रियादीनामप्युपसंग्रहः । यद्येवं

समाचारविरोधस्तर्हि क्षत्रियादिरित्यत्रातद्गुणसंविज्ञानबहुव्रीहिणा शूद्रादेरेव ग्रहणमस्तु । अत एव पाद्मे ।

ब्राह्मणक्षत्रियवैश्यानां त्रयाणां मुनिसत्तमाः ।
अधिकारः स्मृतः सद्भिः शालग्रामशिलार्चने ॥
स्त्रीशूद्रपतितादीनां अन्येषां नीचविकर्मिणाम् ।
नैवाधिकारो विज्ञेयः शालग्रामशिलार्चने ॥
दीक्षायुक्तैस्तथा शूद्रैर्मद्यपानविवर्जितैः ।
कर्तव्यं ब्राह्मणद्वारा शालग्रामशिलार्चनम् ॥

इति स्पष्टं शूद्रादीनामेव ब्राह्मणद्वारा पूजाभिहितेत्यलं विस्तरेण ।

अथ पूजोपकरणानि । विष्णुधर्मोत्तरे ।

कलौ यच्छन्ति ये विष्णोस्तुलसीकाष्ठचन्दनम् ।
विष्णुप्रीतिकरं मर्त्या उत्तरां यान्ति ते भुवम् ॥
ये हि भागवता भूत्वा कलौ तुलसिचन्दनम् ।
नार्पयन्ति सदा विष्णोर्न ते भागवता नराः ॥
महाविष्णोः कलौ भक्त्या दत्त्वा तुलसिचन्दनम् ।
यो ऽर्चयेन्मालतीपुष्पैर्न भूयस्तनयो भवेत् ॥

स्कान्दे ।

अहो मुष्टास्ते नष्टास्ते पतिताः कलिकन्दरे ।
यैर्नाऽर्चितो हरिर्भक्त्या कमलैरसितैः सितैः ॥

पाद्मे ।

कार्तिके केतकीपुष्पं येन दत्तं हरेः कलौ ।
दीपदानं च देवर्षे तारितं तेन वै कुलम् ॥
अहो मुष्टा विनष्टास्ते पतिताः कलिकन्दरे ।
यैर्नार्चितो हरिर्भक्त्या कलमैः कार्तिके शुभैः ॥

स्कान्दे ।

ये कृष्णागरुणा कृष्णं धूपयन्ति कलौ नराः ।
सकर्पूरेण राजेन्द्र कृष्णतुल्या भवन्ति ते ॥

पाद्मे ।

कलौ गव्यघृतेनाथ तिलतैलेन वा पुनः ।
दीपदानं च येर्दत्तं तारितं तैस्तु तत्कुलम् । इति ॥

पाद्मे ।

द्वारकाशैलसम्भूतं यश्चापं पिबते कलौ ।
पापानि तस्य नश्यन्ति शतजन्मार्जितान्यपि ॥
धृते शिरसि पीते च सर्वास्तुष्यन्ति देवताः ।
प्रायश्चित्तं हि पापानां कलौ पादोदकं हरेरिति ॥

अत्र द्वारावतीशिलासम्बन्धितोयपानविधानात् सापि कलौ शालग्रामवद्विशेषतः पूज्येति गम्यते ।

पाद्मे ।

दिवारात्रिकृतं पापं यत् किञ्चित् पूर्वजन्मभिः ।
तत्सर्वं विलयं याति माहात्म्यपठनात् कलौ ॥

माहात्म्यमिति सामान्योपादानेऽपि सहस्रनामस्तोत्रं पठनीयम् । तदुक्तं स्कान्दे ।

विष्णोर्नाम सहस्रं च कलिकाले पठेत्तु यः ।
वेदानां च पुराणानां फलमाप्नोति मानवः ॥

कलौ कर्मणां न्यूनातिरिक्ततापरिहारकं हरिस्मरणमेव । तदुक्तं वृहन्नारदीये ।

न्यूनातिरिक्ततासिद्ध्यै कलौ वेदोक्तकर्मणाम् ।
हरिस्मरणमेवात्र सम्पूर्णफलदायकम् ॥

अथ पूजेतिकर्तव्यता आग्नेये ।

अर्चनं सम्प्रवक्ष्यामि विष्णोरमिततेजसः ।
यत्कृत्वा मुनयः सर्वे परं निर्वाणमाप्नुयुः ॥
अनुष्टुभस्य सूक्तस्य त्रिष्टुबन्तस्य देवता ।
पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः ॥
प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे ।
तृतीयां वामपादे च चतुर्थीं दक्षिणे न्यसेत् ॥

उक्तसंज्ञो स्तः ॥ कुतो ऽध्यागच्छति । कुतः पर्यागच्छति । गतिसंज्ञाबाधाद्गतिर्गताविति निघातो न ॥

सुः पूजायाम् । १ । ४ । ९४ ॥

सुषिक्तम् । सुस्तुतम् । अनुपसर्गत्वान्न षः । पूजायां किम् । सुषिक्तं किं तवात्र । क्षेपो ऽयम् । कथं तर्हि सुष्टुतिरिति । अतिशयमात्रं विवक्षितं न तु पूजेत्याहुः । पठन्ति च । प्रशंसानुमते पूजा भृशकृच्छ्रसुखेषु सुरिति ॥

अतिरतिक्रमणे च । १ । ४ । ९५ ॥

अतिक्रमणे पूजायाञ्चातिः कर्मप्रवचनीयः स्यात् ॥ अतिदेवान्कृष्णः । देवेभ्यो ऽधिको देवपूज्य इति वार्थः ॥

अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु । १ । ४ । ९६ ॥

एषु द्योत्येष्वपिरुक्तसंज्ञः ॥ सर्पिषो ऽपि स्यात् । मात्रा बिन्दुः स्तोकमित्यस्यार्थे ऽपिर्वर्तते । सम्भावनायां लिङ् । तस्या एव विषयभूते भवने कर्तृदौर्लभ्यप्रयुक्तं दौर्लभ्यं द्योतयन्नपिशब्दः स्यादित्यनेन सम्बध्यते । सर्पिष इति षष्ठी तु अपिशब्दबलेन गम्यमानस्य बिन्दोरवयवावयविभावसम्बन्धे । इयमेव ह्यपिशब्दस्य पदार्थद्योतकता नाम । द्वितीया तु नेह प्रवर्तते । सर्पिषो बिन्दुना योगो न त्वपिनेत्युक्तत्वात् । अनुपसर्गत्वान्न षः । सम्भावनं शक्त्युत्कर्षमाविष्कर्तुमत्युक्तिः । अपि स्तुयाद्विष्णुम् । अन्ववसर्गः कामचारानुज्ञा । अपि स्तुहि । गर्हा । धिग्देवदत्तमपि स्तुयाद्वृषलम् । समुच्चये । अपि सिञ्च । अपि स्तुहि । सिञ्च च स्तुहि चेत्यर्थः ॥

Digitized by Google

अधिरीश्वरे । १ । ४ । ९७ ॥

स्वस्वामिभावसम्बन्धे ऽधिः कर्मप्रवचनीयः स्यात् ॥ इह यस्मादधिकं यस्य चेश्वरवचनमिति स्वस्वामिभ्यां पर्यायेण सप्तमी । अधि भुवि रामः । अधि रामे भूः ॥

विभाषा कृञि । १ । ४ । ९८ ॥

अधिः करोतौ प्राक्संज्ञो वा स्यादीश्वरे ऽर्थे । प्राप्तविभाषेयम् । यदत्र मामधिकरिष्यति । विनियोक्ष्यत इत्यर्थः । इह विनियोक्तुरी-श्वरत्वं गम्यते । कर्मत्वाद् द्वितीया । अगतित्वात्तिङि चोदात्तवतीति निघातो न । किञ्च मामधि कृत्वेत्यत्र प्रादिसमासो न । कर्मप्रवचनी-यानां प्रतिषेध इत्युक्तः । पक्षे ऽधिकृत्येति बोध्यम् ॥

लः परस्मैपदम् । १ । ४ । ९९ ॥

आदेशापेक्षया ल इति षष्ठी । लादेशाः परस्मैपदसंज्ञाः स्युः ॥ पचन्तं पश्य ॥

तङानावात्मनेपदम् । १ । ४ । १०० ॥

तङ्प्रत्याहारो लादेशौ शानच्कानचौ चैतत्संज्ञाः स्युः ॥ पूर्वसंज्ञापवादः । आस्ते । आसीनः । चक्राणः । शानच्चानशोर्न ग्रहणम् । लादेशत्वाभावात् । तेन पूङ्यजोः शानन् यजेरकर्तृगेऽपि फले भवति । कतीह निघ्नाना इत्यादौ परस्मैपदिभ्योऽपि चानश् भवति ॥

तिङस्त्रीणित्रीणि प्रथममध्यमोत्तमाः । १ । ४ । १०१ ॥

तिङ उभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः ॥ संज्ञाप्रदेशाः शेषे प्रथम इत्येवमादयः । इह चौचिकीर्षात्येकं पदम् ।

Digitized by Google

द्वे वेति हरदत्तः। तन्न। सत्यामप्यवान्तरपदसंज्ञायां महापदसंज्ञा-
माश्रित्य संहितैकपदे नित्येत्यस्य प्रवृत्तेः। अन्यथा समासादावपि
पृथक्छेदापत्तेः। द्विरुक्तमध्ये पदान्तरप्रयोगापत्तेश्च। एतेन संहि-
तैकपदे इत्यत्रैकपदशब्देनाखण्डं पदम्। अत एव नित्या समासे
इति चरितार्थम्। अत एवाग्नेऽग्ने इत्यादौ पदद्वित्वे संहिताऽनि-
त्येव। अखण्डत्वञ्च पदत्वाभाववदुत्तरखण्डत्वम्। तेन राजायती-
त्यादौ न दोषः। अन्यथा तत्र पत्वे णत्वैकादेशोऽपि न स्यादित्य-
पास्तम्। न चैवं नित्या समासे इति व्यर्थम्। समासस्य पृथगुपा-
दानं गोबलीवर्दन्यायेन। एकपदे इत्यनेनैव तत्संग्रहसिद्धेरित्युत्तरा-
सूत्रे कौस्तुभोक्तेः। न चैवमेकं बहुव्रीहिवदिति सूत्रे अथ बहुव्रीहिवत्त्वे
किं प्रयोजनम्। सुब्लोपपुंवद्भावौ। सुब्लोपः। एकैकम्। पुंवद्भावः। गत-
गता। इति भाष्ये गतगतेति प्रतीकमुपादाय उत्तरसूत्रेण द्विर्वचनब-
हुव्रीहिवद्भावौ। एकैकेत्यत्र तु पुंवद्भावे विशेषाभावोऽवग्रहे त्वत्रापि
विशेषोऽस्ति। न चात्र नित्या संहिता। एकैकयेत्येक इत्यवग्रहकरणात्
अग्ने अग्ने सूक्त इत्युदाहरणाच्चेति कैयटोक्तं विरुध्येत। न चाचेत्या-
दिकैयटस्य संहितैकपदे नित्येत्यस्य समासग्रहणसामर्थ्येनाखण्ड
पद एव प्रवृत्तिरित्याशयकत्वादिति वाच्यम्। एतदाशयकत्वे न
चाचेत्यादिकैयटस्य प्रकृतानुपयोगात्। अवग्रहे संहितानित्यत्वस्या-
प्रतिबन्धकत्वात्। द्विरुक्तमध्ये पदान्तरप्रयोगापत्तिरूपपूर्वोक्तदूषणस्या-
नुद्धाराच्च। एकैकेत्यत्र तु पुंवद्भावे विशेषाभाव इत्युक्त्वा अवग्रहप-
र्यन्तमनुधावनस्य निर्बीजत्वापत्तेश्च। त्वदुक्तरीत्या तत्र संहिताया-
अनित्यत्वेन तत्रैव विशेषस्य स्फुटत्वात्। अवग्रहे संहितानित्यत्व-
स्याप्रतिबन्धकत्वे मयूररोमभिरित्यादौ मुख्यसमासेऽप्यवग्रहकरणाङ्ग-
पहेतूपपादनं तु त्वदीयमप्यसङ्गतमेव। मयूररोमभिरित्यत्र समासे

Digitized by Google

ऽवग्रहस्यासाम्प्रदायिकत्वात् । मिथः पूर्वमवग्रहस्य सत्वात् । कस्तर्हि तद्वाच्य इति चेत् । शृणु । अवग्रहे त्वत्रापि विशेषोऽस्तीत्युक्तम् । तत्र संहितैकपदे इत्यनेन संहिताया नित्यत्वात्तदभावरूपो ऽवग्रहः कथमित्यवग्रहे संहितानित्यत्वस्याप्रतिबन्धकत्वमजानानस्य शङ्कायामाह । न चात्र नित्या संहितेति । अत्र नित्या संहितेति कथं तदभावरूपोऽवग्रह इति न च वाच्यमिति शेषः । अवग्रहे संहितानित्यत्वस्याप्रतिबन्धकत्वाभिप्रायेण समाधत्ते । एकैकयेत्येक इत्यवग्रहकरणादिति । अवग्रहकरणादवग्रहे संहितानित्यत्वस्याप्रतिबन्धकत्वमुपेयमित्यर्थः । अवग्रहे संहितानित्यत्वस्याप्रतिबन्धकत्वं पदकारसंमतमपि न भाष्यकारसम्मतमित्याशङ्कायामाह । अये अये सूक्ष्म इत्युदाहरणाच्चेति । उदाहरणात्प्रकारे इति सूत्रे भाष्यकारेणेति शेषः । तथाचावग्रहे संहितानित्यत्वस्याप्रतिबन्धकत्वं भाष्यसम्मतमपीति भावः । अये अये इति भाष्योदाहरणमवगृहीतं वैदिकमेव । संप्रत्यनुपलभ्यमानं चेत् लुप्तवेदशाखास्थम् । लोके तु संहिताया नित्यत्वादयेऽये सूक्ष्म इत्येव भवतीति भावः । इदमेव व्याख्यानं ज्यायः । अन्यथा प्रकृतानुपयोगेन कैयटस्य निरालम्बनत्वापत्तेः । द्विरुक्तमध्ये पदान्तरप्रयोगापत्तिरूपपूर्वोक्तदूषणस्यानुद्धाराच्चेत्यास्ताम् । प्रकृतमनुसरामः ॥

तान्येकवचनद्विवचनबहुवचनान्येकशः । १ । ४ । १०२ ॥

लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि प्रत्येकमेकवचनादिसंज्ञानि स्युः ॥ संज्ञाप्रदेशा द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचनमित्येवमादयः । तानीत्युक्तिः संज्ञासमावेशार्था । अन्यथा पुरुषवचनसंज्ञयोः पर्यायः स्यात् । ततश्चाडुत्तमस्येत्यादि कार्यं पक्षे न स्यात् ।

सुपः । १ । ४ । १०३ ॥

सुपस्त्रीणि त्रीणि वचनानि प्रत्येकमेकवचनद्विवचनबहुवचनसंज्ञानि स्युः ॥

विभक्तिश्च । १ । ४ । १०४ ॥

सुप्तिङौ विभक्तिसंज्ञौ स्तः ॥ तत्र सु औ जसित्यादीनां सप्तानां त्रिकाणां प्रथमादयः सप्तम्यन्ताः प्राचां संज्ञास्ताभिरिहापि व्यवहारः । चकारः पुरुषवचनसंज्ञाभ्यां समावेशार्थः । तिङो विभक्तिसंज्ञायाः प्रयोजनं न विभक्तौ तुस्मा इति । सुपां तु त्यदाद्यत्वादिकमपि ।

युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः । १ । ४ । १०५ ॥

तिङ्वाच्यकारकवाचिनि युष्मदि अप्रयुज्यमाने प्रयुज्यमाने च मध्यमः स्यात् ॥ त्वं पचसि । दृश्यसे च । समानाधिकरणे किम् । त्वां पश्यति । त्वया दृश्यते ॥

प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च । १ । ४ । १०६ ॥

मन्यधातुरुपपदं यस्य धातोस्तस्मिन्प्रकृतिभूते सति मध्यमः स्यात् परिहासे गम्यमाने मन्यतेस्तूत्तमः स्यात्स चैकार्थस्य वाचकः स्यात् ॥ एहि मन्ये ओदनं भोक्ष्यसे भुक्तः सोऽतिथिभिः । एतमेत वा मन्ये ओदनं भोक्ष्येथे भोक्ष्यध्वे । भोक्ष्ये भोक्ष्यावहे इत्यादि । मन्यसे मन्येथे इत्यादिरर्थः । युष्मद्युपपदे इत्याद्यनुवर्तते । तेनेह न । एतु भवान् मन्यते ओदनं भोक्ष्ये । श्यना निर्देशान्नेह ।

एहि मनुषे रथेन यास्यसि । प्रहासे किम् । यथार्थकथने माभूत् । एहि मन्यसे ओदनं भोक्ष्ये इति भुक्तः सोऽतिथिभिः ॥

अस्मद्युत्तमः । १ । ४ । १०७ ॥

तिङ्वाच्यकारकवाचिन्यस्मदि अप्रयुज्यमाने प्रयुज्यमाने चोत्तमः स्यात् ॥ अहं पश्यामि । दृश्ये वा । युष्मदस्मद्भ्यां सामानाधिकरण्ये तु परत्वादुत्तम एव । अहं च त्वञ्च वृषहन्संयुज्याव: ॥

शेषे प्रथमः । १ । ४ । १०८ ॥

मध्यमोत्तमयोरविषये प्रथमः स्यात् । पचति । पचतः । पचन्ति ॥

परः सन्निकर्षः संहिता । १ । ४ । १०९ ॥

वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात् ॥ दध्यत्र । प्रदेशाः संहितायामित्येवमादयः ॥

विरामोऽवसानम् । १ । ४ । ११० ॥

विरतिर्विरामः । अभाव इति यावत् । वर्णानामभावोऽवसानसंज्ञः स्यात् ॥ वृक्षः । प्लक्षः । यद्वा विरम्यतेऽनेनेति करणे घञ् । चरमवर्णश्च संज्ञी । अस्मिन्पक्षे खरवसानयोरित्येकापि सप्तमी विषयभेदाद्भिद्यते । खरि परे रेफस्य विसर्गः । अवसाने च रेफे स्थानिनीति सर्वेष्टसिद्धिः ॥

इत्योरम्भट्टेन विरचितायां व्याकरणदीपिकायां पाणिनिसूत्रवृत्तौ प्रथमस्याध्यायस्य चतुर्थः पादः ॥

अध्यायश्च प्रथमः समाप्तः ॥

Digitized by Google

श्रीगणेशाय नमः ।

अथ द्वितीयाध्यायस्य प्रथमः पादः ।

समर्थः पदविधिः । २ । १ । १ ॥

परिभाषेयम् । पदसम्बन्धी यो विधिः स समर्थाश्रितो बोध्यः ॥ वक्ष्यति द्वितीया श्रितेत्यादि । कष्टश्रितः । समर्थग्रहणं किम् । पश्य देवदत्त कष्टं, श्रितो विष्णुमित्रो गुरुकुलम् । पदग्रहणं किम् । तिष्ठति कुमारी, छत्रं हर देवदत्त । अत्र तुग्भवत्येव । आख्यातं सविशेषणं वाक्यम् । उच्चैः पठति । ओदनं पचति । एकतिङ् वाक्यं भवतीति वक्तव्यम् ॥ * ॥ एकशब्दः समानवचनो न तु संख्यावाची । बहुव्रीहिश्चायम् । ब्रूहिब्रूहि देवदत्त । अत्र वाक्यत्वादामन्त्रितनिघातः सिध्यति ॥ समानवाक्ये इति प्रकृत्य निघातयुष्मदस्मदादेशा वक्तव्याः ॥ * ॥ किं प्रयोजनं नानावाक्ये माभूवन्निति । अयं दण्डो हरानेन पचौदनं तव भविष्यति मम भविष्यति ॥ अधात्वभिहितं समानाधिकरणमसमर्थवद्भवतीति वक्तव्यम् ॥ * ॥ सर्पिः कालकम् । अत्र इसुसोरिति षत्वं न । अधात्वभिहितमिति किम् । सर्पिष्पीयते । वीरपुरुषादौ तु वचनप्रामाण्यात्समासः । कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः । परार्थाभिधानं वृत्तिः । सा द्विविधा । जहत्स्वार्था ऽजहत्स्वार्था च । वृत्त्यर्थावबोधकं वाक्यं विग्रहः । स द्विधा । लौकिको ऽलौकिकश्च । परिनिष्ठितत्वात्साधुर्लौकिकः । प्रयोगानर्हो ऽसाधुरलौकिकः । यथा राज्ञः पुरुषः । राजन् अस् पुरुष सु इति । अविग्रहो नित्य-

समासो ऽस्वपदविग्रहो वा । समासश्चतुर्विधेति प्रायोवादः । अव्ययीभावतत्पुरुषबहुव्रीहिद्वन्द्वाधिकारबहिर्भूतानामपि सहसुपेति सामासविधानात् । पूर्वपदार्थप्रधानो ऽव्ययीभावः । उत्तरपदार्थप्रधानस्तत्पुरुषः । अन्यपदार्थप्रधानो बहुव्रीहिः । उभयपदार्थप्रधानो द्वन्द्व इत्यपि प्राचां प्रवादः प्रायोभिप्रायः । सूपप्रति उन्मत्तगङ्गमित्याद्यव्ययीभावे अतिमालादौ तत्पुरुषे द्विषा इत्यादिबहुव्रीहौ दन्तोष्ठमित्यादिद्वन्द्वे चाभावात् । तत्पुरुषविशेषः कर्मधारयः । तद्विशेषो द्विगुः । अनेकपदत्वं द्वन्द्वबहुव्रीह्योरेव । तत्पुरुषस्य क्वचिदेवेत्यभिधास्यते । किञ्च ।

सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा ।
सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः ॥

सुपा । राजपुरुषः । तिङा । पर्यभूषत् । नाम्ना । कुम्भकारः । धातुना । कटप्रूः ॥ अजस्रम् । तिङां तिङा । पिबतखादता । तिङां सुपा । कृन्त विचक्षणेति यस्यां क्रियायां सा कृन्तविचक्षणा । एहीडदयो ऽन्यपदार्थे इति मयूरव्यंसकादौ पाठात्समासः ॥

सुबामन्त्रिते पराङ्गवत्स्वरे । २ । १ । २ ॥

सुबन्तमामन्त्रिते परे पराङ्गवत्स्यात् स्वरे कर्तव्ये ॥ परशुना वृश्चन् । मद्राणां राजन् । गोषु स्वामिन् । द्रवत्पाणी शुभस्पती । शुभ इति शुभेः क्विबन्तात् षष्ठ्यन्तम् । तस्य परशरीरानुप्रवेशे षाष्ठिकमामन्त्रिताद्युदात्तत्वम् । न चाष्टमिको निघातः शङ्क्यः । पूर्वामन्त्रितस्याविद्यमानत्वे पादादित्वात् । यत्ते दिवो दुहितर्मर्तभोजनम् । इह दिवःशब्दस्याष्टमिको निघातः । सुबिति किम् । पीड्ये पीड्यमान । आमन्त्रिते किम् । गेहे गार्ग्यः । पराङ्गवत् किम् । पूर्वस्य

माभूत् । यज्ञदत्त कुण्डेनाटन् । पदग्रहणं किम् । पृथगाद्युदात्तत्वं माभूत् । वस्ग्रहणं किम् । स्वाश्रयमपि यथा स्यात् । आम् कुण्डेनाटन् । आम एकान्तरमित्येकान्तरता भवति । स्वरे किम् । कूपे सिञ्चन् । चर्मे नमन् । षत्वणत्वे प्रति पराङ्गवन्न भवति ॥ तन्निमित्तग्रहणं कर्तव्यम् ॥ * ॥ तस्यामन्त्रितस्य यन्निमित्तं तत्पराङ्गवद्भवतीत्यर्थः । मद्राणां राजन्निति मद्रनिमित्तं राजत्वमित्यस्ति तन्निमित्तत्वम् । भृत्यदेशनिमित्ता हि राजता । तेनेह न । अयमग्ने जरिता । एतेनाग्ने ब्रह्मणा । समर्थानुवृत्त्या वा सिद्धम् ॥ सुबन्तस्य पराङ्गवद्भावे समानाधिकरणस्योपसंख्यानमनन्तरत्वात् ॥ * ॥ तीक्ष्णेन परशुना वृश्चन् ॥ परमपि छन्दसि पूर्वस्याङ्गवद्भवतीति वक्तव्यम् ॥ * ॥ आते पितर्मरुतां सुम्नमेतु ॥ अव्ययानान्न ॥ * ॥ उच्चैरधीयान । अव्ययीभावस्य तु दृष्यते । उपाग्न्यधीयान ॥

प्राक्कडारात्समासः । २ । १ । ३ ॥

कडाराः कर्मधारय इत्यतः प्राक् समास इत्यधिक्रियते ॥ समासप्रदेशाः कृत्तद्धितसमासाश्चेत्येवमादयः । प्राग्वचनं संज्ञासमावेशार्थम् ॥

सह सुपा । २ । १ । ४ ॥

सहेति योगो विभज्यते । सुबन्तं समर्थेन सह समस्यते ॥ योगविभागस्येष्टसिद्ध्यर्थत्वात्कतिपयतिङन्तोत्तरपदोऽयं समासः । स च छन्दस्येव । पर्यभूषत् । अनुव्यचलत् ।

सुपा । २ । १ । ४ ॥

सुप्सुपा सह समस्यते ॥ भूतपूर्वे चरडिति निर्देशाद्भूतशब्दस्य पूर्वनिपातः । पूर्वं भूतो भूतपूर्वः ॥ इवेन समासो विभक्त्यलोपः

पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम् ॥ * ॥ मासवीव कन्येव । कन्यारायजन्यमनुष्याणामिति फिट्सूत्रपाठात्कन्याशब्दो ऽन्तस्वरितः । पूर्वेतिलक्षणान्तसमासे विङ्क्ते कार्यान्तरविधानार्थं वचनमिति केयट: ॥

अव्ययीभावः । २ । १ । ५ ॥

अधिकारोऽयम् ॥ अव्ययीभावप्रदेशा अव्ययीभावश्चेत्येवमादयः ॥

अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु । २ । १ । ६ ॥

अव्ययमिति योगो विभज्यते । अव्ययं समर्थेन समस्यते सोऽव्ययीभावः ॥ दिशयोर्मध्यं अपदिशम् । क्लीबेऽव्ययं त्वपदिशं दिशोर्मध्यं विदिक् स्त्रियामित्यमरः । विभक्तीत्यादेरयमर्थः । विभक्त्यर्थादिषु वर्तमानमव्ययं सुबन्तेन सह समस्यते सोऽव्ययीभावः ॥ विभक्तौ तावत् । हरौ इत्यधिहरि । सप्तम्यर्थस्येवात्र द्योतकोऽधिः । हरि ङि अधि इत्यलौकिकं प्रक्रियावाक्यम् । अत्र निपातेनाभिहिते ऽप्यधिकरणे वचनसामर्थ्यात्सप्तमी । समीपे । कृष्णस्य समीपमुपकृष्णम् । समया ग्रामं निकषा लङ्कां आराद्वनात् इत्यत्र नाव्ययीभावः । अभितः परितः अन्यारादिति द्वितीयापञ्चम्योर्विधानसामर्थ्यात् । मद्राणां समृद्धिः सुमद्रम् । यवनानां व्यृद्धिर्दुर्यवनम् । विगता ऋद्धिर्व्यृद्धिः । मक्षिकाणामभावो निर्मक्षिकम् । हिमस्यात्ययोऽतिहिमम् । अत्ययो ध्वंसः । निद्रा संप्रति न युज्यत इत्यतिनिद्रम् ।

हरिशब्दस्य प्रकाश इतिहरि। विष्णोः पश्चादनुविष्णु। पश्चाच्छब्दस्य नायं समासः। ततः पश्चात्स्यत इति भाष्यप्रयोगात्। योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः। अनुरूपम्। रूपस्य योग्यमित्यर्थः। अर्थमर्थं प्रति प्रत्यर्थम्। प्रतिशब्दस्य वीप्सायां कर्मप्रवचनीयसंज्ञाविधानसामर्थ्यात्तद्योगे द्वितीयामभ्रे वाक्यमपि। शक्तिमनतिक्रम्य यथाशक्ति। हरेः सादृश्यं सहरि। अव्ययीभावे चाकाले इति वक्ष्यमाणेन सहस्य सः। ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठम्। चक्रेण युगपत् सचक्रम्। सदृशः सख्या ससखि। यथार्थत्वेनैव सिद्धे पुनः सादृश्यग्रहणं गुणभूतेऽपि सादृश्ये यथा स्यादित्येवमर्थम्। क्षत्राणां सम्पत्तिः सक्षत्रम्। ऋद्धेराधिक्यं समृद्धिः। अनुरूपमात्मभावः सम्पत्तिरिति भेदः। तृणमप्यपरित्यज्य सतृणमत्ति। साकल्येनेत्यर्थः। न त्वत्र तृणभक्षणे तात्पर्यम्। अन्ते। अग्निग्रन्थपर्यन्तमधीते साग्नि। इयं समाप्तिरसकलेऽप्यध्ययने भवतीति साकल्यात्पृथगुच्यते।

यथाऽसादृश्ये। २। १। ७॥

असादृश्ये एव यथाशब्दः समस्यते॥ यथावृद्धं ब्राह्मणानामन्त्रयस्व। ये ये वृद्धा इत्यर्थः। असादृश्य इति किम्। यथा हरिस्तथा हरः। हरेरुपमानत्वं यथाशब्दो द्योतयति। तेन सादृश्य इति वा यथार्थ इति वा प्राप्तं निषिद्ध्यते॥

यावदवधारणे। २। १। ८॥

यावन्तः श्लोकास्तावन्तोऽच्युतप्रणामा यावच्छ्लोकम्। अवधारणे किम्। यावद्दत्तं तावद्भुक्तं नावधारयामि कियन्मया भुक्तमिति। अपेक्षपदं न॥

सुप्प्रतिना मात्रार्थे। २। १। ९॥

शाकस्य लेशः शाकप्रति । मात्रार्थे किम् । वृत्तं प्रति विद्योतते विद्युत् । सुबिति वर्तमाने पुनः सुब्ग्रहणं अव्ययनिवृत्त्यर्थम् ॥

अक्षशलाकासंख्याः परिणा । २ । १ । १० ॥

द्यूतव्यवहारे पराजयेऽक्षशलाकयोरेकत्वे एव चायं समासः ॥ अक्षेण विपरीतं वृत्तमक्षपरि । शलाकापरि । एकपरि । द्यूतव्यवहारे किम् । अक्षेणेदं न तथा वृत्तं शकटेन यथा पूर्वमिति । पराजये किम् । अक्षेणेदं तथा वृत्तं यथा पूर्वजये । एकत्वे किम् । अक्षाभ्यां विपरीतं वृत्तम् ॥

विभाषा । २ । १ । ११ ॥

अधिकारोऽयम् ॥ एतत्सामर्थ्यादेव प्राचीनानां नित्यसमासत्वम् । सुप्सुपेति तु न नित्यसमासः । अव्ययमित्यादिना समासविधानाज्ज्ञापकात् ॥

अपपरिबहिरञ्चवः पञ्चम्या । २ । १ । १२ ॥

अपविष्णु संसारः । अप विष्णोः । परिविष्णु । परि विष्णोः । बहिर्वनम् ॥ बहिर्वनात् । प्राग्वनम् । प्राग्वनात् ॥

आङ्मर्यादाभिविध्योः । २ । १ । १३ ॥

एतयोराङ् पञ्चम्यन्तेन वा समस्यते सोऽव्ययीभावः ॥ आमुक्ति संसारः । आ मुक्तेः । आकुमारं यशः पाणिनेः । आ कुमारेभ्यः ॥

लक्षणेनाभिप्रती आभिमुख्ये । २ । १ । १४ ॥

आभिमुख्यद्योतकावभिप्रती चिन्हवाचिना सह प्राग्वद्वा ॥ अभ्यग्नि शलभाः पतन्ति । अग्निमभि । प्रत्यग्नि । अग्निं प्रति । अग्निं लक्षीकृत्य अभिमुखं पतन्तीत्यर्थः । लक्षणेन किम् । स्रुघं

Digitized by Google

प्रति गतः। प्रतिनिवृत्य पुनर्मेशाभिमुखं गतः। अभिप्रती किम्। येनाग्निस्तेन गतः। आभिमुख्ये किम्। अभ्यङ्का गावः। प्रत्यङ्का गावः। अभिनवाङ्का इत्यर्थः॥

अनुर्यत्समया। २। १। १५॥

यं पदार्थं समया तेन लक्षणभूतेनानुः समस्यते सोऽव्ययीभावः॥ अनुवनमशनिर्गतः। वनस्य समीपं गत इत्यर्थः। अनुः किम्। वनं समया। यत्समया किम्। वृक्षमनु विद्योतते विद्युत्॥

यस्य चायामः। २। १। १६॥

यस्य दैर्ध्यमनुना द्योत्यते तेन लक्षणभूतेनानुः समस्यते॥ अनुगङ्गं वाराणसी। गंगाया अनु। गङ्गादैर्घ्यासदृशदैर्घ्योपलक्षितेत्यर्थः॥

तिष्ठद्गुप्रभृतीनि च। २। १। १७॥

एतानि निपात्यन्ते॥ तिष्ठद्गु कालविशेषे इति वक्तव्यम्॥ *॥ तिष्ठन्ति गावो यस्मिन् काले स तिष्ठद्गु दोहनकालः। आयतीगवम्। इह शत्रादेशः पुम्वद्भावविरहः समासान्तश्च निपात्यते। चकारोऽवधारणार्थः। अपरः समासो न भवति। परमं तिष्ठद्गु। खलेयवादीनि प्रथमान्तानि विभक्त्यन्तरेण नैव सम्बद्ध्यन्ते अन्यपदार्थे च वर्तन्ते। खलेयवम्। खलेबुसम्।

पारे मध्ये षष्ठ्या वा। २। १। १८॥

पारमध्यशब्दौ षष्ठ्यन्तेन सह वा समस्येते॥ एदन्तत्वं चानयोर्निपात्यते। पक्षे षष्ठीतत्पुरुषो वावचनात्। पारेगङ्गादानय। गङ्गापारात्। मध्येगङ्गात्। गङ्गामध्यात्। महाविभाषया वाक्यमपि। गङ्गायाः पारात्। गङ्गाया मध्यात्॥

संख्या वंश्येन । २ । १ । १९ ॥

वंशो द्विधा विद्यया जन्मना च । तत्र भवो वंश्यः । दिगादित्वाद्यत् । तद्वाचिना सह संख्या वा समस्यते ॥ द्वौ मुनी वंश्यौ द्विमुनि व्याकरणस्य । त्रिमुनि । विद्यातद्वतामभेदविवक्षया त्रिमुनि व्याकरणम् । एकविंशति भारद्वाजम् ॥

नदीभिश्च । २ । १ । २० ॥

नदीभिः संख्या प्राग्वत् ॥ सप्तगङ्गम् । द्वियमुनम् । समाहारे चायमिष्यते । इह माभूत् । सर्वेमेकनदीतीरे ॥

अन्यपदार्थे च संज्ञायाम् । २ । १ । २१ ॥

अन्यपदार्थे विद्यमानं सुबन्तं नदीभिः सह नित्यं समस्यते संज्ञायाम् ॥ विभाषाधिकारेऽपि वाक्येन संज्ञानवगमादिह नित्यसमासः । उन्मत्तगङ्गं नाम देशः । लोहितगङ्गम् । अन्यपदार्थे किम् । कृष्णावेणी । संज्ञायां किम् । शीघ्रगङ्गो देशः ॥

तत्पुरुषः । २ । १ । २२ ॥

अधिकारोऽयं प्राग्बहुव्रीहेः ॥ तत्पुरुषप्रदेशास्तत्पुरुषे कृति बहुलमित्येवमादयः ॥

द्विगुश्च । २ । १ । २३ ॥

द्विगुरपि तत्पुरुषसंज्ञः ॥ समासान्तः प्रयोजनम् । पञ्चराजम् । इदं सूत्रं त्यक्तुं शक्यम् । संख्यापूर्वो द्विगुश्चेति पठित्वा चकारबलेन संज्ञासमावेशस्य सुवचत्वात् ॥

द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः । २ । १ । २४ ॥

द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते स

तत्पुरुषः॥ कृष्णं श्रितः कृष्णश्रितः। दुःखातीतः। नरकपतितः। ग्रामगतः। तरङ्गात्यस्तः। सुखप्राप्तः। सुखापन्नः॥ गम्यादीनामुपसंख्यानम्॥ * ॥ ग्रामं गमी ग्रामगमी। ग्रामगामी। अन्नबुभुक्षुः॥

स्वयं क्तेन। २। १। २५॥

द्वितीयेति न सम्बध्यतेऽयोग्यत्वात्। स्वयंकृतस्यापत्यं स्वायंकृतिः॥

खट्वा क्षेपे। २। १। २६॥

खट्वाप्रकृतिकं द्वितीयान्तं क्तान्तप्रकृतिकेन सुबन्तेन समस्यते निन्दायाम्। खट्वारूढो जाल्मः। नित्यसमासोऽयम्। न हि वाक्येन निन्दा गम्यते। क्षेपे किम्। खट्वामारूढः उपाध्यायः॥

सामि। २। १। २७॥

द्वितीयेति न सम्बध्यतेऽयोग्यत्वात्। क्तेनेत्येव॥ सामिकृतम्। अर्धकृतम्॥

कालाः। २। १। २८॥

कालवाचिनो द्वितीयान्ताः क्तान्तेन सह प्राग्वत्॥ अनत्यन्तसंयोगार्थं वचनम्। मासं प्रमितः मासप्रमितः। आदिकर्मणि क्तः। मासं प्रमातुमारब्धवान्। प्रतिपच्चन्द्रमा इत्यर्थः॥

अत्यन्तसंयोगे च। २। १। २९॥

काला इत्येव॥ अक्तान्तार्थं वचनम्। मुहूर्तं सुखं मुहूर्तसुखम्॥

तृतीया तत्कृतार्थेन गुणवचनेन। २। १। ३०॥

तत्कृतेति लुप्ततृतीयाकम्। तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेनार्थशब्देन च सह प्राग्वत्॥ शङ्कुलया खण्डः शङ्कुलाखण्डः।

Digitized by Google

धान्येनार्थो धान्यार्थः । तत्कृतेति किम् । अक्ष्णा काणः । गुणवचनेन किम् । धान्येन धनवान् ॥

पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः ।२।१।३१॥

तृतीयान्तमेतैः प्राग्वत् ॥ मासपूर्वः । मातृसदृशः । पितृसमः । ऊनार्थाः । माषोनं कार्षापणम् । माषविकलम् । वाक्कलहः । आचारनिपुणः । गुडमिश्रः । आचारश्लक्ष्णः । मिश्रग्रहणे सोपसर्गस्यापि ग्रहणम् । मिश्रं चानुपसर्गमसन्धावित्यत्रानुपसर्गग्रहणात् । गुडसंमिश्रा धानाः ॥ अवरस्योपसंख्यानम् ॥ * ॥ मासेनावरो मासावरः ॥

कर्तृकरणे कृता बहुलम् । २ । १ । ३२ ॥

कर्तरि करणे च तृतीया कृदन्तेन बहुलं प्राग्वत् ॥ हरिणा त्रातो हरित्रातः । नखैर्भिन्नो नखभिन्नः । कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् । नखनिर्भिन्नः । कर्तृकरणे किम् । भिक्षाभिरुषितः । हेतौ तृतीया । कृता किम् । काष्ठैः पचतितराम् । बहुलं किम् । दात्रेण लूनवान् ॥

कृत्यैरधिकार्थवचने । २ । १ । ३३ ॥

स्तुतिनिन्दाफलकमर्थवादवचनमधिकार्थवचनम् । तत्र कर्तरि करणे च तृतीया कृत्यैः सह प्राग्वत् ॥ काकपेया नदी । वातच्छेद्यानि तृणानि । पूर्वस्यैवायं प्रपञ्चः ॥ साधनं कृतेति वक्तव्यम् ॥ * ॥ पादाभ्यां ह्रियते पादहारकः । अपादाने पञ्चमी । बाहुलकात्कर्मणि ण्वुल् । गले चोप्यते गलेचोपकः । चुपेर्ण्यन्तस्य कर्मणि ण्वुल् । तृणोपेन्ध्यम् । घनघात्यम् ॥

अन्नेन व्यञ्जनम् । २ । १ । ३४ ॥

Digitized by Google

सावनेन्दुस्तृमासानां षष्टिः सैकद्विसप्तिका ।
द्यु[1] स्त्रिंशत् सावनस्यार्धः सूर्यस्तृणां विपर्ययः ॥ ३१ ॥

सोमाकरः—सावनेन्दुस्तृमासानां षष्टिरिति । मासानां युगे संख्या । सावनसंख्यापेक्षया सौराणां षष्टिरेव । त्रिंशद्दिवसमासरूपया सावनानां षष्टिः सैका एकषष्टिः । तथाधिकमासाभ्यां सह द्विषष्टिश्चान्द्राणाम् । तथा सप्तमिका षष्टिर्नाक्षत्राणां सप्तषष्टिरित्यर्थः । स तु मासः सर्वेषां द्यु त्रिंशत् । द्युरहर्नाम । त्रिंशद्दिनं मास इत्यर्थः । तथा सावनस्य दिनस्य त्रिंशदेवार्धेनाधिका इति सावनेन । सूर्यस्य विपर्ययः प्रत्यावृत्तिर्दिनम् । तथा स्तृणां नक्षत्राणां च प्रत्यावृत्तिरेव सावनं दिनमिति भवति ॥ ३१ ॥

सुधाकरः—षष्टिः क्रमेण एकेन द्विकेन सप्तभिश्च युता तदा क्रमेण युगे सावनमाससंख्या = ६१ । चान्द्रमाससंख्या = ६२ । स्तृमासानां नक्षत्रमासानां संख्या = ६७ । द्युत्रिंशत् सावनदिनानां त्रिंशत् सावनो मासो भवति । यः सौरोऽब्दः स एव स्तृणां नक्षत्राणां पर्ययो यतः सौराब्दकालेन रविरेकं नक्षत्रचक्रं भुङ्क्ते इत्यर्थः ।

अत्रोपपत्तिः । चन्द्रो यावता कालेनैकं नक्षत्रचक्रं भुङ्क्ते स एव कालो नक्षत्रमास इति सांहितिका वदन्ति । तथा च सिद्धान्ततत्त्वविवेके कमलाकरः । "भचक्रैकभोगाद्विधोः सौविदार्थे वदन्त्यत्र मासं बुधाः संहितासु" इति । तेन चन्द्रभगणा एव युगे नक्षत्रमासाः । अनेन सर्वमुपपद्यते । परमत्र स्फुटम् । अत्र सर्वं बार्हस्पत्यमानमानं समीचीनं तच्च पञ्चसिद्धान्तिकायां सोमकसिद्धान्ते निश्चितमस्ति । एतेषु बहु मया ६–८ श्लोकानां भाष्ये प्रदर्शितमिति ॥ ३१ ॥

अग्निः प्रजापतिः सोमो रुद्रोऽ[2] दितिर्बृहस्पतिः ।
सर्पाश्च पितरश्चैव भगश्चैवार्यमापि च ॥ ३२ ॥

---

(१) द्युस्त्रिंशत् सावनस्याब्दः सौरः स्तृणां स पर्ययः—इति पाठः साधुः ।
(२) दितिर्बृहस्पती इति पाठः साधुः ।

सविता त्वष्टाऽथ वायुश्चेन्द्राग्नी मित्र एव च ।
इन्द्रो निर्ऋतिरापो वै विश्वेदेवास्तथैव च ॥ ३३ ॥
विष्णुर्वसवो वरुणोऽज एकपात् तथैव च ।
अहिर्बुध्न्यस्तथा पूषा अश्विनौ यम एव च ॥ ३४ ॥

सोमाकरः—अग्निः प्रजापतिरिति । प्रसिद्धा एता देवताः । रुद्रस्य प्रतिरूपः सोमः । प्रोष्ठपदयोर्विपर्ययः पाठदोषो वा ॥ ३२–३४ ॥

सुधाकरः—इदानीं यज्ञेऽर्चनाय नक्षत्रदेवता आह अग्निरिति । कृत्तिकादेरेता नक्षत्रदेवताः संहितान्येषु सर्वत्र प्रसिद्धाः । अत्र पूर्वभद्रपदाया अजो वैकपादिति देवताद्वयं वा एकदेवताया नामद्वयम् ॥ ३२–३४ ॥

नक्षत्रदेवता एता एताभिर्यज्ञकर्मणि ।
यजमानस्य शास्त्रज्ञैर्नाम नक्षत्रजं स्मृतम् ॥ ३५ ॥

सोमाकरः—नक्षत्रदेवता एता इति । एतासां प्रयोजनं यस्मात् शास्त्रज्ञैस्तन्त्रकारैर्बह्वृचानां सूक्तवाचकैर्यजमाननामनीति द्वितीयं नाम नक्षत्रजं स्मृतमुदाहृतं यज्ञकर्मणि तस्मादेता उदाहृताः ॥ ३५ ॥

सुधाकरः—एताभिर्देवताभिः शास्त्रज्ञैर्वेदविद्भिर्यज्ञकर्मणि यजमानस्य नक्षत्रजं नाम स्मृतं कथितम् । यस्मिन्नक्षत्रे यजमानस्य जन्म तद्देवताबोधकं यजमानस्य यन्नाम तन्नक्षत्रजं नामेति । सम्प्रति दैवज्ञैर्नक्षत्राणां चत्वारः पादाः क्रियन्ते । यस्मिन् पादे जातस्य जन्म भवति तत्पादबोधकाक्षरादिकं नाम जन्मनाम च कथ्यते ॥ ३५ ॥

उग्राण्यार्द्रा च चित्रा च विशाखा श्रवणोऽश्वयुक् ।
क्रूराणि तु मघा स्वाती ज्येष्ठा मूलं यमस्य यत् ॥ ३६ ॥

सोमाकरः—उग्राण्यार्द्रा च चित्रेति । नक्षत्रस्वरूपज्ञानस्तवनप्रतीत्यर्थः श्लोकः । याम्यं भरणी संक्षेपार्थमाह ॥ ३६ ॥

सुधाकरः—इदानीं शुभकर्मणि वर्ज्यानि उग्राणि क्रूराणि च नक्षत्राण्याह उग्राणीति । आर्द्रा । चित्रा । विशाखा । श्रवणः । अश्वयुक् अश्विनी । एतानि षट् नक्षत्राणि उग्राणि सन्ति । मघा । स्वाती ।

Digitized by Google

ज्येष्ठा। मूलम्। यमस्य यत् नक्षत्रं भरणी। एतानि क्रूराणि नक्षत्राणि सन्ति। मुहूर्तचिन्तामणौ रामेण च "पूर्वात्रयं याम्यमघे उग्रं क्रूरं कुजस्तथा" इत्यनेन उग्रमेव क्रूरं कथ्यते। तथैतद्गणो ज्योतिषवेदाङ्गतोऽभ्यो बहूनि भिन्नानि पठितानीति ॥ ३६ ॥

न्यूनं द्विषष्टिभागेन ज्ञेयं(१) सूर्यात् सपार्वणम्।
यत्कृतावुपजायेते मध्येऽन्ते चाधिमासकौ ॥ ३७ ॥

सोमाकरः—तत्र मध्येऽन्ते च द्वावधिमासकौ यत्कृतावुपजायेते यया कल्पनया भवतस्तदर्थं ज्ञेयमपहातव्यं कुतोऽवयवमिति वाक्यशेषः। किं केवलमानम्। न। सपार्वणम्। पार्वणनक्षत्रसहितमित्यर्थः। एकान्तरेऽब्दे मासे चेत्यनियमे एतदेवार्थे (२) उत्तरसौम्यार्विष्णवाजानां परतो द्वौ द्वौ न। एवं मापलक्षके अत एवेह समसंख्यायाः सर्वाणि कालसाम्यमभिप्रेत्य पाञ्चवार्षिकयुगे उदाहृतानि। पर्व तु विभागार्थे कुतो ज्ञेयं सूर्यात् सूर्यमानादिति वाक्यशेषः। किमेकदेशो न्यूनं द्विषष्टिभागेन प्रत्येकं दिनं द्वाषष्टेन भागेन द्वयेन हीनं कृत्वेति वाक्यशेषः। एतदर्थमेवोक्तं "द्युहेयं पर्व चेत् पाद" इति।

तथा च गर्गः।

ततः प्रक्षीयमाणस्य तिथिरित्येव संज्ञिता।
द्विलवोनमहोरात्रं चन्द्रस्य गतिरुत्तमा ॥ इति।

तथा।

द्विलवक्षयसम्भूतो द्वाषष्ट्या भवते तिथिः।
ऋतोरन्तमनुप्राप्य हीनरात्रेति नाम च ॥ इति ॥ ३७ ॥

सुधाकरः—इदानीं चन्द्रपर्वगणात् सूर्यपर्वगणसाधनमाह न्यूनमिति। सपार्वणं युगादेर्वर्त्तमानपर्यन्तं पर्वगणमानं तच्च द्विषष्टिभागेन न्यूनं कार्यं तद्द्विगुणं द्विषष्ट्या भक्तं फलेन तदेवोनं कर्त्तव्यमित्यर्थः। एवं

(१) ज्ञेयं सौरं सपार्वणम् इति पाठः साधुः।
(२) उत्तरसौम्यविषुवाजानां इति पाठः साधुः।

Digitized by Google

यच्छेषं तत् सौरं पर्वगणमानं स्यात् । इयं सा कृतिः प्रकारो यत्कृतौ च युगमासानां मध्ये त्रिंशत् सौरमासान्ते एकस्तथान्ते षष्ठितमसौरमासान्ते चान्य इत्यधिमासौ द्वावुपजायेते उत्पद्येते इत्यर्थः ।

अत्रोपपत्तिः । त्रयोदशश्लोकभाष्ये प्रदर्शितं यदेकस्मिन् युगे सूर्यपर्वाणि=१२० । चान्द्रपर्वाणि=१२४ । अधिपर्वाणि=४ । अतो द्विषष्टिचान्द्रपर्वसु अधिपर्वद्वयम् । ततोऽनुपातो यदि ६२ चान्द्रपर्वभिरधिपर्वद्वयं तदेष्टचान्द्रपर्वभिः किमिति लब्धं सौरचान्द्रपर्वान्तररूपमधिपर्वमानम् = $\frac{२ चंप}{६२}$ । एवं चान्द्रपर्वगणो विहीनं शेषं सूर्यपर्वगणमानं स्यात् । अत्रापि अधिपर्वशेषं त्याज्यम् । त्यागकारणं च सम्यक् त्रयोदशश्लोकभाष्येऽभिहितम् । चान्द्रपर्वगणात् सौरपर्वगणानयनार्थं वा सौरपर्वगणाच्चान्द्रपर्वगणानयनार्थं याऽधिपर्वसंख्या सोभयत्र समानैव तथाऽधिपर्वशेषं चोभयत्र सममेव किन्तु एकत्र द्विषष्टिर्हरोऽन्यत्र षष्टिर्हर इति सर्वं भास्करेण निजे गोलाध्याये "सौरेभ्यः संधितास्ते चेदधिमासास्तदैन्दवाः" इत्यादौ स्फुटं प्रदर्शितमतो लेखप्रयासेन किम् । अत्र बार्हस्पत्यादिव्याख्यानं मन्मते न समीचीनमिति ॥ ३७ ॥

कला दश सविंशा स्याद् द्वे मुहूर्त्तस्य नाडिके ।
द्वि[1]त्रिंशस्तत्कलानां तु षट्शती त्र्यधिका भवेत् ॥ ३८ ॥

सोमाकरः—कालप्रमाणमाह कला दश सविंशा स्यादिति । ताः कला इत्युक्तास्ता दश कला विंशभागसहिता नाडिकेति वाक्यशेषः । द्वे मुहूर्त्तस्य नाडिके भवतः इति वाक्यशेषः । "मुहूर्त्तस्तु नाडिके" इति गर्गः । ते मुहूर्त्ता द्वि त्रिंशस्त्रिंशन्मुहूर्त्तं दिनं तत्र कलानां षट्शती त्र्यधिका भवेत् । त्र्युत्तराणि षट्शतानि कलानां दिनमित्यर्थः । एतदेव ॥ ३८ ॥

सुधाकरः—इदानीमन्याः परिभाषा आह कलेति । सविंशा एकस्य विंशतिभागेन सहिता दश कला एका नाडिका भवति । अत्र नाडिकाया अध्याहारः साहचर्यात् । मुहूर्त्तस्यैकमुहूर्त्तस्य मध्ये द्वे

(१) तत्त्रिंशद् तु कलानां इति पाठः साधुः ।

नाडिके भवतः । तत्त्रिंशत् तेषां मुहूर्त्तानां त्रिंशत् त्र्यु भूदिनं भवति तत्र भूदिने तु कलानां त्र्यधिका षट्शती भवेदिति परिभाषा ।

अत्रोपपत्तिः । एका नाडिका = $१० \frac{१}{२०}$ कलाः । मुहूर्त एकः = २ नाडिके = $२० + \frac{१}{१०}$ कलाः । सावनदिनमेकम् = ३० मुहू० = ६० नाडिकाः = $६०० + \frac{३०}{१०}$ = ६०३ कलाः । एकस्मिन् चन्द्रनक्षत्रे रविसावनदिनमानम् = $\frac{१८३०}{१८०९} = १ + \frac{२१}{१८०९} = १ + \frac{७}{६०३}$ इति प्रथममनुपातेन प्रदर्शितम् । तत्र शेषावयवे $\frac{७}{६०३}$ ऽस्मिन् गुणहरयोर्दृढत्वादाचार्येणैकरवि-सावनदिनस्य हरतुल्यो विभागः कृतस्तस्यैकभागस्य कला संज्ञा । एवं दिन-कलाभिर्वैपरीत्येनैकनाडिकायां सविंशा दशकला आयान्तीति । अत्र बार्ह-स्पत्यव्याख्यानं साधु परन्तु 'च विंशा' इति तच्छोधितपाठस्तु मन्मते न युक्तः । अत्र शङ्करबालकृष्णदीक्षितादीनामपि व्याख्यानमेवमेव ॥ ३८ ॥

सस[1]प्तकं भयुक् सोमः सूर्यो द्यूनि त्रयोदश ।
ऊन[2]मानि तु पञ्चाह्नः काष्ठा पञ्चाक्षरा भवेत् ॥ ३९ ॥

सोमाकरः—ससप्तकं भयुक् सोम इति । स सोमः कृतो भयुक् नक्षत्रसमाहितः ससप्तकं सप्तांशसंख्याकं दिनं तु भुङ्क्ते इति वाक्यशेषः । तथा सूर्यो द्यूनि त्रयोदश । सौर्ये दिनं त्रयोदशांशरहितमित्यर्थः । अथवा "दिनैकादशकेन तद्" मिति यदुक्तं तत्स्वमानेनेदं तु मापनेन दिनानि तानि त्रयोदश भवन्ति । सूर्येन्दुभुक्तावयोरूनमानि पञ्चमाह्नः आर्तवान्द्रमानतो नायान्त्यूनमानि मानान्तराणि सौरेणाप्तानि । नाडि-काः षडंशकाश्च षड् भवन्ति तानि पञ्च घटिकास्त्रिंशत् सार्धाः । एवं शशिना त्रयोदश सार्धा आर्तभुक्तिरित्युक्तं भवति तान्येव तूनमान्यह्ना मानानि पञ्च पञ्च । कापि भावेन पञ्चावशा तद्वा पञ्चार्धाधिकौ तयो-रेकमधिमासयोरूनमं तथैव तयोर्भुक्तिः । तदर्थं च वक्ष्यति 'विभजेज्ज्ञा-नराशिने'ति । अत्र च ऋतुसंवत्सरयुगात्मना काष्ठा पञ्चाक्षरा भवेत् ।

(१) ससप्तैकं इति पाठः साधुः ।
(२) नवमानि इति पाठ साधुः ।

Digitized by Google

काष्ठानाम परिमाणं सर्वकालकलनायामुदाहृतम् । मनुगर्गादिभिर्भेदेन 'दश चाष्टौ च काष्ठे'त्यादिभिर्वाक्यैः सह काष्ठा पञ्चादरा इह सैव चोदिता कलनादिभागनियमार्थे पर्वस्त्वेधेभक्तांशादिकयागकालापेक्षया व्यवहरन्ति तेऽपि च ॥ ३९ ॥

सुधाकरः—इदानीं पुनरन्याः परिभाषा आह ससप्तैकमिति । सोमश्चन्द्रो यावता कालेन भयुक् भेन नक्षत्रेण सह युक्तो भवति स कालश्च ससप्तैकं सप्तकलाधिकमेकं रविसावनदिनम् । चन्द्रः सप्तकलाधिकेनैकेन रविसावनदिनेनैकं नक्षत्रं भुनक्तीत्यर्थः । एवं सूर्यश्च यावता कालेनैकं नक्षत्रं भुनक्ति स कालश्च त्रयोदश कूनि रविसावनदिनानि अह्नो दिनस्य पञ्च नवभागाश्च । १३ $\frac{५}{९}$ एतैः सावनदिनै रविरेकभं भुनक्तीत्यर्थः । पञ्चभिर्गुर्वक्षरैरेका काष्ठा भवति ।

अत्रोपपत्तिः । यदि युगचन्द्रनक्षत्रैः १८०९ युगभूदिनानि १८३० लभ्यन्ते तदैकेन नक्षत्रेण किम् । लब्धमेकनक्षत्रे सावनदिनमानम् = $\frac{१८३०}{१८०९}$ = १ + $\frac{२१}{१८०९}$ = १ + $\frac{७}{६०३}$ = १ दिनम् + ७ कलाः । एवं युगरविनक्षत्रैः १३५ युगसावनदिवसास्तदैकेन रविनक्षत्रेण किं लब्धान्येकनक्षत्रे भूदिनानि = $\frac{१८३०}{१३५}$ = $\frac{१२२}{९}$ = १३ $\frac{५}{९}$ । पञ्चगुर्वक्षरैरेका काष्ठेति परिभाषा काष्ठातोऽपि सूक्ष्मगणनार्थं कृताऽऽचार्येणेति सर्वमुपपन्नम् । अत्र बार्हस्पत्यव्याख्यानं सर्वं समीचीनं किन्तु तच्छोधितः "ससप्तकम्" इति पाठो मन्मते न साधुरिति ॥ ३९ ॥

यदुत्तरस्यायनतो गतं स्या-
च्छेषं तथा दक्षिणतोऽयनस्य ।
तदेव(१) षष्ठ्या द्विगुणं विभक्तं
सद्वादशं स्याद् दिवसप्रमाणम् ॥ ४० ॥

सोमाकरः—यदुत्तरस्येति । यदुत्तरस्यायनत उत्तरायणादारभ्य यद्गतं स्याद्यावद्दिनं गतमतीतं भवेत् । शेषं तथा दक्षिणतोऽयनस्य ।

(१) तदेकषष्ठ्या इति पाठः साधुः ।

एवमेव दक्षिणायने शेषं विचारयेत् । तदेव संख्याय द्विगुणं कुर्यादिति वाक्यशेषः । ततः षष्ट्या विभक्तं सद्वादशं दिवसप्रमाणं स्यात् । एतदुक्तं भवति । [१](उदगयने चतुर्विंशतिनाडिका च एका च द्वाविंशतिर्दिनं भवति । ततो मासगते त्रिंशत्सु दिवसेषु त्रिंशद् द्विगुणा षष्टिर्भवति । ते च वर्षकालेश्च षष्टिर्घटिका भवन्ति । पञ्चमासे मासार्धं पञ्चविंशतिनाडिकाः । ते च द्वादश एवमेव सद्वादशं स्याद् दिवसप्रमाणम् । एवमेतयैव कलनया) द्वयोर्मासयोरन्ते ततोऽभ्यधिके द्वे नाडिके अतिरिच्येते । त्रिपञ्चाशिकाः । एवं विषुवति त्रिंशन्नाडिकं दिनं भवति । उत्तरेष्वेतेनैव क्रमेण ह्रासं कल्पयेत् । ततो वक्ष्यति 'ज्ञेयराशिं गताभ्यस्तं विभजेज्ज्ञानराशिने'ति । तस्मादिह यत् सूचितं तदन्यज्ज्योतिःशास्त्रमपेत्य प्रकल्प्यमेवं तु ॥ ४० ॥

सुधाकरः—इदानीं दिनमानमानयति यदुत्तरस्येति । अयनतोऽयनारम्भदिनादुत्तरस्यायनस्य यद्गतं भूदिनमानं भवेत् तथा दक्षिणतो दक्षिणायनारम्भदिनादयनस्य दक्षिणायनस्य यद्गतं भूदिनमानं तदयनान्तर्गतकुदिनमानात् प्रोह्य यच्छेषं दिनमानं तद् द्विगुणं फलमेकषष्ट्या विभक्तं लब्धं सद्वादशं द्वादशमुहूर्त्तसहितं तदा मुहूर्त्तात्मकं दिनमानं भवति ।

अत्रोपपत्तिः । अष्टमश्लोकभाष्ये पूर्वमेव प्रतिपादितं यदुत्तरायणारम्भे द्वादशमुहूर्त्ततुल्यं दिनमानं षण्मासान्तरे दक्षिणायनारम्भे चाष्टादशमुहूर्त्तमानं तदन्तरं षड् मुहूर्त्तास्ततोऽनुपातो यदि षण्मासकुदिने-

(१) उदगयने चतुर्विंशतिर्नाडिका दिनमानम् । एका नाडिका च त्रिंशद्भिर्दिनै-र्भवति । ततो मासगते त्रिंशत्सु दिवसेषु द्विगुणा षष्टिः षष्टिकृता नाडीद्वयं पूर्वागतनाड्या सहितं नाडीत्रयं भवति । विषुवकाले च त्रिगुणा षष्टिः षष्टिकृता नाडीत्रयं पूर्वनाडीत्रयसहितमेवं षट् घटिका भवन्ति । एवमन्यपञ्चमासेषु मासार्धं पञ्चदशदिनैरेका नाडिकेति पञ्चनाडिकाः षष्ठे मासे चैका ताश्च द्वादश । एवमेव सद्वादशं स्याद्दिवसप्रमाणम् । एवमेतयैव कलनया एकस्मिन् मासे एका) इति पाठः साधुर्विभाति । एवं सोमाकरेण नाडीरूपं प्रतिमासं द्विगुणचरखण्डमानीय योजनेनेष्टमासे नाड्यात्मकं द्विगुणचरमानीतमिति प्रतिभाति ।

१८३ रवेः षड्मुहूर्त्तसममन्तरं तदोत्तरायणगतकुदिनैर्वा दक्षिणायनशेष-कुदिनैः किं लब्धमन्तरम् $= \frac{६ \times कुदि}{१८३} = \frac{२ कुदि}{६१}$ इदं द्वादशयुक्तं जातं दिवसमानम् । इत्युपपन्नम् । इदं सर्वं पञ्चसिद्धान्तिकाप्रकाशिकायां पैतामहसिद्धान्तप्रकरणेऽस्माभिः प्रदर्शितमेवेति ॥ ४० ॥

यदर्धं दिनभागानां सदा पर्वणि पर्वणि ।
ऋतुशेषं तु तद् विद्यात् संख्या[1]य सह पर्वणाम् ॥ ४१ ॥

सोमाकरः—यदर्धं दिनभागानामिति । यदर्धं दिनभागानां द्वाषष्ट्यंशकल्पनया यदर्धं लुप्तमित्यर्थः । तदेकत्र कलयेदिति वाक्यशेषः । सदा पर्वणि पर्वणि । तत् सदा एकत्रिंशत्काष्ठिका भवति । 'द्व्रेयं यत्रे चेत् पाद' इत्युक्तम् । ततः किम् । ऋतुशेषं तु तद् विद्यात् । मासद्वये व्यतीते दिवसमेकमतिरिच्यते । एवं संख्याय संकलय्य पर्वणां सर्वेषां ततोऽधिकमासनिर्वृत्तिरिति वाक्यशेषः ।

तथा च गर्गः ।

द्विलवचयसम्भूता द्वाषष्टिर्भवते तिथिः ।
ऋतोरन्तमनुप्राप्य हीनरात्रेति नामतः ॥ इति ॥ ४१ ॥

सुधाकरः—इदानीमृतुशेषानयनमाह यदर्धमिति । पर्वणि पर्वणि सदा दिनभागानां चान्द्रदिनभागानामर्धं यच्छेषं तच्चान्द्रसौरपर्वान्तरं पर्वणां संख्यया पर्वगणेन सह यदागच्छेत् तदिष्टपर्वसमये रविचन्द्रप्रक्रान्तरसममृतुशेषं विद्याज्जानीयाद्बुधक इति शेषः । पर्वगणा इष्टपर्वभवेन रविचन्द्रपर्वान्तरेण दिनार्धतुल्येन गुण्यः फलमभीष्टसमये ऋतुशेषं भवतीत्यर्थः । मन्मते अधिशेषस्य ऋतुशेषमिति नामकरणे फले विशेषाभावात् ऋतुशेषपाठे न क्षतिर्द्वार्निरिति ।

अत्रोपपत्तिः । त्रयोदशश्लोकेन रूपतुल्ये पर्वणि पर्वात्मकमधिशेषमानम् $= \frac{१}{६०}$ । इदं पञ्चदशगुणं जातं चान्द्रदिनात्मकमधिशेषम्

(१) संख्यया इति पाठः साधुः ।

$= \frac{2 \times 15}{60} = \frac{1}{2}$ । इदं पर्वगणगुणमभीष्टचान्द्रसौरपर्वान्तरकर्पमधिशेषं भवतीति । सौरपर्वान्ते ऋतुसमाप्तिः । चन्द्रपर्वतोऽग्रेऽधिशेषान्तरे रविपर्वसमाप्तिरतः पूर्वागतमधिशेषं चान्द्रदिनात्मकमृतुशेषं भवितुं योग्यमिति । अत्र बार्हस्पत्यव्याख्यानं प्रायः समीचीनमेव ॥ ४१ ॥

इत्युपायसमुद्देशो भूयो[1]ऽप्यह्नः प्रकल्पयेत् ।
ज्ञेयराशिं गताभ्यस्तं विभजेज्ज्ञानराशिना ॥ ४२ ॥

सोमाकरः—इत्युपायसमुद्देश इति । इत्युपायसमुद्देशः एवमुक्तप्रकारेण यागकाललवणप्रतिपादने भूयोऽप्यह्नः प्रकल्पयेत् पौनःपुन्येनोद्देत् सर्वकर्मसु । कथम् । ज्ञेयराशिं गताभ्यस्तं पदार्थान् सूचितार्थान् संक्षेपार्थान् तान् विभजेज्ज्ञानराशिना । ज्ञानं बुद्धियोगः । ऊहापोहसामर्थ्येन अन्यानि ज्योतिःशास्त्राण्यपेक्ष्य । कथम् । अभ्यस्तं तत उद्धृत्य यथार्थमवगत्याऽऽगमेन च कल्पयेत् सर्वमित्यर्थः । यथा मुहूर्तनाडिकाकलाकाष्ठाद्यवकल्पनं तथैव दिवसप्रमाणमिति ॥ ४२ ॥

सुधाकरः—इदानीं वेधोपायमाह इतीति । इत्येव पूर्वोदितविधिना उपायसमुद्देशो वेधोपायोपदेश एव बोध्यः । वेधेन ज्ञातराशौ गतं प्राप्तं कर्मापि पदार्थं विज्ञाय ततो ज्ञेयराशौ तत्पदार्थानयनार्थं गणको ज्ञानराशिसंबन्धिगतेन पदार्थेनाभ्यस्तं गुणितं ज्ञेयराशिं ज्ञानराशिना विभजेत् फलं ज्ञेयराशिसंबन्धि तत्पदार्थमानं भवति । एवं ज्ञानराशिना भूयः पुनः पुनः सर्वान् सावनदिवसादीन् प्रकल्पयेदिति ।

अत्रोपपत्तिः । ज्ञेयराशिरिच्छाराशिस्ततस्त्रैराशिकेन वासना स्फुटा ॥ ४२ ॥

इत्येतन्मासवर्षाणां मुहूर्तोदयपर्वणाम् ।
दिनर्त्वयनमासानां व्याख्यानं लगधोऽब्रवीत् ॥

(१) भूयोऽप्येवं प्रकल्पयेत्-इति पाठः साधुः ।

Digitized by Google

सुधाकरः—इदानीमुपसंहरति इतीति । इति एवमेतत् पूर्वोक्तं मासवर्षेणां मुहूर्तानामुदयपर्वणां चन्द्रादीनामुदयानां सावनदिनानां पर्वणां दिन-ऋतु-अयनानां मासानां चान्द्रार्काणां च व्याख्यानं लगधोऽब्रवीत् । तदेवाहं चोक्तवानिति ज्योतिषवेदाङ्गरचयितुरुक्तिरिति । इदं पद्यं सोमाकरभाष्ये नास्तीति ॥

सोमसूर्यस्तृचरितं विद्वान् वेद विदश्नुते ।
सोमसूर्यस्तृचरितं लोकं लोके च सन्ततिम् ॥ ४३ ॥

सोमाकरः—एवमुपसंहृत्य विज्ञानफलमाह सोमसूर्यस्तृचरितमिति । सोमसूर्यनक्षत्राणां चरितं गतागतविज्ञानं यो वेद जानाति सोऽश्नुते प्राप्नोति । किम् । सोमसूर्यनक्षत्रचरितं लोकं तत्सायुज्यमित्यर्थः । अथेह लोके च सन्ततिमनवच्छिन्नसन्तानसिद्धिं स्वर्गलोकवान् प्रजावान् भवतीत्यर्थः । अभ्यासः शास्त्रनिष्पत्तये स च पक्षमासतिथिचन्द्रगतिज्ञानार्थार्त्विज्ययोग्यत्वाच्च पङ्क्तिपावन एव । एतत्तु विदग्धसांवत्सराणां तिथिज्ञानफलं वृथाभिमानिनां स्वसर्वज्ञानां वृथोपदेशिनां वृथानुष्ठानप्रवर्त्तकानामकालयागकालचोदनादकालयागप्रवर्त्तकत्वादोपमन्युवादिवन्मूर्धपातादिदोषपरम्परा 'नक्षत्रैर्यश्च जीवती'त्यश्रद्धेयत्वं तथा प्रदोषशापकत्वाच्च परत्रापर्यवसितिः ।

तथा च स्मृतिः ।

> दुरिष्टैर्दुरधीतैश्च दुराचारैर्दुरागमैः ।
> विप्राणां कर्मदोषैस्तैः प्रजानां जायते भयम् ॥ इति ।

तस्मात् तथा यागकर्मणि वर्त्तितव्यं यथोपक्रमापवर्गावुभावपि न नश्यतः । अभ्युदितेष्टिदर्शनादकालोपक्रमदोषः । उपसत्समासदर्शनादकालापवर्गदोषः । तथा पुरा द्वादशाः पुरा दीक्षिताय द्वादशामिति वदन्तं न धीयेतेति श्रुतिः? । तदेतदेवार्थमभिप्रेत्य सूत्रकारः पूर्णमासीमुपवसेददर्शनेऽमावास्यायामित्याह । तथा च श्रुतिः । य एवासा आग्नेयोऽष्टाकपालः पौर्णमासे योऽमावास्यायां तमम्नये पथिकृते कुर्यादिति तस्मा-

वकाल उपक्रमापवर्गयोरेवैते ह्यपार्थके भवतस्तस्माद्विचार्ये यतस्ते ह्यसुरा-ह्ययज्ञा ह्यनृचा यत् किं चाकुर्वत तां कृत्यामेवाकुर्वतेति श्रुतेः । तस्मा-दुभयकालानुरोधवशादेकाङ्गवैकल्यम् । अपि च शास्त्रादौ प्रवृत्तिर्येषामभि-प्रेता परिशिष्टवाक्यानुरोधवशात् 'चतुर्दश्यवसाने तु पितृयज्ञं तु कारये-दि'ति वाक्यैर्योगस्तच्च न कर्त्तव्य इत्यपेक्षमेव ।

तथा च गर्गः ।

चतुर्दश्यां यदा कृष्णे क्षयमभ्येति चन्द्रमाः ।
दृश्यो भवति वाप्युच्चः सिनीवाल्यास्ततस्तदा ॥
निश्युद्गतोऽथवाऽप्युच्चो ह्यस्तं वाप्युपगच्छति ।
ततः पूर्वोऽप्यृतौ ह्येतत् कार्यं चन्द्रवशाद्बुधैः ॥ इति ।

यद्यप्येवं तथापि य एवासा आग्नेयोष्टाकपाल इति श्रुतेरस्ति गौणत्वमेवं प्रतीयते । अन्यथैषा श्रुतिरेव न स्यात् येषां तु सूत्रकारो विकल्पेनाह । पूर्वां पौर्णमासीमुपवसेदुत्तरां वेत्यादि कात्यायनसूत्रा-पेक्षावशेन स्वेच्छया प्रवृत्तिरिह तु सूत्रकारस्य प्रवर्त्तितेह प्रतिज्ञा पूर्वा इत्याद्या । तस्मादेतत् सुतरां विचार्यम् ॥ ४३ ॥

मयोक्तमेतत् सकलं विदित्वा यागात् फलं प्राप्नुयुश्चोदितं यत् ।
निर्मत्सरश्रौतकर्मप्रवृत्ता दोषान् बहून् प्राप्नुयुरन्यथान्ये ॥ १ ॥
मया कृतं भाष्यमस्य स्वबुद्ध्या यस्माच्चाप्तमागमं पूज्यमानम् ।
तस्माच्छेषं तद्विदः कल्पयन्तु नमस्तेभ्यो ब्रह्मसूर्येन्दुभेभ्यः ॥ २ ॥
(१)सोमाकरो वेदविदुक्तकान्तप्रातिभज्ञानागमभावबुद्धिः ।
ज्योतिःशास्त्रानाकुलकेन संसा जिह्वात् सर्वमात्मनां प्रव्रजिष्यन् ॥ ३ ॥
इति (२)शेषकृतं ज्योतिःशास्त्रभाष्यं समाप्तम् ।

सुधाकरः—इदानीं ज्योतिषवेदाङ्गविदं स्तौति सोमेति । सोम-सूर्यस्तृचरितं चन्द्रसूर्यनक्षत्रचरितं यो विद्वान् वेद जानाति स विद्

(१) सोमाकरो वेदविदुक्तकान्तप्रातिभज्ञानागमभावबुद्धिः । ज्योतिःशास्त्रा-नाकुलकः प्रशंस जिह्वायात् सर्वमात्मनां प्रव्रजिष्यन् ॥ इति पाठः साधुः ।
(२) इति श्रीशेषनागकृतं ज्योतिःशास्त्रभाष्यं समाप्तम्—इति पाठान्तरम् ।

विद्वान् सोमसूर्यस्तृचरितं चन्द्रसूर्यनक्षत्रैश्चरितं प्रचरितं प्रसिद्धं लोकं चन्द्रलोकं सूर्यलोकं नक्षत्रलोकं वाश्नुते तत्र गत्वा तत्सुखं भुङ्क्ते लोके इह संसारे च सन्ततिमश्नुते पुत्रपौत्रादिकं च लभते इति ॥ ४३ ॥

श्रीरामं जनकामनाकरमरं सीतासमेतं वरं
श्रीमल्लक्ष्मणलाललालितपदं कन्दर्पमायाहरम् ।
नत्वा कोशलपालमेव विमलं दृग्ज्योतिषस्य श्रितं
बार्हस्पत्यमतं विचिन्त्य सकलं भाष्यं मयैतत् कृतम् ॥

इति सुधाकरद्विवेदिकृतं ज्योतिःशास्त्रभाष्यं समाप्तम् ॥

५२६

Digitized by Google

श्रीजानकीवल्लभो विजयते ।

अथ

सुधाकरभाष्यसहितम्-

आर्चज्यौतिषम् ।

श्रीरामं सीतया सार्धं रत्नसिंहासनस्थितम् ।
नत्वा कुरु मनः कार्ये सफलं सकलं किल ॥

निर्विघ्नार्थमादौ मङ्गलमाचरति ।

पञ्चसंवत्सरमय-युगाध्यक्षं प्रजापतिम् ।
दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा शुचिः ॥ १ ॥

अस्य भाष्यं याजुषज्यौतिषप्रथमश्लोकवदिति स्फुटम् ॥१॥

प्रणम्य शिरसा कालमभिवाद्य सरस्वतीम् ।
कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः ॥ २ ॥

शिरसा कालं कालपुरुषं रविं प्रणम्य सरस्वतीमभिवाद्य अभिवन्द्य लगधस्य महात्मनो महर्षेः कालज्ञानमहं शुचिः प्रवक्ष्यामि वच्मीति । लगधः कश्चित् प्राचीनो महर्षिस्तेन पञ्चवर्षात्मके युगे यथा कालानां रविचन्द्रसावनदिनादीनां ज्ञानं कृतं तथा तदानयनमहं शुचिर्वच्मीत्यर्थः ॥२॥

इदानीं किं ब्रवीमीत्याह ।

ज्योतिषामयनं कृत्स्नं प्रवक्ष्याम्यनुपूर्वशः ।
विप्राणां सम्मतं लोके यज्ञकालार्थसिद्धये ॥ ३ ॥

ज्योतिषां सूर्यचन्द्रनक्षत्राणामयनं चलनं कृत्स्नं सकलं विप्राणां ज्योतिर्विदां सम्मतं स्वीकृतमनुपूर्वशो यथाक्रमं लोके संसारे यज्ञकालार्थसिद्धये वक्ष्यामीति स्फुटम् । याजुषात् किञ्चित् पाठभेदः ॥ ३ ॥

Digitized by Google

इदानीं पर्वगणानयनमाह ।

निरेकं द्वादशाभ्यस्तं द्विगुणं गतसंयुतम् ।
षष्ट्या षष्ट्या युतं द्वाभ्यां पर्वणां राशिरुच्यते ॥ ४ ॥

याजुषत्रयोदशश्लोकोऽयमतस्तदेव भाष्यादिकं स्फुटम् ॥ ४ ॥

इदानीं युगादिमाह ।

स्वराक्रमेते सोमार्कौ यदा साकं सवासवौ ।
स्यात् तदादियुगं माघस्तपःशुक्लोऽयनं ह्युदक् ॥ ५ ॥

याजुषस्य षष्ठश्लोकोऽयमतस्तद्भाष्यमेव द्रष्टव्यम् ॥ ५ ॥

इदानीमयनयोरादिमाह ।

प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुदक् ।
सार्पार्धे दक्षिणाऽर्कस्य माघश्रावणयोः सदा ॥ ६ ॥

याजुषसप्तमश्लोकेन सर्वं स्फुटमिति ॥ ६ ॥

इदानीं दिनरात्रिमानमाह ।

घर्मवृद्धिरपां प्रस्थः क्षपाह्रास उदग्गतौ ।
दक्षिणेतौ विपर्यासः षण्मुहूर्त्त्ययनेन तु ॥ ७ ॥

याजुषाष्टमश्लोकेन भाष्यादिकं स्फुटम् ॥ ७ ॥

इदानीमयनाद्यमाह ।

प्रथमं सप्तमं चाहुरयनाद्यं त्रयोदशम् ।
चतुर्थं दशमं चैव द्वियुग्मं बहुलेऽप्यृतौ ॥ ८ ॥

याजुषनवमश्लोकभाष्यादिना स्फुटम् ॥ ८ ॥

इदानीमयनादिनक्षत्रदेवता ऋतुमानयनं चाह ।

वसुस्त्वष्टा भवोऽजश्च मित्रः सर्पोऽश्विनौ जलम् ।
अर्यमा कोऽयनाद्याः स्युरर्धपञ्चमभस्त्वृतुः ॥ ९ ॥

याजुषदशमश्लोकभाष्यादिना सर्वं स्फुटम् ॥ ९ ॥

इदानीमभीष्टपर्वणि चन्द्रभांशानयनमाह ।

भांशाः स्युरष्टकाः कार्याः पक्षा द्वादशकोद्गताः ।
एकादशगुणाश्चोनः शुक्लेऽर्धं चैन्दवा यदि ॥ १० ॥

याजुषपञ्चदशश्लोकभाष्यादिना सर्वं स्फुटम् ॥ १० ॥

इदानीं पर्वस्थि भांशकलानयनमाह ।

कार्या भांशाष्टकास्थाने कला एकान्नविंशतिः ।
ऊनस्थाने द्विसप्ततिमावपेद्दिनसंयुताम् ॥ ११ ॥

याजुषैकोनविंशश्लोकभाष्यादिना सर्वं स्फुटम् ॥ ११ ॥

इदानीं नक्षत्रसंबन्धिभूदिनान्याह ।

अयंशो भशेषो दिवसस्य भाग-
श्चतुर्दशस्याप्यपनीय भिन्नम् ।
भार्धेऽधिके वाऽल्पगते परोऽंशो
यावुक्तमेतन्नवकैर्भवेद्यः ॥ १२ ॥

याजुषसप्तविंशश्लोकभाष्यादिना सर्वं स्फुटम् ॥ १२ ॥

इदानीं तिथिनक्षत्रे संस्कारविशेषमाह ।

पश्चात् पञ्चदशाच्चोर्ध्वं तद्भुक्तमिति निर्दिशेत् ।
नवभिस्तूद्गतोऽंशः स्याद्युक्तांशो ह्यद्रिकेन तु ॥ १३ ॥

पश्चात् पञ्चदशात् पञ्चदशतिथ्यात्मकादूर्ध्वं शुक्लपक्षावसाने इत्यर्थः । याजुषविंशश्लोकप्रकारेण योऽंशस्तिथिभांशः समागतः स नवभिरंशैरुद्गतो वर्धनीयस्तदा युक्तांशो वास्तवभांशः स्यात् । तद्भांशमानं च भुक्तमिति निर्दिशेत् कथयेद्गणक इति शेषः । यदि नक्षत्रवशेन सावनदिनमपेक्षितं तदा तु ह्यद्रिकेन द्युना एकेन कुदिनेन तथाऽद्रिकेन सप्तकलामितेन प्रतिनक्षत्रसंबन्धि कुदिनं ज्ञेयमिति । अत्र याजुषविंशश्लोकत्रुटिर्वा प्रक्षिप्तत्वादत्र स श्लोक उपेक्षित आचार्येण ॥ ।

अत्रोपपत्तिः सप्तैकमिति याजुषैकोनचत्वारिंशश्लोकोपपत्त्या तथा "नवकैरुद्गतोऽंशः स्याद्युक्तः सप्तगुणो भवेत्"—इति याजुषषोडशश्लोकभाष्यादिना स्फुटेति ॥ १३ ॥

इदानीं लाघवेन नक्षत्रनामान्याह ।

जौ द्रा गः खे श्वे ही रो षा-
श्चिन्मूषकूण्यः सू मा धा णः ।
रे मृ (म्रे) घाः स्वापो जः कृ ष्यो
ह ज्ये ष्ठा इत्यृक्षा लिङ्गैः ॥ १४ ॥

याजुषाष्टादशश्लोकभाष्यादिना सर्वं स्फुटम् ॥ १४ ॥

इदानीं भांशतो नक्षत्रानयनं पर्वणि विशेषं चाह ।

जावाद्यंशैः समं विद्यात् पूर्वार्धे पर्व तूत्तरे ।
भादानं स्याच्चतुर्दश्यां द्विभागेभ्योऽधिके यदि ॥१५॥

याजुषसप्तदशश्लोकभाष्यादिना स्फुटम् ॥ १५ ॥

इदानीं नाडिकादिपरिभाषा आह ।

कला दश च विंशा स्याद् द्वे मुहूर्त्तस्य नाडिके ।
त्रिंशद् द्यु कलानां तु षट्शती त्र्यधिका भवेत् ॥१६॥

दश कला विंशा च एककलाविंशतिभागाधिका इत्यर्थः । शेषं याजुषाष्टात्रिंशश्लोकभाष्येण स्फुटम् ॥ १६ ॥

पुनः परिभाषान्तरमाह ।

नाडिके द्वे मुहूर्त्तस्तु पञ्चाशत्पलमाढकम् ।
आढकात् कुम्भिका द्रोणः कुडवैर्वर्धते त्रिभिः ॥१७॥

द्वे नाडिके एको मुहूर्त्तो भवति । आढकं तु पञ्चाशत्पलं भवति । आढकात् प्रसिद्धप्राचीनपरिभाषया कुम्भिका घटिका ज्ञेया । द्रोणश्च कुम्भिकातस्त्रिभिः कुडवैर्वर्धतेऽर्थात् कुम्भिकाप्रमाणात् त्रिभिः कुडवैरधिकं द्रोणप्रमाणं भवति । अतो द्रोणस्त्रिभिः कुडवैर्हीना घटिका वा नाडिका भवतीति याजुषैकोनचत्वारिंशश्लोकभाष्येण सर्वं स्फुटम् ॥ १७ ॥

इदानीं चन्द्रसूर्यैकनक्षत्रे भूदिनान्याह ।

ससप्तैकं भयुक् सोमः सूर्यो द्यूनि त्रयोदश ।
नवमानि च पञ्चाह्नः काष्ठा पञ्चाक्षरा स्मृता ॥१८॥

Digitized by Google

संस्कारकद्रव्यवाचकं तृतीयान्तमन्नेन प्राग्वत् ॥ दध्ना ओदनो दध्योदनः । इहान्तर्भूतोपसेकक्रियाद्वारा सामर्थ्यम् ॥

भक्ष्येण मिश्रीकरणम् । २ । १ । ३५ ॥

खरविशदमभ्यवहार्यं भक्ष्यम् । गुडेन धानाः गुडधानाः । मिश्रणक्रियाद्वारा सामर्थ्यम् ॥

चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः । २ । १ । ३६ ॥

चतुर्थ्यन्तार्थाय यत्तद्वाचिना अर्थादिभिश्च चतुर्थ्यन्तं प्राग्वत् ॥ तदर्थशब्देन प्रकृतिविकृतिभाव एव । बलिरक्षितग्रहणाज्ज्ञापकात् । यूपाय दारु यूपदारु । नेह रन्धनाय स्थाली । अश्वघासादयस्तु षष्ठीसमासाः ॥ अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम् ॥ * ॥ द्विजायायं द्विजार्थः सूपः । द्विजार्था यवागूः । द्विजार्थं पयः । भूतबलिः । गोहितम् । गोसुखम् । गोरक्षितम् ।

पञ्चमी भयेन । २ । १ । ३७ ॥

चोराद्भयम् । चोरभयम् ॥ भयभीतभीतिभीभिरिति वाच्यम् ॥ * ॥ वृकभीतः ॥

अपेतापोढमुक्तपतितापत्रस्तैरल्पशः । २ । १ । ३८ ॥

एतैः सहाल्पं पञ्चम्यन्तं समस्यते स तत्पुरुषः ॥ सुखापेतः । कल्पनापोढः । चक्रमुक्तः । स्वर्गपतितः । तरङ्गापत्रस्तः । अल्पशः किम् । प्रासादात्पतितः ॥

स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन । २ । १ । ३९ ॥

स्तोकान्मुक्तः । अल्पान्मुक्तः । अन्तिकादागतः । अभ्याशादागतः । दूरादागतः । विप्रकृष्टादागतः । कृच्छ्रादागतः ॥ पञ्चम्याः स्तोकादिभ्य इत्यलुक् ॥

Digitized by Google

सप्तमी शौण्डैः । २ । १ । ४० ॥

सप्तम्यन्तं शौण्डादिभिः प्राग्वद्वा ॥ अक्षेषु शौण्डो ऽक्षशौण्डः । अधिशब्दोऽत्र पठ्यते ॥ अध्युत्तरपदादिति खः । ईश्वराधीनः ॥

सिद्धशुष्कपक्वबंधैश्च । २ । १ । ४१ ॥

एतैः सप्तमी प्राग्वत् ॥ सांकाश्यसिद्धः । आतपशुष्कः । स्थालीपक्वः । चक्रबन्धः ॥

ध्वांक्षेण क्षेपे । २ । १ । ४२ ॥

ध्वांक्षवाचिना सह सप्तम्यन्तं प्राग्वन्निन्दायाम् । तीर्थे ध्वांक्ष इव तीर्थध्वांक्षः । तीर्थकाकः । क्षेपे किम् । तीर्थे ध्वांक्षस्तिष्ठति ॥

कृत्यैर्ऋणे । २ । १ । ४३ ॥

सप्तम्यन्तं कृत्यप्रत्ययांतैः सह प्राग्वदावश्यके ॥ मासेदेयमृणम् । पूर्वाह्णेगेयं साम । ऋणे किम् । मासे देया भिक्षा । यत्प्रत्ययान्तेनैवेष्यते । नेह । पूर्वाह्णे दातव्या भिक्षा ।

संज्ञायाम् । २ । १ । ४४ ॥

सप्तम्यन्तं सुपा प्राग्वत्संज्ञायाम् । वाक्येन संज्ञानवगमान्नित्यसमासोऽयम् । अरण्येतिलकाः । वनेकसेरुकाः । हलदन्तादित्यलुक् ॥

क्तेनाहोरात्रावयवाः । २ । १ । ४५ ॥

अह्नो रात्रेश्चावयवाः सप्तम्यन्ताः क्तान्तेन सह प्राग्वत् ॥ पूर्वाह्णकृतम् । अपररात्रकृतम् । अवयवग्रहणं किम् । अन्हि दृष्टम् ॥

तत्र । २ । १ । ४६ ॥

Digitized by Google

तत्रेत्येतत्सप्तम्यन्तं क्तान्तेन सह प्राग्वत् ॥ तत्रभुक्तम् ।

क्षेपे । २ । १ । ४७ ॥

सप्तम्यन्तं क्तान्तेन प्राग्वन्निन्दायाम् । अवतप्तेनकुलस्थितं त एतत् ॥

पात्रे समिताद्यश्च । २ । १ । ४८ ॥

एते निपात्यन्ते क्षेपे ॥ पात्रेसमिताः । भोजनसमये एव सङ्गता न तु कार्ये । गेहेशूरः । गेहेनर्दी । आकृतिगणोऽयम् । चकारोऽवधारणार्थः । तेनेषां समासान्तरे घटकतया प्रवेशो न । परमाः पात्रेसमिताः । ये चात्र क्तान्तेन समस्तास्तेषां पूर्वेणैव सिद्धे पुनः पाठो युक्तारोह्यादिषु परिग्रहार्थः । पूर्वपदाद्युदात्तत्वं यथा स्यादिति । युक्तारोह्यादिषु हि पात्रे समिताद्यश्चेति पठ्यते ॥

पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन । २ । १ । ४९ ॥

भिन्नप्रवृत्तिनिमित्तप्रयुक्तस्य शब्दस्यैकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम् । विशेषणं विशेष्येणेति सिद्धे पूर्वनिपातनियमार्थं सूत्रम् । एकशब्दस्य दिक्संख्ये संज्ञायामिति नियमबाधनार्थं च । पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः । एकनाथः । सर्वयाज्ञिकाः । जरन्नैयायिकाः । पुराणमीमांसकाः । नवपाठकाः । केवलवैयाकरणाः ॥

दिक्संख्ये संज्ञायाम् । २ । १ । ५० ॥

समानाधिकरणेनेत्यापादपरिसमाप्तेरधिकारः । संज्ञायामेवेति नियमार्थं सूत्रम् । पूर्वेषुकामशमी । सप्तर्षयः । नेह । उत्तरा वृक्षाः । पञ्च ब्राह्मणाः ।

तद्धितार्थोत्तरपदसमाहारे च । २ । १ । ५१ ॥

तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्वद्वा ॥ पूर्वस्यां शालायां भवः पौर्वशालः । समासे कृते दिक्पूर्वपदादसंज्ञायां ञ इति ञः । सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः । आपरशालः । पूर्वा शाला प्रिया यस्येति त्रिपदे बहुव्रीहौ कृते प्रियाशब्दे उत्तरपदे पूर्वयोस्तत्पुरुषः । तेन शालाशब्दे आकार उदात्तः । पूर्वशालाप्रियः । दिक्षु समाहारो नास्त्यनभिधानात् । संख्यायास्तद्धितार्थे । षण्णां मातॄणामपत्यं षाण्मातुरः । पञ्च गावो धनं यस्येति त्रिपदे बहुव्रीहाववान्तरतत्पुरुषस्य विकल्पे प्राप्ते । द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम् ॥ * ॥ पञ्चगवधनः । द्वन्द्वोदाहरणं वाक् च दृषच्च प्रिये अस्य वाक्दृषदप्रियः । पञ्चानां गवां समाहारः पञ्चगवम् ॥

संख्यापूर्वो द्विगुः । २ । १ । ५२ ॥

तद्धितार्थेत्यत्रोक्तः संख्यापूर्वो द्विगुसंज्ञः स्यात् । पञ्चगवम् । द्विगुप्रदेशा द्विगुरेकवचनमित्येवमादयः ॥

कुत्सितानि कुत्सनैः । २ । १ । ५३ ॥

कुत्स्यमानानि कुत्सनैः सह प्राग्वत् ॥ वैयाकरणखसूचिः । मीमांसकदुर्दुरूढः । कुत्सितानि किम् । वैयाकरणश्चोरः । नह्यत्र वैयाकरणत्वं कुत्सितम् । शब्दप्रवृत्तिनिमित्तकुत्सायामेवास्येष्टत्वात् । कुत्सनैः किम् । कुत्सितो ब्राह्मणः ॥

पापाणके कुत्सितैः । २ । १ । ५४ ॥

पूर्वसूत्रापवादः । पापनापितः । अणककुलालः ॥

उपमानानि सामान्यवचनैः ।२।१।५५॥

घन इव श्यामो घनश्यामः। शस्त्रीव श्यामा शस्त्रीश्यामा। इह पूर्वपदं तत्सदृशे लाक्षणिकमिति सूचयितुं लौकिकविग्रहे इवशब्दः प्रयुज्यते। पूर्वनिपातनियमार्थं सूत्रम्। उपमानानि किम्। देवदत्ता श्यामा। सामान्यवचनैः किम्। पर्वता इव बलाहकाः॥

उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ।२।१।५६॥

उपमेयं व्याघ्रादिभिः सह प्राग्वत् साधारणधर्मस्याप्रयोगे सति॥ विशेष्यस्य पूर्वनिपातार्थं सूत्रम्। पुरुषव्याघ्रः। नृसोमः। व्याघ्रादिराकृतिगणः। सामान्यप्रयोगे किम्। पुरुषो व्याघ्र इव शूरः॥

विशेषणं विशेष्येण बहुलम् ।२।१।५७॥

भेदकं समानाधिकरणेन भेद्येन बहुलं प्राग्वत्॥ नीलमुत्पलं नीलोत्पलम्। बहुलग्रहणात्क्वचिन्नित्यम्। कृष्णसर्पः। क्वचिन्न। रामो जामदग्न्यः॥

पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च ।२।१।५८॥

पूर्वनिपातनियमार्थमिदम्। पूर्ववैयाकरणः। अपराध्यापकः। अपरश्चासावर्द्धश्च पश्चार्द्धः। अपरस्यार्द्धे पश्चभावो वक्तव्य इति पश्चादिति सूत्रस्थवार्तिकेन पश्चादेशः। प्रथमाध्यापकः। चरमाध्यापकः। जघन्याध्यापकः। समानाध्यापकः। मध्याध्यापकः। मध्यमाध्यापकः। वीरपुरुषः। कथमेकवीर इति पूर्वकालेकेति बाधित्वा परत्वादनेन समासे वीरैक इति हि स्यात्। बाहुलकाद्भविष्यति॥

श्रेण्यादयः कृतादिभिः । २ । १ । ५९ ॥

श्रेण्यादिषु च्व्यर्थवचनं कर्तव्यम् ॥ * ॥ अश्रेणयः श्रेणयः कृताः । श्रेणिकृताः ॥

क्तेन नञ्विशिष्टेनानञ् । २ । १ । ६० ॥

नञेव विशिष्टेन क्तान्तेनानञ् क्तान्तं समस्यते ॥ कृतं च तदकृतं च कृताकृतम् । नुडिटौ तद्भक्तत्वान्न भेदकौ । अशिता-नशितेन जीवति । क्लिष्टाक्लिशितेन वर्तते । नञेवेति किम् । सिद्धं च भुक्तं च ॥ कृतापकृतादीनामुपसंख्यानम् ॥ * ॥ कृतापकृतम् ॥ गतप्रत्यागतादीनाञ्चोपसंख्यानम् ॥ * ॥ गतप्रत्यागतम् ॥ शाकपा-र्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम् ॥ * ॥ शाकप्रियः पार्थिवः शाकपार्थिवः । देवब्राह्मणः ॥

सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः । २ । १ । ६१ ॥

सद्वैद्यः । महावैयाकरणः । परमपुरुषः । उत्तमपुरुषः । उत्कृष्टपुरुषः । पूज्यमानैः किम् । उत्कृष्टो गौः । पङ्कादुद्धृत इत्यर्थः ॥

वृन्दारकनागकुञ्जरैः पूज्यमानम् । २ । १ । ६२ ॥

गोवृन्दारकः । गोनागः । गोकुञ्जरः । पूज्यमानं किम् । सुषीमो नागः । व्याघ्रादेराकृतिगणत्वादेव सिद्धे सामान्यप्रयोगार्थं वचनम् ॥

कतरकतमौ जातिपरिप्रश्ने । २ । १ । ६३ ॥

कतरकठः । कतमकलापः । गोत्रं च चरणैः सहेति जाति-त्वम् । जातिपरिप्रश्ने किम् । कतरो भवतोर्देवदत्तः । कतमो भवतोर्देवदत्तः । कतमशब्दस्य जातिपरिप्रश्ने एव व्युत्पादितत्वा-

त्कतरशब्दस्यापि तदर्थवृत्तेरेव तत्साहचर्याद्ग्रहणे प्राप्ते एतत्साम-र्थ्यादेव कतमशब्दोऽन्यथापि वर्तते इति ज्ञायते ॥

किं क्षेपे । २ । १ । ६४ ॥

कुत्सितो राजा किंराजा । यो न रक्षति । क्षेपे किम् । को राजा पाटलिपुत्रे ॥

पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः । २ । १ । ६५ ॥

इभपोटा । पोटा स्त्रीपुंसलक्षणा । इभयुवतिः । अग्निस्तोकः । उदश्वित्कतिपयम् । गृष्टिः सकृत्प्रसूता । गोगृष्टिः । धेनुर्नवप्रसूतिका । गोधेनुः । वशा वंध्या । गोवशा । वेहद्गर्भघातिनी । गोवेहत् । बष्कयणी तरुणवत्सा । कठश्रोत्रियः । कठाध्यापकः । कठधूर्तः । जातिः किम् । देवदत्तः प्रवक्ता ॥

प्रशंसावचनैश्च । २ । १ । ६६ ॥

एतैः सह जातिः प्राग्वत् ॥ रूढिशब्दाः प्रशंसावचना मतल्लिकादयो गृह्यन्ते । गोमतल्लिका । गोमचर्चिका । गोप्रकाण्डम् । गवोद्धः । गोतल्लजः । प्रशस्ता गौरित्यर्थः । मतल्लिकादयो नियतलिङ्गा न तु विशेष्यनिघ्नाः । जातिः किम् । कुमारी मतल्लिका ॥

युवा खलतिपलितवलिनजरतीभिः । २ । १ । ६७ ॥

पूर्वनिपातनियमार्थं सूत्रम् । जरतीभिरिति स्त्रीलिङ्गनिर्देशः प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति ज्ञापनार्थः । युवा खलतिः युवखलतिः । युवतिः खलती युवखलतिः । युवपलितः । युववलिनः । युवजरती । युवत्यामेव जरतीधर्मोपलम्भेन तद्रूपारोपात्सामानाधिकरण्यम् ॥

कृत्यतुल्याख्या अजात्या । २ । १ । ६८ ॥

भोज्योष्णम् । तुल्यश्वेतः । सदृशश्वेतः । अजात्या किम् । भोज्य ओदनः । प्रतिषेधसामर्थ्याद्विशेषणसमासोऽपि न ॥

वर्णो वर्णेन । २ । १ । ६९ ॥

समानाधिकरणेन सह प्राग्वत् ॥ कृष्णसारङ्गः ॥

कुमारः श्रमणादिभिः २ । १ । ७० ॥

कुमारी श्रमणा कुमारश्रमणा । कुमाराध्यापकः । इह गणे श्रमणा प्रव्रजिता गर्भिणीत्यादयः स्त्रीलिङ्गाः पठ्यन्ते ॥

चतुष्पादो गर्भिण्या । २ । १ । ७१ ॥

गोगर्भिणी ॥ चतुष्पाज्जातिरिति वक्तव्यम् ॥ * ॥ नेह । काला्ली गर्भिणी । चतुष्पात् किम् । ब्राह्मणी गर्भिणी ॥

मयूरव्यंसकादयश्च । २ । १ । ७२ ॥

एते निपात्यन्ते ॥ मयूरो व्यंसको मयूरव्यंसकः । व्यंसको धूर्तः । छन्दसि । हस्तेगृह्य । पुनर्दाय । एहीडादयोऽन्यपदार्थे ॥ एहीड इति यस्मिन्कर्मणि तदेहीडम् । लडुत्तमपुरुषैकवचनस्य ईडादेशः । एहियवम् । अत्र योमित्यस्य यवादेशः । उद्धर कोष्ठादुत्सृज देहीति यस्यां क्रियायां सा उद्धरोत्सृजा । उद्धमविधमा । आख्यातमाख्यातेनेत्यनेन सिद्धे असातत्यार्थमिह पाठः । उदक् च अवाक् च उच्चावचम् । उच्चावचादेशोऽच । निश्चितञ्च प्रचितञ्च निश्चप्रचम् । निश्चितप्रचितयोर्निश्चप्रचादेशः । नास्ति किञ्चन यस्याकिञ्चनः । जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारञ्चाभिदधाति ॥ जहीत्येतत्कर्मणा बहुलं समस्यते आभीक्ष्ण्ये गम्ये समासेन चेत्कर्ताऽभिधीयते

Digitized by Google

इत्यर्थः। अहि जोडमिति य आह स अहिजोडः। अहिजानः। आख्यातमाख्यातेन क्रियासातत्ये॥ अश्नीत पिबतेत्येवं सततं यत्राभिधीयते सा अश्नीतपिबता। पचतभृज्जता। खादतमोदता। नास्ति कुतोऽपि भयं यस्य सोऽकुतोभयः। अन्यो राजा राजान्तरम्। अन्तरशब्दो भिन्नवाची। चिदेव चिन्मात्रम्। अत्रानुनासिकता निपातनात्। एवार्थमात्रशब्देनात्र समासः। मात्रं कार्त्स्न्येऽवधारणे इत्यमरः। अन्तरमात्रशब्दाभ्यां सह नित्यसमासः। मयूरव्यंसकादयश्चेति चकार एवकारार्थः। तेनैषां समासान्तरे घटकता नेति परमे। मयूरव्यंसक इत्याद्येव। मयूरव्यंसकादिराकृतिगणः॥

इत्योरम्भट्टविरचितायां व्याकरणदीपिकायां पाणिनिसूत्रवृत्तौ द्वितीयस्याध्यायस्य प्रथमः पादः॥

Digitized by Google

अथ द्वितीयस्याध्यायस्य
द्वितीयः पादः ।

पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे । २ । २ । १ ॥

अवयविना सह पूर्वादयः समस्यन्ते एकत्वसंख्याविशिष्टश्चे-दवयवी ॥ षष्ठीसमासापवादः । पूर्वं कायस्य पूर्वकायः । अपरकायः । अधरकायः । उत्तरकायः । एकदेशिना किम् । पूर्वं नाभेः कायस्य । एकाधिकरणे किम् । पूर्वश्छात्राणाम् । सर्वोऽप्येकदेशोऽह्ना सम-स्यते । संख्याविसायेति ज्ञापकात् । मध्याह्नः । सायाह्नः । केचित्तु सर्व एकदेशः कालेन समस्यते न त्वह्नेव । ज्ञापकस्य सामान्या-पेक्षत्वात् । तेन मध्यरात्रः । उपारताः पश्चिमरात्रगोचरा इत्यादि सिद्धमित्याहुः ॥

अर्द्धं नपुंसकम् । २ । २ । २ ॥

समांशवाच्यर्धशब्दो नित्यं क्लीबे स प्राग्वत् ॥ अर्द्धं पिप्पल्या अर्द्धपिप्पली । क्लीबे किम् । ग्रामार्द्धः । द्रव्यैक्य एव । अर्द्धं पिप्प-लीनाम् ॥

द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् । २ । २ । ३ ॥

एतान्येकदेशिना सह प्राग्वद्वा ॥ द्वितीयं भिक्षाया द्वितीयभिक्षा । तृतीयभिक्षा । चतुर्थभिक्षा । तुर्यभिक्षा । एकदेशिना किम् । द्वितीयं भिक्षाया भिक्षुकस्य । अन्यतरस्यांग्रहणसामर्थ्यात्पूरणगुणेति निषेधं बाधित्वा पक्षे षष्ठीसमासः । भिक्षाद्वितीयम् ॥

Digitized by Google

प्राप्तापन्ने च द्वितीयया । २ । २ । ४ ॥

पक्षे द्वितीयान्तेनेति समासः । प्राप्तो जीविकां प्राप्तजीविकः । जीविकाप्राप्तः । आपन्नजीविकः । जीविकापन्नः । इह सूत्रे द्वितीयया अ इति छित्त्वा अकारोऽपि विधीयते । तेन जीविकां प्राप्ता स्त्री प्राप्तजीविका । आपन्नजीविका ॥

कालाः परिमाणिना । २ । २ । ५ ॥

परिच्छेद्यवाचिना सुबन्तेन सह कालाः समस्यन्ते ॥ मासो जातस्य यस्य स मासजातः । द्व्यहजातः । द्वयोरह्नोः समाहारो द्व्यहः । द्व्यहो जातस्येति विग्रहः ॥ उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पुरुषस्योपसंख्यानम् ॥ * ॥ द्वे अहनी जातस्य यस्य द्व्यहजातः । अह्नोऽह्न इत्यह्नादेशः समासान्तः । पूर्वत्र तु न संख्यादेः समाहार इति तन्निषेधः ॥

नञ् । २ । २ । ६ ॥

नञ् सुपा समस्यते ॥ अब्राह्मणः । अर्थाभावेऽव्ययीभावेन सहायं विकल्पते । रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति अश्रुतायामसंहितमिति च भाष्यवार्तिकप्रयोगात् । तेनानुपलब्धिरविवादेऽविघ्नमित्यादि सिद्धम् ॥

ईषदकृता । २ । २ । ७ ॥

ईषत्पिङ्गलः ॥ ईषद्गुणवचनेनेति वाच्यम् ॥ * ॥ ईषद्रक्तम् । नेह ईषद्गार्ग्यः ॥

षष्ठी । २ । २ । ८ ॥

राज्ञः पुरुषो राजपुरुषः ॥

याजकादिभिश्च । २ । २ । ९ ॥

एभिः षष्ठ्यन्तं समस्यते ॥ तृजकाभ्यां कर्तरीत्यस्य प्रतिप्रसवोऽयम् । ब्राह्मणयाजकः । देवपूजकः ॥ गुणात्तरेण तरलोपश्चेति वक्तव्यम् ॥ * ॥ तरबन्तं यद्गुणवाचि तेन समासः ॥ न निर्द्धारण इति पूरणगुणेति च निषेधस्य प्रतिप्रसवोऽयम् । सर्वेषां श्वेततरः सर्वश्वेतः । सर्वेषां महत्तरः सर्वमहान् । एतच्च सर्वं गुणकार्त्स्न्ये इति सूत्रे भाष्ये पठितम् ॥ कृद्योगा च षष्ठी समस्यत इति वाच्यम् ॥ * ॥ इध्मप्रव्रश्चनः ॥ तत्स्थैश्च गुणैः षष्ठी समस्यत इति वाच्यम् ॥ * ॥ चन्दनगन्धः ॥ न तु तद्विशेषणैरिति वक्तव्यम् ॥ * ॥ घृतस्य तीव्रः ॥

न निर्द्धारणे । २ । २ । १० ॥

निर्द्धारणे या षष्ठी सा न समस्यते ॥ नृणां द्विजः श्रेष्ठः ॥ प्रतिपदविधाना षष्ठी न समस्यत इति वाच्यम् ॥ * ॥ सर्पिषो ज्ञानम् ।

पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन । २ । २ । ११ ॥

पूरणाद्यर्थैः सदादिभिश्च षष्ठी न समस्यते ॥ पूरणे । सतां षष्ठः । गुणे । काकस्य कार्ष्ण्यम् । ब्राह्मणस्य शुक्लाः । यदा प्रकरणादिना दन्ता इति विशेष्यं ज्ञातं तदेदमुदाहरणम् । अनित्योऽयं गुणेन निषेधः । संज्ञाप्रमाणत्वादित्यादिनिर्देशात् । तेनार्थगौरवं बुद्धिमान्द्यमित्यादि सिद्धम् । सुहितार्थास्तृप्त्यर्थाः । फलानां सुहितः । तृतीयासमासस्तु स्यादेव । स्वरे विशेषः । सत् । द्विजस्य कुर्वन् कुर्वाणो वा । किङ्कर इत्यर्थः । अव्ययम् । ब्राह्मणस्य कृत्वा । पूर्वोत्तरसाहचर्यात्कृदव्ययमेव गृह्यते । तेन तदुपरीत्यादि सिद्धमिति

रचितः । तव्ये । ब्राह्मणस्य कर्तव्यम् । तव्यता तु भवत्येव । स्वकर्तव्यम । स्वरे भेदः । समानाधिकरणे । तक्षकस्य सर्पस्य । विशेषणसमासस्त्विह बहुलग्रहणान्न । गोर्धेनोरित्यादिषु पोटायुवतीत्यादीनां विभक्त्यन्तरे चरितार्थानां परत्वाद्बाधकः षष्ठीसमासः प्राप्तः सोऽप्यनेन बाध्यते ॥

क्तेन च पूजायाम् । २ । २ । १२ ॥

मतिबुद्धीतिसूत्रेण विहितो यः क्तस्तदन्तेन षष्ठी न समस्यते ॥ राज्ञां मतो बुद्धः पूजितो वा । पूजायां किम् । छात्रहसितम् । राजपूजितइत्यादौ तु भूते क्तान्तेन सह तृतीयान्तसमासः ॥

अधिकरणवाचिना च । २ । २ । १३ ॥

क्तेन षष्ठी न समस्यते ॥ इदमेषामासितं गतं भुक्तं वा ॥

कर्मणि च । २ । २ । १४ ॥

उभयप्राप्तौ कर्मणीति या षष्ठी सा न समस्यते ॥ आश्चर्यो गवां दोहोऽगोपेन ॥

तृजकाभ्यां कर्तरि । २ । २ । १५ ॥

कर्त्रर्थतृजकाभ्यां षष्ठ्या न समासः ॥ अपां स्रष्टा । वज्रस्य भर्ता । ओदनस्य पाचकः । कर्तरि किम् । इक्षूणां भक्षणमिक्षुभक्षिका । पत्यर्थभर्तृशब्दस्य याजकादित्वात्समासः । भूभर्ता । कथं तर्हि घटानां निर्मातुस्त्रिभुवनविधातुश्च कलह इति । शेषषष्ठ्या समास इति कैयटः ॥

कर्तरि च । २ । २ । १६ ॥

कर्तृषष्ठ्या अकेन न समासः ॥ भवतः शायिका । नेह तृजनुवर्तते । तद्योगे कर्तुरभिहितत्वेन कर्तृषष्ठ्या अभावात् ॥

नित्यं क्रीडाजीविकयोः । २ । २ । १७ ॥

एतयोरर्थयोरकेन नित्यं षष्ठी समस्यते ॥ उद्दालकपुष्पभञ्जिका । क्रीडाविशेषस्य संज्ञा । संज्ञायामिति एवुल् । जीविकायाम् । दन्तलेखकः । तत्र क्रीडायां विकल्पे जिविकायां तृजकाभ्यां कर्तरीति निषेधे प्राप्ते वचनम् ॥

कुगतिप्रादयः । २ । २ । १८ ॥

एते समर्थेन नित्यं समस्यन्ते ॥ कुत्सितः पुरुषः कुपुरुषः । ऊरीकृत्य । उररीकृत्य । प्रादिग्रहणमगत्यर्थम् । सुपुरुषः । अथ वार्तिकानि ।। प्रादयो गताद्यर्थे प्रथमया ॥ * ॥ प्रगत आचार्यः प्राचार्यः ॥ अत्यादयः क्रान्ताद्यर्थे द्वितीयया ॥ * ॥ अतिक्रान्तो मालामतिमालः ॥ अवादयः क्रुष्टाद्यर्थे तृतीयया ॥ अवक्रुष्टः कोकिलया अवकोकिलः ॥ पर्यादयो ग्लानाद्यर्थे चतुर्थ्या ॥ * ॥ परिग्लानोऽध्ययनाय पर्यध्ययनः ॥ निरादयः क्रान्ताद्यर्थे पञ्चम्या ॥ * ॥ निष्क्रान्तः कोशाम्ब्या निष्कोशाम्बिः ॥ कर्मप्रवचनीयानां प्रतिषेधः ॥ * ॥ वृक्षं प्रति ॥

उपपदमतिङ् । २ । २ १९ ॥

उपपदं सुबन्तं समर्थेन नित्यं समस्यतेऽतिङन्तश्च समासः । कुम्भं करोति कुम्भकारः । इह कुम्भ अस् कार इत्यलौकिकं प्रक्रियावाक्यम् । अतिङ् किम् । मा भवान्भूत् । माङि लुङिति सप्तमीनिर्देशान्माङुपपदम् । अतिङ्ग्रहणं ज्ञापयति सुपेत्येतन्नेहानुवर्तत इति । पूर्वसूत्रेऽपि गतिग्रहणं पृथक्कृत्यातिङ्ग्रहणं तत्रापकृष्यते सुपेति च निवृत्तम् । तथा च गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति सिद्धम् । व्याघ्री । अश्वक्रीती । कच्छपी ।

अमैवाव्ययेन । २ । २ । २० ॥

अमेव तुल्यविधानं यदुपपदं तदेवाव्ययेन सह समस्यते ॥ स्वादुङ्कारम् । नेह कालसमयवेलासु तुमुन् । कालः समयो वेला वा भोक्तुम् । अमैवेति किम् । अग्रे भोजम् । अग्रे भुक्त्वा । विभाषाग्रेप्रथमपूर्वेष्विति क्त्वाणमुलौ । अमा चान्येन च तुल्यविधानमेतत् ॥

तृतीयाप्रभृतीन्यन्यतरस्याम् । २ । २ । २१ ॥

उपदंशस्तृतीयायामित्यादीन्युपपदान्यमन्तेनाव्ययेन सह वा समस्यन्ते ॥ मूलकेनोपदंशं भुङ्क्ते मूलकोपदंशम् । उच्चैः कारमाचष्टे उच्चैःकारम् । अमन्तेन किम् । पर्याप्तो भोक्तुम् ॥

क्त्वा च । २ । २ । २२ ॥

तृतीयाप्रभृतीन्युपपदानि क्त्वान्तेन सह वा समस्यन्ते ॥ उच्चैः कृत्वा । उच्चैःकृत्य । अव्यये यथाभिप्रेतेति क्त्वा । तृतीयाप्रभृतीनीति किम् । अलङ्कृत्वा । खलु कृत्वा ॥

शेषो बहुव्रीहिः । २ । २ । २३ ॥

अधिकारोऽयम् । द्वितीया श्रितेत्यादिना यस्य त्रिकस्य विशिष्य समासो नोक्तः स शेषः प्रथमान्तमित्यर्थः ॥ बहुव्रीहिप्रदेशा बहुव्रीहौ प्रकृत्या पूर्वपदमित्येवमादयः ॥

अनेकमन्यपदार्थे । २ । २ । २४ ॥

अनेकं प्रथमान्तमन्यस्य पदस्यार्थे वर्तमानं वा समस्यते स बहुव्रीहिः ॥ अप्रथमाविभक्त्यर्थे बहुव्रीहिरिति समानाधिकरणानामिति च फलितम् । प्राप्तमुदकं यं प्राप्तोदको ग्रामः । ऊढरथोऽनड्वान् । उपहृतपशू रुद्रः । उद्धृतौदना स्थाली । पीताम्बरः । चित्रा

गावो यस्येति लौकिकविग्रहे चित्रा अस् गो अस् इत्यलौकिकविग्रहे चित्रगुः । वीरपुरुषो ग्रामः । प्रथमार्थे तु न । वृष्टे देवे गतः । व्यधिकरणानामपि न । पञ्चभिर्भुक्तमस्य ॥ प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः ॥ * ॥ प्रपतितपर्णः प्रपर्णः ॥ नञो ऽस्त्यर्थानां वोत्तरपदलोपः ॥ * ॥ अविद्यमानपुत्रोऽपुत्रः । अस्तीति विभक्तिप्रतिरूपकमव्ययम् । अस्तिक्षीरा गौः ॥

संख्यया ऽव्ययासन्नादूराधिकसंख्याः संख्येये । २ । २ । २५ ॥

संख्येयार्थया संख्ययाऽव्ययादयः समस्यन्ते स बहुव्रीहिः । दशानां समीपे ये सन्ति ते उपदशाः । नव एकादश वेत्यर्थः । बहुव्रीहौ संख्येये डजबहुगणादिति डच् समासान्तः । आसन्नविंशाः ॥ विंशतेरासन्ना इत्यर्थः । अदूरविंशाः । अधिकचत्वारिंशाः । ति विंशतेर्डितीति तिशब्दलोपः । द्वौ वा त्रयो वा द्वित्राः । द्विरावृत्ता दश द्विदशाः । विंशतिरित्यर्थः । संख्यया किम् । पञ्च ब्राह्मणाः ॥ अव्ययेत्यादि किम् । ब्राह्मणाः पञ्च । संख्येये किम् । अधिका विंशतेर्गवां संख्या ॥

दिङ्नामान्यन्तराले । २ । २ । २६ ॥

दिशो नामान्यन्तराले वाच्ये प्राग्वत् ॥ सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो वक्तव्यः ॥ * ॥ दक्षिणस्याः पूर्वस्याश्च दिशोऽन्तरालं दक्षिणपूर्वा । नामग्रहणाद्यौगिकानां न । ऐन्द्र्याश्च कौबेर्याश्चान्तरालम् ॥

तत्र तेनेदमिति सरूपे । २ । २ । २७ ॥

सप्तम्यन्ते ग्रहणविषये सरूपे पदे तृतीयान्ते च प्रहरणविषये इदं युद्धं प्रवृत्तमित्यर्थे समस्येते कर्मव्यतिहारे स बहुव्रीहिः ॥

Reply : *Na, samūhajnānasya sanskārahētutvāt.* That is to say, what produces the *sanskāra* is the collective cognition of the substance qualified by the quality of Duality, and not the mere indeterminate or unqualified cognition, the *Apēkshābuddhi:* and hence this latter is not destroyed by the *sanskāra.* The fact of the *Apekshābuddhi* not being the cause of the *sanskāra* is proved by the remembrance of the two *unities* as distinct from the substances.

Objection : "When one cognition on appearing destroys the previous cognition, then, in accordance with this view, we must have the two existing together (in order for the one to be able to destroy the other); and this would be a contradiction of the *Sūtrā* speaking of the 'non-simultaneity of cognitions.' The sense of this objection is further explained—'*Syānmatam* &c.,' and then again by '*nanu &c.*'

Reply : *Na &c.* That is to say, there is no incongruity in the simultaneity of two such cognitions as are destructive of each other. The 'non-simultaneity' spoken of in the *sūtra* refers to such cognitions as do not destroy each other,—two such cognitions cannot exist at one and the same time. That is to say, what is meant to be denied by the mention of 'non-simultaneity' is the simultaneous appearance of two cognitions, and also their simultaneous existence without destroying each other. In accordance with the theory of one cognition destroying another, however, there is no simultaneous appearance of any two cognitions; nor is there simultaneous existence of any two cognitions; as soon as one appears the other at once assumes the destructible form. This is what is meant by '*na hi* &c.' The particle '*iti*' indicates the end of the discussion.

(A fresh Discussion is started).

Objection : "Well Sir, all this description of the process of "the production &c. of Duality is wholly irrelevant; as there is "no proof of the existence of Duality itself.

Question : "We have an evidence for it, in the shape of the "cognition of *two* '*Substances.*'

Digitized by Google

"*Answer*: Not so; because Duality is devoid of the mark "of cognisability. That is to say, any object when cognised, be- "comes so either as produced or as not produced; in any case "the cognisability could not belong to Duality; as when it is "produced it does not exist and when it is not produced it can "have no continuance.

Question: 'The object in the past is what is cognised, as it is such an object that brings about the cognition.'

"*Answer*: Not so; because this explanation is not con- "patible with the fact of all things being cognised as *in the pre-* "*sent*; and also because if such were the case then the organs of "sense (which are causes of the cognition) would also be cog- "nisable or perceptible (which is not admitted).

Page 123.] *Question*: 'It may be that the character of the "thing is so modified by its cause and its accessories that even "though both the thing and the sense-organs are equally the "cause of the cognition, yet it is only the object, and not the "sense-organ, that becomes the *cognised*. And as for the notion "of the cognised thing being in the present, that may be explain- "ed as being due to the fact of the cognition appearing im- "mediately after the object."

"*Answer:* What do you mean by this 'cognisability'?

"It may be said that cognisability consists in being the *cause* "*of cognition.*

"But in that case the sense-organs also, being the causes of "cognition, would have to be regarded as *cognisable.*

"*Objection*: 'The self-cognition of the cognition would constitute the cognisability of the other (*i. e.* of the object cog- nised).'

"*Reply*: It is very queer that the cognition should be of "one thing (cognition), and cognisability should belong to some- thing else (the cognised object).

"*Objection*: 'There is nothing queer in this; as surely you "cannot object to the nature of things. A cognition by its very

Digitized by Google

"nature is so constituted as to comprehend an object; and hence "it is the cognising of the cognition's own self that constitutes "the comprehension of the object; and this comprehension is "only of that object which has brought about the cognition, and "of no other object; and as such there can be no irregularity.'

"*Reply*: Not so; because of the singleness of the object. "The meaning of the cognition being *arthaja*, is that it is pro-"duced from it; and certainly this production is one only. And "because it is a property of the cognition and the object, that "would be no reason why it could not restrict the object.

"It might be argued that, in as much as the cognition is a "property of something else, it could not belong to the object. "But, as a matter of fact, it is the mutual restriction or limita-"tion of these that constitutes their relationship of the *apprehen-"der* and the *apprehended*, and this relationship is not due to "the restriction of only one of the two members related. Nor "has the past or future object any causal potency towards the "cognition, for the simple reason that they do not exist at the "time.

"*Question*: 'Cannot the relationship of the object and the "cognition of that object be the basis of the relationship of the "Apprehender and the Apprehended?'

"*Answer*: That could not be; because of non-difference; "that is to say, the character of the *apprehended* does not in any "way differ from *that of being the object* of the cognition, and "that of the *apprehender* is not different from that of being the "cognition of that object; and hence when we ask you the cause "of the mutual limitation of these two, you name these very "characters as the basis,—and certainly it passes beyond the "limits of all answering intelligences.

"*Question*: 'It is the very nature of cognition that it ap-"prehends only certain definite things.'

"*Answer*: If this nature be not due to any cause then "there can be no restriction of the object; and if it be due to

"some cause, then please tell me what this cause is; what is the "use of trumpetting about the 'nature' of the thing ? And as a "matter of fact, we cannot think of any other cause save the "*production* or *appearance*.

"*Objection*: 'It is only that which brings about the cognition, and gives form to it, that can be apprehended by it, and "nothing else. It is absolutely necessary to admit that in cognition the form is that of the object. Otherwise cognition, being "of the nature of pure consciousness, without any form, could "pertain equally to all things, and there could be no such specification as that *this is the cognition of blue*, and that the *cognition of yellow*; and then cognition would never afford any idea "of particular things. It is for this reason that the form of the "object is regarded as the evidence or authority of the cognition. "And it is this form of the object which connects the cognition "with a particular object. And as the sense-organs are common "factors, they cannot lead to the specification of cognitions, "and as such cannot be regarded as *apprehended*. To this "effect it has been said that, in as much as it is the form of the "cognised object that connects the cognition with its object, and "as it does not renounce that form of the object, it is that form "alone that constitutes the evidence or authority of the cognition "of that object; and then again, we have another declaration to "the effect that, the mere being of the consciousness cannot be "rightly regarded as *cognition*; as that is a factor common to "all cognitions; and it is only that which would turn the cognition into its own specific form that could impart its form to "that.

"To this the following reply is made: What is it that is perceived by the cognition with a form? Is it the object, or the "form of the cognition itself, or both? It could not be both; because "what is apprehended is in a single form, of the 'blue' for instance. Nor is it right to assert that the object is cognised by "the cognition; because at the time of the existence of the

"object in its own pure form, the cognition does not appear; "and at the time of the cognition, the object having been relegated to the past, could never be apprehended as existing in "the present. If it be asserted that the idea of the *present* that "enters into the cognition pertains to the moment of time concomitant with the time of the cognition,—this would be an "instance of extreme credulity and faith in your own doctrines; "as the moment of time is never found to form the object of cognition. What too is the reason that a cognition brings about the "apprehension of only a particular object, and not of all objects? "There is no identity between the object and the cognition; nor "could the appearance of the cognition be the means of the "restriction,—as has already been shown above.

"*Objection*: The cause of restriction would lie in the fact of "the cognition having the form of that particular object.'

"*Reply*: How is it that one moment (individual) of the "*blue* does not apprehend another *blue* (the blue form being "the same in both cases)?

"*Objection*: 'The apprehensive potency belongs to the cognition alone, and not to the object.'

"*Reply*: Yet, any one cognition of *blue* would apprehend all "moments (individuals) of the blue; as the blue form would be "common to all.

"Even if it be argued that apprehensibility belongs only to "that moment or condition of the object which brings about "the cognition, and which imparts its own form to it,—then "in that case, apprehensibility would belong to the sense-organ, "and also to the cognition appearing immediately before it; "as these two also serve to bring about the cognition; and the "cognition also bears their respective similarities, in that it pertains to the apprehension of an object (thus resembling the "sense-organ) and is of the nature of consciousness (thus "resembling the preceeding cognition).

"*Objection*: 'You say that the cognition resembles the sense-

"organ in that it pertains to the apprehension of objects, and also "the preceeding cognition, in that it is of the nature of conscious-"ness; but both these resemblances are common to all cogni-"tions. What is peculiar to each cognition is only the similarity "that it bears to the object cognised; as the form of *blue* can "be present only in that cognition which is produced by the *blue* "object. And it is only that property which is peculiar to a thing "that can serve as the restrictive agent. And it is on account "of this that what the cognition particularly apprehends is the "*object*, and not the *sense-organs* or the *preceding cognition*.'

"*Reply*: There is not much in this; as there would always "be a likelihood of the apprehension of such preceding cognition "as may have the same object.

"*Objection*: 'That blue object which imparts to the cogni-"tion the *blue* form, is what is apprehended by it; and in the "case of a serial cognition, the blue form of the cognition is due, "not to the blue form of the preceding cognition, but to the blue "object; as it is only the object with whom the appearance of "the *blue* form is found to be invariably concomitant—always "existing when it exists, and never when it does not exist; and "as for consciousness, it is found to have a power of bringing about "a form of consciousness alone.'

"*Reply*: Whose commands have you received to the effect that "what is apprehensible is only that which imparts the form, blue "f. i., to the cognition? If the apprehensible character of that "same object were to be the means of such a restriction upon "apprehensibility, then, the restriction might be taken as due "to the peculiar nature of things only. As a matter of fact, it is "found that when the cognition appears, it does so in the form "of the cognizance of such an object as to which the auxilliaries "of the cognition appertain; and the object also is cognised only "in that particular form in which it is cognisable; and the sense-"organ &c., are not cognised. Consequently the *form* of the "object need not be taken as the cause of the cognition. As "certainly the relation of the action of *cutting* to the *tree* is not

"due to the fact of that action possessing the form of the tree "(that is cut); nor is it through the axe; but the fact is that "the nature of the action, and also that of the tree, is such that "the action is restricted to (pertains to) the tree only, and to "nothing else. Then as for the restricted notion that *this is* "the *cognition of that*, this is due to the character of the *cogni-* "*tion* (appearance) itself; and for the sake of this too we need "not look for any *form*.'

"It might be urged that the object is not apprehended by "the cognition which has a form,—the cognition apprehending "only its own form. But, in that case, there would be absolutely "no proof for the existence of the object, as there would be "neither the *apprehension* nor the determination or (ascertain- "ment) of the fact; what would be possible would be a mere "fancy of it; and though this fancy is the effect of mere "imagination, yet, in as much as it follows on the wake of sense- "perception, wherever we have sense-perception, there the fancy "renounces its own function, and taking up the functions of the "cause it renders the thing in question perceptible; but in a "case where sense-perception itself is not present, the fancy also "is wholly incapable; as the cause (of its functioning) is absent.

"*Objection*: 'The form of the cognition becomes a proof "for the establishment of the object, by tending to restrict the "operations of a cause similar to itself.'

"*Reply*: Then is it that there is, in the external world, "something that imparts the gross form (to the cognition). I "wonder what would be the fate of such an assertion!

"For these reasons, we conclude that the appearance of the "gross form in the cognition is not due to the object; because "any thing of this nature has been proved above to be absent "in the case of one cognition (that of *Duality*); and it is equally "impossible in the case of other cognitions."

"If this cognition (of the gross form of objects) were not "due to an object, and were to be brought about at times by "some cause or other, then, it would be conceived of either as

"non-existing, or as having any other form than the one in "which it is perceived; or it might always be conceived of as "non-existing; as it is as good as proved that it is not very easy "to differentiate between the correct and mistaken forms of "cognitions. Then again, at the time of cognising, the form of "the cognition points to a similar object as its adequate and "efficient cause, specially when it is understood that the form "of the cause of a cognition is similar to that of the cognition "itself. But this understanding is not possible when the object "is not what is cognised; because any firm conviction, of one "thing being similar to another and being its cause, depends "upon the due cognition of both the things concerned. Hence "we conclude that the existence of the object is not proved by "the form of the cognition. For this reason too the fact of the "object being the *cause* of the cognition cannot be accepted as "constituting its *apprehensibility*; nor is the causal efficiency "of the object capable of imparting its form to the object. "Hence it is only right to assert that on account of any object "not having the apprehensible character, there is nothing be-"sides the cognition itself, which makes it conceivable.

"For the following reason also, there is no object apart "from the cognition. The object being inaminate and non-"intelligent, it could not manifest itself; nor can we find any "other manifester for it; as in all cases there is the same one "form of the object that is cognised. Even if there were any "such manifester, unless that manifester itself were self-mani-"fest it could not manifest the object. That which has its "manifestation or appearance not manifest, cannot but be re-"garded as *unmanifest*, just as things behind a wall; and for "you the external object is such as has its appearance not "manifest; and then too that which would be the manifester "of another, must, like the lamp, be independent, for its own "manifestation, of anything else like itself; and as for cognition, "it is clearly the manifester of something else; and under the "circumstances it would be most unreasonable to asssert that the

"self-manifest cognition has the *object* for its manifester. If such "were the case, then on the ground of the two always being "found together, as between the omniscient and non-omniscient, "so between the cognised and the cogniser also, there would be "non-difference. Because wherever there is difference, there "is no possibility of the two things being *always* found together; "as for instance, we find that '*blue* and *yellow* are never per-"ceived simultaneously at one and the same place; and the "fact of two things being always found together is the very con-"tradictory of their not being found together; and thus on ac-"count of the presence of something concomitant with its con-"tradictory, the certainty of *difference* becomes precluded "and tends to prove the certainty of *non-difference*; and thus "is established the premiss of our argument.

"*Objection*: 'The word '*saha*' (in '*sahopalambha*') means "either *help* or *simultaneity*: and as these are always concomi-"tant with *difference*, the above argument is self-contradictory.'

"*Reply*: Not so; because what we have put forward as "the reason is not an assumed companionship; even in the "stock example of the 'two moons,' there is no real companion-"ship; as the moon is one only.

"*Objection*: 'The moment cognised by the omniscient "person apprehends, along with itself, all living beings; and "yet these latter are not non-different from the cognition of "omniscience; and thus your argument becomes inconclusive.'

"*Reply*: Not so; because there is no such absolute neces-"sity as you imagine. Those things, whose companionship is with "reference to moments of time, for them there is such an absolute "necessity as you say; because the two moments are never again "perceived individually; but this is not the companionship that "we mean; what we mean is with reference to the *series*; and cer-"tainly there is no companionship or concomitance between the "'series' of the omniscient mind with that of an ordinary mind; as "for the former it is possible, at certain times, to rest within

"itself; and at these times also he does not cease to be omniscient; "as the power remains in him; *e. g.* the cook, even when he is "not actually cooking, retains the character of the cook. Hence "we conclude that what is known by a cognition does not differ "from that cognition; as for instance, the cognition's own self; "and then we find that *Blue* &c. are known; if these were "different from cognition, they could not be known by it; as the "*non-difference*, which is the very necessary condition of such "cognisability, would be absent; the very appearance of the "cognition not being the necessary condition; and then too, if "any one thing were to be cognised by something wholly "different from it, and not bearing any relationship to it, then "there would be a total disorder. And further, in as much as "in difference we cannot find the necessary condition, nor the "all-pervading invariable relationship, this would preclude cog- "nisability from *difference*, and relegate it to its contradictory, "*non-difference*; and this establishes the premiss of our "argument.

"The above also proves the non-difference of the form of 'I' "(the cogniser), from cognition. As for the distinct notions that "we come to have of the *cognised*, the *cogniser* and the *cogni-* "*tion*—these are only instances of misconceptions, like that of "the 'double moon'; and the cause of this misconception, as of "all misconceptions, lies in the *vâsanâ* of the beginningless and "unceasing flow of *non-difference*. To this effect we have the "declaration: *In all unmistaken cognitions the notion of* "*difference is like the notion of two moons.*

"*Objection*: 'If there be no external object, then what would "be the cause of the cognition appearing in the form of the *blue* "(f. i.)? It has been well said that the idea of the object is of "the form of the object; and the Idea has got that form as its "qualification; and it deserves to be considered whether that "cognition follows from the external world or from elsewhere.'

"To this the following reply is made: Even if the external "object exists, what would be the cause of the cognition in

Digitized by Google

"question? The *blue object* could not be that cause; because "this object is not what is *seen*,—the object being always beyond "the reach of the senses. It might be urged that from the "effects we could deduce and assume the object (to be amenable "to the action of the senses). But in that case why cannot you "assume a diversity of potencies in the preceding cognition it-"self, which is quite perceptible? And this latter assumption "would also explain the diversity of forms in Dream-cognition, "which could not be attributed to the potency of objects be-"longing to different places and times, as none of these objects "are extant at the time.

"*Objection*: 'Well, in that case, there could be no variegated "cognition; as cognition being one only, all cognitions, being "nondifferent from it, would be one only; and if there were "distinct cognitions, each with a distinct form, then, in as much as "each of the cognitions would be restricted to its own form, there "would be no cognition apart form these, which would appre-"hend all the forms concerned.'

"To this we make the following reply: It is not that a "variegated form is never manifested; as any such assertion "would be contrary to a fact of direct cognition. It is well "known that a non-intelligent thing cannot be manifested; hence "this variegated form also must be of the nature of *cognition* "alone (which being intelligent would be easily manifestible). "Nor does the diversity of cognitions depend upon the diversity "of forms; as in the variegated form, there is no diversity of "forms; just as in the blue substance, the blue character is the "only form, so also in the variegated object, the *variegated* is the "only form. And this being of the nature of cognition, when "the cognition would operate towards itself in that form, it "would operate either in its entirety, or not at all; and it would "never operate partially; as the cognition has no parts. As for "the parts that appear to us as distinct from one another, these "do not constitute the 'variegated' form; and hence there is no "incongruity in our view of the case.

Digitized by Google

"The *gross* form also may be explained in the same manner. "There can be no single gross *whole* made up of a number of "subtile parts; as it would have to be regarded as many, on "account of its inhering in each of the many constituent parts. "As for the form of the cognition however, in as much as it "exists in a single cognition, it could very well be the one gross "cognition. And as for the contradictory characteristics of "trembling and non-trembling (as belonging to the gross object "and the cognition respectively),—this some people are inclined "to reject as contrary to real perception. While others hold "that in as much as the form of the cognition appears only by "the force of beginningless *vāsanās*, it transcends the limit of our "thinking; and as such its essence must be regarded to lie in its "*falsity*. That is to say—that which is a cognition is not based "upon something in the external world, like the cognitions in a "dream—the waking cognition of the post is a *cognition*—(and "hence it could not be based upon any thing in the external "world.) The *Nirālambanatā—i. e. the not being based upon "an eternal object*—is found, in the case of dreams, to pertain "to all cognitions; and the waking cognition also is a cognition; "hence if it were to renounce the character of *not being based "upon external objects*, then it would renounce its own very "nature.

"*Objection*: 'If all cognitions were to be devoid of substratum in the external world, then the cognitions of the Major "term, the Middle term and the Instance of an inferential argument would also be devoid of such a substratum; that would imply the non-existence of these; and then there could be no Inference; "and if these cognitions be accepted to have real substrata, then "these would invalidate the reason given for holding all cogni- "tions to be devoid of such substrata.'

"*Reply*: Not so; these cognitions also have no substrata in "the external world; they come to help in the appearance of the "inference, through their *samvṛiti* (assumed) reality. We often "find real knowledge following false things; for instance, we

Digitized by Google

"have the cognition of the real letter from the marks on pape "(which marks are not the real letters).

"*Objection*: 'But the marks forming the letter are quite real in themselves.'

"*Reply*: True, they are real; but they are incapable of giving any meaning in the form of the *marks*; they afford mean- "ings only when the character of letter-sounds (which do not "exist in them in reality) are *imposed* upon them; and as such "the usefulness of these marks lies in the *unreal* form thus im- "posed, and not upon the real form (of the mere lines)."

The above embodies in brief the *Pūrvapaksha*, in reply whereto we have the following :—One of the arguments put forward by the opponent is based upon *the absence in the object of the marks of apprehensibility.* But this argument cannot prove the non-existence of the object. It may be that the external object may not be apprehensible; but that does not prove that it does not exist; specially as non-apprehensibility or non-perception might be due to the form of the object being remote (that is too far removed to be directly perceptible), as is the case with ghosts.

Objection: "If a thing that is perceptible is not perceived, that certainly proves that the thing does not exist."

Reply: True; but how have you ascertained the fact of the external object being 'perceptible.'? Its perception (according to you) has never occurred: If it has occurred, then the marks of perceptibility cannot be said to be absent from it. Then again, the perception of a thing depends upon the percipient; and the percipient cognition is limited to itself; so if this in itself is enough to prove that all else is imperceptible,—and the non-perception is due to the absence of anything that could be perceived,—then your reason or premiss becomes the same as your conclusion.

Page 127.] Then, again please explain this that you are asked— What is the 'perceptibility' of the *form* of cognition? It is not

Digitized by Google

the cause of the cognition, as the two are non-different. Nor can this perceptibility be regarded as consisting in the imparting of the form to the cognition; as we do not perceive two forms in any cognition. Nor can 'perceptibility' be said to consist in the cognition itself; as in the state of deep sleep, though the nature of the cognition continues, like the series of cognitions, yet it is not perceived or apprehended.

Objection: "Perceptibility may consist in *appearability* or manifestibility."

Reply: What do you mean by the 'appearance' of the form of cognition ?

Objection: "It is the capability of rejection or acceptance as following upon cognition."

Reply: This capability is present in the external object also. For instance, by the cognitions 'this is blue,' 'this is yellow' what one accepts, rejects or treats with indifference is the external object, and not anything within himself. And thus it is not proved that the object is devoid of the marks of perceptibility.

Objection: "How can the production of one thing (cognition) constitute the capability (of rejection or acceptance) of another (the external object) ?"

Reply: The peculiarities of the nature, the cause and the auxilliaries of the cognition produce, in the object, the character of being used in accordance with those (form &c.); and as such there is not much force in the objection.

This same argument disposes of the arguments of the *Pūrvapakshin* in regard to 'cognisability'; as that too is produced by the peculiarities of the nature, cause and auxlliaries of the cognition; specially as this cognition serves the purpose of precluding all doubts and contrary notions with regard to the object.

Then, it has been argued that what is non-intelligent is incapable of manifestation or appearance. But if this incapabi-

lity refer to such an object as has not *manifestation* itself for its very nature ;—then the argument becomes redundant (as no one admits of the manifestation of such an object.) If however it be meant to refer to *relationship* and connection then it cannot be proved ; because there is no royal command to the effect that the non-intelligent can have no relationship with manifestation. Just as the action of *cutting* becomes related to the *object that is cut*, and is yet distinct from it—so in the same manner, the action of *cognising* would be related to the *cognised*, and yet be distinct from it. Then, as for the invariability of the concomitance of the cognition with the cognised (which the apponent brings forward as proving the identity of the cognition and the cognised), it cannot absolutely prove the negation of the opposite conclusion (that is to say, that concomitance does not prove that the object is non-existent) ; as the simultaneity of the apprehension of the *blue object* and the *cognition of blue* could be possible even when cognisability belonged to something besides itself.

Objection : "But there being no external object, the cognition can not be percipient of anything besides itself."

Reply : The preclusion of the conclusion opposite to yours could follow only upon the establishment of the non-existence of the external object ; and the non-existence of the external object again you seek to prove by the negation of the opposite conclusion ; this involves a mutual inter-dependence.

Objection : "Even if there is this inter-dependence—what of that ?"

Reply : But as a matter of fact also, the invariability of concomitance between the *cognised* and the *cognition*, is not established ; as whenever we have a cognition of the blue object, what is cognised as 'blue' is perceived as something *external*, while the cognition is perceived as something *internal*.

Objection : "The concomitance is proved by the self-apprehensibility of the cognition."

Digitized by Google

Reply: What is the evidence for this self-apprehensibility?

Objection: "Whatever is manifested does not depend upon anything else, for its manifestation; as we find in the case of the lamp."

Reply: The function of the lamp consists in the removing of the darkness from the place to which it is brought; and this operation having been done by itself, it does not, for that purpose, stand in need of another lamp; but for its own perception it does need the eye and other organs of the person who would see or feel it; and thus your instance becomes totally devoid of the character you seek to prove by it.

If by 'manifestibility' you mean the *character of cognition*, and from that you deduce its independence of all other things,—then your premiss becomes *asādhāraṇa*, 'individualised' or 'specialised' (and cannot prove anything).

Then again, it has been urged by the *Pūrvapakshin* that, that thing whose manifestation or appearance is not manifest, is itself unmanifest, *e.g.* a thing hidden under a cover. But the unmanifest character of the hidden thing is not due to itself, but to its negation or absence; and as such this instance does not prove the required concomitance (of non-appearance and non-self-manifestibility).

Another reason put forward is—'because it is cognition (therefore it is devoid of eternal substratum, like dream-cognition.)' But there is not much in this argument either; as the instance is not quite established; Dream-cognitions also have their substratum in assumed external substances, and do not rest wholly within themselves; as during dreams what are cognised are only such things as have been perceived during the waking state, which appear in consciousness on account of the impressions left by them upon the mind. If it were not so, then it could not be that only such things are dreamt of as have been seen or heard of or otherwise perceived before.

Page 129] Then again, if the external object did not exist, what is it that is cognised as having a definite from—'this is *blue*'?

संस्कृतपुस्तकानां सूचीपत्रम् । मूल्य

श्रीभाष्यस्य प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं॰श्रीराममिश्र-
शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः .. .. ६॥।)

श्रीभाष्यस्य प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा .. ८।)

श्रीभाष्यस्य तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा .. ४॥)

वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः .. .. ३॥।)

सेतुपूर्त्तिः प्रथमो बिन्दुः सत्सम्प्रदायाचार्य्य·स्वामिश्रीराममिश्रशास्त्रि-
प्रणीता निर्विशेषाद्वैतनिराकरणपरः .. .. १॥=)

सेतुपूर्त्तिसहितो वेदार्थसंग्रहः .. .. ३॥।)

शास्त्रदीपिका .. .. ८।)

सङ्कर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-
न्द्रिकोपेतम्, पं॰स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् । १।)

काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजप॰दामोदर-
शास्त्रिणा संशोधिता पूर्वार्द्धरूपा .. .. ५॥।)

तथा उत्तरार्द्धम् .. .. ८॥।)

माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण
श्रीसायणाचार्येण विरचिता .. .. ७॥)

काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता ६॥)

नीतिकल्पार्णवतरणिः .. .. ६)

दिग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता .. .. ॥=)

जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता .. ५॥)

लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्याय-
मुक्तावल्याख्यया टीकया सहिता .. .. ॥।)

सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना
विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम् ॥।)

तत्त्वमुक्ताकलापः-सर्वार्थसिद्धियुतः, बोधायनीयार्षसिद्धान्तानुसारी विशिष्टाद्वै-
तब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यवराभिधेन कवितार्कि-
ककेसरिणा सर्वतन्त्रस्वतन्त्राभिधानेन श्रीवेङ्कटनाथदेशिकेन प्रणीतः ५॥=)

वेदान्तसिद्धान्तमुक्तावली, आर्थर्वेनिस्साहबकृताङ्गलभाषानुवादयुता .. १॥।)

काव्यप्रकाशस्य इङ्गलण्डीयभाषानुवादः .. .. २॥)

अथर्ववेदसंहिताया इङ्गलण्डीयभाषानुवादः .. .. १२)

आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्य-
काराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम् .. .. ॥।)

तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्विश्वकर्मविरचितया न्यायप्रदी-
पाख्यटीकया सहित .. .. १॥।)

CONTENTS.

Page.

VYÁKARAṆADÍPIKA by Orambhatta, edited by Pandit Ganapati Shastree, Scholar, Sanskrit College, Benares 385, 393, 501, 509, 533, 541.

BRAHMÁMRITAVARSHIṆI, edited by S. Vyankataramana Iyer, B. A., B. L., High Court, Triplicane, Madras 401.

PADÁRTHA-DHARMA-SANGRAHA, translated by Pandit Ganga Nath Jha, M. A., Professor of Sanskrit, Muir Central College, Allahabad 417, 441, 549, 557.

KHANDANODDHÁṚA, by Vachaspati Misra, Ed. by Pandits Vinhyeçvariprasada Dvivedin, Librarian, Sanskrit College, Benares, and Vamacharan Bhattachárya, Professor, Sanskrit College, Benares ... ... 425, 433, 481.

NYÁYASIDDHÁNTAMANJARI by Bhattácháryachudámaṇi Jánakí Náth, with the commentary Nyáyamanjarísára by Yádavácharya, edited by Pandit Jíwa Náth Mishra, Professor, Sanskrit College, Benares ... 449, 457.

YAJUSHAJYOUTISHA, with Somákarasudhákara Bháshyas, edited by Mahamahopadhyaya Pandit Sudhákara Dvivedin, Professor, Sanskrit College, Benares ... ... 465, 473, 517, 525.

PARÁSHARA SMRITI with the Commentary Vidvanmanohará, by Pandit Vináyaka Dharmádhikári, edited by Pandit Nágeshwara Panta Dharmádhikári, Professor, Sanskrit College, Benares. ... 485, 493.

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

Nos. 10, 11 and 12.] Oct., Nov. and Dec. 1907. [Vol. XXIX.

BENARES:
PRINTED AND PUBLISHED BY BHAGAVATI PRASAD B. A.
AT THE MEDICAL HALL PRESS.

1907.

Copyright on each article reserved.

Price Rs. 9 per annum.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अक्षरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
चित्रमीमांसा, अप्पयदीक्षितकृता पं· श्रीरामशास्त्रिणा संशोधिता	१।)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधित	।≈)
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	२)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टैनाचार्य्येणाङ्ग्लदेशीयभाषायामनूदिता ..	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≈)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणाङ्ग्लदेशीयभाषायामनूदितम्	४)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
भागवतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	३।)
शीतपदार्थनिर्वचनम्	४)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकामदोल्लूकशास्त्रि-संशोधिता	३)
काव्यप्रदीपः, पं· रामशास्त्रिभागवताचार्येण परिशोधितः	३॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
[illegible] सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	।॥)

Digitized by Google

इतिशब्दादयं विषयविशेषो लभ्यते । केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि । दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तं दण्डादण्डि । मुष्टीमुष्टि । बाहूबाहवि । अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घत्वम् । इच् कर्मव्यतिहार इतीच् समासान्तः । तिष्ठद्गुप्रभृतिष्विच्प्रत्ययस्य पाठादव्ययीभावत्वमव्ययत्वं च । सरूपग्रहणं किम् । हलैश्च मुसलैश्च प्रहृत्येदं युद्धं प्रवृत्तम् ॥

तेन सहेति तुल्ययोगे । २ । २ । २८ ॥

तुल्ययोगे वर्तमानं सहेत्येतत्तृतीयान्तेन प्राग्वत् ॥ पुत्रेण सह सपुत्रः । सहपुत्रो वागतः । वोपसर्जनस्येति वा सः । तुल्ययोगे किम् । सहैव दशभिः पुत्रैर्भारं वहति गर्दभी । विद्यमानैरेव बहुभिः पुत्रैर्भारं वहतीत्यर्थः । तुल्ययोगवचनं प्रायिकम् । सकर्मकः । सलोमकः ॥

चार्थे द्वन्द्वः । २ । २ । २९ ॥

अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते स द्वन्द्वः ॥ समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः । परस्परनिरपेक्षस्यानेकस्य एकस्मिन्नन्वयः समुच्चयः । अन्यतरस्याऽऽनुषङ्गिकत्वेनान्वयोऽन्वाचयः । मिलितानामन्वय इतरेतरयोगः । समूहः समाहारः । तत्रेश्वरं गुरुञ्च भजस्वेति, समुच्चये भिक्षामट गाञ्चानयेत्यन्वाचये च न समासोऽसामर्थ्यात् । धवखदिरौ छिन्धि । अनेकोक्तेर्होतृपोतृनेष्टोद्गातारः । द्वयोर्द्वयोर्द्वन्द्वं कृत्वा पुनर्द्वन्द्वे तु होतापोतानेष्टोद्गातारः । संज्ञापरिभाषम् । वाक्त्वक्स्रजम् । द्वन्द्वप्रदेशा द्वन्द्वाच्चुदषहान्तात्समाहारे इत्येवमादयः ॥

उपसर्जनं पूर्वम् । २ । २ । ३० ॥

समासे उपसर्जनं प्राक् प्रयोज्यम् ॥ कष्टश्रितः ॥

राजदन्तादिषु परम् । २ । २ । ३१ ॥

एषु पूर्वप्रयोगार्हं परं स्यात् ॥ दन्तानां राजा राजदन्तः । धर्मादिष्वनियमः । अर्थधर्मौ । धर्मार्थौ । जम्पती । दम्पती । जायापती । जायाशब्दस्य जम्भावो दम्भावश्च वा निपात्यते । आकृतिगणोऽयम् ।

द्वन्द्वे घि । २ । २ । ३२ ॥

द्वन्द्वे घिसंज्ञं पूर्वं स्यात् ॥ हरिश्च हरश्च हरिहरौ । अनेकप्राप्तावेकत्र नियमोऽनियमः शेषे । हरिगुरुहराः । हरिहरगुरवः ।

अजाद्यदन्तम् । २ । २ । ३३ ॥

इदं द्वन्द्वे पूर्वं स्यात् ॥ ईशकृष्णौ ॥ बहुष्वनियमः ॥ * ॥ अश्वरथेन्द्राः । इन्द्राश्वरथाः ॥ घ्यन्तादजाद्यदन्तं विप्रतिषेधेन ॥ * ॥ इन्द्राग्नी ॥

अल्पाच्तरम् । २ । २ । ३४ ॥

शिवकेशवौ । ऋतुनक्षत्राणां समाक्षराणामानुपूर्व्येण ॥ * ॥ हेमन्तशिशिरवसन्ताः । कृत्तिकारोहिण्यौ । समाक्षराणां किम् । ग्रीष्मवसन्तौ ॥ लघ्वक्षरं पूर्वम् ॥ * ॥ कुशकाशम् ॥ अभ्यर्हितञ्च ॥ * ॥ तापसपर्वतौ ॥ वर्णानामानुपूर्व्येण ॥ * ॥ ब्राह्मणक्षत्रियौ ॥ भ्रातुर्ज्यायसः ॥ * ॥ युधिष्ठिरार्जुनौ ॥ संख्याया अल्पीयस्याः ॥ * ॥ द्वादश ॥ बहुव्रीहावपि । द्वित्राः ॥

सप्तमीविशेषणे बहुव्रीहौ । २ । २ । ३५ ॥

द्वन्द्वे इति निवृत्तम् । सप्तम्यन्तं विशेषणञ्च बहुव्रीहौ पूर्वं प्रयोज्यम् ॥ कण्ठेकालः । अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः ।

प्रियगुः ॥ सर्वनामसंख्ययोरुपसंख्यानम् ॥ * ॥ सर्वश्वेतः। द्विशुक्लः। मिथोऽनयोः समासे संख्यापूर्वं शब्दपरविप्रतिषेधात्। द्व्यन्यः। वा प्रियस्य ॥ * ॥ गुडप्रियः। प्रियगुडः। गड्वादेः परा सप्तमी ॥ * ॥ गडुकण्ठः। क्वचिन्न। वहेगडुः ॥

निष्ठा। २। २। ३६ ॥

निष्ठान्तं बहुव्रीहौ पूर्वं स्यात् ॥ कृतकृत्यः ॥ जातिकालसुखादिभ्यः परा निष्ठा वाच्या ॥ * ॥ सारङ्गजग्धी। मासजाता। सुखजाता। प्रायिकं चेदम्। कृतकटः। पीतोदकः।

वा ऽऽहिताग्न्यादिषु। २। २। ३७ ॥

आहिताग्निः। अग्न्याहितः। आकृतिगणोऽयम् ॥ प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ ॥ * ॥ अस्युद्यतः। दण्डपाणिः। क्वचिन्न। विवृतासिः ॥

कडाराः कर्मधारये। २। २। ३८ ॥

कडारादयः शब्दाः कर्मधारये वा पूर्वं प्रयोज्याः ॥ कडारजैमिनिः। जैमिनिकडारः ॥

इत्योरम्भट्टविरचितायां व्याकरणदीपिकायां वृत्तौ द्वितीयाध्यायस्य द्वितीयः पादः ॥

अथ द्वितीयाध्यायस्य तृतीयः पादः ।

अनभिहिते । २ । ३ । १ ॥

इत्यधिकृत्य ॥

कर्मणि द्वितीया । २ । ३ । २ ॥

अनुक्ते कर्मणि द्वितीया स्यात् ॥ हरिं भजति । अभिहिते तु कर्मणि प्रातिपदिकार्थमात्रे इति प्रथमैव । अभिधानञ्च प्रायेण तिङ्कृत्तद्धितसमासैः । तिङ् । हरिः सेव्यते । कृत् । लक्ष्म्या सेवितः । तद्धितः । शतेन क्रीतः शत्यः । समासः । प्राप्त आनन्दो यं प्राप्तानन्दः । क्वचिन्निपातेनाभिधानं यथा ।

विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतम् ।

साम्प्रतमित्यस्य हि युज्यत इत्यर्थः ॥

उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।

द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥

उभयतः कृष्णं गोपाः । सर्वतः कृष्णम् । धिक्कृष्णामभक्तम् । उपर्युपरि लोकं हरिः । अध्यधि लोकम् । अधोऽधो लोकम् । अभितःपरितःसमयानिकषाहाप्रतियोगेष्वपि । अभितः कृष्णम् । परितः कृष्णम् । ग्रामं समया । निकषा लङ्काम् । हा कृष्णाभक्तम् । तस्य शोच्यत इत्यर्थः । बुभुक्षितं न प्रतिभाति किञ्चित् ॥

तृतीया च होश्छन्दसि । २ । ३ । ३ ॥

जुहोतेः कर्मणि तृतीया स्यात् द्वितीया च ॥ यवाग्वा अग्नि-

Digitized by Google

होत्रं जुहोति। अग्निहोत्रशब्दो हविषि वर्तते। यस्याग्निहोत्रमधिश्रितममेध्यमापद्येतेत्यादिप्रयोगदर्शनात्। अग्नये हूयत इति व्युत्पत्तेश्च। यवाग्वाख्यं हविर्देवतोद्देशेन त्यक्त्वा प्रक्षिपतीत्यर्थः॥

अन्तरान्तरेण युक्ते। २। ३। ४॥

आभ्यां योगे द्वितीया स्यात्॥ अन्तरा त्वां मां हरिः। अन्तरेण हरिं न सुखम्।

कालाध्वनोरत्यन्तसंयोगे। २। ३। ५॥

इह द्वितीया स्यात्॥ मासं कल्याणी। मासमधीते। मासं गुडधानाः। क्रोशं कुटिला नदी। क्रोशमधीते। क्रोशं गिरिः। अत्यन्तसंयोगे किम्। मासस्य द्विरधीते। क्रोशस्यैकदेशे पर्वतः॥

अपवर्गे तृतीया। २। ३। ६॥

अपवर्गः फलप्राप्तिस्तस्यां द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात्॥ अन्हा क्रोशेन वाऽनुवाकोऽधीतः। अपवर्गे किम्। मासमधीतो नायातः॥

सप्तमीपञ्चम्यौ कारकमध्ये। २। ३। ७॥

शक्तिद्वयमध्ये यौ कालाध्वानौ ताभ्यामेते स्तः॥ अद्य भुक्त्वाऽयं द्व्यहे द्व्यहाद्वा भोक्ता। कर्तृशक्त्योर्मध्येऽयं कालः। इहस्थोऽयं क्रोशे क्रोशाद्वा लक्ष्यं विध्येत्। कर्तृकर्मशक्त्योर्मध्येऽयं देशः। अधिकशब्देन योगे सप्तमीपञ्चम्याविष्येते। तदस्मिन्नधिकमिति यस्मादधिकमिति च सूत्रनिर्देशात्। लोके लोकाद्वाऽधिको हरिः॥

कर्मप्रवचनीययुक्ते द्वितीया। २। ३। ८॥

एतेन योगे द्वितीया स्यात्॥ जपमनु प्रावर्षत्। हेतुभूतजपोपलक्षितं वर्षणमित्यर्थः॥

Digitized by Google

यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी । २ । ३ । ९ ॥

अत्र कर्मप्रवचनीययुक्ते सप्तमी स्यात् ॥ उप परार्द्धे हरेर्गुणाः । परार्द्धादधिका इत्यर्थः । ऐश्वर्ये तु स्वस्वामिभ्यां पर्यायेण सप्तमी । अधि भुवि रामः । अधि रामे भूः । सप्तमी शौण्डैरिति समासपक्षे तु रामाधीना । अषडक्षेत्यादिना खः ॥

पञ्चम्यपाङ्परिभिः । २ । ३ । १० ॥

एतैः कर्मप्रवचनीयैर्योगे पञ्चमी स्यात् ॥ अप हरेः परि हरेः संसारः । परिरत्र वर्जने । लक्षणादौ तु हरिं परि । आ मुक्तेः संसारः । आ सकलाद् ब्रह्म ॥

प्रतिनिधिप्रतिदाने च यस्मात् । २ । ३ । ११ ॥

अत्र कर्मप्रवचनीयैर्योगे पञ्चमी स्यात् ॥ प्रद्युम्नः कृष्णात्प्रति । तिलेभ्यः प्रतियच्छति माषान् ॥

गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि । २ । ३ । १२ ॥

अध्वभिन्ने गत्यर्थानां कर्मणि एते स्तश्चेष्टायाम् ॥ ग्रामं ग्रामाय वा गच्छति ॥ चेष्टायां किम् । मनसा हरिं व्रजति । अध्वनीति किम् । पन्थानं गच्छति । गन्त्राधिष्ठितेऽध्वन्येवायं निषेधः । यदा तूत्पथात्पन्थानमेवाक्रमितुमिष्यते तदा चतुर्थी भवत्येव । उत्पथेन पथे गच्छति ॥

चतुर्थी सम्प्रदाने । २ । ३ । १३ ॥

स्पष्टम् । विप्राय गां ददाति । अनभिहित इत्येव । दानीयो विप्रः ॥ तादर्थ्ये चतुर्थी वाच्या ॥ * ॥ मुक्तये हरिं भजति ॥

क्लृपि सम्पद्यमाने च ॥ * ॥ भक्तिर्ज्ञानाय कल्पते सम्पद्यते जायत इत्यादि ॥ उत्पातेन ज्ञापिते च ॥ * ॥ वाताय कपिला विद्युत् ॥ हितयोगे च ॥ * ॥ ब्राह्मणाय हितम् ॥

क्रियार्थोपपदस्य च कर्मणि स्थानिनः। २। ३। १४ ॥

क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात् ॥ फलेभ्यो याति। फलान्याहर्तुं यातीत्यर्थः। नमस्कुर्मो नृसिंहाय। नृसिंहमनुकूलयितुमित्यर्थः। एवं स्वयंभुवे नमस्कृत्येत्यादावपि ॥

तुमर्थाच्च भाववचनात्। २। ३। १५ ॥

भाववचनाश्चेति सूत्रेण यो विहितस्तदन्ताच्चतुर्थी स्यात् ॥ यागाय याति। यष्टुं यातीत्यर्थः ॥

नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च। २। ३। १६॥

एभिर्योगे चतुर्थी स्यात् ॥ हरये नमः। उपपदविभक्तेः कारकविभक्तिर्बलीयसी। नमस्करोति देवान्। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा। अलमिति पर्याप्त्यर्थग्रहणम्। तेन दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्त इत्यादि। प्रभ्वादियोगे षष्ठ्यपि साधुः। तस्मै प्रभवति स एषां ग्रामणीरिति निर्देशात्। तेन प्रभुर्बुभूषुर्भुवनत्रयस्येति सिद्धम्। वषडिन्द्राय। चकारः पुनर्विधानार्थः। तेनाशीर्विवक्षायां परामपि चतुर्थी चाशिषीति षष्ठीं बाधित्वा चतुर्थ्येव भवति। स्वस्ति गोभ्यो भूयात् ॥

मन्यकर्मण्यनादरे विभाषाऽप्राणिषु। २। ३। १७॥

प्राणिवर्जे मन्यतेः कर्मणि चतुर्थी वा स्यात्तिरस्कारे ॥ न

त्वां तृणं मन्ये तृणाय वा । श्यना निर्देशान्तानादिकयोगे न । न त्वां तृणं मन्वे ॥ अप्राणिष्विन्यपनीय नौकाकान्नशुकशृगालवर्जेष्विति वक्तव्यम् ॥ * ॥ तेन न त्वां नावमन्नं वा मन्ये इत्यत्राप्राणित्वे ऽपि चतुर्थी न । न त्वां शुने मन्ये इत्यत्र प्राणित्वेऽपि भवत्येव ।

कर्तृकरणयोस्तृतीया । २ । ३ । १८ ॥

अनभिहिते कर्तरि करणे च तृतीया स्यात् ॥ रामेण बाणेन हतो वाली ॥ प्रकृत्यादिभ्य उपसंख्यानम् ॥ * ॥ प्रकृत्या चारुः ॥ क्रियापदाश्रवणात्कर्तृकरणयोरभावात्षष्ठ्यत्र प्राप्नोति ॥ प्रायेण याज्ञिकः । प्रायशब्दो बह्वर्थवाची । बहवो याज्ञिका इत्यर्थः । तत्र प्रथमा-प्राप्नोति । गोत्रेण गार्ग्यः । प्रथमा षष्ठी वात्र प्राप्नोति । समेनैति । विषमेणैति । द्वितीया प्राप्नोति । द्विद्रोणेन धान्यं क्रीणाति । द्वयो-र्द्रोणयोः समाहारो द्विद्रोणम् । पात्रादित्वात् स्त्रीत्वाभावः । अत्रापि द्वितीया प्राप्नोति । पञ्चकेन पशून् गृह्णाति । पञ्च परिमाणमस्य पञ्चकः संघः । तत्र द्वितीया प्राप्ता । पशूनित्यनेनैतत्समानाधिकर-णम् । संघसंघिनोरभेदस्य विवक्षणात् । सुखेन दुःखेन यातीत्यादि ॥

सहयुक्ते ऽप्रधाने । २ । ३ । १९ ॥

सहार्थेन युक्ते ऽप्रधाने तृतीया स्यात् ॥ पुत्रेण सहागतः पिता । एवं साकंसार्द्धंसमंयोगेऽपि । विनाऽपि तद्योगं तृतीया । वृद्धो यूनेति निर्देशात् ॥

येनाङ्गविकारः । २ । ३ । २० ॥

येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततस्तृतीया स्यात् ॥ अक्ष्णा काणः । अक्षिसम्बन्धिकाणत्वविशिष्ट इत्यर्थः । अङ्गविकारः किम् । अक्षि काणमस्य ॥

इत्थम्भूतलक्षणे । २ । ३ । २१ ॥

कञ्चित्प्रकारं प्राप्तस्य लक्षणे तृतीया स्यात् ॥ जटाभिस्तापसः । जटाज्ञाप्यतापसत्वविशिष्ट इत्यर्थः ॥

संज्ञो ऽन्यतरस्यां कर्मणि । २ । ३ । २२ ॥

सम्पूर्वस्य जानातेः कर्मणि तृतीया वा स्यात् ॥ पित्रा पितरं वा संजानीते ॥

हेतौ । २ । ३ । २३ ॥

हेत्वर्थे तृतीया स्यात् ॥ द्रव्यादिसाधारणं निर्व्यापारसाधारणं च हेतुत्वम् । करणत्वन्तु क्रियामात्रविषयं व्यापारनियतञ्च । दण्डेन घटः । पुण्येन दृष्टो हरिः । फलमपीह हेतुः । अध्ययनेन वसति । गम्यमानाऽपि क्रिया विभक्तौ प्रयोजिका । अलं श्रमेण । श्रमेण साध्यं नास्तीत्यर्थः । इह साधनक्रियां प्रति श्रमः करणम् । शतेन वत्सान् पाययति पयः । शतेन परिच्छिद्येत्यर्थः ॥ अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया ॥ * ॥ दास्या संयच्छते कामुकः ॥ धर्मं तु भार्यायै संयच्छति ॥

अकर्तर्यृणे पञ्चमी । २ । ३ । २४ ॥

कर्तृवर्जितं यदृणं हेतुभूतं ततः पञ्चमी स्यात् ॥ शताद्बद्धः । अकर्तरि किम् । शतेन बन्धितः ॥

विभाषा गुणे ऽस्त्रियाम् । २ । ३ । २५ ॥

गुणे हेतावस्त्रीलिङ्गे पञ्चमी वा स्यात् ॥ जाड्याज्जाड्येन वा बद्धः । गुणे किम् । धनेन कुलम् । अस्त्रियां किम् । बुद्ध्या मुक्तः । विभाषेति योगविभागादगुणे स्त्रियां च क्वचित् । धूमादग्निमान् । नास्ति घटो ऽनुपलब्धेः ॥

Digitized by Google

षष्ठी हेतुप्रयोगे । २ । ३ । २६ ॥

हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात् । अन्नस्य हेतोर्वसति ॥

सर्वनाम्नस्तृतीया च ॥ २ । ३ । २७ ॥

सर्वनाम्नो हेतुशब्दस्य च प्रयोगे हेतौ द्योत्ये तृतीया स्यात् षष्ठी च ॥ केन हेतुना वसति । कस्य हेतोः ॥ निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम् ॥ * ॥ किं निमित्तं वसति । केन निमित्तेन । कस्मै निमित्तायेत्यादि । एवं किं कारणं को हेतुः किं प्रयोजनमित्यादि । प्रायग्रहणादसर्वनाम्नः प्रथमाद्वितीये न स्तः । ज्ञानेन निमित्तेन हरिः सेव्यः । ज्ञानाय निमित्तायेत्यादि ॥

अपादाने पञ्चमी । २ । ३ । २८ ॥

ग्रामादायाति । धावतोऽश्वात्पतति ॥ ल्यब्लोपे कर्मण्यधिकरणे च ॥ * ॥ प्रासादात्प्रेक्षते । आसनात्प्रेक्षते । प्रासादमारुह्य आसने उपविश्य प्रेक्षत इत्यर्थः । श्वशुराज्जिह्रेति । श्वशुरं वीक्ष्येत्यर्थः । गम्यमानाऽपि क्रिया कारकविभक्तीनां निमित्तम् । कस्मात्त्वम् । नद्याः ॥ यतश्चाध्वकालनिमार्णं तत्र पञ्चमी ॥ * ॥ तद्युक्तादध्वनः प्रथमासप्तम्यौ ॥ * ॥ कालात्सप्तमी च वक्तव्या ॥ * ॥ वनाद्ग्रामो योजने योजनं वा । कार्तिक्या आग्रहायणी मासे ॥

अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते । २ । ३ । २९ ॥

एतैर्योगे पञ्चमी ॥ अन्य इत्यर्थग्रहणम् । इतरग्रहणं प्रपञ्चार्थम् । अन्यो भिन्न इतरो वा कृष्णात् । आराद्वनात् । ऋते कृष्णात् । पूर्वो ग्रामात् । दिशि दृष्टः शब्दो दिक्शब्दः । तेन सम्प्रति देशका-

लवृत्तिना योगेऽपि भवति । चैत्रात्पूर्वः फाल्गुनः । अवयववाचिना योगे तु न । तस्य परमाम्रेडितमिति निर्देशात् । पूर्वं कायस्य । अञ्चूत्तरपदस्य दिक्शब्दत्वेऽपि षष्ठ्यतसर्थेति षष्ठीं बाधितुं पृथग्ग्रहणम् । प्राक् प्रत्यग्वा ग्रामात् । आच् । दक्षिणा ग्रामात् । आहि । दक्षिणाहि ग्रामात् । अपादाने पञ्चमीति सूत्रे कार्तिक्याः प्रभृतीति भाष्यप्रयोगात् प्रभृतियोगे पञ्चमी । भवात्प्रभृति आरभ्य वा सेव्यो हरिः । अपपरि बहिरञ्चवः पञ्चम्या इति समासविधानाज्ज्ञापकात् बहिर्योगे पञ्चमी । ग्रामाद्बहिः ।

षष्ठ्यतसर्थप्रत्ययेन । २ । ३ । ३० ॥

एतद्योगे षष्ठी स्यात् ॥ दिक्शब्देति पञ्चम्यपवादः । ग्रामस्य दक्षिणतः पुरः पुरस्तात् उपर्युपरिष्टात् ॥

एनपा द्वितीया । २ । ३ । ३१ ॥

एनबन्तेन योगे द्वितीया स्यात् ॥ एनपेति योगविभागात्षष्ठ्यपि । दक्षिणेन ग्रामं ग्रामस्य वा । एवमुत्तरेण ॥

पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् । २ । ३ । ३२ ॥

एभिर्योगे तृतीया स्यात् पञ्चमीद्वितीये च । अन्यतरस्यांग्रहणं समुच्चयार्थम् । पञ्चमीद्वितीये ऽनुवर्तेते । पृथग् रामेण रामाद्रामं वा । एवं विनानाना ॥

करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्य । २ । ३ । ३३ ॥

एभ्यो ऽद्रव्यवचनेभ्यः करणे तृतीयापञ्चम्यौ स्तः ॥ स्तोकेन स्तोकाद्वा मुक्तः । द्रव्ये तु स्तोकेन विषेण हतः ।

दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्। २। ३। ३४॥

एभिर्योगे षष्ठी स्यात्पञ्चमी च॥ दूरं निकटं वा ग्रामस्य ग्रामाद्वा॥

दूरान्तिकार्थेभ्यो द्वितीया च। २। ३। ३५॥

एभ्यो द्वितीया स्याच्चात्पञ्चमीतृतीये॥ प्रातिपदिकार्थमात्रे विधिरयम्। ग्रामस्य दूरं दूराद् दूरेण वा। अन्तिकमन्तिकादन्तिकेन वा। असत्ववचनस्येत्यनुवृत्तेर्नेह। दूरः पन्थाः॥

सप्तम्यधिकरणे च। २। ३। ३६॥

अधिकरणे सप्तमी स्याच्चकाराद्दूरान्तिकार्थेभ्यः॥ कटे आस्ते। स्थाल्यां पचति। मोक्षे इच्छाऽस्ति। सर्वस्मिन्नात्माऽस्ति। वनस्य दूरेऽन्तिके वा। दूरान्तिकार्थेभ्य इति विभक्तित्रयेण सह चतस्रोऽत्र विभक्तयः फलिताः॥ क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्॥ *॥ अधीती व्याकरणे। अधीतमनेनेति विग्रहे इष्टादिभ्यश्चेति कर्तरीनिः॥ साध्वसाधुप्रयोगे च॥*॥ साधुः कृष्णो मातरि। असाधुर्मातुले॥ अर्हाणां कर्तृत्वे ऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च॥ *॥ सत्सु तरत्सु असन्त आसते। असत्सु तिष्ठत्सु सन्तस्तरन्ति। सत्सु तिष्ठत्सु असन्तस्तरन्ति। असत्सु तरत्सु सन्तस्तिष्ठन्ति॥ निमित्तात्कर्मयोगे॥ *॥ निमित्तमिह फलम्। योगः संयोगसमवायात्मकः।

चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्।
बालेषु चमरीं हन्ति सीम्नि पुष्कलको हतः॥

हेतुतृतीयाऽत्र प्राप्ता। सीमाऽण्डकोशः। पुष्कलको गन्धमृगः। योगविशेषे किम्। वेतनेन धान्यं लुनाति।

यस्य च भावेन भावलक्षणम्। २। ३। ३७॥

यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्यात्॥ गोषु दुह्यमानासु गतः॥

षष्ठी चानादरे। २। ३। ३८॥

अनादराधिके भावलक्षणे षष्ठीसप्तम्यौ स्तः॥ रुदति रुदतो वा प्राव्राजीत्। रुदन्तं पुत्रादिकमनादृत्य सन्यस्तवानित्यर्थः॥

स्वामीश्वराधिपतिदायादसाक्षिप्रतिभू-प्रसूतैश्च। २। ३। ३९॥

एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः॥ षष्ठ्यामेव प्राप्तायां पाक्षिकसप्तम्यर्थं वचनम्। गवां गोषु वा स्वामी। गवां गोषु वा प्रसूतः। गा एवानुभवितुं जात इत्यर्थः॥

आयुक्तकुशलाभ्यां चासेवायाम्। २। ३। ४०॥

आभ्यां योगे षष्ठीसप्तम्यौ स्तस्तात्पर्यार्थे॥ आयुक्तो व्यापारितः। आयुक्तः कुशलो वा हरिपूजने हरिपूजनस्य वा। आसेवायां किम्। आयुक्तो गौः शकटे। ईषद्युक्त इत्यर्थः॥

यतश्च निर्द्धारणम्। २। ३। ४१॥

जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्द्धारणं यतस्ततः षष्ठीसप्तम्यौ स्तः॥ नृणां नृषु वा ब्राह्मणः श्रेष्ठः। गवां गोषु वा कृष्णा गौर्बहुक्षीरा। गच्छतां गच्छत्सु वा धावन् शीघ्रः। छात्राणां छात्रेषु वा मैत्रः पटुः॥

पञ्चमी विभक्ते। २। ३। ४२॥

Digitized by Google

विभागो विभक्तम् । निर्द्धार्यमाणस्य यत्र भेद एव तत्र पञ्चमी स्यात् । माथुराः पाटलिपुत्रकेभ्य आढ्यतराः ॥

साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः । २ । ३ । ४३ ॥

आभ्यां योगे सप्तमी स्यादर्चायां न तु प्रतेः प्रयोगे ॥ मातरि साधुर्निपुणो वा । अर्चायां किम् । निपुणो राज्ञो भृत्यः । इह तत्त्वकथने तात्पर्यम् ॥ अप्रत्यादिभिरिति वक्तव्यम् ॥ * ॥ साधुर्निपुणो वा मातरं प्रति पर्यनु वा ॥

प्रसितोत्सुकाभ्यां तृतीया च । २ । ३ । ४४ ॥

आभ्यां योगे तृतीया स्यात् सप्तमी च । प्रसित उत्सुको वा हरिणा हरौ वा ॥

नक्षत्रे च लुपि । २ । ३ । ४५ ॥

नक्षत्रे प्रकृत्यर्थे सति यो लुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थस्तत्र वर्तमानात्तृतीयासप्तम्यौ स्तो ऽधिकरणे ॥ मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत् । मूले श्रवणे इति वा । लुपि किम् । पुष्ये शनिः ।

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा । २ । ३ । ४६ ॥

नियतोपस्थितिकः प्रातिपदिकार्थः । मात्रशब्दस्य प्रत्येकं योगः । प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये परिमाणमात्रे संख्यामात्रे च प्रथमा स्यात् ॥ उच्चैः । नीचैः । कृष्णः । श्रीः । ज्ञानम् । अलिङ्गा नियतलिङ्गाश्च प्रातिपदिकार्थमात्र इत्यस्योदाहरणम् । अनियतलिङ्गास्तु लिङ्गमात्राधिक्यस्य । तटः । तटी । तटम् । परिमाणमात्रे द्रोणो व्रीहिः । द्रोणरूपं यत्परिमाणं तत्परिच्छिन्न इत्यर्थः । प्रत्य-

यार्थं परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम् । प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणमिति विवेकः । वचनं संख्या । एकः । द्वौ । बहवः । इहोक्तार्थत्वाद्विभक्तेरप्राप्तौ वचनम् ॥

सम्बोधने च । २ । ३ । ४७ ॥

इह प्रथमा स्यात् ॥ हे राम ॥

सामन्त्रितम् । २ । ३ । ४८ ॥

सम्बोधने या प्रथमा तदन्तमामन्त्रितसंज्ञं स्यात् ॥ अग्ने तव । आमन्त्रितप्रदेशा आमन्त्रितं पूर्वमविद्यमानवदित्येवमादयः ॥

एकवचनं सम्बुद्धिः । २ । ३ । ४९ ॥

सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसंज्ञं स्यात् ॥ हे राम । सम्बुद्धिप्रदेशा एङ्ह्रस्वात्सम्बुद्धेरित्येवमादयः ॥

षष्ठी शेषे । २ । ३ । ५० ॥

कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिः सम्बन्धः शेषस्तत्र षष्ठी स्यात् ॥ राज्ञः पुरुषः । कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव ॥ सतां गतम् । सर्पिषो जानीते । मातुः स्मरति । एधो दकस्योपस्कुरुते । भजे शम्भोश्चरणयोः । फलानां तृप्तः ॥

ज्ञो विदर्थस्य करणे । २ । ३ । ५१ ॥

जानातेरज्ञानार्थस्य करणे शेषत्वेन विवक्षिते षष्ठी स्यात् ॥ सर्पिषो ज्ञानम् ।

अधीगर्थदयेशां कर्मणि । २ । ३ । ५२ ॥

एषां कर्मणि शेषे षष्ठी स्यात् ॥ मातुः स्मरणम् । सर्पिषो दयनं ईशनं वा ॥

Digitized by Google

कृञः प्रतियत्ने । २ । ३ । ५३ ॥

कृञः कर्मणि शेषे षष्ठी स्याद् गुणाधाने ॥ एधो दकस्योपस्करणम् ।

रुजार्थानां भाववचनानामज्वरेः । २ । ३ । ५४ ॥

भावकर्तृकाणां ज्वरिवर्जितानां रुजार्थानां कर्मणि शेषे षष्ठी स्यात् ॥ चोरस्य रोगस्य रुजा ॥ अज्वरिसन्ताप्योरिति वाच्यम् ॥ * ॥ रोगस्य चोरज्वरः । चोरसन्तापो वा । रोगकर्तृकं चोरसम्बन्धि ज्वरादिकमित्यर्थः ॥

आशिषि नाथः । २ । ३ । ५५ ॥

आशीरर्थस्य नाथतेः शेषे कर्मणि षष्ठी स्यात् ॥ सर्पिषो नाथनम् । आशिषि किम् । माणवकनाथनम् । तत्सम्बन्धिनी याच्ञेत्यर्थः ।

जासिनिप्रहणनाटक्राथपिषां हिंसायाम् । २ । ३ । ५६ ॥

हिंसार्थानामेषां कर्मणि शेषे षष्ठी स्यात् ॥ चोरस्योज्जासनम् । निप्रौ संहतौ विपर्यस्तौ व्यस्तौ च । चोरस्य निप्रहणनं प्रणिहननं प्रहणनं निहननञ्च । नट अवस्यन्दने चुरादिः । चोरस्योन्नाटनम् । चोरस्य क्राथनम् । वृषलस्य पेषणम् । हिंसायां किम् । धानापेषणम् ।

व्यवहृपणोः समर्थयोः । २ । ३ । ५७ ॥

शेषे कर्मणि षष्ठी स्यात् ॥ द्यूते क्रयविक्रयव्यवहारे चानयोस्तुल्यार्थता ॥ शतस्य व्यवहरणं पणनं वा । समर्थयोः किम् । शलाकाव्यवहारः । गणनेत्यर्थः । ब्राह्मणपणनम् । स्तुतिरित्यर्थः ।

दिवस्तदर्थस्य । २ । ३ । ५८ ॥

Digitized by Google

याजुष-ज्यौतिषं

सोमाकरसुधाकरभाष्यसहितम् ।

आर्च-ज्यौतिषं

च

सुधाकरभाष्येण तल्लघुविवरणेन च सहितम् ।

महामहोपाध्यायसुधाकरद्विवेदिसंशोधितम् ।

वाराणस्यां

मेडिकल्हाल्नाम्नि मुद्रायन्त्रालये मुद्रितम् ।

संवत् १९६४ । सन् १९०८ ।

YĀJUSHA-JYAUTISHA

with the Bhāshyas of Somākara Śesha & Sudhākara Dvivedin,

AND

ĀRCHA-JYAUTISHA

with the Bhāshya of Sudhākara Dvivedin and Professor Muralídhar Jhá's explanatory notes

EDITED BY

MAHĀMAHOPĀDHYĀYA SUDHĀKARA DVIVEDIN,

Fellow of Allahabad University

AND

First Professor, Government Sanskrit College, Benares.

PRINTED AT THE MEDICAL-HALL PRESS, BENARES,

1908.

Digitized by Google

Digitized by Google

श्रीजानकीवल्लभो विजयते ।

ज्यौतिष-भूमिका ।

जयति यतिवरार्घ्यैः पूजितोऽनेकधार्घ्यैः
सकलकलनदक्षो राम एकः सुपक्षः ।
द्युमणिमणिषु रक्तः साधुसेवाधिभक्तः
स्वजनजनकनिष्ठः कार्यसिद्धौ पटिष्ठः ॥ १ ॥
रमन्ते योगिनो यत्र श्रमं ते स्वं हरन्ति च ।
नमन्ते भोगिनो यं च तमन्ते वासिनं स्मर ॥ २ ॥

वेदस्य शब्दशास्त्रं मुखं ज्योतिषं नेत्रे निरुक्तं श्रोत्रं कल्पो हस्तौ शिक्षा नासिका छन्दश्च पादद्वयमस्तीति प्रसिद्धत्वाद्वेदः षडङ्ग उच्यते । वेदाङ्गत्वात् षडङ्गानि द्विजैरवश्यमध्येतव्यानि इति सर्वसम्मतत्वात् पठन्ति च तानि वैदिकमतावलम्बिनो लोकाः । षडङ्गपाठः पुण्यपुञ्जोत्पादक इति समवगम्याधीयते लोका एवं वेदचक्षूरूपं याजुषमार्चं च ज्योतिषमपि । अस्य रचना च भारतात् पूर्वं मन्यते । यतो यथाऽत्र पञ्चभिर्वर्षैर्द्वावधिमासौ तथैव महाभारते युधिष्ठिरवनवासे त्रयोदश-वर्षमिते किञ्चित्कालाधिक्यादेव तेषां प्राकट्ये दुर्योधनेन तदसमाप्तौ एषां प्राकट्येन पुनस्तावत्पर्यन्तं पुनरेतैर्वनवासः कर्तव्यो भविष्यतीति भीष्मं प्रत्युक्ते भीष्मवाक्यं विराटपर्वणि ।

"पञ्चमे पञ्चमे वर्षे द्वौ मासावुपजायतः ।
एषामभ्यधिका मासाः पञ्च च द्वादश क्षपाः ॥
त्रयोदशानां वर्षाणामिति मे धीयते मतिः ।
सर्वं यथावच्चरितं यद्यदेभिः प्रतिश्रुतम् ॥

Digitized by Google

एवमेतद् ध्रुवं ज्ञात्वा ततो बीभत्सुरागतः ।
सर्वे चैव महात्मानः सर्वे धर्मार्थकोविदाः ॥
येषां युधिष्ठिरो राजा कस्माद्भूमिं पराङ्मुखु"रिति ।

परम्परातो यूरोपदेशेऽपीदं ज्योतिषं जोन्स, (W. Jones) कोलब्रूक, (Colebrooke) बेन्टली, (Bentley) डेविस, (Davis) वेबर, (Weber) म्याक्सम्यूलर, (M. müller) प्राट, (Pratt) डान्किन्, (W. F. Donkin) ह्विट्नी, (Whitney) थिबो, (G. Thibaut) महाशयेभ्यश्च प्रसिद्धम् ।

याजुषज्यौतिषे सोमाकरशेषेण विरचितं भाष्यं यच्च यूरोपदेशे वेबरादिमहाशयेभ्यः प्रसिद्धं तस्यैव मुद्रणायेह मम प्रयासः ।

'गणितस्कन्धे उपपत्तिमानागमः प्रमाणमिति मतमवलम्ब्य सोमाकरपूर्वतोऽपि याजुषे चार्चे च ज्यौतिषे बहुत्र भ्रष्टान् पाठान् गणितोपपत्त्या संशोध्य थिबोमहाशयेन सन् १८७७ ख्रीष्टाब्दे एशियाटिकसोसाइटीपत्रे कतिपयश्लोका व्याख्याताः । ततः सन् १८९६ ख्रीष्टाब्दे स्वकृतभारतीयज्योतिःशास्त्रनामग्रन्थे शङ्करबालकृष्णदीक्षितेन कतिपयास्ततोऽन्यश्लोकाश्च महाराष्ट्रभाषायां व्याख्याताः । गतवर्षे सन् १९०६ ख्रीष्टाब्दे बार्हस्पत्यनाम्ना कविना थिबोमहाशयानामर्थान् विलिख्य हिन्दुस्तानरिव्यू (Hindustan Review) नामकमासिकपत्रे मार्चमासादारभ्य नोवेम्बरमासपर्यन्तं निजधियाऽतिपरिश्रमेण प्रायः सर्वेषां श्लोकानामङ्गलभाषायां व्याख्यानं प्रकाशितम् । तत्र याजुषे 'भांशाः स्युरष्टकाः कार्याः' 'कार्या भांशाष्टकास्थाने' 'याः पर्वभादानकलाः' 'तिथिमेकादशाभ्यस्तां' 'नवकैरुद्गतोऽंशः स्यात्' 'एकादशभिरभ्यस्य' 'सूर्यर्क्षभागान्नवभिर्विभज्य' 'त्र्यंशो भशेषो दिवसस्य भागः' इत्यादीनाम् । आर्चे 'श्रविष्ठाभ्यो गुणाभ्यस्तान्' इत्यादीनां च सद्व्याख्यानं दूरतो भ्रष्टं विलोक्य तस्यैव बार्हस्पत्यस्याग्रहेण सन्निधावां चानुरोधेन तामेव पाठशोधनरीतिमवलम्ब्य वैदिकलोकोपकाराय मया नवीनं भाष्य-

मरचि यच्च सन् १९०६ ख्रीष्टाब्दस्य दिसेम्बरमासे वाराणस्यां प्राभाकरी-मुद्रणयन्त्रालये मुद्रितं पश्चाद्बार्हस्पत्यकृतशुधाखण्डनेन झोपा[१]ख्यमैथिलवृन्दमण्डनेन च सर्वत्रैव विख्यातं समावृतं च । इदानीं स्वभाष्ये ये ये विशेषा अर्थास्तेषां प्रदर्शनायेदं सोमाकरभाष्यं महताऽऽयासेन संशोध्य समुचितसाधुपाठांश्च टिप्पण्यां निवेश्य सुजनविद्वज्जनरञ्जनाय निजभाष्यसहितमिह मुद्रितम् । अस्यान्ते पाठकानां सौकर्याय निजनिर्मितमार्च-ज्यौतिषभाष्यं मन्दानां बोधाय काशिकराजकीयप्रधानसंस्कृतपाठशाला-ध्यापकज्यौतिषाचार्यझोपाख्यश्रीमुरलीधरशर्मनिर्मितलघुसुधाकरभाष्यविवरणं तदीयमङ्गलभाषायां विशिष्टार्थनिरूपणं (Appendix) च निवेशितम् ।

याजुष–१८ श्लोकस्य सोमाकरभाष्ये "पर्वणां व्यवस्थेत्येक आहुः" "अन्ये त्वाहुः" इत्यादिलेखेन याजुषज्यौतिषे बहवो भाष्यकाराः सन्तीति स्फुटम् । परन्तु तेषां भाष्याणि अद्यावधि नोपलब्धानि ।

सोमाकरभाष्यमुद्रणावसरे काशीस्थपण्डितबालमुकुन्दमालवीयस्य पुस्तकद्वयं लब्धं यत्र प्रथमपुस्तके (= बा० प्र) मध्ये संवत् १८९५, अन्ते च संवत् १९२२ लिखितम् । द्वितीयपुस्तके (बा० द्वि०) अन्ते श्लोकेन संवत् १८२७ फाल्गुनशुक्लदशमी रविवारे, तथा गद्येन संवत् १८८३ कार्त्तिककृष्णद्वादशीति लेखः ।

काशीस्थदीक्षितरामचन्द्रजडीसंज्ञकस्य पुस्तकद्वयं लब्धं यत्र प्रथमपुस्तके सं० १९१७ भाद्रपदकृष्णद्वादश्यां भौमे लिखितम् । द्वितीयपुस्तके लिपिकालो नास्ति अन्ते 'इति श्रीशेषनागकृतं ज्योतिःशास्त्रभाष्यं समाप्तम्" इति लेखः । अवलोकनेनेदं प्राचीनं भाति ।

काशिकराजकीयसंस्कृतपाठशालापुस्तकालयाध्यक्षपण्डितविन्ध्येश्वरीप्रसादस्यातिप्राचीनं पुस्तकं लब्धम् । तचान्ते "शके नन्दनसंवत्सरा-

(१) खण्डनमण्डनाय वाराणस्यां प्राभाकरीमुद्रणयन्त्रालये मुद्रिता झोपाख्यमैथिलवर्य्यैरुद्घाटिता 'चिकित्सा' विलोक्या ।

न्तर्गतवेदार्थविवरणमयां शेषनीलकण्ठेन लि (खि) तं स्वार्थं परार्थं चेति लेखः ।

एवं पुस्तकपञ्चकं निजं चैकं प्राचीनं पुस्तकं सङ्गृह्य गणितयुक्त्या च मया साधुपाठा विचारिताः ।

सर्वेषु पुस्तकेषु प्राय एकरूपेण भ्रष्टाः पाठा लिखिताः सन्ति । बा॰ द्वि॰ पुस्तके कुत्रचित् शुद्धः पाठः ।

सोमाकरभाष्यस्योपलब्धपुस्तकेषु पाठानां कीदृशी दुर्दशेति सर्वेषां विदुषां प्रसिद्धमेवातो मच्छोधितपाठानामवलोकनेन पक्षपातरहितानां सारासारग्राहिणां सुधियामग्रे मदीयः परिश्रमः स्फुट एव भविता किमिहात्मस्तुत्या ।

याजुषे आर्चे च ज्योतिषे पाठान्तरवशादध्याहारेण शब्दानामर्थान्तरेण च मदीयभाष्ये या भिन्ना भिन्ना व्याख्यास्ताः पश्यन्तु सुजना मच्छोधितपाठाः समीचीना वा सोमाकरसम्मता इति च मध्यस्थबुद्ध्या भृशं परीक्षन्तां किमिह शपथपरिहारेण । मच्छोधितमपि सोमाकरभाष्यं पुनः पुनः परिचिन्त्य सुधियः साधुशब्दैर्लोकोपकाराय शोधयन्तु च ।

सोमाकरभाष्ये श्रुतिवाक्यानि यावच्छक्यं शोधितान्यपि सुधीभिर्विशेषतो विचिन्त्यानि ।

सोमाकरः शेषकुलोद्भूतः काशीनिवासी कश्चिद्गुर्जरजात्यो ब्राह्मणो ज्योतिषशास्त्रगहनविषयानभिज्ञ इति तल्लेखेनानुमीयते । अस्य जन्मादिसमयश्च नाद्यावधि विदितः ।

सम्प्रति ज्ञानलवदुर्विदग्धा अनेके यूरपभाषाविज्ञा भारतवर्षीयाः प्रायः स्वप्रतिष्ठाप्रदर्शनाय सत्यपथमपहाय दुराग्रहेण निजवाग्बलेन च ज्योतिषादिवैदिकग्रन्थानामन्यथार्थान् कुर्वन्ति अत-

एतदुपसंहारे सुजनान् विदो विनयेन प्रार्थये

तुष्यन्तु सुजना बुद्ध्वा विशेषान् मदुदीरितान् ।
अबोधेन हसन् मां हि दुरत्वः सन्तोषमेष्यति ॥

वेधागकालघटिकामितिसाधनाय
सर्वे व्यलेखि लगधेन यथोक्तमत्र ।
सोमाकरेण निजनिर्मितभाष्यमध्ये
सत्यं तदुक्तमिह तर्हि ममाग्रहो न ॥ इति

सुधाकरद्विवेदी ।

Digitized by Google

Digitized by Google

याजुषैकोनचत्वारिंशश्लोकभाष्यादिना स्फुटम् ॥ १८ ॥

इदानीं लग्नानयनं चन्द्रर्तुसाधनं चाह ।

श्रविष्ठाभ्यो गणाभ्यस्तान् प्राग्विलग्नान् विनिर्दिशेत्।
स्वार्कान्मासान् षडभ्यस्तान् विद्याच्चान्द्रमसानृतून् ॥१९॥

गणो भगणः सप्तविंशतिस्तेन श्रविष्ठोदयतो ये इष्टकालभागास्तेऽभ्यस्ता गुणनीयास्तान् भांशान् श्रविष्ठाभ्यो धनिष्ठाभ्यो गणयित्वा प्राक् प्राग्दिशि विलग्नान् भांशान् विनिर्दिशेत् कथयेद्गणक इति शेषः । स्वार्कान् स्वनाक्षत्रान् मासानेव षडभ्यस्तान् षड्गुणितान् चान्द्रमसान् चन्द्रसंबन्धिनो गणक ऋतून् विद्याज्जानीयादिति ।

अत्रोपपत्तिः । अत्रैकस्य नक्षत्रस्य चतुर्विंशत्यधिकशतभागाः कृतास्तेंऽशा नक्षत्रांशा वा भांशा उच्यन्ते । एवं भदिनस्यापि चतुर्विंशत्यधिकशतमिता भागास्ते भदिनभागांशाः कथ्यन्ते । श्रविष्ठातो नाक्षत्रा ये इष्टकालभवा अंशा भागास्त एवेष्टकालांशा ज्ञेयाः । एकस्मिन् भदिने वा चतुर्विंशत्यधिकशतसमेषु भदिनभागेषु भचक्रभ्रमणेन प्राग्दिशि सर्वेषां नक्षत्राणां वा २७ × १२४ भांशानामुदयोऽतोऽनुपातो यदि १२४ भदिनभागेषु

२७ × १२४ नक्षत्रभागानामुदयास्तदेष्टभदिनभागेषु किं लब्धाः श्रविष्ठातो भांशा $= \frac{२७ \times १२४ \times इभदिभां}{१२४} = २७ \times इभदिभां$ । अत उपपन्नं लग्नानयनम् । अत्र बार्हस्पत्यादीनां व्याख्यानं न साधु । कुत्रापि-अभ्यस्तपदेन योगो न गृह्यत इति । चन्द्रैकभगणकालो हि नक्षत्रमास इति याजुषैकत्रिंशश्लोकेन स्फुटम् । एकस्मिन् चन्द्रभगणकाले च तत्षड्-ऋतवोऽतो नक्षत्रमासाः षड्गुणास्तदृतवो भवन्तीति सर्वं निरवद्यम् ॥ १९॥

इदानीं तिथिमानमाह ।

अतीतपर्वभागेभ्यः शोधयेद्द्विगुणां तिथिम् ।
तेषु मण्डलभागेषु तिथिनिष्ठां गतो रविः ॥ २० ॥

याजुषद्वाविंशश्लोकभाष्यादिना स्फुटम् ॥ २० ॥

Digitized by Google

इदानीमिष्टतिथिसमे नक्षत्रे भकला आनयति ।

याः पर्वभादानकलास्तासु सप्तगुणां तिथिम् ।
प्रक्षिपेत् तत्समूहं तु विद्याद्भादानिकाः कलाः ॥२१॥

याजुषेऽविंशश्लोकभाष्यादिना सर्वं स्फुटम् । अत्र किञ्चित्पाठभेदो नार्थान्तरकर इति ॥ २१ ॥

इदानीं दिनमानमाह ।

यदुत्तरस्यायनतो गतं स्या-
च्छेषं तु यद्दक्षिणतोऽयनस्य ।
तदेकषष्ट्या द्विगुणं विभक्तं
सद्वादशं स्याद्दिवसप्रमाणम् ॥ २२ ॥

याजुषचत्वारिंशश्लोकभाष्यादिना सर्वं स्फुटम् ॥ २२ ॥

इदानीमृतुशेषमधिशेषं वाऽऽह ।

यदर्धं दिनभागानां सदा पर्वणि पर्वणि ।
ऋतुशेषं तु तद्विद्यात् संख्यया सह पर्वणाम् ॥ २३ ॥

याजुषेकचत्वारिंशश्लोकभाष्यादिना सर्वं स्फुटम् ॥ २३ ॥

इदानीं वेधोपायमाह ।

इत्युपायसमुद्देशो भूयोऽप्येवं प्रकल्पयेत् ।
ज्ञेयराशिं गताभ्यस्तं विभजेज्ज्ञानराशिना ॥ २४ ॥

याजुषद्विचत्वारिंशश्लोकभाष्यादिना सर्वं स्फुटम् ॥ २४ ॥

इदानीं नक्षत्रदेवता आह ।

अग्निः प्रजापतिः सोमो रुद्रोऽदितिर्बृहस्पती ।
सर्पाश्च पितरश्चैव भगश्चैवार्यमाऽपि च ॥ २५ ॥
सविता त्वष्टाऽथ वायुश्चेन्द्राग्नी मित्र एव च ।
इन्द्रो निर्ऋतिरापो वै विश्वेदेवास्तथैव च ॥ २६ ॥
विष्णुर्वसवो वरुणोऽज एकपात् तथैव च ।
अहिर्बुध्न्यस्तथा पूषा अश्विनौ यम एव च ॥ २७ ॥

Digitized by Google

नक्षत्रदेवता एता एताभिर्यज्ञकर्मणि ।
यजमानस्य शास्त्रज्ञैर्नाम नक्षत्रजं स्मृतम् ॥ २८ ॥

याजुषस्य ३२-३४ श्लोकभाष्येण सर्वं स्फुटम् ॥ २५-२८ ॥

इदानीमुपसंहारमाह ।

इत्येतन्मासवर्षाणां मुहूर्तोदयपर्वणाम् ।
दिनर्त्वयनमासानां व्याख्यानं लगधोऽब्रवीत् ॥२९॥

याजुषेऽन्तिमश्लोकभाष्येण स्फुटम् ॥ २९ ॥

इदानीं फलस्तुतिमाह ।

सोमसूर्यस्तृचरितं लोकं लोके च सन्ततिम् ।
सोमसूर्यस्तृचरितं विद्वान् वेद विदश्नुते ॥ ३० ॥

याजुषचित्वारिंशश्लोकभाष्येण स्फुटम् । अत्र पूर्वोत्तरार्ध-
योर्वैपरीत्यं लेखकदोषत इति स्पष्टम् ॥ ३० ॥

इदानीमिष्टविषुवति तिथ्यानयनमाह ।

विषुवत् तद्गुणं द्वाभ्यां रूपहीनं तु षड्गुणम् ।
यल्लब्धं तानि पर्वाणि तदर्धं सा तिथिर्भवेत् ॥ ३१॥

याजुषत्रयोविंशश्लोकभाष्यादिना सर्वं स्फुटम् । अत्र किञ्चि-
त्पाठभेदस्तदर्थस्यैव द्योतेति न दोषाय ॥ ३१ ॥

इदानीं कस्य युगस्य कालज्ञानमित्याशङ्क्याह ।

माघशुक्लप्रवृत्तस्य पौषकृष्णसमापिनः ।
युगस्य पञ्चवर्षस्य कालज्ञानं प्रचक्षते ॥ ३२ ॥

याजुषपञ्चमश्लोकभाष्येण स्फुटम् । अत्र किञ्चित्पाठभेदो
न दोषायेति ॥ ३२ ॥

इदानीं वक्ष्यसु विषुवत्सु तिथीनाह ।

तृतीयायां नवम्यां च पौर्णमास्यां त्रिकत्रिके ।
द्वादश्यां विषुवान् प्रोक्तो द्वादश्यां दशमं भवेत् ॥ ३३॥

३१ श्लोकोक्तक्रियाया उदाहरणरूपोऽयं श्लोकः । यथा यदि विषुवत् = १ । तदा तदुक्तप्रकारेण सपर्वतिथिमानम् ।

= ६ (२×१−१) प + $\frac{१}{२}$ (२×१−१) ति = ६ पर्वाणि + ३ तिथयः । पर्वणां प्रयोजनाभावात् तृतीया तिथिरेव पठिता । एवमन्यास्तिथयः समायान्ति । अतस्तृतीयायां प्रथमो नवम्यां द्वितीयः पौर्णमास्यां तृतीयस्त्रिकद्विके षष्ठ्यां चतुर्थो द्वादश्यां पञ्चमश्च विषुवान् प्रोक्त आचार्यैरिति शेषः । एवं पुनस्तृतीयादावन्यानि विषुवन्ति भूत्वा द्वादश्यां तिथौ दशमं विषुवद्भवेदिति । अत्र बार्हस्पत्यं विख्याख्यानं न रुचिकरं तथाच "तृतीयां नवमीं चैव पौर्णमासीं त्रयोदशीम्"—इत्यादिपाठो ऽपि न साधुरिति ॥ ३३ ॥

इदानीं कदा चतुर्दश्यां यज्ञार्थमुपवासः कार्य इति कथयति ।

चतुर्दशीमुपवसथस्तथा भवे-
यथोदितो दिवसमुपैति चन्द्रमाः ।

यथोदितश्चन्द्रमाश्चतुर्दशीं दिवसमुपैति तथोपवसथो भवति ।

अत्रैतदुक्तं भवति । यथा शुक्लद्वितीयादेः क्रमेणोदितश्चन्द्रश्चतुर्दशदिनं प्राप्नोति तथा सा चतुर्दशी यज्ञार्थं वेदोक्तविधिनोपवसथो यागपूर्वदिवसो भवति । अत्र मन्मते श्लोकोत्तरार्धस्य त्रुटिः । अत्र परम्परात उत्तरार्धस्यानुष्टुप्छन्दोऽर्धेन पूर्त्तिरिति न युक्तं छन्दसोर्भेदादिति सुज्ञैर्भृशं विचिन्त्यमिति ॥

इदानीं द्वितीयवर्षप्रवेशकालमाह ।

माघशुक्लाह्निको भुङ्क्ते श्रविष्ठायां च वार्षिकीम् ॥ ३४ ॥

माघशुक्लाह्निको द्वितीयमाघशुक्लप्रतिपत्तिथावाह्निकः कर्मकर्त्ता श्रविष्ठायां धनिष्ठायां सर्वां वार्षिकीमेकवर्षसंबन्धिना यज्ञक्रियां भुङ्क्तेऽश्नुते । तस्माद्दिनादन्यवर्षारम्भोऽतो द्वितीयवर्षाह्निकक्रियारम्भो भवतीत्यर्थः । अत्रापि मन्मते पूर्वार्धश्लोकस्य त्रुटिरिति वैदिकैर्भृशं विचिन्त्यमिति ॥ ३४ ॥

इदानीं गणितप्रशंसामाह ।

यथा शिखा मयूराणां नागानां मणयो यथा ।
तद्वद्वेदाङ्गशास्त्राणां ज्यौतिषं मूर्धनि स्थितम् ॥ ३५ ॥

याजुषचतुर्थश्लोकभाष्येण स्फुटम् । अत्र 'गणितं' स्थाने 'ज्योतिषम्' इति पाठो न विशेषार्थप्रद इति ॥ ३५ ॥

इदानीं ज्योतिषस्य वेदाङ्गत्वे सयुक्तिमाह ।

वेदा हि यज्ञार्थमभिप्रवृत्ताः
कालानुपूर्वा विहिताश्च यज्ञाः ।
तस्मादिदं कालविधानशास्त्रं
यो ज्यौतिषं वेद स वेद यज्ञान् ॥ ३६ ॥

याजुषतृतीयश्लोकभाष्येण सर्वं स्फुटम् ॥ ३६ ॥

गुणरसाङ्कधरामितवत्सरे कृत निरीक्ष्य मतान्तरसंग्रहम् ।
असितपौषदलात्र्यसिते वरं रघुवरस्य बलेन सुधाकरः ॥

इति सुधाकरभाष्यसहितमार्चज्यौतिषं समाप्तम् ।

७६१

श्रीगणेशाय नमः ।

श्रीमिथिलायै नमः ।

श्रीईमद्गुरुरचित-याजुषार्चज्योतिषवेदाङ्ग-भाष्योपरि लघुविवरणम् ।

श्रीमद्द्विवेदिगुरुवर्यपदारविन्द-
सच्चिन्तनस्फुरितबोधलवः करोति ।
झोपाख्य-चानन-सुतो मुरलीधरोऽस्य
भाष्यस्य तद्विवरणं लघु-संशयघ्नम् ॥ १ ॥

अस्तीहास्मिन् सत्यथाख्ये विमूढगूढे 'सुधाकर-भाष्ये' प्राचीनरीतिप्रमुखानां ज्योतिषसिद्धान्तगहनगोलगणितवञ्चितानां जनानां प्रायोवृथा संशयावसर इति सप्ताधिकैकोनविंशति—१९०७तमख्रीष्टाब्दस्य 'मार्च'-मासीय-'हिन्दुस्तान-रिव्यू'नाम्नो मासिकपत्रस्य कस्यचिदङ्गलभाषामयस्य क्रोडीकृत-बार्हस्पत्य-लेखाडम्बरस्यावलोकनतो व्यर्थगुरुनिन्दां सोढुमक्षमैरस्मद्देशीयमैथिलवृन्दैः प्रकाशितायाश्चिकित्साया निश्चित्य तल्लघुभाष्यविवरणनिर्माणमावश्यकमतो ममोद्यमः स्तोकोऽपि सहृदयानां तद्भाष्यरसिकानां मनोमोदकायेत्यतः प्रथमं तावद्याजुषे सुधाकर-भाष्ये तदाह ।

(१) श्लोके 'पञ्चसंवत्सरमयम्'-इति पाठे सोमाकरेण रचिते व्याख्यातेऽपि तत्पदस्य युगे सम्बन्धात् तद्युगाध्यक्षं प्रजापतिं प्रणम्येति विशेषणं वरीयोऽतो गुरुशोधितः पाठ एव शोभनः । अनेके च्चवयस्तत्र शुचि-नामा कश्चिदृषिर्विरिह का नाम शङ्का । मन्मते शुचिश्रयस्यैव लघुनाम शुचिरिति । द्रष्टव्यं गोत्रप्रवरनिबन्धकदम्बकम् ।

Digitized by Google

(४) श्लोकानन्तरं 'ये बृहस्पतिना' इत्यादि पद्येन पञ्चसंवत्सरात्मके युगे संवत्सरानयनं यत् कृतमिह बृहस्पतिरिदानीं कं राशिमाश्रित्य वर्तत इत्यवगमाय ज्योतिषवेदाङ्गे न कश्चित् प्रकारोऽस्त्यतः 'इदं पद्यं क्षेपक'मित्यत्र प्रायो न कस्यापि संशयः ।

(६) श्लोके 'य एव माघः स एव तपः' इत्यत्र तप इति युगपद्यानुरोधतो नपुंसकम् । तस्य माघमासज्ञापनं सोमाकरभाष्यानुकूलम् । "तपा माघेऽथ फाल्गुने" इति लिङ्गानुशासनमप्यनुशास्ति ।

तत्र खिष्टीयपूर्वचन्द्रधनिष्ठायुतितो ज्योतिषवेदाङ्गसमयकल्पनं वस्तुतो जल्पनमिव । क्रान्तिवृत्तस्य समानसप्तविंशतिभागानां नक्षत्रकल्पनाविरहात् ।

(७) श्लोकोपपत्तौ ये भगणादयो गृहीतास्ते तु पञ्चसिद्धान्तिकाप्रकाशिकायां गुरुवरैर्लिखिता एव । अतोऽन्यत् सर्वं ज्योतिर्विदां सुस्पष्टमिह मूढकाठिन्यमास्ताम् ।

(८) श्लोके 'तथाह्निकायास्तु भवेत् प्रमाणम्'इति ज्योतिषवेदाङ्गोक्तवचनमाश्रित्यैव स्वभाष्ये दिनरात्रिमानयोर्युक्तिः प्रदर्शिता । यथा उत्तरायणतो यदि किल गतदिवसाः=२५ तदोत्तरायणारम्भदिनानन्तरं पञ्चविंशे दिवसे तदारम्भदिनमानात् २५ प्रस्थमितं दिनप्रमाणमधिकम् । तदारम्भे चेद् दिनमानम् २४ घटिकास्तदा तद्दिने दिनमानम् २४ घ०+२५ प्र

$$=\left(२४+\frac{२५}{\frac{६१}{४}}\right)\text{घ}=\left(२४+\frac{१००}{६१}\right)\text{घ}=\left(२५+\frac{३९}{६१}\right)\text{घ}=\left(१२+\frac{५०}{६१}\right)\text{मुहू०}$$

इदमेव प्रमाणं 'यदुत्तरस्यायनतो गतं स्यात्'-इत्यादियाजुष-५० श्लोकतोऽपि तदेव यदि 'यदेव षष्ठ्या' इह 'तदेकषष्ठ्या' अयं पाठो भवेत् । अतोऽनुमीयते श्रीपतिप्रभृतयः प्राचीना अप्येवमेव व्यवहृतिं मनसि निधाय पयसां षष्टिपलैः पूर्णा जलघटी इत्यादितः समयविभागाः स्वस्वग्रन्थेषु लिलिखुः । न ह्येतेन तुलामापनविभागा बुद्धिमद्भिर्विभावनीया इति । सर्वत्रैव ज्योतिषसिद्धान्ते चतुर्विंशत्यंशा एव परमक्रान्तिभागाः स्वीकृताः ।

ततः सावनैर्भे चराद्यानयनं सुस्पष्टमेव । अहोरात्रह्रासवृद्धितः सम्प्रति प्रचरितां युक्तिमवलम्ब्य ज्योतिषवेदाङ्गनिर्माणदेशाक्षांशोहः । गुरुवराणां निःसन्दिग्धाऽपि वृथाऽभिमानिनां मोहायैव ।

(९) श्लोके परम्परातो लेखकाद्यनभिज्ञतया 'द्विर्युग्माद्यम्' इति भ्रष्टपाठं संशोध्य 'द्विर्युग्मम्' इति सयुक्तिकः पाठः सर्वैर्धार्यः । 'गणितस्कन्धे उपपत्तिमानेवागमः प्रमाणम्' इत्यावृत्त्यैव ज्योतिषसिद्धान्तप्रचारोऽन्यथाऽनर्थापत्तेः ।

सर्वत्रैव ऋतुशब्दतोऽत्र षट्संख्या गृहीतेह केषां मन्दानामाशङ्का । गुरुवरवासनातः 'प्रथमं सप्तमम्' इत्यादिपाठादपि षडन्तरिते तिथ्यावयनाद्या भवन्त्यत ऋतुशब्देन षट्संख्याग्रहणे 'द्विर्युग्मम्' इति पाठे च ज्योतिषवेदाङ्गनिर्मातृमर्म सुरक्षितम् । अन्यथा

"योऽन्यथाऽन्यथार्थं करणं यच्चान्यथा करोत्यबुधः ।
स पितामहमुपगम्य स्तौति नरो वैधिकेनार्योम् ॥"

इति वराहोक्तिः कुत्र संघटते ।

(१०) श्लोके 'धाता क' इत्यत्र धाता क इति पदद्वयमेकार्थबोधकमवगम्य तत्र 'अर्यमा' इति पाठः समुचित एव । सोमाकरोऽपि निजभाष्ये सन्देहापनोदनायैव 'धाताऽर्यमेति मन्त्रवर्णात्' इत्युक्तवान् । अथात्र २७ सौरनक्षत्रैर्यदि ३६६ एते रविसावनदिवसा लभ्यन्ते तदा ४½ सौरनक्षत्रैः क इति लब्धा एकर्तौ रविसावनाहाः $= \frac{३६६ \times ९}{२७ \times २} =$ ६१ । एवमेकस्मिन्नृतौ चन्द्रदिवसा द्वाषष्टिः । एतेन १९,५१,५६पृष्ठेषु 'द्विनवचयसम्भूतम्' इत्यादि गर्गोक्तमप्युपपद्यते ।

(११) श्लोकस्य पूर्वार्धे साम्यान्यतोऽब्दादिनामयनाय गुरुवरभाष्यत एव वेदाङ्गकथनं सङ्गच्छते । तच्च सैकनिरेककरणं सिद्धान्तविदां सुस्पष्टमेव । अस्योत्तरार्धे न कश्चिद्विशेषः किन्तु वृथैव गणितानभिज्ञानां सोमाकरादीनां वागाडम्बरमिति ।

Digitized by Google

(१२) श्लोकेऽपि न कश्चिद्विशेषः । द्विवेदिभाष्यतः सर्वं स्पष्टमेव । तत्र धूलिप्रक्षेपणमिव वाङ्मात्रवर्षणं कस्य हास्याय न भवेदिति ।

(१३) श्लोकस्य यामपरं सोमाकरव्याख्यानमास्ताम् । किन्त्विह स्फुटार्थमेव 'आप' एतत्स्थले 'गत' इति पाठो गुरुवरैरपि स्वीकृतः । अथात्र चन्द्रपर्वगणानयनेऽधिमासशेषत्यागो ज्योतिर्विसिद्धान्तेऽतिप्रसिद्ध इति । अथात्र भाष्ये 'शङ्करबालकृष्णदीक्षितशोधितानुरूपं समीचीनम्' इत्यस्यायमभिप्रायो यथा दीक्षितव्याख्याने त्रुटिस्तथैव बार्हस्पत्यव्याख्यानेऽपीति ।

"This total should be farther increased by two for every sixty of the total" (see his Jyotisha Vedánga p. 41)

अत्र This total should be farther increased by whole number of the quotient obtained by multiplying by two and dividing by sixty the total.

एवमुचितम् ।

अत्र ज्योतिषमर्मविज्ज्ञतस्याधिपर्वग्रहणं राहुरिवेत्यत्रोदाहरणम् ।

कल्प्यते तृतीययुगे द्वितीयपर्वणि पर्वगणानयनमभीष्टम् । तदा बार्हस्पत्यव्याख्यातः ३ − १ = २ । इदं द्वादशगुणम् = २ × १२ = २४ । इदं द्विगुणम् = २४ × २ = ४८ । इदं गतपर्वद्वयेन युतम् = ५० । इदं षष्टितोऽल्पमतः पर्वगणः = ५० ।

अथ बार्हस्पत्यगणितेन

$$\text{पर्वगणः} = [(य - १) \times १२ \times २ + इ] \times (१ + \frac{२}{६०})$$

$$= [(३ - १)१२ \times २ + २] \times (१ + \frac{२}{६०})$$

$$= (४८ + २)(१ + \frac{२}{६०}) = ५० + \frac{५० \times २}{६०} = ५१ + \frac{४०}{६०} ।$$

एतद्द्वयमसाधु । यतस्तद्गणितेनाधिपर्वसहितः पर्वगण आयाति तत्त्यागेन वास्तवः पर्वगणः ५१, सोऽयं द्विवेदिव्याख्यानेन तदुपपत्त्या च सिद्ध्यतीति प्रत्यक्षबाधो हि महादूषणमिति विलोकयन्तु गणितरसिका ज्योतिर्विदः ।

(१४) श्लोके पारिभाषिके न कश्चिद्विशेषस्तथापि द्विवेदिपाठ एव श्रेयानिति ।

(१५) श्लोके पूर्वापरप्रसङ्गेन भांशानयनमेवोचितमतो गुरुवरशोधितः पाठ एव समुचितः । इह द्वादशपक्षसम्बन्धिनो भांशा अनुपयुक्ता अपि कैश्चित् साध्यन्ते वृथा तत्परिश्रमस्तेभ्य एव रोचते । न कोऽप्यस्य १९ श्लोके सम्बन्धो यस्तैर्दत्त इति ।

अत्रानुवादे 'एकादशगुणाः' एतेन 'एकादशयुतः' इत्यर्थः कस्मात् तथा 'द्वादशकोद्धृताः'' इत्यनेन द्वादशभक्ता इति च कस्मा अन्यस्मै गणितज्ञाय रोचेत? । अथैतद्व्याख्याने या रीतिः प्रदर्शिता सा च श्लोकार्थतः कथमपि न सिद्ध्यतीत्यन्यद्भुक्तमन्यद्वान्तमिव । अथाच तत्कल्पितशङ्कासमाधाने अपि तामेव दशामालम्बते (see 48—49 pages of his Jyotishavedánga)

अथ यदि पक्षाः = १४ । तदा तद्व्याख्यानतो भांशाः =
८ × १ + ७३ × २ = ८ + १४६ = १५४ । नक्षत्रभांशतष्टतो भांशाः = ३० गौरवेण सिद्ध्यन्ति । गुरुवररचितपाठतश्च भांशाः = १४ × ११ = १५४ नक्षत्रभांशतष्टतो भांशाः = ३० । एते लाघवेन श्लोकार्थतस्तद्व्यासनया च सिद्ध्यन्ति । एवं यदि पक्षाः = १५, तदा तद्व्याख्यानतो भांशाः

८ × १ + ३ × ७३ = ८ + २१९ = २२७ नक्षत्रभांशतष्टतो भांशाः = ८३ ।

गुरुवरशोधितपाठतश्च भांशाः ११ × १५ + ६२ = १६५ + ६२ = २२७ नक्षत्रभांशतष्टास्ते ८३ लाघवेन सिद्ध्यन्तीति निरवद्यम् ।

(१६) श्लोके 'स्यादूनः' इत्यत्र 'स्याद्युतः' इति गुरुवरशोधितपाठेनैव सूक्ष्मगणनाऽन्यथा स्थूलगणनैव हस्तगता । अथ ज्यौतिषवेदाङ्गे श्लोकपाठानां क्रमभङ्गो वैदिकानां कण्ठेन पाठकरणादिति सर्वेषामेकमतम् । अतो विंशश्लोकानन्तरं गुरुवरैर्यथार्थतिथिनक्षत्रानयनार्थमेव स्वभाष्येऽयं शोधितः श्लोको निवेशितः । तद्व्याख्या च सूक्ष्मनक्षत्रार्थे

साक्षी । तत्र हि सोमाकरवद्व्याख्यानेन वेदाङ्गे स्थूलप्रकारप्रकाशनेन दोष एवेति । एवमेवार्चस्य त्रयोदशश्लोकस्य तदर्थप्रतिपादको द्विवेदिशोधित एव समुचितः । तत्र तिथिनक्षत्रान्यत्रश्लोकत्रुटिर्लेखकभ्रान्त्या पाठकभ्रान्त्या वा प्रसिद्धत्वादिति गुरुवरोक्तं ज्योतिषसिद्धान्तविदां किमुत न मान्यं वेदाङ्गस्य सूक्ष्मत्वसिद्धेरिति दिक् ।

(१७) श्लोके यदि यागकालपरं सोमाकरभाष्यवदन्येषां व्याख्यानं गणितयुक्तिरहितं वस्तुतः श्रुतिविरुद्धमपि श्रुतिसम्मतं तत्रालमस्माकमाग्रहेण । यत्किञ्चित्पाठाद्विपरिवर्तनेनैव लेखकादिदोषजनिताऽशुद्धिर्गुरुवरमाश्रित्य शोधिता स्फुटार्थप्रदाऽपि चर्वाचिन्तं वञ्चयतीव । अत्र द्विवेदिभाष्ये भांशतो नक्षत्रानयनोपपत्तिः प्राचीनकुट्टकरीतितः सर्वमान्यैव । 'नक्षत्रमाश्रि' अत्र पदच्छेदबलाद्भ्रमलिङ्गभ्रान्तिग्रासत्वाय बार्हस्पत्यो वाचस्पत्यकोशं किमु न पश्यति ।

(१८) श्लोके 'मृ' यदि ह्रस्व एव स्यात् तर्हि छन्दोभङ्गदोषदानेन ज्योतिषवेदाङ्गकारस्यापकार एव बार्हस्पत्येन विहितः । तथैव वेदाङ्गकारसम्मत—'चित्-स्थाने 'वि' करणेन तेनैव बार्हस्पत्येन सुधा-स्थाने हालाहलं न प्रक्षिप्तं किमु येन वेदाङ्गच्छन्दसो वृथैव मृतिरजायत । अथात्र वस्तुतः प्राचीनज्योतिषशास्त्रापरिचितेन तेनानियतसमीकरणस्य (Indeterminate equation) गौरवक्रियैवालोचि । अत्र गुरुवरलिखिता प्राचीनरीतिः १७ श्लोकोपपत्तौ प्रकटितैव । अत्र सोमाकरभाष्यं हि दर्शनार्हम् । (द्र० अस्य पुस्तकस्य पृ० ३०–३२)

(१९) अहो ! येऽष्टकास्वेव विभ्रमन्ति ते कथं परःशतं वैदिकसिद्धान्तसङ्केतकाठिन्यमवगच्छन्ति । वेदे ऋतु-शब्दः षट्संख्याबोधकः क्वचित् पञ्चबोधकोऽस्त्यपि सर्वत्र अतो ऋतव एवाष्टकाः । पञ्चदशश्लोकेऽस्य सम्बन्धाभावेऽपि गणितोपपत्तियुक्तं गुरुवरबोधितं पाठमपहाय यथेच्छकपोलकल्पितो बार्हस्पत्यपाठो दुराग्रहमेव प्रकाशयति । इनाः सूर्या इत्यादिभानुशब्दाः सर्वे ज्योतिषशास्त्रे द्वादशसंख्याबोधकाः ।

Digitized by Google

अत्र ब्रह्म वा एष इन्द्रस्तपतीति सोमाकरभाष्यं विलोक्यम् (अस्य पुस्तकस्य पृ॰ ४६, पं॰ ३) इमो राजवर्तिनः समिद्धो रौद्रो दहाय सुषुमाँ अदर्शि (ऋ॰ सं॰, अष्टक ७. अध्या. ५. वर्ग ३१)

(२०) श्लोके २५ श्लोकोक्त-'वर्तमानार्कभ'मितिवत् 'तिथिनक्षत्रमादिशेत्' इति स्पष्टमवलोक्यापि बार्हस्पत्येन सर्वमन्यथैव व्यधायि। (See his Jyotisha-vedánga p. 58—59). तदशुद्धिप्रकाशनाय तदनुसारेण तिथिनक्षत्रानयनार्थं कल्प्यते पर्वभांशः = १। अत्र 'जावाद्यंशैः समम्'-इत्यादिना 'जो द्रा ग'-इत्यादिवा चाश्विनी। अथ पर्वानन्तरं द्वितीयायां तिथौ नक्षत्रानयनार्थं तद्गणितम्-

११ ति = ११ × २ = २२। इदं पर्वभांशसमन्वितं जातम् = २२ + १ = २३। इदं भसमूहेन सप्तविंशत्या विभज्य लब्धं शून्यमतः पर्वभाद् गणनया द्वितीयायामश्विनी। सा च बार्हस्पत्येन तदनुयायिभिश्चैव मान्या। आश्चर्यं खलु! पर्वभमश्विनी तदग्रे द्वितीयायां चाश्विनी इति कः स्वीकुर्यात्। एवं तद्व्याख्यानरसिका अशुद्धिरसं प्रकामं लिहन्तु। अथात्र गुरुवरसंशोधितपाठव्याख्यानुसारं गणितम्-१२०ति = १२० × २ = २४०। इदं पर्वभांशसमन्वितं जातम् = २४० + १ = २४१। इदं भसमूहेन भांशसमूहेन विभज्य लब्धमेकमतः पर्वभगणनयाऽश्विनी गता द्वितीयायां भरणी समायाता सा च युक्तैव। एवमिह सोमाकरव्याख्यानवद्बार्हस्पत्यव्याख्यानकल्पनं बालजल्पनमिव गणितविदां विनोदायैव।

'तिथिमेकादशाभ्यस्ताम्' इत्यशुद्धिविवरणम्। ज्योतिषवेदाङ्गे किल शुद्धः पाठः 'तिथिमर्कदशाभ्यस्ताम्' इत्येवासीत्। लेखकादिदोषतोऽथान्यबृहज्ज्योतिषसिद्धान्तग्रन्थप्रचारात् तदशुद्धिशोधकजनदृष्ट्युपेक्षातोऽपि ककारोर्ध्वगतरेफो विकृत्य मकारमस्पृशत् तेन 'तिथिमेकदशाभ्यस्ताम्' इति। ततस्तमशुद्धपाठं कश्चिद्गणितानभिज्ञः 'तिथिमेकादशाभ्यस्ताम्'-इति परमामशुद्धिमकरोत्। इयमशुद्धिः सोमाकरभाष्यरचनातः पूर्वमेवासीदिति ज्योतिषमर्मज्ञा इष्टतिथौ नक्षत्रानयनतः स्पष्टं विलोक्य तमशुद्धिप्रियमवलिप्यन्तु। अथैवं सर्वथा शुद्धस्य तत्पा-

ऽस्यायमर्थः । तिथिं प्रसिद्धाम् । अर्केऽद्दशाभ्यस्ताम् । अर्केऽङ्गादशभिरेश-भिश्चाभ्यस्तां गुणिताम् । वाऽर्काणां द्वादशानां दश विंशत्यधिकशत-मथे पूर्ववत् । इत्यादञ्चव्यवहारो गणिते प्राचीनसमयतोऽतिपरिचितो ऽस्ति न खत्र गणितविदां केषां चनाङ्गानां वामतो गतिरिति सामा-न्यरीतिमवलम्ब्यानर्थमर्थकरणं युक्तमित्यलम् ।

(२१) श्लोके गुरुवरभाष्येणैवोपपत्तिमद्वेदाङ्गकथनं भवतीति पुनः पुनः सज्जना असज्जना अपि गणितविदोऽवलोकयन्तु ।

(२२–२३) श्लोकयोर्यदि गोलगणितयुक्तिरहिते सोमाकरव्या-ख्याने एव मान्ये तत्र नास्माकमाग्रहः ।

(२४) श्लोके सर्वाणि प्रमाणानि कालसाधनरूपाणीति सोमाकर-भाष्येण सङ्गच्छतेऽपि द्विवेदिभाष्यं ज्यौतिषशास्त्रकलुषितानां धान्यप्र-माणशङ्का युक्तैव ।

(२५) श्लोके 'इदं शङ्करबालकृष्णदीक्षितव्याख्यानं समीचीनम्' अत्र समीचीनपदेन यथार्थम् । बार्हस्पत्येन तु स्वज्यौतिषवेदाङ्गव्याख्याने दीक्षितव्याख्यानमुत्तमतरं लिखित्वा धूलिप्रक्षेपेण धूसरायिते स्वव्याख्याने मालिन्येऽमालिन्येऽपि विज्ञप्तिर्नं स्वयकारि यथा–"I am glad to find that Mr. Dikshit's translation of य (२५) is better than mine" (See his Jyotisha-vadánga's preface p. ii)

अत्र सर्वजनविश्वासार्थमुदाहरणम्–कल्प्यन्ते युगादितो गतपर्वा-णि = ९ तत्पर्वतो गतास्तिथयश्च १० । तदा प्रथमं पर्वणि सूर्यनक्ष-त्रानयनं तद्गणितेन–

११ प = ११ × ९ = ९९ इदमेव तन्मते पर्वणि नक्षत्रमसम्भवम् । अत्र नक्षत्रस्यांशा एव ९९ तदा तदंशमानप्रयोजनं किम् । भांशज्ञानत-श्चन्द्रनक्षत्रानयनवत् (१७–१८ श्लो०) सूर्यनक्षत्रानयनं कुत्रापि ज्यौतिष-वेदाङ्गे नास्त्येवातस्तदनुवादः सर्वथा हेयः । (See his Jyotisha-vedánga, p. 44) एवं दशमीतिथावपि तदसङ्गतानुवादतो नक्षत्रम्

Digitized by Google

= ९० महाऽसम्भवम् । अत्र गुरुवरभाष्यानुसारतः (द्रष्टव्यमस्यैव ग्रन्थस्य पृ॰ ४१) रविन॰ $=$ प $+ \frac{\text{११प + ९ तिथि}}{\text{१२४}} =$ ९ $+ \frac{\text{११} \times \text{९} + \text{९} \times \text{१०}}{\text{१२४}} =$ ९ $+ \frac{\text{९९ + ९०}}{\text{१२४}}$

$=$ ९ $+ \frac{\text{१८९}}{\text{१२४}} =$ ९ $+$ १ $+ \frac{\text{६५}}{\text{१२४}} =$ १० नक्षत्राणि गतानि ११ नक्षत्रस्य ६५ अंशा गताः । श्रविष्ठादिगणनया दशमीतिथौ सूर्यनक्षत्रमार्द्रा यदंशाः ६५ गता इति । अत्र यूरोपीयगणितज्ञसुखावगमाय अस्यानुवादः ' Multiply the number of Parvans by eleven and the number of Ti thi by nine. Divide (the sum of two products) by Yuga (124) and add the number of Parvans to the quotient, the result is the Sun's Nakshatra on the tithi counting from S'ravistha.

(२६) श्लोके बार्हस्पत्यानुवादे 'शेष'-शब्दो निरर्थकः । अतो ज्यौतिषवेदाङ्ग 'निरेकं द्वादशाभ्यस्तम्'—इत्यादौ सर्वत्राध्याहारवदिहापि गुरुवरैरध्याहारेणैव शेषः सार्थको विहित उपपत्त्या पाठश्चापि शोधितः । तत्र बार्हस्पत्यव्याख्यानं नतकाल—(Hour-angle) प्रदर्शकं निष्प्रयोजनमेवात्र नतकालचर्चाभावात् ।

(२७) श्लोके वास्तवमानमवगम्यापि ज्यौतिषवेदाङ्गकारो भिन्नसंख्यात्यागेन कथं स्वाभिप्रायमसङ्गतं व्यधास्यदिति कतिपयसमयपर्यन्तं मृतमिव ज्यौतिषवेदाङ्गं गुरुवररचितसुधाकरभाष्यं प्राप्य सजीवमिव स्वस्यानुवादतस्तत्पूर्वावस्थामेव लभमानं विलोक्यताऽपि बार्हस्पत्येन दुराग्रहाच्छन्नलोचनेन सुधा मुधा कथं न मन्येत (See his Jyotisha vedanga p. 46-47) वस्तुतस्तु गुरुवररचितपाठो ग्रन्थकर्तुः पाण्डित्यमेवैधयतीति 'बुद्धेः फलमनाग्रहः' इति शिष्टवचनप्रामाण्यात् सर्वथा स्वीकरणीयः । 'सप्तप्रैकं भयुक्'—इत्यादिना रविनक्षत्रभोगकालः प्रदर्शित एव । पाण्डित्यप्रकाशनमेव स्वाभिमतं चेत् तर्हि ज्यौतिषवेदाङ्गकर्तुस्तत् कथं नेति तूष्णीं स्थातव्यम् ।

(२८) श्लोके मर्त्यलगधस्य संस्कृतज्ञातृत्वस्य रक्षणायैव 'सौराः'

युगे' इति पाठो समुचितो । न हि 'यस्य क्वापि गतिर्नास्ति तस्य वाराणसीगति'रितिवदार्थकल्पनामेव शिथिलां गतिमाश्रित्य ज्ञानलवदुर्विदग्धजनमनःसन्तोषार्थमेव मुखव्यादानमात्रसामर्थ्यप्रकाशनमुचितम् ।

(२९) श्लोके 'द्विघ्ना' गुरुवरशोधितपाठेन च्छन्दोभङ्गस्तर्हि तच्छन्दोभङ्गदोषसङ्गिनो बार्हस्पत्यस्य 'स्वराक्रमेते सोमार्कौ' इति ६श्लोके तथा 'पञ्च यदर्धं पञ्चाद्याम्'—इति २३ श्लोके च का गतिरिति । सर्वत्र स्फुटार्थप्रतिपादनार्थमेवेति सर्वजनमान्ये बाषचना मूढतोषप्रदैव ।

(३०) श्लोके सोमाकरभाष्ये सर्वमुल्लिखितमपि द्विवेदिवर्यैः स्फुटार्थमेव व्याख्यातमुपपादितं च ।

(३१) श्लोके 'तच्च पञ्चसिद्धान्तिकायां पैतामहसिद्धान्ते लिखितसममिति' पञ्चसिद्धान्तिकाटीकायां श्रीमद्द्विवेदिभिः सर्वं प्रायोजनिकाः पदार्था निदर्शिताः । तेभ्योऽन्ये सुखेनैवावगम्यन्ते । यथा योज्ययोजकयोर्बोधायोगस्य तथा वियोज्यवियोजकतो वियोगफलस्य ज्ञानं सम्प्रति व्यक्तगणिताध्यायिनामपि सुकरं चेत् किमिह बार्हस्पत्यो व्यर्थं संशयमुत्पाद्य स्वपरिचितिं प्रथयति । आहोस्वित्! 'भभमास्तु भगणोर्विवर्जिता यस्य तस्य कुदिनानि तानि वा' इत्यादिज्योतिषसिद्धान्तपरिभाषा बालैरप्यवबुद्ध्यते । एवमिह पाठश्चापि सूक्तः । न हि कुत्रापि द्विशब्देन दिनग्रहणम् ।

(३२—३४) श्लोकेषु 'दितिबृहस्पती' इति पाठे निःसन्दिग्धेऽपि कुतः सन्देहादिसंशयिता दुर्बोधान्धकारे ज्योतिषशास्त्रमार्गे विचरितुं साहसं विदधते । 'अजवृषभमृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुङ्गाः' इत्यादिवराहोक्तपारिभाषिकं सम्प्रति दृष्ट्वाऽपि स्वीयभ्रमस्तैर्दूरयितव्यः । वस्तुत इह परम्परया त्रुटिर्याऽऽसीत् तत्पूरणायैव महतां गुरुवराणां दृष्टिक्षेपः । 'प्रोष्ठपदयोर्विपर्ययः पाठदोषो वा' इति सोमाकरोऽपि स्वभाष्ये व्यजपदिति बार्हस्पत्योऽधुना विलोकयतु । तत्र च गुरुवरभाष्ये 'अत्र पूर्वभद्रपदाया अजो वैकपादादिति देवताद्वयं वा एक-

देवताया नामद्वयम्' इमं सुलेखमपि तदेव स शान्येऽपि ज्योतिषशास्त्र-ज्ञाः पश्यन्तु । आदौ सर्वा ज्योतिषशास्त्रसम्बन्धिनी कथात्र धनि-ष्ठातः । अत्र हि कृत्तिकातोऽतो लगधेन वाऽन्येन केनापि स्वस्वसमयस्थि-तिवशेन तत्तद्ग्रन्थेषूक्ताः सर्वा गणनास्तत्पूर्वसमयजाः संगृह्य लोकोपका-राय स्वसमये 'ज्योतिषवेदाङ्ग'–नाम्नाऽयं निबन्धो व्यधायीति स्फुटम् ।

(३५) श्लोके एकैकस्य नक्षत्रस्य चत्वारश्चत्वारः पादा नरपति-जयचर्यादिस्वरग्रन्थेषु 'चु चे, चो, ला इत्यादिकाः शतपदादौ प्रसिद्धाः ।

(३६) श्लोके ज्योतिषवेदाङ्गे या स्थितिरासीत् तस्या भिन्ना सम्प्रतीति ज्ञापनायैव गुरुवरै रामदेवज्ञव्याख्यानि विलिख्य पश्चात् 'तथैतद्गणे ज्योतिषवेदाङ्गोक्तेभ्यो बहूनि भिन्नानि पठितानि'-इति व्यलेखि तत्राशङ्का ज्योतिषशास्त्रानभिज्ञतैव ।

(३७) श्लोके चान्द्रपर्वगणात् सौरपर्वगणसाधनं 'न्यूनं द्विषष्टि-भागेन' स्फुटमतः परम्परातो विकृतः पाठो गुरुवरैर्गणितयुक्त्या शोधितः सचैव स्वाकृतिमलभत । एवं शुद्धपाठं 'यत्कृतावुपजायेते' ज्ञात्वाऽपि कोऽन्यथोन्मत्त इव प्रलपति । 'तच्च द्विषष्टिभागेन न्यूनं कार्यम्' इति सर्वं 'षष्ट्या षष्ट्या युतं द्वाभ्याम्' इति १३श्लोकवत् स्पष्टमेव ।

(३८) श्लोके 'सत्रिंशद्व्यु' इति पाठतो गुरुवरैर्वेदाङ्गं सुरक्षित-मन्यथा राहुसुधाकलशनीतिः स्फुटैव । 'गुणाहत्योर्क्रूठत्वात्'—इत्यादिना वेदाङ्गे कलाऽभिधानकरणं सम्यक् । अत्र परम्परात एव यथार्थाभिप्राय-दायके 'सविंशा' इति शुद्धे पाठे शोधनं पिष्टपेषणवदलम् ।

(३९) श्लोके याजुषकालपदं सोमाकरभाष्यं विलोक्य गुरुवरैः शोधितं सोपपत्तिकपाठमनुसन्दधतु सुजनाः ।

(४०) श्लोके इदं पद्यं ८ श्लोके व्याख्यातमेव। तद्वशेनेह 'तदेव षष्ट्या' इत्यत्र 'तदेकषष्ट्या' इति शोधनं समुचितम् । अत्र सोमाकरभाष्यं तत्र गुरुवररचिता टिप्पणी च विलोक्या ।

(४१) श्लोके शोधितः पाठ एव समीचीनः । किन्तु द्विवेदिभाष्ये 'अत्र बार्हस्पत्यव्याख्यानं प्रायः समीचीनमेव' इति यदुल्लेखितमस्ति तत्र प्रायःशब्देनैव त्रुटिमवगच्छन्तु धीराः । अत्र प्रतिपर्वं चतुर्शेषं चान्द्रदिनभागानामर्धमिति गुरुवरभाष्योपपत्त्या स्पष्टम् । वस्तुतो बार्हस्पत्यव्याख्यानुवादो यथार्थाभिप्रायच्युतावेव । इह चतुर्शेषशब्देनाधिपर्वशेषमिति 'सदा पर्वणि पर्वणि' इत्युल्लेखात् स्फुटम् ।

(४२) श्लोके सोमाकरभाष्ये न का चन त्रुटिः । गुरुवरभाष्यमिहार्थान्तरज्ञापकमिति । कतिपयेषूपलब्धलिखितपुस्तकेषु 'भूयोऽप्येवं प्रकल्पयेत्' इति पाठो द्विवेदिसम्मतः । 'तदेवाहं चोक्तवान्' इति ज्योतिषवेदाङ्गरचयितुरुक्तिः । एतेनास्य ज्योतिषवेदाङ्गग्रन्थस्य रचयिता लगधादन्यः कश्चिदिति स्पष्टम् । शिष्येण पृष्टो गुरुः कथयति—

'इत्येतन्मासवर्षाणां मुहूर्तोदयपर्वणाम् ।
दिनर्त्वयनमासानां व्याख्यानं लगधोऽब्रवीत्' ॥

एतत् पद्यं शिष्यगुरुसंवादरूपं सोमाकरभाष्ये पाठाभावात् क्षेपकमतो ज्योतिषवेदाङ्गकर्ता लगध एवेति बहूनां सम्मतं युक्तमिव ।

(४३) श्लोके गुरुवरमतेन 'वेद विदश्नुते' इति पदच्छेदेन 'सोमसूर्यस्तृचरितम्' इत्यस्य पुनरुक्तदोषोऽर्थान्तरेण विनश्यतीति स्पष्टीक्रियते ज्योतिषवेदाङ्गकारपाण्डित्यं चेति ।

आर्चे—

(१) श्लोके कालं कालपुरुषम् । कालस्य समयस्य प्रधानज्ञापकत्वात् सूर्ये कालपदवाच्यत्वे ऽदोषः । प्रातर्मध्याह्नसायमिति त्रिधा कालभेदेन सूर्यस्य त्रिमूर्तित्वात् कालरूपं सूर्यम् । "सूर्य आत्मा जगतस्तस्थुषश्च" इति श्रुतिप्रामाण्यात् सर्वात्मकत्वात् कालं कालात्मानमिति यावत् । तथा "कालश्चादित्य उच्यते" । इति सोमाकरभाष्ये गर्गोक्तेश्च (द्रष्टव्यमस्य ग्रन्थस्य पृ॰ ६) अत्र 'लगधस्य' इत्युल्लेखात् याजुषं लगधप्र-

णीतं केनापि संक्षेपतः सर्वं तत् संगृह्य 'आर्चम्' इति नामान्तरं व्यधा-
यीत्यनुमीयते ।

(१६) श्लोके परम्परातः समायातः 'च विंशा' इति पाठः
साध्वर्थप्रतिपादकः श्रीमद्द्विवेदिभिः परिरचित इति स्फुटं वैदिकानाम् ।

(१७) श्लोके 'घटिका'-इत्यस्य पर्यायः 'कुम्भिका' इति गुरुवरैः
सम्यग्वर्णितः ।

(१९) श्लोके लग्नशब्दार्थानवबोधाज्ज्यौतिषशास्त्रपरिभाषावि-
धुरेण बार्हस्पत्येन 'गुण'-शब्देन अष्टसंख्या, अभ्यस्तशब्देन योगं मत्वा
कृत्तिका गृहीताः पुनरये 'षडभ्यस्तात्' इत्यत्र 'अभ्यस्तपदेन' गुणनमेव
गृहीतमित्यादि वैचित्र्यं सुजनैर्विभाव्यम् । सर्वत्रेह वास्तवार्थो गुरुवरै-
र्भाष्ये प्रदर्शितः । अथ गणितयुक्त्या 'गुण'-स्थाने 'गण' इति पाठ-
श्चातीव युक्तः । उत्तरार्धे च 'सूर्यात्' इत्यत्र 'आर्चात्' इत्येव साधु-
पाठः 'चान्द्रमसान् ऋतून्' इति वशेन गणितयुक्त्या व सङ्गच्छते ।

(३३) श्लोके परम्परातो लेखकाध्यापकादिदोषतः 'च समम्-
इत्यनर्थः श्रीमद्द्विवेदिभिः 'दशमम्' इति यथार्थः पाठो बालैरपि
बुध्यते । अथात्र वास्तवार्थबोधनायैव 'तृतीयाम्' इत्यादौ सप्तम्यन्तपाठो
निवेशितस्तत्र चेत् केषां तत्पाठस्यैवाग्रहश्चेत् ते तथैव पठन्तु न ह्री-
दृशामाग्रहिणां प्रयोजनाय गुरुवराणां यत्न इति ।

(३४) श्लोके पूर्वोत्तरार्धयोश्छन्दोविभेदाच्छन्दोलक्षणानभिज्ञा-
नां गुरुवरोदितविचारे शङ्का केन निवार्येत । अथापि बुद्धिमतां सन्देहः
समयान्तरे विवरणदीपिकयाऽपसरिष्यत इति ।

इति श्रीमत्सुधाकरभाष्ये झोपाख्यश्रीमुरलीधरविरचितं
लघुविवरणं पूर्त्तिमगात् ।

Digitized by Google

APPENDIX.

In modern times Scholars in Sanskrit Grammar consider the study of the Ashtádhyáyí of Páṇini more advantageous and fruitful than the old-fashioned study of the Prátisákhyas of the Vedas, likewise Hindú astronomers of the present day devote their time to the study of the Súryasiddhánta, discarding Yájusha and Árcha Jyautisha as of no practical use. It is considered a sin from the Hindú point of view to make any alterations in the syllables of the mantras of the Vedas; Hindú astronomers think the same about the readings of the Jyautisha-Vedánga now also, and therefore regard the readings of the Jyautisha-Vedánga approved of by Somákara as authoritative. Old Hindu astronomers also inspired with the same religious feeling refrained from disparagingly discussing, in their works, any subject dealt with in the Jyautisha-Vedánga.

Varáhmihira has spoken lightly of the Vedánga in his Pañcha-Siddhántiká, giving it a pseudonymous name of Bráhma Siddhánta. I think he took recourse to this indirect attack on the Vedánga, simply to avert the much dreaded sin referred to above. He has also remarked in the same book that its methods have been now found defective. (Vide Pañcha-Siddhántiká edited by Dr. Thibaut and Sudhákara Dvivedi p. 31.)

Later on, Brahmagupta ventured openly to criticise the Vedánga with impunity, thinking its methods to have been discovered by the authors of Jyautisha Samhitás and Vedánga who were no divine personages. (Vide Bráhmasphuta Siddhánta edited by Sudhákara Dvivedí p. 147).

If Hindu astronomers had looked into the subject-matter of the Vedánga before, from a mathematical stand-point, casting aside religious prejudices, they could have easily corrected the readings of all ślokas by proving the rules embodied in them with the aid of simple processes of Arithmetic, such as multiplication,

division etc., and explained them by supplying necessary ellipses (अध्याहार) in them. But, for them, to do this involved a sin, and they never even dreamed of paying any attention to them. The recitation of them has been regarded with the same religious sanctity as that of the Vedas.

In the British reign, Jyautisha-Vedánga reached the European country in the same way as the Vedas, and Europeans devoted themselves to the critical study of this astronomical work also as they did to the Vedas with the result that the elucidatory writings of professor Weber, Whitney, Colebrooke, Bentley, Davis, Max Muller and others, on the Vedánga appeared. Afterwards, Dr. Thibaut, having himself discovered many new things brought out his own contribution to the explanation of the Jyautisha-Vedánga in 1877. His work met with wide circulation in India. It was published by the Asiatic Society of Bengal.

Every new worker in this field of astronomy gave the foremost place to his own writings, severely criticising the views of all those who wrote before him on the same subject while eulogizing his own emendations of the ślokas and considering his own explanations of them quite original. At present, Indians who have received English education in the modern form think too highly of the researches made by Europeans in such branches of study, and brought to their notice through the medium of the English language. This is mainly due to their inability to pursue the subject in its old and original form. One is naturally surprised to find that what was an impossibility for one, has been brought within the region of possibilities, and is bound to praise the scholar who makes this possible.

Some of the English-educated Indians also, following the example set by these Europeans in this direction bent their minds towards the Jyautishya-Vedánga with a view to acquiring much coveted fame, and set out to review the contribution of Dr. Thibaut. The prominent figure among these Indians was Śaṇkara Bálkrishṇa Dikshit formerly, and now Bárhaspatya (Lálá

Chhote Lál, Executive Engineer U. P.). Mr. Dikshit had received an English education and was not well versed in Hindú Astronomy taught in the old and more sound Hindú method. He, therefore could elucidate the true meanings of a few Ślokas only. Although Bárhaspatya believes that he could interpret all the ślokas of the Jyautisha-Vedánga correctly, I regret to say that he also, having had the same sort of education as Mr. Dikshit, could take hardly any step further towards the elucidation of the Jyautisha-Vedánga. My professor, M. Sudhákara Dvivedi never turned his attention to the Jyautisha-Vedánga before so many people had written about it, and thought that there was nothing more to be done in it. He always works hard in bringing to light those unknown things, which, when known, are likely to benefit the educated public. But at the repeated requests of his several friends and Bárhaspatya himself he took up the task of reviewing Bárhaspatya's explanation and writing his own commentary on the Vedánga. He found many defects in Bárhaspatya's explanations resulting from his ignorance of many technicalities of Hindú Astronomy. I shall point them out later on. He wrote the Sudhákara Bháshya to remedy all the defects and elucidate the passages which were misinterpreted by Bárhaspatya, and still remained obscure. For this action of his, Bárhaspatya himself cast aspersions on him in the Preface to his Jyotisha-Vedánga and its appendix, and made his friend, the editor of the *Sarasvati also calumniate Dr. Thibaut and my professor. Dr. Thibaut published his pamphlet in 1877 when my professor knew nothing about the Vedánga, and gave explanations of some of the obscure passages by his own intellectual efforts. It does not behove a man of Mahábir Prasád Dvivedi's talents to give currency to errors without actually knowing the real facts. He had better apologize to Dr. Thibaut and my professor for what he has done.

Having found the numbers of Lunar days, Siderial days, Śolar days etc. in a lustrum of five years, the doctrines of the

* Sarasvati of May, 1907.

Digitized by Google

other heavenly phenomena propounded in the Jyautisha-Vedánga are not difficult to grasp. People may think as they like, but we can bear testimony to our professor having completed the Bháshya in four days. Of course, it did take a fortnight or so to get it through the press. He considers it the bounden duty of a learned man to bring forward nothing but real truths about antiquated things. It is difficult to bring to light any real fact, if scholars will adhere to their own principles however erroneous they may be.

With all possible respect to European and Indian scholars both, I beg to submit that they thought too highly of their own originality specially when they explained the verses which involve no astronomical calculation as they did not closely study the Somákara Bháshya. My professor has now edited the Somákara Bháshya and it is to be considered why the explanations given by Somákara of those ślokas should not be accepted which involve no mathematical calculations but define special *parvans* by their proper names. Different explanations of such ślokas given by modern scholars or by my professor may be the outcome of mental feats, but they can not be invested with any religious authority for divine purposes.

I now proceed to substantiate my opinions by briefly examining the interpretations of Somákara, and the emendations and interpretations of both, Bárhaspatya and S. Dvivedi, one by one and lay them before learned readers who may form their own opinions about them.

* य (१-५). These verses have been correctly explained by Somákara. Vide his Bháshya, p. 1—6.

य (६). This too has been correctly explained by Somákara, but he supplies the ellipsis, तत्र यदि बृहस्पतिरास्ते (if there be Jupiter) without quoting any authority.

---

* य (१), य (२), य (३) etc., denote the first, second, third, etc., verse of tradition text of the Yajur recension.

य (७-८). These verses have been also correctly explained by Somâkara.

य (९). This too has been explained by Somákara, but he takes ऋतु to mean काल. Bárhaspatya's explanation agrees with that of Somâkara, but his observation about ऋतु is quite incorrect here.* (Vide his J. V. p. 32—33.) A sensible meaning of ऋतु is given by S. Dvivedi in his Bháshya, p. 13.

य (१०). This verse has been explained by Somâkara. Bárhaspatya's explanation of this verse agrees with that of Somâkara.

य (११-१२). Somâkara's explanations of these verses are correct, but the different explanations given by Bárhaspatya and S. Dvivedi may be interesting to the reader.

य (१३). Here Somákara's explanation of the rule for fixing the time of पर्व may be right, but it does not stand the test applied to it according to astronomical calculations. The explanation of this verse given by Dikshit runs as follows:—

(पंच संवत्सरात्मक युगांतील संवत्सराची संख्या) निरेक करावी. बारानीं गुणावी. गत (मास) युक्त करावी. द्विगुण करावी. प्रत्येक साठांस दोहोंनीं युक्त करावी. (बेरजेस) पर्वांचा राशि म्हणतात ॥

Reduce (the number of the current year) by one; multiply (the remainder) by twelve and add the elapsed (months of the current year). Double this total (which should be further) increased by two for every sixty of the total doubled. The result (thus obtained) will be the total number of parvans (elapsed from the beginning of the lustrum to the end of the current month). (Vide his history of Indian astronomy, p. 73.) †

* Jyotisha-Vedánga by Bárhaspatyah (Lálá Chhote Lál, Executive Engineer P. W. D. United Provinces, India) Printed at the Indian Press, Allahabad, 1907.

† This book was published in 1896, and printed at Árya-Bhúshana Press, Poona.

Digitized by Google

Here Bárhaspatya supplied the ellipsis, 'parva' (पर्व) instead of 'month,' and correctly multiplied by twelve and then by two before adding parvans. (Vide his J. V. p. 41). He therefore says in the preface to his Jyotisha-Vedánga. "I need not quarrel with Mr. Dikshit, though I consider my own explanation better". (Vide his preface, p. ii). Owing to their defective knowledge of Hindú Astronomy, both of them explained this verse in a wrong way. Let us take some illustration to show when their methods fail. Suppose we require to know the total number of parvans elapsed since the beginning of the lustrum up to and including the tenth month or twentieth parvan of the fourth year. Then, according to Dikshit, the number of parvans $= (3 \times 12 + 10) \times 2 + 2$ $\left\{\text{because } (3 \times 12 + 10) \times 2 \text{ or } 92 \text{ contains sixty only once.}\right\}$

$$= 92 + 2 = 94 \ldots\ldots (A);$$

and according to Bárhaspatya,

the number of parvans $= (3 \times 12 \times 2 + 20) + 2$,

(because $3 \times 12 \times 2 + 20$ or 92 contains sixty only once).

$$= 92 + 2 = 94 \ldots\ldots (B).$$

But here the correct number of parvans is 95 and not 94.

It may be as well noted here that the result obtained by both the expounders will differ only by one when the number of the current year's parvans will be odd.

Being unacquainted with the षडंश method of Hindú Astronomy, both have interpreted 'षष्ट्या षष्ट्या युतं द्वाभ्याम्' wrongly. the correct explanation of this, see S. Dvivedi's Bháshya, p. 23. According to him, in the above example,

the number of parvans $= 3 \times 12 \times 2 + 20$

$$+ \text{Integral number of } \frac{2\ (3 \times 12 \times 2 + 20)}{60}$$

$$= 92 + \text{Integral number of } \frac{2 \times 92}{60}$$

$$= 92 + 3 = 95.$$

Bárhaspatya has made the following formula for the calculation of the total number of parvans (elapsed since the beginning of the lustrum). "The number of parvans elapsed up to and including the yth parvan of the xth calendar year

$$=\left\{(x-1)\times 12\times 2+y\right\}\times\left(1+\tfrac{2}{60}\right).\text{"}$$

According to this, in the above example,

the number of parvans $=\left\{3\times 12\times 2+20\right\}\left(1+\tfrac{2}{60}\right)$, (when $x=4$ and $y=20$)

$$=92+\frac{92\times 2}{60}$$

$$=92+\tfrac{184}{60}$$

$$=\ 92+3+\tfrac{1}{15}$$

$= 95+\tfrac{1}{15}$. which is clearly wrong, being fractional and also does not agree with the result (B) obtained above according to the rule as worded by him in his translation of this verse.

य (१४) This verse involves no Astronomical calculations. Somakara's explanation, therefore, must be acceptable. Explanations of Bárhaspatya and S. Dvivedi may also be interesting to the reader.

य (१५) Somákara's explanation of the method for fixing Yága-kál (यागकाल) does not convey any sense when viewed from an Astronomical stand-point. Bárhaspatya being ignorant of many technical terms of Hindu Astronomy translates 'द्वादशोद्धृताः' into 'Dividing by twelve' and 'एकादशगुणः' into 'adding eleven.'

His translation of the verse runs as follows :—

"Work out the half-months: from every group of twelve half-months there results an aggregate of eight nakshatra-amśas. Should the twelve half-months be co-terminous with a complete lunar month, (the moon is) half (nakshatra) and eleven (amśas) behind at the full-moon syzygy." (Vide his Jyotisha-Vedánga, p. 48.)

When he knew that in the way in which he attempted to interpret the verse, no rule could be found out in the text for

Digitized by Google

the calculation of the moon's amśas, he was obliged to postulate a rule in his explanation (found by the ordinary rule of three) for this purpose which nowhere appears in the text. Here in the text itself should appear the name of the moon as does the name of the sun in य (२४) when a rule could be established for calculating the moon's amśas. From this consideration the emendations applied to the corrupt text by S. Dvivedi restored it into its original form.

Emended text runs as follows :—

भांशाः स्युरिष्टकाः कार्याः पक्षा द्वादशकोद्गताः ।
एकादशगुणाश्चेन्दोः शुक्लेऽर्धं चैन्दवा यदि ॥

and the traditional text as follows :—

भांशाः स्युरष्टकाः कार्याः पक्षा द्वादशकोद्गताः ।
एकादशगुणश्चोनः शुक्लेऽर्धं चैन्दवा यदि ॥

S. Dvivedi's translation of the emended text :—Calculate the number of pakshas (parvans)* elapsed since the beginning of the lustrum up to the required paksha of any of the twelve months (of the current year); multiply the number of pakshas by eleven. The product will be the Nakshatra-Amśas of the moon. In the case of a white paksha, add half of भांश ($\frac{124}{2}$ or 62) to the above product, the result will be the Nakshatra-Amśas of the moon.

For the proof of the above translations, see S. Dvivedi's Bháshya P. 24-25.

I now leave it to learned readers to judge for themselves which of the two is correct and more sensible, either Bárhaspatya's translation or S. Dvivedi's emendation and translation.

य (१६). In this verse it is not stated what thing is to be calculated; different ellipses therefore may be supplied by different expounders. Bárhaspatya under a mistaken idea took सप्तगुण to mean seven. (Vide his Jyotisha-Vedánga, P. 54-55.) He seems to think that this verse explains how to find out the hour-angle of any parvan. As Jyautisha-Vedánga treats of nothing

* The number of parvans will be calculated according to the rule of य (१३).

Digitized by Google

about bour-angles, and as the time occupied in traversing nakshatras is calculated according to य (१९), I think his translation and explanation are both incorrect. S. Dvivedi's emendation and translation tend to remove the obscurity of य (२०). I therefore hold that he is right. (See his Bháshya, p. 23-26.)

य (१७). Here the astrological parts of the Vedánga are correctly expounded by Somákara, though they are explained in different ways by Bárhaspatya and S. Dvivedi. S. Dvivedi's explanation of (ज्ञानांशैः स्वं विद्यात्) is the best of all, as it shows the use of य (१८). (Vide Bárhaspatya's Jyotisha-Vedánga p. 67 and S. Dvivedi's Bháshya, p. 28-30).

य (१८). This verse was correctly explained before by Somákara. (See Somákara Bháshya p. 30-32). The meaning of this verse was discovered by Dr. Thibaut also by tabulation, but the rule was left unsolved by him. Bárhaspatya has solved it by aid of an indeterminate equation, for he was not aware of the ancient Hindú Kuṭṭaka method. (Vide his Jyotisha-Vedánga, p. 51-52). Now S. Dvivedi has worked it out very easily by the ancient Hindú algebraic method. (Vide his Bháshya, p. 28-30.).

For य See my Vivaraṇa, p. 76.

य (१९). Bárhaspatya's translation of this verse fixes no rule and his long explanation produces no proper results. Jyautisha-Vedánga has no trial method; even then he says "It will be found ou trial that the figures easiest to handle are those given in the text." (Vide his Jyotisha-Vedánga, p. 57-58) In my opinion the trial method was not at all required here. I therefore recommend the reader to consider S. Dvivedi's Bháshya, p. 33-34. I think his emendation can claim the same authority as that of Bárhaspatya.

य (२०). Somákara's explanation of this verse relates to yága-kála, and so nothing is said about it. Bárhaspatya's translation and explanation are beyond the scope of the text. (Vide his Jyotisha-Vedánga, p. 58-59).

Digitized by Google

As regards his incorrect translation, the reader is referred to the examples given in my Vivaraṇa, p. 77. In this verse the moon's nakshatra is calculated on the given tithi as the sun's nakshatra in य (२५). Hence by calculating the tithi-nakshatra by the ordinary method, taking the Jyautisha-Vedánga's elements, it is clear that the emendation of S. Dvivedi is right and ingenious. I am sure that this emendation is based on the same authority as those of य (१३), य (१६) and य (४०).

For the meaning of (मर्कंदशाभ्यस्ताम्), see my Vivaraṇa, p. 77-78.

य (२१). Bárhaspatya's translation that 'the sum of these Kalá's represents the Kalá's corresponding to the entry of the moon into that tithi's nakshatra' is not correct. (See his Jyotisha-Vedánga, p. 58).

The tithi's nakshatra and its amśas are calculated by य (20) and the kalás corresponding to the entry of the moon into that tithi's nakshatra can be easily calculated from the nakshatra-amśas by य (१६).

The defect in his translation is shown in my vivaraṇa, p. 77-78.

S. Dvivedi's explanation of the verse is better and his emendation has the same authority as those of य (१३), य (१६) and य (४०).

Somákara's exposition may be useful to yága-kála.

य (२२). When viewed from an astronomical stand-point Somákara's explanation of this verse does not convey any sense. S. Dvivedi's explanation exactly agrees with that of Bárhaspatya.

य (२३). This verse was translated by S. Dikshit. (See his History of Indian Astronomy, p. 84). But in his translation the orders of द्विराभ्यस्तम्' and कयोगं were wrongly changed.

S. Dvivedi's explanation agrees with that of Bárhaspatya. (Vide S. Dvivedi's Bháshya, p. 38, and Bárhaspatya's Jyotisha-Vedánga, p. 34).

Digitized by Google

य (२४). The first half of this verse was correctly explained by Somákara. (See his Bháshya, p. 39). But his interpretation of the second half is doubtful, which has been clearly explained in Dikshit's History of Indian Astronomy, p. 79—80.

Explanations of Bárhaspatya and S. Dvivedi follow that of Dikshit.

य (२५). This verse was correctly translated by Dikshit (Vide his History of Hindu Astronomy, p. 85.) But his interpretation of 'भम' is doubtful which has been now clearly explained by S. Dvivedi, (Vide his Bháshya, p. 41.)

Bárhaspatya's explanation of the verse is quite incorrect. See my vivarana, p. 78—79.

Bárhaspatya in the appendix to his Jyotisha-Vedánga, p. vii also admits this. He writes. "My translation and explanation are defective, but those given by Mr. Dikshit are correct." The translation should run thus, "Having multiplied the (elapsed) parvans by eleven and the (serial number of the current) tithi by nine, the double result (reduced to nakshatras), together with the (number of elapsed) parvans, gives the present nakshhatra of the sun, reckoned from the beginning of Śravistha. But I am unable to accept the following rendering of गुणक्षयम् as given by P. Sudhákara, "the result obtained by means of 124 the number of parvans contained in a yuga." "

The latter portion of this observation of Bárhashpatya is quite mistaken. P. Sudhákara's translation and explanation agree with those of Mr. Dikshit. Mr. Dikshit's translation on mahrathi runs thus:

"गत पर्वसंख्येस ११ नीं गुणून त्या गुणाकारांत तिथीस ९ नीं गुणून आलेला गुणाकार मिळवावा, बेरजेस १२४ नीं भागावें, भागाकारांत पर्वसंख्या मिळवावी म्हणजे [इष्ट तिथ्यांतीं] वर्तमान सूर्य नक्षत्र निघेल. हें क्रमानें जाणावें. युगांत पर्वें १२४ असतात ह्या गोष्टीस अनुसरून युग शब्दाचा अर्थ या श्लोकांत १२४ संख्या आहे......" (Vide His history of Indian Astronomy, p. 58.)

Multiply the number of the elapsed parvans by eleven and the (serial number of the current) tithi by nine, add them together.

This sum divided by 124, together with the number of the elapsed parvans, gives the present nakshatra of the sun.

The re-translation of this verse given by Bárhaspatya in the appendix to his Jyotisha-Vedánga, p. vii is again vague and incorrect.

य (२४). Owing to his defective knowledge of Hindú Astronomy Bárhaspatya translates 'भेद' into 'quotient' and seems to think that this verse lays down a rule for the calculation of the sun's motion (in the equinoctial circle) per lunar day. (Vide his Jyotisha-Vedánga, p. 45).

In Jyautisha-Vedánga, this motion of the sun is of no use. Not to speak of Jyautisha-Vedánga, such motion is nowhere mentioned in any treatise on modern Hindú Astronomy. I therefore think that S. Dvivedi's explanation is right. His anvaya of this verse too is as clear as those of य (२५), य (२६), etc., (See his Bháshya, p. 42—43). His emendations are evolved, as usual from the results obtained by arithmetical calculations.

य (२७). Here it is not stated what calculation is to be made. In interpreting this verse, therefore, ellipses (अध्याहार) supplied by different writers may vary according to the ways in which they set out to explain it.

Bárhaspatya thinks that the text, here, gives the approximate number of lunar days contained in the time of termination of the sun's association with a nakshatra.

If we reflect for a moment why the author of Jyautisha-Vedánga should take a wrong number when he knew the correct one and why he should here neglect the fraction, $\frac{1}{38}$th of a lunar day, which is much greater than 7 kalás in य (२८) where it was not neglected by him, then the whole translation and explanation of Bárhaspatya fall to the ground and appear fanciful. No such lunar days are of any use in Jyautisha-Vedánga, or modern Hindú Astronomy. S. Dvivedi's translation and explanation of this verse, therefore, should be accepted without the least objection. (See his Bháshya, p. 44-45).

I think his emendations here have the same authority as those of य (२७), य (२८), य (२९).

य (२८). This verse has been correctly explained by Somákara. As Jyautisha-Vedánga treats of six seasons, Dikshit's emendation षट् for पञ्च is right. (See his history of Indian Astronomy, p. 85). Other emendations of S. Dvivedi are meant to keep the text in correct Sanskrit form, as the author of Jyautisha-Vedánga was doubtless a Sanskrit scholar.

य (२९) This verse is very easy. For the emendations of S. Dvivedi, see my Vivarana, p. 8.

य (३०). This verse was explained by Somákara, (See his Bháshya, p. 48) and Dikshit also followed him, but the explanations of both were defective, as they gave no explanation of पौरुषम् which has been now clearly interpreted by Bárhaspatya. S. Dvivedi's explanation agrees with that of Bárhaspatya.

य (३१). Somákara's explanation of this verse is defective, (see his Bháshya, p. 49); and Dikshit entirely followed Somákara. S. Dvivedi's correct explanation agrees with that of Bárhaspatya, but their emendations differ slightly.

(Vide, Bárhaspatya's Jyotisha-Vedánga, p. 16 and S. Dvivedi's Bháshya, p. 49).

य (३२-३४). These verses are very easy. For S. Dvivedi's emendations, see my Vivarana.

य (३५). This verse has been correctly explained by Somákara, S. Dvivedi's explanation may also be interesting to the reader.

य (३६). This verse has no astronomical significance, and is very easy. However, S. Dvivedi's explanation is better. (See his Bháshya, p. 50-51.)

य (३७). Somákara's explanation of this verse is defective. (See his Bháshya, p. 51.). Bárhaspatya's explanation does not show the exact meanings of शेषम् and सपार्वयम्. His better reading, 'यत्कृतउपजायेत' spoils the metre of the verse. (Vide his Jyotisha-Vedánga, p. 16). Owing to his poor knowledge of Hindú As-

tronomy he was very far from the right interpretation as in the case of य (१३). See my Vivaraṇa, p. 81 and S. Dvivedi's Bháshya, p. 51-52.

य (३८). Somákara's explanation of this verse is quite correct. S. Dvivedi's emendation puts the text in a better form.

It is no use emending the text where words give real meanings. Hence सविंशा should not be altered which does convey the real sense.

य (३९). Bárhaspatya seems to have accepted S. Dvivedi's emendation of this verse which has been explained by Dr. Thibaut (vide the appendix to his Jyotisha-Vedánga, p. vii.)

य (४०). This verse has been correctly explained by Dr. Thibaut and S. Dvivedi in their excellent edition of Pancha-Sidhantiká.

य (४१). Here from the words, पर्वणि, पर्वंणि and ऋतुशेष it is clear that by a day is meant a lunar day. Parvan ends on a lunar day, and ऋतु on a Solar day; the difference between the two is adhiparvan as shown by S. Dvivedi in the explanation of य (१३) in his Bháshya. Bárhaspatya explains this verse wrongly by taking nycthemeron (सावनदिन) instead of lunar days. (See his Jyotisha-Vedánga, p. 43.) Learned readers should think over the explanation of this verse given by S. Dvivedi in his Bháshya, p. 56-57.

For the correct understanding of his remark "अत्र बार्हस्पत्यव्याख्यानं प्रायः समीचीनमेव", see my Vivaraṇa, p. 82.

य (४२). This verse has been correctly explained by Somákara. (See his Bháshya, p. 57). Different interpretations given by several expounders may be interesting to the reader.

इत्येतन्मासस॰ This verse is not found in Somákara's Bháshya. For its explanation, see S. Dvivedi's Bháshya, p. 58 and my Vivaraṇa, p. 82.

Digitized by Google

'Lagadha' does not appear in any गोत्रप्रवरनिर्णय. (See * गोत्रप्रवरकदम्बनिबन्धम् by P. Chentsal Rao, C. I. E).

In my opinion the correct name is लगध whose sons are 'लागधयः' (See Rao's गोत्रप्रवरकदम्बनिबन्धम् p. 110.).

य (४३). This has been correctly explained by Somákara. Splitting the word, वेदविद् into two words, one 'Veda' (वेद) and the other, 'Vid' (विद्) S. Dvivedi has explained it in a better form.

ऋ (१-२). Here 'kála' (काल) has been correctly taken to mean the sun (रवि) by S. Dvivedi. Bárhaspatya was not aware of the passage of Garga, "कालश्चादित्य उच्यते" quoted by Somákara in his Bháshya p. 6, and so he blames S. Dvivedi for identifying kála with the sun. शुचि might be a contracted form of शुचिश्रयः (See Rao's गोत्रप्रवरकदम्बनिबन्धम्, p. 103, line 18).

In any case it does not behove Bárhaspatya to write about him:

"Further, he considers that शुचि is the name of the writer of Jyotisha-Vedánga.!" (See the appendix to his Jyotisha-Vedánga, p. iii).

ऋ (१६). Owing to his defective knowledge of Hindú Astronomy, Bárhaspatya, in the first half of the verse, translates 'गुणाभ्यस्तान्' into 'the eighth group of stars,' and 'प्राग्विलग्नान्' into 'equatorial nakshatra,' and in the second half of the verse 'षडभ्यस्तान्' into multiplied by 'six.' His translation of this verse runs as follows:

"The eighth (group of stars) reckoned from 'Śravishthá' should be designated the equatorial nakshatra. Solar months multiplied by six should be known as so many lunar Ritus." (Vide his Jyotisha-Vedánga, p. 36—38).

* This excellent book was published under the authority of the Government of H. H. the Mahárája of Mysore, in Mysore (1900).

* ऋ (१), ऋ (२), ऋ (३). etc., denote the first, second, third etc., verse of the traditional text of the ṛik recension.

Digitized by Google

If 'krittikas' were meant by प्राग्विलग्नान् विनिर्दिशेत्' then why did not the author of Jyautisha-Vedánga directly designate 'krittikas' the East star as he directly referred to Śravishthá and Áslesha in य (७), and why did he make a rule for such a simple Definition?

Lagna, a well known thing to Hindús, which fixes heaven's situation for the performance of religious duties, was unknown to Bárhaspatya. Hence the incorrect translation given by him. The word 'प्राग्विलग्नान्' suggests 'इष्टकाल' time reckoned from the rising of Śravishthá), as the necessary ellipsis (अध्याहार) to be supplied here. It should be noted that in Jyautisha-Vedánga one nycthemeron (सावनदिन) is divided into 124 parts, each part being called an amśa and that a nakshatra is divided into 124 parts, each part being called 'भांश' (nakshatra-amśa). Now in one nycthemeron (सावनदिन) or in its 124 amśas, all the twenty seven nakshatras or their 27 x 124 amśas will enter the horizon one after the other. Therefore in the इष्टकाल $= e, \frac{27 \times 124 \times e}{124}$ or $27 \times e$ nakshatra-amśas will enter the horizon. Thus इष्टकाल multiplied by 27 gives the nakshatra-amśas between Śravisthá and the current nakshatra. This product when divided by 124 will give the number of stars between them.

गण (भगण=नक्षत्र-गण=27) can be thus taken to denote twenty-seven. Therefore, I find that the emendation, गण in place of गुण gives the true meaning of the first half of the verse, relying upon arithmetical calculations which are the best guide in elucidating such obscure passages.

The latter half of the verse has been also incorrectly explained by both Bárhaspatya and Dikshit. (Vide Bárhaspatya's Jyotisha-Vedánga, p. 36-38 and Dikshit's history of Indian Astronomy, p. 81). They here forgot all about the 7th verse of Yájusha, from the principle underlying which it can be inferred that one complete revolution of the moon contains her six seasons as well as those of the sun. But one complete revolution of the

८३३

Digitized by Google

moon is called चान्द्रमास or नाक्षत्रमास. (See the 31st verse of Yájusha or the passage of Garga on the page 17 of this book). Hence multiplying the number of such months by six, we get the number of the moon's seasons. From the above facts it will appear that S. Dvivedi's emendation, भांशात् in place of कुंशान् gives the true meaning of the latter half of the verse. The moon's seasons of the kind, explained by Bárhaspatya in his Jyotisha-Vedánga, p. 37-38 are not to be found in any Sanskrit book. The explanations of Bárhaspatya and Dikshit are quite fanciful and anything but correct.

य (३३). This verse gives the same result as found by the rule given in य (२३), य (३९). It has been correctly explained by Dikshit. (See his history of Indian Astronomy, p. 84). S. Dvivedi's emendations are meant to keep the words of the verse in proper order and correct form.

य (३४). This verse does not involve any astronomical calculation. It has been wrongly numbered as the 34th verse of the Rik recension. The first half of the verse is in an altogether different metre from the latter half, which shows that there must be something wanting here. (See S. Dvivedi's Bháshya. p. 68.)

From Bárhaspatya's explanation of पर्व (parvan) as given in his Jyotisha-Vedánga, p. 39 it is obvious that the meanings of Vaidic words are unknown to him, though he considers himself a scholar in Vaidic Astronomy. It is this pride of his which actuated him to designate our learned professor, Mahámahopádhyáya Pandit Sudhákara Dvivedi, "Professor of non-Vedic *(*and not vedic also*) astronomy at Benares," (See the first page of the preface to his Jyotisha-Vedánga.)

The true meaning of पर्व in Vaidic sense is given by Somákara, 'देवा अस्मिन् प्रीणन्तीति वचनात्'. (See the page 19 of this book).

* (The words in Italics are ours).

य (३), य (१८), य (२५), य (२६), य (२७), य (४०) and ऋ (३४) are in different metres from the other verses of Jyautisha-Vedánga. The verses in different metres seem to have been afterwards added from other sources to Jyautisha-Vedánga, which was before in the pure अनुष्टुप् metre, to make the meanings of some of the original verses of Jyautisha-Vedánga clearer to the reader; for, य (३) explains य (२) in a better form; य (१८) was introduced for the explanation of जावाद्यांशैः in य (१७);

य (२४) was introduced for the explanation of य (८) and य (३८);

य (२६) is another form of य (२५);

य (२७) is another form of य (३६);

य (४०) is another form of य (८);

and the first half of ऋ (३४) in which the latter half is wanting is another form of भादानं स्याच्चतुर्दश्याम् in य (१७).

Bárhaspatya in the appendix to his Jyotisha-Vedánga has often criticized S. Dvivedi's anvayas, but he had better think more seriously of the anvayas of य (१८), य (१६), य (२८), य (२६), य (२७) य (३६). What anvaya can give the true meaning of सप्तकम् or सप्तकम् (one day plus seven kalás) of य (३६) until the whole thing be verified by Arithmetical calculations. Anvayas of the verses of such books as Jyautisha-Vedánga are acceptable only when their results agree with those actually found by exact calculations.

Conclusion:—

य (१-१२), य (१४), य (१७-१८), य (२४), य (२८), य (३०-३६) य (३८) and य (४२-४३), were more or less correctly explained by Somákara.

य (१३), य (२३), य (२५) „ „ „ Dikshit.

य (१८) and य (३६-४०) „ „ „ Dr. Thibaut.

Closely scrutinizing the whole work, it will be found that Bárhaspatya has done nothing original, except that he gave the proof of a rule, already discovered by Dr. Thibaut by tabulation, by the aid of an indeterminate equation.

Digitized by Google

In य (११), य (१२), य (१४) and य (१७) no astronomical calculations are required. They have been differently interpreted by Bárbaspatya and other expounders of Jyautisha-Vedánga, but Somákara's explanations of these verses and the terminology used in them of Jyautisha-Vedánga are most acceptable, for Somákara's opinions on religious points are authoritative.

S. Dvivedi has now proved all the rules contained in the Ślokas which involve astronomical calculations. All these notes form part of his lectures given to us on Jyautisha-Vedánga when Bárhaspatya criticised his Bháshya, and I have now compiled them for the benefit of the learned public, and I may also note here that the Maithila pupils of S. Dvivedi were provoked to write their Chikitsá, when Bárhaspatya criticised his Bháshya with very unworthy remarks; but all this was quite uncalled for. Learned readers, I hope, will now find that there is nothing now in Jyautisha-Vedánga which is obscure or left unexplained except य (३४) in which something still seems to be wanting,

MURALÍDHARA JHÁ.

Digitized by Google

Digitized by Google

शुद्धिपत्रम् ।

पृ॰	पं॰	अशु॰	शु॰
४	१२	रश्मतश्च	रश्मेतश्च
५	४	शास्त्र	शास्त्रे
८	५	न्तिवृत्त	न्तिवृत्ते
८	२०	प्रथमेऽंशे	प्रथमेंऽशे
११	१२	चतुविंश	चतुर्विंश
१२	२	यन्त्रा	यत्रा
१२	२०	तृतीयस्या	तृतीयस्य
१३	२	द्विद्वि	द्विर्द्वि
१८	११	चाचो	चार्चा
२०	९	धिक्केभ्य	धिक्केभ्यो
२१	७	वेन्तु	र्वेन्तु
२१	११	रिष्ठ	रिष्ट
२३	७	स्तव	स्तर्व
२३	१०	मद्रा	मद्रो
२३	१५	पूर्वे	पर्वे
२५	५	व्याख्यनं	व्याख्यानं
,,	६	पपत्तिस	पपत्तिश्च
२६	१	चन्द्र-	चन्द्रे
२७	४	मर्धे	मर्धं
२९	१८	श्रविष्ठातः	श्रविष्ठातः
३०	१५	पञ्चदश्यन्तद्वावुत्तरे	पञ्चदश्यन्ते द्वावुत्तरे
३१	१२	निदेशेन	निर्देशेन

Digitized by Google

पृ	पं॰	अशु॰	शु॰
३२	५	स्वृत चन्द्र	स्वृतश्चन्द्र
३२	५	श्चत चोदना	श्चतचोदना
३४	४	प्रतिश्चतुष्कं	प्रतिचतुष्कं
४३	१३	१२१/६	१२२/६
४३	२१	श्चतुर्दशश्चा	श्चतुर्दशस्या
४६	३	स्तस्सपति	स्नस्सपति
४६	१३	शेषोपपत्ति	शेषोपपत्ति
५२	२	त्रिंशत् सौरमासान्ते	त्रिंशत्सौरमासान्ते
६७	११	पूर्वास्तार्धं	पूर्वास्तार्धं
६७	२५	३२	३३
७१	१५	भाष्य	भाष्ये
७२	२०	५०	४०
७२	२१	यदेव	तदेव
७४	९	see	See
७५	१	पा	पाठ
७५	११	see	See
७९	१९	बार्हस्पत्येन	बार्हस्पत्येन
८२	१७	स्पष्टी:	स्पष्टी-
८२	२३	कालत्मान	कालात्मान

Digitized by Google

Digitized by Google

Digitized by Google

द्यूतार्थस्य क्रयविक्रयव्यवहारार्थस्य च दिवः कर्मणि षष्ठी स्यात् ॥ शतस्य दीव्यति । तदर्थस्य किम् । ब्राह्मणं दीव्यति । स्तौतीत्यर्थः ॥

विभाषोपसर्गे । २ । ३ । ५९ ॥

पूर्वयोगापवादः । शतस्य शतं वा प्रतिदीव्यति ॥

द्वितीया ब्राह्मणे । २ । ३ । ६० ॥

ब्राह्मणविषये प्रयोगे दिवस्तदर्थस्य कर्मणि द्वितीया स्यात् ॥ षष्ठ्यपवादः । गामस्य तदहः सभायां दीव्येयुः ॥

प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने । २ । ३ । ६१ ॥

देवतासम्प्रदानकेऽर्थे वर्तमानयोः प्रेष्यब्रुवोः कर्मणो हविर्विशेषस्य वाचकाच्छब्दात्षष्ठी स्यात् ॥ अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य अनुब्रूहि वा ॥

चतुर्थ्यर्थे बहुलं छन्दसि । २ । ३ । ६२ ॥

षष्ठी स्यात् ॥ पुरुषमृगश्चन्द्रमसे गोधाकालकादार्वाघाटस्ते वनस्पतीनाम् । वनस्पतिभ्य इत्यर्थः । षष्ठ्यर्थे चतुर्थीति वक्तव्यम् ॥ * ॥ या खर्वेण पिबति तस्यै खर्वः ॥

यजेश्च करणे । २ । ३ । ६३ ॥

इह छन्दसि बहुलं षष्ठी ॥ घृतस्य घृतेन वा यजते ॥

कृत्वोर्थप्रयोगे कालेऽधिकरणे । २ । ३ । ६४ ॥

कृत्वोऽर्थानां प्रयोगे कालवाचिन्यधिकरणे शेषे षष्ठी ॥ पञ्चकृत्वोऽह्नो भोजनम् । द्विरह्नो भोजनम् । शेषे किम् । द्विरहन्यध्ययनम् ॥

कर्तृकर्मणोः कृति । २ । ३ । ६५ ॥

कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात् ॥ कृष्णस्य कृतिः ॥

Digitized by Google

जगतः कर्त्ता कृष्णः । गुणकर्मणि वेष्यते ॥ * ॥ नेताऽश्वस्य स्रुघ्नस्य स्रुघ्नं वा । कृति किम् । तद्धिते माभूत् । कृतपूर्वी कटम् ॥

उभयप्राप्तौ कर्मणि । २ । ३ । ६६ ॥

उभयोः प्राप्तिर्यस्मिन्कृति तत्र कर्मण्येव षष्ठी स्यात् । आश्चर्यो गवां दोहोऽगोपेन । स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः ॥ * ॥ भेदिका बिभित्सा वा रुद्रस्य जगतः । शेषे विभाषा ॥ * ॥ स्त्रीप्रत्यय इत्येके । विचित्रा जगतः कृतिर्हरेर्हरिणा वा । केचिदविशेषेण विभाषामिच्छन्ति । शब्दानामनुशासनमाचार्येणाचार्यस्य वा ॥

क्तस्य च वर्तमाने । २ । ३ । ६७ ॥

वर्तमानार्थस्य क्तस्य योगे षष्ठी स्यात् ॥ न लोकेति निषेधस्यापवादः । राज्ञां मतो बुद्धः पूजितो वा ॥

अधिकरणवाचिनश्च । २ । ३ । ६८ ॥

क्तस्य योगे षष्ठी स्यात् ॥ इदमेषां शयितम् ।

न लोकाव्ययनिष्ठाखलर्थतृनाम् । २ । ३ । ६९ ॥

एषां प्रयोगे षष्ठी न स्यात् ॥ लादेशाः । कुर्वन् कुर्वाणो वा सृष्टिं हरिः । उः । हरिं दिदृक्षुः । अलङ्करिष्णुर्वा । उकञ् । दैत्यान् घातुको हरिः । कमेरनिषेधः ॥ * ॥ लक्ष्म्याः कामुकः । अव्ययम् । जगत्सृष्ट्वा । सुखं कर्तुम् । निष्ठा । दैत्यान् हतवान् । विष्णुना हता दैत्याः । खलर्थः । ईषत्करः प्रपञ्चो हरिणा । तृन्निति प्रत्याहारः । शतृशानचाविति तृशब्दादारभ्यातृनो नकारात् । शानन् । सोमं पवमानः । चानश् । आत्मानं मण्डयमानः । शतृ । वेदमधीयन् । तृन् । कर्ता लोकान् । द्विषः शतुर्वा ॥ * ॥ मुरस्य मुरं

वा द्विषन् ॥ सर्वोऽयं कारकषष्ठ्याः प्रतिषेधः । शेषे षष्ठी तु स्यादेव । ब्राह्मणस्य कुर्वन् । नरकस्य जिष्णुः ॥

अकेनोर्भविष्यदाधमर्ण्ययोः । २ । ३ । ७० ॥

भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थेनश्च योगे षष्ठी न स्यात् ॥ सतः पालकोऽवतरति । व्रजं गामी । शतं दायी ॥

कृत्यानां कर्तरि वा । २ । ३ । ७१ ॥

षष्ठी वा ॥ मया मम वा सेव्यो हरिः । कर्तरीति किम् । गेयो माणवकः साम्नाम् । भव्यगेयेति कर्तरि यद्विधानादनभिहितं कर्म । अत्र योगो विभज्यते । कृत्यानाम् । उभयप्राप्ताविति नेति चानुवर्तते । नेतव्या व्रजं गावः कृष्णेन । ततः कर्तरि वा । उक्तोऽर्थः ॥

तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम् । २ । ३ । ७२ ॥

तुल्यार्थैर्योगे तृतीया वा स्यात् पक्षे षष्ठी ॥ तुल्यः सदृशः समो वा कृष्णस्य कृष्णेन वा । अतुलोपमाभ्यां किम् । तुला उपमा वा कृष्णस्य नास्ति ॥

चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः । २ । ३ । ७३ ॥

एतदर्थैर्योगे चतुर्थी वा स्यात् पक्षे षष्ठी ॥ आयुष्यं चिरञ्जीवितं वा कृष्णाय कृष्णस्य वा भूयात् । एवं मद्रं भद्रं कुशलं निरामयं सुखं शं अर्थः प्रयोजनं हितं पथ्यं भूयात् ॥ आशिषि किम् । देवदत्तस्यायुष्यमस्ति । व्याख्यानात्सर्वत्रार्थग्रहणम् । मद्रभद्रयोः पर्यायत्वादन्यतरो न पठनीयः ॥

इति व्याकरणदीपिकायां वृत्तौ द्वितीयस्याध्यायस्य तृतीयः पादः ॥

अथ द्वितीयाध्यायस्य चतुर्थः पादः ।

द्विगुरेकवचनम् । २ । ४ । १ ॥

द्विग्वर्थः समाहार एकवत्स्यात् ॥ पञ्चगवम् ।

द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् । २ । ४ । २ ॥

एषां द्वन्द्व एकवत्स्यात् ॥ पाणिपादम् । मार्दङ्गिकपाणविकम् । रथिकाश्वारोहम् । समाहारस्यैकत्वादेकत्वे सिद्धे नियमार्थं प्रकरणम् । प्राण्यङ्गादीनां समाहार एव यथा स्यात् ॥

अनुवादे चरणानाम् । २ । ४ । ३ ॥

चरणानां द्वन्द्व एकवत् सिद्धस्योपन्यासे ॥ स्थेणोर्लुङीति वक्तव्यम् ॥ * ॥ उदगात्कठकालापम् । प्रत्यष्ठात्कठकौथुमम् ॥

अध्वर्युक्रतुरनपुंसकम् । २ । ४ । ४ ॥

यजुर्वेदे विहितो यः क्रतुस्तद्वाचिनामनपुंसकलिङ्गानां द्वन्द्व एकवत्स्यात् ॥ अर्काश्वमेधम् । अध्वर्युक्रतुः किम् । इषुवज्रौ सामवेदे विहितौ । अनपुंसकं किम् । राजसूयवाजपेये अर्द्धर्चादी ॥

अध्ययनतोऽविप्रकृष्टाख्यानाम् । २ । ४ । ५ ॥

अध्ययनेन प्रत्यासन्ना आख्या येषां तेषां द्वन्द्व एकवत् ॥ पदकक्रमकम् ।

जातिरप्राणिनाम् । २ । ४ । ६ ॥

प्राणिवर्जजातिवाचिनां द्वन्द्व एकवत् ॥ धानाशष्कुलि । प्राणिनान्तु विट्शूद्राः । द्रव्यजातीयानामेव । नेह । रूपरसौ । गम-

Digitized by Google

नाकुञ्चने। जातिप्राधान्ये एवायमेकवद्भावः। द्रव्यविशेषविवक्षायान्तु बदरामलकानि॥

विशिष्टलिङ्गो नदी देशोऽग्रामाः।२।४।७॥

ग्रामवर्जनदीदेशवाचिनां भिन्नलिङ्गानां समाहारे द्वन्द्वः स्यात्॥ उध्यश्च इरावती च उध्येरावती। गङ्गा च शोणश्च गङ्गाशोणम्। कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रम्। भिन्नलिङ्गानां किम्। गङ्गायमुने। मद्रकेकयाः। अग्रामाः किम्। जाम्बवं नगरम्। शालूकिनी ग्रामः। जाम्बवशालूकिन्यौ॥

क्षुद्रजन्तवः।२।४।८॥

एषां समाहारे द्वन्द्वः स्यात्॥ यूकालिक्षम्। आ नकुलात् क्षुद्रजन्तवः॥

येषाञ्च विरोधः शाश्वतिकः।२।४।९॥

एषां प्राग्वत्। अहिनकुलम्। गोव्याघ्रम् काकोलूकमित्यादौ परत्वाद्विभाषा वृक्षमृगेति प्राप्तं चकारेण बाध्यते॥

शूद्राणामनिरवसितानाम्।२।४।१०॥

अबहिष्कृतानां शूद्राणां प्राग्वत्॥ तक्षायस्कारम्। पात्राद्बहिष्कृतानां तु चण्डालमृतपाः॥

गवाश्वप्रभृतीनि च।२।४।११॥

यथोच्चारितानि साधूनि॥ गवाश्वं दासीदासमित्यादि॥

विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्।२।४।१२॥

वृक्षादीनां सप्तानां द्वन्द्वः अश्ववडवेत्यादिकं द्वन्द्वत्रयञ्च प्राग्वत् ॥ वृक्षादौ विशेषाणामेव ग्रहणम् । प्लक्षन्यग्रोधम् । प्लक्षन्यग्रोधाः । रुरुपृषतम् । रुरुपृषताः । कुशकाशम् । कुशकाशाः । व्रीहियवम् । व्रीहियवाः । दधिघृतम् । दधिघृते । गोमहिषम् । गोमहिषाः । शुकबकम् । शुकबकाः । अश्ववडवम् । अश्ववडवौ । पूर्वापरम् । पूर्वापरे । अधरोत्तरम् । अधरोत्तरे । फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां बहुप्रकृतिरेव द्वन्द्व एकवदिति वाच्यम् ॥ * ॥ बदराणि चामलकानि च बदरामलकम् । जातिरप्राणिनामित्येकवद्भावः । नेह । बदरामलके । रथिकाश्वारोहौ । प्लक्षन्यग्रोधौ इत्यादि । विभाषा वृक्षेति सूत्रे ये ऽप्राणिनस्तेषां ग्रहणं जातिरप्राणिनामिति नित्ये प्राप्ते विकल्पार्थम् । पशुग्रहणं हस्त्यश्वादिषु सेनाङ्गत्वान्नित्ये प्राप्ते । मृगाणां मृगैरेव शकुनीनां शकुनिभिरेवोभयत्र द्वन्द्वः । अन्यैस्तु सहेतरेतरयोग एवेति नियमार्थं मृगशकुनिग्रहणम् । एवं पूर्वापराधरोत्तरमपि । अश्ववडवग्रहणं तु पक्षे नपुंसकत्वार्थम् । अन्यथा परत्वात्पूर्ववदश्ववडवाविति स्यात् ॥

विप्रतिषिद्धं चानधिकरणवाचि । २ । ४ । १३ ॥

विरुद्धार्थानामद्रव्यवाचिनां द्वन्द्व एकवत्स्यात् ॥ वैकल्पिकः समाहारे द्वन्द्वश्चार्थे इति सूत्रेण प्राप्तः स विरुद्धार्थानां यदि भवति तर्हि अद्रव्यवाचिनामेवेति नियमार्थमिदम् । तेन द्रव्यवाचिनामितरेतरयोग एव । शीतोष्णे उदके स्तः । विप्रतिषिद्धं किम् । नन्दकपाञ्चजन्यम् । इह पाक्षिकः समाहारद्वन्द्वो भवत्येव ॥

न दधिपयआदीनि । २ । ४ । १४ ॥

एतानि नैकवत्स्युः । दधिपयसी । इध्माबर्हिषी । निपातनाद्दीर्घः । ऋक्सामे । वाङ्मनसे ॥

अधिकरणैतावत्त्वे च । २ । ४ । १५ ॥

द्रव्यस्य संख्यावगमे एकवदेवेति नियमो न स्यात् ॥ दश दन्तोष्ठाः ॥

विभाषा समीपे । २ । ४ । १६ ॥

अधिकरणैतावत्त्वस्य सामीप्येन परिच्छेदे समाहार एवेत्येवंरूपो नियमो वा स्यात् ॥ उपदशं दन्तोष्ठम् । उपदशा दन्तोष्ठाः ॥

स नपुंसकम् । २ । ४ । १७ ॥

समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात् ॥ परवल्लिङ्गापवादः । पञ्चगवम् । दन्तोष्ठम् ॥ अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः ॥ * ॥ पञ्चमूली ॥ आबन्तो वा ॥ * ॥ पञ्चखट्वी । पञ्चखट्वम् ॥ अनो नलोपश्च वा च द्विगुः स्त्रियाम् ॥ * ॥ पञ्चतक्षम् । पञ्चतक्षी । पात्राद्यन्तस्य न ॥ * ॥ पञ्चपात्रम् । त्रिभुवनम् । चतुर्युगम् । पुण्यसुदिनाभ्यामह्नः क्लीबतेष्टा ॥ * ॥ पुण्याहम् । सुदिनाहम् । सुदिनशब्दः प्रशस्तवाची । पथः सङ्ख्याव्ययादेः ॥ * ॥ सङ्ख्याव्ययरूपादेः परः कृतसमासान्तः पथशब्दः क्लीबमित्यर्थः ॥ त्रयाणां पन्थास्त्रिपथम् । विरूपः पन्था विपथम् । कृतसमासान्तग्रहणादेह । सुपन्थाः । सामान्ये नपुंसकम् ॥ * ॥ मृदु पचति । प्रातः कमनीयम् ॥

अव्ययीभावश्च । २ । ४ । १८ ॥

अयं नपुंसकं स्यात् ॥ अधिगोपम् ।

तत्पुरुषोऽनञ्कर्मधारयः । २ । ४ । १९ ॥

Digitized by Google

अधिकारोऽयम् ॥

संज्ञायां कन्थोशीनरेषु । २ । ४ । २० ॥

कन्थान्तस्तत्पुरुषः क्लीबं स्यात्सा चेदुशीनरदेशोत्पन्नायाः कन्थायाः संज्ञा ॥ सुशमस्यापत्यानि सौशमयस्तेषां कन्था सौशमिकन्थम् । संज्ञायां किम् । वीरणकन्था । उशीनरेषु किम् । दाक्षिकन्था ॥

उपज्ञोपक्रमं तदाद्याचिख्यासायाम् । २ । ४ । २१ ॥

उपज्ञान्त उपक्रमान्तश्च तत्पुरुषो नपुंसकं स्यात् तयोरुपज्ञायमानोपक्रम्यमाणयोरादिः प्राथम्यं चेदाख्यातुमिष्यते ॥ पाणिनेरुपज्ञा पाणिन्युपज्ञं ग्रन्थः । नन्दोपक्रमं द्रोणः ॥

छाया बाहुल्ये । २ । ४ । २२ ॥

छायान्तस्तत्पुरुषो नपुंसकं स्यात् पूर्वपदार्थबाहुल्ये ॥ इक्षूणां छाया इक्षुच्छायम् । विभाषासेनेति विकल्पस्यापवादः । इक्षुच्छायानिषादिन्य इति तु छाया समन्तान्निषादिन्य इत्याङ्प्रश्लेषो बोध्यः ॥

सभा राजाऽमनुष्यपूर्वा । २ । ४ । २३ ॥

राजपर्यायपूर्वा ऽमनुष्यपूर्वेश्च सभान्तस्तत्पुरुषो नपुंसकं स्यात् ॥ इनसभम् । ईश्वरसभम् । पर्यायस्यैवेष्यते ॥ * ॥ नेह । राजसभा । चन्द्रगुप्तसभा । अमनुष्यशब्दो रूढ्या रक्षःपिशाचादीनाह । रक्षःसभम् । पिशाचसभम् ।

अशाला च । २ । ४ । २४ ॥

संघातार्था या सभा तदन्तस्तत्पुरुषः क्लीबं स्यात् ॥ स्त्रीसभम् । स्त्रीसंघात इत्यर्थः । अशाला किम् । धर्मसभा । धर्मशालेत्यर्थः ॥

विभाषा सेनासुराच्छायाशालानिशानाम्।२।४।२५॥

एतदन्तस्तत्पुरुषः क्लीबं वा स्यात्। ब्राह्मणसेनम्। ब्राह्मणसेना। यवसुरम्। यवसुरा। कुड्यच्छायम्। कुड्यच्छाया। गोशालम्। गोशाला। श्वनिशम्। श्वनिशा। तत्पुरुषोऽनञ्कर्मधारय इत्युक्तेर्नेह। दृढसेनो राजा। असेना। परमसेना॥

परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः।२।४।२६॥

एतयोः परपदस्येव लिङ्गं स्यात्॥ कुक्कुटमयूर्याविमे। मयूरीकुक्कुटाविमौ। अर्द्धपिप्पली॥ द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः॥ * ॥ पञ्चसु कपालेषु संस्कृतः पञ्चकपालः पुरोडाशः। प्राप्तो जीविकां प्राप्तजीविकः। आपन्नजीविकः। अलं कुमार्यै अलङ्कुमारिः। अत एव ज्ञापकात्समासः। निष्कौशाम्बिः॥

पूर्ववदश्ववडवौ।२।४।२७॥

द्विवचनमतन्त्रम्। अश्ववडवौ। अश्ववडवान्। अश्ववडवैः॥

हेमन्तशिशिरावहोरात्रे च च्छन्दसि।२।४।२८॥

पूर्ववत्॥ हेमन्तश्च शिशिरश्च हेमन्तशिशिरौ। अहोरात्रे।

रात्राह्नाहाः पुंसि।२।४।२९॥

एतदन्तौ द्वन्द्वतत्पुरुषौ पुंस्येव॥ अनन्तरत्वात्परवल्लिङ्गतापवादोऽप्ययं परत्वात्समाहारनपुंसकतां बाधते। अहोरात्रः। रात्रेः पूर्वो भागः पूर्वरात्रः। पूर्वाह्णः। द्व्यहः॥ सङ्ख्यापूर्वं रात्रं क्लीबम्॥ * ॥ द्विरात्रम्। त्रिरात्रम्। गणरात्रम्॥ अनुवाकादयः पुंसीति वक्तव्यम्॥ * ॥ अनुवाकः। शंयुवाकः। सूक्तवाकः॥

अपथं नपुंसकम्।२।४।३०॥

Digitized by Google

तत्पुरुष इत्येव ॥ अन्यत्र तु अपथो देशः । कृतसमासान्तनिर्देशान्नेह । अपन्थाः ॥

अर्द्धर्चाः पुंसि च । २ । ४ । ३१ ॥

अर्द्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः ॥ अर्द्धर्चः । अर्द्धर्चम् । ध्वजः । ध्वजम् । एवं तीर्थशरीरमण्डपदेहशङ्कुशशकलदन्त्यादि ॥

इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ । २ । ४ । ३२ ॥

अन्वादेशविषयस्य इदमोऽनुदात्तोऽशादेशः स्यात्तृतीयादौ ॥ किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः । आभ्यां छात्राभ्यां रात्रिरधीता । अथो आभ्यामहरप्यधीतम् । अनुवचनं साकच्कार्थम् ॥

एतदस्त्रतसोस्त्रतसौ चानुदात्तौ । २ । ४ । ३३ ॥

अन्वादेशविषये एतदोऽश् स्यात्स चानुदात्तस्त्रतसोः परतस्तौ चानुदात्तौ स्तः ॥ एतस्मिन्ग्रामे सुखं वसामः । अथो ऽत्राधीमहे । अतो न गन्तास्मः । सर्वत्रानुदात्तं भवति । एतदोऽशित्यशादेशे लब्धे पुनर्वचनमनुदात्तार्थमिति काशिका ॥

द्वितीयाटौस्स्वेनः । २ । ४ । ३४ ॥

द्वितीयायां टौसोश्च परत इदमेतदोरेनादेशोऽनुदात्तः स्यादन्वादेशे ॥ इदमो मण्डूकप्लुत्या ऽनुवृत्तिः । अनेन व्याकरणमधीतमेनं छन्दोऽध्यापय । अनेन रात्रिरधीता अथो एनेनाहरप्यधीतम् । अनयोः पवित्रं कुलमेनयोः प्रभूतम् स्वम् । एनं छात्रं छन्दोऽध्यापय अथो एनं व्याकरणमध्यापयेत्यादि ॥ नपुंसकेक-

कवचने एनद्वक्तव्यः ॥ * ॥ प्रक्षालयेदम्। परिवर्तयेनत्। प्रक्षालयेनत्। परिवर्तयेनत् ॥

आर्द्धधातुके। २। ४। ३५ ॥

अधिकारोऽयम्। आ यय्वर्वियार्षजित इति।

अदो जग्धिर्ल्यप् ति किति। २। ४। ३६ ॥

ल्यबिति लुप्तसप्तमीकम्। अदो जग्धिः स्याल्ल्यपि तादौ किति च ॥ इकार उच्चारणार्थो नानुबन्धस्तेन नुम्नेति काशिका। प्रजग्ध्य। विजग्ध्य। घत्वम्। झरो झरि सवर्णे। जग्धः। जग्धवान्। जग्ध्वा। जग्धौ सिद्धे ऽन्तरङ्गत्वात्तिकितीति ल्यबुच्यते तज्ज्ञापयत्यन्तरङ्गाणां ल्यपा भवति बाधनम्। तदाहुः। अन्तरङ्गानपि विधीन्बहिरङ्गो ल्यप् बाधत इति। तेन हित्वदत्वआत्वेत्वदीर्घत्वशूठइटो ल्यपि न। विधाय। प्रदाय। प्रखन्य। प्रस्थाय। प्रक्रम्य। आपृच्छ्य। प्रदीव्य। तीति किम्। अद्यते। कितीति किम्। अत्तव्यम्। अन्नमित्यत्र अन्नाख्या इति निपातनान्न भवतीति काशिका ॥

लुङ्सनोर्घस्लृ। २। ४। ३७ ॥

अदो घस्लृ स्याल्लुङि सनि च ॥ लृदित्करणमङर्थम्। अघसत्। जिघत्सति। घस्लृभावे अच्युपसंख्यानम् ॥ * ॥ प्रात्तीति प्रघसः ॥

घञपोश्च। २। ४। ३८ ॥

अदो घस्लृ स्यात् घञि अपि च ॥ घासः। प्रघसः ॥

बहुलं छन्दसि। २। ४। ३९ ॥

अदो घस्लादेशः स्यात् ॥ घस्तां नूनम् । लुङि मन्त्रे घसेति च्लेर्लुक् । अडभावः । सग्धिश्च मे ॥

लिट्यन्यतरस्याम् । २ । ४ । ४० ॥

अदो घस्लृ वा स्याल्लिटि ॥ जघास । जक्षतुः । आद । आदतुः । एतत्सामर्थ्यादेव घस्लृ अदने इत्यस्य तु यत्र लिङ्गं वचनं वाऽस्ति तत्रैव प्रयोगः । धातुपाठे पाठः अपि परस्मैपदे लिङ्गम् । लृदित्करणमङि । अनिट्कारिकासु पाठो बलाद्यार्धधातुके । क्वचित्तु विशिष्योपादानम् ।

वेञो वयिः । २ । ४ । ४१ ॥

वा स्याल्लिटि ॥ इकार उच्चारणार्थः । उवाय । ऊयतुः । ऊवतुः । स्थानिवद्भावेन ञित्त्वात्तङ् । ऊये । ऊवे । वयादेशाभावे । ववौ । ववतुः ॥

हनो वध लिङि । २ । ४ । ४२ ॥

हन्तेर्वधः स्याल्लिङि ॥ वधादेशोऽदन्तः । आर्द्धधातुक इति विषयसप्तमी । तेनार्द्धधातुकोपदेशे अकारान्तत्वादतो लोपः । तस्य स्थानिवद्भावादवधीदित्यादौ हलन्तलक्षणा अतो हलादेरिति च वृद्धिर्न भवतीति काशिका । वध्यात् । वध्यास्ताम् । आर्द्धधातुके किम् । विध्यादौ हन्यात् ॥

लुङि च । २ । ४ । ४३ ॥

हन्तेर्वधः स्यात् ॥ अवधीत् । अवधिष्टाम् । योगविभाग उत्तरार्थः ॥

आत्मनेपदेष्वन्यतरस्याम् । २ । ४ । ४४ ॥

हनो वा वधादेशो लुङि ॥ आवधिष्ट । आवधिषाताम् । आहत । आहसाताम् । हन्तेर्यङ्लुकि द्वित्वे द्विरुच्चारितस्य समुदितस्य प्रकृतिग्रहणेन ग्रहणादाशीर्लिङादौ वधादेशः । वध्यात् । अवधीत् । अवधिष्टामित्यादि । वधादेशस्य द्वित्वं न भवति स्थानिवत्त्वेनानभ्यासस्येति निषेधात् । तद्धि समानाधिकरणं धातोर्विशेषणं बहुव्रीहिबलात् । आङ्पूर्वात्तु आङो यमहन इत्यात्मनेपदम् । आवधिषाताम् । आजङ्घनिष्ट । आजङ्घनिषातामित्यादि ॥

इणो गा लुङि । २ । ४ । ४५ ॥

इणो गादेशः स्याल्लुङि ॥ अगात् । अगाताम् । लुङीत्यनुवर्तमाने पुनर्लुङ्ग्रहणं आत्मनेपदेषु अन्यतरस्यामित्येवं तदभूत् इह तु अविशेषेण नित्यं भवति । अगात् । अगायि भवतेति काशिका ॥ इणवदिक इति वक्तव्यम् ॥ * ॥ अध्यगात् । अध्यगाताम् । अधियन्ति । केचित्तु आर्द्धधातुकाधिकारोक्तस्यैवातिदेश माहुः । तन्मते ययान । तथा च भट्टिः । समीतयो राघवयोरधीयन्निति ॥

णौ गमिरबोधने । २ । ४ । ४६ ॥

इणो गमिः स्याण्णौ । इकार उच्चारणार्थः । गमयति । बोधने तु प्रत्याययति । इणवदिकः ॥ * ॥ अधिगमयति ॥

सनि च । २ । ४ । ४७ ॥

इणो गमिः स्यात्र तु बोधने ॥ जिगमिषति । बोधने तु अर्थान्प्रतीषिषति ॥ इणवदिकः ॥ * ॥ अधिजिगमिषति । योगविभाग उत्तरार्थः ॥

इङश्च । २ । ४ । ४८ ॥

इङो गमिः स्यात्सनि । अधिजिगांसते ॥

गाङ् लिटि । २ । ४ । ४९ ॥

इङो गाङ् स्याल्लिटि लावस्थायां विवक्षते वा । अधिजगे । अधिजगाते । गाङ्नुबंधग्रहणं विशेषणार्थम् । गाङ्कुटादिभ्य इत्यत्रास्यैव ग्रहणं यथा स्यात् इह माभूत् । अगासातां ग्रामो देवदत्तेन ॥ अन्यथा घुमास्थेतीत्वप्रसङ्गः ॥

विभाषा लुङ्लृङोः । २ । ४ । ५० ॥

इङो गाङ् वा स्यात् । अध्यगीष्ट । अध्यगीष्यत । आदेशपक्षे गाङ्कुटेति ङित्वे घुमास्थेतीत्वम् । अध्यैष्ट । अध्यैष्यत ॥

णौ च संश्चङोः । २ । ४ । ५१ ॥

सन्परे चङ्परे च णौ इङो गाङ् वा स्यात् ॥ अधिजिगापयिषति । अध्यापिपयिषति । अध्यजीगपत् । अध्यापिपत् । णौ किम् । अधिजिगांसते । संश्चङोः किम् । अध्यापयति ॥

अस्तेर्भूः । २ । ४ । ५२ ॥

भविता । भवितव्यम् । एधामासेत्यादौ तु कृञ्चानुप्रयुज्यत इत्यनुप्रयोगसामर्थ्यान्न भवति ॥

ब्रुवो वचिः । २ । ४ । ५३ ॥

वक्ता । वक्तव्यम् ।

चक्षिङः ख्याञ् । २ । ४ । ५४ ॥

ख्शादिरयमादेशः ॥ असिद्धकाण्डे शत्वानन्तरं शस्य विभाषा यत्वं वक्तव्यम् ॥ * ॥ अकारानुबन्ध उभयपदार्थः । ख्याता ।

कृशाता । ख्यास्यति । ख्यास्यते । क्शास्यति । क्शास्यते । चत्वम् । चयो द्वितीया इति तु न । तस्यासिद्धत्वात् । असिद्धकाण्डे किम् । सोप्रख्यीयः । योपधलक्षणो वुञ् माभूत् । आख्यातः । निष्ठानत्वं माभूत् । न ध्याख्येति तु प्रतिषेधः ख्या प्रकथन इत्यस्यैव । प्रतिपदोक्तत्वात् । अस्य तु न । शस्य यत्वेन लाक्षणिकत्वादिति कैयटः । पुंख्यानम् । रुविधिर्माभूत् । पर्याख्यानम् । णत्वं माभूत् । ख्या प्रकथन इत्यस्मादपि परस्य लुब्योगाप्रख्यानादिति निपातनाण्णत्वाभाव इति स एव । नमः ख्याचे । सस्थानत्वं माभूत् । सस्थानो जिह्वामूलीयः । एतदेव वार्तिकं भाष्यं च ख्या प्रकथने इत्यस्य सार्वधातुकमात्रविषयत्वे लिङ्गम् । सम्पूर्वस्य ख्यातेः प्रयोगो नेति न्यासकारः । वर्जने प्रतिषेधो वक्तव्यः ॥ * ॥ दुर्जनाः परिसंचक्ष्याः । वर्जनीया इत्यर्थः । असनयोश्च प्रतिषेधो वक्तव्यः ॥ * ॥ नृचक्षा रक्षाः । नृहिंसकमित्यर्थः । दीर्घश्छान्दसः । भाषायांतु नृचक्षो रक्षः । मिथुनेऽसिरित्यधिकारे चक्षेर्बहुलमित्यौणादिक असिः । तत्र शिच्चेत्येतदनालोच्य असुग्रहणम् । विचक्षणाः । बहुलं तणीति वक्तव्यम् ॥ * ॥ अन्नवधकगात्रविचक्षणाजिराद्यर्थम् । तणीति संज्ञाछन्दसोर्ग्रहणम् । सर्वप्रकरणापेदमेतत् । जग्ध्यभावः । वधुलि वधादेशः । इण आणादिके क्नि गादेशः । ख्याञभावः । वीभावाभावश्च । विचक्षणग्रहणं पूर्ववचनद्वयस्यैतत्प्रपंचत्वबोधनाय । अजिरग्रहणंतु अजिरशिशिरेत्यौणादिकनिपातनमनपेक्ष्य कृतम् ॥

वा लिटि । २ । ४ । ५५ ॥

चक्षिङः ख्याञादेशो वा स्याल्लिटि ॥ चख्यौ । चख्ये । चक्शौ । चक्शे । चचक्षे ॥

अजेर्व्यघञपोः । २ । ४ । ५६ ॥

अजेर्वी इत्ययमादेशः स्यादार्द्धधातुकविषये घञमपञ्च वर्ज्जयित्वा ॥ विवाय । विव्यतुः । अत्र वकारस्य हल्परत्वादुपधायाञ्चेति दीर्घे प्राप्ते ऽचः परस्मिन्निति स्थानिवद्भावेनाच्परत्वम् । न च न पदान्तेति निषेधः । स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवदित्युक्तेः । अघञपोरिति किम् । समाजः । उदाजः । समजः । उदजः । दीर्घोच्चारणं किम् । प्रवीतः । आर्द्धधातुकविषये किम् । वेवीयते । अस्य यङ्लुक् नास्ति । लुकापहारे विषयत्वासंभवेन वीभावस्याप्रवृत्तेः ॥ घञपोः प्रतिषेधे क्यप उपसंख्यानम् ॥ * ॥ समज्या ॥ वलादावार्द्धधातुके वेष्यते ॥ * ॥ प्रवेता । प्राजिता ॥

वा यौ । २ । ४ । ५७ ॥

अजेर्वी वा स्यात् यौ ॥ प्रवयणम् । प्राजनम् ।

ण्यक्षत्रियार्षञितो यूनि लुगणिञोः । २ । ४ । ५८ ॥

ण्यप्रत्ययान्तात्क्षत्रियगोत्रप्रत्ययान्तादार्षप्रत्ययान्तात् ञितश्च परयोर्युवाभिधायिनोरणिञोर्लुक् स्यात् ॥ कौरव्यः पिता । कौरव्यः पुत्रः । कुर्वादिण्यन्ताद्युवार्थकस्येञो लुक् । श्वाफल्कः पिता । श्वाफल्कः पुत्रः । ऋष्यंधकेत्यणंताद्युवार्थकस्येञो लुक् । वासिष्ठः पिता । वासिष्ठः पुत्रः । ऋष्यणन्ताद्युवार्थकस्येञो लुक् । वैदः पिता । वैदः पुत्रः । विदाद्यञन्ताद्युवार्थकस्येञो लुक् । तैकायनिः पिता । तैकायनिः पुत्रः । तिकादिफिञन्ताद्युवार्थकस्याणो लुक् । एभ्यः किम् । कौहडः पिता । कौहडिः पुत्रः । शिवाद्यणंताद्युनि इञ् । यूनि किम् । वामरथ्यस्य छात्रः वामरथः । कुर्वादिण्यन्ताद्वामरथस्य कण्वादित्वात्स्व-

ॐ नमः परमात्मने ।

शिवज्ञानबोधः ।

लघुटीकासहितः ।

स्त्रीपुंनपुंसकादित्वाज्जगतः कार्यदर्शनात् ।
अस्ति कर्ता स हृत्वैतत्सृजत्यस्मात्प्रभुर्हरः ॥ १ ॥

जगतः कर्तास्ति कार्यदर्शनात् स्त्रीपुंनपुंसकादित्वात् स एतत् हृत्वा पुनः सृजति अस्मात् हरः प्रभुः । अस्यार्थः कार्यदर्शनात् कार्यत्वदर्शनात् जगतः महीधरादेः कर्ता अस्ति । जगतः कार्यत्वं कुत इत्यत आह स्त्रीपुंनपुंसकादित्वादिति । अत्र स्त्रीपुंनपुंसकशब्दैस्तत्तद्देहा उच्यन्ते आदिशब्देन इन्द्रियाणि मदादित्वात् तत्प्रकाशादित्वात् तद्वत् सावयवत्वादित्यर्थः । किं करोति तत्राह स इति । स कर्ता एतत् जगत् हृत्वा उपसंहृत्य पुनः सृजति । एतेन संहारकर्तुरेव स्वामित्वमित्याह अस्मादिति । अस्मात् उक्तयुक्त्या हरः देहेन्द्रियादिरहितः सर्वोपसंहारशक्तिमानेव प्रभुः ईश्वरः । अत्र चास्तीत्यनेन चैकत्वं विवक्षितं तेन च समस्तोपसंहारशक्तिमत एव सिद्धौ तस्य सृष्ट्यादिकर्तृत्वमुचितमिति प्रथमसृष्टौ शिव एव कर्ता तदनुग्रहेण च अनन्तेश्वरहिरण्यगर्भादीनामवान्तरकर्तृत्वमिति तत्रागमानामविरोधो द्रष्टव्यः ॥ १ ॥

स कथं सृजति तत्राह अन्यः सन्निति ।

अन्यः सन् व्याप्तितोऽनन्यः कर्ता कर्मानुसारतः ।
करोति संसृतिं पुंसामाज्ञया समवेतया ॥ २ ॥

स कर्ता पुंसां पशूनां संसृतिं तदनुरूपभुवनादिकं करोति सृजति

केन करणेन करोति तत्राह आज्ञयेति । आज्ञया विधिनिषेधप्रवर्तिकया ज्ञानक्रियात्मिकया शक्त्या । सा क्रिया किमीश्वराद्भिन्ना नेत्याह समवेतयेति । समवेतया समवायवृत्त्या वर्तमानया अभिन्नयेत्यर्थः । यद्ययं स्वेच्छया पुंसां संसृतिं करोति तदा कस्यचित्सुखं कस्यचिद्दुःखं करोतीति वैषम्यनैर्घृण्ये स्यातां तत्राह कर्मानुसारत इति । कर्म धर्माधर्मरूपं तदनुसारतः तद-नुसृत्य करोति न केवलया स्वेच्छयेत्यर्थः । यथायं परोक्तिरीत्या जीवाभिन्न एव करोति नेत्याह अन्यः सन्निति । अनादिनिर्मलतया तेषामनादिसम-लतया च भेदोऽवधेयः । किमयं मुक्तावपि भिन्नः नेत्याह व्याप्तितोऽनन्य इति । व्याप्तितः व्याप्त्या दीक्षया दृढतरज्ञानेन वा पाशत्रयापगमे सति स्वाभिन्नसाक्षात्काररूपया अनन्यः अभिन्नः संसृतिं करोति ॥ २ ॥

ननु पुंसां संसृतिं करोतीत्युक्तं तत्पुंसिद्धौ किं प्रमाणमित्यत आह नेतित इति ।

नेतितो ममतोद्रेकादक्षोपरतिबोधतः ।
स्वापे निर्भोगतो बोधे बोद्धृत्वादस्त्यणुस्तनौ ॥ ३ ॥

तनौ देहे अणुः आणवमलाक्रान्तः आत्मा अस्ति । नन्वात्मैव नास्ति यत्सत्त्वेनाभिमतं तत्तु यथा शुक्तौ रजतमितिरीत्या तत्राह नेतित इति । प्रतीतितः नेति प्रतीतितः नेतित इति प्रत्ययबलादेवाणुरस्तीत्यर्थः अन्यथा निष्प्रतियोगिक एवाभावप्रत्ययः स्यात् । नन्वयमात्मा सोऽस्तु देहा-नतिरिक्तः तत्राह ममतोद्रेकादिति । ममतायाः ममेदमिति प्रतीतेः उद्रे-कादित्यशक्त्यापि स्थूलोऽहमित्यादिप्रतीतिरस्ति तथापि सा आत्मदेहयो-रभेदाध्यासनिमित्ता तथा द्वयोरहं बाल्ये पितरमन्वभूवं स एव स्थाविरे नप्तॄननुभवामि देहावस्थान्तरेष्वपि अबाधितार्थात्मप्रत्यभिज्ञानात् देहव्य-तिरिक्त आत्मास्तीत्यर्थः । ननु मा भवतु देहे आत्मा सन्तु तर्हीन्द्रियाणि तत्राह अक्षोपरतिबोधत इति । अक्षाणि इन्द्रियाणि तेषामुपरतिः स्वप्नः तस्मिन् बोधतः ज्ञातृत्वात् । माभूवन्निन्द्रियाण्यात्मा बुद्धिरेव तथास्तु तत्राह स्वापे निर्भोगत इति । स्वापे सुषुप्तकाले भुज्यतेऽनेनेति भोगः बुद्धिः

निर्भागतः बुद्धेरभावात् । ननु भवतु स्वापे स नष्टः पुनरुत्पत्तिमानात्मा नेत्याह बोधे बोद्धृत्वादिति । बोधे जाग्रदवस्थायां बोद्धृत्वात् सुखमहमस्वाप्समिति प्रतिसन्धानात् शून्यदेहेन्द्रियादिव्यतिरिक्त आत्मा अस्ति वस्तुतो देशतः कालतश्च सत्यमणुरात्मा अस्तिपदेनोच्यते अन्तःकरणादीनां जागराद्यवस्था ॥ ३ ॥

ननु अनुस्यूतत्वेन माभूदात्मत्वं अणोः तदनुस्यूतत्वे किं प्रमाणमित्यत आह आत्मेत्यादिना ।

आत्मान्तःकरणादन्योऽप्यन्वितो मन्त्रिभूपवत् ।
अवस्थापञ्चकस्थोऽतो मलरुद्धस्वदृक्क्रियः ॥ ४ ॥

पूर्वोक्तरीत्या आत्मा अणुः अन्तःकरणादन्योपि अन्तःकरणात् बुद्ध्यादेः अन्योऽपि मन्त्रिभूपवत् मन्त्रिणा भूपो राज्ञेवान्वितः अन्तःकरणेनेत्यनुषङ्गः । ननु नित्यज्ञानक्रियारूपस्यात्मनः कथं मायोद्भूतान्तःकरणान्वितत्वेन व्यापारस्तत्राह मलरुद्धस्वदृक्क्रिय इति । मलेन आणवेन रुद्धे स्वे स्वकीये दृक्क्रिये ज्ञानक्रियाशक्ती यस्य स तथा अनादिमलसंसर्गादात्मान्तःकरणान्वितत्वेन व्यापार इति भावः । अत एव अवस्थापञ्चकस्थः जाग्रत्स्वप्नसुषुप्तितुर्यतुर्यातीतावस्थापञ्चकानु(भू)गतः तदनुस्यूतत्वञ्च य एवाहं पूर्वकर्मनिर्धनं आसं स एवाहमद्य सधनोऽभूवमिति अबाधितैकात्म्यप्रत्यभिज्ञानादित्यनुसन्धेयम् ॥ ४ ॥

ननु द्वितीयसूत्रे शिवः कर्मानुसारतः पुंसां संसृतिं करोतीत्युक्तं सा स्वत एवात्मनां भवतु किमीश्वरायत्तयेत्याशङ्क्य प्रणालिकया पशूनामीश्वरपरतन्त्रत्वमुपपादयति विन्दन्तीति ।

विन्दन्त्यक्षाणि पुंसार्थान्नः स्वयं सोऽपि शम्भुना ।
तद्विकारी शिवश्चैव कान्तोऽयोवत्स तन्नयेत् ॥ ५ ॥

अक्षाणि इन्द्रियाणि मनश्चक्षुरादीनि पुंसा आत्मना प्रेरकेणान्वितानि सन्ति अर्थान्विषयान्विन्दन्ति जानन्ति स्वयं न विजानन्ति तेषामचेतनत्वादिति भावः । सोऽपि पुमान् शम्भुना प्रेरकेणान्वित एवार्थान् वेत्ति

न स्वयं मलाच्छन्नस्वरूपत्वादिति भावः । ननु तस्य [illegible] भिर्व्यक्तं-वृत्तित्वेऽपि विकारित्वं स्यादिति चोदिते तद्विकारीति । तत् तर्हि कोऽपि विकारीति चेदस्ति परिहरति नेति । शिवस्य लोकसंवृत्तिकारत्वेऽपि नावि-कारित्वे दृष्टान्तमाह कान्तोऽयोवदिति । कान्तः अयस्कान्तः [illegible] मय इव स शिवः तं पशुं नयेत् प्रेरयति ॥ ५ ॥

एवं शिवसद्भावे प्रमाणं सकलकलस्य शास्त्रोक्ताभ्यामुक्तं तत्प्रसङ्गाच्च पशुस्वरूपं तत्प्रमाणस्य तृतीयचतुर्थश्लोकाभ्यामभिहितं पञ्च-मेन च पशूनामस्वातन्त्र्यं पशुः स्वातन्त्र्यश्च प्रतिपादितम् इदानीं तस्य पत्युः स्वरूपमवधारयति अदृश्यश्चेदित्यादिना ।

अदृश्यं चेदसद्भावो दृश्यं चेज्जडिमा भवेत् ।
शम्भोस्तद्व्यतिरेकेण ज्ञेयं रूपं विदुर्बुधाः ॥ ६ ॥

शम्भो रूपं ऐन्द्रियकप्रमाणाविषयं नवेति विकल्पे द्वितीयं निरस्यति अदृश्यश्चेदिति । अदृश्यं सर्वप्रमाणाविषयं ऐन्द्रियकप्रमाणाविषयं चेत् असद्भावः शशविषाणादिवत् असत्त्वमापद्येत आद्यं निरस्यति दृश्यश्चेदिति । दृश्यं इन्द्रियप्रमाविषयं चेत् जडिमा जडत्वं भवेत् यदिन्द्रियप्रमाविषयं तज्जडं यथा घट इति व्याप्तेः तद्व्यतिरेकेण दृश्यत्वादृश्यत्वविरहात्मना ज्ञेयम् । स्वसं-वेद्यानुभवैकवेद्यम् । उभयनिरपेक्षमत्यद्भुतं शम्भो रूपं बुधाः दीक्षादिना विगलितपाशचयत्वात् समुत्कटज्ञानशक्तयः पुरुषाः विदुः जानन्ति अनु-क्तमिन्द्रियानपेक्षं च सर्वदा व्यक्तबन्धया शिवज्ञानयोगं व्योग-स्वभावको[1] मतः उक्तं च आद्यन्तशून्यममलं परिपूर्णमेकं सूक्ष्मं परात्पर-नामयमप्रमेयम् । भावैकगम्यमजडं शिवतत्त्वमाहुरिति (२) ॥ ६ ॥

ननु शिवः प्रतिवादिनं स्वार्थविदुषा भिन्नः संसरतु किं तद्व्यतिरि-क्तात्मकल्पनेनेत्यत आह नाचिदित्यादिना ।

नाचिच्चित्सन्निधौ किन्तु न वित्तस्ते उभे मिथः ।
प्रपञ्चशिवयोर्वेत्ता यः स आत्मा तयोः पृथक् ॥ ७ ॥

अचिज्जडः प्रपञ्चः चित्सन्निधौ निर्मलचित्स्वरूपस्य शिवस्य सन्निधौ

Digitized by Google

न स्फुरति तयोस्तेजस्तिमिरयोरिव परस्परविरोधाहित्ति भावः । किमतो यद्येवं तत्राह किमिरयति । ते उभे चिदचिती मिथः अन्योऽन्यं न विदतः न जानीतः चिद्रूपः भ्रमरहितः परिपूर्णः शिवः असत्यं प्रपञ्चं सत्स्वरूपतया न जानाति अचिच्च जडः प्रपञ्चः शिवं न जानाति तस्य जडत्वात् भोगस्य चेतनधर्मत्वात् अतः प्रपञ्चशिवयोर्वेत्ता अनुभविता । अत्र प्रपञ्चानुभवो मलावस्थायां शिवानुभवो मलापगमे च द्रष्टव्यः । ननु जीवोऽपि चिद्रूपः तत्कथं तत्सन्निधावचितः स्फुरणं सत्यम् अनाद्याणवोपाधिना अचितो वा आत्मनोऽचिद्भावस्य सहभावात् न परस्परविरोधः एवम्भूतयोस्तयोः प्रपञ्चशिवयोः पृथग्भूत आत्मा एष्टव्यः ॥ ७ ॥

इदानीं गुर्वनुग्रहात् पाशात्मुक्तिमित्याह स्थित्वेत्यादिना ।

स्थित्वा सहेन्द्रियव्याधैस्त्वां न वेत्सीति बोधितः ।
मुक्त्वैतान् गुरुणाऽनन्यो धन्यः प्राप्नोति तत्पदम् ॥ ८ ॥

धन्यः मुमुक्षुत्वादिरूपधनवान् पुरुषः इन्द्रियव्याधैः इन्द्रियाण्येव व्याधाः पुलिन्दाः दुःखदतया पुलिन्दत्वेन निरूपणं विधिनिषेधपराङ्मुखप्रवृत्तित्वं च तैः सह स्थित्वा गुरुणा आचार्यस्वरूपिणा शिवेन त्वां त्वत्स्वरूपं सर्वज्ञसर्वकर्तृसच्चिदानन्दशिवानन्यरूपं न वेत्सि न जानासीति बोधितः ज्ञापितः सन् एतान् इन्द्रियव्याधान् त्यक्त्वा परित्यज्य । अत्र इन्द्रियशब्देन बाह्यान्तरिन्द्रियरूपचतुर्विंशतितत्त्वानि तत्प्रवृत्तिसमये सततत्त्वानि द्वादशतत्त्विकेशब्दादितत्त्वानि आहृत्य षट्त्रिंशत्तत्त्वान्युच्यन्ते तान् परित्यज्य अनन्यः प्रत्यभिज्ञातान्यस्वरूपः तत्पदं तत्पदलक्ष्यं शिवस्वरूपं प्राप्नोति प्राप्तमिवाभिमन्यते यथा कण्ठस्थं चामीकरं कश्चिद्विस्मृत्य पश्चादन्येन बोधितस्तदवगम्य तदा अपूर्वप्राप्तमिव मन्यते तद्वदित्यर्थः । अत्रेयं कथानुसन्धेया पुरा किल कश्चन राजशिशुः प्रतिभटभयादरण्यं प्रवेशितः तत्रान्यैः पुलिन्दैः सह संवर्धितः पुलिन्दमेवात्मानं मन्यमानः पश्चादागतेन पित्रा न त्वं पुलिन्दः त्वं राजकुमारोऽसि इति बोधितः ज्ञापितः स्वराज्यपदं प्राप्तवानिति ॥ ८ ॥

गुरुणा तत्पदं प्राप्नोतीति पूर्वमुक्तं तत्र केवलं गुरुरेव न मुक्तिसाधनम् अपि तु श्रवणादिद्वारा मलनिवृत्तौ सत्यां तया च साक्षात्कारे तत्पदप्राप्तिरित्याह चिद्दृशेति ।

चिद्दृशात्मनि दृष्ट्वेशं तीर्त्वा वृत्तिमरीचिकाम् ।
लब्ध्वा शिवपदच्छायां ध्यायेत्पञ्चाक्षरीं सुधीः ॥ ६ ॥

सुधीः शोभनबुद्धिः शिवैकविषयत्वं तस्य सुधीत्वं गुरूपदिष्टात्मशिवाभेदप्रतिपादकश्रवणमननसम्पादितमित्यवधेयम् । तादृशः पुरुषः वृत्तिमरीचिकां त्यक्त्वा वृत्तिः प्रपञ्चविषयकं ज्ञानं सैव मरीचिका मृगतृष्णा तस्याश्चाध्यात्मिकादितापत्रयनिवारणासमर्थतया तत्त्वेन निरूपणं तां त्यक्त्वा परित्यज्य त्यागश्च दीक्षादिना मलत्रयापगमे सति द्रष्टव्यः । ततः किं करोति तदाह चिद्दृशेति । चिद्दृशा परमात्मविषयकतत्त्वरूढया दृष्ट्या ईशं शिवम् । आत्मनि दृष्ट्वा स्वाभिन्नतया अनुभूय । एतेन यः शिवः सोऽहमिति निदिध्यासनमुक्तम् अनन्तरं शिवपदच्छायां लब्ध्वा पद्यते गम्यते प्राप्यते स्वानन्यतयेति पदं शिव एव पदं शिवपदं तस्य छायां अनुग्राहिणीं शक्तिं तस्य छायात्वेनाभिधानं पूर्वोक्ततापत्रयतप्तानां क्लान्तिनिवारकतया कृतमित्यवधेयम् । तां लब्ध्वा स्वात्मनि स्वाभिन्नतया निर्णीततां प्राप्य पञ्चाक्षरीं ध्यायेत् । अत्र प्रविश पिण्डमित्यत्र लाभं भक्षयेदितिवत् जपेच्छिवमिति पदद्वयमध्याहर्तव्यम् । तथा चायमर्थः पञ्चाक्षरीं जपेत् शिवं ध्यायेदिति पञ्चानामक्षराणां समाहारः पञ्चाक्षरी तां तानि च नकारादीनि । यद्वा पञ्चाक्षरीशब्देन तद्वाच्या अर्था लक्ष्यन्ते ते च शिवशक्तिजीवमलत्रयतन्निवारकशक्तयः, तदुक्तम् ॥

"मध्ये शिवस्ततः शक्तिस्तत आत्मेति हि स्मृतः ।
तत्पूर्वं बन्धकः प्रोक्तः तत्पूर्वं तन्निवारकमिति ॥

अस्य चायमर्थः । पञ्चसु वर्णेषु मध्ये वर्तमाने शिकारे शिवः तत उत्तरस्मिन् चतुर्थे वकारे शक्तिः शिवसमवेतपरा शक्तिः तत उत्तरस्मिन् पञ्चमे यकारे आत्मा अणुः तत्पूर्वं तत्पूर्वत्वेन मध्यवर्ती

शिकारः परामृश्यते तत्पूर्वं तस्मात् पूर्वं सविसर्जनीये मकारे बन्धकः मलं तत्पूर्वं नकारे तन्निवारकः तस्य मलस्य परिपाकपूर्वकं निवर्तकः गुरुकटाक्षदीक्षानुग्रहशक्त्यादिः वाच्यतया स्मृत इति सर्वत्र योजनीयम् । एवञ्च शिवः स्वशक्त्या जीवात्मानमाणवादिमलत्रयान्निवारयतीत्यनुसन्दध्यादिति फलितोऽर्थः । यद्वा पञ्चाक्षरीशब्देन प्रणवपञ्चाक्षरी प्रासादपञ्चाक्षरी वा सूक्ष्मा कथ्यते तत्राद्ये वर्णाः अकारोकारमकारबिन्दुनादाः द्वितीये च हकारौकारमकारबिन्दुनादाः तत्र वैदिकः पूर्वां सूक्ष्मपञ्चाक्षरीं जपेत् शैवस्तु प्रासादपञ्चाक्षरीं जपेत् शिवं ध्यायेदिति यथार्हं योजनीयम् । अत्रापि पञ्चाक्षरीशब्देन तद्वाच्या देवता एव लक्ष्यन्ते शब्दस्य ध्येयत्वासम्भवात् ताश्च ब्रह्मविष्णुरुद्रेश्वरसदाशिवा यथाक्रममकारोकारमकारबिन्दुनादेषु स्थिताः, प्रासादपञ्चाक्षर्यांश्च यथाक्रमं सृष्ट्यादिकं कुर्वन्तीत्यनुचिन्तनं बोद्धव्यं कृत्वा प्रवर्तिकाः पञ्चशक्तय इत्यवगन्तव्यं तत्र देवतानां ध्यानं शिवः ब्रह्मादिपञ्चकाकारेण, ईश्वरानधिष्ठाय भगवच्छक्तय एव प्राणिनां (तु) सृष्ट्यादिकं कुर्वन्तीत्यनुचिन्तनं बोद्धव्यम् एतेन च सूत्रेण जीवन्मुक्तिरुक्ता ॥ ९ ॥

अथेदानीं उक्तोपायानुपपत्तौ प्रतिपत्तिमुपपादयति शिवेनेति ।

शिवेनैक्यं गतः सिद्धस्तदधीनस्ववृत्तिकः ।
मलमायाद्यसंस्पृष्टो भवति स्वानुभूतिमान् ॥ १० ॥

भवतीति तत्र सिद्धिरन्तःकरणवशीकरणं तद्वान् सिद्धः अत एव शिवेनैक्यं गतः शिवानन्यत्वं प्राप्तः अत एव मलमायाद्यसंस्पृष्टः मलेन आणवेन मायया आदिशब्देन कर्मणा च असंस्पृष्टः स्वयमेव परित्यक्तः अत एव तदधीनस्ववृत्तिकः शिवायत्तस्वव्यापारः तयोरैक्यात् शिवव्यापारीभूतस्वव्यापार इत्यर्थः । स्वानुभूतिमान् भवति स्वस्य शिवेनैक्यङ्गतस्य आत्मनः अनुभूतिः शिवानन्यतया अनुभवः तद्वान् भवतीत्यर्थः ॥१०॥

एतदनुपपत्तौ हरभक्तिं दर्शयति दृशोरिति ।

दृशोर्दर्शयितेवात्मा तस्य दर्शयिता शिवः ।
तस्मात्तस्मिन् परां भक्तिं कुर्यादात्मोपकारके ॥ ११ ॥

Digitized by Google

आत्मा जीवः दृशश्चक्षुषः इन्द्रियाणामस्याप्युपलक्षणमेतत् । दर्शयिता ज्ञापयिता तस्य च आत्मनश्च शिवो दर्शयिता करादिद्वारेण यथा शुद्धस्य विषयप्रदर्शकः तस्मात् उक्तहेतोः आत्मोपकारके आत्मनः स्वस्य उपकारके भोगमोक्षरूपोपकारकर्तरि तस्मिन् शिवे परां दृढतरां भक्तिं कुर्यात् भक्तिर्भजनं अन्तर्याग इति यावत् । स च हृत्पद्मनाभिभ्रूमध्येषु यजनहवनसमाधिरूपः ॥ ११ ॥

अत्राप्यसमर्थो बाह्यभक्तिं कुर्यादित्याह मुक्त्यै इति ।

मुक्त्यै प्राप्य सतस्तेषां भजेद्वेषं शिवालयम् ।
एवं विद्याच्छिवज्ञानबोधे शैवार्थनिर्णयम् ॥ १२ ॥

मुक्त्यै मुक्त्यर्थं तादर्थ्ये चतुर्थी सतः वैदिकशैवार्थानुष्ठायिनो ज्ञानदेशिकान् प्राप्य गुरुत्वेन समासाद्य तेषां शैवानां सम्बन्धिनं वेषं भस्मरुद्राक्षादिचिह्नं भजेत् उपासीत । अत्र वेषस्य भजनोक्तिरतिगुणक्रियाद्यनपेक्षणार्थं शिवालयं शिवस्यालयं मञ्चाः क्रोशन्तीत्यादिलक्षणया शिवालयशब्देन शिवलिङ्गं प्रतिमादिरुच्यते । एवञ्च सत इत्यनेन शैवाचार्याणां वेषशब्देन भस्मरुद्राक्षधारिणां माहेश्वराणां शिवालयशब्देन शिवलिङ्गस्य परिग्रहः अनेन चर्याक्रम उक्तः एतत्पूर्वश्लोके क्रियाक्रमः तत्पूर्वं च योगक्रमः तत्पूर्वं च ज्ञानक्रम उक्त इत्यनुसन्धेयम् । एवञ्च पतिपशुपाशपदार्थस्वरूपं मुक्त्युपायभूतज्ञानयोगक्रियाचर्याश्च द्वादशसूत्र्या प्रतिपादिता इति निगमयति एवमिति । शिवज्ञानबोधे शास्त्रे शैवार्थनिर्णयं शैवार्थस्य पूर्वोक्तस्य निर्णयमेवं विद्यात् अनेनैव प्रकारेण जानीयात् न तु प्रकारान्तरेणेति सर्वमुपपादितम् ॥ १२ ॥

इति श्रीमदतिवर्णाश्रमाचार्यवर्यशैवपरिपालकशिवाग्रयोगिविरचितलघुटीकासहितः शिवज्ञानबोधः सम्पूर्णः ॥

शुभमस्तु ।

Digitized by Google

तत्कार्यार्थत्वात्तेषाम् । विद्याख्यकार्यायैव हि विदुषोऽग्निहोत्राद्यनुष्ठानम् । कथमिदमवगम्यते । 'तद्दर्शनात्,' दृश्यते हि "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेने"त्यादिनाऽग्निहोत्रादीनां विद्यासाधनत्वं विद्यायाश्चाऽऽ प्रायणादभ्यासाधेयातिशयाया अहरहरुत्पाद्यत्वात्तदुत्पत्त्यर्थमाश्रमकर्माण्यहरहरनुष्ठेयमेव, अन्यथाऽऽश्रमकर्मलोपे दूषितान्तःकरणस्य विद्योत्पत्तिरेव न स्यात् ।

यद्यग्निहोत्रादिसाधुकृत्या विद्योत्पत्त्यर्था, विद्योत्पत्तेः प्राचीनं च सुकृतं "यावत्सम्पातमुषित्वा" "प्राप्यान्तं कर्मण" इत्यनुभवेन विनष्टम्, भुक्तावशिष्टं च प्रारब्धफलम्,[1] "सुहृदः साधुकृत्या"मित्यस्य को विषय[2],स्तत्राह—

अतोऽन्यापि ह्येकेषामुभयोः १७ ॥

'अतो'ऽग्निहोत्रादिसाधुकृत्याया विद्योत्पत्त्यर्थाया 'अन्यापि' विद्याऽधिगमात् पूर्वोत्तरयोरुभयोरपि पुण्यकर्मणोः प्रबलकर्मप्रतिबद्धफला साधुकृत्याऽनन्ता सम्भवत्येव, तद्विषयमिदमेकेषां' शाखिनां वचनम् "तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्या"मिति । विद्ययाऽश्लेषविनाशश्रुतिश्च तद्विषया ।

अनुष्ठितस्यापि कर्मणः फलप्रतिबन्धसम्भवं पूर्वोक्तं स्मारयति—

यदेव विद्ययेति हि ॥ १८ ॥

"यदेव विद्यया करोति तदेव वीर्यवत्तर"मित्युद्गीथविद्यायाः क्रतुफलाप्रतिबन्धफलवत्त्ववचनेनानुष्ठितस्यापि कर्मणः फलप्रतिबन्धः सूच्यते हि । अतो 'विदुषो'[3]ऽनुष्ठितप्रतिबद्धफलविषयं 'सुहृदः साधुकृत्या'मिति शाट्यायनकम्[4] ॥

अग्निहोत्राद्यधिकरणं समाप्तम् ॥ १० ॥

---

१ प्रारब्धं कर्मफलमिति मु॰ पु॰ । २ को विषय इति मु॰ पु॰ ।
३ अतोऽविदुष इत्यकारच्छेदो मु॰ पु॰ । ४ ०यनिकमिति मु॰ पु॰ ।

इतरक्षपणा- भोगेन त्वितरे क्षपयित्वाऽथ*संपद्यते॥ १९ ॥
धिकरणम् ११ ।

ययोः पुण्यपापयोरश्लेषविनाशावुक्तौ, ताभ्यामितरे प्रारब्धकार्ये पुण्यपापे किं विद्यायोनिश्शरीरावसाने उत तच्छरीरावसाने शरीरान्तरावसाने वेत्यनियम इति संशये, "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य" इति तच्छरीरविमोक्षावसानत्वश्रवणात्तदवसाने इति प्राप्त उच्यते–

"भोगेन त्वि"ति । 'तु'-शब्दः पक्षव्यावृत्त्यर्थः । 'इतरे' प्रारब्धकार्ये पुण्यपापे स्वारब्धफल'भोगेन क्षपयित्वा' तत्फलभोगसमाप्त्यनन्तरं ब्रह्म 'सम्पद्यते' । ते च पुण्यपापे एकशरीरोपभोग्यफले चे,तच्छरीरावसाने[1]सम्पद्यते । अनेकशरीरोपभोग्यफले चे, तदवसाने सम्पद्यते । भोगेनैव[2] क्षपयितव्यत्वादारब्धफलयोः कर्मणोः । "तस्य तावदेव चिरं यावन्न विमोक्ष्य" इति च भोगेन तयोः कर्मणोर्विमोक्ष उच्यते, देहावधिनियमाश्रवणात् । तदेवं ब्रह्मविद्यायाः प्रागनुष्ठितमभुक्तफलमनारब्धफलं पुण्यपापरूपं कर्माऽनादिकालसञ्चितमनन्तं विद्यामाहात्म्याद्विनश्यति, विद्यारम्भोत्तरकालमनुष्ठितञ्च न श्लिष्यति । तच्च पुण्यरूपं सर्वं विदुषः सुहृदो गृह्णन्ति, पापं च द्विषन्त इति निरवद्यम् ॥

इतरक्षपणाधिकरणं समाप्तम् ॥ ११ ॥

इति श्रीमद्भगवद्रामानुजाचार्यचरणकृतौ शारीरकमीमांसाभाष्ये
फलाध्यायस्य चतुर्थस्य प्रथमः पादः ॥

* अथशब्दघटितः सूत्रपाठः सर्वपुस्तकेषु ।
१ चेति प्र० । २ ०साने इति–इति मु० पु० । ३ एवकारो ऽधिकः पुस्तकेषु ।

अथ चतुर्थाध्यायस्य द्वितीयः पादः ॥

अथ वागधिकरणम् १। **वाङ् मनसि दर्शनाच्छब्दाच्च ॥ १ ॥**

इदानीं विदुषो गतिप्रकारं चिन्तयितुमारभते। प्रथमन्तावदुत्क्रान्तिश्चिन्त्यते। तत्रेदमाम्नायते–"अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवताया"मिति। अत्र 'वाङ् मनसि संपद्यत' इति वाचो मनसि संपत्तिश्रुतिः किं वाग्वृत्तिमात्रविषया, उत वाग्विषयेति विशये वृत्तिमात्रविषयेति युक्तम्[1]। कुतः। मनसो वाक्प्रकृतित्वाभावात् तत्र वाक्स्वरूपसम्पत्त्यसम्भवात्। वागादिवृत्तीनां मनोऽधीनत्वेन वृत्तिसम्पत्तिश्रुतिः कथंचिदुपपद्यत इत्येवं प्राप्तेऽभिधीयते–

'वाङ् मनसी'ति। वाक्स्वरूपमेव मनसि संपद्यते। कुतः। 'दर्शनात्[2],' दृश्यते हि वागिन्द्रिय उपरतेऽपि मनःप्रवृत्तिः। वृत्तिमात्रसम्पत्त्याऽपि तदुपपद्यत इति चे,त्तत्राह 'शब्दाच्चे'ति, 'वाङ् मनसि सम्पद्यत' इति वाक्स्वरूपसंपत्तावेव हि शब्दो, न वृत्तिमात्रसम्पत्तौ। न हि तदानीं वृत्त्युपरमे वागिन्द्रियं प्रमाणान्तरेणोपलभ्यते, येन वृत्तिमात्रं संपद्यत इत्युच्यत। यदुक्तम्–मनसो वाक्प्रकृतिकत्वाभावाद्वाचो मनसि संपत्तिर्नोपपद्यत इति, तद्'वाङ् मनसि संपद्यत' इति वचनान्मनसा वाक् संयुज्यते न तु तत्र लीयत इति परिहर्तव्यम्।

अत एव[3] सर्वाण्यनु ॥ २ ॥

यतो वाचो मनसा संयोगमात्रं सम्पत्तिर्न तु लयः, अत एव वाचमनु सर्वेषामिन्द्रियाणां मनसि सम्पत्तिश्रुतिरुपपद्यते, "तस्मादुपशान्ततेजा अपुनर्भवमिन्द्रियैर्मनसि सम्पद्यमाने"रिति॥

वागधिकरणं समाप्तम् ॥ १ ॥

---

१ युक्तमिति नास्ति प॰।
२ तद्दर्शनादिति मु॰ द्वि॰ च॰।
३ चशब्दरहितः सूत्रपाठः सर्वपुस्तकेषु।

Digitized by Google

अथ मनोऽधिकरणम् २। **तन्मनः प्राण उत्तरात् ॥ ३ ॥**

'तत्' सर्वेन्द्रियसंयुक्तं 'मनः प्राणे' सम्पद्यते, प्राणेन संयुज्यते, न मनोवृत्तिमात्रम्। कुतः। 'उत्तरात्,' 'मनः प्राणे' इति वाक्यात्। अधिकाऽऽशङ्का तु, "अन्नमयं हि सोम्य मन" इति वचनान्मनसोऽन्नप्रकृतिकत्वमवगम्यते। अन्नस्य च "ता अन्नमसृजन्त" इत्यम्मयत्वं सिद्धम्। आपोमयः प्राण इति चाप्प्रकृतित्वं प्राणस्यावगम्यते। अतो 'मनः प्राणे संपद्यत' इत्यत्र प्राणशब्देन प्राणप्रकृतिभूता अपो निर्दिश्य[1] तासु मनःसम्पत्तिप्रतिपादने परम्परया स्वकारणे लय इति सम्पत्तिवचनमुपपन्नं भवतीति। परिहारस्तु "अन्नमयं हि सोम्य मन आपोमयः प्राण" इति मनःप्राणयोरन्नेनाद्भिश्चाप्यायनमुच्यते, न तत्प्रकृतित्वम्। आहङ्कारिकत्वान्मनसः, आकाशादि[2]विकारत्वाच्च प्राणस्य। प्राणशब्देनापां लक्षणा च स्यादिति ॥

मनोऽधिकरणं समाप्तम् ॥ २ ॥

अथाऽध्यक्षाधिकरणम् ३। **सोऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥**

यथा 'वाङ्मनसि संपद्यते मनः प्राणे' इति वचनानुरोधेन मनःप्राणयोरेव वाङ्मनसयोः संपत्तिः, तथा 'प्राणस्तेजसी'ति वचनात्तेजस्येव प्राणः सम्पद्यत इति प्राप्त उच्यते—

'सोऽध्यक्ष' इति। 'स' प्राणो'ऽध्यक्षे' करणाधिपे जीवे संपद्यते। कुतः। 'तदुपगमादिभ्यः'। प्राणस्य जीवोपगमस्तावच्छ्रूयते—"एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ती"ति। तथा जीवेन सह प्राणस्योत्क्रान्तिः श्रूयते—"तमुत्क्रामन्तं प्राणोऽनूत्क्रामती"ति। प्रतिष्ठा च जीवेन सह श्रूयते "कस्मिन्नुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामी"[3]ति। एवं जीवेन संयुज्य तेन सह तेजःसम्पत्तिरिह 'प्राणस्तेजसी'त्युच्यते। यथा यमुनाया गङ्गया संयुक्त सागरगमनेऽपि यमुना सागरं गच्छतीति वचो न विरुध्यते, तद्वत् ॥

अध्यक्षाधिकरणं समाप्तम् ॥ ३ ॥

१ अपो निर्दिश्यन्ते—इति प्र०। २ आदिशब्दो नास्ति प्र०। ३ प्रतिष्ठितः स्यामिति मु०।

Digitized by Google

अथ भूताधिकरणम् ४ । **भूतेषु तच्छ्रुतेः ॥ ५ ॥**

प्राणस्तेजसीति जीवसंयुक्तस्य प्राणस्य तेजसि संपत्तिरुक्ता । सा सम्पत्तिः किं तेजोमात्र उत संहतेषु सर्वेषु भूतेष्विति विषये तेजोमात्रश्रवणात्तेजसीति प्राप्त उच्यते—

'भूतेष्वि'ति । 'भूतेषु' संपद्यत इति । कुतः । 'तच्छ्रुतेः,' 'पृथिवीमय आपोमयस्तेजोमय' इति जीवस्य सञ्चरतः सर्वभूतमयत्वश्रुतेः ।

ननु तेजःप्रभृतिष्वेकैकस्मिन् क्रमेण संपत्तावपि पृथिवीमय इत्यादिका श्रुतिरुपपद्यते, अत आह—

नैकस्मिन्दर्शयतो हि ॥ ६ ॥

'नैकस्मिन्', एकैकस्य कार्याक्षमत्वात् । दर्शयतो ह्यक्षमत्वं श्रुतिस्मृती—"अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी"ति[1] "तासां त्रिवृतं त्रिवृतमेकैकां करवाणी"ति, नामरूपव्याकरणायोग्यत्वाय त्रिवृत्करणमुपदर्श्यते ।

"नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना ।
नाशक्नुवन्प्रजाः स्रष्टुमसमागम्य कृत्स्नशः ॥
समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः ।
महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति त"इति ।

अतः 'प्राणस्तेजसी'ति 'तेजः'-शब्देन भूतान्तरसंसृष्टमेव तेजोऽभिधीयते । अतो भूतेष्वेव सम्पत्तिः ॥

भूताधिकरणं समाप्तम् ॥ ४ ॥

अथाऽऽसृत्युपक्रमाधिकरणम् ५ । **समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ७ ॥**

इयमुत्क्रान्तिः किं विद्वदविदुषोः समानोताविदुष एवेति चिन्तायामविदुष एवेति प्राप्तम् । कुतः । विदुषोऽस्यैवामृतत्ववचनादुत्क्रान्त्यभावात् । विदुषो ह्यस्यैवामृतत्वं[3] श्राव्यते—

---

१ इतिशब्दो नास्ति सर्वपु० । २ त्रिशब्दो नास्ति क० ।
३ अमृतत्ववचनमिति मु० पु० ।

"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः[1] ।
अथ मर्त्यो ऽमृतो भवत्यत्र ब्रह्म समश्नुत" इति ।

एवं प्राप्तेऽभिधीयते-

'समाना चासृत्युपक्रमा'दिति । विदुषोऽप्यासृत्युपक्रमादुत्क्रान्तिः समाना, आसृत्युपक्रमात्-आगत्युपक्रमात्, नाडीप्रवेशात् प्रागित्यर्थः । विदुषोऽपि हि[2] नाडीविशेषेणोत्क्रम्य गतिः श्रूयते-

"शतं चैका च हृदयस्य नाड्य-
स्तासां मूर्धानमभिनिःसृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति
विष्वङ्ङन्या उत्क्रमणे भवन्ती"ति ।

एवं नाडीविशेषेण गतिश्रवणाद्विदुषोऽप्युत्क्रान्तिरवर्जनीया । सा च नाडीप्रवेशात् प्राग्विशेषाश्रवणात्समाना । तत्प्रवेशदशायां च विशेषः श्रूयते-"तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वा ऽन्येभ्यो[3] वा शरीरदेशेभ्य" इति । 'शतं चैका च हृदयस्ये'त्यनया श्रुत्येकार्थ्यात् मूर्ध्नो निष्क्रमणं विद्वद्विषयमितरदविद्वद्विषयम् । यदुक्तम्-विदुषोऽत्रैवामृतत्वं श्राव्यत इति, तत्रोच्यते, 'अमृतत्वं चानुपोष्ये'ति । 'च'-शब्दोऽवधारणे । अनुपोष्य शरीरेन्द्रियादिसंबन्धमदग्ध्वैव यदमृतत्वमुत्तरपूर्वाघयोरश्लेषविनाशरूपं प्राप्यते, तदुच्यते "यदा सर्वे प्रमुच्यन्त" इत्यादिकया श्रुत्येत्यर्थः । 'अत्र ब्रह्म समश्नुत' इति चोपासनवेलायां यो ब्रह्मानुभवस्तद्विषयमित्यभिप्रायः ।

तदापीतेः संसारव्यपदेशात् ॥ ८ ॥

अवश्यं च तदमृतत्वमदग्धदेहसम्बन्धस्यैवेति विज्ञेयम् । कुतः । 'आ ऽपीतेः संसारव्यपदेशात्' । अपीतिरप्ययो ब्रह्मप्राप्तिः, सा चार्चिरादिना मार्गेण देशविशेषं गत्वेति वक्ष्यते । आ तदवस्थाप्राप्तेः संसारो

---

१ स्थिता इति मु. । २ हिशब्दो नास्ति प्र. ।
३ वा ऽन्येभ्य इति मु. पु. ।

देहसम्बन्धलक्षणो हि व्यपदिश्यते, "तस्य तावदेव चिरं यावन्न विमोक्ष्ये ऽथ संपत्स्य" इति,

"अश्व इव रोमाणि विधूय पापं
चन्द्र इव राहोर्मुखात् प्रमुच्य ।
धूत्वा शरीरमकृतं कृतात्मा
ब्रह्मलोकमभिसंभवामी[1]"ति च ।

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥

इतश्च विदुषोऽपि बन्धो नात्र विदग्धः, यतः सूक्ष्मशरीरमनुवर्तते । कुत इदमवगम्यते । 'प्रमाणतस्तथोपलब्धेः,' उपलभ्यते हि देवयानेन पथा गच्छतो विदुष'स्तं प्रतिब्रूयात् सत्यं ब्रूया'दिति चन्द्रमसा संवादवचनेन शरीरसद्भावः । अतः सूक्ष्मशरीरमनुवर्तते, अतश्च बन्धो न दग्धः ।

नोपमर्देनातः ॥ १० ॥

अतो

"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः[2] ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत"इति-

वचनं न बन्धोपमर्देनामृतत्वं वदति ।

अस्यैव चोपपत्तेरूष्मा ॥ ११ ॥

अस्य सूक्ष्मशरीरस्य क्वचिद्विद्यमानत्वोपपत्तेर्विदुषः प्रक्रान्तमरणस्य मरणात्प्रागूष्मा स्थूलशरीरे क्वचित्स्थ उपलभ्यते । न च स्थूलस्यैव शरीरस्यायमूष्मा, अन्यत्रानुपलब्धेः । ततश्चोष्मणः क्वचिदुपलब्धिर्विदुषः सूक्ष्मशरीरस्योत्क्रान्तिनिबन्धनेति गम्यते । तस्माद्विदुषोऽप्याऽऽसृत्युपक्रमात्समानोत्क्रान्तिरिति सुष्ठूक्तम्[3] ।

पुनरपि विदुष उत्क्रान्तिर्न सम्भवतीत्याशङ्क्य परिह्रियते-

प्रतिषेधादिति चेन्न शारीरात्स्पष्टो ह्येकेषाम् ॥ १२ ॥

१ ॰मभिसम्भवामीति म॰ । २ स्थिता इति मु॰ पु॰ । ३ सत्यमिति प्र॰ ।

यदुक्तम्–विदुषोऽप्युत्क्रान्तिः समानेति, तन्नोपपद्यते, विदुष उत्क्रान्तिप्रतिषेधात् । तथा हि, "स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामती"त्युपक्रम्य "तेन प्रद्योतेनैष आत्मा निष्क्रामति·—तमुत्क्रामन्तं प्राणोऽनूत्क्रामती"त्यविदुष उत्क्रान्तिप्रकारमभिधाय, "अन्यन्नवतरं कल्याणतरं रूपं कुरुत"इति देहान्तरपरिग्रहं चाभिधाय

"प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् ।
तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे"–

इति नु[2] कामयमान" इत्यविद्वद्विषयं परिसमाप्य', "अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येती"ति विदुष उत्क्रान्तिः प्रतिषिध्यते । तथा, पूर्वं चार्तभागप्रश्नेऽपि विदुष उत्क्रान्तिप्रतिषेधो दृश्यते–"अप पुनर्मृत्युं जयती"ति विद्वांसं प्रस्तुत्य "याज्ञवल्क्येति[3] होवाच यत्रायं पुरुषो म्रियत उदस्मात्प्राणाः[4] क्रामन्त्याहो ने"ति पृष्टे "नेति होवाच याज्ञवल्क्योऽत्रैव समवलीयन्ते स उच्छ्वयत्याध्मायत्या[5]ध्मातो[6] मृतः शेत" इति । अतो विद्वानिहैवामृतत्वं प्राप्नोतीति चेत्–न[7]'च शारीरात्' प्रत्यगात्मनः प्राणानामुत्क्रान्तिर्ह्यत्र प्रतिषिध्यते, न शरीरात् । 'न तस्य प्राणा उत्क्रामन्ती'त्यत्र तच्छब्देन 'अथाकामयमान' इति प्रकृतः शारीर एव परामृश्यते, नाभ्युतं शरीरम् । तस्येति षष्ठ्या प्राणानां संबन्धित्वेन शारीरो निर्दिष्टो, न तूत्क्रान्त्यपादानत्वेन, उत्क्रान्त्यपादानन्तु शरीरमेवेति चे,न, अपादानापेक्षायामश्रुताच्छरीरात् संबन्धितया श्रुतस्यात्मन एव संनिहितत्वेनापादानतयाऽपि ग्राह्यत्वात् । किं च, प्राणानां जीवसंबन्धितयैव प्रज्ञातानां तत्संबन्धकथने प्रयोजनाभावात् संबन्धमात्रवाचिन्याः षष्ठ्या अपादानमेव विशेष इति निश्चीयते । यथा नटस्य धनो-

---

१ ०न्ववपेति मु· पु· द्वि· च । २ इति तदिति प्र·, इति तु–इति क्वचित् ।
३ ०वल्क्य इतीति प्र· द्वि· च । ४ उदिति पुनरत्र प्र· द्वि· च ।
५ स उच्छ्वसत्याध्मायत्या–इति प्र· ।
६ उच्छ्वयत्याध्मातो–इति मु· पु· । ७ तदिति नास्ति प्र· ।

तीति । न चात्र विवदितव्यम्, 'स्पष्टो ह्येकेषां' माध्यन्दिनानामाम्नाये शारीरो जीव एवापादानमिति, "योऽकामो निष्काम आप्तकाम आत्मकामो न तस्मात्प्राणा उत्क्रामन्ती"ति । शारीरात्प्राणानामुत्क्रान्तिप्रसङ्गाभावात्तत्प्रतिषेधो नोपपद्यत इति चे,न, "तस्य तावदेव चिर"मिति विदुषः शरीरवियोगकाले ब्रह्मसम्पत्तिवचनेन प्राणानामपि तस्मिन् काले शारीराद् विदुषो वियोगः प्रसज्यते, ततश्च देवयानेन पथा ब्रह्मसंप्राप्तिर्नोपपद्यत इति 'न तस्य प्राणा उत्क्रामन्ति' देवयानेन पथा ब्रह्मप्राप्तेः प्राग् जीवाद्विदुषोऽपि प्राणा न विश्लिष्यन्ती[1]त्युच्यते । आर्तभागप्रश्नोऽपि यदा विद्वद्विषय,स्तदाऽयमेव परिहारः । स त्वविद्वद्विषयस्तत्र प्रश्नप्रतिवचनयोर्ब्रह्मविद्याप्रसङ्गादर्शनात्, तत्र हि[2] ग्रहातिग्रहरूपेणेन्द्रियेन्द्रियार्थस्वभावो, ऽपामग्न्यन्नत्वं, म्रियमाणस्य जीवस्य प्राणपरित्यागो, मृतस्य नामवाच्यकीर्त्यनुवृत्ति,स्तस्य च पुण्यपापानुगुणगतिप्राप्तिरित्येतेऽर्थाः प्रश्नपूर्वकं प्रत्युक्ताः । तत्र चा'प पुनर्मृत्युं जयती'त्यपामन्नत्व[3]ज्ञानादग्निजय एव मृत्युजय उच्यते । अतो नात्र विदुषः प्रसङ्गः । अ[4]विदुषस्तु प्राणाऽनुत्क्रान्तिवचनं स्थूलदेहवत्प्राणा न मुञ्चन्त्यऽपि तु भूतसूक्ष्मवज्जीवं परिष्वज्य गच्छन्तीति प्रतिपादयतीति[5] निरवद्यम् ।

स्मर्यते च ॥ १३ ॥

स्मर्य्यते च विदुषोऽपि मूर्द्धन्यनाड्योत्क्रान्तिः-

"ऊर्द्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्य्यमण्डलम् ।
ब्रह्मलोकमतिक्रम्य तेन याति परां गति"मिति ॥

आसृत्युपक्रमाधिकरणं समाप्तम् ॥ ५ ॥

अथ परसंपत्त्यधिकरणम् ६ । तानि परे तथा ह्याह ॥ १४ ॥

सकरणग्रामः सप्राणः करणाध्यक्षः प्रत्यगात्मोत्क्रान्तिवेलायां तेजःप्रभृतिभूतसूक्ष्मेषु सम्पद्यत इत्युक्तम् । सैषा सम्पत्तिर्विदुषो न विद्यत

---

१ विश्लिष्यन्त-इति प्र॰ । २ हीति नास्ति प्र॰ ।
३ प्रेत्यधिकमत्र प्र॰ । ४ अ-इति नास्ति प्र॰ ।
५ प्रतिपादयतीति-इति नास्ति प्र॰ ।

इत्याशङ्क्य परिहृतम् । तानि पुनर्जीवपरिष्वक्तानि भूतसूक्ष्माणि किं यथा-कर्म यथाविद्यं च स्वकार्य्याय गच्छन्त्यु, त परमात्मनि सम्पद्यन्त इति विशये मध्ये परमात्मसम्पत्तौ सुखदुःखोपभोगरूपकार्यादर्शनात्तदुपभोगा-नुगुण्येन यथाकर्म यथाविद्यं च गच्छन्तीति प्राप्त उच्यते—

'तानि पर' इति । तानि परस्मिन्नात्मनि सम्पद्यन्ते । कुतः । 'तथा ह्याह'श्रुतिः "तेजः परस्यां देवताया"मिति, यथाह श्रुतिस्तदनुगुणं कार्ये कल्प्यमित्यर्थः । सुषुप्तिप्रलययोर्यथा परमात्मसंपत्त्या सुखदुःखोप-भोगाभावः, [1]स्तद्वदिहापि ॥

परसंपत्त्यधिकरणं समाप्तम् ॥ ६ ॥

अथाऽविभागाधिकरणम् ७ । [1] अविभागो वचनात् ॥ १५ ॥

सेयं परमात्मनि सम्पत्तिः किं प्राकृतलयवत् कारणापत्तिरूपोत 'वाङ् मनसी'त्यादिवदविभागरूपेति चिन्तायाम्, परमात्मनः सर्वेषां यो-निभूतत्वात्कारणापत्तिरूपेति प्राप्त उच्यते—

'अविभाग' इति, अपृथग्भावः, पृथग्व्यवहारानर्हसंसर्ग इत्यर्थः । कुतः । 'वचना'"त्तेजः परस्यां देवताया'मित्यत्रापि 'वाङ् मनसि सम्प-द्यत' इति वचनस्यानुषङ्गात् । तस्य च संसर्गविशेषवाचित्वात्तदनुषक्तस्या-भिधानवैरूप्ये प्रमाणाभावादुत्क्रान्तिवेलायां कारणापत्तिप्रयोजनाभावात्, पुनस्तत्राव्यक्तादिसृष्ट्यवचनाच्च ॥

अविभागाधिकरणं समाप्तम् ॥ ७ ॥

अथ तदोकोऽधि-करणम् ८ ।

तदोकोऽग्रज्वलनं[2] तत्प्रकाशितद्वारो वि-द्यासामर्थ्यात्तच्छेषगत्यनुस्मृति-योगाच्च हार्दानुगृहीतः शताधिकया ॥ १६ ॥

एवं गत्युपक्रमावधि[3]र्विदुषविदुषोः समानाकार उत्क्रान्तिप्रकार

---

१ ०विभाग इति मु० पु० । २ ०ज्वलनमर्वादिति ग० । ३ ०रधि—रिति मु० पु० ।

उक्तः । इदानीं विदुषो विशेष उच्यते । तत्रेदमाम्नायते–

> "शतं चैका च हृदयस्य नाड्य-
> स्तासां मूर्द्धानमभिनिःसृतैका ।
> तयोर्द्ध्वमायन्नमृतत्वमेति
> विष्वङ्ङन्या उत्क्रमणे भवन्ती"ति ।

अनया नाडीनां शताधिकया मूर्द्धन्यनाड्यैव विदुषो गमनमन्याभिरेव चा[1]विदुषो गमनमित्ययं नियम उपपद्यते नेति संशयः । किं युक्तम् । नियमो नोपपद्यत इति । कुतः । नाडीनां भूयस्त्वादतिसूक्ष्मत्वाच्च दुर्विवेच[2]तया पुरुषेणोपादातुमशक्यत्वा'त्तयोर्द्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ती'ति यादृच्छिकीमुत्क्रान्तिमनुवदतीति युक्तमत्येवं प्राप्ते प्रचक्ष्महे–

'शताधिकये'ति । विद्वान् शताधिकया मूर्द्धन्ययैव नाड्योत्क्रामति । न चास्या विदुषो दुर्विवेचत्वम्, विद्वान् हि परमपुरुषाराधनभूतात्यर्थप्रियविद्यासामर्थ्याद् विद्याशेषभूततयाऽऽत्मनोऽत्यर्थप्रियगत्यनुस्मरणयोगाच्च प्रसन्नेन हार्द्देन[3] परमपुरुषेणानुगृहीतो भवति । ततश्च तदोकः, तस्य जीवस्य स्थानं हृदयमग्रज्वलनं भवति, अग्रे ज्वलनं प्रकाशनं यस्य तदिदमग्रज्वलनम् । 'तत्प्रसादात्'–परमपुरुषप्रसादा'त्प्रकाशितद्वारो' विद्वांस्तां नाडीं विजानातीति तया विदुषो गतिरुपपद्यते ॥

तदोकोऽधिकरणं समाप्तम् ॥ ८ ॥

अथ रश्म्यनुसाराधिकरणम् ९ । **रश्म्यनुसारी ॥ १७ ॥**

विदुषो हृदयाच्छताधिकया मूर्द्धन्यनाड्या निर्गतस्यादित्यरश्मीनऽनुसृत्यादित्यमण्डलमतिः श्रूयते–"अथ यत्रैतस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमत[4]" इति, तत्र रश्म्यनुसारेणैवेत्ययं गतिनियमः सम्भ-

---

१ चकारो नास्ति प्र॰ ।
२ दुर्विवेचनेति मु॰ पु॰ इत्र चाग्रे च,प्र॰ त्विहैव ।
३ हार्देनेति द्वि॰ प्र॰ ।
४ ॰माक्रामत इति मु॰ पु॰ ।

Digitized by Google

वति नेति चिन्तायां निशि मृतस्य विदुषो रश्म्यनुसारासम्भवादनियमः वचनं तु पक्षप्राप्तविषयमिति प्राप्त उच्यते—

'रश्म्यनुसारी'ति। रश्म्यनुसार्य्येव विद्वानूर्ध्वं गच्छति। कुतः। "अथैतैरेव रश्मिभि"रित्यवधारणात्। पाक्षिकत्वे ह्येवकारो ऽनर्थकः स्यात्। यदुक्तं हि—निशि मृतस्य रश्म्यसम्भवाद् रश्मीननुसृत्य गमनं नोपपद्यत इति, तन्न, निश्यपि सूर्य्यरश्म्यनुसारः सम्भवति। लक्ष्यते हि निश्यपि निदाघसमय ऊष्मो[१]पलब्ध्या रश्मिसद्भावः, हेमन्तादौ तु हिमाभिभवाद्दुर्द्दिन इवोष्मानुपलम्भः। श्रूयते च नाडीरश्मीनां सर्वदाऽन्योन्यान्वयः, "तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं चैवमेवैत आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमं चामुञ्चाऽमुष्मादादित्यात्प्रतायन्ते त आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ता" इति। तस्मान्निश्यपि रश्मिसम्भवान्निशि मृतानामपि विदुषां रश्म्यनुसारेणैव ब्रह्मप्राप्तिरस्त्येव ॥

रश्म्यनुसाराधिकरणं समाप्तम् ॥ ९ ॥

अथ निशाऽधिकरणम् १०।

निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च ॥ १८ ॥

इदमिदानीं चिन्त्यते— विदुषो निशि मृतस्य ब्रह्मप्राप्तिरस्ति नेति[२]। यद्यपि निशायां सूर्य्यरश्मिसम्भवाद्रश्म्यनुसारेण गतिर्निशायामपि सम्भवति, तथाऽपि निशामरणस्य शास्त्रेषु गर्हितत्वात् परमपुरुषार्थलक्षणब्रह्मप्राप्तिर्निशामृतस्य न सम्भवति। शास्त्रेषु दिवामरणं प्रशस्तम्, विपरीतं निशामरणम्,

"दिवा च शुक्लपक्षश्च उत्तरायणमेव च।
मुमूर्षतां प्रशस्तानि विपरीतं तु गर्हितम्" इति।

दिवामरणनिशामरणयोः प्रशस्तत्वविपरीतत्वे चोत्तमाधमगतिहेतुत्वेन

१ ऊष्मणो—इति मु॰ पु॰। २ न वेति—इति प्र॰।

स्याताम् । अतो निशि मरणमधोगतिहेतुत्वान्न ब्रह्मप्राप्तिहेतुरिति चे,न, विदुषः[1] कर्म'सम्बन्धस्य यावद्देहभावित्वात्' । एतदुक्तं भवति—अनारब्धकार्याणामधोगतिहेतुभूतानां कर्मणां विद्यासम्बन्धेनैव विनाशा, दुत्तरेषां चाश्लेषा,त्प्रारब्धकार्य्यस्य च चरमदेहावधित्वाद्बन्धहेत्वभावा द्विदुषो निशि मृतस्यापि ब्रह्मप्राप्तिः सिद्धैवेति[2] । दर्शयति च श्रुतिः— "तस्य तावदेव चिरं यावन्न विमोक्ष्ये ऽथ संपत्स्य" इति । 'दिवा च शुक्लपक्षश्चे'त्यादिवचनमविद्वद्विषयम् ॥

निशाऽधिकरणं समाप्तम् ॥ १० ॥

अथ दक्षिणायनाधिकरणम् ११ । **अतश्चायनेऽपि दक्षिणे ॥ १९ ॥**

निशि मृतस्यापि[3] विदुषो ब्रह्मप्राप्तौ यो हेतुरुक्त,स्तत एव हेतोर्दक्षिणेऽप्ययने मृतस्य ब्रह्मप्राप्तिः सिद्धा । अधिकाशङ्का तु—"अथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं गच्छती"ति दक्षिणायने मृतस्य चन्द्रप्राप्तिश्रवणा,च्चन्द्रमसं प्राप्तानां च तेषां "यदा[4] तत्पर्य्यवैत्यथैत[5]मेवाध्वानं पुनर्निवर्त्तन्त[6]" इति पुनरावृत्तिश्रवणात्, भीष्मादीनां च ब्रह्मविद्यानिष्ठानामुत्तरायणप्रतीक्षादर्शनाद् दक्षिणायने मृतस्य ब्रह्मप्राप्तिर्न सम्भवतीति ।

परिहारस्तु—अविदुषां पितृयाणेन पथा चन्द्रमसं[7] प्राप्तानामेव पुनरावृत्तिर्विदुषस्तु चन्द्रं प्राप्तस्यापि "तस्माद्ब्रह्मणो महिमानमाप्नोती"[8]ति वाक्यशेषात्तस्य दक्षिणायनमृतस्य चन्द्रप्राप्तिर्ब्रह्म प्रपित्सतो[9] विश्रम[10]हेतुमात्रमिति गम्यते । वाक्यशेषाभावेऽपि पूर्वोक्तादेव बन्धहेत्वभावाद्विदुषश्चन्द्रं प्राप्तस्यापि ब्रह्मप्राप्तिरनिवार्या । भीष्मादीनां योगप्रभावात्स्वच्छन्दमरणानां धर्मप्रवर्तनायोत्तरायणप्राशस्त्यप्रदर्शनार्थस्तथा†विधाचारः ।

---

१ चेन्नाविदुष इति प्र॰ ।
२ इतिशब्दो मु॰ पु॰ नास्ति ।
३ अपिशब्दो नास्ति प्र॰ ।
४ यदेति नास्ति प्र॰ ।
५ ०थैनमिति प्र॰ ।
६ निवर्त्तत इति प्र॰ ।
७ चन्द्रमिति प्र॰ ।
८ ०मवाप्नोतीति प्र॰ शोधितम् ।
९ विदुष इत्यधिकं प्र॰ ।
१० विश्राममिति मु॰ पु॰ ।

Digitized by Google

ननु च विदुषो मुमुक्षून्प्रति पुनरावृत्त्यपुनरावृत्तिहेतुत्वेन कालविशेषविधिर्दृश्यते—

"यत्र† काले त्वनावृत्तिमावृत्तिं चैव योगिनः ।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥
अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥
धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥
शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्यया ऽऽवर्तते‡ पुन"रिति,

तत्राह—

योगिनः प्रति स्मर्यते स्मार्ते चैते ॥ २० ॥

नात्र मुमुक्षून्प्रति मरणकालविशेषोपादानं स्मर्यते,‡ अपि तु योगिनो योगनिष्ठान्प्रति स्मार्ते स्मृतिविषयभूते स्मर्तव्ये देवयानपितृयाणाख्ये गती स्मर्येते योगाङ्गतया[1] ऽनुदिनं स्मर्तुम् । तथा ह्युपसंहारः—

"नैते सृती पार्थ जानन् योगी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुने"ति ।

'अग्निर्ज्योति'र्'धूमो रात्रि'रिति च देवयानपितृयाणे प्रत्यभिज्ञायेते । उपक्रमे च 'यत्र काले त्वि'ति 'काल'-शब्दः कालाभिमानिदेवतातिवाहिकपरः[2], अग्न्यादेः कालत्वासम्भवात् । अत'स्तेऽर्चिषमभिसम्भवन्ती'ति-विहितदेवयानानुस्मृतिरत्र विद्यानिष्ठान्प्रति विधीयते, न मुमुक्षून्प्रति मरणकालविशेषः ॥

दक्षिणायनाधिकरणं समाप्तम् ॥ ११ ॥

इति श्रीमद्भगवद्रामानुजाचार्यविरचिते शारीरकमीमांसाभाष्ये
फलाध्यायस्य चतुर्थस्य द्वितीयः पादः ॥ २ ॥

†† ५४९ पृष्ठगतैतच्चिह्नादारभ्य एतच्चिह्नं यावत् पाठः प्र० त्रुटितः ।
‡‡ एतच्चिह्नान्तर्गतः पाठः प्र० त्रुटितः । १ स्मर्तुमित्यधिकं प्र० ।
२ देवतातिवाहिकपर इति सर्वपु० ।

अथ चतुर्थाध्यायस्य तृतीयः पादः ॥

अथार्चिरायधिकरणम् १। **अर्चिरादिना तत्प्रथितेः ॥ १ ॥**

विदुष उत्क्रान्तस्य नाडीविशेषेण हार्दानुग्रहाद् गत्युपक्रम उक्तः। तस्य गच्छतो मार्ग इदानीं निर्णीयते। तत्र श्रुतिषु मार्गप्रकारा बहुधा[1]ऽऽम्नायन्ते। छान्दोग्ये तावत्—"यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यत" इत्युपक्रम्य ब्रह्मविद्यामुपदिश्याम्नायते—"अथ यदु चैवास्मिञ्छव्यं कुर्वन्ति यदि[2] च नार्चिषमेवाभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्य्यमाणपक्षमापूर्य्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्तान्[3] मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्[4] ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तन्ते नावर्तन्त"[5] इति। तथाऽत्रैवाष्टमे—"अथैतैरेव रश्मिभिरूर्द्ध्वमाक्रमत" इति। कौषीतकिन[6] इव देवयानमार्गमन्यथाऽधीयते—"स एतं देवयानं पन्थानमासाद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्र[7]लोकं स प्रजापतिलोकं स ब्रह्मलोक"मिति। तथा,[8] बृहदारण्यके—"य एवमेतद्विदुर्ये चामी अ[10]रण्ये श्रद्धां सत्यमुपासते तेऽर्चिरभि[11]संभवन्त्यर्चिषोऽहरह्न आपूर्य्यमाणपक्षमापूर्य्यमाणपक्षाद्यान् षण्मासानुदङ्ङादित्य एति[12] मासेभ्यो देवलोकं देवलोकादादित्यमादित्याद्वैद्युतं तान् वैद्युतः पुरुषो ऽमानवः स एत्य ब्रह्मलोकान् गमयती"ति। तत्रैव पुनरन्यथा—"यदा वै पुरुषो ऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै

---

१ बहुविधा इति प्र॰। २ यदु—इति पुनर्मु॰ प्र. य॰। ३ तन्—इति प्र॰।
४ एतानिति प्र॰। ५ नावर्त्तन्त इति सकृदेव प्र॰। ६ कौषीतकिन इति प्र॰।
७ ०माप्नोतेति मु॰ प्र॰ य। ८ चन्द्रेत्युपकल्पितं प्र॰। ९ तथेति नास्ति प्र॰।
१० चेमेऽ—इति मु॰ प्र॰ य।   ११ ०र्चिषमभोति मु. प्र. य।
१२ षडुदङ् मासानेतीति प्र.।

Digitized by Google

स तत्र विजिहीते[1]यथा रथचक्रस्य खन्तेन स ऊर्द्ध्व[2]माक्रमते स आदित्यमागच्छति तस्मै स[3] तत्र विजिहीते यथा डम्बरस्य[4] खन्तेन स ऊर्द्ध्व आक्रमते स चन्द्रमसमागच्छति तस्मै स तत्र विजिहीते यथा दुन्दुभेः ख"मित्यादि । तत्र संशयः—किमर्चिरादिरेक एव मार्ग आभिः श्रुतिभिः प्रतिपाद्यत इति तेनैव ब्रह्म गच्छति विद्वान् उत तस्मादन्ये ऽन्यत्र मार्गा इति तैर्वाऽनेन वेत्यनियम इति । किं युक्तम् । अनियम इति । कुतः । अनेकरूपत्वाच्छ्रुतीनामित्येवं प्राप्तेऽभिधीयते—

'अर्च्चिरादिने'ति । अर्च्चिरादिरेक एव मार्गः सर्वत्र प्रतिपाद्यते, अतोऽर्च्चिरादिनैव गच्छति[5] । कुतः । 'तत्प्रथितेः,' तस्यैव सर्वत्र प्रथितेः । प्रथितिः—प्रसिद्धिः, तस्यैव सर्वत्र प्रत्यभिज्ञानादित्यर्थः । प्रत्यभिज्ञानात्स एव मार्गः सर्वत्र न्यूनाधिकभावेन प्रतिपाद्यत इति विद्यागुणोपसंहारवदन्यत्रोक्तानामन्यत्रोपसंहारः क्रियते । छान्दोग्ये तावदुपकोसल[6]-विद्यायां पञ्चाग्निविद्यायां चैकरूप एवाम्नायते, वाजसनेयके च पञ्चाग्निविद्यायां तथैवार्च्चिरादिरल्पान्तर आम्नायते, अतस्तत्रापि स एवेति प्रतीयते, अन्यत्रापि सर्वत्राग्न्यादित्यादयः प्रत्यभिज्ञायन्ते ॥

अर्चिराद्यधिकरणं समाप्तम् ॥ १ ॥

अथ वाय्वधिकरणम् २ । वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥

अर्चिरादिनैव गच्छन्ति विद्वांस इत्युक्तम् । तत्रार्चिरादिके मार्गे छन्दोगा मासादित्ययोरन्तराले संवत्सरमधीयते—"मासेभ्यः संवत्सरं संवत्सरादादित्य"मिति, वाजसनेयिनस्तु तयोरेवान्तराले देवलोकम्—"मासेभ्यो देवलोकं देवलोकादादित्य"मिति । उभयत्रापि मार्गस्यैकत्वादुभावुभयत्रोपसंहार्यौ । तत्र मासादूर्द्ध्वमभिहितयोः संवत्सरदेवलोकयोः

१ विजिहीर्षत इति मु० प्र० च पुनःपुनः । २ ऊर्ध्वमिति मु० प्र० च । ३ आदित्यमाक्रमते तस्मै स इति प्र० । ४ आडम्बरस्येति मु० प्र० च
†† इतश्चिह्नान्तर्गतः पाठः प्र० त्रुटितः ।
५ गच्छन्तीति मु० पु० ऽत्र । ६ ०कोपलेति प्र० ।

पञ्चम्याऽभिहितस्य श्रौतक्रमस्य तुल्यत्वेऽप्य"र्चिषोऽहरह्न आपूर्य्यमाणपक्षमापूर्य्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्ता"नित्यधिककालानां न्यूनकालेभ्य उत्तरोत्तरत्वेन निवेशदर्शनात् संवत्सरस्यैव मासादनन्तरं बुद्धौ विपरिवृत्तेः संवत्सर एव मासादूर्द्ध्वं निवेशयितव्य इति, तत ऊर्ध्वं देवलोक इति निश्चीयते । अन्यच्च वाजसनेयिनः "यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खन्तेन स ऊर्द्ध्वं आक्रमते स आदित्यमागच्छती"त्यादित्यात्पूर्वं वायुमधीयते । कौषीतकिनस्तु—"स एतं देवयानं पन्थानमासाद्याग्निलोकमागच्छति स वायुलोक[1]"मित्यग्निलोकशब्दनिर्दिष्टादर्चिषः परं वायुलोकमधीयते । तत्र कौषीतकिनां पाठक्रमेणार्च्चिषः परत्वेन प्राप्तस्य वायोर्वाजसनेयिना'न्तेन स ऊर्ध्वं आक्रमते स आदित्यमागच्छती'त्यूर्द्ध्वशब्दनिर्द्दिष्टश्रौतक्रमेण पाठक्रमाद्बलीयसाऽऽदित्यात्पूर्वं प्रवेशो[2] निश्चीयते । अत आदित्यात्पूर्वं संवत्सरादूर्द्ध्वं देवलोको वायुश्च प्राप्तौ । तत्रेदं चिन्त्यते—किं देवलोको वायुश्चार्थान्तरभूतौ यथेष्टक्रमेण विद्वानभिगच्छेदुतानर्थान्तरत्वेन संवत्सरादूर्द्ध्वं देवलोकं सन्तं वायुमभिगच्छेदिति । किं युक्तम् । भिन्नार्थत्वम्, प्रसिद्धेः[3] । भिन्नार्थत्वे[4] चोर्ध्वशब्देन पञ्चम्या चोभयोः संवत्सरादित्यान्तराले श्रुतिक्रमेण प्राप्तत्वाद्विशेषाभावाच्च यथेष्टमिति प्राप्त उच्यते—

'वायुमब्दा'दिति । वायुं संवत्सरादूर्ध्वमभिगच्छेत् । कुतः । 'अविशेषविशेषाभ्यां' वायोरेव निर्दिष्टत्वात् । देवलोकशब्दो ह्यविशेषेण सामान्येन देवानां लोक इत्यनेन रूपेण वायुमभिधत्ते 'स वायुमभिगच्छति तस्मै स तत्रे'ति वायुशब्दो विशेषेण वायुमभिधत्ते । अतो देवलोकवायुशब्दाभ्यामविशेषविशेषाभ्यां वायुरेवाभिधीयत इति संवत्सरादूर्द्ध्वं वायुमेवाभिगच्छेत् । कौषीतकिनां वायुलोकशब्दश्चाग्निलोकशब्दवद् वायुश्चासौ लोकश्चेति व्युत्पत्त्या वायुमेवाभिधत्ते । वायुश्च देवा-

१ वायुमिति प्र० ।
२ पूर्वप्रदेश इति द्वि० ।
३ भिन्नार्थत्वप्रसिद्धेरिति प्र० द्वि० ।
४ भिन्नार्थत्वेनेति प्र० ।

Digitized by Google

नामावासभूत[१] इत्यन्यत्र श्रूयते “योऽयं पवत एष देवानां गृहा”[२] इति ॥

वाय्वधिकरणं समाप्तम् ॥ २ ॥

अथ वरुणाधिकरणम् ३ । **तडितोऽधि वरुणः संबन्धात् ॥ ३ ॥**

कौषीतकिनां “स एतं देवयानं पन्थानमासाद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोक”मित्यत्राग्निलोकशब्दस्यार्चिःपर्यायत्वेन प्राथम्यमविगीतम् । वायोश्च संवत्सरादूर्ध्वं निवेश उक्तः । आदित्यस्याप्यत्र प्राप्तपाठक्रमबाधेन ‘देवलोकादादित्यमादित्याच्चन्द्रमस’मिति वाजसनेयको[३]क्तश्रुतिक्रमाद्देवलोकशब्दाभिहिताद्वायोरुपरि निवेशः सिद्धः । इदानीं वरुणेन्द्रादिषु चिन्ता प्राप्ता[४]- किमेते वरुणादयो यथापाठं वायोरूर्ध्वं निवेशयितव्या आहोस्विद्विद्युतोऽधीति विषये, अर्चिःप्रभृतिषु सर्वत्र‘ऽर्चिषोऽह’रिति श्रुतिक्रमोपरोधाद्विद्युतः परस्ताच्च ‘तत्पुरुषो ऽमानवः स एनान् ब्रह्म गमयती’ति विद्यु[५]त्पुरुषस्य ब्रह्मगमयितृत्वश्रवणाच्च सर्वत्रावकाशाभावेनाप्राप्तौ चोद्देशावैयर्थ्यायावश्यं कस्यचिद्बाध्यत्वे पाठक्रमा[६]नुरोधेन वायोरनन्तरं वरुणो निवेशितव्यः, वाय्वादित्ययोः क्रमस्य बाधितत्वेनेन्द्रप्रजापती अपि तत्रैव निवेशयितव्याविति प्राप्त उच्यते—

‘तडितोऽधिवरुण’ इति । वरुणस्तावद् विद्युत उपरिष्टान्निवेशयितव्यः । कुतः । ‘सम्बन्धात्,’ मेघोदरवर्तित्वाद्विद्युतो हि वरुणेन सम्बन्धो लोकवेदयोः प्रसिद्धः । एतदुक्तं भवति—वरुणादीनामुपदेशावैयर्थ्याय क्वचिन्निवेशयितव्यत्वे सति पाठक्रमादर्थक्रमो बलीयानिति विद्युतोऽधि वरुणो निवेशयितव्यः । ततश्चामानवस्य गमयितृत्वं व्यवधानसहमित्यवगम्यते । तस्य च[७] व्यवधानसहत्वादिन्द्रादेश्चोपदिष्टस्यावश्यं

---

१ ०मावास इति प्र० । २ पवत स एव देवानां गृह इति प्र० ।
३ वाजसनेयिको- इति प्र० । ४ प्राप्तेति नास्ति प्र० ।
५ विद्युतः- इति प्र० । ६ पाठक्रमेति प्र० ।
७ चकारोऽत्र मु० पु० नास्ति ।

निवेशयितव्यस्य वरुणादुपरि उपदिष्टत्वादागन्तूनां[1]मन्ते निवेशयितव्यत्वाच्च वरुणादुपरीन्द्रादीनां निवेशयितव्य इति ॥

वरुणाधिकरणं समाप्तम् ॥ ३ ॥

अथाऽऽतिवाहिकाधिकरणम् ४ । **आतिवाहिकास्तल्लिङ्गात् ॥ ४ ॥**

इदमिदानीं चिन्त्यते–किमर्चिरादयो मार्गचिह्नभूता उत भोगभूमयः, अथ वा विदुषां ब्रह्म प्रेप्सतामतिवोढार[2] इति । किं तावद् युक्तम् । मार्गचिह्नभूता इति । कुतः । उपदेशस्य तथाविधत्वात् । लोके हि दृश्यते ग्रामा[3]न्तरं गन्तॄणामेवंविधो दैशिकोपदेशः–इतो निष्क्रम्यामुं वृक्षममुकां नदीममुकं च पर्वतपार्श्वं[4] गत्वा ऽमुकं ग्रामं गच्छेति । अथ वा, भोगभूमय एताः स्युः, कालविशेषनया प्रसिद्धानामहरादीनां मार्गचिह्नत्वानुपपत्तेः । अन्यस्य[5] च मार्गचिह्नभूतस्यैतेषामनभिधायित्वात् । भोगभूमित्वं "त्वंत उ एव[6] लोका यदहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरा" इत्यहरादीनां लोकत्ववचनादुपपद्यते । अत एव कौषीतकिनो ऽग्निलोकमागच्छती'त्यादिना 'लोक'–शब्दानुविधानेनार्चिरादीन् पठन्तीत्येवं प्राप्ते ब्रूमः–

'आतिवाहिका' इति । विदुषामतिवाहे परमपुरुषेण नियुक्ता आतिवाहिका देवताविशेषा एतेऽर्चिरादयः । कुतः । 'तल्लिङ्गात्'–अतिवहनलिङ्गात् । अतिवहनं हि गन्तॄणां गमयितृत्वम् । तच्च 'तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयती'त्युपसंहारे श्रूयमाणं पूर्वसामर्थ्यविशेषश्रुतानां स एव संबन्ध इति गमयति । वदन्ति चार्चिरादयः शब्दा अर्चिरात्मभूतानभिमानिदेवताविशेषान्, 'तं पृथिव्यब्रवी'दितिवत् ।

यद्येवम्,'तत् पुरुषोऽमानवः स एनान् ब्रह्म गमयती'ति वैद्युतस्यैव

---

१ आगन्तूनामिति मु० पु० यत्वघटितपाठः ।

२ अतीववोढार इति प्र० ।

३ ग्रामादीनिति प्र० ।

४ ०ममुकां नदीममुकं च पर्वतं पार्श्वमिति प्र० ।

५ अस्येति प्र० ।

६ ०त्वं च एत एवेति मु० पु० ।

Digitized by Google

पुरुषस्य ब्रह्म प्रति गमयितृत्वश्रुतेः विद्युतः[1] परेषां वरुणादीनां कथमातिवाहिकत्वेनान्वय इत्यत आह—

वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ५ ॥

ततो विद्युत उपरि वैद्युतेनाऽमानवेनैवातिवाहिकेन विदुषामा ब्रह्मप्राप्तेर्गमनम् । कुतः । 'तच्छ्रुतेः,' स एनान् ब्रह्म गमयतीति तस्यैव गमयितृत्वश्रुतेः । वरुणादयस्त्वऽनुग्राहका इति तेषामप्यातिवाहिकत्वेनान्वयो विद्यत एव ॥

आतिवाहिकाधिकरणं समाप्तम् ॥ ४ ॥

अथ कार्याधिकरणम् ५ । **कार्यं बादरिरस्य गत्युपपत्तेः ॥ ६ ॥**

अर्चिरादिनैव गच्छति विद्वान्, अर्चिरादिरऽमानवान्तश्च गण आतिवाहिको विद्वांसं ब्रह्म गमयतीत्युक्तम् । इदमिदानीं चिन्त्यते—किमयमर्चिरादिको गणः कार्यं हिरण्यगर्भमुपासीनान्नयत्युत परब्रह्मोपासीनानेव, अथ परब्रह्मोपासीनान् प्रत्यगात्मानं ब्रह्मात्मकतयोपासीनांश्चेति विशये[2] कार्यमुपासीनानेव गमयतीति बादरिराचार्यो मन्यते । कुतः । 'अस्य' हिरण्यगर्भमुपासीनस्यैव 'गत्युपपत्तेः' । न हि परिपूर्णं सर्वज्ञं सर्वगतं सर्वात्मभूतं परं ब्रह्मोपासीनस्य तत्प्राप्तये देशान्तरगतिरुपपद्यते, प्राप्तत्वादेव । नित्यप्राप्तपरब्रह्मविषयाऽविद्यानिवृत्तिमात्रमेव हि परविद्याकार्यम् । कार्ये तु हिरण्यगर्भरूपं ब्रह्मोपासीनस्य परिच्छिन्नदेशवर्तिप्राप्यप्राप्त्यर्थे गमनमुपपद्यते । अतोऽर्चिरादिक आतिवाहिकगणस्तमेव नयति ।

विशेषितत्वाच्च ॥ ७ ॥

"पुरुषो ऽमानवः स एत्य ब्रह्मलोकान् गमयती"ति 'लोक'-शब्देन बहुवचनेन च लोकविशेषवर्तिनं हिरण्यगर्भमुपासीनमेवामानवो गमयतीति विशेष्यते । किं च, "प्रजापतेः सभां वेश्म प्रपद्ये" इति कार्यस्य हिरण्यगर्भस्य समीपगमनमर्चिरादिना गतोऽभिसन्धत्ते ।

१ वैद्युतः—इति प० । २ विषय इति प० ।

नन्वेवं 'तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयती'त्ययं निर्देशो नोपपद्यते । हिरण्यगर्भनयने[1] हि 'स एनान्ब्रह्माणं गमयती'ति निर्देष्टव्यं स्यात्, अत आह—

सामीप्यात्तु तद्व्यपदेशः ॥ ८ ॥

"यो ब्रह्माणं विदधाती"ति हिरण्यगर्भस्य प्रथमजत्वेन ब्रह्मसामीप्यात्तस्य 'ब्रह्म'-शब्देन व्यपदेश इति गत्यनुपपत्तिविशेषणादिभिरुक्तैर्हेतुभिर्निश्चीयत इत्यर्थः ।

अथ स्यात्—अर्चिरादिना हिरण्यगर्भप्राप्त"एष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते" "तयोर्द्ध्वमायन्नमृतत्वमेती"त्यमृतत्वप्राप्त्यपुनरावृत्तिव्यपदेशो नोपपद्यते, हिरण्यगर्भस्य कार्य्यभूतस्य द्विपरार्द्धकालावसाने विनाशशास्त्रात् "आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुने"ति वचनाद्धिरण्यगर्भं प्राप्तस्य पुनरावृत्तेरवर्जनीयत्वादिति, तत्राह—

कार्यात्यये तदध्यक्षेण सहाऽतः परमभिधानात् ॥ ९ ॥

कार्य्यस्य ब्रह्मलोकस्यात्यये तदध्यक्षेण हिरण्यगर्भेणाधिकारिकेणावसिताधिकारेण विदुषा सह स्वयमपि तत्राधिगत[2]विद्योऽतः कार्य्याद् ब्रह्मलोकात्परं ब्रह्म प्राप्नोतीत्यर्चिरादिना गतस्यामृतत्वप्राप्त्यपुनरावृत्त्यभिधानात् "ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे" इति वचनाच्चावगम्यते ।

स्मृतेश्च ॥ १० ॥

स्मृतेश्चायमर्थोऽवगम्यते -

"ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसंचरे ।

परस्यान्ते कृतात्मानः प्रविशन्ति परं पद"मिति ।

अतः कार्य्यमुपासीनमेवार्चिरादिको गणो नयतीति बादरेर्मतम् ।

अथ जैमिनिः पक्षान्तरपरिग्रहेण[3] प्रत्यवतिष्ठते—

१ ०नयने इति प्र० ।   २ ०ऽधिकगतेति प्र० ।

३ मतिव्यधिकं प्र० ।

परं जैमिनिर्मुख्यत्वात् ॥ ११ ॥

'परं' ब्रह्मोपासीनमेवार्चिरादिर्नयतीति 'जैमिनि'राचार्यो मन्यते । कुतः । 'मुख्यत्वात्,' 'तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयती'ति ब्रह्म'-शब्दस्य परस्मिन्नेव ब्रह्मणि मुख्यत्वात् । प्रमाणान्तरेण[1] कार्य्यत्वनिश्चये सत्येव हि लाक्षणिकत्वं युक्तम् । न च गमनानुपपत्तिः प्रमाणम् । परस्य ब्रह्मणः सर्वगतत्वेऽपि विदुषो विशिष्टदेशगतस्यैवाऽविद्यानिवृत्तिः शास्त्रात्[2] । यथा हि विद्योत्पत्ति[3]र्वर्णाश्रमधर्मशौचाचारदेशकालाद्यपेक्षा "तमेतं वेदानुवचनेने"त्यादिशास्त्रादवगम्यते, तथा निःशेषाविद्यानिवर्तनरूपविद्यानिष्पत्तिरपि विशिष्टदेशगतिसापेक्षेति गतिशास्त्रादवगम्यते । विदुष उत्क्रान्तिप्रतिषेधादि तु पूर्वमेव परिहृतम् । यत्तु'ब्रह्मलोका'निति 'लोक'-शब्दबहुवचनाभ्यां विशेषणात्कार्य्यभूतहिरण्यगर्भप्रतीतिरिति, तदयुक्तम्, निषादस्थपतिन्यायेन ब्रह्मैव लोको ब्रह्मलोक इति कर्मधारयस्यैव युक्तत्वात् । अर्थस्य चै[4]कत्वे निश्चिते बहुवचनस्या'ऽदितिः पाशा'नितिवदुपपत्तेः । परस्य ब्रह्मणः परिपूर्णस्य सर्वगतस्य सत्यसङ्कल्पस्य स्वेच्छापरिकल्पिताः स्वासाधारणा अप्राकृताश्च लोका नात्यन्ताय न सन्ति,[5] श्रुतिस्मृतीतिहासपुराणप्रामाण्यात् ।

दर्शनाच्च ॥ १२ ॥

दर्शयति च श्रुतिर्मूर्धन्यनाड्या निर्गत्य देवयानेन गतस्य परब्रह्मप्राप्तिम्-"एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत"इति ।

यदुक्तम् "प्रजापतेः सभां वेश्म प्रपद्ये" इत्यर्चिरादिना गतस्य कार्य्यं प्रत्यभिसंधिर्दृश्यत इति, तत्रोत्तरम्-

१ प्रमाणान्तरेऽन्तरेणेति प्र० । २ ०निवृत्तिशास्त्रादिति मु० पु० ।
३ ०त्पत्तेरिति प्र० । ४ चकारो नास्ति प्र० ।
५ इतिशब्दोऽधिकः प्र० ।

Digitized by Google

न च कार्ये प्रत्यभिसन्धिः ॥ १३ ॥

'न चायं 'प्रत्यभिसन्धिः' 'कार्ये' हिरण्यगर्भे, अपि तु परस्मिन्नेव ब्रह्मणि । वाक्यशेषे "यशोऽहं भवामि ब्राह्मणाना"मिति तस्याभिसन्धातुः सर्वाविद्याविमोकपूर्वकसर्वात्मभावाभिसंधानात्,

"अश्व इव रोमाणि विधूय पापं
चन्द्र इव राहोर्मुखात्प्रमुच्य ।
धूत्वा शरीरमकृतं कृतात्मा
ब्रह्मलोकमभिसंभवामी"—

त्यभिसंभाव्यस्य ब्रह्मलोकस्याकृतत्व[1]श्रवणात् सर्व[2]बन्धविनिर्मोकस्य च साक्षाच्छ्रवणात् । अतः परमेव ब्रह्मोपासीनमर्चिरादिरातिवाहिको गणो नयतीति जैमिनेर्मतम् ॥

इदानीं बादरायणस्तु भगवान्स्वमतेन सिद्धान्तमाह—

अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च ॥ १४ ॥

'अप्रतीकालम्बनान्, प्रतीकालम्बनव्यतिरिक्तान् 'नयत्य'र्चिरादिरातिवाहिको गण इति भगवान्बादरायणो मन्यते[3] । एतदुक्तं भवति—कार्यमुपासीनान्नयतीति नायं पक्षः सम्भवति, परमेवोपासीनानित्यय[4]मपि नियमो नास्ति, न च प्रतीकालम्बनानपि नयति[5] । अपि तु, ये परं ब्रह्मोपासते, ये चात्मानं प्रकृतिवियुक्तं ब्रह्मात्मकमुपासते, तानुभयविधान्नयति । ये तु ब्रह्मकार्यान्तर्भूतं नामादिकं वस्तु देवदत्तादिषु सिंहादिदृष्टिवद्ब्रह्मदृष्ट्या केवलं वा तत्तद्वस्तूपासते, न तान्नयति । अतः, परं ब्रह्मोपासीनानात्मानञ्च प्रकृतिवियुक्तं ब्रह्मात्मकमुपासीनान्नयतीति । कुतः । 'उभयथा च दोषात्,' कार्यमुपासीनान्नयतीति पक्षे "ऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य"त्यादिकाः श्रुतयः प्रकुप्येयुः, परमेव ब्रह्मोपासीनान्निति च नियमे "तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप

१ ऽकृतकत्वेति प्र० । २ सं—इत्यधिकं प्र० ।
३ मेन इति प्र० । ४ अयमिति नास्ति प्र० । ५ नयतीति—इति प्र० ।

इत्युपासते तेऽर्चिषमभिसम्भवन्ती”ति पञ्चाग्निविदोऽप्य[1]र्चिरादिगणो नयतीति श्रुतिः प्रकुप्येत् । अत उभयस्मिन्नपि पक्षे दोषः स्या, त्तस्मादुभयविधान्नयति[2] । तदेतदाह 'तत्क्रतुश्चे'ति[3] । तत्क्रतुः, यथो[4]पासीनस्तथैव प्राप्नोतीत्यर्थः । “यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति” “तं यथायथोपासत”इति न्यायात् । पञ्चाग्निविदोऽप्यर्चिरादिना गतिश्रवणात्, अर्चिरादिना गतस्य ब्रह्मप्राप्त्यपुनरावृत्तिश्रवणाच्च । अत एव तत्क्रतुन्यायात् प्रकृतिविनिर्मुक्तब्रह्मात्मकात्मानुसन्धानं सिद्धम् । नामादिप्राणपर्यन्तप्रतीकालम्बनानां तूभयविधश्रुतिसिद्धोपासनाभावादचिन्मिश्रोपासने तत्क्रतुन्यायाच्चार्चिरादिना गतिर्ब्रह्मप्राप्तिश्च न विद्यते ।

तमिमं विशेषं श्रुतिरेव दर्शयतीत्याह—

विशेषं च दर्शयति ॥ १५ ॥

“यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवती”त्यादिका श्रुतिर्नामादिप्राणपर्यन्त[5]प्रतीकमुपासीनानां गत्यनपेक्षं परिमितफलविशेषं[6] दर्शयति । तस्मादचिन्मिश्रं केवलं वा चिद्वस्तु ब्रह्मदृष्ट्या तद्वियोगेन च य उपासते न तान्नयति, अपि तु परं ब्रह्मोपासीनानात्मानं च प्रकृतिवियुक्तं ब्रह्मात्मकं चोपासीनानाऽऽतिवाहिको गणो नयतीति सिद्धम् ॥

कार्याधिकरणं समाप्तम् ॥ ५ ॥

इति श्रीमद्भगवद्रामानुजाचार्यचरणकृतौ शारीरकमीमांसाभाष्ये फलाध्यायस्य चतुर्थस्य तृतीयः पादः ॥ ३ ॥

---

१ अपिशब्दो नास्ति मु॰ पु॰ । २ इतिशब्दोऽधिको मु॰ पु॰ ।
३ इतिशब्दो नास्ति प्र॰ । ४ तथेत्येव पु॰ द्वयेपि ।
५ प्राणपर्यन्तेति प्र॰ नास्ति । ६ चेत्यधिकं मु॰ पु॰ ।

Digitized by Google

अथ चतुर्थाध्याये चतुर्थः पादः ।

अथ संपद्याविर्भावाधिकरणम् १ । **संपद्याविर्भावः स्वेन शब्दात् ॥ १ ॥**

परं ब्रह्मोपासीनानामात्मानञ्च प्रकृतिवियुक्तं ब्रह्मात्मकमुपासीनानाऽमर्चिरादिना मार्गेणापुनरावृत्तिलक्षणा गतिरुक्ता । इदानीं मुक्तानामैश्वर्य्यप्रकारं चिन्तयितुमारभते । इदमाम्नायते-"एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत" इति । किमस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपन्नस्य देवादिरूपवत्साध्येन रूपेण सम्बन्धोऽनेन वाक्येन प्रतिपाद्यत उत स्वाभाविकस्य स्वरूपस्याविर्भाव इति संशये साध्येन रूपेण संबन्ध इति युक्तम् । अन्यथा ह्यपुरुषार्थावबोधित्वं मोक्षशास्त्रस्य स्या,त्स्वरूपस्य स्वतोऽपुरुषार्थत्वदर्शनात् । न हि सुषुप्तौ देहेन्द्रियव्यापारेषूपरतेषु केवलस्यात्मस्वरूपस्य पुरुषार्थसम्बन्धो दृश्यते । न च दुःखनिवृत्तिमात्रं परं ज्योतिरुपसम्पन्नस्य पुरुषार्थः, येन स्वरूपाविर्भाव एव मोक्ष इत्युच्येत[1] । "स एको ब्रह्मण आनन्दः श्रोत्रियस्य चाकामहतस्य" "रसं ह्येवायं लब्ध्वाऽऽनन्दी भवतीत्यादिभ्यो मुक्तस्य सुखानन्त्यश्रवणात् । न चापरिच्छिन्नानन्द[2]रूपचैतन्यमेवास्य स्वरूपम्, तच्च संसारदशायामविद्यातिरोहितं परं ज्योतिरुपसम्पन्नस्याविर्भवतीति शक्यं वक्तुम्, ज्ञानस्वरूपस्य तिरोधानासम्भवात् । प्रकाशपर्यायस्य ज्ञानस्य तिरोधानं तद्विनाश एवेति हि पूर्वमेवोक्तम् । न च† प्रकाशमात्रस्यानन्दता सम्भवति, सुखस्वरूपता ह्यानन्दस्वरूपता, सुखस्वरूपत्वं चात्मनोऽनुकूलत्वम्† । प्रकाशमात्रात्मवादिनः कस्य प्रकाशोऽनुकूलवेदनीयो भवेदिति प्रकाशमात्रात्मवादिनः कथञ्च-

---

१ ०त्युच्यते-इति प्र० ।   २ स्वेति अधिकं प्र० ।

† एतच्चिह्नान्तर्गतः पाठः प्र० त्रुटितः ।

वद्यानन्दस्वरूपता दुरुपपादा । स्वरूपावाप्तिमात्रे च साध्ये स्वरूपस्य नित्यनिष्पन्नत्वादुपसम्पन्नस्य स्वेन रूपेणाभिनिष्पद्यत इति वचनमनर्थकं स्यात् । अतोऽपूर्वेण साध्येन रूपेण संबध्यते । एवं चा'भिनिष्पद्यत' इति वचनं मुख्यार्थमेव भवति । स्वेन रूपेणेत्यप्यानन्दैकान्तेन स्वासाधारणे-नाभिनिष्पद्यत इति सङ्कुचित इत्येवं प्राप्तेऽभिधीयते—

“'सम्पद्याविर्भाव' इति । अयं प्रत्यगात्माऽर्चिरादिना परं ज्योति-रुपसम्पद्य यं दशाविशेषमापद्यते स स्वरूपाविर्भावरूपः, नापूर्वाकारोत्प-त्तिरूपः । कुतः । 'स्वेन शब्दात्,'स्वेन रूपेणेति विशेषणोपादानादि-त्यर्थः । आगन्तुकदेह[1]परिग्रहे हि 'स्वेन रूपेणे'ति विशेषणमनर्थकं स्यात्, अविशेषणेऽपि तस्य स्वकीयरूपत्वसिद्धेः ।

यदुक्तं स्वरूपस्य नित्यप्राप्तत्वादुपसंपद्याभिनिष्पद्यत इति वच-नमनर्थकमिति, तत्रोत्तरम्—

मुक्तः प्रतिज्ञानात् ॥ २ ॥

कर्मसम्बन्धतत्कृतदेहादिविनिर्मुक्तः[2] स्वाभाविकेन रूपेणावस्थि-तोऽत्र स्वेन रूपेणाभिनिष्पद्यत इत्युच्यते । अतो नित्यप्राप्तस्यापि स्वरू-पस्य कर्मरूपाविद्यातिरोहितस्य तिरोधाननिवृत्तिरत्राभिनिष्पत्तिरुच्यते । कुतः । 'प्रतिज्ञानात्,'सा हि प्रतिपाद्यतया प्रतिज्ञाता । कुत इदमवग-म्यते । 'य आत्मे'ति प्रकृतं प्रत्यगात्मानं जागरिताद्यवस्थात्रयविनिर्मुक्तं प्रियाप्रियहेतुभूतकर्मारब्धशरीरविनिर्मुक्तं च प्रतिपादयितुम् “एतं त्वेव ते भूयोऽनुव्याख्यास्यामी”ति पुनःपुनरुक्त्वा “एवमेवैष सम्प्रसादोऽस्माच्छरी-रात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत” इत्यभिधानात् । अतः कर्मणा संबद्धस्य परं ज्योतिरुपसंपद्य बन्धनिवृत्तिरूपा विनिर्मुक्तिः स्वेन रूपेणाभिनिष्पद्यत इत्युच्यते । स्वरूपाविर्भावेऽप्य'भिनिष्पत्ति'-श-ब्दो दृश्यते 'युक्त्याऽयमर्थो निष्पद्यत' इत्यादिषु ।

१ आगन्तुकविग्रहेति क्वचित् ।
२ ०मुक्तेति निर्विभक्तिकं प्र० ।

यच्चोक्तम्-आत्मस्वरूपस्य सुषुप्तावपुरुषार्थत्वदर्शनात् स्वरूपाविर्भावे मोक्षशास्त्रस्यापुरुषार्थावबोधित्वं स्यादिति कृत्वा देवाद्यवस्थावत् सुखसम्बन्धावस्थान्तरप्राप्तिरभिनिष्पत्तिरिति, तत्रोत्तरम्—

आत्मा प्रकरणात् ॥ ३ ॥

स्वरूपेणैवायमात्माऽपहतपाप्मत्वादिसत्यसङ्कल्पत्वपर्यन्तगुणक इति प्रकरणादवगम्यते "य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प" इति हि प्रजापतिवाक्यप्र[1]क्रमः । इदं च प्रकरणं प्रत्यगात्मविषयमित्यु'त्तराच्चेदाविर्भूतस्वरूपस्त्व'त्यत्र प्रतिपादितम् । अतोऽपहतपाप्मत्वादिस्वरूप एवायमात्मा संसारदशायां कर्माख्ययाऽविद्यया तिरोहितस्वरूपः परं ज्योतिरुपसंपद्याविर्भूतस्वरूपो भवति । अतः प्रत्यगात्मनोऽपहतपाप्मत्वादयः स्वाभाविका गुणाः परं ज्योतिरुपसम्पद्याविर्भवन्ति, नोत्पद्यन्ते । यथोक्तं भगवता शौनकेनापि—

"यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः ।
दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा ॥
यथोदपानकरणात् क्रियते न जलाम्बरम्[2] ।
सदेव नीयते व्यक्तिमसतः सम्भवः कुतः ॥
तथा हेयगुणध्वंसादवबोधादयो गुणाः ।
प्रकाश्यन्ते[3] न जन्यन्ते नित्या एवात्मनो हि ते" इति ।

अतो[4] ज्ञानानन्दादिगुणानां कर्मणाऽऽत्मनि संकुचितानां परं ज्योतिरुपसंपद्य कर्मरूपबन्धक्षये विकासरूपाविर्भावो नानुपपन्न इति सुष्ठूक्तं 'संपद्याविर्भाव' इति ॥

संपद्याविर्भावाधिकरणं समाप्तम् ॥ १ ॥

---

१ प्रेति नास्ति प्र॰ ।
२ जलाम्बरमिति मु॰ पु॰ ।
३ प्रकाश्यन्त इत्येव प्रायः ।
४ अत इति नास्ति प्र॰ ।

Digitized by Google

मुक्तस्याविभागेन दृष्ट-
त्वाधिकरणम् ४।

अविभागेन दृष्टत्वात् ॥ ४ ॥

किमयं परं ज्योतिरुपसंपन्नः सर्वबन्धविनिर्मुक्तः प्रत्यगात्मा स्वात्मानं परमात्मनः पृथग्भूतमनुभवत्युत तत्प्रकारतया तदविभक्तमिति विशये "सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता,"

"यदा पश्यः पश्यते रुक्मवर्णं
कर्तारमीशं पुरुषं ब्रह्म योनिम् ।
तदा विद्वान्पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति" ॥
"इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च" ॥—

इत्यादिश्रुतिस्मृतिभ्यो मुक्तस्य परेण साहित्यसाम्यसाधर्म्यावगमात् पृथग्भूतमनुभवतीति प्राप्त उच्यते—

'अविभागेने'ति। परस्माद् ब्रह्मणः स्वात्मानम'ऽविभागेना'नुभवति मुक्तः। कुतः। 'दृष्टत्वात्', परं ब्रह्मोपसम्पद्य निवृत्ताविद्यातिरोधानस्य याथातथ्येन स्वात्मनो दृष्टत्वात्। स्वात्मनः स्वरूपं हि "तत्त्वमसि, ऽयमात्मा ब्रह्म" "ऐतदात्म्यमिदं सर्वं" "सर्वं[१] खल्विदं ब्रह्मे"त्यादिसामानाधिकरण्यनिर्देशैः"य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः" "अन्तः प्रविष्टः शास्ता जनानां" "स त आत्मे"त्यादिभिश्च परमात्मात्मकं तच्छरीरतया तत्प्रकारभूतमिति प्रतिपादितम् 'अवस्थितेरिति काशकृत्स्न' इत्यत्र। अतो ऽविभागेनाहं ब्रह्मास्मीत्येवानुभवति। साम्यसाधर्म्यव्यपदेशो ब्रह्मप्रकारभूतस्यैव प्रत्यगात्मनः स्वरूपं तत्सममिति देवादिप्राकृतरूपप्रहाणेन ब्रह्मसमानशुद्धिं प्रतिपादयति। सहश्रुतिस्त्वेवंभूतस्य प्रत्यगात्मनः प्रकारिणा ब्रह्मणा सह तद्गुणानुभवं प्रतिपादयतीति न कश्चिद्विरोधः। ब्रह्मप्रकारतया तदविभागोक्तेर्हि 'सङ्कल्पा-

१ सर्वमिति खळ्वेव प०।

देव तच्छृणुते'रित्यादि न विरुद्ध्यते, 'अधिकं तु भेदनिर्देशा' 'दधिकोपदेशा'दित्यादि च ॥

अविभागेन दृष्टत्वाधिकरणं समाप्तम् ॥ २ ॥

अथ ब्राह्माधिकरणम् ३ । **ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥५॥**

प्रत्यगात्मनः परं ज्योतिरुपसंपद्य निवृत्ततिरोधानस्य स्वरूपाविर्भाव एवेत्युक्तम् । तत्र येन† स्वरूपेणायमात्माऽऽविर्भवति, तत्स्वरूपं श्रुतिवैविध्याद्विचार्य्यते—किमपहतपाप्मत्वादिकमेवास्य† स्वरूपमिति तेन रूपेणायमाविर्भवत्युत विज्ञानमात्रमेवेति तेन रूपेण, अथोभयोरविरोध इत्युभयस्वरूपेणे'ति । किं तावत्प्राप्तम् । ब्राह्मेणेति जैमिनिराचार्य्यो मन्यते । ब्राह्मेणापहतपाप्मत्वादिनेत्यर्थः । अपहतपाप्मत्वादयो हि दहरवाक्ये ब्रह्मसम्बन्धितया श्रुताः । ब्राह्मेणेति कुतोऽवगम्यते । 'उपन्यासादिभ्यः,' उपन्यस्यन्ते हि ब्रह्मगुणा अपहतपाप्मत्वादयः प्रत्यगात्मनो ऽपि प्रजापतिवाक्ये "य आत्माऽपहतपाप्मे'-त्यादिना 'सत्यसङ्कल्प' इत्यन्तेन । 'आदि'- शब्देन सत्यसङ्कल्पत्वा[१]दिगुणायत्ता जक्षणादयो "जक्ष[२]त्क्रीडन् रममाण" इत्यादिवाक्यावगता व्यवहारा गृह्यन्ते । अत एभ्य उपन्यासादिभ्यः प्रत्यगात्मनो विज्ञानमात्रस्वरूपत्वं न सम्भवतीति जैमिनेर्मतम् ॥

चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ ६ ॥

चैतन्यमात्रमेवास्यात्मनः स्वरूपमिति तेन रूपेणाविर्भवतीत्यौडुलोमिराचार्य्यो मन्यते[३] । कुतः । 'तदात्मकत्वा'त्तावन्मात्रात्मकत्वादस्य प्रत्यगात्मनः, "स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा[४] अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवे"[५]त्यवधारणाद्विज्ञानमात्रमेवास्य स्वरूपमित्यवगम्यते । अतोऽस्य गुणान्तराभावा-

---

† एतच्चिह्नान्तर्गतः पाठः प्र॰ त्रुटितः ।
१ एवकारो नास्ति मु॰ पु॰ । २ त्वेति नास्ति प्र॰ ।
३ यद्वेति यकारादिः पाठः प्र॰ । ४ मेन इति प्र॰ ।
५ वैशब्दो नास्ति प्र॰ । ६ विज्ञानघन एवेत्यधिकं मु॰ पु॰ ।

द'ऽपहतपाप्मे'त्यादयः शब्दाः विकारसुखदुःखाद्यविद्यात्मकधर्मव्यावृत्तिपरा इति चिति तन्मात्ररूपेणाविर्भाव इत्यौडुलोमिर्मतम् ॥

सम्प्रति भगवान्बादरायणः स्वमतेन सिद्धान्तमाह—

एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॥ ७ ॥

'एवमपि' विज्ञानमात्रस्वरूपत्वप्रतिपादने सत्यपि सत्यकामत्वादीनां पूर्वोक्तानां गुणाना'मविरोधं बादरायण' आचार्यो मन्यते। कुतः। 'उपन्यासात् पूर्वभावा'दौपनिषदा' य आत्माऽपहतपाप्मे''त्याद्युपन्यासात्प्रमाणात्पूर्वेषामपहतपाप्मत्वसत्यसंकल्पत्वादीनामपि भावाद्विद्यमानत्वात्, तुल्यप्रमाणका[1]नामितरेतरबाधो न युज्यत इत्यर्थः। न च वस्तुविरोधादपहतपाप्मत्वादीनामविद्यापरि[2]कल्पितत्वं न्याय्यम्, विशेषाभावाद्विपरीतं कस्मान्न भवतीति न्यायात्। तुल्यबलत्वे च शब्दस्यावधारणास्यान्यपरत्वमेव न्याय्यम्। एवमप्यविरोध इत्यभ्युपगम्य वदन् ज्ञानमात्रमेवास्य स्वरूपं नान्यत्किञ्चिदस्तीत्ययमर्थो 'विज्ञानघन एवे'त्यादिभिर्न प्रतिपाद्यत इति मन्यते। कस्तर्हि 'विज्ञानघन एवे'त्यवधारणस्यार्थः। कृत्स्नोऽप्यात्मा जडव्यावृत्तः स्वप्रकाशो, नान्यायत्तप्रकाशः स्वल्पोऽपि प्र[3]देशोऽस्तीत्ययमर्थो वाक्यादेव सुव्यक्तः, "स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवे"ति। न चैवं प्रत्यगात्मनो धर्मिस्वरूपस्य कृत्स्नस्य विज्ञानघनत्वेऽप्यपहतपाप्मत्वसत्यसङ्कल्पत्वादिधर्मसम्बन्धो वाक्यान्तरावगतो[4] विरुध्यते, यथा सैन्धवघनस्य कृत्स्नस्य रसघनत्वे रसनेन्द्रियावगते चक्षुराद्यवगताः रूपकाठिन्यादयो न विरुध्यन्ते। इदमत्र[5] वाक्यतात्पर्यम्—यथा रसवत्त्वाम्रफलादिषु त्वगादिप्रदेशभेदेन रसभेदे[6] सत्यपि सैन्धवघ-

---

१ कप्रत्ययो नास्ति। २ परीति नास्ति प्र०।
३ प्रेति नास्ति प्र०। ४ ०न्तरानुगत इति प्र०।
५ इदमत्रेति प्र०। ६ ०प्रदेशभेदेन रसभेदेन रसभेदे-इति प्र०।

तस्य सर्वत्रैकरसत्वम्, तथाऽऽत्मनोऽपि सर्वत्र विज्ञानस्वरूपत्वम्, स्वप्रकाशस्वरूपत्वमित्यर्थः ॥

ब्राह्माधिकरणं समाप्तम् ॥ ३ ॥

अथ संकल्पाधिकरणम् ४ । **सङ्कल्पादेव* तच्छ्रुतेः ॥ ८ ॥**

मुक्तः परं ब्रह्मोपसम्पद्य ज्ञानस्वरूपोऽपहतपाप्मत्वादिसत्यसङ्कल्पत्वपर्यन्तगुणक आविर्भवतीत्युक्तम् । तमधिकृत्य तस्य सत्य[1]सङ्कल्पत्वप्रयुक्ता व्यवहाराश्च श्रूयन्ते—"स तत्र पर्य्येति जक्षत्[2] क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वे"ति । किमस्य ज्ञात्यादिप्राप्तिः प्रयत्नान्तरसापेक्षेत परमपुरुषस्यैव[3] सङ्कल्पमात्रादेव भवतीति विशये लोके राजादीनां सत्यसङ्कल्पत्वेन व्यवह्रियमाणानां कार्य्यनिष्पादने प्रयत्नान्तरसापेक्षत्वदर्शनादस्यापि तत्सापेक्षेति प्राप्त उच्यते—

'सङ्कल्पादेवे'ति । कुतः । 'तच्छ्रुतेः', "स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ती"ति हि सङ्कल्पादेवास्य पित्रादीनां समुत्थानं श्रूयते । न च प्रयत्नान्तरव्यपेक्षत्वाभिधायि श्रुत्यन्तरं दृश्यते, येनास्य सङ्कल्पादेवेत्यवधारणस्य 'विज्ञानघन एवे'तिवद् व्यवस्थापनं क्रियेत[4] ।

अत एव चानन्याधिपतिः ॥ ९ ॥

यतो, मुक्तः सत्यसङ्कल्पः, अत एवानन्याधिपतिश्च । अन्याधिपतित्वं हि विधिनिषेधयोग्यत्वम् । विधिनिषेधयोग्यत्वे हि प्रतिहतसङ्कल्पत्वं भवेत् । अतः सत्यसङ्कल्पत्वश्रुत्यैवानन्याधिपतित्वं च सिद्धम् । अत एव "स स्वराड् भवती"त्युच्यते ॥

संकल्पाधिकरणं समाप्तम् ॥ ४ ॥

---

* तुशब्दरहितएव सूत्रपाठः सर्वपु० ।

1 सत्येति मु० पु० नास्ति ।

2 यच्छ्रिति प्र० ऽत्र शोधितम्, सर्वं तु प्रामादिकम् ।

3 ०स्यैवेति प्र० । 4 क्रियते-इति प्रायः ।

अभावाधिकरणम् ५। **अभावं बादरिराह ह्येवम् ॥ १० ॥**

किं मुक्तस्य देहेन्द्रियाणि न सन्त्युत सन्ति, अथ वा यथासङ्कल्पं सन्ति न सन्ति चेति विशये शरीरेन्द्रियाणामभावं बादरिराचार्यो मन्यते। कुतः। 'आह ह्येवम्', "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत" इति शरीरसम्बन्धे सुख[1]दुःखस्यावर्जनीयत्वमभिधाया "स्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत" इति मुक्तस्याशरीरत्वं ह्याह श्रुतिः॥

भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥

मुक्तस्य शरीरेन्द्रियभावं[2] जैमिनिराचार्यो मन्यते। कुतः। 'विकल्पामननात्,' विविधः कल्पो विकल्पः,[3] वैविध्यमित्यर्थः। "स एकधा भवति त्रिधा भवति पञ्चधा भवति सप्तधे"त्यादिश्रुतेः। आत्मन एकस्याच्छेद्यस्यानेकधाभावासम्भवात्त्रिधाभावादयः शरीरनिबन्धना इत्यवगम्यते। अशरीरत्व[4]वचनं तु कर्मनिमित्तशरीराभावपरम्। तदेव हि शरीरं प्रियाप्रिय[5]हेतुः॥

भगवांस्तु बादरायणः स्वमतेन सिद्धान्तमाह—

द्वादशाहवदुभयविधं बादरायणोऽतः ॥ १२ ॥

सङ्कल्पादेवेत्येत'दतः'-शब्देन परामृश्यते। अत एव सङ्कल्पादुभयविधं सशरीरमशरीरं च मुक्तं भगवान्बादरायणो मन्यते। एवं चोभयी श्रुति[6]रुपपद्यते। 'द्वादशाहवत्,' यथा[7] "द्वादशाहमृद्धिकामा उपेयुः" "द्वादशाहेन प्रजाकामं याजये"दित्युपैतियजतिचोदनाभ्यां सङ्कल्पभेदेन सत्त्रमहीनश्च भवति।

---

१ सुखेति प्र० नास्ति। २ ०न्द्रियादिभावमिति प्र०।
३ विकल्प इति नास्ति प्र०। ४ त्वेति नास्ति प्र०।
५ शरीरमप्रियेति प्र०। ६ ०भयविधश्रुतिरिति प्र०।
७ द्वादशाहेनेति प्र०ऽधिकम्।

Digitized by Google

[1]वारयित्वा तु तमृषिमाश्रमादभिनिर्गतम् ।
ततः सन्दर्शने तस्थुर्ऋषिपुत्रान्तिके पुनः ॥ १२ ॥
[2]चित्रं संक्रीड़मानास्ताः क्रीड़नैर्विविधैस्तथा ।
कन्दुकैश्चापि गायन्त्यः क्रीडन्त्यः प्लुतवल्गितैः ॥ १३ ॥
मदविह्वलिताः काश्चित् प्रपतन्त्युत्पतन्ति च ।
नयनभ्रूविकारैश्च हस्तैरम्बुजसन्निभैः ॥ १४ ॥
संज्ञाश्च ताः प्रकुर्व्वन्त्यः पुंसां हर्षविवर्द्धनाः ।
नूपुराणिञ्जितरवैः कोकिलाभिरुतेन च ॥ १५ ॥
गन्धर्वनगरप्रख्यं प्रगीतमिव तद्वनम् ।
धूयमानैश्च वासोभिः स्वर्णैरङ्गदभूषणैः ॥ १६ ॥
परस्परं विनिघ्नन्त्यः शोभन्ते ललितेन च ।
सौगन्धिकेन माल्येन चूर्णैश्च सुसुगन्धिभिः ॥ १७ ॥
कामसञ्जननार्थाय ऋषिपुत्रस्य धीमतः ।
सर्व्वतः प्रकिरन्ति स्म ललमाना वराङ्गनाः ॥ १८ ॥
अभूतपूर्वं तद्दृष्ट्वा विस्मितः साध्वसङ्गतः ।
दृष्ट्वैव [3]च स चार्वङ्गीस्तास्तदा तनुमध्यमाः ॥ १९ ॥
निश्चक्रामाश्रमात्तूर्णमृष्यशृङ्गऋषेः सुतः ।
न तेन जन्मप्रभृति दृष्टपूर्वास्तथाविधाः ॥ २० ॥

1. G. 12. वारयित्वा &c. For this Sl. B. 10. ततः कदाचित्तं देशमाजगाम यदृच्छया । विभाण्डकसुतस्तत्र तस्याश्रमपदं वराङ्गनाः ॥ 2. this and the following 18 lines are wanting in B. 3. G. 19. चारुसर्वाङ्गी &c.; P. has च स चार्वङ्गी &c., and च सुचार्वङ्गी &c., as alternatives.

[1]नार्यो वा पुरुषा[2]श्चान्ये पुरराष्ट्रनिवासिनः ।
स तं देशमुपागम्य जातकौतूहलस्तदा ॥ २१ ॥
विभाण्डकसुतो राजंस्तस्थौ परमविस्मितः ।
[3]ताश्च तं विस्मितं दृष्ट्वा जगुः कलपदाक्षरम् ॥ २२ ॥
गीतं मधुरभाषिण्यो जहसुश्चायतेक्षणाः ।
अब्रुवं[4]श्चैवमभ्यासमागत्य मदविह्वलाः ॥ २३ ॥
[5]कोऽसि कस्य सुतश्च त्वं त्वरावान् समुपागतः ।
एकश्च विजने ऽरण्ये [6]कस्मात्त्वमसि शंस नः ॥ २४ ॥
ज्ञातुं त्वां वयमिच्छामस्तत्त्वमाचक्ष्व नः प्रभो ।
[7]अदृष्टपूर्वास्ता दृष्ट्वा कामरूपास्ततः स्त्रियः ॥ २५ ॥
ऋषिपुत्रस्तदात्मानमाख्यातुमुपचक्रमे ।
[8]पिता विभाण्डको नाम महर्षिः [9]काश्यपोत्तमः ॥ २६ ॥
[10]तस्याहमौरसः पुत्त्र ऋष्यशृङ्ग इति श्रुतः ।

1. P. has स्त्रियो वा &c, 2. G. 21. वान्ये (a better reading). 3. For this line, and the following Shloka B. 11. ताश्चित्रवेषाः प्रमदा गायन्त्यो मधुरस्वरं । ऋषिपुत्रमुपागम्य सर्वा वचनमब्रुवन् ॥ 4. G. 23 श्चैनम् &c. 5. For this Sl. and the 1st line of the next Sl. B. 12. कस्त्वं किं वर्तसे ब्रह्मन् ज्ञातुमिच्छामहे वयं । एकस्त्वं विजने दूरे वने चरसि शंस नः ॥ 6. G. 24 कस्माच्चरसि &c. 7. For this and the following line B. 13. अदृष्टरूपास्तास्तेन काम्यरूपा वने स्त्रियः । हार्दात्तस्य मतिर्जाता आख्यातुं पितरं स्वकम् ॥ 8. For this, and the following line B. 14. पिता विभाण्डकोऽस्माकं तस्याहं सुत औरसः । ऋष्यशृङ्ग इति ख्यातं नाम कर्म च मे भुवि ॥ 9. G 26. काश्यपो मम. P. has काश्यपोत्तमः and काश्यपोपमः as alternatives. 10. Between the two lines of this Sl. G. has the following two lines, which, however, are wanting in P.—यूयं किमर्थमायातास्त्वरावन्तो ममाश्रमं ॥ किञ्च वः क्रियतां कार्यं चिरं शंसितुमर्हथ ॥

[1]आश्रमोऽयमिहास्माकं स्वादुमूलफलान्वितः ॥ २७ ॥
करिष्ये तत्र पूजां वः सर्वेषामभिगम्यताम् ।
[2]ऋषिपुत्रवचः श्रुत्वा तासां [3]मतिरजायत ॥ २८ ॥
तदाश्रमपदं द्रष्टुं प्रजग्मुः सहितास्ततः ।
[4]तासां पूजा[5]न्तदा चक्रे ऋष्यशृङ्ग ऋषेः सुतः ॥ २९ ॥
पाद्यार्घासनदानेन स्वादुमूलफलेन च ।
[6]प्रतिगृह्य तु तां पूजां सर्वास्ताः परिशङ्किताः ॥ ३० ॥
ऋषेः शापभयोद्विग्ना गमनाय [7]मतिन्दधुः ।
[8]ऊचुश्चैनं सुमधुरं ता हसन्त्य इदं वचः ॥ ३१ ॥
अस्माकमप्यृषेः पुत्र स्वादूनीमानि भक्षय ।
फलान्याश्रमजातानि यदि ते रोचते ऽनघ ॥ ३२ ॥
[9]अथास्मै प्रददुः स्वादून् मोदकान् फलसन्निभान् ।

1. For this, and the following line B. 15. इहाश्रमपदेऽस्माकं समीपे शुभदर्शनाः । करिष्ये वोऽत्र पूजां वै सर्वेषां विधिपूर्वकं ॥ 2. For this, and the following line B. 16 ऋषिपुत्रवचः श्रुत्वा सर्वासां मतिरास वै । तदाश्रमपदं द्रष्टुं जग्मुः [a]सर्वास्ततोऽङ्गनाः ॥ (a) V has सर्वाश्च तेन हि । 3. G. 29. रतिरजायत; but P. has मतिरजायत. 4. G. 30. has चासां for तासां, but P. has तासां । For this and the following line B. 17. [b]गतानां तु ततः पूजामृषिपुत्रश्चकार ह । इदमर्घ्यमिदं पाद्यमिदं मूलं फलं च नः ॥ (b) V. has चाम. तानां &c. 5. G. ततः &c. 6. For this and the following line. B. 18. प्रतिगृह्य तु तां पूजां सर्वा एव समुत्सुकाः । ऋषेर्भीताश्च [c]शीघ्रं तु गमनाय मतिं दधुः ॥ (c). V. has ताः शीघ्रं &c. 7. G. 32. मनोदधुः; but P. has मतिन्दधुः 8. For this line and the following Sl. B. 19. अस्माकमपि मुख्यानि फलानीमानि [d]हे द्विज । गृहाण विप्र भद्रन्ते भक्षयस्व च माचिरं ॥ (d) V. has वै for हे ॥ 9. For this, and the following two Shlokas, B. 20. ततस्तास्तं समालिंग्य सर्वा हर्षसमन्विताः । मोदकान्प्रददुस्तस्मै भक्ष्यांश्च विविधान् शुभान् ॥

Digitized by Google

अन्यांश्च विविधान् [1]भोग्यान् मधूनि मधुराणि च ॥३३॥
तीर्थोदकमिदन्तावत् पीयतामिति [2]भूपते ।
परिषस्वजिरे चैनं हसन्त्यो मदविह्वलाः ॥ ३४ ॥
परिपस्पृशिरे चैनं पीनैरुरसिजैर्मुहुः ।
श्रोत्रमूले चोपजेपुर्वदनैर्मधुगन्धिभिः ॥ ३५ ॥
[3]सोऽमन्यत फलानीति मोदकां[4]स्तान् सुवर्तितान् ।
भक्ष्यां[5]श्चान्यांश्च विविधान् फलाकारान् सुयोजितान् ॥ ३६ ॥
अनास्वादितपूर्वाणि फलान्यास्वाद्य तानि सः ।
मधूनि च सुगन्धीनि पीत्वा प्रमुदितोऽभवत् ॥ ३७ ॥
सुकुमारैश्च तैरङ्गैस्ताभिः स्पृष्टो व्यमुह्यत ।
स्पृहयामास तासाञ्च स्पर्शस्य ललितस्य च ॥ ३८ ॥
[6]अथापृच्छ्य मुनेः पुत्रन्ताः स्त्रियः प्रययु[7]स्ततः ।
स्वमाश्रमपदं नाम व्यपदिश्य विदूरतः ॥ ३९ ॥
[8]तासु प्रतिगतास्वेव ऋष्यशृङ्गः समुत्सुकः ।
तद्गतेनैव मनसा न निद्रामध्यगच्छत ॥ ४० ॥

1. G. 34. भक्ष्यान् &c. 2. G. 35. सुव्रत; P. has भूपते and सुव्रत as alternatives. 3. For this and the following two Shlokas B. 21—तानि चास्वाद्य तेजस्वी फलानीति स्म मन्यते । अनास्वादितपूर्वाणि वने नित्यनिवासिनाम् ॥ 4. G. 37. इव &c., but P. has स्तान् &c. 5. G. भक्ष्यांश्चान्यान् &c 6. For this Sl. B. 22. आपृच्छ्य च तदा विप्रं व्रतचर्यां निवेद्य च । गच्छन्ति स्मापदेशात्ता भीतास्तस्य पितुः स्त्रियः ॥ 7. P. स्तदा. 8. For this Sl. B. गतासु तासु सर्वासु काश्यपस्यात्मजो द्विजः । अस्वस्थहृदयश्चासीद्दुःखाच्च परिवर्तते ॥

[1]अथाजगाम भगवान् काश्यपः स्वं निवेशनम् ।
ध्यायमान[2]स्तु तं दृष्ट्वा ऋष्यशृङ्गं समुत्सुकम् ॥ ४१ ॥
पप्रच्छ काश्यपः पुत्रं कस्मान्मां नाभिनन्दसि ।
चिन्तासागरमध्यस्थमद्य त्वां तात लक्षये ॥ ४२ ॥
नहीदृशं तापसानां रूपं भवति कर्हिचित् ।
शीघ्रमाचक्ष्व मे [3]तात किमिदं वैकृतं कृतम् ॥ ४३ ॥
एवमुक्तः काश्यपेन प्रोवाच पितरं तदा ।
भगवन्निह मे दृष्टाः [4]पुरुषाः साधुलोचनाः ॥ ४४ ॥
सुकुमारैरुरसिजैः पीनैरत्यद्भुतोपमैः ।
परिपस्पृशिरे मां च गाढमालिङ्ग्य सर्वशः ॥ ४५ ॥
गायन्ति सुकुमाराणि मनोज्ञानि मुहुर्मुहुः ।
क्रीड़न्ति चाद्भुताकारैर्नयनभ्रूविचेष्टितैः ॥ ४६ ॥
अब्रवीद् भगवाञ्छ्रुत्वा ऋष्यशृङ्गवचस्तदा ।
[5]रक्षांस्येतेन रूपेण तपसो नाशनाय वै ॥ ४७ ॥
विश्रम्भस्ते न कर्त्तव्यस्तेषु पुत्र कथञ्चन ।
एवमुक्त्वा ऋष्यशृङ्गं समाश्वास्य च काश्यपः ॥ ४८ ॥
उषित्वा रजनीमेकामरण्यं स जगामह ।
[6]अथापरेद्युस्तं देशमाजगाम [7]पुनः स्मरन् ॥ ४९ ॥

1. This, and the following 16 lines are wanting in B. 2. G. 42. ध्य &c. 3. G. 44. पुत्र &c. 4. G. 45. तापसाः शुभलोचनाः; but P. agrees with our text. 5. G. 48 रक्षांसि तेन &c. but P. has रक्षांस्येतेन &c.
6. For this line B. 24. ततोऽपरेद्युस्तं देशमाजगाम स वीर्यवान् । विभाण्डकसुतः धीमान्मनसा चिन्तयन्मुहुः ॥ 7. G. 50. पुनस्स्मरन् ।

[1]मनोज्ञरूपास्ता यत्र दृष्टा वै चारुमध्यमाः ।
ताश्च दृष्ट्वैव दूरात्तमायान्तं काश्यपात्मजम् ॥ ५० ॥
[2]प्रत्युद्गम्याब्रुवन् वाक्यं प्रहृष्टास्त इदं तदा ।
एह्याश्रमपदं रम्यं पश्यास्माक[3]मिदं प्रभो ॥ ५१ ॥
[4]तत्र पूजामवा[5]प्याग्र्यां पुनरभ्यागमिष्यसि ।
[6]श्रुत्वैव चैतद्वचनं तासामतिमनोरमम् ॥ ५२ ॥
गमनाय मतिं चक्रे ताश्चैनं निन्युरङ्गनाः ।
[7]आनीयमान एवाथ तस्मिन्नृषिसुते [8]ततः ॥ ५३ ॥
प्रववर्ष तदा देवस्तस्य राष्ट्रे महीपतेः ।
[9]विभाण्डकश्च [10]विप्रर्षिराजगाम स्वमालयम् ॥ ५४ ॥
[11]रम्यं मूलफलं प्राप्य भारार्त्तः [12]सोऽविशत्तदा ।
शून्यमावसथं दृष्ट्वा पुत्रदर्शनलालसः ॥ ५५ ॥

---

1. For this Sl. B. 25. मनोज्ञा यत्र ता दृष्टा आरमुख्याः स्वलङ्कृताः । दृष्ट्वैव च ततो विप्रमायान्तं हृष्टमानसाः ॥ 2. For this Sl. B. 26. उपसृत्य ततः सर्वास्तास्तमूचुरिदं वचः । एह्याश्रमपदं सौम्य अस्माकमिति चाब्रुवन् ॥ 3. G. 52 ...मपि &c. 4. Before this Sl. B. 27 reads—चित्राण्यत्र बहूनि स्युर्मूलानि च फलानि च । तत्राप्यत्र (a) विशेषेण विधिर्हि भविता ध्रुवम् ॥ a. V. has विधिः योमन् विशेषेण भविष्यति ॥ For Sl. 52. and the 1st line of 53. of our text B. 28. श्रुत्वा तु वचनं तासां सर्वासां हृदयङ्गमं । गमनाय मतिं चक्रे तं च निन्युस्तथा स्त्रियः ॥ 5. G. 53. ...प्याग्र्यां &c. 6. For this line G. 53 श्रुत्वैतद्वचनं तासां स्त्रीणामतिमनोहरं । 7. For this, and the following line B. 29. तत्र चानीयमाने तु विप्रे तस्मिन्महात्मनि । ववर्ष सहसा देवो जगत् प्रह्लादयंस्तदा ॥ 8. P. तथा. 9. This and the following 17 lines are wanting in B. 10. P. has विप्रर्षि and ब्रह्मर्षि as alternatives. 11. G. 56 वन्यं &c.; P. वन्य &c. 12. G. विस्मयन् तदा; but P. has सोऽविशत्तदा.

परिश्रान्तस्तथैवासावकृत्वा पादधावनम् ।
चुक्रोश ऋष्यशृङ्गेति सर्वतः [1]प्रविलोकयन् ॥ ५६ ॥
[2]नचापश्यत् सुतन्तत्र काश्यपो भगवानृषिः ।
ग्रामाँश्च [3]पथि पप्रच्छ गोकुलानि [4]च सर्वशः ॥ ५७ ॥
कस्यैष विषयः सौम्यो ग्रामाश्च बहुगोकुलाः ।
ऋषेर्वचन[5]मादाय सर्वे ते गोषु जीविनः ॥ ५८ ॥
कृताञ्जलिपुटा भूत्वा विनयेन चचक्षिरे ।
अङ्गेषु प्रथितो राजा लोमपाद इति [6]स्मृतः ॥ ५९ ॥
तेनाभिसृष्टा विप्रर्षे ग्रामा ह्येते सगोकुलाः ।
पूजार्थमृष्यशृङ्गस्य विभाण्डकसुतस्य वै ॥ ६० ॥
एवमुक्तस्तु [7]विप्रर्षिर्दृष्ट्वा वै ध्यानचक्षुषा ।
[8]भविष्यमेतज्ज्ञात्वा च प्रीतात्मा स न्यवर्तत ॥ ६१ ॥
ऋषिपुत्रोऽपि धर्मात्मा [9]नौयानं वरमास्थितः ।
मेघनादेन महता कृत्वा सतिमिरन्नभः ॥ ६२ ॥
[10]महाजलौघवर्षेण राजधानीमुपाययौ ।

---

1. P. स &c. 2. Between the two lines of this Sl. G. has the line निष्क्रम्य च वनात्तस्माद् ग्रामं ददर्श काश्यपः ॥, and P has the Sl. निजाश्रमाद्विचक्राम तदान्वेष्टुं सुतन्ततः । निष्क्रम्य च वनात्तस्माद्ग्रामं ददर्श काश्यपः ॥ 3 G. 59. परि &c. 4. G. समन्ततः. 5. G. 60. ... मादाय &c. 6. G. 61. श्रुतः. 7. G. 62. स ऋषि &c. but P. has विप्रर्षि &c. 8. G. 63 भविष्यमेवं तज्ज्ञात्वा &c., but P. agrees with our text. 9. G. 63. नौयानवर &c. 10. Between the two lines of this Sl. P. has the Sl. वर्षामतकल्पेन विषये तस्य भूपतेः । प्रावर्षत तदा देवस्तस्य राष्ट्रेषु भूपतेः ॥

[1]वर्षेणैवागतं क्षिप्रं [2]स महात्मा नराधिप ॥ ६३ ॥
प्रत्युद्गम्यार्घयाञ्चक्रे शिरसा च महीं ययौ ।
[3]अर्घञ्च प्रददावस्मै पुरस्कृत्य पुरोहितम् ॥ ६४ ॥
सान्तःपुरजन[4]श्चैनं प्रपेदे सान्त्वयन्निव ।
महार्हैश्चेप्सितैर्भोगैर्युयोजैनं प्रसादयन् ॥ ६५ ॥
स्वयं चोपचचारैनं [5]मन्युर्मास्य भवेदिति ।
[6]ददौ कन्यान्तदा चास्मै भार्यां कमललोचनाम् ॥ ६६ ॥
शान्तां शान्तेन मनसा दत्त्वा हर्षमवाप च ।
एवं स न्यवसत्तत्र [7]तेन राज्ञाभिपूजितः ॥ ६७ ॥
ऋष्यशृङ्गो महातेजाः शान्तया सहभार्यया ।
[8]सर्वमेतदशेषेण श्रुत्वा ब्रह्मर्षिसत्तमः ॥ ६८ ॥
विभाण्डको महातेजा गतमन्युर्द्विजोत्तमः ।
जगाम तपसे धीमान् पुनरेवाश्रमं प्रति ॥ ६९ ॥

इति रामायणे ऋष्यशृङ्गोपाख्यानम् ।

1. For this and the following line B. 30. वर्षेणैवागतं विप्रं (a) तापसं स नराधिपः । प्रत्युद्गम्य मुनिं प्रह्वः शिरसा च महीं गतः ॥ (a) V. has विबधं स &c. 2. G. 65. स हि मत्वा &c. 3. For this and the following 3 lines B. 31 अर्घ्यं च प्रददौ तस्मै न्यायतः सुसमाहितः । वव्रे प्रसादं विप्रेन्द्रान् (a) मा विप्रं मन्युराविशेत् ॥ a. V. has न विप्रं &c. 4. P. ...स्तेव &c 5. G. 67. मन्युर्मा-स्येह भूदिति; but P. agrees with our text. 6. G. 68. ददौ चास्मै तदा कन्यां &c. but P. agrees with our text. For this, and the following line, B. 32. अन्तःपुरं प्रवेश्यास्मै कन्यां दत्त्वा यथाविधि । शान्तां शान्तेन मनसा राजा हर्षमवाप सः । 7. B. 33. सर्वकामैः सुपूजितः-The 2nd line of B. 33. agrees with the next line in our text. 8. this line and the following Sloka are wanting in G. as well as B. P. has the first line-and

X

[1]भूय एव महाराज शृणु मे [2]ऽवहितो वचः ।
सनत्कुमाराद्[3]गदतः श्रुतं मे वचनं यथा ॥ १ ॥
[4]इक्ष्वाकुवंशजो राजा भविष्यति महायशाः ।
नाम्ना दशरथो नाम धीमान् सत्यपराक्रमः ॥ २ ॥
[5]सख्यं [6]तस्याङ्गराजेन भविष्यति महात्मनः ।
कन्या तस्य महाभागा शान्ता नाम भविष्यति ॥ ३ ॥
[7]अङ्गराजोऽनपत्यस्तु लोमपादो भविष्यति ।
स राजानं दशरथं प्रार्थयिष्यति भूमिपः ॥ ४ ॥
[8]अनपत्याय मे कन्यां सखे दातुं त्वमर्हसि ।
[9]सकन्या पुत्रिकाहेतोर्वरयेस्त्वां [10]प्रसीद मे ॥ ५ ॥
[11]शान्तां शान्तेन मनसा [12]पुत्रार्थे वरवर्णिनीम् ।

---

the space for the 2nd and half. the 3rd line is worm-eaten; the 2nd hall of the 3rd line is. सुप्रीतेनान्तरात्मना. 1. For this Sl. B. XI. 1. भूय एव(a)हि राजेन्द्र शृणु मे वचनं हितं । यथा स देवप्रवरः (b) कथयामास बुद्धिमान् ॥ (a) V. has च &c. (b) V. has कथायामेवमब्रवीत् ॥ 2. G. 1. सुहितं वचः, but P. agrees with our text. 3. G....वदतः &c. 4. For this Sl. B. 2. इक्ष्वाकूणां कुले जातो भविष्यति सुधार्मिकः । नाम्ना दशरथो राजा श्रीमान् सत्य(a)प्रतिश्रवः ॥ (a) V. & S. have प्रतिश्रवाः. 5. For this Sl. B. 3. अङ्गराजेन सख्यं च तस्य राज्ञो भविष्यति । कन्या चास्य महाभागा शान्ता नाम भविष्यति ॥ 6. P. has तेनाङ्ग &c. 7. For this Sl. B. 4. पुत्रस्त्वङ्गस्य राज्ञस्तु रोमपाद इति श्रुतः । तं स राजा दशरथो गमिष्यति महायशाः ॥ 8. For this Sl. B. 5. अनपत्योऽस्मि धर्मात्मन् शान्ताभर्ता मम क्रतुं । आहरेत त्वयाज्ञप्तः सन्तानार्थं कुलस्य च ॥ 9. This line is wanting in G., but P. has it. 10. P. प्रसादये. 11. For this Sl. and the 1st line of the next Sl. B. 6. श्रुत्वा राज्ञोऽथ तद्वाक्यं मनसा च विचिन्त्य च । प्रदास्यते पुत्रवन्तं शान्ताभर्तारमात्मवान् ॥ 12. G. 5. पुत्रार्थं &c.

Digitized by Google

श्रुत्वा दशरथो वाक्यं प्रकृत्या करुणात्मकः ॥ ६ ॥
दास्यते तां तदा कन्यां शान्तामङ्गाधिपाय सः ।
[1]प्रतिगृह्य तु तां कन्यां स राजा विगतज्वरः ॥ ७ ॥
स्वपुरं यास्यति प्रीतः कृतार्थेनान्तरात्मना ।
तां कन्यामृष्यशृङ्गाय प्रदास्यति स पार्थिवः ॥ ८ ॥
ऋष्यशृङ्गोऽपि च प्रीतो लब्ध्वा भार्यां भविष्यति ।
तञ्च राजा दशरथो [2]यष्टुकामः कृताञ्जलिः ॥ ९ ॥
ऋष्यशृङ्गं द्विजश्रेष्ठं वरयिष्यति धर्मवित् ।
यज्ञार्थं प्रसवार्थं च स्वर्गार्थञ्च नरेश्वरः ॥ १० ॥
[3]लप्स्यते स तु तं काममृषिपुत्रान्नराधिपः ।
पुत्राश्चास्य भविष्यन्ति चत्वारोऽमित[4]तेजसः ॥ ११ ॥
[5]कुल[6]कीर्त्तियशोमानधर्मसन्तानवर्द्धनाः ।
[7]एवं स देवर्षिवरो भविष्यमिदमुक्तवान् ॥ १२ ॥
सनत्कुमारो भगवान् पुरा मुनिसमागमे ।
[8]स त्वं नृपतिशार्दूल [9]समानयितुमर्हसि ॥ १३ ॥

---

1. For this, and the following 3 lines B. 7. प्रतिगृह्य च तं विप्रं स राजा विगतज्वरः । आहरिष्यति तं यज्ञं प्रहृष्टेनान्तरात्मना ॥ 2. B. 8. यज्ञकामः &c. 3. B. 9. For this line लभते च स तं कामं द्विजमुख्याद् विशांपतिः । G. 10 लप्स्यते च स तं काममृषिपुत्राद् विशांपतिः ॥ P. लप्स्यते स ततः काममृषिपुत्रान्नरे-श्वरः ॥ 4. B. 10 ...विक्रमाः 5. B. 10 for this line, वंशप्रतिष्ठानकराः सर्वभूतेषु विश्रुताः ॥ 6. P. शील &c. 7. For this, and the following line. B. 11. एवं स देवप्रवरः पूर्वं कथितवान् कथां । सनत्कुमारो भगवान् पुरा देवयुगे प्रभुः ॥ 8. For this and the following line. B. 12. स त्वं पुरुषशार्दूल समानय सुसत्कृतं । स्वयमेव महाराज गत्वा सबलवाहनः ॥ 9. G. 13. समाने-तुमिहार्हसि, but P. agrees with our text.

विभाण्डकसुतं गत्वा वरयिष्वात्मनो गुरुम् ।
[1]इति श्रुत्वा दशरथः सुमन्त्रस्य सुमन्त्रितम् ॥ १४ ॥
[2]स वसिष्ठमुपागम्य ततो वचनमब्रवीत् ।
सुमन्त्रोऽयं वदत्येवमनुज्ञान्दातुमर्हसि ॥ १५ ॥
वसिष्ठोऽपि च तच्छ्रुत्वा तथेति प्रत्यपद्यत ।
सोऽनुज्ञातो वसिष्ठेन राजा सुप्रीतमानसः ॥ १६ ॥
सुमन्त्रवचनात् तूर्णं प्रयातुमुपचक्रमे ।
ऋष्यशृङ्गं वरयितुं सामात्यः सपुरोहितः ॥ १७ ॥
[3]सान्तःपुरजनश्चैव यत्राऽसौ द्विजसत्तमः ।
[4]अतीत्य विविधान् देशान् राजा नातिचिरेण सः॥१८॥
[5]लोमपादपुरीं [6]श्रीमान् प्रविवेशाभिपूजितः ।
तत्राससाद [7]राजा स लोमपादनिवेशने ॥ १९ ॥
[8]ऋषिपुत्रं दशरथो दीप्यमानमिवानलम् ।

---

1. For this line, and the following 4 Slokas, B. 13-14. सुमन्त्रस्य वचः श्रुत्वा (a) हृष्टो दशरथोऽभवत् । अनुमान्य वसिष्ठं च (b) सूतवाक्यं निशाम्य च ॥ सान्तःपुरः सहामात्यः प्रययौ यत्र स द्विजः । वनानि सरितश्चैव व्यतिक्रम्य शनैः शनैः ॥ (a) V. प्रहृष्टो &c. (b) S. तच्च &c. 2. G. 14. वसिष्ठमुपगम्यैनमिदं &c.; P. वसिष्ठमुपगम्येदं ततो &c. 3. Between the two lines of this Sl. P. has the line. वनानि सरितश्चैव व्यतिक्रम्य शनैः शनैः ॥ 4. G. 18. सोऽतीत्य &c., but P. has अतीत्य &c. 5. For this Sl. B. 15. अभिचक्राम तं देशं यत्र वै मुनिपुङ्गवः । आसाद्य तं द्विजश्रेष्ठं रोमपादसमीपगं ॥ 6. G. 18. रम्यां &c., but P. has श्रीमान् &c. 7. G. 19. वै राजा &c.; but P. has राजा स &c. 8. For this and the following Sl. B. 16-18. ऋषिपुत्रं ददर्शाथो दीप्यमानमिवानलं । ततो राजा यथान्यायं पूजां चक्रे विशेषतः ॥ सखित्वात्तस्य वै राज्ञः प्रहृष्टेनान्तरात्मना । रोमपादेन चाख्यातमृषिपुत्राय धीमते ॥ सख्यं सम्बन्धकं चैव तदा तं प्रत्यपूजयत् । एवं सुसत्कृतस्तेन सहोषित्वा नरर्षभः ॥

ततो राजा दशरथं प्रियातिथिमुपागतम् ॥ २० ॥
पूजया प्रतिजग्राह प्रीयमाणोऽनुरूपया ।
[1]स एवं सत्कृतस्तेन वसंस्तत्र नरर्षभः ॥ २१ ॥
[2]सप्ताष्टदिवसंयावत् ततो वचनमब्रवीत् ।
शान्ता तव सुता [3]वीर सह भर्त्रा विशांपते ॥ २२ ॥
[4]मदीयनगरं यातु कार्य्यं हि [5]महदुद्यताम् ।
तथेति राजा संश्रुत्य [6]वचनं तस्य धीमतः ॥ २३ ॥
[7]ऋष्यशृङ्गाय चैवैनं न्यवेदयदनन्तरम् ।
अयं राजा दशरथः सखा मे दयितो भृशम् ॥ २४ ॥
अनेन मेऽनपत्याय दत्तेयं वरवर्णिनी ।
याचते [8]पुत्रकृत्ये च शान्ता [9]प्रियतरात्मजा ॥ २५ ॥
सोऽयं ते श्वशुरो ब्रह्मन् यथैवाहं तथा नृपः ।
शरणं त्वामनुप्राप्तः पुत्रार्थी द्विजसत्तम ॥ २६ ॥
पुत्रकाममिमं तावत् त्वं याजयितुमर्हसि ।
तारयैनमितो गत्वा शान्तया [10]भार्य्यया सह ॥ २७ ॥

---

1. This line, and the following two Shlokas are wanting in P. 2. For his line B. 19. सप्ताष्टदिवसान् राजा राजानमिदमब्रवीत् । 3. B. 19. राजन् &c. 4. B. 20. & G. 22. मदीयं &c. 5. B. & G. महदुद्यतम्. 6. B. 20. & G. 23. गमनं &c. 7. For this and the following six Shlokas B. 21-23. उवाच वचनं विप्रं गच्छ त्वं सहभार्य्यया । ऋषिपुत्रः प्रतिश्रुत्य तथेत्याह नृपं तदा ॥ स नृपेणाभ्यनुज्ञातः प्रययौ सह भार्य्यया । तावन्योन्याञ्जलिं कृत्वा स्नेहात्संश्लिष्य चोरसा ॥ ननन्दतुर्दशरथो रोमपादश्च वीर्य्यवान् । ततः सुहृदमापृच्छ्य प्रस्थितो रघुनन्दनः ॥ 8. G. 25. पुत्रकृत्याय &c., P. पुत्रकामिका &c. 9. G. प्रियतमा &c., but P. has प्रियतरा &c. 10. P. सहभार्य्यया.

ऋषिपुत्रस्तथेत्युक्त्वा तद्वाक्यसमनन्तरम् ।
तमनुज्ञाप्य नृपतिं प्रययौ सह भार्यया ॥ २८ ॥
लोमपादस्ततो राजा परिष्वज्याभिपूज्य च ।
अनुजज्ञे पुरं गन्तुं भूयो दशरथं स्वकम् ॥ २९ ॥
ततस्तेनाभ्यनुज्ञातस्तमादाय द्विजर्षभम् ।
शान्तया [1]सहितः काले प्रयातुमुपचक्रमे ॥ ३० ॥
[2]अथ राजा दशरथः पुरुषानाप्तकारिणः ।
स्वपुरं प्रेषयामास [3]प्रियाख्यानपुरस्सरम् ॥ ३१ ॥
इतः शीघ्रतरं गत्वा युष्माभिर्मम शासनात् ।
क्रियतां मे पुरं [4]शीघ्रं सर्वतः समलङ्कृतम् ॥ ३२ ॥
[5]ते हृष्टमनसो गत्वा शीघ्रं नृपतिशासनात् ।
तथा चक्रु[6]र्यथाज्ञप्तं [7]पुरे सर्वमशेषतः ॥ ३३ ॥
[8]ततः स्वलङ्कृतं राजा स्वपुरं प्रविवेश तत् ।
[9]सर्वतूर्यनिनादेन पुरस्कृत्य द्विजर्षभम् ॥ ३४ ॥

1. G. 30. सहितं &c., P. has सहितः & सहितं as alternatives. 2. For this, and the following Sloka B. 24-25. पौरेषु प्रेषयामास दूतान् वै शीघ्रगामिनः । क्रियतां नगरं सर्वं क्षिप्रमेव स्वलङ्कृतं ॥ धूपितं सिक्तसंमृष्टं पताकाभिरलङ्कृतं । 3. G. 31. प्रियाख्यानपुरःसरान्; P. has प्रियान् मुख्यान् पुरःसरान् as an alternative.. 4. G. 32. सर्वं &c, but P. has शीघ्रं &c. 5. For this Sl. B. 25-26. ततः प्रहृष्टाः पौरास्ते श्रुत्वा राजानमागतं ॥ तथा चक्रुश्च तत्सर्वं राज्ञा यत्नोदितं तदा । 6. P. has यथाज्ञप्ताः and यथाज्ञप्तं as alternatives. 7. G. 33. पुरं &c., but P. has पुरे &c. 8. For this Sl. B. 26-27. ततः स्वलङ्कृतं राज्ञा नगरं प्रविवेश ह ॥ शंखदुन्दुभिनिर्ह्रादैः (a) पुरस्कृत्वा द्विजर्षभं । (a) V. has पुरस्कृत्य &c. 9. P. has सर्व &c. and शंख &c. as alternatives.

[1]ततो मुमुदिरे पौरा दृष्ट्वा राजानमागतम् ।
सह तेनर्षिपुत्रेण ज्वलितानलवर्चसा ॥ ३५ ॥
[2]तमृष्यशृङ्गं स्वपुरं प्रवेश्य नृपतिस्ततः ।
कृतकृत्यमिवात्मानं मेने पूर्णमनोरथः ॥ ३६ ॥
[3]अन्तःपुरजनश्चापि दृष्ट्वा शान्तामुपागताम् ।
मुमुदेऽपूजयच्चैनां सह भर्त्रा विलासिनीम् ॥ ३७ ॥

[4]स पूज्यमानः परया मुदान्वितो
महर्षिपुत्रो नरदेवसद्मनि ।
उवास तस्मिन् सह शान्तया सुखी
यथा महेन्द्रस्य पुरे बृहस्पतिः ॥ ३८ ॥

इत्यादिकाण्डे रामायणे ऋष्यशृङ्गस्यायोध्यागमनम् ॥ १० ॥

XI.

[5]अथ काले व्यतिक्रान्ते शिशिरे तदनन्तरम् ।
वसन्तसमये प्राप्ते राजा यष्टुं मनो दधे ॥ १ ॥

---

1. For this Sl. B. 27-28. ततः प्रमुदिताः सर्वे दृष्ट्वा वै नागरा द्विजं । प्रवेश्यमानं सत्कृत्य नरेन्द्रेणेन्द्रकर्म्मणा । यथा दिवि सुरेन्द्रेण सहस्राक्षेण काश्यपं ॥ 2. For this Sl. B. 29. अन्तःपुरं प्रवेश्यैनं पूजां कृत्वा च शास्त्रतः । कृतकृत्यं तदात्मानं मेने तस्योपवाहनात् ॥ 3. For this Sl. B. 30. अन्तःपुराणि सर्वाणि शान्तां दृष्ट्वा तथागतां ॥ सहभर्त्रा विशालाक्षीं प्रीत्यानन्दमुपागमन् ॥ 4. For this Sl. B. 31. पूज्यमाना तु ताभिः सा राज्ञा चैव विशेषतः । उवास तत्र सुखिता कञ्चित्कालं सहद्विजा ॥ 5. B. XII. 1. for this Sl. ततः काले बहुतिथे कस्मिंश्चित्सुमनोहरे । वसन्ते समनुप्राप्ते राज्ञो यष्टुं मनोऽभवत् ॥

Digitized by Google

[1]स ऋष्यशृङ्गमभ्येत्य प्रणिपत्याभिपूज्य च ।
होतारं वरयामास यज्ञे सन्तानकारणात् ॥ २ ॥
[2]तथेति च स राजानमुक्त्वा [3]चैवाऽभ्यभाषत ।
सम्भारयाशु नृपते सम्भारान् यज्ञसाधकान् ॥ ३ ॥
सहायानपरांश्चात्र होतॄन् यज्ञे समानय ।
वशिष्ठप्रभृतीन् [4]यांश्च मन्यसेऽन्यानपि द्विजान् ॥ ४ ॥
[5]ततो राजा [6]ब्रवीदेवं सुमन्त्रममितः स्थितम् ।
शीघ्रमानय मे [7]गत्वा गुरून् सर्वानशेषतः ॥ ५ ॥
स राज [8]वचनाच्चापि सुमन्त्रस्त्वरितस्तदा ।
आनयामास होतॄंस्तान् वेदवेदाङ्गपारगान् ॥ ६ ॥

---

1. For this Sl. B. 2. ततः प्रणम्य शिरसा तं विप्रं देववर्णिनं । यज्ञाय वरयामास सन्तानार्थं कुलस्य [(a)] च ॥ (a) V. वै । 2. For this and the following Sl. B. 3–4. तथेति च स राजानमुवाच वसुधाधिपं । संभारा संभ्रियन्तां ते तुरगश्च विमुच्यतां ॥ सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयतां । 3. G. 3 भूयो &c. 4. G. 4. अन्यान् मन्यसे यानपि द्विजान्; but P. agrees with our text. 5. For this and the following two Slokas, B. 4–7 [(a)] ततो ऽब्रवीन्नृपो वाक्यं ब्राह्मणान् वेदपारगान् । सुमन्त्रावाहय क्षिप्रमृत्विजो ब्रह्मवादिनः ॥ सुयज्ञं वामदेवं च जाबालिमथ काश्यपं ॥ पुरोहितं वशिष्ठं च ये चान्ये द्विजसत्तमाः । ततः सुमन्त्रस्त्वरितं गत्वा त्वरितविक्रमः ॥ समानयत् स तान् सर्वान् समस्तान् वेदपारगान् । (a) V. has ततो राजा ब्रवीद् वाक्यं सुमन्त्रं मन्त्रिसत्तमं । &c. 6. P. ब्रवीदेतत् &c. 7. G. 5 सूत &c., but P. has गत्वा &c. Before the next Sl. of our text, G. reads the following two Slokas, which however are wanting in P :—वेदविद्याविदः स्नातान् वेदकर्म्मसु निष्ठितान् । सूत्रभाष्यविदश्चैव वेदवेदाङ्गपारगान् ॥ यज्ञमेधिनो दरिद्रान् वृद्धांश्चापि कलत्रिणः श्रोत्रियांश्च विदेशस्थान् सत्कृत्य समुपानय ॥ 8. G. 8. वचनं श्रुत्वा &c., but P. has वचनाच्चापि &c. ॥

सुयज्ञं वामदेवञ्च जाबालिमथ काश्यपम् ।
पुरोहितं वशिष्ठं च [1]तथान्यान् द्विजसत्तमान् ॥ ७ ॥
[2]तानागतान् पूजयित्वा राजा दशरथस्तदा ।
इदं धर्मार्थसहितं वचनं श्लक्ष्णमब्रवीत् ॥ ८ ॥
[3]काङ्क्षतो ह्यनुरूपा मे सन्ततिर्नोपपद्यते ।
तदर्थं वाजिमेधेन यजेयमिति मे मतिः ॥ ९ ॥
[4]तदहं यष्टुमिच्छामि हयमेधेन साम्प्रतम् ।
ऋषिपुत्रप्रसादेन भवतां चापि तेजसा ॥ १० ॥
[5]अनुगृह्णन्तु मामत्र भवन्तः शरणागतम् ।
ततः साध्विति तद्वाक्यं ब्राह्मणास्तेऽभ्यपूजयन् ॥ ११ ॥
[6]वशिष्ठःप्रमुखाः प्रीताः प्रशशंसुश्च तं नृपम् ।
ऋष्यशृङ्गपुरोगास्ते तमूचुर्नृपतिं पुनः ॥ १२ ॥
[7]सम्भाराः सम्भ्रियन्तां च [8]तुरङ्गश्च विमुच्यताम् ।

---

1. G. 9. तथा द्विजोत्तमानन्यान् &c., but P. agrees with our text. 2. For this Sl. B.—7–8. तान् पूजयित्वा धर्म्मात्मा राजा दशरथस्तदा ॥ धर्म्मार्थसहितं युक्तं श्लक्ष्णं वचनमब्रवीत् । 3. For this Sl B. 8–9. मम लालप्यमानस्य पुत्रार्थं नास्ति वै सुखं ॥ पुत्रार्थं हयमेधेन यक्ष्यामीति मतिर्मम । 4. For this Sl. B. 9-10. तदहं यष्टुमिच्छामि हयमेधेन कर्म्मणा ॥ ऋषिपुत्रप्रभावेन कामान् प्राप्स्यामि (a) चाप्यहं । (a) S. has चाप्यहं. 5. For this Sl. B. 10. ततः साध्विति तद्वाक्यं ब्राह्मणाः प्रत्यपूजयन् ॥ 6. For this Sl B. 11 वशिष्ठप्रमुखाः सर्व्वे पार्थिवस्य (a) मुखाच्च्युतं । ऋष्यशृङ्गपुरोगाश्च प्रत्यूचुर्नृपतिं (b) तदा ॥ (a) V. मुखाच्च्युतं &c. (b) V. तथा. 7. For this Sl. and the following line, B. 12 and 13. संभाराः संभ्रियन्तां ते तुरगश्च विमुच्यतां । सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयतां ॥ सर्व्वथा प्राप्स्यसे पुत्रांश्चतुरोऽमितविक्रमान् । यस्य ते धार्म्मिकी बुद्धिरियं पुत्रार्थमागता ॥ 8. G. 15. तुरगश्च &c. but P. has तुरङ्गश्च &c. ॥

Digitized by Google

चेति । अनुमितित्वस्येति । तथा च द्वितीयजन्यपदादाने सम्पूर्णलक्षणमसम्भवीत्यर्थः । तत्त्वसाक्षात्कारस्य निदिध्यासनरूपजन्यज्ञानजन्यत्वेन तत्रातिव्याप्तिरित्याह न चेति । मात्रपदं तादृशजन्यत्वाव्यभिचारित्वज्ञापनाय तस्य तत्त्वज्ञानमात्रवृत्तिसामान्यस्य, । मननस्य नियमेन शब्दविषयत्वे मानाभावादाह जातिपदमिति । तत्त्वज्ञानस्य मानसत्वेन तन्निष्ठजातेर्मानसावृत्तित्वाभावादतिव्याप्तिरित्यर्थः । अत एव जातेर्मानसावृत्तित्वविशेषणादेव, । भक्तित्वश्रद्धात्वयोर्मानसवृत्तिजातित्वादयं ममाराध्य इति भक्तेरेतस्माच्च मम फलमवश्यं भावीति निश्चयरूपश्रद्धाया विशिष्टबोधात्मिकाया विशेषणज्ञानजन्यत्वेऽपि न दोष इति । आदिना परामर्शत्वसंग्रहः । कालिकसम्बन्धेन तादृशजातिमदनुभवत्वस्य प्रत्यक्षे ऽपि सत्वात्तत्रातिप्रसङ्गभङ्गाय समवायसम्बन्धेन तादृशजातिमदनुभवत्वं वाच्यमित्यादिर्दिगर्थो बोध्य इति ॥

ननु किमिदं तत्करणमिति चेत् व्याप्तिविशिष्टपक्षधर्मताघटकलघुपदार्थज्ञानमिति गृहाण । ननु केयं व्याप्तिः न तावत्साध्यात्यन्ताभाववदवृत्तित्वम् पर्वतीयवह्न्यत्यन्ताभाववति धूमस्य सत्वात् । न च साध्यवदन्यावृत्तित्वम् वह्निमत्पर्वतान्यचत्वरवृत्तित्वाद्धूमस्य अथ साध्यवत्वावच्छिन्नप्रतियोगिकान्योन्याभाववदवृत्तित्वं विवक्षितम् न च धूमवति वह्निमत्वावच्छिन्नप्रतियोगिकान्योन्याभावो वर्तते । धूमवान्वह्निमान्नेत्यप्रतीतेरिति चेन्न । केवलान्वयिसाध्यकाव्याप्तेः ।

लक्षणविधयानुमानमुक्त्वोद्देश्यविधया ऽप्यनुमानं वक्तुमुपक्रमते नन्वित्यादिना । व्याप्तिविशिष्टेति व्याप्तिविशिष्टश्चासौ पक्षधर्मश्च

Digitized by Google

व्याप्तिविशिष्टपक्षधर्मस्तस्य भावो व्याप्तिविशिष्टपक्षधर्मता तद्घटको यो लघुपदार्थस्तज्ज्ञानमित्यर्थः । व्याप्तिपक्षधर्मतयोर्व्यावर्त्तनाय लघ्वित्युक्तं । लिङ्गकरणतावादिनिरासाय ज्ञानेत्युक्तम् । न च लाघवात्तादृशपदार्थ एव करणमस्तु किं तज्ज्ञानेनेति वाच्यम् । अतीतानागतहेतुस्थले ऽनुमित्यनुपपत्तेस्तज्ज्ञानस्य च सम्भवात् । इयं चानुमितिकरणलक्षणघटकीभूता, साध्यात्यन्ताभाववदवृत्तीति । भवति हि वन्ह्यादिसाध्यकधूमादिसद्धेताविदं लक्षणं । वन्ह्याद्यभाववति ह्रदादौ धूमादेरवृत्तेर्न भवति च धूमादिसाध्यकवन्ह्याद्यसद्धेतौ धूमाद्यभाववति तप्तायोगोलकादौ वन्हेः सत्त्वात् । वन्ह्यन्योन्याभाववति पर्वते ऽपि धूमस्य सत्त्वादत्यन्तेत्युक्तं । अत्र हेतौ साध्यसामानाधिकरण्यं बोध्यं तेन वह्निमानाकाशादित्यादौ नातिव्याप्तिः अत्र साध्याभावः साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकः साध्यतावच्छेदकतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताकश्च बोध्यः । तेन समवायेन वन्ह्यभाववति धूमस्य वृत्तित्वे ऽपि न दोषः । न च व्यधिकरणसम्बन्धं प्रतियोगितावच्छेदकतावच्छेदकीकृत्य साध्यतावच्छेदकसम्बन्धभूतसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकवन्ह्यभाववति धूमस्य सत्त्वेऽपि दोषः । वृत्तित्वमपि हेतुतावच्छेदकसम्बन्धेन बोध्यम् । तेन वन्ह्यभाववति धूमावयवे समवायेन धूमस्य वृत्तावपि न दोषः । पर्वतीयेति । यद्यपि साध्याभावः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको विवक्षितस्तदा तद्वारयितुं शक्यं तथा ऽपि कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिर्दुर्वारा न च प्रतियोगिवैयधिकरण्यमप्यभावे देयमिति वाच्यम् चाव्याप्यवृत्तिसाध्यके तादृशसाध्याभावस्याप्रसिद्ध्या वारणीयावारणात् । इह नितम्बे हुताशनो न शिखर इति प्रतीत्या संयोगेन द्रव्यस्याव्याप्यवृत्तित्वेन साध्यतावच्छेदकावच्छिन्नत्वविवक्षायामपि वन्हिमान्धूमादित्यादौ तादृशसाध्याभाववत्त्वस्य पर्वते ऽपि सत्त्वादव्याप्तिरित्यत आह नचेति । वन्ह्यादिमदन्यस्मिन्ह्रदादौ धूमादेरवृत्तित्वाल्लक्षणसमन्वयः । एवं चाव्याप्यवृत्तिसंयोगादिसाध्यकस्थले पि न दोषः । वन्हिमदिति । तथा

वाव्याप्तिरिति भावः । अथ घटान्य इत्यत्र यथा घटत्वावच्छिन्नप्रतियोगिताको भेदो बुध्यते । तथा साध्यवदन्य इत्यत्रापि साध्यवत्त्वावच्छिन्नप्रतियोगिताक एव भेदो बुध्यते । अन्यथा घटे ऽपि यत्किञ्चित्प्रतियोगिकभेदस्य सत्त्वात्साध्यवति यत्किञ्चित्प्रतियोगिकसाध्यवद्भेदस्य सत्त्वाद्घटो घटभिन्न इति साध्यवत् साध्यवद्भिन्नमिति च प्रत्ययापत्तेरित्यभिप्रायवानाह साध्यवत्त्वेति । अत्रापि हेतोर्वृत्तित्वं हेतुतावच्छेदकसंबन्धेन तेन धूमावयवे हेतोः सत्त्वेऽपि न क्षतिः । एवं च हेतुतावच्छेदकसम्बन्धेन यदधिकरणावृत्ति साध्यवत्त्वावच्छिन्नभेदवत्त्वं तत्त्वमित्यर्थे तात्पर्यं बोध्यम् । तेन जातिमान्सत्त्वादित्यादौ साध्यवत्त्वावच्छिन्नभिन्ने सामान्यादौ हेतुतावच्छेदकीभूतेन समवायेन वृत्तेरप्रसिद्ध्या ऽपि नाव्याप्तिरिति । केवलान्वयीति । वाच्यं ज्ञेयत्वादित्यादौ केवलान्वयिनि सर्वस्यैव वाच्यत्वात्तद्भिन्नाप्रसिद्ध्याऽव्याप्तेरित्यर्थः ॥

अत्र मीमांसकाः केवलान्वयिसाध्यकमनुमानमेव न क्व तावदव्याप्त्यवकाश इत्याहुस्तन्न इदं मेयत्वमनुमिनोमीत्यनुभवापलापापत्तेः न च कारणबाधाद्भ्रान्तिरियं । व्यभिचारेणैव तद्बुद्धेः कारणत्वासिद्धेः ।

अत्र मीमांसका इति । तेषामयमाशयः । प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकावच्छिन्नसामानाधिकरण्यादिरूपव्याप्तिज्ञानं न हेतुर्गौरवात् । किं तु साध्याभाववदवृत्तित्वज्ञानं साध्यवदन्यावृत्तित्वज्ञानं वा लाघवात् । एकसम्बन्धेन निखिलसाधनसाधारण्येनापि लाघवं । न च वह्न्यभाववत्संयुक्तधूमादेर्धूमावयवे परामर्शाद्वह्न्यनुमित्यापत्तिरिति वाच्यम् । येन सम्बन्धेन हेतोरवृत्तित्वं गृह्यते तेन सम्बन्धेन पक्षधर्मताज्ञानस्य कारणत्वमित्यस्य विवक्षितत्वात् । न च तथापि संयोगेन वह्न्यभाववदवृत्तित्वज्ञानात्समवायेन वह्न्यनुमि-

Digitized by Google

त्यापत्तिरिति वाच्यम् । यत्सम्बन्धावच्छिन्नसाध्याभाववति हेतोरवृत्तित्वं गृह्यते तेन सम्बन्धेन साध्यसिद्धिः फलमित्यस्य विवक्षितत्वात् । तथा च केवलान्वयित्वाग्रहदशायां मेयत्वादिसाध्यकानुमितिः । तद्ग्रहदशायां तु तत्साध्यकानुमितिलोप इति दिक् । अथ हेतुसाध्यभेदेन व्याप्तेर्भेदो भवतु वन्ह्याद्यनुमितौ वन्ह्याद्यभाववदवृत्तित्वज्ञानं केवलान्वयिनि तु हेतुसमानाधिकरणोत्यादिव्याप्तिज्ञानादनुमित्युत्पत्तौ किमनिष्टं ॥ एवं च मेयत्वमनुमीति प्रमानुमितिविषयकानुभवोप्युपपन्नः भवन्मते तदपलापापत्तेरित्याशयात्समाधत्त इह प्रमेयत्वमिति । नन्वभिमतमेव हेतुसमानाधिकरणोत्यादिकं गौरवाद्यानुमितिहेतुः किं तु साध्याभाववदवृत्तित्वज्ञानं साध्यवदन्यावृत्तित्वज्ञानं च वाच्यं ज्ञेयत्वादित्यत्र तु केवलान्वयित्व ग्रहदशायां वाच्यत्वाभाववदवृत्ति वाच्यत्ववदन्यावृत्ति वा ज्ञेयत्वमिति भ्रमरूपव्याप्तिज्ञानं हेतुस्तदा निरुक्ताभावो ऽप्युपपन्नः । इत्थमेव विशेषदर्शनकाले केवलान्वयिधर्मप्रकारकानुमितिखण्डनमेव केवलान्वयिखण्डनमिति तांचिकप्रवादोपीत्याशयवानाह न चेति । केवलान्वयित्वग्रहदशायां तत्साध्यकानुमितेर्बाधात्तादृशानुमितिविषयकप्रतीतेर्भ्रान्तित्वादित्यर्थः । अथ वा साध्याभाववदवृत्तित्वादिरूपकारणबाधादित्यर्थः । विशेषदर्शिनामपि मेयत्वमनुमिनोमीति प्रतीतेः सत्त्वान्नेयं भ्रान्तिस्तथा च साध्यवदन्यावृत्तित्वज्ञानं विनापि हेतुसमानाधिकरणोत्यादितो ऽप्यनुमितेः सत्त्वात्तद्धेतुरकारणत्वमित्याह व्यभिचारेणेति । तद्धेतुः साध्यवदन्यावृत्तित्वबुद्धिः, ।

सौगतास्तु केवलान्वयिनि साध्यवदन्यदलीकमेवासत्ख्यातिसिद्धन्तदवृत्तित्वज्ञानादेवानुमितिरित्याहुस्तन्न । असत्ख्यातेरसिद्धेः किं च ज्ञेयत्वसाध्यके इयमप्यव्याप्तिर्दुर्वारा । न ह्यलीकमज्ञेयं भवद्भिरिष्यते ।

शून्यवादिनां मतं दूषयितुमाह । सौगतास्त्विति । साध्यवदन्य-

Digitized by Google

विति । इदमुपलक्षणं । साध्यात्यन्ताभावो व्यलीक इत्यपि बोध्यम् । असत्ख्यातेरिति । आत्मख्यातिः शून्यवादिनां मते ख्यातिः प्राभाकराणां मते ऽन्यथाख्यातिर्नैयायिकानां मते ऽनिर्वचनीयख्यातिर्वेदान्तवादिनां मते तथा च शून्यवादिनां मते वाच्यं ज्ञेयत्वादित्यादौ वाच्यत्वाभावस्तद्व्यवृत्त्यसदेव ज्ञाने भासत इति तज्ज्ञानविषयताप्रसक्तेति तस्या एव नामासत्ख्यातिरित्युच्यत इति तच्च विज्ञानवादिनां मते विज्ञानात्मक एवात्मा ज्ञानव्यतिरिक्तस्य पदार्थस्याभावात् । तर्हि दृश्यमानघटादीनामपि ज्ञानत्वापत्तिरिति चेदिष्टापत्तेः । तेषां ज्ञानाकारत्वात् । तथात्मनो ज्ञानाकारत्वे क्षणिकत्वापत्तिः । इष्टापत्तेः । भावमात्रस्य क्षणिकत्वस्वीकारात् । न चात्मनो ज्ञानात्मकत्वमेवात्मख्यातिरित्युच्यत इति । तत्तुच्छं । भावानां क्षणिकत्वे तेषामनन्तध्वंसप्रागभावकल्पने गौरवात् । किं चाकाराणां ज्ञानात्मकत्वे घटात्मकाकारस्य पटाद्यात्मकत्वापत्तिः । ज्ञानभिन्नत्वे तु ज्ञानभिन्नपदार्थसिद्धिरिति संक्षेपः । प्राभाकरैः न ख्यातिरख्यातिरित्यर्थः । तथा च ज्ञानमात्रस्य यथार्थत्वादन्यथाख्यातिर्न स्वीक्रियत इति तदपि मन्दं । शुक्ताविदं रजतमिति ज्ञानस्य सर्वसम्मतत्वादन्यथाख्यातिस्वीकारात् । अन्यथा व्यधिकरणप्रकारकज्ञानस्य तन्मते ऽभावेन प्रमालक्षणे तद्वतीति विशेषणव्यावर्त्याप्रसिद्धेः । न चेदं ग्रहणस्मरणात्मकं ज्ञानद्वयमिति वाच्यम् । भ्रमस्थले विशिष्टज्ञानस्य प्रमाणसिद्धत्वात् तथाहि । रजतार्थिज्ञानजन्या शुक्तौ प्रवृत्तिः इष्टप्रवृत्तिविषयविशिष्टज्ञानसाध्या प्रवृत्तित्वात् । शुक्तौ शुक्त्यर्थिप्रवृत्तिवत् । रजतार्थिज्ञानजन्येति विशेषणांशतः सिद्धसाधनमिति वेदान्तिनां मते सदसद्भ्यां भिन्नमनिर्वचनीयं रजतमुत्पद्यत इत्यनिर्वचनीया ख्यातिः । जीवात्मनोपीश्वरात्मकत्वं तेषां पार्थक्येनानन्तानां कल्पने गौरवादित्यपि न चारु । रजतादीनामनिर्वचनीयत्वासिद्धेः । अस्मादाद्यनन्तानामीश्वरात्मकत्वकल्पने बन्धमोक्षव्यवस्था न स्यात् । ईश्वरस्यापि अज्ञानत्वापत्तेर्जीवानां सार्वज्ञ्यापत्तेश्च । चैत्रमुक्तिदशायां मैत्रस्यापि मुक्तत्वापत्तेश्च । तस्मात्सुखदुःखादिवैचित्र्याज्जीवात्मनो ऽपि परस्पर-

भेदसिद्धौ सुतरामीश्वरस्य भेदासिद्धिरिति संक्षेपः । नन्वलीकविषयकं किं ज्ञानमुच्यते यद्विषयता ह्यसंबद्धा । न तावत्प्रत्यक्षं तेन सह सन्निकर्षाभावात् । नाप्यानुमानिकं अलीकनिरूपितव्याप्त्यभावात् । न च शाब्दमपि पदानामलीके शक्तिलक्षणयोरभावात् । नाप्युपमितिः । अलीके सादृश्यज्ञानाभावात् । तथा च ज्ञाननिरूपिताया विषयतापरपर्यायरूपायाः ख्यातेः सद्वृत्तित्वाभावासिद्धिरित्यभिप्रायवानाह असत्ख्यातेरिति । विषयतायाः सद्वृत्तित्वाभावस्यासिद्धेरित्यर्थः । तथा च न सिद्ध्यसिद्धिव्याघातः । ननु ज्ञानाविषयीभूतमप्यलीकं भविष्यतीत्यत आह किं चेति । इत्थं अलीकस्य ज्ञानाविषयत्वे, । न हीति । ज्ञेयत्वं ज्ञानविषयत्वं तथा च ज्ञानाविषयान्यस्मिन्पदार्थे मानाभावादिति भावः । अत्र सोऽङ्गलोपाख्यायाः । पटो नास्तीति प्रतीतितो घटत्वेन पटो नास्तीति विलक्षणप्रतीतिसिद्धौ व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्तथा च समवायितया वाच्यत्वाद्यभावस्य वाच्यत्ववदन्यत्वस्य च घटे सत्त्वेन केवलान्वयिनि नोक्ता व्याप्तिरिति व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावं स्वीचक्रुः । अथ तथाऽपि तादृशसाध्याभाववति घटादौ मेयत्वस्य सत्त्वाद्व्यभिचार इति चेन्न । व्यभिचारस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वात्मकत्वात् । ज्ञेयत्वे च तदभावान्न दोषः । अथाच तादृशाव्यभिचारित्वमप्रसिद्धमिति चेदत्र मिश्राः । साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताका यावन्तः साध्याभावास्तत्सजातीया ये तदाश्रयवृत्तित्वाभावास्तद्वत्त्वं व्याप्तिः । भवति हि वन्हिमान् धूमादित्यादौ वन्हित्वावच्छिन्नवह्निव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताका इन्धनत्वादिना वन्ह्यभावादयस्तदधिकरणं जगत्तत्समानजातीयो यीन्धनत्वादिना जगद्वृत्तित्वाभावस्तस्य धूमे सत्त्वाल्लक्षणसमन्वय इति । एवं वन्हित्वेन वन्ह्यभावोऽपि तादृशस्तदधिकरणं निर्वन्हिदेशः निर्वन्हिवृत्तित्वाभावस्य धूमे सत्त्वाल्लक्षणसमन्वय इति । एवं वाच्यत्वं यत्वादित्यादौ ज्ञेयत्वत्वेन वाच्यत्वाभावोऽपि तादृशस्तदाश्रयो जगत्तद्वृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावस्य ज्ञेयत्वे ऽपि

Digitized by Google

सत्त्वात्तत्र लक्षणसमन्वयः । धूमवान्वह्नेरित्यादौ निर्धूमे ऽयःपिण्डे वह्नेः
सत्त्वात्तादृशनिर्धूमवृत्तित्वाभावस्य वह्नावसत्त्वाच्च लक्षणसमन्वयः । धूम-
वान्वह्नेरित्यादौ व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य धूमत्वेन घटा-
भावस्याश्रयो जगत्तत्सजातीयस्य घटत्वेन जगद्वृत्तित्वाभावस्य वह्नौ सत्त्वा-
द्व्यावन्त इति । तथा च तदन्तर्गतस्य धूमत्वेन धूमाभावस्यापि प्रवेशात्तन्नि-
र्धूमवृत्तित्वाभावस्य वह्नावसत्त्वान्नातिव्याप्तिः तथा ऽपि धूमवान्वह्नेरि-
त्यादौ धूमत्वरूपसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभाववदयः-
पिण्डात्मकनिर्धूमवृत्तित्वस्यापि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताका-
भावस्य वह्नौ सत्त्वादतिव्याप्तिरतः समानजातीयेति । समानजातीयत्वं
च व्यधिकरणधर्मावच्छिन्नाभावस्य व्यधिकरणधर्मावच्छिन्नाभावत्वेन समा-
नाधिकरणधर्मावच्छिन्नाभावस्य समानाधिकरणधर्मावच्छिन्नाभावत्वेनेति
तेनाभावत्वादिना साजात्यसत्त्वे ऽपि न दोषः । साध्याभाववदित्याद्युक्तौ
तु महानसीयवह्न्यभाववत्पर्वतवृत्तित्वाभावस्य धूमे विरहादव्याप्तिस्तद्वारणा-
र्थं साध्यतावच्छेदकावच्छिन्नप्रतियोगिताका इति विवक्षणे प्रमेयसाध्यकस्थले
तादृशसाध्याभावाप्रसिद्ध्या ऽव्याप्तिस्तद्वारणार्थं साध्यतावच्छेदकावच्छि-
न्नव्यापकतावच्छेदकप्रतियोगिताका इति विवक्षणे तु वह्निघटोभयाभा-
वसमानजातीयतादृशाभावस्य धूमादावसम्भवादव्याप्तिरतस्तादृशरूपा-
वच्छिन्नप्रतियोगिताका इत्यन्तमुक्तम् । न च कपिसंयोगी एतद्वृक्षत्वादित्या-
दावव्याप्तिः कपिसंयोगाभाववति वृक्षे एतद्वृक्षत्वस्य सत्त्वादिति वाच्यम् ।
तादृशसाध्याभावस्य व्याप्यवृत्तित्वविवक्षणात् । न च धूमवान्वह्नेरित्यादौ
तादृशस्य ह्रदादिवृत्तित्वत्वावच्छिन्नाभावस्य वह्नावपि सत्त्वादतिव्या-
प्तिरिति वाच्यम् । निरुक्तसाध्याभावस्यायोगोलकावृत्तित्वावच्छिन्नाभाव-
स्यायोगोलकमात्रवृत्तित्वात्तद्वृत्तित्वाभावस्य वह्नावसत्त्वादतिव्याप्त्यभा-
वात् । अथ यदि पार्थिवत्वादिविशिष्टं यन्निरुक्तसाध्याभाववत्तदयोगो-
लकवृत्तित्वन्तदभावस्य वह्नौ सत्त्वादतिव्याप्तिरिति सूक्ष्मीक्ष्यते तर्हि
साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताक-

तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकोयःसाध्याभावसजातीयाभावत्वनिष्ठाभावत्वसामान्यं यद्धेतुवृत्तित्वव्याप्यं तत्त्वं व्याप्तिरिति भवति हि वह्निमान्धूमादित्यादौ तादृशसाध्याभाववद्वृत्तित्वत्वात्मकनिर्वह्निवृत्तित्वत्वव्यापकप्रतियोगिताको निर्वह्निवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावः स साध्याभावसजातीयोऽपि तादृशाभावनिष्ठाभावत्वमात्रं धूमरूपहेतुवृत्तित्वव्याप्यमिति लक्षणसमन्वय इति। तथा च तादृशसाध्याभाववद्वृत्तित्वत्वस्य ह्रदवृत्तित्वे तैजसनिष्ठायोगोलकवृत्तित्वेऽपि सत्त्वात्तत्र तादृशायोगोलकवृत्तित्वाभावप्रतियोगिताविरहान्न दोषः। सामान्यपदोपादानाभावत्वपदानुपादानको न दोषः। धूमवान्वह्नेरित्यादौ व्यधिकरणधर्मावच्छिन्नाभावरूपसाध्याभाववद्वृत्तित्वत्वस्य पर्वतवृत्तित्वेऽपि सत्त्वान्निर्धूमवृत्तित्वत्वावच्छिन्नप्रतियोगितायास्तादृशसाध्याभाववद्वृत्तित्वत्वव्यापकत्वाभावात्समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावो न लक्षणघटकः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य वन्हावपि सत्त्वादतिव्याप्तिरतस्तदिति साध्याभावविशेषणम्। तथा च यदि साध्याभावः समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्तदा समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वं वाच्यम्। यदि च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्तदा व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वमिति न दोषः। अथ तथापि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकतत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य वन्हिभिन्नत्वनिर्धूमवृत्तित्वोभयत्वावच्छिन्नाभावस्य वन्हौ सत्त्वादतिव्याप्तिरिति चेन्न। तादृशवृत्तित्वाभावस्य व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वविवक्षणादिति। अत्र तादृशसाध्याभाववद्वृत्तित्वं हेतुतावच्छेदकसम्बन्धेन वाच्यम्। तेन तादृशवन्ह्यभाववति धूमावयवे धूमस्य समवायेन वृत्तित्वेऽपि न दोषः। नच हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वस्य विवक्षणे जातिमान्सत्त्वादित्यत्राव्याप्तिः। तादृशसाध्याभाववति सामान्यादौ

हेतुतावच्छेदकसमवायेन वृत्तेरप्रसिद्धेरिति वाच्यम् । हेतुतावच्छेदकसम्बन्धेन कस्यचिदधिकरणे वर्त्तमानस्य साध्याभावस्य विवक्षणात्तथा च समानाधिकरणधर्मावच्छिन्नत्वात्यन्ताभावस्य समवायेन कस्याप्यधिकरणेऽवृत्तित्वाभावेऽपि व्यधिकरणधर्मावच्छिन्नाभावमादाय लक्षणसमन्वय इति संक्षेपः । अत्र वदन्ति । तदभावप्रत्यक्षत्वावच्छिन्नं प्रति स्वप्रतियोगितावच्छेदकविशिष्टप्रतियोगिनिश्चयत्वेन हेतुत्वमिति प्रतियोग्यवृत्तिधर्मस्य प्रतियोगितावच्छेदकत्वाभावः । इतरथा घटनिर्विकल्पकादपि घटो नास्तीति प्रतीत्यापत्तेः । इत्थं च घटत्वेन पटो नास्तीति विशिष्टबोधं प्रति घटत्वेन पट इति विशेषणतावच्छेदकप्रकारकनिश्चयस्यापेक्षितत्वात्तदभावादेव न तादृशविशिष्टवैशिष्ट्यबोध इति । न च घटत्वेन पट इति विशेषणतावच्छेदकप्रकारकभ्रमदशायां घटत्वेन पटो नास्तीति विशिष्टवैशिष्ट्यबोधसम्भवात् तादृशाभावसिद्धिरिति वाच्यम् । भ्रमाद्वस्तुसिद्ध्यभावात् । दण्डीपुरुष इत्यादौ विशेषणतावच्छेदकस्य दण्डत्वस्य यादृशी प्रकारता तादृश्येव घटो नास्तीत्यादौ विशेषणतावच्छेदकस्य घटत्वस्यापीति । तथा च यथा घटस्य स्वप्रतियोगिताकत्वसम्बन्धेनाभावोपरि प्रकारता तथा न स्वावच्छिन्नघटवृत्तिप्रतियोगितासम्बन्धेन घटत्वस्यापीति येन घटत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन पटाभावोपरि प्रकारतां सम्भाव्यापि घटत्वेन पटो नास्तीत्याकारकप्रतीतिः इतरथा घटत्वेन घटो नास्तीत्याकारकप्रतीत्यापत्तेः । तथा सति घटीयो घटत्वीयोऽभाव इत्याकारः स्यात् । अत एवोक्तं शिरोमणिभट्टाचार्यैः । अभावप्रत्ययो हि घटत्वादिविशिष्टस्य घटादेः प्रतियोगित्वमवगाहमानो विशेषणस्य घटत्वादेस्तदवच्छेदकत्वमवगाहते न तु स्वातन्त्र्येण घटो नास्तीत्येव च प्रतीतेरिति । अत्र स्वातन्त्र्यञ्च स्वावच्छिन्नघटवृत्तिप्रतियोगितासम्बन्धेनेति दिक् । ननु तर्हि व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकाभावोऽपि मास्त्विति चेन्न । संयोगेन रूपं नास्तीति प्रतीत्या तत्सिद्धेरिति दिक् ॥

अन्ये तु कार्त्स्न्येन सम्बन्धो व्याप्तिरित्याहु-

Digitized by Google

स्तत्र वदन्ति कोऽयं कात्स्‍र्न्येन सम्बन्धः कृत्स्नेन साध्येन हेतोः सम्बन्धः कृत्स्नहेतौ साध्यसामानाधिकरण्यं वा कृत्स्नहेतुमति साध्यवत्त्वं वा । नाद्यः प्रसिद्धानुमानेऽव्याप्तेः । न हि धूमे सकलवन्हिसामानाधिकरण्यमस्ति । अयः पिण्डीयवन्हेः सामानाधिकरण्याभावात् । न द्वितीयः । एकव्यक्तिहेतावव्याप्तेः । न तृतीयः एकमात्रवृत्तिहेतावव्याप्तेः ।

केवलान्वयिसाधारणं कस्यचिल्लक्षणं दूषयितुमाह कार्त्स्न्येनेति । कार्त्स्न्यं साकल्यमित्यर्थः । अथ किञ्चिद्विशिष्टत्वेनापि कार्त्स्न्यस्य विवक्ष्यानुपादानात्तद्विशिष्टत्वमाशङ्क्य दूषयितुमाह तत्र वदन्तीत्यादिना । प्रसिद्धानुमाने वन्हिमान्धूमादित्यादौ । अयः पिण्डीयेति । एकस्मिन्नपि धूमे निखिलवन्हिसामानाधिकरण्याभाव इत्यपि बोध्यम् । एतेन कृत्स्नेन साध्याश्रयेण कृत्स्नेन साध्यसमानाधिकरणेन च हेतोः सम्बन्ध इति परास्तं । एवं पृथिवी गन्धादित्येकव्यक्तिसाध्यकेप्यव्याप्तिर्बोध्या । सकलेन वन्ह्याश्रयीभूतान्तर्गतेनायःपिण्डेन सकलेन वन्हिसमानाधिकरणान्तर्गतेनायःपिण्डत्वेन धूमसम्बन्धाभावात् । एकेति गुणवान् द्रव्यत्वात् गन्धवान् पृथिवीत्वादित्यादौ हेतौ साकल्याप्रसिद्धेरित्यर्थः । अत एव कृत्स्नस्य साधनस्य सामानाधिकरण्यं साध्य इति निरस्तम् । एकमात्रेति । आकाशं द्रव्यं शब्दादित्यादौ साधनाश्रये यावत्त्वाप्रसिद्धेरित्यर्थः । निखिलवृत्तेरप्येकवृत्तित्वस्यावतत्वान्मात्रेत्युक्तम् ॥

अत्रोच्यते साध्यसमानाधिकरणास्वसमानाधिकरणयावत्कत्वं व्याप्तिः । यत्समानाधिकरणा यावन्तः साध्यसमानाधिकरणास्तत्वं व्याप्तिरिति यावत् । भवति च धूमसमानाधिकरणा यावन्तो वन्हिसमाना-

धिकरणा इति धूमे वन्हिव्याप्तिः न तु वन्हौ धूमस्य । न हि वन्हिसमानाधिकरणा यावन्तो धूमसमानाधिकरणाः । अयःपिण्डत्वस्य वन्हिसमानाधिकरणस्य धूमासमानाधिकरणत्वात् । यद्विशिष्टसमानाधिकरणा यावन्तः साध्यसमानाधिकरणास्तद्वत्त्वं वा भवति च धूमत्वविशिष्टसमानाधिकरणा यावन्तो वन्हिसमानाधिकरणास्तद्वत्त्वं च धूमे । न चेदृशं धूमं प्रति वन्हित्वं नातो वन्हौ धूमव्याप्तिः । अस्ति चेदं केवलान्वयिनि अभिधेयत्वविशिष्टसमानाधिकरणानां यावतां मेयत्वसमानाधिकरणत्वात् । एवं च लाघवात्साध्यवदन्यावृत्तित्वे सति साध्यसमानाधिकरणत्वं व्याप्तिः । नचेयं केवलान्वयिन्यस्त्यतो नेदमनुमानमिति मीमांसकमतमपास्तम् । ततोऽप्यस्य लघुत्वात् ।

अथ कृत्स्नेन यावता साधनसमानाधिकरणेन साध्यस्य सामानाधिकरण्यरूपसम्बन्ध इति पर्यवसितार्थाभिप्रायेण सिद्धान्तयति साध्येति यावत्त्वस्य साध्यसमानाधिकरणविशेषणत्वे वह्निमान्धूमादित्यत्राव्याप्तिः अयोगोलकत्वादेर्धूमसामानाधिकरण्याभावादिति यावत्त्वस्य साधनसमानाधिकरणविशेषणत्वमिति पर्यवसितार्थमाह यद्विति । नन्वेवं द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादावव्याप्तं । सत्तासमानाधिकरणस्य द्रव्यान्यत्वगुणत्वादेर्द्रव्यत्वासमानाधिकरणत्वादित्यत आह यद्विशिष्टेति । यत्पदं हेतुतावच्छेदकपरं तथा च द्रव्यान्यत्वगुणत्वादेर्गुणकर्मान्यत्वविशिष्टसत्तासमानाधिकरणत्वाभावान्न दोषः । एवं साध्यपदमपि साध्यतावच्छेदकावच्छिन्नपरं तेन गुणकर्मान्यत्वविशिष्टसत्तावाऽव्या-

तेरित्यादौ जातिसमानाधिकरणस्य द्रव्यान्यत्वादेः सत्तासमानाधिकरणत्वे ऽपि गुणकर्मान्यत्वविशिष्टसत्तासमानाधिकरणत्वाभावश्च दोषः। तद्वत्त्वं तादृशहेतुतावच्छेदकवत्त्वम्। यदि च पूर्वलक्षणे ऽपि यत्पदं हेतुतावच्छेदकावच्छिन्नपरं साध्यपदं च साध्यतावच्छेदकावच्छिन्नपरमित्युच्यते तदा द्रव्यगुणकर्मान्यत्वविशिष्टसत्त्वात्। गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यादावव्याप्त्यतिव्याप्त्योरभावे ऽपि तत्र तादृशहेतुसामानाधिकरण्यव्यापकतादृशसाध्यसामानाधिकरण्यमित्येतादृशसम्बन्धरूपा नानाव्याप्तिः। इह तु तादृशसम्बन्धविशिष्टहेतुतावच्छेदकरूपा एकैव व्याप्तिरिति भेदः। तथा च साधनतावच्छेदकावच्छिन्नसामानाधिकरण्यव्यापकत्वं यद्धर्मावच्छिन्नसामानाधिकरण्यत्वेनावच्छिद्यते तद्धर्मावच्छिन्नसामानाधिकरण्यं तादृशसामानाधिकरण्यविशिष्टहेतुतावच्छेदकं वा व्याप्तिरिति तत्त्वम्। साधनतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नसामानाधिकरण्यं तादृशसामानाधिकरण्यविशिष्टहेतुतावच्छेदकं वा व्याप्तिरिति निर्गलितार्थ इति संक्षेपः। तद्वत्त्वन्तादृशसम्बन्धविशिष्टधूमत्ववत्त्वं, । ईदृशमित्यस्य वन्हित्वेनान्वयः। ईदृशं निरुक्तधूमत्वसदृशं, धूममिति द्वितीयार्थो निरूपितत्वं वन्हित्वमित्यनन्तरं व्याप्तिरितिशेषः तथा च धूमनिरूपिता व्याप्तिर्वन्हित्वं न चेत्यर्थः। इदं व्याप्तिलक्षणं लाघवात्। हेतुसमानाधिकरणेत्यादिव्याप्त्यपेक्षया लाघवात्,। वन्हिनिरूपितसामानाधिकरण्यस्य घटे ऽपि सत्वात्तत्रातिव्याप्तिवारणाय सत्यन्तं। सत्यन्तस्याकाशादौ सत्वात्तत्रातिप्रसङ्गवारणाय साध्यसमानाधिकरत्वमिति। इयं साध्यवदन्येत्यादिव्याप्तिः, । इदं केवलान्वयिसाध्यकमनुमानं, ततो ऽपि साध्यवदन्येत्यादितो, ऽपि । अस्य, निरुक्तव्याप्तिस्वरूपस्य, ।

अत्र चार्वाकाः। भवत्वियं व्याप्तिः। न चेयं शक्यग्रहा। किञ्चिद्धूमसमानाधिकरणं वन्ह्यसमानाधिकरणं भविष्यतीति शङ्कया दुर्वारत्वात्। न चेद्-

शङ्कायां व्याप्तिनिश्चयो भवितुमर्हति । तस्यास्तत्प्रतिबन्धकत्वात् । न च भूयोदर्शनात्तन्निवृत्तिः शतशः सहचरितयोरपि व्यभिचारोपलब्धेः न च तर्कात्तन्निवृत्तिस्तर्कस्य व्याप्तिनिश्चयमूलकत्वेनानवस्थानात् । इत्यञ्च ग्राहकाभावाद्व्याप्तेरग्रहे कुतोऽनुमानं स्यादिति ।

अथ परीक्षणीयानुमानप्रामाण्यव्यवस्थापयितुं चार्वाकमतमाह अत्रेत्यादिना ग्रन्थं । यत्समानाधिकरणा इत्यादि । शक्यग्रहा व्याप्तिपदशक्तिग्रहगोचरा । कुतो नेत्यत आह किञ्चिदिति । शङ्काया इति एतादृशव्यभिचारशङ्काया इत्यर्थः । तस्याः व्यभिचारशङ्कायाः, तत्प्रतिबन्धकत्वात् । ग्राह्याभावविषयया व्यभिचारज्ञानस्याव्यभिचारज्ञाने प्रतिबन्धकत्वमिति भावः । तन्निवृत्तिः व्यभिचारशङ्कानिवृत्तिः, । शतश इति । पार्थिवत्वलोहलेख्यत्वयोः शतशः सहचरितत्वे ऽपि वज्रभेद्यस्य मणेर्लौहभेद्यत्वाभावादित्यर्थः । लोके धूमादिदर्शनोत्तरं वन्ह्यादिव्यवहारस्तु प्रायेण वह्निर्भविष्यतीत्यादि सम्भावनयेति भावः । न चेति धूमो यदि वह्निव्यभिचारी स्यात्तदा वन्हिजन्यो न स्यादिति तर्काद्व्यभिचारशङ्कानिवृत्तिरित्यर्थः । अथ धूमादौ वह्निजन्यत्वं वह्नित्वावच्छिन्नकारणताप्रतियोगिककार्यतावत्त्वं तत्र कारणत्वमनन्यथासिद्धनियतपूर्ववर्तित्वं नियमो व्याप्तिरित्यनवस्थेत्यर्थः ।

अत्रोच्यते व्यभिचारग्रहविरहादिकमेव व्याप्तिग्राहकं । न च तच्छङ्काविरहो दुःशंकः क्वचित्तर्कात्क्वचित्तन्मूलभूतव्याघातादौ कोटिस्मरणाद्यभावादपि तन्निवृत्तेः । न हि सर्वदा व्यभिचारशङ्काकोटिस्मृतिर्वा ऽस्ति । अनुभूयत एवेति दिक् ।

Digitized by Google

यथ जातमात्रस्य स्तनपानेष्टसाधनत्वानुमितिहेतुभूतव्याप्तिज्ञानं यथा तर्कं विना तथा वन्हिधूमादिव्याप्तिग्राहकतर्कमूलीभूतं किंचिद्व्याप्तिज्ञानमपि तर्कं विना भविष्यतीति नानवस्था तथा च तर्कस्य सर्वत्र न व्याप्तिग्रहमूलत्वमित्यभिप्रायवान्समाधत्ते व्यभिचारेति । व्यादिना सहचारदर्शनसंग्रहः । तथा च व्यभिचारज्ञानविरहसहकृतं सहचारज्ञानमेव व्याप्तिग्राहकमित्यर्थः । ननु व्यभिचारज्ञानविरह एव कथमित्याह । न चेति । क्वचित्तर्कादिभिः । न च तर्को ऽपि व्याप्तिघटितस्तन्निश्चये व्यभिचारशङ्काविरहादिकं कारणं । तद्विरहस्तर्कादित्येवमनवस्थेति वाच्यम् । तर्कघटकीभूतव्याप्तेर्भिन्नत्वात्तथा हि । तर्को जन्यत्वघटितः । तच्च कारणतानिरूपितकार्यतावत्त्वादि तच्च कारणत्वं नियमघटितं नियमश्च कार्यतावच्छेदकसम्बन्धेन कार्याधिकरणे कारणतावच्छेदकसम्बन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वरूपः यदि च कार्यत्वं हि चानन्यथासिद्धनियतपश्चाद्भावित्वं तदपि कारणतावच्छेदकसम्बन्धेन कारणाधिकरणे कार्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावाप्रतियोगित्वादिरूपं तच्चान्वयव्यतिरेकगम्यं न तु तर्कगम्यमिति नानवस्थेति । वन्हिरासभादिसमाजस्यान्वयव्यतिरेकाभ्यामन्वयव्यतिरेकौ धूमस्यावगम्यमानो वन्हिरासभाद्यन्यतरस्य धूमंप्रति हेतुत्वं निर्धार्य किं वन्हेरासभादेर्वा सर्वेषां वा हेतुत्वमिति संदिग्धे यद्व्यतिरेके धूमाद्यनुत्पत्तिं यदन्वये धूमोत्पत्तिं गृह्णाति तस्य हेतुत्वमिति निश्चिनोति यथा वन्हिः । यच यत्सत्वेप्यनुत्पत्तिं यद्व्यतिरेकेप्युत्पत्तिं गृह्णाति न तस्य हेतुत्वमपि यथा रासभादेरिति वन्ह्याद्यन्यतमस्य हेतुत्वप्रदर्शनेन धूमोऽयमहेतुक एवोत्पत्स्यत इति शङ्काया निरासस्तथा वह्निघटितकारणस्तोमदर्शनेन धूमो यमवन्हेरेव भविष्यतीति शङ्काया निरासः। रासभादेरहेतुत्वप्रदर्शनेन धूमो सो वन्हिं विना रासभादेर्भविष्यतीति शङ्काया निरास इति ।

तथा च व्याप्तिग्रहोपाये प्रदर्श्यमाने चार्वाकेण व्यभिचारशङ्कायां प्रदर्श्यमानायां धूमो यदि वन्हिव्यभिचारी स्याद्वन्ह्यसमवहिताजन्यत्वसेति

जन्यो न स्यादिति तर्कोऽवतारस्तत्रेष्टापत्तौ वन्हिसमवहितान्वयव्यतिरेकानुविधानान्वयव्यतिरेकप्रतियोगित्वनिश्चये सति वन्ह्यसमवहिताजन्यत्वनिश्चये वन्हिजन्यत्वं पर्यवस्यति । तच्च क्वचिद्विनाऽपि वन्हिं धूमो भविष्यतीति शङ्कोद्भावकं चार्वाकं प्रति व्याघातोऽयमुपदृश्यते यदि कारणं विना कार्योत्पत्तिस्तर्हि धूमार्थं वन्हेस्तृप्त्यर्थं भोजने प्रवृत्तिर्दृश्यते सा तवैव न स्यादिति । ननूपस्थितधूमे वन्हिसम्बन्धावगमे मास्तु तत्र व्यभिचारशङ्का परन्त्वनुपस्थितधूमे तु व्यभिचारशंकायाः सत्त्वात्कथमनुमानं प्रमाणमिति चेन्न । शङ्काविषयीभूतानुपस्थितधूमोपस्थित्यर्थमनुमानस्यावश्यकत्वात्तथा चानु मानमस्त्येव । अथानुपस्थितधूमे शङ्का न चेत्तर्हि व्यभिचारशङ्काया विरहात्सुतरामनुमानस्य प्रामाण्यं यदि कदाचिच्छङ्का तत्र तर्कावतारस्तर्के सत्यपि शङ्का तदा सा व्याघातादपसारणीया तदुक्तमाचार्यैः । "शङ्काचेदनुमास्त्येव न चेच्छङ्का ततस्तराम् । व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मतः" इति । व्याघातोऽवधिर्यस्याः शङ्कायाः सा तथा तर्क एव शङ्काया अवधिः स तथा । खण्डनकारिका । "व्याघाते यदि शङ्कास्ति न चेच्छङ्का ततस्तराम् । व्याघातावधिराशङ्का तर्कः शङ्कावधिः कुत" इति अयमर्थः । यदि शङ्काया व्याघातः तदावश्यं शङ्कास्ति कार्यं विना व्याहननक्रियायाः विरहात् । न चेद्व्याघातः शङ्कायाः तदावश्यं शङ्कास्ति तर्हि व्याघातावधिराशङ्का तर्कः शङ्कावधिरिति यदाचार्यैरुक्तं तत्कुत इत्यर्थ इति खण्डनमपि परास्तम् । न वयं व्यभिचारशङ्का न जायत इति ब्रूमः यदा जायते तदा सा व्याघातेन निरसनीयेति सङ्क्षेपः । क्वचित्तन्मूलेति । व्यभिचाराभाव एवाव्यभिचरितत्वं तथा चाव्यभिचरितत्वसंशयात्मके व्यभिचारसंशये कुत्रचिद्व्यभिचरितत्वात्मकव्याप्यभावरूपकोटिस्मरणाभावादित्यर्थः । तन्निवृत्तेरिति । व्यभिचारसंशयानुत्पत्तेरित्यर्थः । ननु नियमेन कोटिस्मरणादिसत्त्वे संशयः कुतो नेत्यत आह कोटीति । ननु सर्वदा कोटिस्मृतिर्मास्तु कोऽनुभवस्तु भविष्यत्येवेत्यत आह अनुभूयत इति । ननु यादृशतर्काद्व्यभिचारशङ्काविरहः स तर्कः कुतो

नोक्त इत्यत आह दिगिति । अयमाशयः । यत्र पर्वतो वह्निमानिति यदा
प्रत्युक्तं तत्र कुत इति परेणोक्तं तदा धूमादिति स्वयं हेतुप्रयोगः कृतः
ततः परेण धूमोऽस्तु वह्निर्मास्त्विति बाधो निश्चितस्तदा तर्कप्रवृत्ति-
स्तथा हि पर्वतो यदि निर्वह्निः स्यात्तदा निर्धूमः स्यादित्यादि विष-
यपरिशोधकतर्कव्यापादितबाधनिश्चयरूपविशिष्टबुद्धिप्रतिबन्धः क्रियते-
प्रतिबध्यप्रतिबन्धकभावश्चैवम् । पर्वतत्वावच्छिन्नविशेष्यकनिर्वह्नित्वबु-
द्धित्वेन प्रतिबध्यता पर्वतत्वावच्छिन्नविशेष्यकनिर्धूमत्वव्याप्यनिर्वह्नि-
त्वत्वावच्छिन्नाश्रयतानिश्चयविशिष्टनिर्धूमत्वादिविधेयकापत्तित्वेन
पर्वतत्वावच्छिन्नविशेष्यकनिरालोकत्वव्याप्यनिर्वह्नित्वत्वावच्छिन्नाश्रय-
तानिश्चयविशिष्टनिरालोकत्वादिविधेयकापत्तित्वेन प्रतिबन्धकतेति ।
तर्कत्वं चापत्तित्वापरनामकमापादयामीत्यनुभवसिद्धो जातिविशेषो मान-
सत्वव्याप्यः । स च भ्रमप्रमासाधारणाहार्यमानसज्ञानवृत्तितदाश्रयस्य
पक्षे साध्याभावादिः । यथा च पर्वते वह्निप्रत्यक्षानुमित्योर्विषयावैलक्षण्ये-
प्यनुमिनोमीत्यनुव्यवसायादिसिद्धजातिकृतो भेदस्तथा तर्कस्यापि बाधा-
दितस्तर्कयामीत्यनुव्यवसायबलाज्जातिसिद्धिरिति । ननु धातुत्वादि-
व्याप्य एव कुतो नेति चेन्न । अन्धानामपि तर्कोत्पत्तेः । चक्षुरादिशालि-
नोऽपि तत्सन्निकर्षमन्तरेणापि तर्कोत्पत्तेश्च । अत्रेदं बोध्यं । अनुमितौ
यथा परामर्शः कारणं तथा तर्केऽपि व्याप्यव्याप्यापादकवत्तापरामर्शो
हेतुः । एवमनुमितौ यथा सिद्धिः प्रतिबन्धिका । तथा तर्केऽपि पक्षविशे-
ष्यकापाद्यनिश्चयरूपेष्टापत्तिरपि । इयान्परं भेदो विपर्ययपर्यवसायिनस्तर्क-
स्यापाद्याभावरूपबाधनिश्चयः प्रयोजकस्तद्विघटनद्वारा तादृशेष्टापत्तिः
प्रतिबन्धिका अनुमितिं प्रति तु सिद्धिः प्रतिबन्धिकेति पक्षतावच्छेदका-
वच्छेदेनापत्तिं प्रति पक्षतावच्छेदकावच्छेदेन तत्सामानाधिकरण्येन च
बाधनिश्चयस्य कारणत्वं तत्सामानाधिकरण्येनापत्तिं प्रति तु तदवच्छेद-
कावच्छेदेन बाधनिश्चयस्य कारणत्वं पक्षतावच्छेदकावच्छेदेनानुमितौ तद-
वच्छेदेन तत्सामानाधिकरण्येन च तत्सामानाधिकरण्येनानुमितावच्छे-

"इन्द्राय राज्ञे पुरोडाशमेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञे" इति पुरोडाशत्रयवस्यामिष्टौ श्रुतायाम्, किं त्रयाणां पुरोडाशानां सहप्रदानमुत प्रदानभेद इति विशये, देवतैक्यात्सहप्रदाने प्राप्ते, राजाधिराजस्वराजगुणभेदेन तद्विशिष्टदेवताभेदात्पुरोडाशानां प्रदानस्य प्रकृपस्य भेद इति यथा, तद्वत्प्रकृते वेद्यभेदात्प्रयोगभेदइत्यर्थः। तदुक्तं देवताकाण्डे "नाना वा देवता पृथग्ज्ञाना" दिति। वाशब्दो देवतैक्यनिरासार्थः। नाना देवतेत्यत्र हेतुमाह "पृथ" गिति। उत्पत्तिवाक्य एव राजाधिराजस्वराजगुणानां पृथग्ज्ञानात्तद्विशिष्टदेवतानां नानात्वं युक्तमित्यर्थः॥

लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि॥ ३। ३। ४४॥

वाजसनेयिनोऽग्निरहस्ये "नैव वा इदमग्रे सदासीन्नाप्यसत्" इत्युपक्रम्य मनसः प्रादुर्भावमुक्त्वा "तन्मन आत्मनोऽग्नीनपश्य" दिति मनोऽधिकृत्य पठन्ति "षट्त्रिंशत्सहस्राण्यपश्यदात्मनोऽग्नीनर्कान्मनोमयान्मनश्चित" इत्यादि। तथैव वाक्चितः प्राणचितश्चक्षुश्चितः श्रोत्रचितः कर्मचितोऽग्निचित इत्यन्यानग्नीनामनन्ति। अयमर्थः। पुरुषस्यायुष्ट्वेन कॢप्तशतवर्षाणामहोरात्राणि षट्त्रिंशत्सहस्राणि। तैरवच्छिन्ना मनोवृत्तयोऽपि षट्त्रिंशत्सहस्राणि भवन्ति, एकस्मिन्नहोरात्र उत्पन्नसर्वमनोवृत्तिष्वहोरात्रगतैकत्वारोपात्। ता एतावत्संख्याका मनोवृत्तय इष्टकात्वेनाग्नित्वेन च सम्पाद्यन्ते। षट्त्रिंशत्सहस्राणीत्यादिना मन एव स्ववृत्तिरूपानग्नीनर्कानर्च्यानत एव मनोविकारान्मनश्चितो मनसा चीयन्ते सम्पाद्यन्त इति मनश्चितस्तानपश्यदित्यर्थः। एवमेव वागादयोऽपि स्व-

स्वहस्तोरग्निस्त्वेनापश्यन्निति प्रतीन्द्रियवृत्त्यैकैकमग्निचयनं सम्पाद्यम् । प्राणो घ्राणम् । कर्मपदमनुक्तकर्मेन्द्रियपरम् । एतेऽग्नयः कर्मप्रकरणे पठिताः । तत्र संशयः, किमेते मनश्चिदादयोऽग्नयः कर्माङ्गभूता उत स्वतन्त्रा इति । पादसङ्गतिफले पूर्ववदेव । पूर्वमेकप्रयोगायोगाद्वाग्युग्माश्चयोःप्रयोगभेद इत्युक्तम् । तर्हि मनश्चिदादीनां प्रकरणात्कर्माङ्गत्वेनैकप्रयोगसम्भवात्प्रयोगैक्यमिति प्रत्युदाहरणेन प्राप्ते, सिद्धान्तमुपक्रमते "लिङ्गे"ति । मनश्चिदादयोऽग्नयः स्वतन्त्रा एव । कुतः । लिङ्गभूयस्त्वात्, स्वातन्त्र्यज्ञापकलिङ्गानां भूयसां सत्त्वादित्यर्थः । तथाहि "यत्किञ्चेमानि भूतानि मनसा सङ्कल्पयन्ति तेषामेव सा कृति"रिति "तान्हैतानेवंविदे सर्वदा सर्वाणि भूतानि चिन्वन्त्यपि स्वपते" इत्यादीनि लिङ्गानि सन्ति । अयमर्थः । सर्वाण्यपि भूतानि जन्तवो यत्किमपि मनसा सङ्कल्पयन्ति । तेषामेवाग्नीनां सा कृतिः सम्पादनं सर्वजन्तुमनआदिवृत्तीनामग्नित्वेन ध्येयत्वादित्येकं लिङ्गम् । न हि यत्किञ्चित्करणं कर्माङ्गं सम्भवतीति । एवंविदे स्वपते जाग्रतेऽपि सर्वदा सर्वाणि भूतानि तानेतानग्नींश्चिन्वन्तीति लिङ्गान्तरम् । न हि कर्माङ्गं सर्वदाऽनुष्ठीयमानं दृष्टम्, कालविशेष एव तद्विधानादिति । तर्हि लिङ्गं प्रकरणाद्बलीयः । तदपि बलीयस्त्वमप्युक्तं पूर्वकाण्डे "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षा"दिति । एतत्सूत्रार्थो विस्तरेण वाचस्पतिमिश्रैरेतत्पादादौ वेधाधिकरणे वर्णित इतीह विस्तरभयान्नोच्यत इति ॥

एवं सिद्धान्तमुपक्रम्य पूर्वपक्षयति ।

Digitized by Google

पूर्वविकल्पः प्रकरणात्स्यात्क्रिया मानसवत् ॥ ३ । ३ । ४५ ॥

सङ्कल्पात्मका मनश्चिदादयोऽग्नयो न स्वतन्त्राः । किं "न्त्विष्टकाभिरग्निं चिनुत" इति प्रकृतस्य पूर्वस्य क्रियामयस्याग्नेरयं विकल्पः सङ्कल्पात्मकोऽग्निः प्रकरणात्स्यात् । न च लिङ्गादग्नीनां स्वातन्त्र्यम्, प्रकृत उक्तलिङ्गस्यार्थवादादिकार्यदर्शनलक्षणस्यार्थवादस्थत्वेन विहितमानसिकाग्निस्तुतिपरत्वेन विध्येकवाक्यतया स्वार्थपरत्वाभावात् । सिद्धे हि स्वार्थे तद्दर्शनं लिङ्गमग्नीनां स्वातन्त्र्यं गमयेत् । न ह्यस्ति स्वार्थसिद्धिः । तस्मात्क्रियानुप्रवेशिन एवैते मानसिकाग्नयः । एतेन सौत्रं क्रियापदं व्याख्यातम् । मानसवत् । तथाहि द्वादशाहे श्रूयते "अनया त्वा पात्रेण समुद्रं रसया प्राजापत्यं मनोग्रहं गृह्णामी"ति । त्वा त्वां समुद्रमनया रसया पृथिव्या पात्रेण प्रजापतिदेवताकं मनोग्रहं ध्यानमयं ग्रहमापाद्य गृह्णामीत्यर्थः । तत्र, किमिदं मानसं द्वादशाहादहरन्तरं, उत तन्मध्यपातिनो दशमस्याह्नो ऽङ्गमिति सन्देहे, "वाग्वै द्वादशाहो मनो मानस"मिति भेदव्यपदेशादहरन्तरमिति प्राप्ते, मानसस्याहरन्तरत्वे मानाभावाद्भेदव्यपदेशस्याङ्गाङ्गिभावेनाप्युपपत्तेरहरन्तरत्वे द्वादशाहसंज्ञाया गौणत्वप्रसङ्गान्मुख्ये सम्भवति गौणत्वायोगाद्द्वादशाहमध्यपातिनो दशमस्याह्नो ऽङ्गं मानसम्, इति यथा, तथेमे मानसिकाग्नयः प्रकृतकर्मशेषा इत्यर्थः ॥

अतिदेशाच्च ॥ ३ । ३ । ४६ ॥

मानसिकाग्नीनां मध्य एकैकोऽग्नि"स्तावान्यावा-

Digitized by Google

नसौ पूर्व" इति पूर्वेणेष्टकाचितेनाग्निना मानसिकाग्नीनां साहश्योपदेशाच्च तच्छेषत्वं, एकक्रियानुप्रवेशातिरिक्त-साहश्याभावात्, इत्यर्थः ॥

सिद्धान्तयति ।

विद्यैव तु निर्धारणात् ॥ ३ । ३ । ४७ ॥

तुरुक्तपक्षनिरासार्थः । विद्यात्मका एते मनश्चिदा-दयः स्वतन्त्रा एव, न कर्मानुप्रवेशिनः । कुतः । "ते हैते विद्याचित एवे"त्यवधारणादित्यर्थः । एवकारश्रुत्या क-र्मप्रकरणं बाध्यमिति भावः ॥

लिङ्गादपि तद्बाध्यमित्याह ।

दर्शनाच्च ॥ ३ । ३ । ४८ ॥

मानसिकाग्नीनां स्वातन्त्र्यज्ञापकलिङ्गस्य दर्शनाच्च प्रकरणं बाध्यमित्यर्थः । लिङ्गं पूर्वं दर्शितम् ॥

नन्विदं लिङ्गं न साधकमित्युक्तमित्यत आह ।

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ३ । ३ । ४९ ॥

श्रुतिरेवकारः । आदिपदेन लिङ्गवाक्ययोर्ग्रहणम् । लिङ्गमुक्तमेव । "विद्यया हैवैत एवंविदश्चिता भवन्ती" त्येतेषां मानसिकाग्नीनां पुरुषसम्बन्धमाचक्षाणं वाक्यं स्वातन्त्र्यबोधकम् । तथाचैतेषां श्रुतिलिङ्गवाक्यानां बली-यस्त्वात्, दुर्बलेन कर्मप्रकरणेनाग्नीनां न स्वातन्त्र्यबाध इत्यर्थः । न च लिङ्गस्यार्थवादत्वेनासाधकत्वं, लिङ्गप्र-दर्शनार्थमुदाहृतवाक्यानां विधिप्रत्ययसामीप्याभावाद-पूर्वार्थबोधकत्वाच्च विधायकत्वेनार्थवादत्वाभावादिति भावः ॥

इतोऽपि मनश्चिदाद्यग्नीनां स्वातन्त्र्यमित्याह ।

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम् ॥ ३ । ३ । ५० ॥

"ते मनसैवाधीयन्त मनसाऽचीयन्त मनसैव ग्रहा अगृह्यन्त मनसाऽस्तुवन्मनसाऽशंसन्यत्किञ्च यज्ञे कर्म क्रियते यत्किञ्च यज्ञियं कर्म मनसैव तन्मनोमयेषु मनश्चित्सु मनोमयमक्रियत" इत्यादिना मन आदिवृत्तिषु कर्माङ्गानामनुबन्धात्सम्पादनादग्नीनां स्वातन्त्र्यम्, कर्माङ्गत्वेऽङ्गानां प्रत्यक्षसिद्धत्वेन सम्पादनवैयर्थ्यात् । आदिपदेनातिदेशो गृह्यते । अतिदेशो हि क्रियामयस्याग्नेर्माहात्म्यमेकैकस्य मानसिकाग्नेर्दर्शयन्स्वातन्त्र्यमेषां दर्शयति । यत्त्वयमतिदेशः पूर्वपक्षानुकूल इति तन्न, अग्नित्वसादृश्येनास्यातिदेशस्य सिद्धान्तेऽप्युपपत्तेः । सूत्रे बहुवचनसिद्ध्यर्थं पूर्वोक्तश्रुतिलिङ्गादिकं बोध्यम् । उक्तश्रुत्यर्थस्तु, तेऽग्नयो मनसैवाधीयन्ताधानकर्मणा सम्पादिताः, अचीयन्त चिताः, एष्वग्निषु ग्रहाः पात्राण्यगृह्यन्त गृहीताः, अस्तुवन्स्तोत्रं कृतवन्त उद्गातारः, अशंसन्शंसनं कृतवन्तो होतारः । किं बहुना, यत्किञ्च कर्मारादुपकारकं यत्किञ्च यज्ञियं यज्ञनिष्पत्त्यर्थं सन्निपत्योपकारकं च क्रियते, तद्विदुषो मनसैवाऽक्रियत कृतमिति । एवमनुबन्धादिभ्यो हेतुभ्यः स्वातन्त्र्यं मनश्चिदादीनाम् । प्रज्ञान्तरपृथक्त्ववत् । यथा प्रज्ञान्तराणां शाण्डिल्यादिविद्यानां स्वातन्त्र्यं तद्वत् । नन्वग्नीनां स्वातन्त्र्ये कर्मप्रकरणादुत्कर्षः काप्यदृष्टः कल्पितः स्यादत आह "दृष्टश्चे"ति । "राजा स्वाराज्यकामो राजसूयेन यजेते"ति राजसूयं प्रकृत्य "आग्नेयोऽष्टाकपालो हिरण्यं दक्षिणे"-

Digitized by Google

त्यादिना श्रुताया अवेष्टेर्ब्राह्मणादिकर्तृकाया राजमात्रकर्तृकराजसूयप्रकरणादुत्कर्षो दृष्टः । तद्वदग्न्याप्यग्नीनां कर्मप्रकरणादुत्कर्ष इत्यर्थः । इदं सर्वं प्रथमतन्त्र उक्तमित्याह "तदुक्त"मिति ॥

यदुक्तं मानसवदग्नीनां क्रियाशेषत्वमिति तद्दूषयति ।

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ ३ । ३ । ५१ ॥

मनश्चिदादीनां मानसेन मानसिकत्वसामान्यादपि क्रियाशेषत्वं न कल्प्यम्, उक्तश्रुत्यादिभ्यः स्वातन्त्र्योपलब्धेः । मृत्युवत्, यथा "स एव मृत्युर्य एष एतस्मिन्मण्डले पुरुष"इति "अग्निर्वै मृत्यु"रिति चादित्यपुरुषस्याग्नेश्च मृत्युशब्दत्वसाम्येऽपि परस्परवैषम्यं, यथा वा द्युलोकाग्नेः "तस्यादित्य एव समि"दित्यादौ समिदादिसाम्यान्न हि द्युलोकस्याग्नित्वापत्तिः किन्तु परस्परवैषम्यं, तद्वन्मानसमानसिकाग्न्योर्मानसिकत्वसाम्येऽपि परस्परवैषम्यमित्यर्थः ॥

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥ ३ । ३ । ५२ ॥

मानसिकाग्निब्राह्मणात्परस्मिन्ब्राह्मणे "अयं वाव लोक एषोऽग्निश्चित" इत्यादिशब्दस्य ताद्विध्यं चितेऽग्नौ पृथिवीदृष्टिरूपस्वतन्त्रविद्याविधित्वमेव लक्ष्यते, न कर्माङ्गविद्याविधित्वम् । तथा "यदेतन्मण्डलं तपती"ति पूर्वस्मिन्नपि ब्राह्मणे विद्याप्राधान्यं दृश्यते, इति चकारार्थः । तथा च तत्समभिव्याहारादस्मिन्नपि ब्राह्मणे विद्यायाः

Digitized by Google

प्राधान्यमिति भावः। नन्वस्मिन्ब्राह्मणे मानसिकाग्नि-विद्यायाः प्रधानत्वे किमर्थं कर्मोपक्रमस्तत्राह "भूयस्त्वा" दिति । कर्माङ्गानां मानसिकाग्निविद्यायां सम्पाद्यानां बहुत्वाद्विद्यायास्तदुपक्रमेणानुबन्धः प्रतिपादनमित्यर्थः । तस्मादियं मानसिकाग्निविद्या स्वतन्त्रपुरुषार्थहेतुरिति सिद्धम् ॥

ननु विद्यायाः पुरुषार्थहेतुत्वमयुक्तं, देहातिरिक्तस्य पुरुषस्याभावादित्याक्षिपति ।

एक आत्मनः शरीरे भावात् ॥ ३ । ३ । ५३ ॥

प्रसङ्गादस्य पादसङ्गतिर्बोध्या । अत्र किमात्मा देह एव, उत तदतिरिक्तः, इति संशयः । पूर्वपक्षे देहातिरिक्तात्माभावात्स्वर्गापवर्गादिशास्त्रवैयर्थ्यं, सिद्धान्ते तत्सार्थक्यमिति विभागः। तत्रैके देहात्मवादिनो लोकायतिका देहातिरिक्तस्यात्मनोऽसत्त्वं मन्यमाना देह एवात्मेति वदन्ति । कुतः । शरीरे सति चैतन्यसुखादीनां भावात्तदभावे चाभावात्, इत्यन्वयव्यतिरेकाभ्यां तेषां देहधर्मत्वेनातिरिक्तात्मसिद्ध्यभावात् । इति प्राप्ते ॥

सिद्धान्तयति ।

व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥ ३ । ३ । ५४ ॥

न त्वात्मनो देहादव्यतिरेकः, किन्तु व्यतिरेक एव न्याय्यः । कुतः । चैतन्यादीनामात्मधर्माणां तस्य शरीरस्य मरणावस्थायां भावेऽप्यभावित्वाद्देहधर्मत्वासम्भवात् । यथा देहभावे भावाद्देहधर्मत्वं, तथा देहभावेऽप्यभा-

Digitized by Google

वादेहधर्मत्वमेव कुतो न स्यादित्यर्थः । किञ्च निश्चितान्वयव्यतिरेकाभ्यां देहधर्मत्वं वक्तव्यम् । न चात्र देहाभावेऽभाव इति व्यतिरेकनिश्चयः सम्भवति, एतद्देहाभावेऽपि देहान्तरावच्छेदेन तद्धर्मसत्त्वसम्भवादिति । उपलब्धिवत् । तथाहि, अस्ति तावद्रूपाद्युपलब्धिः । सा च न देहधर्म इत्युक्तम् । किञ्च देहधर्मत्वे तस्याः प्रकाशकत्वानुपपत्तिः, देहरूपादिवदिति यथा देहादिविषयाया उपलब्धेः सत्त्वमङ्गीक्रियते, तथा तस्या देहादिव्यतिरेकोऽप्यङ्गीकार्यः । सैव चोपलब्धिर्न आत्मेति । तस्माद्देहातिरिक्तस्यात्मनोऽस्तित्वमिति सिद्धम् ॥

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ३ । ३ । ५५ ॥

सन्ति कर्माङ्गाश्रिता उपासनाः । उद्गीथावयवोङ्कारे प्राणदृष्टिः । उक्थे पृथिवी दृष्टिः । "लोकेषु पञ्चविधं सामोपासीते"ति च । लोकशब्दः पृथिव्यग्न्यन्तरिक्षादित्यद्युलोकपरः । पृथिव्यादिविषयकदृष्ट्या पञ्चविधं सामोपासीतेत्यर्थः । "पृथिवी हिङ्कारोऽग्निः प्रस्तावोऽन्तरिक्षमुद्गीथ आदित्यः प्रतिहारो द्यौर्निधन"मिति हिङ्कारादिपञ्चविधे साम्नि पृथिव्यादिदृष्टिरिति विभागः । अत्र संशयः, किमेता उपासना यत्र शाखायां विहितास्तच्छाखागतोद्गीथाद्यालम्बना उत सर्वशाखागतोद्गीथाद्यालम्बना इति । पूर्वोत्तरपक्षयोः पूर्वोत्तरकोटिसिद्धिः फलम् । उपासनाविचारात्मकत्वात्साधनपादसङ्गतिः । तत्र, यथा शरीरात्मनोर्भेदादात्मधर्माणां शरीरे न सम्भवः, तद्वदेकशाखागतोद्गीथाद्यपेक्षया शाखान्तरगतो-

ङ्गोपास्तेः स्वरभेदेन भेदादेकशाखागतोद्गीथादिधर्माणामुपासनानां शाखान्तरगतोद्गीथादौ न सम्भवः । इति दृष्टान्तेन प्राप्ते ब्रूमः "अङ्गावबद्धा" इति । तुः पूर्वपक्षनिरासार्थः । एता अङ्गाश्रिता उपासनाः प्रतिवेदं स्वस्वशाखासु विद्यमानोद्गीथाद्यालम्बना एव न भवन्ति, किन्तु शाखान्तरोद्गीथालम्बना अपि । कुतः । "उद्गीथमुपासीत" इत्यादावुद्गीथादिश्रुतेरविशेषात्, इति हिशब्दसूचितो हेतुर्बोध्यः ॥

इममर्थं दृष्टान्तमुखेनापि साधयति ।

मन्त्रादिवद्वाऽविरोधः ॥ ३ । ३ । ५६ ॥

एकशाखाविहितोपासनानां शाखान्तरगतोद्गीथादिषु प्राप्तिरविरोधः, मन्त्रादिवत् । तथाहि, यथा तण्डुलपेषणार्थमश्मादानमन्त्रः "कुटरुरसी"त्येकत्राम्नातः शाखान्तरेऽपि प्राप्नोति, यथा वा प्रयाजा एकत्राम्नाताः शाखान्तरेऽपि प्राप्नुवन्ति, तद्वदत्राप्यविरोधः । वाशब्दो दृष्टान्तप्रदर्शनरूपहेत्वन्तरसूचनार्थः । तस्मादेकत्र विहितानामप्युपासनानां शाखान्तरीयोद्गीथादिषु प्राप्तिरिति सिद्धम् ॥

भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति ॥ ३ । ३ । ५७ ॥

वैश्वानराख्यायिकायां प्राचीनशालादिषडृषीणां राज्ञा सह प्रश्नप्रतिवचनाभ्यां द्युलोकसूर्यवाय्वादिषु व्यस्तेषु वैश्वानरोपास्तिः श्रुता । तथा समस्तेष्वपि वैश्वानराधिकरणे लिखिताऽऽख्यायिका ऽत्राप्यनुसन्धेया । तत्र संशयः, किमिह व्यस्ताऽप्युपास्तिर्विवक्षिता, उत समस्तो-

पास्तिरेवेति । अत्र पूर्वपक्षे वाक्यभेदः, सिद्धान्ते तदैक्यमिति बोध्यम् । तत्रोद्गीथादिश्रुत्या सन्निधिप्राप्तव्यवस्थां बाधित्वोद्गीथाद्युपास्तीनां सर्वशाखास्वव्यवस्थावत्, अत्रापि व्यस्तोपास्तीनां विधिश्रुत्या समस्तोपास्तिसन्निधिप्राप्तस्तुत्यर्थत्वं बाधित्वा विधेयत्वं युक्तमिति दृष्टान्तेन प्राप्ते ब्रूमः । भूम्नः समस्तोपासनस्यैवास्मिन्वाक्ये ज्यायस्त्वं प्राधान्येन प्रतिपाद्यत्वं, न व्यस्तोपास्तीनामपि । क्रतुवत् । यथा दर्शपूर्णमासादेः क्रतोः साङ्गप्रधानस्यैकस्यैव प्रयोगो विवक्ष्यते न व्यस्तानामपि प्रयाजादीनां, तद्वत् । ननु भूम्न एव ज्यायस्त्वं कुतः, इत्यत आह "तथा ही"ति । प्राचीनशालादिभिरुक्तानि व्यस्तोपासनानि निन्दित्वा कैकेयेन राज्ञाऽव्यस्तोपासनस्योक्तत्वादेकवाक्यता श्रुतेरवगम्यते । तथाचैकवाक्यतामापन्नेयं श्रुतिर्भूम्न एव ज्यायस्त्वं दर्शयतीत्यर्थः । ननु तर्हि राज्ञः प्राचीनशालादीन्प्रति "हे औपमन्यव कं त्वमात्मानं वैश्वानरमुपास्से"इति प्रश्ने "हे राजन्सुतेजा द्युलोको वैश्वानरो यं त्वं वैश्वानरमुपास्से" इत्यादौ व्यस्तोपास्तिषु विधिश्रुतीनां का गतिरिति चेत्, प्राचीनशालादिभिरवगतव्यस्तोपास्त्यनुवादेन समस्तोपासनस्य विधेयत्वादनुवादत्वमेव विधिश्रुतीनां गतिरिति । तस्मात्समस्तोपासनमेव ज्याय इति सिद्धम् ॥

नाना शब्दादिभेदात् ॥ ३ । ३ । ५८ ॥

एकसगुणब्रह्मोपास्यकाः शाण्डिल्यदहरादिविद्याः सन्ति । एवमेकमुख्यप्राणविद्या अपि सन्ति । तत्र संशयः, किमेकोपास्यकविद्यानां भेदोऽस्ति न वेति । पादसङ्गतिफले पूर्ववत् । तत्र व्यस्तोपास्तिषु विधिश्रुतीनां सत्त्वेऽपि

समस्तोपास्तेरेव ज्यायस्त्ववत्, एकोपास्यकोपास्तिषु प्रत्येकं विधीनां सत्त्वेऽपि समस्तोपास्तेरेव ज्यायस्त्वात्, नास्ति विद्यायां भेद इति दृष्टान्तेन प्राप्ते ब्रूमः । एकोपास्यकविद्या नानैव । कुतः । शब्दादिभेदात्, "वेद" "उपासीत" "स क्रतुं (सङ्कल्पं) कुर्वीत" इत्यादिशब्दभेदात् । आदिपदेनोपास्यगुणभेदाच्चेत्यर्थः । यथा यागदानहोमानां कर्मणां 'यजेत्' 'दद्यात्' 'जुहुयात्' इति शब्दभेदाद्भेदः, तद्वदिति द्रष्टव्यम् ॥

विकल्पोऽविशिष्टफलत्वात् ॥ ३ । ३ । ५९ ॥

याः सगुणब्रह्मादिविद्या उपास्यसाक्षात्करणेन फलहेतवः, तासां किं स्वेच्छया विकल्पसमुच्चयाभ्यामनुष्ठानमुत विकल्प इति संशयः । पूर्वपक्षे स्वेच्छया विद्यासु प्रवृत्तेर्या काचिदेकैव विद्या यावज्जीवमनुष्ठेयेति विकल्पोऽपि नास्ति द्वित्र्यादयो विद्याः समुच्चयेनानुष्ठेया इत्यपि नास्तीत्यनियमः फलम्, सिद्धान्ते विकल्प एवेति नियमः, इति भेदः । पूर्वाधिकरणेन विद्यानानात्वे सिद्धेऽयं विचारः प्रवर्तते, नो चेन्नास्तीति हेतुहेतुमद्भावसङ्गतिः । तत्रानुष्ठाननियमे हेत्वभावाद्यथेच्छमनुष्ठानमिति प्राप्ते ब्रूमः । विकल्प एवासां विद्यानां युक्तः । कुतः । अविशिष्टफलत्वात् । अविशिष्टं ह्यासां विद्यानामुपास्यसाक्षात्करणाख्यं फलम् । तत्रैकया विद्ययोपास्ये साक्षात्कृते विद्यान्तरमफलम् । विरुद्धोपास्यद्वयसाक्षात्कारस्य युगपदयोगाच्च विद्यान्तरं व्यर्थम् । "तं तमेवैति कौन्तेय सदा तद्भावभावितः" इति भगवद्गीतासु स्पष्टमेकविद्याया एवानुष्ठेयत्वं दर्शयति । तस्मादुपास्यसाक्षात्कारद्वारा फलहेतुभूता विद्यैकैवानुष्ठेयेति सिद्धम् ॥

Digitized by Google

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहे-त्वभावात् ॥ ३ । ३ । ६० ॥

याश्च प्रतीकोपास्तयो "नाम ब्रह्मेत्युपासीत तस्य यथाकामचारो भवती"त्याद्याः काम्या उपास्यसाक्षात्कारानपेक्षा एवादृष्टद्वारा फलहेतवस्तासु पूर्ववत्सन्देहे, उपास्तित्वाविशेषात्पूर्ववद्विकल्पनियमः, इति प्राप्ते, ब्रवीति "काम्या"स्त्विति । काम्यास्त्वदृष्टद्वारा फलहेतवो विद्या यथाकामं समुच्चीयेरन्न वा समुच्चीयेरन्, पूर्वहेतोरविशिष्ट-फलत्वस्य विकल्पनियमप्रयोजकस्यात्राभावादित्यर्थः । तथा च, प्रतीकोपास्तयो विकल्पेनैवानुष्ठेयाः, उपास्तित्वात्, पूर्वोक्तविद्यावत्, इत्यनुमाने, उपास्यसाक्षात्कार-हेतुत्वमुपाधिरिति भावः ॥

अङ्गेषु यथाश्रयभावः ॥ ३ । ३ । ६१ ॥

कर्माङ्गेषूद्गीथादिषु या आश्रिता विद्यास्तासां किं समुच्चयेनैवाङ्गवदनुष्ठानमुत यथाकाममिति संशयः । पूर्व-पक्षे समुच्चयेनानुष्ठानात्फलबाहुल्यं, सिद्धान्ते यथाकाम-मनुष्ठानात्प्रयोगसौकर्यमिति बोध्यम् । तत्र प्रतीकोपा-स्तीनां स्वतन्त्रत्वाद्यथाकाममनुष्ठानं युक्तम् । अङ्गाश्रितो-पास्तीनामङ्गतन्त्रत्वाद्यथाश्रयभावः । यथाश्रयाणामङ्गा-नामनुष्ठानस्य भावस्तद्वदनुष्ठानस्य भावः । इति प्रत्युदा-हरणेन पूर्वपक्षः ॥

शिष्टेश्च ॥ ३ । ३ । ६२ ॥

शिष्टिः शासनं विधानमित्यर्थः । यथाऽङ्गानां प्रति-

Digitized by Google

वेदं विधानं तथा तदाश्रितोपासनानां विधानाविशेषा-
दाङ्गवत्समुच्चयनियमः ॥

इतश्चैवमेवेत्याह ।

समाहारात् ॥ ३ । ३ । ६३ ॥

ऋग्वेदोक्तप्रणवस्य सामवेदोक्तोद्गीथस्य चैक्योपा-
सन उद्गात्रा कृते फलमाह श्रुतिः "होतृषदनाद्धैवापि
दुरुद्गीथमनुसमाहरती"ति । होतृषदनशब्देन होतृशंसन-
स्थानवाचिना होतृकृतं शंसनाख्यं कर्म लक्ष्यते । उद्गाता
प्रणवोद्गीथयोरैक्यज्ञानमाहात्म्यात्स्वेन कृतं दुरुद्गीथमपि
स्वरादिप्रमादाद्दुष्टमप्युद्गानं होत्रा सम्यक्कृतशस्त्रसहाया-
दनुसमाहरत्येव ह प्रतिसमादधात्येव खलु । होतृकर्मस-
म्बद्धोङ्कारस्यर्ग्वेदोक्तस्य स्ववेदोक्तोद्गीथस्य चैक्येन चि-
न्तितत्वादित्यर्थः । तथा च वेदद्वयोक्तप्रणवोद्गीथयोरै-
क्यज्ञानस्येदृशं फलं ब्रुवद्वाक्यं सर्ववेदोक्तानामप्यङ्गाश्रि-
तोपासनानां समुच्चयं सूचयति । सर्वोपासनेषु वेदान्तरो-
क्तोद्गीथादिना सम्बन्धस्य भासमानत्वादिति सूत्रकृत्ता-
त्पर्यम् ॥

गुणसाधारण्यश्रुतेश्च ॥ ३ । ३ । ६४ ॥

उद्गीथोपासनायां गुणभूतस्योपास्यस्योङ्कारस्य "ते-
नेयं त्रयी विद्या वर्तते" (तेनोङ्कारेण वेदत्रयोक्तं कर्म
भवति) इति सर्वकर्मणि साधारण्यस्य श्रवणात्तदाश्रि-
तोपासनानामपि साधारण्यं समुच्चित्यानुष्ठानमित्यर्थः ।
यद्वा, कर्मगुणानामुद्गीथादीनां सर्वेषां समुच्चित्यानुष्ठाना-
त्मकसाधारण्याभावे हि तदाश्रितोपासनानां समुच्चयो न
भवेत् । नैतदस्ति, प्रयोगवचनेन सर्वाङ्गग्राहिणा तेषां

साधारण्यश्रुतेः । तथाच तदाश्रितानामुपासनानामपि समुच्चय इत्यर्थः ॥

एवं प्राप्ते सिद्धान्तयति ।

न वा तत्सहभावाश्रुतेः ॥ ३ । ३ । ६५ ॥

वाशब्दस्त्वर्थः पक्षव्यावर्तनार्थः । नाङ्गाश्रितोपासनानामङ्गवत्समुच्चयनियमः, तत्सहभावाश्रुतेः । यथाऽङ्गानां सहभावः श्रूयते "ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्या"दित्यादिना, तथा तेषामुपासनानां सहभावस्याश्रुतेरित्यर्थः । न चाङ्गतन्त्रत्वादुपासनानां समुच्चयनियमः, अङ्गतन्त्रस्यापि गोदोहनस्यानुष्ठानानियमात् । यदुक्तं "शिष्टेश्चे"ति सूत्रेऽङ्गवद्विधानाविशेषात्समुच्चय इति तन्न । तेन हीदमनुमानं लभ्यते, उपासनानि समुच्चित्यानुष्ठेयानि, विहितत्वात्, अङ्गवत्, इति । तत्र च क्रत्वर्थत्वमुपाधिः । परं च सूत्रद्वयोक्तं लिङ्गद्वयमप्रयोजकत्वेन दूषणीयम् ॥

दर्शनाच्च ॥ ३ । ३ । ६६ ॥

दर्शयति च श्रुतिरङ्गाश्रितोपासनानामसमुच्चयं "एवं विद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोऽभिरक्षती"ति । ऋग्वेदादिविहिताङ्गलोपे व्याहृतिहोमप्रायश्चित्ताभिज्ञत्वं ब्रह्मण एवंवित्त्वम् । सर्वोपासनानां समुच्चये हि विज्ञानवता ब्रह्मणा परिपाल्यत्वमितरेषामृत्विजां न स्यात्, सर्वेषां सर्ववित्त्वात् । अस्ति च परिपाल्यत्वकीर्तनम् । तस्मान्न सर्वोपासनासमुच्चय इति सिद्धम् ॥

इति तृतीयाध्यायस्य तृतीयः पादः ॥

पुरुषार्थोऽतः शब्दादिति बादरायणः ॥ ३ । ४ । १॥

पूर्वस्मिन्पादे परापरब्रह्मविद्यानां गुणोपसंहारोक्त्या परिमाणमवधारितम् । इह तासां कर्मानपेक्षाणामेव पुरुषार्थसाधनत्वं निरूप्यते । तत्र कर्मानपेक्षाणामासां विद्यानां कान्यङ्गानीत्याकाङ्क्षायां, यज्ञादीनि बहिरङ्गानि शमादीन्यन्तरङ्गाणि च निरूप्यन्ते । इत्येकविद्याविषयकत्वमनयोः पादयोः सङ्गतिः । तत्र परब्रह्मविद्यामाश्रित्य विचार्यते, किमौपनिषदात्मविद्या कर्मकर्तृद्वारा क्रत्वनुप्रवेशिनो, उत स्वतन्त्रपुरुषार्थसाधनमिति । अत्र पूर्वोत्तरपक्षयोः पूर्वोत्तरकोटिसिद्धिः फलम् । पूर्वपादान्त्याधिकरणे कर्माङ्गविद्योक्तिप्रसङ्गाद्ब्रह्मज्ञानस्य कर्माङ्गत्वमाशङ्क्य सिद्धान्तमुपक्रमते "पुरुषार्थ" इति । अतोऽस्मादौपनिषदात्मज्ञानात्स्वतन्त्रात्पुरुषार्थो मोक्षः सिद्ध्यतीति बादरायण आचार्यो मन्यते । कुतः । "तरति शोकमात्मवित्" "ब्रह्मवेद ब्रह्मैव भवति" इत्यादेः केवलविद्याया मोक्षहेतुत्वबोधकशब्दादित्यर्थः । इदमुपलक्षणम् । सगुणविद्यानामपि स्वातन्त्र्येण फलहेतुत्वं तत्फलश्रुतेरिति बोध्यम् ॥

एवं सिद्धान्तमुपक्रम्य पूर्वपक्षयति ।

शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति
जैमिनिः ॥ ३ । ४ । २ ॥

कर्तृत्वेनात्मनः कर्मशेषत्वात्तज्ज्ञानमपि पर्णतावत्कर्मशेषात्मद्वारा क्रत्वङ्गम् । अत्रायं प्रयोगः । तत्त्वज्ञानं कर्माङ्गम्, फलशून्यत्वे सति कर्माङ्गाश्रयत्वात्, पर्णतावत्,

Digitized by Google

इति । ननु विशेषणासिद्धो हेतुः "तरति शोकमात्मवित्" इत्यादिफलश्रुतेः सत्त्वादित्यत आह "पुरुषे" ति । यथाऽन्येषु द्रव्यसंस्कारकर्मसु पर्णमयी द्रव्ययजमानस्नाञ्जनादिसंस्कारप्रयाजादिरूपेष्वपापश्लोकश्रवणादिफलश्रुतिरर्थवादः, तथाऽत्रापि पुरुषार्थश्रुतिरर्थवाद इति जैमिनिराचार्यो मन्यते । तथा च न हेतोर्विशेषणासिद्धिरिति भावः ॥

आचारदर्शनात् ॥ ३ । ४ । ३ ॥

"जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे" इत्यादौ ब्रह्मविद्यावतां जनकादीनां विद्यया सह कर्माचारदर्शनाल्लिङ्गाद्विद्यायाः स्वातन्त्र्याभावेन कर्माङ्गत्वमित्यर्थः । विदेहानामधिपतिर्जनको नाम राजा बहुदक्षिणसंज्ञेनाश्वमेधेन वा बहुदक्षिणायुक्तेनेजे यागं कृतवानित्यर्थः ॥

तच्छ्रुतेः ॥ ३ । ४ । ४ ॥

किञ्च, "यदेव (कर्म) विद्यया करोति तदेव वीर्यवत्तरं भवती" ति तृतीयाश्रुत्या विद्यायास्तस्य कर्मशेषत्वस्य श्रवणान्न स्वातन्त्र्येण मुक्तिफलत्वमित्यर्थः ॥

समन्वारम्भणात् ॥ ३ । ४ । ५ ॥

"तं विद्याकर्मणी समन्वारभेते" इति फलारम्भे विद्याकर्मणोः साहित्यदर्शनादपि न मुक्तिफलत्वं विद्यायाः । किन्तु कर्माङ्गत्वमेवेत्यर्थः । तं परलोकं व्रजन्तं विद्याकर्मणी समनुगच्छत इति श्रुत्यर्थः ॥

रवर्जमित्युक्तेः कण्वादिभ्यो गोत्रे इति शैषिकोऽण् । अणिञोः किम् । दाक्षेरपत्यं युवा दाक्षायणः । पणनं पणः । घञर्थे कविधानमिति कः । सोऽस्यास्तीति पणी । तस्य गोत्रापत्यं पाणिनः । गाथिविदथीति प्रकृतिभावाट्टिलोपो न । ततो यूनि इञ् । पाणिनिः । अत्रेञो न लुक् । आर्षग्रहणेन प्रतिपदोक्तस्य ऋष्यण एव ग्रहणात् । अयं ह्यौत्सर्गिक एवाण् । यच्च ह्यौत्सर्गिकस्येञा बाधः प्राप्तस्तस्यैव तद्बाधनार्थं ऋष्यण्प्रवृत्तेः । यद्वा पाणिनशब्दो यौगिको न तु रूढः । लुग्विधौ तु रूढस्यैव ग्रहणम् । एतच्च दाक्षीपुत्रस्य पाणिनेर्भगवतः पाणिनेः सिद्धमिति भाष्यवार्तिकप्रयोगादुन्नीतमिति बोध्यम् ॥ अब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानम् ॥ * ॥ भाण्डिजङ्घिः पिता । भाण्डिजंघिः पुत्रः । इञन्तात्फको लुक् ॥

पैलादिभ्यश्च । २ । ४ । ५९ ॥

एभ्यो युवप्रत्ययस्य लुक् स्यात् ॥ पीलाया वेत्यण् । तस्मादणो द्व्यच इति फिञ् तस्य लुक् । पैलः पिता पुत्रश्च ॥ तद्राजाच्चाणः ॥ * ॥ द्व्यञ्मगधेत्यणन्तादाङ्गशब्दादणो द्व्यच इति फिञो लुक् । आङ्गः पिता पुत्रश्च ॥

इञः प्राचाम् । २ । ४ । ६० ॥

गोत्रे य इञ् तदन्ताद्युवप्रत्ययस्य लुक् स्यात्तच्चेद्गोत्रं प्राचां भवति ॥ पन्नागारस्यापत्यं अत इञ् यञिञोश्चेति फक् । पान्नागारिः पिता पुत्रश्च । प्राचां किम् । दाक्षिः पिता । दाक्षायणः पुत्रः ।

न तौल्वलिभ्यः । २ । ४ । ६१ ॥

तौल्वल्यादिभ्यः परस्य युवप्रत्ययस्य लुक् न स्यात् ॥ पूर्वेण प्राप्तः । तुल्वलस्यात इञि फक् । तौल्वलिः पिता । तौल्वलायनः पुत्रः ॥

Digitized by Google

तद्राजस्य बहुषु तेनैवास्त्रियाम् । २ । ४ । ६२ ॥

ते तद्राजाः अञादयस्तद्राजा इति च वक्ष्यति । बहुष्वर्थेषु तद्राजसंज्ञकस्य लुक् स्यात्तदर्थकृते बहुत्वे न तु स्त्रियाम् ॥ अङ्गाः । वङ्गाः । लोहितध्वजा इत्यादि । कथं तर्हि कौरव्याः पशवः, तस्यामेव रघोः पाण्ड्याः, इति च । कौरव्ये पाण्ड्ये च साधवः तत्रभवाणा इति वा समाधेयम् । रघूणामन्वयं वक्ष्ये, निरुद्ध्यमाना यदुभिः कथञ्चिदिति तु रघुयदुशब्दयोस्तदपत्ये लक्षणयेत्याहुः । तद्राजस्य किम् । औपगवाः । बहुषु किम् । आङ्गः । लोहितध्वज्यः । तेनैव किम् । प्रियो वाङ्गो येषां ते प्रियवाङ्गाः । अस्त्रियां किम् । आङ्ग्यः स्त्रियः ॥

यस्कादिभ्यो गोत्रे । २ । ४ । ६३ ॥

एभ्यो विहितस्यापत्यप्रत्ययस्य लुक् स्यात् तत्कृते बहुत्वे न तु स्त्रियाम् ॥ अपत्याधिकारादन्यत्र लौकिकं गोत्रम् । यस्काः । शिवाद्यणो लुक् । बहुषु किम् । यास्कः । तेनैव किम् । प्रिययास्काः । अस्त्रियां किम् । यास्क्यः स्त्रियः । गोत्रे किम् । यास्काश्छात्राः । शैषिकोऽण् । विहितविशेषणान्नेह । यास्कायनयः । शिवाद्यणन्ताद्यून्यणो ह्रस्व इति फिञ् ॥

यञञोश्च । २ । ४ । ६४ ॥

गोत्रे यद्यञन्तमञन्तञ्च तदवयवयोरेतयोर्लुक् स्यात्तत्कृते बहुत्वे न तु स्त्रियाम् । गर्गाः । वत्साः । गर्गादियञो लुक् । विदाः । उर्वाः । विदाद्यञो लुक् । बहुषु किम् । गार्ग्यः । वैदः । तेनैव किम् । प्रियगार्ग्याः । प्रियवैदाः । अस्त्रियां किम् । गार्ग्यः

Digitized by Google

स्त्रियः । गोत्रे किम् । द्रौप्याः । औत्समञ्जायाः । लौकिकगोत्रत्वाभावात्पौत्रा दौहित्रा इत्यत्र न लुक् । तद्धि प्रवराध्यायप्रसिद्धम् ॥ यञादीनामेकद्वयोर्वा तत्पुरुषे षष्ठ्या उपसंख्यानम् ॥ * ॥ गार्ग्यस्य गार्ग्ययोर्वा कुलं गर्गकुलं गार्ग्यकुलं वा । वैदस्य वैदयोर्वा कुलं विदकुलं वैदकुलं वा । यञादीनां किम् । आङ्गकुलम् । इतः प्रभृति ये प्रत्यया बहुषु लुग्भाजस्ते यञादयः । आदिशब्दस्य व्यवस्थावाचित्वात् । एकद्वयोः किम् । गर्गाणां कुलं गर्गकुलमित्येव । तत्पुरुषे किम् । गार्ग्यस्य समीपं उपगार्ग्यम् । षष्ठ्याः किम् । परमगार्ग्यः ॥

अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च । २ । ४ । ६५ ॥

एभ्यो गोत्रप्रत्ययस्य लुक् स्यात् बहुषु तेनैवास्त्रियाम् ॥ अत्रयः । इतश्चानिञ इति ढको लुक् । भृगवः । कुत्साः । वसिष्ठाः । गोतमाः । अङ्गिरसः । अण्यो लुक् ॥

बह्वच इञः प्राच्यभरतेषु । २ । ४ । ६६ ॥

बह्वचः परो य इञ् प्राच्यगोत्रे भरतगोत्रे च वर्तमानस्तस्य लुक् स्यात् बहुषु ॥ पन्नागाराः । युधिष्ठिराः । अतइञ्बाह्वादीञो लुक् । बह्वचः किम् । वैकयः । पौष्पयः । इञः किम् । नाकुलाः । अण्याद्यञ् । प्रेत्यादि किम् । बालकयः । बाह्वादीञ् । भरताः प्राच्या एव । तेषां पुनर्ग्रहणं ज्ञापनार्थं अन्यत्र प्राग्ग्रहणे भरतानामग्रहणमिति । तेन इञः प्राचामिति भरतानां युवप्रत्ययस्य लुक् न । आर्जुनिः पिता । आर्जुनायनः पुत्रः । बाह्वादीञः फक् ॥

न गोपवनादिभ्यः । २ । ४ । ६७ ॥

गोत्रप्रत्ययस्य लुक् न स्यात् ॥ बिदाद्यन्तर्गणोऽयम् । यञञोश्चेति प्राप्तः प्रतिषिध्यते । गोपवनाः । शैग्रुबिन्दवाः ॥

Digitized by Google

तिककितवादिभ्यो द्वन्द्वे । २ । ४ । ६८ ॥

एभ्यो गोत्रप्रत्ययस्य बहुषु लुक् स्यात् द्वन्द्वे ॥ तैकायनयश्च कैतवायनयश्च तिकाकितवा इत्यादिभ्यः फिञ् तस्य लुक् । तिककितवाः ॥

उपकादिभ्यो ऽन्यतरस्यामद्वन्द्वे । २ । ४ । ६९ ॥

एभ्यो गोत्रप्रत्ययस्य बहुषु लुग्वा स्यात् द्वन्द्वे चाद्वन्द्वे च । अद्वन्द्वग्रहणं द्वन्द्वनिवृत्त्यर्थम् । उपकाः । लमकाः । नडादित्वात्फको लुक् । औपकायनाः । लामकायनाः । द्वन्द्वे तु तिककितवादिषु पाठान्नित्यम् । भ्राष्ट्रककापिष्ठलाः । भ्राष्ट्रकिकापिष्ठलयः । भ्राष्ट्रकाः । कपिष्ठलाः । भ्राष्ट्रकयः । कापिष्ठलयः ॥

आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् । २ । ४ । ७० ॥

एतयोरवयवस्य गोत्रप्रत्ययस्याणो यञश्च बहुषु लुक् स्यादवशिष्टप्रकृतिभागस्य यथासंख्यमगस्ति कुण्डिनच् एतावादेशौ स्तः ॥ चित्वं स्वरार्थम् । अगस्तयः । कुण्डिनाः । अगस्त्यशब्दादृष्यण् । अगस्तिप्रकृतिकगर्गादियञन्ते तु यञञोश्चेत्येव सिद्धम् । लुग्विधानेनागस्तीनां छात्रा इत्यर्थविवक्षायां गोत्रे लुगचीति लुकि प्रतिषिद्धे तत्सन्नियोगशिष्टादेशनिवृत्तौ वृद्धत्वाच्छे आगस्तीया इत्यादिरूपसिद्धिः । कौण्डिन्यस्य त्वणेव भवितव्यम् । कण्वादिभ्यो गोत्रे इति तत्र विशेषो नास्तीति कौण्डिनाश्छात्राः ॥

सुपो धातुप्रातिपदिकयोः । २ । ४ । ७१ ॥

एतयोरवयवस्य सुपो लुक् स्यात् ॥ पुत्रीयति । राजपुरुषः । सुपः किम् । पुत्रीयतीत्यत्र क्यचो ऽपि माभूत् । धातुप्रातिपदिकयोः किम् । वृक्षः ॥

अदिप्रभृतिभ्यः शपः। २। ४। ७२॥

लुक् स्यात्॥ अत्ति॥

बहुलं छन्दसि। २। ४। ७३॥

शपो लुक्। वृत्रं हनति वृत्रहा। अहिः शयते। प्राप्तोऽपि न भवति। त्राध्वन्नो देवाः। अप्राप्तोऽपि भवति।

यङोऽचि च। २। ४। ७४॥

यङोऽच्प्रत्यये लुक् स्याच्चकारात्तं विनाऽपि बहुलं लुक्। लोलुवः। पोपुवः। लोलवीति। पोपवीति। अनैमित्तिकोऽयमन्तरङ्गत्वादादौ भवति। ततः प्रत्ययलक्षणेन यङन्तत्वाद्द्वित्वमभ्यासकार्यम्। धातुत्वाल्लडादयः। शेषात्कर्तरीति परस्मैपदम्। अनुदात्तङित इति तु न। ङित्वस्य प्रत्ययाप्रत्ययसाधारणत्वेन प्रत्ययलक्षणाप्रवृत्तेः। यत्र हि प्रत्ययस्यासाधारणं रूपमाश्रीयते तत्रैव तत्। अत एव सुदृषत्प्रासाद इत्यत्रात्वसन्तस्येति दीर्घो न। येऽपि स्पर्द्धशीङादयोऽनुदात्तङितस्तेभ्योऽपि न। अनुबन्धनिर्देशात्। तत्र तु श्तिपा शपेति निषेधात्। अत एव श्यन्नादयोऽपि न। गणेन निर्देशात्। किन्तु शबेव। चर्करीतञ्चेत्यदादौ पाठाच्छपो लुक्॥

जुहोत्यादिभ्यः श्लुः। २। ४। ७५॥

शबनुवर्तते। शपः श्लुः स्यात्॥ लुकि प्रकृतेऽपि श्लाविति द्विर्वचनार्थं श्लुः। जुहोति। बिभर्ति॥

बहुलं छन्दसि। २। ४। ७६॥

शपः श्लुः॥ दाति प्रियाणि। प्राप्तोऽपि न भवति। पूर्णां विवष्टि। अप्राप्तोऽपि भवति॥

गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु । २ । ४ । ७७ ॥

लुगनुवर्तते । एभ्यः सिचो लुक् स्यात्परस्मैपदेषु ॥ अगात् । अस्थात् । अदात् । अधात् । अपात् । अभूत् । गापाविहेणादेश-पिबती गृह्येते । गातीति श्तिपा विकरणशून्यस्य निर्देशात् । पिब-तेरलुग्विकरणत्वात्प्रतिपदोक्तत्वाच्च । पातेः पै ओवै शोषणे इत्यस्य च न ग्रहणम् । एकस्य लुग्विकरणत्वादपरस्य लाक्षणिकत्वात् । तेनेह न । अगासीन्नटः । अपासीन्नृपः । परस्मैपदेषु किम् । अगासातां ग्रामौ देवदत्तेन ॥

विभाषा घ्राधेट्शाच्छासः । २ । ४ । ७८ ॥

एभ्यः सिचो लुग्वा स्यात्परस्मैपदेषु ॥ अघ्रात् । अघ्रासीत् । अधात् । अधासीत् । अशात् । अशासीत् । अच्छात् । अच्छासीत् । असात् । असासीत् । स्यतेरेव ग्रहणं श्यन्विकरणाभ्यां शाच्छाभ्यां साह-चर्यात् न तु क्षै जै षै क्षये इत्यस्य । तेनेह न । असासीत् । परस्मै-पदेषु किम् । अघ्रासातां सुमनसौ देवदत्तेन ॥

तनादिभ्यस्तथासोः । २ । ४ । ७९ ॥

तनादेः सिचो वा लुक् स्यात् तथासोः ॥ अतत । अत-निष्ट । अतथाः । अतनिष्ठाः । थासा साहचर्यादेकवचनं तशब्दो गृह्यते । तेनेह न । यूयमतनिष्ट ॥

मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिज-निभ्यो लेः । २ । ४ । ८० ॥

एभ्यो लेर्लुक् स्यान्मन्त्रे । अक्षन्नमीमदन्त । घस्लादेशस्य गमहनेत्युपधालोपे शासिवसीति षः । माह्वर्मित्रस्य । प्रणङ् मर्त्यस्य ।

नघोर्भेति कुत्वम् । सुरुचो वेन आवः । मान आधक् । आदित्याकारान्तग्रहणम् । प्रा पूरणे । आप्रा द्यावापृथिवी । परावर्ग्भारभृद्यथा । अक्रन्नुषासः । स्वेर्यम्स आगुर्वांसो अनुग्मन् । मन्त्रग्रहणं ब्राह्मणस्याप्युपलक्षणम् । अक्षन्त वा अस्य दन्ताः । विभाषानुवृत्तेर्नेह । न ता अगृभ्णन्नजनिष्ट ॥

आमः । २ । ४ । ८१ ॥

आमः परस्य लुक् स्यात् ॥ एधाञ्चक्रे ॥

अव्ययादाप्सुपः । २ । ४ । ८२ ॥

अव्ययाद्विहितस्यापः सुपश्च लुक् स्यात् ॥ तत्र शालायाम् । अत्र । विहितविशेषणान्नेह । अत्युच्चैसौ । अव्ययसंज्ञायां यद्यपि तदन्तविधिरस्ति तथापि न गौणे । आब्ग्रहणं व्यर्थमलिङ्गत्वात् ।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥

इति श्रुतिर्लिङ्गकारकसंख्याभावपरा ॥

नाव्ययीभावादतोऽम्त्वपञ्चम्याः । २ । ४ । ८३ ॥

अदन्तादव्ययीभावात्सुपो न लुक् तस्य पञ्चमीं विना ऽमादेशश्च ॥ उपकुम्भं तिष्ठति । उपकुम्भं पश्य । अत इति किम् । अधिहरि । अपञ्चम्याः किम् । उपकुम्भादानय ॥

तृतीयासप्तम्योर्बहुलम् । २ । ४ । ८४ ॥

अदन्तादव्ययीभावात्तृतीयासप्तम्योर्बहुलमम्भावः स्यात् ॥ उपकुम्भेन कृतम् । उपकुम्भं कृतम् । उपकुम्भे निधेहि । उपकुम्भं निधेहि । बहुलग्रहणात्सुमद्रमुन्मत्तगङ्गमित्यादौ सप्तम्या नित्यमम्भावः ॥

Digitized by Google

लुटः प्रथमस्य डारौरसः । २ । ४ । ८५ ॥

डा रौ रस् एते क्रमात् स्युः ॥ डित्वसामर्थ्यादभस्यापि टेर्लोपः । कर्ता । कर्तारौ । कर्तारः । प्रथमस्य किम् । कर्तासि । कर्तासे ।

इत्योरम्भट्टविरचितायां व्याकरणदीपिकायां पाणिनिसूत्रवृत्तौ
द्वितीयाध्यायस्य चतुर्थः पादोऽध्यायश्च
द्वितीयः समाप्तः ॥

Digitized by Google

श्रीगणेशाय नमः ॥

अथ तृतीयाध्यायस्य प्रथमः पादः ।

प्रत्ययः । ३ । १ । १ ॥

आ पञ्चमपरिसमाप्तेरधिकारोऽयम् ।

परश्च । ३ । १ । २ ॥

अयमपि तथा ॥

आद्युदात्तश्च । ३ । १ । ३ ॥

प्रत्यय आद्युदात्तः स्यात् ॥ अग्निः । कर्तव्यम् ॥

अनुदात्तौ सुप्पितौ । ३ । १ । ४ ॥

पूर्वस्यापवादः ॥ यज्ञस्य । न यो युच्छति । शप्तिपोरनुदात्तत्वे स्वरितप्रचयौ ॥

गुप्तिज्किद्भ्यः सन् । ३ । १ । ५ ॥

मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य । ३ । १ । ६ ॥

गुप गोपने । तिज निशाने । कित निवासे रोगापनयने च । मान पूजायाम् । बध बन्धने । दान खण्डने । शान तेजने । भ्वादिषु पठितेभ्य एतेभ्यः सूत्रद्वयोक्तेभ्यः सन्स्यान्मानादीनामभ्यासस्येकारस्य दीर्घश्च ॥ गुपेर्निन्दायाम् । तिज क्षमायाम् । कितेर्व्याधिप्रतीकारे । निग्रहेऽपनयने नाशने संशये च । मानेर्जिज्ञासायाम् । बधेश्चित्तविकारे । दानेरार्जवे । शानेर्निशाने । सनाद्यन्ता इति धातुत्वम् । सन्यङोरिति द्वित्वम् । अभ्यासकार्यम् । गुपिप्र-

Digitized by Google

भृतय: ञिद्विना निन्दाद्यर्थका एवानुदात्तेतौ दानशानौ चार्जवनिशानार्थावेव स्वरितेतौ । एते नित्यसन्नन्ताः । अर्थान्तरे त्वननुबन्धकाश्चुरादय: । अतो ऽनुबन्धस्य केवले ऽचरितार्थत्वात्सन्नन्तादात्मनेपदम् । धातोरित्यविहितत्वात्सनो ऽत्र नार्धधातुकत्वम् । तेनेड्गुणौ न । जुगुप्सते । जुगुप्साञ्चक्रे । तितिक्षते । चिकित्सति । संशये प्रायेण विपूर्वः । विचिकित्सा तु संशये इत्यमरः । अस्यानुदात्तेत्त्वमाश्रित्य विचिकित्सते इत्याद्युदाजहार कश्चित् । मीमांसते । भष्भावः । चर्त्वम् । बीभत्सते । दीदांसति । दीदांसते । शीशांसति । शीशांसते । निन्दाद्यर्थेभ्यो ऽन्यत्र गोपयति । तेजयति । केतयति । मानयति । बाधयति । दानयति । शानयति ॥

धातोः कर्मणः समानकर्तृकादिच्छायां वा । ३ । १ । ७ ॥

इषिकर्मण इषिणैककर्तृकाद्धातोरिच्छायां सन्प्रत्ययो वा स्यात् ॥ धातोर्विधेरिह सन आर्धधातुकत्वम् । इट् । द्वित्वम् । सन्यतः । पठितुमिच्छति पिपठिषति । यङ् । सन् । ण्यन्तात्सन् । बोभूयिषयिषति । कर्मणः किम् । गमनेनेच्छतीति करणान्माभूत् । समानकर्तृकात्किम् । शिष्याः पठन्त्वितीच्छति गुरुः । इच्छायां किम् । कर्तुं जानाति । वाग्रहणात्पक्षे वाक्यमपि ॥ आशङ्कायां सन्वक्तव्यः ॥ * ॥ श्वा मुमूर्षति । कूलं पिपतिषति ॥

शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः ॥
सरूपः प्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते ॥

शैषिकः सरूपो न । तेन शालीये भव इति वाक्यमेव ॥ न तु छान्ताच्छः । सरूपः किम् । आहिच्छत्रे भव आहिच्छत्रीयः । अणन्ताच्छः । तथा मत्वर्थात्सरूपः स न । दण्डवानस्यास्तीतीह

मतुबन्तान्मतुब्न । विरूपस्तु स्यादेव । दण्डिमती शाला । सन्नन्तान्न सनिष्यते इत्यत्रापि सरूप इत्यनुवर्त्यते । अर्थद्वारा सादृश्यन्तस्यार्थः । तेन इच्छासन्नन्तादिच्छासन्न । स्वार्थसन्नन्तात्तु स्यादेव । जुगुप्सिषते । मीमांसिषते ॥

सुप आत्मनः क्यच् । ३ । १ । ८ ॥

इषिकर्मण एषितृसम्बन्धिनः सुबन्तादिच्छायामर्थे क्यच्प्रत्ययो वा स्यात् ॥ धात्ववयवत्वात्सुपो लुक् । क्यचि चेतीत्वम् । आत्मनः पुत्रमिच्छति पुत्रीयति । वान्तो यि प्रत्यये । गव्यति । नाव्यति । लोपः शाकल्यस्येति तु न । नः क्ये इति नियमेनापदान्तत्वात् । प्रत्ययोत्तरपदयोश्च । त्वद्यति । मद्यति । एकार्थयोरित्येव । युष्मद्यति । अस्मद्यति । वाच्यति । अकृत्सार्वेति दीर्घः । कवीयति । समिध्यति । सुब्ग्रहणं किम् । वाक्यान्माभूत् । महान्तं पुत्रमिच्छति । आत्मनः किम् । राज्ञः पुत्रमिच्छति । ककारो नः क्ये इति सामान्यग्रहणार्थः । चकारस्तदविघातार्थः ॥ मान्तप्रकृतिकादव्ययाच्च क्यच् न ॥ * ॥ किमिच्छति । इदमिच्छति । स्वरिच्छति ॥ छन्दसि परेच्छायामपीति वक्तव्यम् ॥ * ॥ मा त्वा वृका अघायवः ॥

काम्यच्च । ३ । १ । ९ ॥

उक्तविषये काम्यच् स्यात् ॥ पुत्रमात्मन इच्छति पुत्रकाम्यति । पुत्रकाम्याञ्चकार । पुत्रकाम्यिता । यशस्काम्यति । सर्पिष्काम्यति । मान्ताव्ययेभ्योऽप्ययं स्यादेव । किङ्काम्यति । स्वःकाम्यति । कस्येत्संज्ञा न । फलाभावात् । चित्त्वं चिन्त्यप्रयोजनम् । धातुस्वरेण सिद्धेः ॥

उपमानादाचारे । ३ । १ । १० ॥

उपमानात्कर्मणः सुबन्तादाचारेऽर्थे क्यच् स्यात् ॥ पुत्रमिवाचरति पुत्रीयति छात्रम् । विष्णूयति द्विजम् ॥ अधिकरणाच्चेति वक्तव्यम् ॥ * ॥ प्रासादीयति कुट्यां भिक्षुः । कुटीयति प्रासादे ॥

कर्तुः क्यङ् सलोपश्च । ३ । १ । ११ ॥

उपमानात्कर्तुः सुबन्तादाचारे क्यङ् वा स्यात्सान्तस्य तु कर्तृवाचकस्य लोपो वा स्यात् ॥ क्यङ् वेत्युक्तेः पक्षे वाक्यम् । सान्तस्य लोपस्तु क्यङ्सन्नियोगशिष्टः स च व्यवस्थितः ।

ओजसोऽप्सरसो नित्यमितरेषां विभाषया ।

कृष्ण इवाचरति कृष्णायते ॥ ओजः शब्दो वृत्तिविषये तद्वति । ओजायते । अप्सरायते । यशायते । यशस्यते । विद्वायते । विद्वस्यते । त्वद्यते । मद्यते । अनेकार्थत्वे तु युष्मद्यते । अस्मद्यते ॥ आचारेऽवगल्भक्लीबहोडेभ्यः क्विब्वा ॥ * ॥ वाग्रहणात्क्यङपि । अवगल्भादयः पचाद्यजन्ताः । क्विप्सन्नियोगेनानुदात्तत्वमनुनासिकत्वञ्चाप्रत्ययस्य प्रतिज्ञायते । तेन तङ् । अवगल्भते । क्लीबते । होडते । भूतपूर्वादप्यनेकाच आम् एतद्वार्तिकारम्भसामर्थ्यात् । न चावगल्भते इत्यादिसिद्धिस्तत्फलम् । केवलानामेवाचारे वृत्तिसम्भवात् । धातूनामनेकार्थत्वात् । अवगल्भाञ्चक्रे । क्लीबाञ्चक्रे । होडाञ्चक्रे । वार्तिकेऽवेत्युपसर्गविशिष्टपाठात्केवलादुपसर्गान्तरविशिष्टाच्च क्यङेवेति माधवादयः । तन्नेति दूषितम् ॥ सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः ॥ * ॥ पूर्ववार्तिकन्तु अनुबन्धासक्त्यर्थम् । तत्र क्विबनूद्यते । प्रातिपदिकग्रहणादिह सुप इति न सम्बध्यते । तेन पदकार्यं न । कृष्ण इवाचरति कृष्णति । अतोगुणे इति शपा सह

पररूपम् । अ इवाचरति अति । अतः । अन्ति । प्रत्ययग्रहणमपनीय अनेकाच इत्युक्तेनाम् । औ । अतुः । उः । द्वित्वम् । अतो गुणे । अत आदेरिति दीर्घः । णल औ वृद्धिः । अतुसादिषु तु आतो लोप इटि चेत्यालोपः । मालेवाचरति । मालाति । लिङ्गविशिष्टपरिभाषया एकादेशस्य पूर्वान्तवत्त्वाद्वा क्विप् । मालाञ्चकार । लङि । अमालात् । अत्र हल्ङ्याब्भ्य इति लोपो न । ङीसाहचर्यादापोऽपि सोरेव लोपविधानात् । इट्सकौ । अमालासीत् । कविरिव कवयति । आशीर्लिङि कवीयात् । सिचि वृद्धिरित्यत्र धातोरित्यनुवर्त्य धातुरेव यो धातुरिति व्याख्यानान्नामधातोर्न वृद्धिरिति कैयटादयः । अकवयीत् । माधवस्तु नामधातोरपि वृद्धिमिच्छति । अकवायीत् । विरिव वयति । विवाय । विव्यतुः । अवयीत् । अवायीत् । श्रीरिव श्रयति । शिश्राय । शिश्रियतुः । पितेव पितरति । आशिषि लिङ् । पित्रियात् । भूरिव भवति । अत्र गातिस्थेति भुवो वुगिति भवतेर इति च न भवति । अभिव्यक्तत्वेन धातुपाठस्थस्यैव तत्र ग्रहणात् । अभावीत् । बुभाव । द्रुरिव द्रवति । श्रिण्णीति चङ् न । अद्रावीत् । अनुनासिकस्य क्वीति दीर्घः । इदामिवाचरति । ईदामति । राजेवाचरति राजानति । पन्था इवाचरति पथीनति । ऋभुक्षीणति । द्यौरिव देवतीति माधवः । अत्र ऊठि द्यवतीत्युचितम् । क इव कति । चकाविति हरदत्तः । माधवस्तु अयल्लोपाविति वचनारम्भाण्णलि वृद्धिं बाधित्वा अतो लोपात् चक इति रूपमाह । स्व इव सस्वौ । सस्व । यत्तु स्वामास स्वाञ्चकारेति तदनाकरमेव ॥

भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः । ३ । १ । १२ ॥

अभूततद्भावविषयेभ्यो भृशादिभ्यो भवत्यर्थे क्यङ् स्यात् हलन्तानामेषां लोपश्च ॥ अभृशो भृशो भवति भृशायते । अभ्वेरिति पर्युदासबलादभूततद्भाव इति लभ्यम् । तेनेह न । क्व दिवा भृशा भवन्ति ॥ ये रात्रौ भृशा अवधाद्यस्ते दिवा क्व भवन्तीत्यर्थः । सुमनस् अस्य सलोपः । सुमनायते । चुरादौ संग्रामं युद्धे इति पठ्यते तत्र संग्रामेति प्रातिपदिकं तस्मात्तत्करोतीति णिच् सिद्धः । तत्सन्नियोगेनानुबन्ध आसज्यते । युद्धे येऽयं ग्रामशब्द इत्युक्तेऽपि सामर्थ्यात्संग्रामशब्दे लब्धे विशिष्टपाठो ज्ञापयति उपसर्गसमानाकारं पूर्वपदं धातुसम्बन्धप्रयोजके प्रत्यये चिकीर्षिते पृथक् क्रियत इति । तेन मनस्शब्दात्प्रागट् । व्यमनायत । उन्मनायते । उदमनायत । एवञ्चावागल्भत अवागल्भिष्टेत्यादावप्यवेत्यस्य पृथक्करणं बोध्यम् । ज्ञापकञ्च सजातीयविषयकम् । तेन यत्रोपसर्गसदृशं रूपं सकलं श्रूयते नत्वादेशेनापहृतं तत्रैव पृथक्कृतिः । एवञ्च आ ऊढः ओढः स इवाचरथे ओढायित्वा । अत्र उन्मनाय्य अवगल्भ्येतिवन्न ल्यप् । ज्ञापकस्य विशेषविषयत्वे चाष्टं वार्त्तिकं तद्भाष्यञ्च प्रमाणम् । तथाहि ॥ उस्योमाङ्क्ष्वाटः प्रतिषेधः ॥ * ॥ उस्य ओमाङोश्च परयोराटः पररूपं नेत्यर्थः । उस्रामैच्छत् औस्रीयत् । औङ्कारीयत् । औढीयत् । आटश्चेति चशब्देन पुनर्वृद्धिविधानादिदं सिद्धमिति भाष्ये स्थितम् ।

लोहितादिडाज्भ्यः क्यष् । ३ । १ । १३ ॥

लोहितादिभ्यो डाजन्ताच्च भवत्यर्थे क्यष् स्यात् ॥ लोहितायति । लोहितायते । अभावेरित्यनुवृत्त्याऽभूततद्भावविषयत्वं लब्धम् । तच्च लोहितशब्दस्यैव विशेषणं न तु डाचो ऽसम्भवात् ।

Digitized by Google

भाष्यादिग्रन्थग्राह्याणां तस्य प्रत्याख्यानात् । तथा च वार्त्तिकम् । लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणीति । न चैवं काम्यच इव क्यषोऽपि ककारः श्रूयेत उच्चारणसामर्थ्यादिति वाच्यम् । तस्यापि भाष्ये प्रत्याख्यानात् । पटपटायति । पटपटायते । कृभ्वस्तियोगं विनापीह डाच् । डाजन्तात्क्यषो विधानसामर्थ्यात् । यत्तु

लोहितश्याममदुःखानि हर्षगर्वसुखानि च ।
मूर्छानिद्राकृपाधूमाः करुणा नित्यचर्मणी ॥

इति पठित्वा श्यामादिभ्योऽपि क्यषि पदद्वयमुदाहरन्ति तद्भाष्यवार्त्तिकविरुद्धम् । तस्मात्तेभ्यः क्यङेव । श्यामायते । दुःखादयो वृत्तिविषये तद्वति वर्तन्ते । लिङ्गविशिष्टपरिभाषया लोहिनीशब्दादपि क्यष् । लोहिनीयति । लोहिनीयते ॥

कष्टाय क्रमणे । ३ । १ । १४ ॥

चतुर्थ्यन्तात्कष्टशब्दादुत्साहेऽर्थे क्यङ् स्यात् । कष्टाय क्रमते कष्टायते । पापं कर्तुमुत्सहत इत्यर्थः ॥ सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायामिति वक्तव्यम् ॥ * ॥ कण्वं पापम् । सत्रादयो वृत्तिविषये पापार्थास्तेभ्यो द्वितीयान्तेभ्यश्चिकीर्षायां क्यङ् । पापं चिकीर्षतीत्यस्वपदविग्रहः । सत्रायते । कक्षायते इत्यादि ॥

कर्मणो रोमन्थतपोभ्यां वर्तिचरोः । ३ । १ । १५ ॥

रोमन्थतपोभ्यां क्रमेण वर्तनायां चरणे चार्थे क्यङ् स्यात् । रोमन्थं वर्तयति रोमन्थायते ॥ हनुचलने इति वक्तव्यम् ॥ * ॥ चर्वितस्याकृष्य पुनश्चर्वणे इत्यर्थः । नेह । कीटो रोमन्थं वर्तयति । अपानप्रदेशान्निःसृतं द्रव्यमिह रोमन्थः । तदश्नातीत्यर्थे इति

Digitized by Google

कोयत: । वर्तुलं करोतीत्यर्थ इति न्यासकारहरदत्तौ ॥ तपसः परस्मैपदञ्च ॥ * ॥ तपश्चरति तपस्यति ॥

बाष्पोष्मभ्यामुद्वमने । ३ । १ । १६ ॥

आभ्यां कर्मभ्यां क्यङ् स्यात् ॥ बाष्पमुद्वमति । बाष्पायते । ऊष्मायते ॥ फेनाच्चेति वक्तव्यम् ॥ * ॥ फेनायते ॥

शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे । ३ । १ । १७ ॥

एभ्यः कर्मभ्यः करोत्यर्थे क्यङ् स्यात् ॥ शब्दं करोति शब्दायते । पक्षे तत्करोतीति णिजपीष्यत इति न्यासकारः । शब्दयति ॥ सुदिनदुर्दिननीहारेभ्यश्च ॥ * ॥ सुदिनायते ॥ अटाट्टाशीकाकोटापोटासोटापृष्ठाप्लुष्वाग्रहणं कर्तव्यम् ॥ * ॥ अटायते । अट्टायते । शीकायते । कोटायते । पोटायते । सोटायते । पृष्ठायते । प्लुष्वायते ॥

सुखादिभ्यः कर्तृवेदनायाम् । ३ । १ । १८ ॥

सुखादिभ्यः कर्मभ्यो वेदनायामर्थे क्यङ् स्यात् वेदनाकर्तुरेव चेत्सुखादीनि स्युः ॥ सुखं वेदयते सुखायते । दुःखायते । कर्तृग्रहणं किम् । परस्य सुखं वेदयते ॥

नमोवरिवश्चित्रङः क्यच् । ३ । १ । १९ ॥

करणे इत्यनुवृत्तेः क्रियाविशेषे पूजायां परिचर्यायामाश्चर्ये च । नमस्यति देवान् । पूजयतीत्यर्थः । वरिवस्यति गुरून् । शुश्रूषत इत्यर्थः । चित्रीयते । विस्मयत इत्यर्थः । विस्मापयत इत्यन्ये ॥

पुच्छभाण्डचीवराणिणिङ् । ३ । १ । २० ॥

पुच्छादुदसने व्यसने पर्यसने च ॥ * ॥ विविधं विरुद्धं वोत्क्षेपणं व्यसनम् । उत्पुच्छयते । विपुच्छयते ॥ भाण्डात्समाच-

संस्कृतपुस्तकानां सूचीपत्रम् । मूल्य

श्रीभाष्यस्य प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं·श्रीराममिश्र-
शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः .. .. ६॥)

श्रीभाष्यस्य प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा .. ८।)

श्रीभाष्यस्य तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा .. ४॥)

वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः .. .. ३॥)

शेषपूर्त्तिः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं·स्वामिश्रीराममिश्रशास्त्रि-
प्रणीता निर्विशेषाद्वैतनिराकरणपरः .. .. १॥=)

शेषपूर्त्तिसहितो वेदार्थसंग्रहः .. .. ३॥)

शास्त्रदीपिका .. .. ८।)

सङ्कर्ष–काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-
न्द्रिकोपेतम्, पं·स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् । १।)

काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजप·दामोदर-
शास्त्रिणा संशोधिता पूर्वार्द्धरूपा .. .. ५॥)

तथा उत्तरार्द्धम् .. .. ८॥)

माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण
श्रीसायणाचार्येण विरचिता .. .. ७॥)

काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता ६॥)

श्रीतिङन्तार्णवतरणिः .. .. ६)

दिङ्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता .. .. ॥=)

जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता .. ५॥)

लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्याय-
मुक्तावल्याख्यया टीकया सहिता .. .. ॥)

सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना
विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम् ॥)

तत्त्वमुक्ताकलापः–सर्वार्थसिद्धियुतः, बोधायनीयार्थसिद्धान्तानुसारी विशिष्टाद्वै-
तब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्कि-
ककेसरिणा सर्वतन्त्रस्वतन्त्रधिषणेन श्रीवेङ्कटनाथदेशिकेन प्रणीतः ५॥=)

वेदान्तसिद्धान्तमुक्तावली, आर्थर्वीनिस्साहबकृताङ्गलभाषानुवादयुता .. १॥)

काव्यप्रकाशस्य इङ्गलण्डीयभाषानुवादः .. .. २॥)

अथर्ववेदसंहिताया इङ्गलण्डीयभाषानुवादः .. .. १२)

आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्य-
काराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम् .. .. .. ॥)

तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्विश्वकर्मविरचितया न्यायप्रदी-
पाख्यटीकया सहित .. .. १॥)

Digitized by Google

CONTENTS.

Page.

VYÁKARAṆADÍPIKA by Orambhatta, edited by Vyákaranáchárya Pandit Ganapati Shastree, Scholar, Sanskrit College, Benares ... ... 565, 573, 633, 737.

YAJUSHAJYOUTISHA, with Somákarasudhákara Bháshyas, edited by Mahamahopadhyaya Pandit Sudhákara Dvivedin, Professor, Sanskrit College, Benares ... ... 581, 589, 597, 605, 609, 617.

SHIVAJNANABODHA with a commentary, edited by the Rev. J. J. Johnson and Pt. Vámácharana Bhattácharya, Professor, Sanskrit College, Benares ... ... 649.

SHRIBHÁSHYA OF RÁMÁNUJA, (Text only,) Edited by the Revd. J. J. Johnson, Benares ... 657, 673.

VÁLMÍKÍYA RÁMÁYANA with comparative foot-notes, edited by Pt. Rasik Lal Bhattácharya M. A., Benares 689.

NYÁYASIDDHÁNTAMANJARI by Bhattácháryachudámaṇi Jánakí Náth, with the commentary Nyáyamanjarísára by Yádaváchárya, edited by Pandit Jíwa Náth Mishra, Professor, Sanskrit College, Benares ... ... 705.

BRAHMÁMRITAVARSHIṆI, edited by S. Vyankataramana Iyer, B. A., B. L., High Court, Triplicane, Madras 721.

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

5696199
APR 11'77 H
CANCELLED

Digitized by Google